तिलक-महाराष्ट्र-विद्यापीठ-शाखाभूत-

वैदिक - संशोधन - मण्डलेन

प्रकाशिता

शुक्ल-यजुर्वेदीया

काण्व - संहिता

पदपाठयुता

सायणाचार्य-आनन्दबोध-विरचितभाष्यद्वय-समेता

द्वितीयः खण्डः

[११ - २० अध्यायाः]

शेणई-कुलोत्पन्नेन डॉ. बे. रामचन्द्रशर्मणा

पाठभेदादिभिः संशोध्य संपादिता

शाके १९१४

Printed by .

Mrs. N. M. Dhadphale,
Secretary, Vaidika Saṁśodhana Maṇḍala Mudraṇālaya,
Pune 37.

First edition

Copies 1000

Price Rs. 100/-

Published by :

Mrs. N. M. Dhadphale
Secretary, Vaidika Saṁśodhana Maṇḍala,
Pune 37.

Tilaka-Mahārāṣṭra-Vidyāpīṭha

VAIDIKA SAṀŚODHANA MAṆḌALA
PUNE 37.

KĀṆVA SAṀHITĀ

WITH THE PADAPĀṬHA
AND THE COMMENTARIES OF
SĀYAṆĀCĀRYA AND ĀNANDABODHA

Vol. II
(Chapters 11-20)

Edited by :
Dr. B. R. Sharma

Published with the financial assistance received from the Rashtriya Samskrit Samsthan, New Delhi.

1992

INTRODUCTION

In the Introduction to the first volume of the *Kāṇva-saṁhitā*, I have given brief account of the Yajurveda in general and the Śukla Yajurveda in particular. I have also briefly reviewed the two commentaries: one of Sāyaṇa and the other of Ānandabodha published therein. Incidentally I made a brief assessment of the commentary of Anantabhaṭṭa, as well as of that attributed to Sāyaṇa on the *Uttara-viṁśati*, the latter half of KS, comprising Chapters 21-40. I referred to in this context again, briefly of course, the version of KS as prevalent in Orissa, on the one hand, and the version that is in vogue in Tamil Nadu, Karnataka and Maharashtra, on the other. Here I have brought to the notice of the readers the influence of the Orissan version reflected in that of Andhra, in the region bordering Orissa, as is evident from the commentary of Ānandabodha.

The second volume comprising chapters 11-20 now being published, completes the *Pūrvaviṁśati*, the first half of KS. The commentary of Sāyaṇa ends with this second *daśati*, whereas the Bhāṣya of Ānandabodha continues further covering the entire/latter half as well. This is the only commentary of KS now available to us that covers all forty chapters of KS including the *Iśāvāsyopaniṣad.*

The Saṁhitās of Yajurveda comprising verses and formulas are compiled strictly in the order in which the rituals are executed by the priests. The Śrautasūtra, which differs from recension to recension, provides guidelines for execution of each such ritual act with procedures in minute details. Unless the ritual procedures are synchronised with accurate recitation of the mantras prescribed in the Śrauta-sūtras the results sought by a sacrificer may not be attained. Sāyaṇa, therefore, in his commentaries on Taittirīya recension of the Kṛṣṇa-Yajurveda, on the one hand, and the Kāṇva recension of Śukla Yajurveda, on the other, follows a definite line in his interpretation of these two primary Saṁhitās of the Yajurveda. In conclusion of the Introduction to his commentary on TS, Sāyaṇa briefly spells the lines he followed in commenting on these Saṁhitās. He says the metre of a verse is to be ascertained with reference to book on metrics and deity will have to be identified as implied or expressed from his explanation of the text itself. In the course of commentary the relevant Brāhmaṇa portion (of Yajurveda) will be cited. Since all particulars about the mantras to be recited and the procedures concerning the rituals are not available in one Brāhmaṇa the authors of Kalpasūtras collected them from other Brāhmaṇas also and included them in the Śrauta-sūtras such as Baudhāyana etc. These details will be followed as far as they don't go against the spirit of Brāhmaṇa (of Yajurveda) when the mantras are executed in respective rituals (TS Pt. II. V. S. M., Poona 1970).

From the introductory verses of Sāyaṇa's commentaries, it becomes clear that this colossal project of writing commentaries on all the four Vedas and their

Brāhmaṇas and Āraṇyakas was well-planned on the lines of priority, – a project unprecedented in the history of world litereature. Before taking up the Saṁhitās one by one he experienced as a probationer, by writing brief comments on two books, one on Mīmāṁsā and the other on the Vedānta.

In the introductory verses of each Saṁhitā reaffirming his commitment and expressing his determination to successfully accomplish the great task undertaken by him, he worked incessantly and the works one by one as it was finished, rolled on like a finished gem from the hand of a diamond-cutter to form a bright garland dedicated to the great Vedic tradition.

After TS Sāyaṇa's next venture was his commentary on the Ṛgveda. He has demonstrated his commendable knowledge of the doctrine of Mīmāṁsā in his Upodghāta to RV, where he also discussed many relevant problems including the origin of the Vedas. In his commentary of RV he has shown his unparallelled mastery over the Vedic language explaining etymology, morphology, semantics, accentography etc. of the vocables with quotations from the relevant authorities. He proudly concludes his introductory verse with :

एतस्मिन् प्रथमोऽध्यायः श्रोतव्यः संप्रदायतः ।
व्युत्पन्नस्तावता सर्वं वोढुं शक्नोति बुद्धिमान् ॥ ६ ॥

After having finished his commentary on the Sāmaveda he took up KS where he followed the line already set by himself in his commentary on TS. Here he proceeds with greater ease since the Śukla Yajurveda contained only the text comprising verses and formulas and not the theological discussion. He quotes and explains first the relevant sūtra from the Kātyāyana Śrauta-sūtra and then proceeds to comment on the text. Here and there he does cite also the Śrauta-sūtras of Baudhāyana and of Āpastamba and also the relevant formula from TS in order to explain the ritual procedures in clearer terms. In this way he made his commentaries on the Yajurveda very educative and informative, rendering them as authentic source material for a student of sacrificial science and a dependable guide in sacrificial procedures for a priest officiating in sacrifices. After explaining the citation from the Kātyāyana Śrauta Sūtra KŚ (K) he quotes the whole formula from the KS covered by that Śrauta citation, saying 'पाठस्तु'।

Ānandabodha, on the other hand, does not seem to bother much about the rules regarding the employment of mantras in respective rituals as such. He makes an attempt now and then to explain the mantras allegorically, unlike Sāyaṇa, who being a ritualist himself first and then a Mīmāṁsaka does not go beyond the factual meanings of the mantras or ventures to cross beyond the explicit exoteric line in his explanation. e. g. in the Rājasūya sacrifice the king is made to stand on the hide of tiger when the Adhvaryu with a piece of gold touches first the feet of the king and then his head reciting :— ओजोऽसि सहोऽसि अमृतमसि (KS XI.5.6) which Sāyaṇa explains :— हे सुवर्ण त्वम् ओजः तेजोरूपम् असि। सहः

बलरूपम् असि । अमृतम् अविनाशम् असि । whereas Ānandabodha interprets the same as– ओजः मनोबलम् असि । सहः ब्रह्मेन्द्रियबलम् । अमृतं प्राणबलम् । प्राणो वा अमृतः इति श्रुतेः (KS. XI.5.6). Similarly while interpreting : हिरण्यरूपा…मित्रोऽसि वरुणोऽसि (KS XI.5.7) Ānandabodha says … इति अध्यात्मविषयं व्याचष्टे । आधिदैवतं तु .. ।

Whenever the text is flexible and admits of exoteric as well as esoteric explanation Ānandabodha makes an attempt to bring out the esoteric and metaphysical implication that contained in the tradition of sacrificial institutions. After touching the factual meaning first that is applicable to the obvious *Dravya yajña*, the material sacrifice, he proceeds further to explain philosophical implications hidden therein e. g. Ānandabodha explains the verse : हंसः शुचिषद्वसुरन्तरिक्ष … (KS XI.7.5) first as applicablc to the Supreme spirit in the form of the Sun who pervades the entire universe but then subsequently while interpreting the words ऋते and बृहत् he convincingly resorts to his esoteric exposition as :- ऋतं सत्यम् । ऋ गतौ । बृहि वृद्धौ । नित्यशुद्धबुद्धसत्यपरमानन्दरूपं ब्रह्म बृहत् अभिधीयते । एवं परब्रह्मवादिता अस्य मन्त्रस्य । एवं तत् परं ब्रह्म प्रत्यवतरामीति वाक्यशेषः ॥— He does not miss, in his quest of spiritual implications in the mantras, even the metres on which a mantra is composed. He says : परब्रह्माभिधायिनी अतिजगती । Sāyaṇa hardly ever goes beyond the obvious external perimetre of sacrificial institutions.

Ānandabodha begins his commentary mentioning, as a rule, the name of the Ṛṣi, metre and deity of a mantra, which, while being the implicit integral parts of a mantra, mainly act as guidelines to its inner meaning. For this reason it has been made obligatory for a student and reciter to utter these facts about a mantra before the actual recitation begins.

The Śrauta Sūtra : Mahīdhara, the commentator of MS, and Sāyaṇa, the commentator of KS, quote the relevant sūtras from the Kātyāyana Śrauta Sūtra while explaining the text of the respective Saṁhitās. Since the text that comprises verses and formulas, is arranged in the order in which the rituals are executed in sacrifices and the Śrauta Sūtras are composed to conform to this ritual order that is adhered to in their corresponding recensions, it becomes easier for the commentators to identify the mantras to be employed in successive rites and explain them. Mahīdhara, himself being a follower of MS, hardly thinks of Saṁhitās or Śrauta Sūtras other than those of his own. But Sāyaṇa, with his rich exegetical experience in this field does not confine himself to KS, its Brāhmaṇa and Śrauta Sūtra alone. He often goes a step further and quotes the sūtras from Āpastamba and Baudhāyana and also the formulas from the Taittirīya Saṁhitā and citations from its Brāhmaṇa and occasionally from its Āraṇyaka as well, while explaining the sacrificial procedures so that a student could have a broader and clearer perspective of the complex sacrificial institutions as practised in these two schools of Yajurveda.

The Śrauta Sūtras while describing the ritual procedures cite the *pratīkas*, the initial words of the mantra that synchronizes the rite to be performed.

In this connection it may be noted that although the corpus of the text is the same in these two recensions of the Vājasaneyī Śukla-Yajurveda, to a very great extent, the text is not always uniformly divided into kaṇḍikās and mantras in these two recensions, which has resulted sometimes in a strange way i. e., the concluding part of a mantra in one recension at the same time forming the beginning of the next formula in another recension. Further sometimes there are recensional differences in the order of execution of the rites within same ritual or within the same sacrifice and according to which the mantras in respective recensions are compiled.Then there are variants in both these recensions and such variants sometimes may form the *pratīka* of a mantra itself resulting in difference in the incipit (Pratīka) of a mantra cited in the sūtras in the context of the same rite. Thus the *yajus* and verses may be split and separated in two successive mantras or Kaṇḍikās; or the order of arrangement of the formulas in the same ritual may differ; or some of the minor rites may not find a place in another recension resulting in the absence of the corresponding formula in the concerned recension. Because of all these and many more other problems though minor, the sūtras of the Śrauta Sūtra cited in these two recensions do differ in places since these citations are obviously from two different Śrauta Sūtras, but are ascribed to the one and the same author.

1. In the Introduction to the first volume we have shown how the mantras of the first Anuvāka pertaining to the first rite itself were divided splitting and separating the last and concluding mantra, वसोः पवित्रमसि pertaining to the initial rite and was enjoined to the following formula in MS, which applies to the next rite that pertains to *ukhā*, the couldron (P.IV). When we look at this wrong division of the text that too at the concluding point when the Adhvaryu is to tie the *darbha* straw to the *palāśa* twig and place it by the fire place of either Āhavanīya and Gārhapatya, which is to synchronize with recitation of the relevant mantra, we can't help feeling sometimes that this kind of unnatural division of the text was done with no purpose other than to maintain in the recensional cleavage between these two Śākhās.

2. The formulas mentioned in KS 5.8.1–5 corresponding to MS 31–33 pertain to the rituals of raising dhiṣṇyas, the minor altars in different places on the sacrificial ground with the earth brought from the *cātvāla*. The ritual commences with the raising of the first mini-altar that belongs to the *Āgnīdhra* priest, which is done in accompaniment of recitation of the mantra, विभूरसि प्रवाहणः। Thereafter seven more mini-altars are raised one by one reciting the prescribed formulas, which include : शुन्ध्यूरसि मार्जालीयः (KS 5.8.2) applying to the Mārjālīya, minor altar which is a place meant for cleansing the sacrificial vessels.

The second phase of this ritual in KS commences with the formula ऋतधामासि स्वर्ज्योतिः which applies to the ritual that relates to the *Audumbarī* tree planted in the sacrificial ground where the Sāman chanters sit and sing the Sāmans touching it, and concludes with समूह्योऽसि विश्ववेदाः (KS V 8.5a) which is recited while sanctifying the place, *utkara*, where the garbage including the grass and shrubs, removed from the sacrificial ground are deposited.

These are the two sets of formulas, one pertaining to the eight minor altars and the other to the nine ritually important places on sacrificial ground where some of the subsidiary rites are performed by the respective priests at appropriate time in a sacrifice.

The Anuvāka comes to an end with an invocation to the Fires representing the eight minor altars praying them to overlook the short-comings and errors if any, either by way of lapse or by way of committing a thing that was not prescribed in the procedures.

In MS all these rituals except the one pertaining to *utkara* are mentioned, but at the same time the serial order after the Mārjālīya rite differs in KS and MS as given below. Here under KS the name of the rituals as they occur in it is given in serial order and against the names, in the second column the relevant formulas are written, and then in third column under [1]MS the serial number of that particular ritual as it occurs in it is given :

	KS.	Formula		MS
1.	औदुम्बरी	ऋतधामासि स्वर्ज्योतिः	=	5
2.	ब्रह्मासनम्	समुद्रोऽसि विश्वव्यचाः	=	6
3.	प्राचीनवंशद्वारम्	ओजोऽस्येकपात्	=	7
4.	प्राजहितः (प्राचीनगार्हपत्यः)	अहिरसि बुध्न्यः	=	8
5.	आहवनीयः	सम्राडसि कृशानुः	=	1
6.	बहिष्पवमानदेशः	परिषद्योऽसि पवमानः	=	2
7.	चात्वालम्	नभोऽसि प्रतक्वा	=	3
8.	शामित्रम्	मृष्टोऽसि हव्यवाहनः	=	4
9.	उत्करः	समुह्योऽसि विश्ववेदाः	=	–

The MS after its eighth formula, which corresponds to the forth in KS, adds following three more formulas which were not found in KS.

1. ...सम्राडसि कृशानुः परिषद्योऽसि पवमानो नभोऽसि प्रतक्वा मृष्टोऽसि हव्यसूदन ऋतधामासि स्वर्ज्योतिः (MS. 5.32);
समुद्रोऽसि विश्वव्यचाः ... (MS. 5.33)

KS	Formula	MS	No.
—	वागस्यैन्द्रमसि	सदः	9
—	समुद्रोऽस्यमृतस्य द्वारौ मा मा संताप्सम्	सदोद्वारे शाखे	10
—	अध्वानमध्वपते प्र मा तिर		
	स्वस्ति मेऽस्मिन् पथि देवयाने भूयात	सूर्यः	11

Here it may be noted the MS in place of *utkara* has added two more places, viz. सदः and ऋतस्य द्वारौ followed by a prayer to the sun for safe journey of the sacrificer to heaven. Thereafter in the following kaṇḍikā it adds a formula मित्रस्य मा चक्षुषेक्षध्वम् (MS. 5.34a) invoking the Agnis of the dhiṣṇyas to look upon the Yajamāna with kindness, which may be taken as a substitute of ऊनातिरिक्तस्य प्रतिष्ठा of the KS. The following formula : [2] अग्नयः सगराः ... मा हिंसिष्ट is common in both Saṁhitās.

In this context, when we glance through the procedures, the formulas, the serial order of rites, etc., in these two Saṁhitās, both belonging to the one and the same Vājasaneyi Śukla Yajurveda tradition, the important factor that comes to our notice is that these two recensions have had the Śrauta Sūtra with different versions just as they have now the Śatapatha Brāhmaṇa with two different versions. Strangely enough unlike in the case of the other Vedas in the present instance both versions of the Śrauta Sūtra belonging to KS and MS are ascribed to one and the same author i. e. to *Kātyāyana*.

The MS with commentaries of *Uvaṭa* and *Mahīdhara* does not contain the formula : समुद्रोऽसि विश्ववेदा ऊनातिरिक्तस्य प्रतिष्ठा and neither of the commentators takes notice of the rite in which the *utkara*, the place, where the rubbish is deposed, is invoked. But the Kātyāyana Śrauta Sūtra with the *Karkabhāṣya* and also with *Devayājñikapaddhati* (Chowkhamba as well A. Weber's edition) refers to this rite in a separate sūtra : उत्करं समुद्रोऽसि विश्ववेदा ऊनातिरिक्तस्य प्रतिष्ठेति (KSS (M) viii. 6.22). It may be noted that the KŚS of Kāṇva includes all these rituals from औदुम्बरी to उत्कर in one sūtra at a stretch (vide KŚS viii. 6.23)

The KŚS of KS finishes the dhiṣṇya rituals in a short sentence :— धिष्ण्यान्निवपति विभूरसीति प्रतिमन्त्रम् (KŚS (K) *viii.* 6.15) whereas the corresponding sūtra cited by Mahīdhara gives details of procedures to be followed as : धिष्ण्यान्निवपत्युद्धतावोक्षितं पुरीषं निवपति स्फ्येनान्वारभ्य उदङ्ङुपविश्य विभूरसीति प्रतिमन्त्रम् (KŚS (M) viii. 6.16). Thus the sūtra referring to the formulas pertaining to the same rite cited in the commentaries of KS and MS even though differ in

2. अग्नयः सगरानिति धिष्ण्यान् (KŚS (M) IX.8.26) *and* रौद्रेणेति सर्वत्र (KŚS (K) VIII 6.15.)

wordings, the relevent formulas and the procedures to be followed are identical in both these recensions. Mahīdhara further gives more particulars about procedures and the locations of each minor altars with citations from the KŚS (M) and supplementing the information with quotation from Śatapatha Brāhmaṇa of his recension. But Sāyaṇa resorts to TS, his own Sākhā of the Yajurveda and to Āpastamba and Baudhāyana Śrautasūtras of the TS for details. Sāyaṇa often looks forward to TS and its Sūtras whenever the KSS (K) does not supply the necessary details about the ritual procedures. It must be admitted that Mahīdhara gives more details about ritual procedures which he draws from the literature of his own school, i. e., the MS and its ancillaries whereas Sāyaṇa, an adherent of TS, who has already dealt with the ritual procedures in more details while commenting on TS, draws the information about the *Yajña-prakriyā* sacrificial procedures of his school, may be, from his memory, when he took up the KS for interpretation. The commentary of Mahīdhara on 5.31-32 and Sāyaṇa's commentary on 5.8.1-2 may be compared in this respect. Mahīdhara tries to support all the procedures with citations from the KŚS (M) and ŚBr. (M) while Sāyaṇa after citing the KŚS (K) makes only brief statement and further quotations in his commentary will be mostly from the corpus of the Taittirīya recension, e. g. speaking about the mini-altar Mārjālīya, which is used for cleansing the sacrificial vessels, Mahīdhara observes : एवं होत्रादिधिष्ण्यान् सदसि निर्माय वेदेर्दक्षिणभागे मार्जालीयं निर्माति। तदाह – अग्नीध्रीयाद्दक्षिणाऽ संप्रति वेद्यन्ते दक्षिणामुखो मार्जालीयम् (KŚS (M) viii. 6.21) इति। शुन्धयतीति शुन्ध्यूः। मार्ष्टीति मार्जालीयः। तत्र हि पात्राणि प्रक्षाल्यन्ते, whereas Sāyaṇa after stating : तान् होत्रादिधिष्ण्यान् सदसि निर्माय वेदेर्दक्षिणभागे मार्जालीयधिष्ण्यो निर्मातव्यः। quotes the Baudhāyana Śrauta Sūtra:– दक्षिणे वेद्यन्ते मार्जालीयं निवपति (BŚS. 6.25) which unlike KŚS (M) does not give the exact location for raising the mini-altar.

The Sūtra dwells on the subsequent rites which commence with the consecration of औदुम्बरी, the place where the singers of Sāmans sit during the sacrifice, and conclude with the consecration of उत्कर :– सदोद्वारं पूर्वेण तिष्ठन्ननुदिशत्यौदुम्बरी - ब्रह्मासन - शालाद्वार्य - प्राजहित - आहवनीय - बहिष्पवमानदेश - चात्वाल - शामित्रोत्करान् ऋतधामेति प्रतिमन्त्रम् (KŚS (K) viii. 6.23), while the corresponding Sūtra cited by Mahīdhara begins with [3]आहवनीय and concludes with प्राजहित, both following different serial order as given above, although the formulas pertaining to respective rites happened to be common. Further the formula of *utkara* which is found in KS and the rite executed on that occassion which is referred to by the KŚS (M) and (K) are missing in MS and both commentators, Uvaṭa and Mahīdhara remain

3. सदोद्वारं पूर्वेण तिष्ठन्ननुदिशत्याहवनीय-बहिष्पवमानदेश-चात्वालशामित्रौदुम्बरी-ब्रह्मासन-शालाद्वार्य-प्राजहितान् सम्राडसीति प्रतिमन्त्रम् (KŚS (M) VII 6.21)

silent about it. This is the last of the nine important places, all form inseparable parts of the Vedi, the main altar and are connected with various acts to be executed in the process of a series of rites to be performed in a sacrifice and therefore it cannot be said that it was perhaps not in vogue in the MS tradition which Uvaṭa and Mahīdhara represented. The Śrauta tradition is recorded in the Śrauta Sūtras and, in the present context, this rite is recorded in the Śrauta Sūtras of KS as well as MS. The contiguous rituals of which the mantras are composed continuously in verses or formulas are referred to in the Śrauta Sūtra, after mentioning the names of rites and at the end citing the beginning of a mantra, the verse or formula, that applies to the first rite in this series as in KŚS (K) viii. 6.23; KS 5.8.39. In KŚS (K) this rite is continued upto *Utkara* whereas in the KŚS (M) it stops at *Prājahita* omitting altogether *utkara* from the series. But subsequently a separate sūtra is formed to include this rite alone as उत्करऽ समुद्योऽसि विश्ववेदा ऊनातिरिक्तस्य प्रतिष्ठेति (KŚS (M) viii. 6.2) which shows omission was later detected and corrected on the second thought. It is noted in this connection that the chapter IX.8.12-17 of KŚS (M) mentions the ritual procedure to be followed after *vapā-mārjana* in which the priests, when leave for meals, are asked to worship the nine *dhiṣṇyas* in the same order from *Agnīdhrīya* to *utkara* repeating the respective formulas, विभूरसि etc,. From this it is clear that the *utkara* rite cannot be deleted from the[4] *dhiṣṇya* rituals.

However, it must be noted, without the *utkara* ritual, this series of rites would remain incomplete effecting the whole procedure and ultimately as a consequence upsetting the final result. It is believed that each act, howsoever minor creates an *a-pūrva*, an unseen effect, and the totality of all acts, minor and major meticulously carried out, without even the slightest error or lapse anywhere, collectively produces a *Mahad-apūrva*, which, ultimataly automatically brings about the sure result sought by the sacrifice. This is the doctrine of the *Pūrva-Mīmāṁsā*.

The MS after अहिरसि बुध्न्यः (5.33), the formula of *Prājahita* rite, adds the extra formulas : वागस्यैन्द्रमसि सदः ऋतस्य द्वारौ मा मा संताप्तम्। अध्वानमध्वपते प्र मा तिर स्वस्ति मेऽस्मिन् पथि देवयाने भूयात् (5.33) pertaining to the rites of सदस् and द्वारशाखा which conclude with a prayer addressed to the Sun for the safe journey of the Yajamāna to heaven. Thereafter before the exit from the sacrificial hall the

4. वपामार्जनं कृत्वा सयजमाना धिष्ण्यानुपतिष्ठन्ते विभूरसीति प्रतिमन्त्रम् ॥ उत्करान्तं कृत्वा वागसीति सदोऽभिमर्शनम् ऋतस्य द्वाराविति द्वार्ये ॥ आभिमन्त्रणमुत्तरैः ॥ अध्वानमध्वपते इति सूर्यम् ॥ मित्र मेत्यृत्विजः ॥ अग्नयः सगरा इति धिष्ण्यान् ॥ एतत्सर्पणम् ॥ (KŚS (M) IX. 8.12–18).

Yajamāna addresses the priests[5] seeking their goodwill, a sort of formal thanksgiving for their co-operation and then an address to the Fires of mini-altars seeking their kindness. These rites are found recorded in KŚS (M) and not in KS.

Sāyaṇa finding no corresponding sūtra in KŚS (K) to ऊनातिरिक्तस्य प्रतिष्ठा सगराः...हिंस्सिष्ट। (KS. 5.8.5) observes :- विभूरसि इत्यारभ्य विश्ववेदा इत्यन्ताः सप्तदश मन्त्रा उक्ताः। तेषां सर्वेषां शेषभूतः ऊनातिरिक्तस्य इत्यादिको मन्त्रभागः। यद्यपि कात्यायनः रौद्रेणेति सर्वत्र (KŚS (K) 8. 6.17) इति उवाच न ऊनातिरिक्तस्य सर्वोऽपि इति। तथापि रौद्रेण इति अस्य अङ्गोपलक्षणत्वात् ऊनातिरिक्तस्य इत्यादिकः सर्वोऽपि मन्त्राणामुक्तानां शेष इति द्रष्टव्यम् (KŚS 5.8.5) i. e. although there is no KŚS applicable to the remaining formulas after विश्ववेदाः from ऊनातिरिक्तस्य to हिंस्सिष्ट the sūtra रौद्रेणेति सर्वत्र (KŚS (K) 8. 6.15), should be deemed to have covered the entire remaining portion from the beginning to the end. The MS, however, has a separate sūtra, अग्नयः सगरा इति धिष्ण्यान् (KŚS (M) /IX.8.17 referring to this formula.

There are several sūtras, cited by Sāyaṇa and Mahīdhara, which, although refer to the same sacrificial rites, differ with each other in wordings and there are some which are found only in either of the two and not in both. Moreover the initial words (*pratīka*) of many mantras, which are executed in common rites in KS and MS also sometimes differ as cited in the Śrauta Sūtras. Some more examples are given below :

राजसूये पेषणोपलात् पतितस्य पिष्टस्य उल्मुके आहुतिः	१. शम्यायाः पश्चाद्धविष्यमन्न॰ ... दक्षिणाग्नेरुल्मुकम् ... स्वयंप्रदीर्णे इरिणे ...जुहोति॥ (KŚS (K) 15.1.9–10) = KS.11.1.1C.
,,	२. शम्यायाः पश्चात् ...इरिणाग्न्युल्मुकम् ... स्वयमप्रदीर्णे इरिणे ... जुहोति (KŚS (M) 15. 1.10) MS. 9.35
राजसूये व्याघ्रचर्मणि अद्भिरासिञ्चनम्	१. अभिषेचनीयेष्वेना आसिञ्चति ... (KŚS (K) 15.5.6 = KS. 11.4.3
,,	२. अभिषेचनीयेष्वेनां व्यानयति ... (KŚS (M) 15.5.6) = MS. 10.7C
राजसूये यजमानाय इषुप्रदानम्	१. रुजासीति प्रतिमन्त्रमादाय ... तिस्रः इषुः प्रयच्छति (KSS (K) 15.5.20)
,,	२. द्रवासीति ... तिस्रः इषुः प्रयच्छति (KŚS (M) 15.5.20) = MS. 10.8

5. मित्रस्य मेत्यृत्विजः (KSS (M) IX. 8.16)

We have thus, in the Śukla Yajurveda two different versions of the same Śrautasūtra, both by the same author, rather a strange example in the history of of Srauta literature. We have, on the contrary, in the Kṛṣṇa Yajurveda several Kalpasūtras, all attached to the one and the same recension i. e. Taittirīya Saṁhitā which has as many as five Kalpasūtras and the Maitrāyaṇīya Saṁhitā, two, all by different authors. As far as Śukla Yajurveda is concerned it is likely that the original Śrauta Sūtra of this Veda ascribed to Kātyāyana might have been adapted to different Śākhās, when the text of these Śākhās had been fixed in the course of time, by making the minor necessary changes in the form of additions and deletions of the mantras, changes in the serial order of formulas and verses in the text, all pertaining to the same sacrifice, etc. in accordance with the ritual traditions of the regions where these śākhās were established. This editing of the original KŚS might have been done either by Kātyāyana himself or by other responsible authorities who, however, retained the name of the original author out of regard to the founder of this new Yajurveda, who was no other than Kātyāyana's father. The Śrauta Sūtras of the recensions of other Vedas too were actually re-shuffled in similar circumstances but then they were named after the compilers and bear different titles;e.g., the Lāṭyāyana Śrautasūtra of Kauthuma and the Drāhyāyaṇa Śrauta Sūtra of the Rāṇāyanīya. The texts of these two Śrautasūtras are identical to a very great extent, the main difference being the arrangement of the sūtras which was done by the compilers keeping the texts of respective recensions before them. Yet the sūtras are attributed to two different authors who simply edited the original Śrautasūtra introducing the recensional variants and also changing the arrangement of the sūtras wherever it was warranted. But in the case of Vājasaneyi Saṁhitās of Mādhyandina and Kāṇva the original author's name has been retained in spite of the changes introduced in these two sūtras.

VARIANTS 1.

There are variant readings in these two recensions, some of which selected at random, are given below :

1. सुविते in KS 5.2.3 and स्विते in MS 5.5 the process of phonetic evolution being स्त्रिते < सु + इते > * सु + व् + इते > सुविते.

In Vedic language there are words, *ekapadas*, without the internal *Sandhi*, and also verses where the Sandhi rules operated with option. In such cases, a glide, resembling palatal or labial sound depending upon the nature of the euphonic combination appears whenever such word is being uttered. This glide later, in course of time, formed as part of the word, as in सुविते when such vocables were reduced in writing. But the *Sandhi* rule operated in the cases where such a word was written as it was without euphonic change. In both cases the original word did undergo alteration, but in the first case it

retained the number of syllable it had had and in the latter where the sandhi rule operated due to euphonic combination it became short of one syllable, rendering the metre defective with the deficit of one syllable. It is interesting to note in the present instance that *Uvaṭa*, the commentator of MS refers to the word as सुइते and explains : साधुगते कल्याणे लोके, which clearly shows that the word was correctly spelt without alteration in his region as सुइते and *not* as सुविते or स्विते।

2. छन्दोमानानाम् (KS 4. 8.1) Sāyaṇa explains this word as अस्मिन् छन्दसि एतावन्ति अक्षराणीति मानं परिमाणं यैर्देवैर्ज्ञायते ते छन्दोमानाः। तेषां ...। Ānandabodha interprets it as an adjective ... छन्दोमानानामन्येषां छन्दसाम् whereas in MS the reading is छन्दोनामानाम् (MS 4.24) which, Uvaṭa explains :- नामशब्दोऽनर्थकः। अन्येषां छन्दसाम्। and Mahīdhara :- छन्द इति नाम येषाम् अन्येषां छन्दसाम्। Here the original reading, छन्दोमानानां by metathesis was transformed as छन्दोनामानां in MS and an attempt was made to derive the meaning from it applicable in the present context. It may be noted that the genetive plural of नामन् is not नामानां but नाम्नाम्. The verbal alteration, it is possible, might have occurred due to scribal mistake at a certain stage of transcription, which was not noticed immmediately and later it was accepted as authentic reading.

3. दृवा (KS 11.4.5; MS 10.8). The reading found in the majority of MSS is द्रुवा which is obviously due to the contamination of local tongue where ऋ is wrongly pronounced as रु. The commentators derive the term from √दृ.

From the above comparative study of variants seen in KS and MS it appears that KS has retained the older forms. But from a casual study we cannot come to a definite conclusion on this important major problem. An exhaustive study of the variants with comparison not only of KS and MS but also other Samhitās too is certainly called for before coming to a decision.

The Vedic ritual traditions as reflected in the Taittirīya and other Kṛṣṇa Yajurveda recensions on one hand and the KS and MS of the Śukla Yajūrveda on the other, warrant a close scrutiny with reference to the ritual sequences and the corresponding formulas as recorded in these two major sources for an authentic study of Vedic rituals. To begin with, it may be confined to the KS and MS but no study of the Vedic rituals would be complete without the knowledge of their earlier practices in the schools of Kṛṣṇa Yajurveda, at least in Taittirīya recension. In our brief comparison of the rituals pertaining to mini-altars and various locations in the sacrificial enclosure where rites related to the main sacrifice are performed, it was observed, at a certain point the KS and MS differ in ritual sequences and that the MS contained some extra rites which were not found in KS tradition. It may be noted in this connection that MS generally follows the TS in this regard.

Vagaries of Anandabodha's interpretation :

In our introduction to Volume I, we had stated that in the successive volumes, some more instances of wrong interpretation of Ānandabodha will be brought forth. Here are some of them :

1. भद्रा रातिः सुभग (KS 16.5.20).

Ānandabodha wrongly assumes the word भद्र here to be a vocative without noticing the accentual position in the word. Moreover, he believes अ at the end in भद्रा is lengthened for rhythmic purpose. It may be noted भद्रा is accented on the last syllable and if it were a vocative, the accent would have been on भ, the first syllable, and not on the last; as per the rule of Pāṇini, " आमन्त्रितस्य ' (P 6.1.198).

2. वृषाग्निं वृषणं ... (KS 12.4.10)

Here the word वृषा refers to donkey which carries the earth for making *ukhā*, a sacrificial vessel. Ānandabodha wrongly separates the word as वृष from वृषाग्निं and assumes that it is a verb meaning 'to spray' water– (सिञ्च). He did not realise that this was a formula to be recited by Adhvaryu holding on the lump of earth loaded on the back of donkey as prescribed in KŚS, धारयेत्येषामुपरि पिण्डमनुपस्पृशन् प्रैतु वाजी – वृषाग्निम् इत्यश्वखरयोः (KŚS (K) 15 3.10). Here there are two formulas, the first one, प्रैतु वाजी... (KS 12. 4.9) is to be recited while the Adhvaryu holds on the load of earth kept on back of the horse without touching the earth, and the second, वृषाग्निम्... (KS 12. 3.10), while it is on the back of donkey. Therefore Ānandabodha's interpretation is irrelevent. He hardly realises that he has been interpreting a Saṁhitā of sacrificial formulas.

3. वि यत् सूर्यो न रोचते बृहद्भाः (KS. 13.3.5b)

Here वि and यत् are two separate words and both are accented. The first is a perfix and the second a pronoun. Ānandabodha without taking notice of these facts assumes वि यत् to be a single word and explains : वियत् वियति गगने सूर्यः न सूर्ये इव. He, thus, betrays his utter ignorance of Vedic grammar; hardly cares to refer to the Padapāṭha and never consults the Śrautasūtra !!

SHENOY NURSING HOME
Secundarabad-26
12-12-90

B. R. SHARMA

काण्व-संहिता – विषयानुक्रमणी

संक्षेप - विवरणम्

अको – अमरकोशः
आपश्रौ – आपस्तम्बश्रौतसूत्रम्
आश्वश्रौ – आश्वलायनश्रौतसूत्रम्
उसू – उणादिसूत्रम्
ऋ / ऋसं – ऋग्वेदसंहिता
ऐब्रा – ऐतरेयब्राह्मणम्
कउ – कठोपनिषत्
काठसं – काठकसंहिता
काशब्रा – काण्वीयं शतपथब्राह्मणम्
काश्रौ – कात्यायनश्रौतसूत्रम्
छांउ – छान्दोग्योपनिषत्
जैब्रा – जैमिनीयब्राह्मणम्
तांब्रा – ताण्ड्यमहाब्राह्मणम्
तैउ – तैत्तिरीयोपनिषत्
तैब्रा – तैत्तिरीयब्राह्मणम्
तैसं – तैत्तिरीयसंहिता
नि – निरुक्तम्
पा – पाणिनीया अष्टाध्यायी
पावा – ,, ,, वार्तिकम्
बृउ – बृहदारण्यकोपनिषत्
ब्रसू – ब्रह्मसूत्रम्
भगी – भगवद्गीता
मा शब्रा / शब्रा – माध्यन्दिनशतपथब्राह्मणम्
मुंउ – मुण्डकोपनिषत्
विष्णुपु – विष्णुपुराणम्
शांब्रा – शाङ्खायनब्राह्मणम्
सासं – सामवेदसंहिता
KS – Kāṇva Saṁhitā
MS – Madhyandina Saṁhitā
Ms – manuscript
KŚS – (K) Kātyāyana Śruta sūtrā (Kāṇva)
MŚS – (M) – Kātyāyana Śrauta sūtrā (Mādhyandina)

Acknowledgement

I have the priviledge to express on behalf of the Mandala the deep sense of gratitude towards the Executors of the Prof. S. Y. Ponkshe Nyasa – the trust founded by the late Smt. Sumatibai Ponkshe, for the munificent donation to the Mandala received for the publication of Kāṇva Saṁhitā.

MRS. SUMATIBAI PONKSHE

The late Mrs. Sumatibai Ponkshe (birth 29-7-1912, former Miss Sindhu Tryambak Gadre) was B.A. of the Bombay University and was married to Prof. Ponkshe on the 31st May 1930. She had a command on Sanskrit & could deliver sermons (प्रवचन आणि कीर्तन) through that medium. She was elected as a President of the Poona Women's Council. In her life she worked unselfishly for social upgradation; worked for the Civil Defence, Pune and was Hon. Head of the Welfare Service. She also worked for the cause of literacy and taught the importance of health-care and family planning to the women in the police-colonies. She used to educate the average by telling them the stories from the Epics and Puranas. She also wrote books for neo literates ' नवे साल ' published in 1957, ' पत्रावळ ' published in 1958, ' रामराज्य published in 1959, Both ' पत्रावळ ' & ' रामराज्य ' were awarded prizes by the Government of India under their scheme for neo literates. (Marathi Section).

She used to take interest in sports such as Cricket, Tennis and Batminton and was for a long time Secretary and later Chairman of the Ladie's Wing of the P. Y. C. Gymkhana.

She was very kind, loving and cordial hostess and everyone around her used to experience her hospitality whenever they visited her home. In other words she was a complete match to her husband – the late Prof. Y. S. Ponkshe. Both formed the execellent couple of exemplary and laudable career.

SHRI. SHANKAR YADAV PONKSHE

A nephew of the late Namdar Gopal Krishna Gokhale, Shri. Shankar Yadav Ponkshe joined the well known Fergusson College Pune, where once his maternal uncle Prof. G. K. Gokhale was teaching. Passing his M. A. Exam. from Fergusson College he proceeded to Nagpur for his LL. B. course. Althogh a graduate in Law Shri. Ponkshe preferred the career of a teacher to that of a legal practitioner. He was a Professor of History and Economics in the S. N. D. T. College for women for more than twenty years. In his career as teacher he always used to help financially many a needy and poor lady student. He also donated a sum of Rs. twenty five thousand to the College, he was serving.

He was interested in sports, and had proficiency in playing Cricket, Tennis and Batminton and trained his students also in these games.

Being an Economist he had a good knowledge of Stock-Market and earned lacs of Rupees in that business, of which his worthy wife founded a Trust with a view to helping financially worty institutes doing notable work in Vedic studies and Religion.

☆ ☆ ☆ ☆

The Mandala is very much gtateful to the Trustees of the Ponkshe Nyasa for considering the Mandala to be worthy to receive the donation from the Nyasa founded with a pious motive.

॥ ॐ ॥

शुक्ल-यजुर्वेदीया

काण्व - संहिता

सायणाचार्यविरचितेन वेदार्थप्रकाशेन
आनन्दबोधभट्टोपाध्यायविरचितेन भाष्यसंग्रहेण च समन्विता ॥

(द्वितीयो भागः)

[अथ एकादशाध्याये प्रथमोऽनुवाकः]

श्री गणेशाय नमः

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

दशमेऽध्याये वाजपेयिका मन्त्रा निरूपिताः । एकादशे राजसूयसंबन्धिमन्त्रा निरूप्यन्ते । तत्र प्रथमानुवाके नैर्ऋतेष्ट्यादिगता मन्त्रा निरूप्यन्ते ॥

हरिः ॐ ॥

एष ते निर्ऋते भागस्तं जुषस्व स्वाहा-
ऽग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा
यमनेत्रेभ्यो देवेभ्यो दक्षिणसद्भ्यः स्वाहा ।
विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा
मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरसद्भ्यः स्वाहा ।
सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा ॥१॥

[नैर्ऋतेष्ट्यादिगता मन्त्राः

एषः । ते । निर्ऋत इति निःऽऋते । भागः । तम् । जुषस्व । स्वाहा ।
अग्निनेत्रेभ्य इत्यग्निऽनेत्रेभ्यः । देवेभ्यः । पुरःसद्भ्य इति पुरःसत्ऽभ्यः ।
यमनेत्रेभ्य इति यमऽनेत्रेभ्यः । दक्षिणसद्भ्य इति दक्षिणसत्ऽभ्यः ।
विश्वदेवनेत्रेभ्य इति विश्वदेवऽनेत्रेभ्यः । पश्चात्सद्भ्य इति पश्चात्सत्ऽभ्यः ।
मित्रावरुणनेत्रेभ्य इति मित्रावरुणऽनेत्रेभ्यः । वा । मरुन्नेत्रेभ्य इति मरुत्ऽनेत्रेभ्यः । वा ।
उत्तरसद्भ्य इत्युत्तरसत्ऽभ्यः ।
सोमनेत्रेभ्य इति सोमऽनेत्रेभ्यः । देवेभ्यः । उपरिसद्भ्य इत्युपरिसत्ऽभ्यः ।
दुवस्वद्भ्य इति दुवस्वत्ऽभ्यः । स्वाहा ॥ द्रुः ॥ १ ॥

सा– कात्यायनः – "अष्टाकपालोऽनुमत्यै ॥ शम्यायाः पश्चाद्धविष्यमन्नꣳ स्रुवे कृत्वा दक्षिणाग्नेरुल्मुकमादाय दक्षिणा गत्वा स्वयंप्रदीर्णे ईरिणे वाऽग्नौ जुहोत्येष ते निर्ऋत इति" (काश्रौ १५·१·९-१०) इति । अस्यायमर्थः – अनेकेष्टिपशुसोमसमुदायात्मको राजसूयः । तत्र च पौर्णमास्यभिमानिदेवता काचिदनुमतिरुच्यते । तस्यै पुरोडाशोऽष्टापालः कर्त्तव्यस्तदर्थं तण्डुलाः पिष्यन्ते । तदानीं पेषणसाधनस्य पाषाणस्य अधस्तात् पश्चाद्भागे शम्याभिधः काष्ठविशेषः आधारत्वेन स्थापनीयः । पेषणकाले तस्याः शम्यायाः पश्चात् पिष्यमाणं हविर्यत् पतितं तावत् (तत् ?) स्रुवे संगृह्य दक्षिणाग्नेः सकाशादुल्मुकमादाय दक्षिणस्यां दिशि गत्वा स्वयमेव निष्पन्ने भूच्छिद्र उलूखलप्रदेशे वा स्थिते स्थापिते वा तस्मिन्नुल्मुकाग्नौ तं हविर्भागम् – 'एष ते' इति मन्त्रेण जुहुयादिति । पाठस्तु – 'एष ते निर्ऋते भागस्तं जुषस्व स्वाहा' इति ॥ हे ᵛनिर्ऋते देव, ᵛएषः इष्टरूपः ᵛभागः ᵛते त्वदीयः । अतस्त्वं ᵛतं भागं ᵛजुषस्व सेवस्व । ᵛस्वाहा सुहुतमस्तु ॥

अनन्तरं चातुर्मास्यगतानि चत्वारि पर्वाणि अनुष्ठाय पश्चात् परेध्मीय (पञ्चवातीय ?) नामकं कर्मानुष्ठातव्यम् । तत्र मन्त्रविनियोगमाह कात्यायनः – "आहवनीयं प्रतिदिशं व्युह्य मध्ये पञ्चस्वग्निषु जुहोत्यग्निनेत्रेभ्य इति प्रतिमन्त्रम्" (द्र. काश्रौ १५·१·२०) इति । पूर्वादिषु चतसृषु दिक्षु मध्यभागे चाहवनीयं पञ्चधा विभज्य तादृशेषु पञ्चस्वग्निषु 'अग्निनेत्रेभ्यः' इत्यादीनामेकैकेन मन्त्रेण स्रुवेण जुहुयात् । तेषां पाठस्तु– 'अग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणसद्भ्यः स्वाहा । विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरसद्भ्यः स्वाहा । सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा' इति ॥ ᵛअग्निनेत्रेभ्यः, अग्निर्नेता येषां ते अग्निनेत्रास्तेभ्यः । पुरस्तात् पूर्वस्यां दिशि सीदन्तीति पुरःसदस्तेभ्यः ᵛदेवेभ्यः ᵛस्वाहा सुहुतमस्तु । यमो

9. S2 स्रुवेण for स्रुवे
10. S2 दाक्षिणां for दाक्षिणा; S2 °प्रकीर्ण° for °प्रदीर्ण°
11. S2 om. अनेकेष्टि° ... तत्र च
14. S2 पोषण° for पेषण°; S2 पातितं for पतितं; S2 स्रुवेण गृह्य for स्रुवे संगृह्य
16. S2 om. वा; S2 राजसूयमन्त्रान् वरुणोऽपश्यत् । तस्मात् सामान्येन वरुण ऋषिः । तत्रैष ते वरुणस्यार्षम् । पृथिवी देवता । अतिशक्वरी छन्दः for एष ते ... अतस्त्वं (L 18)
23. S2 before अग्नि° Adds अग्निनेत्र इत्यादीनि दैव्यानि यजूंषि
6. S2 after स्वाहा Adds देवानामार्षाणि

नेता येषां तेभ्यो दक्षिणभागे अवस्थितेभ्यः ^{v}देवेभ्यः ^{v}स्वाहा सुहुतमस्तु। विश्वेदेवा नेतारो येषां तेभ्यः पश्चिमभागे अवस्थितेभ्यः ^{v}देवेभ्यः ^{v}स्वाहा सुहुतमस्तु। मित्रावरुणौ नेतारौ येषां ते मित्रावरुणनेत्रास्तेभ्यो, मरुतो नेतारो येषां ते मरुन्नेत्रास्तेभ्यः ^{v}वा उत्तरभागे अवस्थितेभ्यः ^{v}देवेभ्यः ^{v}स्वाहा सुहुतमस्तु। सोमः नेता येषां तेभ्यः; ^{v}दुवस्वद्भ्यः परिचर्यावद्भ्यः ^{v}उपरिसद्भ्यः ^{v}देवेभ्यः ^{v}स्वाहा सुहुतमस्तु ॥१॥

आ– अथ राजसूयमन्त्राः । 'एष ते निर्ऋते भागः' इति। अथ [राजसूयं] वरुणोऽपश्यादिति राजसूयमन्त्राणां सामान्येन वरुण ऋषिः। स्वयंप्रदीर्णे जुहोति – 'एष ते निर्ऋते' इति वरुणस्यार्षं पृथिवीदेवत्या अतिशक्वरी । निर्ऋतिशब्देनात्र पृथिव्युच्यते। ऋ गतौ। निः पूर्वो ऋतिः निर्ऋतिः गम[न] रहिता अचला । तत्संबोधनम्। ^{v}निर्ऋते हे पृथिवि, यः ^{v}एषः ^{v}ते तव ^{v}भागः भजनीयो भागः, ^{v}तं भागं ^{v}जुषस्व सेवस्व। ^{v}स्वाहा सुहुतमस्तु। पञ्चधा आहवनीयं व्युह्य प्रतिदिशं जुहोति – 'अग्निनेत्रे[भ्यः' इ] त्यादीनि देव्यानि [देवदेवत्यानि ?] यजूंषि। देवानामार्षाणि। ^{v}अग्निनेत्रेभ्यः। अग्निर्नेता येषां ते अग्निनेत्राः। स च [अन् ?] समासान्तः। अग्निनेत्रा ये देवाः ते च पुरः पुरस्तात् सीदन्तीति पुरःसदः, तेभ्यः ^{v}स्वाहा सुहुतमस्तु। यमो नेता येषां ते यमनेत्राः । समासोऽन्प्रत्ययान्तः। ^{v}दक्षिणसद्भ्यः दक्षिणतः सीदन्तीति दक्षिणसदः। तेभ्यः ^{v}स्वाहा सुहुतमस्तु। विश्वे देवा नेतारो येषां ते विश्वदेवनेत्राः। पश्चात्सदः, पश्चिमतः सीदन्तीति पश्चात्सदः। तेभ्यः ^{v}स्वाहा सुहुतमस्तु। मित्रावरुणौ नेतारौ येषां वा देवानां ते मित्रावरुणनेत्राः वा। एतेषां मध्ये मित्रावरुणनेत्राः देवा मरुन्नेत्रा देवाः ^{v}वा। मरुतो नेतारो येषां देवानां ते मरुन्नेत्राः। उत्तरस्यां सीदन्तीति उत्तरसदः। तेभ्यः ^{v}स्वाहा सुहुतमस्तु। सोमो नेता येषां देवानां ते सोमनेत्राः। उपरि ऊर्ध्वं सीदन्तीत्युपरिसदो ये देवास्तेभ्यः ^{v}सोमनेत्रेभ्यः ^{v}उपरिसद्भ्यः ^{v}देवेभ्यः। दुवस्वद्भ्यः, दुवःशब्देन हविरभिधीयते। तद्युष्यस्ति (? तद्धविर्येषामस्ति) ते दुवस्वन्तः, तेभ्यः ^{v}स्वाहा सुहुतमस्तु ॥१॥

ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा
ये देवा यमनेत्रा दक्षिणसदस्तेभ्यः स्वाहा ।
ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा
ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरसदस्तेभ्यः स्वाहा ।
ये देवाः सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ॥२॥

---

2. S2 om. मित्रावरुणनेत्राः;
3. S2 om. मरुतो ... ते; S2 मरुन्नेत्रेभ्यो for मरुन्नेत्रास्तेभ्यो
4. S2 °षद्भ्यो for °सद्भ्यो; P1 om. स्वाहा; P1 after अस्तु। adds दुवःशब्देन हविरभिधीयते। तद्धाविर्विद्यते येषां ते दुवःस्वन्तस्तेभ्य इति भाष्यान्तरम्।

ये । देवाः । अग्निनेत्रा इत्यग्निऽनेत्राः । पुरःसद इति पुरःऽसदः ।
यमनेत्रा इति यमऽनेत्राः । दक्षिणसद इति दक्षिणऽसदः ।
विश्वदेवनेत्रा इति विश्वदेवऽनेत्राः । पश्चात्सद इति पश्चात्ऽसदः ।
मित्रावरुणनेत्रा इति मित्रावरुणऽनेत्राः। वा । मरुन्नेत्रा इति मरुत्ऽनेत्राः । वा ।
उत्तरसद इत्युत्तरऽसदः ।
सोमनेत्रा इति सोमऽनेत्राः । उपरिसद इत्युपरिऽसदः ।
दुवस्वन्तः । तेभ्यः । स्वाहा ॥ क्रोंउभा ॥२॥

सा- कात्यायनः – " समस्य ये देवा इति प्रतिमन्त्रम् " (काश्रौ १५·१-२१) इति । पञ्चधा विभक्तमाहवनीयमेकीकृत्य ' ये देवाः ' इत्यादिपञ्चमन्त्राणां मध्य एकैकमन्त्रेण जुहुयादिति शेषः । तेषां पाठस्तु– ' ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणसदस्तेभ्यः स्वाहा । ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरसदस्तेभ्यः स्वाहा । ये देवाः सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ' इति । व्याख्यातसमानार्थः ।।२॥

आ- सर्वं समुह्य जुहोति । ये देवाः अग्निनेत्राः पुरःसदः च ये देवाः, तेभ्यः स्वाहा । ये देवाः यमनेत्राः दक्षिणसदः तेभ्यः स्वाहा । ये देवाः विश्वदेवनेत्राः पश्चात्सदः तेभ्यः स्वाहा । ये देवाः मित्रावरुणनेत्राः, ये देवाः मरुन्नेत्राः, ये देवाः उत्तरसदः तेभ्यः स्वाहा । ये देवाः सोमनेत्राः उपरिसदः दुवस्वन्तः तेभ्यः स्वाहा सुहुतमस्तु ॥२॥

अग्ने सहस्व पृतना अभिमातीरपास्य ।
दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसि ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्याम् ॥३॥
उपांशोर्वीर्येण जुहोमि हतꣳ रक्षः स्वाहा ।
रक्षसां त्वा वधायावधिष्म रक्षोऽमुष्य त्वा वधायामुमवधिष्म ।
जुषाणोऽप्वाज्यस्य वेतु स्वाहा ॥४॥(१)॥

9. S2 om. शेषः ।
12. S2 व्याख्यातः for व्याख्यात°

नैर्ऋतेष्ट्यादिगता मन्त्राः]

अग्ने । सहस्व । पृतनाः । अभिमातीरित्यभिऽमातीः । अप । अस्य ।
दुष्टरः । दुस्तर इति दुःऽतरः । तरन् । अरातीः ।
वर्चः । धाः । यज्ञवाहसीति यज्ञऽवाहसि ॥ ठूयी ॥३॥
उपांशोरित्युपऽअंशोः । वीर्येण । जुहोमि । हतम् । रक्षः । स्वाहा ।
रक्षसाम् । त्वा । वधाय । अवधिष्म । रक्षः ।
अमुष्य । त्वा । वधाय । अमुम् । अवधिष्म ।
जुषाणः । अध्वा । आज्यस्य । वेतु । स्वाहा ॥ घाः ॥४॥ (१) ॥

सा– कात्यायनः – "अग्ने सहस्वेत्युल्मुकादानम्" (काश्रौ १५·२·५) इति। अपामार्गहोमार्थमुल्मुकमादध्यात्। पाठस्तु– 'अग्ने सहस्व पृतना अभिमातीरपास्य। दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसि' इति॥ हे अग्ने, त्वं पृतनाः शत्रुसंबन्धिनीः सेनाः सहस्व अभिभव। तथा अभिमातीः अभिमानिनः कर्मविघ्नकारिणः शत्रून् अपास्य अपनुद। किं च दुष्टरः न केनापि तर्तुं शक्यस्त्वम् अरातीः शत्रून् तरन् तिरस्कुर्वन् यज्ञवाहसि यज्ञनिर्वाहके यजमाननिमित्ते (यजमाने ?) वर्चः धाः अन्नं धेहि॥

कात्यायनः – "देवस्य त्वेति जुहोति" (काश्रौ १५·२·६) इति। अपामार्गलक्षणं हविर्जुहुयात्। पाठस्तु– 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। उपांशोर्वीर्येण जुहोमि हतꣳ रक्षः स्वाहा' इति। 'देवस्य त्वा' इत्यादिर्व्याख्यातः। उपांशुर्नाम प्रथमो ग्रहस्तस्य वीर्येण सामर्थ्येन जुहोमि। अत एव रक्षः राक्षसजातिः हतं निहतं तेन नष्टम्। स्वाहा सुहुतमस्तु॥

कात्यायनः – "रक्षसां त्वेति स्रुवमस्यति तां दिशं यस्यां जुहोति" (काश्रौ १५·२·७) इति। यस्यां दिशि होमं कुर्यात् तादृशीं दिशं प्रति स्रुवं प्रक्षिपेत्। 'वधाय' इति मन्त्रशेषः। पाठस्तु– 'रक्षसां त्वा वधाय'। रक्षसां राक्षसानां वधार्थं त्वा त्वां प्रास्यामीति शेषः॥

कात्यायनः – "अवधिष्म इत्यायन्ति" (काश्रौ १५·२·७) इति। होमानन्तरमिमं मन्त्रमुच्चार्य प्रत्यागच्छेयुः। पाठस्तु– 'अवधिष्म रक्षोऽमुष्य त्वा वधायामुमवधिष्म' इति। रक्षः राक्षसान् अवधिष्म हतवन्तः। किं च रक्षसां वधं कृतवन्तो वयम् अमुष्य शत्रोः वधाय वधार्थम्। अमुम् इति शत्रुनामग्रहणार्थम्। अमुकनामकं त्वां शत्रुम् अवधिष्म॥

---

9. S4 before अग्ने ins. देवभवा ऋषिरग्निर्देवत्यानुष्टुप्
12. P1 after अपनुद। adds असु निरसने। सपत्नो वा। अभिमातिरिति श्रुतेः।
13. S2 यजमानमिति ते the readings in P1 and S2 are corrupt. Therefore we have suggested यजमाने in brackets; P1 after अन्नं adds ब्रह्मवर्चसं वा।
15. S2 before देवस्य adds उपांशोरित्यादीनि त्रीणि रक्षोघ्नानि यजूंषि।
16. S2 om. रक्षः; S2 अनेन for तेन
18. P1 om. पाठस्तु
23. S1 °ग्रहणम् for ग्रहणार्थम्

[नैर्ऋतेष्ट्यादिगता मन्त्राः

कात्यायनः – "चतुर्गृहीतं जुषाणोऽध्वाज्यस्य वेत्विति" (काश्रौ १५·३·१३) इति । आरण्यहविषां मध्ये रुद्रदेवतं गावेधुकं चरुं हुत्वा ततश्चतुर्वारं स्वीकृतमाज्यं जुहुयादिति । 'स्वाहा' इति मन्त्रशेषः । vअध्वा इति विभक्तिव्यत्ययः । अध्वानं मार्गं vजुषाणः सेवमानः देवः vआज्यस्य आज्यं vवेतु पिबतु । vस्वाहा इति होमार्थः ॥३–४॥

[इति एकादशेऽध्याये प्रथमोऽनुवाकः]

आ– अथापामार्गहोमः । उल्मुकमादत्ते । 'अग्ने सहस्व' इति । देवश्रवा ऋषिः । अग्निर्देवत्याऽनुष्टुप् । षह मर्षणे । हे vअग्ने, vपृतनाः । पृतना इति संग्राम नाम । पृतनाः संग्रामान् vसहस्व । अभिमातिः सपत्नः शत्रुः । vअभिमातीः । छान्दसं पदं । शत्रून् vअपास्य । असु क्षेपणे । अपक्षिप अपसारय । vदुष्टरः, तरतेस्तृणातेर्वा एतद्रूपम्, अन्यैर्दुःखेन ततुं शीलः (शक्यः ?) शत्रुः । बलेनानानाछाद्यो (?) वा । स्वयं दुस्तरो भूत्वा vतरन् vअरातीः शत्रुसेनाः शत्रूंश्च तरन् विनाशयन् । vयज्ञवाहसि, यज्ञं वहतीति यज्ञवाहः, छान्दसो दीर्घः । यज्ञवाहस् इति सान्तःशब्दः । तस्मिन् यज्ञवाहसि । vवर्चोधाः वर्चो धारयतीति वर्चोधाः । अन्नस्य धारकः । यद्वा – वर्चस्तेजोधारयिता ॥

जुहोति– 'देवस्य त्वा' इति । व्याख्यातम् ॥३॥

जुहोति– 'उपांशोः' इति । उपांशोरित्यादीनि त्रीणि रक्षोघ्नानि यजूँषि । सविता यजमानश्च देवता । उपांशुर्नाम प्रथमो ग्रहः । तस्य vवीर्येण vजुहोमि । तेन हुतेन 'हतं रक्षः' । vहतं निहतं vरक्षः नष्टं, vस्वाहा इदं सुहुतमस्तु ॥

स्रुवं प्रास्यति । रक्षसां त्वा वधाय । vरक्षसां राक्षसानां वधार्थं vत्वा त्वां । स्रुवं प्रास्यामीति शेषः ॥

अवधिष्म vरक्षः । राक्षसान् vअवधिष्म । रक्षसां वधं कृतवन्तो वयम् । 'अमुष्य त्वा वधाय' इति प्रयोगं दर्शयति । vअमुष्य शत्रोः vवधाय वधार्थं त्वाम् । vअमुम् इति शत्रुनामग्रहणम् । अमुकनामानम् vअवधिष्म इति । 'जुषाणोऽध्वाज्यस्य वेतु स्वाहा' । vअध्वा, व्यत्ययतः अध्वानं मार्गं vजुषाणः आज्यभागम् अथवा आज्यस्य vवेतु पिबतु । vस्वाहा सुहुतमस्तु ॥४॥

[इति एकादशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

---

1. S2 °गृहीते for °गृहीतं
2. S2 अरण्य° for आरण्य°
6. B1 तथा for अथ

अभिषेकार्थजलविषया मन्त्राः]

[अथ द्वितीयोऽनुवाक]

सा– प्रथमेऽनुवाके नैर्ऋतेष्ट्यादिगता मन्त्रा उक्ताः। द्वितीये अभिषेकार्थजलविषया मन्त्रा उच्यन्ते –

अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः।
याभिर्मित्रावरुणा अभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः ॥१॥

अपः। देवाः। मधुमतीरिति मधुऽमतीः। अगृभ्णन्।
ऊर्जस्वतीः। राजस्व इति राजऽस्वः। चितानाः।
याभिः। मित्रावरुणौ। अभि। असिञ्चन्।
याभिः। इन्द्रम्। अनयन्। अति। अरातीः॥ स्लौ ॥१॥

सा– अभिषेचनीयस्य सोमयागस्यानुष्ठानं कृत्वा तदभिषेकार्थानि सारस्वतादीनि नानाविधान्युदकानि आनीय तेषां मध्ये प्रथमं सारस्वतजलग्रहणे विनियोगमाह कात्यायनः – "पूर्वापरा ऊर्मीः। स्यन्दमानाः प्रतिलोमाः। अपयन्तीर्नदीपतिः सूद्याः काष्ठं वोच्छ्रितोढम्। निवेष्याः। (आवर्तोदकं) स्यन्दमानानाः स्थावराः प्रत्यातापे। अन्तरिक्षात् प्रतिगृह्या आतपवर्ष्याः। सरस्याः कूप्याः प्रुष्वाः मधु गोरुल्ब्याः पयो घृतम्। सारस्वतीर्गृह्णात्यपो देवा इति" (द्र. काश्रौ १५·४·२६-३६) इति। पाठस्तु – 'अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः। याभिर्मित्रावरुणा अभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः' इति॥ देवाः मधुमतीः मधुरसोपेताः। ऊर्जस्वतीः विशिष्टान्नरसवतीः। राजानं सुवते जनयन्तीति राजस्वः। चितानाः देवताकत्वेन चेतयमाना याः अपः अगृभ्णन् गृहीतवन्तः। पुनस्ता एव विशिनष्टि– याभिः अद्भिः मित्रावरुणौ अभ्यषिञ्चन् मित्रावरुणयोरभिषेकं कृतवन्तः। याभिः अद्भिः इन्द्रं देवराजम् अरातीः शत्रूनतीत्य अतिक्रम्य अनयन् आनीतवन्तः ता अपो गृह्णामीति शेषः ॥१॥

आ– 'अपो देवाः' इति। प्राक् सौत्रामण्या ऋचः प्राग्वरुणस्यार्षम् अब्देवत्याऽनुष्टुप्। मधु[मती]रिति। मधुरतया स्वादुरसोपेता मधुमत्यः ताः मधुमतीः। ऊर्जस्वतीः विशिष्टान्न-

---

12. S2 om. पूर्वापरा ... अपो देवा इतीति
17. S2 राज्ञः सूयन्ते for राजानं सुवते
19. S2 om. अतीत्य
20. S2 गृभ्णान्निति पूर्वेण संबन्धः for गृह्णामीति शेषः।
22. S2 स्वादु स्वादु [र] सोद्यताः – we corrected this as स्वादुरसोपेताः

रसवतीः । राजस्वः । षूङ् प्राणिप्रसवे । राजानं सुवते जनयन्तीति राजसुवः, राजस्वः । चिताना: देवताकत्वेन चेतयमानाः परिदृष्टकारिण्यः अपः देवाः अगृभ्णन् गृहीतवन्तः । ता अपो विशिनष्टि– 'याभिर्मित्रावरुणौ' इति । याभिः अद्भिः मित्रावरुणौ देवाः अभ्यषिञ्चन् मित्रावरुणयोरभिषेकं कृतवन्तः । 'याभिरिन्द्रमनयन्' । याभिः अद्भिः इन्द्रं देवराजम् अभि अरातीः अदानशीलाः शत्रुसेनाः अनयन् शत्रून् अतीत्य अतिक्रम्य अधः-कृत्य अनयन् आनीतवन्तः, ता अपः गृह्णन्त्विति शेषः ॥१॥

वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा
वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि ।
वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा
वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥२॥

वृष्णः । ऊर्मिः । असि । राष्ट्रदा इति राष्ट्रऽदाः । राष्ट्रम् । मे । देहि । स्वाहा ।
वृष्णः । ऊर्मिः । असि । राष्ट्रदा इति राष्ट्रऽदाः । राष्ट्रम् । अमुष्मै । देहि ।
वृषसेन इति वृषऽसेनः ॥ ठं ॥

सा– कात्यायनः – "जुहोत्युत्तरासु चतुर्गृहीतानि वृष्ण ऊर्म्यादिभिः स्वाहाकारान्तैः पूर्वैः पूर्वैः प्रतिमन्त्रमुत्तरैरुत्तरैर्गृह्णाति" (काश्रौ १५·४·३४) इति । स्वाहाकारान्तैः 'वृष्ण ऊर्मिरसि' इति प्रभृतिभिः पूर्वैः पूर्वैः मन्त्रभागैः क्रमेण चतुर्वारं गृहीतानि ऊर्म्यादिभिः स्वाहाकारान्तैः पूर्वैराज्यानि ग्राह्यमाणास्वप्सु जुहुयात् । हुत्वा च ता अप उत्तरोत्तरैः स्वाहाकाररहितैर्मन्त्रभागैः क्रमेण गृह्णीयात् । तेषां मध्ये प्रथममूर्मिद्वयोदकसंबन्धिहोमग्रहणमन्त्राणां पाठः – 'वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि । वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि' इति ॥ वृष्णः सेचनसमर्थोदकस्य संबन्धी ऊर्मिः तरङ्गस्त्वं राष्ट्रदा असि स्वभावत एव राष्ट्रप्रदो भवसि । अतः मे मह्यं राष्ट्रं राज्यं देहि । स्वाहा इति होमार्थः । तादृशस्त्वम् अमुष्मै अमुकनाम्ने यजमानाय मह्यं राष्ट्रं देहि कुल्यारूपेण बहुविधसस्योपकारित्वादपां राष्ट्रप्रदत्वमस्तीत्युच्यते । हे ऊर्मे, वृषसेनः सेचनसमर्था सेना जलराशिरूपा यस्य तादृशस्त्वं स्वभावत एव राष्ट्रप्रदो भवसि । अतो मह्यं राष्ट्रं देहि । स्वाहा हविर्दत्तमस्तु । तादृशस्त्वम् अमुष्मै यजमानाय राष्ट्रं देहि । एवमुपरितना अपि मन्त्रा व्याख्येयाः ॥२॥

18. S2 after पाठः adds लिङ्गोक्तदेवता अष्टिः
22. P1 om. मह्यं
23. P1 °समर्थः for समर्था; S2 सेचना for सेना; P1 om. सेना

अभिषेकार्थजलविषया मन्त्राः]

आ– अनेन मन्त्रेण सारस्वतीर्गृहीत्वा अनन्तरं षोडश आपो गृह्यन्ते । तत्र प्रथमो होममन्त्रः । द्वितीयो ग्रहमन्त्रः । नदीप्रवाहे अवस्थितस्य पशोः वा पुरुषस्य वा यावूर्मी व्यर्दतः तौ गृह्णाति । तत्र यः प्राङुदर्दति तं गृह्णाति – ‘ वृष्ण ऊर्मिरसि ’ [इति] । लिङ्गोक्तदेवत्या अष्टिर्द्विपदाऽनुष्टुव् वा । vवृष्णः वर्षितुः सेक्तुर्वा संबन्धी यः vऊर्मिः कल्लोलः सः त्वम् vअसि । vराष्ट्रदाः त्वं तु स्वभावतः राष्ट्रं जनपदं ददातीति राष्ट्रदाः । अतः vराष्ट्रं vमे मह्यं vदेहि । vस्वाहा इति होमार्थः । अथ गृह्णाति – ‘ वृष्ण ऊर्मिरसि ’ । vवृष्णः संबन्धी यः vऊर्मिः स त्वं स्वभावत एव vराष्ट्रदाः । अतस्त्वं vराष्ट्रम् vअमुष्मै अमुकनाम्ने यजमानाय मह्यं vदेहि । एवमुपरितना अपि मन्त्रा व्याख्येयाः ॥

द्वितीयमूर्मिं गृह्णाति – ‘ वृषसेनोऽसि ’ इति । लिङ्गोक्तदेवत्या । वृष सेचने । वृषः युवोच्यते । वृषप्रधाना सेना यस्य सः vवृषसेनः । यस्त्वं स्वभावतः vराष्ट्रदाः vअसि । अतः vराष्ट्रं vमे मह्यं vदेहि । vस्वाहा इति होमार्थः । द्वितीयं गृह्णाति – ‘ वृषसेनोऽसि ’ इति । vअमुष्मै अमुकनाम्ने यजमानाय ॥२॥

अर्थेतं स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहाऽर्थेतं स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
ओजस्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त ।
आपः परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहाऽऽपः परिवाहिणी स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त ।
अपां पतिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहाऽपां पतिरसि राष्ट्रदा
राष्ट्रममुष्मै देहि ।
अपां गर्भोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहाऽपां गर्भोऽसि राष्ट्रदा
राष्ट्रममुष्मै देहि ।
सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त ।

---

9. B1 after देवत्या adds अनिशद्युर्यो

सूर्यत्वच स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वच स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त ।
व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रजक्षित स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त ।
वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
मान्दा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्वरी स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त ।
जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त ।
विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त ।
शैष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शैष्ठा स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त ।
आपः स्वाराज्ञी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ॥३॥

अर्थेत इत्यर्थऽइतः ।
ओजस्वतीः ।
आपः । परिवाहिणीः । परिवाहिनीरिति परिऽवाहिनीः ।
अपाम् । पतिः ।
अपाम् । गर्भः ।
सूर्यवर्चस इति सूर्यऽवर्चसः ।
सूर्यत्वच इति सूर्यऽत्वचः ।

अभिषेकार्थजलविषया मन्त्राः]

व्रजक्षित इति व्रजऽक्षितः ।

वाशाः ।

मान्दाः ।

शक्वरीः ।

जनभृत इति जनऽभृतः ।

विश्वभृत इति विश्वऽभृतः ।

शैष्ठाः ।

आपः । स्वाराज्ञीः । स्वाराज्ञीरिति स्वऽराज्ञीः । स्थ । राष्ट्रदा इति राष्ट्रऽदाः ।

राष्ट्रम् । अमुष्मै । दत्त ॥ त्रेः ॥३॥

सा- पाठस्तु- ' अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहाऽर्थेत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । ओजस्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त। आपः परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहाऽपः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । अपां पतिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहाऽपां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देहि । अपां गर्भोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहाऽपां गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि । सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । सूर्यत्वच स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वच स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त। व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त। वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त। मान्दा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त। शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त। जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त। शैष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शैष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ' इति । हे आपः, अर्थं प्रयोजनमुद्दिश्य नद्यादेः सकाशात् यज्ञदेशं यन्ति गच्छन्तीति ᵛअर्थेतः । तथाविधा यूयं ᵛराष्ट्रदाः ᵛस्थ स्वभावतः राष्ट्रप्रदा भवथ । अतः

---

10. S2 after पाठस्तु adds अश्मनि लिङ्गोक्तदैवतानि यजूंषि

21. P1 with markings above हे आपः ins. on the upper margin- स्यन्दमाना गृह्णाति अर्थेत इति । प्रतिलोमा गृह्णाति ओजस्वतीरिति । अपयन्तीर्गृह्णाति आप इति। नदीपतिं गृह्णाति अपां पतिरिति । निवेष्या गृह्णाति अपां गर्भोऽसीति । आतपवर्ष्या गृह्णाति सूर्यवर्चस इति स्यन्दमानानां स्थावरा गृह्णाति सूर्यत्वच इति। कूप्या गृह्णाति व्रजक्षित इति । प्रुष्वा गृह्णाति वाशा इति । सरस्या गृह्णाति मान्दा इति। गोरुल्क्या गृह्णाति शक्वरीरिति । पयो गृह्णाति जनभृत इति। घृतं गृह्णाति विश्वभृत इति। मधु गृह्णाति शैष्ठा स्थेति ॥

22. S2 यज्ञे प्रदेशं for यज्ञदेशं

[अभिषेकार्थजलविषया मन्त्राः

मे मह्यं राष्ट्रं दत्त। तादृश्यो यूयममुकनाम्ने यजमानाय राष्ट्रं दत्त। एवं सर्वत्र मन्त्रेषु पूर्वभागा होमार्थाः। उत्तरभागा ग्रहणार्थाः॥

ओजस्वतीः ओजसा प्रतिलोमगमनसमर्थेन बलेन युक्ता ओजस्वत्य आपः। परिवाहिणीः परितः सर्वतो वहन्तीति परिवाहिण्य आपः। अपां पतिः समुद्रः। अपां गर्भभूत आवर्तस्त्वं च राष्ट्रदाः स्वभावतः असि। अतो मह्यं राष्ट्रं देहि। सूर्यस्य वर्चो दीप्तिर्यासां ताः सूर्यवर्चसः। सूर्यस्य त्वग्दीप्तिर्यासां ताः सूर्यत्वचः आतपवर्ष्याः। स्थावराणां तेजःसंबन्धित्वात्। व्रज इति मेघनाम। अत्र तूदकधारणसाम्यात् कूपोऽभिधीयते। व्रजे क्षियन्ति निवसन्तीति व्रजक्षितः कूपस्था आपः। वाशाः वश्याः नीहारगता आपः। नीवारोदवाहः नदीप्रवाहवन्मनुष्यादिगतिं न प्रतिबध्नाति। ततो वश्यत्वम्। मान्दाः सरस्याः गत्यभावान्मन्दरूपाः स्थावरा आपः। शक्वरीः शक्वर्यः शक्ताः। शक्नुवन्ति हि गावो जग[द्]द्धर्तुम्। अतः शक्वर्यः। आपः जनान् पापाद् बिभ्रतीति जनभृतः। विश्वं बिभ्रतीति विश्वभृतः पयोघृतात्मका आपः। शैष्ठाः शविष्ठा बलिष्ठा मध्वापः। एवंभूता आपो यूयं स्वभावतो राज्यप्रदा भवथ। अतो मह्यं राज्यं प्रयच्छत॥

कात्यायनः – “ आपः स्वाराज्ञीरिति मरीचीर्गृहीत्वा अञ्जलिना सर्वासु संसृजन्ति ” (काश्रौ १५·४·३५) इति। किरणयुक्ता आतपवृष्टि[ष्टी ?]रञ्जलिना आदाय पूर्वं गृहीतासु सर्वास्वप्सु संयोजयेत्। पाठस्तु– ‘ आपः स्वाराज्ञी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ’ इति॥ स्वाराज्ञीः स्वराज्यसंबन्धिन्यः स्वाराज्यः हे आपः, यूयं राष्ट्रप्रदा भवथ। अतः अमुष्मै राष्ट्रं दत्त ॥३॥

आ– ‘ अर्थेत स्थ ’ इति। ‘ अर्थेत स्थ ’ इत्यादीनि लिङ्गोक्तदेवत्यानि यजूंषि। अर्थः प्रयोजनं या यन्ति गच्छन्ति ताः अर्थेतः। इतेः (तः ?) [इति] बहुवचनान्तं रूपम्। अर्थेत आपः स्थ राष्ट्रदाः। दत्त इति बहुवचनान्तानि [न्तम् ?]। अर्थेतः स्वभावतः

---

1. S2 राज्यं राष्ट्रदाः for राष्ट्रं दत्त; P1 तादृशाः for तादृश्यो
3. S2 om. प्रतिलोमगमनसमर्थेन
4. S2 अपोऽन्तर्गतभूतः° for अपां गर्भभूत
6. S2 om. आतप° ... °संबन्धित्वात्; P1 आतपवर्ष्य° आतपवर्ष्याः;
   P1 °नामा for °नाम; S2 व्रजोक्षितः for व्रजः
8. S2 om. सरस्याः
10. S2 om. पयोघृतात्मका आपः;
11. S2 शविष्ठाश्रयाः for शविष्ठा ... मध्वापः;
    P1 वतिष्ठा ... corrected by us as बलिष्ठा; P1 अमुष्मै for मह्यं
12. P1 यच्छथ for प्रयच्छत°
15. S2 स्वराज्ञीः for स्वाराज्ञीः
16. S2 स्वराज्यः for स्वाराज्यः
    S2 om. हे; S2 अमुकाय मह्यं for अमुष्मै
19. B1 after आपः adds इति; B1 दात्रेति – corrected by us as दत्त इति

अभिषेकार्थजलविषया मन्त्राः]

राष्ट्रदाः स्थ, अतो मह्यं vराष्ट्रं vदत्त । vस्वाहा इति होमार्थः । उत्तरभागो ग्रहणार्थः । vओजस्वतीः ओजसा बलेन युक्ता आपः ओजस्वत्यः vस्थ । एवम् [अन्यो भागः] व्याख्यात-समानार्थः । vआपः । आप्लृ व्याप्तौ । आपयन्ति स्यन्दन्ति [इति] आपः । vपरिवाहिणीः परिवाहिण्यः vस्थ । परितः सर्वतः वहनं या(आ ?)सामस्तीति परिवाहिण्यः नद्यः स्थ । vअपां vपतिः vअसि समुद्रः, स्वभावतो vराष्ट्रदाः असि । अतः vराष्ट्रं vमे मह्यं vदेहि । vअपां vगर्भः vअसि अपामपत्यं भवसि । अतः vराष्ट्रं vमे vदेहि । vसूर्यवर्चसः सूर्यस्य वर्चो यासां ताः, सूर्यवर्चसा युक्ता सूर्यवर्चसः vस्थ । vसूर्यत्वचः सूर्यस्य त्वक् दीप्तिर्यासां ताः सूर्यत्वचः । आतपयुक्तवर्ष्या आपः vस्थ । vव्रजक्षितः । क्षि निवासगत्योः । कूप्याः vस्थ । vवाशाः । वश कान्तौ । सर्वैः काम्यन्ते इति वाशाः कान्ताः अभिलषिताः । vमान्दाः । मदी हर्षे । भूतानि तत्र मोदन्त इति मान्दाः vस्थ । vशैष्ठाः । शेव इति बलनाम । तत्र इष्ठन् । शेविष्ठा एव शैष्ठाः । शैष्ठा बलिष्ठाः । छान्दसं रूपम् । शीञ् स्वप्न इत्यस्येष्ठनि च रूपं शैष्ठा इति । vआपः vस्वाराज्ञीः । स्वराजसंबन्धिनीः । स्वाराज्ञीः । स्वाराजः । हे आपः, यूयं स्वभावतः vराष्ट्रदाः, अतः vराष्ट्रम् vअमुष्मै अमुकनाम्ने यजमानाय vदत्त ॥३॥

सं मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रं क्षत्रियाय वन्वानाः ।
अनाधृष्टाः सीदत सहौजसा महि क्षत्रं क्षत्रियाय दधतीः ॥४॥(२)॥

सम् । मधुमतीरिति मधुऽमतीः । मधुमतीभिरिति मधुऽमतीभिः । पृच्यन्ताम् ।
महि । क्षत्रम् । क्षत्रियाय । वन्वानाः ।
अनाधृष्टाः । सीदत । सह । ओजसा । महि । क्षत्रम् । क्षत्रियाय । दधतीः ॥३॥४॥(२)॥

सा– कात्यायनः – " औदुम्बरे पात्रे समासिञ्चत्येनाः सं मधुमतीरिति " (काश्रौ १५·४·३६) इति । उदुम्बरवृक्षेण निर्मितपात्रे पूर्वं संगृहीता आपः आसिञ्चेत् । पाठस्तु– ' सं मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रं क्षत्रियाय वन्वानाः ' इति । vमधुमतीः मधुररसोपेता आपः vमधुमतीभिः

---

4. B1 after सर्वतः adds स्वाहे
8. B1 सूपस्थाः – corrected by us as कूप्याः स्थ ।
10-11. B1 शिवि निष्ठा एव शोष्ठाः । शौष्ठाः – corrected by us as शेविष्ठा एव शैष्ठाः । शैष्ठाः ।
20. S2 औदुम्बर° for उदुम्बर°; S2 संगृहीताश्रय for संगृहीता;
S2 after पाठस्तु adds – अब्देवत्या गायत्री
21. S2 मधु° for मधुर°

[देवसुवां हविषां मन्त्राः

मधुरोपेताभिरद्भिः संपृच्यन्तां संसृज्यन्ताम् । कीदृश्यः ? महि महत् क्षत्रं क्षतत्राणं बलं क्षत्रियाय राज्ञे वन्वानाः संभजानाः ॥

कात्यायनः – "मैत्रावरुणधिष्ण्यस्य पुरस्तान्निदधात्यनाधृष्टाः सीदतेति" (काश्रौ १५·४·३७) इति । पूर्वोक्ता आपो मैत्रावरुणाख्यधिष्ण्यस्य पूर्वभागेऽवस्थापयेत् । पाठस्तु – 'अनाधृष्टाः सीदत सहौजसा महि क्षत्रं क्षत्रियाय दधतीः' इति । हे आपः, अनाधृष्टाः केनापि अतिरस्कृता यूयम् ओजसा बलेन करेण क्षत्रियाय राज्ञे महि महत् क्षत्रं बलविशेषं दधतीः दधत्यः सीदत उपविशत ॥४॥

[इत्येकादशेऽध्याये द्वितीयोऽनुवाकः ॥१॥]

आ– औदुम्बरे पात्रे समासिञ्चति– 'सं मधुमतीः' इति । 'सं मधुमतीः', 'अनाधृष्टाः' इति द्वे अब्देवत्ये गायत्र्यौ । मधुमतीः मधुमत्यः मधुररसवत्यः मधुमतीभिः मधुररसवतीभिरद्भिः पृच्यन्तां संसृज्यन्ताम् । कथंभूताः मधुमतीः इति । 'महि क्षत्रं क्षत्रियाय वन्वानाः' । महि महत् । क्षत्रं क्षत्रियाय, राज्ञः महत् क्षत्रं, वन्वानाः । वनोतिः संभजनार्थः । संभजमानाः संपृच्यन्ताम् । अनाधृष्टाः अनाधर्षिताः । रक्षोभिः इति शेषः । सहौजसा । ओजसा बलेन सह सवीर्याः आपः क्षत्रियाय राज्ञे महि महत् क्षत्रम् । क्षतात् त्रायत इति क्षत्रम् । दधतीः दधत्यः । आपः स्थापयन्त्यः सीदत उपविशत ॥४॥

[इति एकादशेऽध्याये द्वितीयोऽनुवाकः ॥]

[अथ तृतीयोऽनुवाकः]

सा– तृतीयेऽनुवाके देवसुवां संबन्धिहविषामङ्गभूता मन्त्रा उच्यन्ते ।

सविता त्वा प्रसवानाᳪं सुवतामग्निर्गृहपतीनाᳪं
सोमो वनस्पतीनाम् ।
बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्याय
वरुणो धर्मपतीनाम् ॥१॥

---

1. S2 om. क्षतत्राणं

4. S2 after पाठस्तु adds गायत्री

6. S2 om. बलेन

देवसुवां हविषां मन्त्राः]

इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय ।
इममुममुष्य पुत्रममुष्यै पुत्रमस्यै विशे ॥२॥
एष वः कुरवो राजैष वः पञ्चाला राजा ।
सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥३॥ (३) ॥

सविता । त्वा । प्रसवानामिति प्रऽसवानाम् । सुवताम् ।
अग्निः । गृहपतीनामिति गृहऽपतीनाम् । सोमः । वनस्पतीनाम् ।
बृहस्पतिः । वाचे । इन्द्रः । ज्यैष्ठ्याय । रुद्रः । पशूनाम् । मित्रः । सत्याय ।
वरुणः । धर्मपतीनामिति धर्मऽपतीनाम् ॥ ठों ॥१॥
इमम् । देवाः । असपत्नम् । सुवध्वम् । महते । क्षत्राय । महते । ज्यैष्ठ्याय ।
इमम् । अमुम् । अमुष्य । पुत्रम् । अमुष्यै । पुत्रम् । अस्यै । विशे ॥ षें ॥२॥
एषः । वः । कुरवः । राजा । एषः । वः । पञ्चालाः । राजा ।
सोमः । अस्माकम् । ब्राह्मणानाम् । राजा ॥ ण्रिं ॥३॥ (३) ॥

सा– कात्यायनः – "सविता त्वेत्याह यजमानबाहुं दक्षिणं गृहीत्वा" (काश्रौ १५·४·३८) इति। यजमानस्य दक्षिणं बाहुं गृहीत्वा 'सविता त्वा' इति अनुवाकं पठेत् । पाठस्तु– 'सविता त्वा प्रसवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाम् । बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय' इत्यादि 'ब्राह्मणानाꣳ राजा' इत्य [न्तोऽ] नुवाकः । [v]सविता सर्वस्य प्रेरको देवः । [v]प्रसवानाम् अभ्यनुज्ञानामाधिपत्य इति शेषः । [v]त्वा त्वां यजमानं [v]सुवताम् अभ्यनुजानातु । सर्वप्राणिनामाज्ञा [पयि] तारं करोत्वित्यर्थः । [v]गृहपतीनां गृहोपलक्षिताग्निसाध्यसर्वकर्माधिपतीनामाधिपत्ये स्वयं गृहपतिर्गृहाभिमानी [v]अग्निः त्वां यजमानं सुवताम् । अदृष्टपुष्पा एव फलवन्तो वनस्पतयस्तेषाम् आधिपत्ये । वनस्पत्यधिपतिः [v]सोमः त्वां यजमानमभ्यनुजानातु । चतुर्विधाया [v]वाचे आधिपत्ये वाचस्पतिः [v]बृहस्पतिः त्वां यजमानं सुवताम् । [v]इन्द्रः

---

14. S2 after पाठस्तु adds यजमानदेवत्या शाक्करो यजुर्वा
15. S2 om. सविता ... इन्द्रो, ज्यैष्ठ्यायेत्यादिब्राह्मणानां राजेति । ततो मन्त्रः for ज्यैष्ठ्याय ... वाकः, S2 सविता सर्वस्य प्रेरको देवः । ज्यैष्ठ्याय । रुद्रः पशूनां मित्रः सत्याय वरुणो धर्मपतीनामिति for ज्यैष्ठ्यायैत्यादि ब्राह्मणानाꣳ राजेत्यनुवाकः ।
18. S2 गृहपत्यभिमानी for गृहपतिर्गृहाभिमानी
19. S2 °पूर्वा for °पुष्पा
20. P1 वाचोऽधिपत्ये for वाचे आधिपत्ये

[देवसुवां हविषां मन्त्राः

ज्यैष्ठ्याय ज्येष्ठभावाय त्वां सुवताम् । रुद्रः देवः पशूनाम् अर्थाय त्वां सुवताम् । मित्रः देवः सत्यार्थं त्वां यजमानमभ्यनुजानातु । धर्मपतीनां धर्मपरिपालकानामाधिपत्ये धर्मपरिपालकः वरुणः त्वां यजमानमभ्यनुजानातु ॥१॥

हे देवाः सवित्रादयः, यूयम् इमं यजमानम् असपत्नं सुवध्वम् । निःसपत्नो भूयादित्यभ्यनुजानीत । किमर्थम् ? महते प्रभूताय क्षत्राय क्षत्रियधर्माय क्षतत्राणाय । महते ज्यैष्ठ्याय ज्येष्ठभावाय । इतः पूर्वं पश्चाच्चैतत्सदृशो नास्तीत्येतदर्थंभावमिमं यजमानं सुवध्वम् । 'अमुष्य अमुष्याः' इत्येतत्पदद्वयेन यजमानस्य मातापितरावुच्येते । तयोरेतद्यजमानमातापित्रोः इमं यजमानं पुत्रं यथा सुवध्वं तथा अमुम् अस्य यजमानस्यैतद्यजमानसदृशं पुत्रम् अभ्यनुजानीत । किमर्थम् ? अस्यै विशे । आसां सर्वासां प्रजानां परिपालनार्थमित्यर्थः ॥२॥

हे कुरवः, वः युष्माकम् एषः यजमानः राजा अस्तु । हे पञ्चालाः वः युष्माकम् एषः यजमानः राजा अस्तु । ब्राह्मणानाम् अस्माकं सोमः राजा अस्तु ॥३॥

[इत्येकादशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

आ– दक्षिणं यजमानबाहुं गृहीत्वा जपति– 'सविता त्वा' इति । यजमानदेवत्या शक्वरी । यजुर्वा । प्रसवानाम् अभ्यनुज्ञानाम् आधिपत्ये इति शेषः । सर्वप्रसवानाम् अधिपतिर्हि सविता । प्रसवानाम् आधिपत्ये यजमानं त्वा सविता सुवताम् अभ्यनुजानातु सर्वप्राणिनाम् आज्ञापयितारं करोत्वित्यर्थः । अग्निः गृहपतीनां गृहोपलक्षिताग्निसाध्यसर्वकर्माधिपत्ये यजमानं त्वां गृहपत्यधिपतिः अग्निः सुवताम् अभ्यनुजानातु । सोमः वनस्पतीनाम् अदृष्टपुष्पा एव फलवन्तो वृक्षा वनस्पतयस्तेषां वनस्पतीनामाधिपत्ये । वनस्पत्यधिपतिः स्वयं सोमः यजमानं त्वां सुवताम् अभ्यनुजानातु । बृहस्पतिः वाचे चतुर्विधाया आधिपत्ये यजमानं त्वां वाचस्पतिः स्वयं बृहस्पतिः सुवताम् अभ्यनुजानातु । इन्द्रः ज्यैष्ठ्याय ज्येष्ठभावाय यजमानाय त्वां सुवताम् अभ्यनुजानातु । रुद्रः पशुपतिः यजमानं त्वां पशूनां पश्वर्थं सुवताम् । मित्रः सत्याय सत्यार्थं यजमानं त्वां सुवताम् अभ्यनुजानातु । वरुणः धर्मपतीनां धर्मपरिपालकानामाधिपत्ये यजमानं त्वां धर्माधिपतिः वरुणः सुवताम् अभ्यनुजानातु ॥१॥

'इमं देवाः' इति यजमानदेवत्या जगती । हे देवाः, इमं यजमानम् असपत्नं सपत्नरहितं सुवध्वम् अभ्यनुजानीत निःसपत्नो भूयात् । महते बृहते क्षत्राय क्षत्रियाय धर्माय क्षतात् परित्राणनार्थमिति । इमं यजमानं सुवध्वम् । महते ज्यैष्ठ्याय ज्येष्ठभावाय ।

---

1. S2 ज्यैष्ठ्य° for ज्येष्ठ°
   P1 with आधिपत्ये with markings above अर्थाय

6. S2 अतः for इतः; S2 अर्थम् for °अर्थभावम्°

7. S2 अक्षरे द्वये for पदद्वयेन

इतः पूर्वं पश्चाच्चैतत्सदृशो नास्तीत्येतदर्थमावाय । इमं सुवध्वम् । ' महते जानराज्याय ' इति उपरितनमन्त्रस्थितोऽयं व्याख्यायते । अर्थवशात् । जनानां संबन्धि राज्यं जानराज्यं, तस्मै महज्जानराज्यार्थम् इमं यजमानं सुवध्वम् । अमुष्य यजमानस्य अमुं पुत्रं सुवध्वं, तथाविधः पुत्रो जायतामित्यनुज्ञां कुरुत । कीदृग्विध इति । ' अमुष्याः पुत्रम् ' इति । अमुष्याः अस्य यजमानस्य मातुः पुत्रम् । इवेत्यर्थः । लुप्तोपमं चैतत् । एतद्यजमानसदृशोऽस्य यजमानस्य पुत्रो भूयादित्यर्थः । किमर्थम् इति । अस्यै विशे एतत्प्रजाकामानार्थमासां प्रजानामेवमेवानुरागोऽस्तीत्यभिप्रायः ॥२॥

एवमेव जनपदानामाग्रहं दर्शयति – ' एष वः कुरवः ' इति । प्रजानामाशीर्देवता गायत्री । हे कुरवः, वः युष्माकम् एषः राजा अस्तु । हे पञ्चालाः; वः युष्माकम् एषः राजा अस्तु । ब्राह्मणानाम् अस्माकं सोमः राजा अस्तु ॥३॥

[इत्येकादशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

[अथ चतुर्थोऽनुवाकः]

तृतीयेऽनुवाके देवसुवां संबन्धिहविषामङ्गभूता मन्त्रा उक्ताः । चतुर्थे राजाभिषेकार्थं व्याघ्रचर्मास्तरणादिमन्त्रा उच्यन्ते ॥

सोमस्य त्विषिरस्यग्नये स्वाहा
सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा ।
पूष्णे स्वाहा बृहस्पतये स्वाहा ।।१।।
इन्द्राय स्वाहाऽऽघोषाय स्वाहा श्लोकाय स्वाहा
घोषाय स्वाहा भगाय स्वाहाऽर्यम्णे स्वाहा ।
सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि स्वाहा राजस्वः ॥२॥

सोमस्य । त्विषिः । असि । अग्नये । स्वाहा । सोमाय । सवित्रे । सरस्वत्यै ।
पूष्णे । बृहस्पतये ॥ शं ॥१॥

13. S2 राज्या° for राजा°

इन्द्राय । अ॑ऽशाय । श्लोकाय । घोषाय । भगाय । अर्यम्णे ॥

अनिभृष्टमित्यनिऽभृष्टम् । असि । वाचः । बन्धुः । तपोजा इति तपःऽजाः ।

सोमस्य । दात्रम् । असि । स्वाहा । राजस्व इति राजऽस्वः ॥ णें ॥२॥

सा- कात्यायनः – "व्याघ्रचर्मास्तृणाति सोमस्य त्विषिरिति" (काश्रौ १५·५·१) इति । आस्तरणं कुर्यात् । 'असि' इति मन्त्रशेषः । पाठस्तु- 'सोमस्य त्विषिरसि' इति । हे व्याघ्रसंबन्धिनि त्वक्, त्वं ^{v}सोमस्य ^{v}त्विषिः ^{v}असि दीप्तिरसि । "यत्र वै सोम इन्द्रमत्यपवत स यत् ततः शार्दूलः समभवत् तेन सोमस्य त्विषिः" (शब्रा ५·३·५.३) इति श्रुतेः । कात्यायनः – "अग्नये स्वाहेति षड्जुहोति प्रतिमन्त्रम् । इन्द्राय स्वाहेति षट्जुहोति प्रतिमन्त्रम्" (काश्रौ १५·५·३-४) इति । अभिषेकात् पूर्वसमये 'अग्नये स्वाहा' इत्यादिभिः षड्भिर्मन्त्रैः क्रमेण जुहुयात् । अभिषेकस्य पश्चात् 'इन्द्राय स्वाहा' इत्यादिभिः षड्भिर्मन्त्रैः क्रमेण जुहुयात् । तेषां पाठस्तु- 'अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहा । इन्द्राय स्वाहा॑ऽशाय स्वाहा श्लोकाय स्वाहा घोषाय स्वाहा भगाय स्वाहाऽर्यम्णे स्वाहा' इति । स्पष्टार्थः ॥

कात्यायनः – "ताभ्यामुत्पुनात्यपः सवितुर्व इति" (काश्रौ १५·५·५) इति । हिरण्येन संस्कृताभ्यां पवित्राभ्यां द्वाभ्यामपामुत्पवनं कुर्यात् । पाठस्तु- 'सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि स्वाहा राजस्वः' इति । ^{v}सवितुः सर्वस्य प्रेरकस्य परमेश्वरस्य ^{v}प्रसवे अभ्यनुज्ञायां स्थितोऽहम् । हे आपः, ^{v}वः युष्मान् ^{v}अच्छिद्रेण छिद्ररहितेन समीचीनेन ^{v}पवित्रेण ^{v}सूर्यस्य किरणैः ^{v}उत्पुनामि उत्पवनं करोमि । हे उदक, त्वम् ^{v}अनिभृष्टम् केनाप्यनाधृष्टम् ^{v}असि । किं च सोमस्याभिषवकाले ^{v}दात्रं दत्तम् ^{v}असि । हे आपः, ^{v}तपोजाः संतापतोऽग्नेर्जाता यूयं ^{v}वाचः ^{v}बन्धुः वाचां बन्धुभूता भवथ । "यावद्वै प्राणेष्वापो भवन्ति तावद्वाचा वदति" (शब्रा ५·३·५·१६) इति श्रुतेः । राजानं स्तुवते जनयन्तीति ^{v}राजस्वः, ता राजजनका यूयं स्वाहाकारेण पूताः स्थ ॥१–२॥

आ- व्याघ्रचर्मारोहयति – 'सोमस्य त्विषिरसि' इति । ^{v}त्विषिः दीप्तिः ^{v}असि । षट् पुरस्तादभिषेकस्य, पश्चात् षट् जुहोति । 'अग्नये स्वाहा' इति लिङ्गोक्तदेवत्यानि यजूंषि । ^{v}अग्नये ^{v}स्वाहा ^{v}सोमाय ^{v}स्वाहा ^{v}सवित्रे ^{v}सरस्वत्यै ^{v}पूष्णे ^{v}बृहस्पतये ^{v}इन्द्राय [^{v}अ॑ऽशाय] श्लोकाय ^{v}घोषाय ^{v}भगाय ^{v}अर्यम्णे ^{v}स्वाहा इति [प्रति-] मन्त्रं जुहोति ॥

---

5. P1 om. पाठस्तु- सोमस्य त्विषिरसीति ।

6. P1 after त्विषिर् om. असि; S2 om. यत्र वै ... इति श्रुतेः [L. 7]

16. P1 सूर्यस्य for सर्वस्य S2; छिद्रा° for छिद्र°

18. P1 before केनापि adds भ्रस्ज पाके; S2 °अभिषेक° for °अभिषव°

19. P °भूतो for °भूता; S2 om. यावद्वै ... श्रुतेः । [L. 20]

व्याघ्रचर्मास्तरणादिमन्त्राः]

ᵛसवितुः ᵛवः ᵛप्रसवे स्थितः अहम् ᵛउत्पुनामि इति व्याख्यातः। भ्रस्ज पाक इति अस्य रूपम् ᵛअनिभृष्टम्, ᵛअसि इति। रक्षोभिरनाधृष्टमसि। ᵛवाचः ᵛबन्धुः। वाचां बन्धुभूत[।]: आपः ᵛतपोजाः। तप संतापे। तपःशब्देनात्राग्निरुच्यते। तस्माज्जातः तपोजाः। ᵛसोमस्य ᵛदात्रम् ᵛअसि दातुः संबन्धिन्यः।

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥

'अनिभृष्टं बन्धुर्दात्रम्'इत्यत्र लिङ्गवचनव्यत्ययः। "दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे" (पा ३.२.१८२) इति दाबादेरौणादिकः (?) ष्ट्रन्। लिङ्गव्यत्ययः। स्वसौमस्य (?) दात्र्यो दातृभूताः। ᵛस्वाहा स्वाहाकारेण पूताः स्थ। ᵛराजस्वः राजानं सुवते जनयन्तीति राजस्वः राजजनकाः॥१—२॥

सधमादो द्युम्निनीराप एता अनाधृष्टा अपस्यो वसानाः।
पस्त्यासु चक्रे वरुणः सधस्थमपां शिशुर्मातृतमास्वन्तः॥३॥

सधमाद इति सधऽमादः। द्युम्निनीः। आपः। एताः।
अनाधृष्टाः। अपस्यः। वसानाः।
पस्त्यासु। चक्रे। वरुणः। सधस्थमिति सधऽस्थम्।
अपाम्। शिशुः। मातृतमास्विति मातृऽतमासु। अन्तरित्यन्तः॥ लुं॥३॥

सा– कात्यायनः– "अभिषेचनीयेष्वेना आसिञ्चति सधमाद इति" (काश्रौ १५.५.६) इति। अभिषेकार्थमानीतेषु सारस्वतादिषूदकेषु एना उत्पूता अपः आसिञ्चेत्। पाठस्तु – 'सधमादो द्युम्निनीराप एता अनाधृष्टा अपस्यो वसानाः। पस्त्यासु चक्रे वरुणः सधस्थमपां शिशुर्मातृतमास्वन्तः' इति। ᵛसधमादः सहमादनशीलाः एकपात्रगतत्वात्। ᵛद्युम्निनीः द्युम्निन्यस्तेजोवत्य ᵛएताः याः ᵛआपः सन्ति। कीदृश्यः? ᵛअनाधृष्टाः केनाप्यनभिभूताः। ᵛअपस्यः कर्मयोग्याः। ᵛवसानाः आच्छादयन्त्यः।

---

9. B1 दात्रा for दात्र्यो
18. S2 सारस्वत्यादिषु for सारस्वतादिषु
20. S2 om. एकपात्रगतत्वात्
21. S2 सिञ्चन्ति for सन्ति; P1 with markings above अपस्यः ins. on the margin अप इति कर्म नाम तत्र साध्व्यः।

मातृस्थानीयानाम् ^{v}अपां ^{v}शिशुः पुत्रस्थानीयः ^{v}वरुणः ^{v}पस्त्यासु गृहस्थानीयासु, ^{v}मातृतमासु अतिशयेन जगन्निर्मात्रीषु तासु ^{v}अन्तः मध्ये ^{v}सधस्थं ^{v}चक्रे सहस्थितिं कृतवान् । "सध मादस्थयोश्छन्दसि" (पा. ६.३.९५) इति सूत्रेणोभयत्र सहशब्दस्य सधादेशः ॥३॥

आ– अभिषेचनीयेष्वेना व्यानयति– 'सधमादो द्युम्निनीः' इति । वारुणी त्रिष्टुप् । "सध मादस्थयोश्छन्दसि" (पा ६.३.९५) इति । सह एकस्मिन् पात्रे माद्यन्ति मदनं कुर्वन्तीति ^{v}सधमादः सहमदनाः । ^{v}द्युम्निनीः द्युम्निन्यः द्युम्नवत्यः वीर्यवत्यश्च । ^{v}आपः ^{v}एताः ^{v}अनाधृष्टाः रक्षोभिरनभिभूताः । ^{v}अपस्यः, अप इति कर्मनाम, तत्र साधुः अपस्यः अपस्याः । वस आच्छादने । आच्छादयन्त्यः ^{v}वसानाः याः आपः, तासु ^{v}मातृतमासु जगन्निर्मात्रीषु ^{v}पस्त्यासु । पस्त्या इति गृहनाम । गृहावस्थितासु । ^{v}अन्तः मध्ये ^{v}सधस्थं सहस्थानम् । ^{v}अपां ^{v}शिशुः ^{v}वरुणः । "अपां वा एष शिशुर्भवति यो राजसूयेन यजते" (शब्रा ५.३.५.१९) इति श्रुतेः । वरुणः ^{v}सधस्थं ^{v}चक्रे कृतवानिति संबन्धः ॥३॥

क्षत्रस्योल्बमसि क्षत्रस्य जराय्वसि

क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि ।

इन्द्रस्य वार्त्रघ्नमसि त्वयाऽयं वृत्रं वध्यान्–

मित्रस्यासि वरुणस्यासि ॥४॥

क्षत्रस्य । उल्बम् । जरायु । नाभिः । योनिः ।

इन्द्रस्य । वार्त्रघ्नमिति वार्त्रऽघ्नम् । असि । त्वया । अयम् । वृत्रम् । वध्यात् ।

मित्रस्य । असि । वरुणस्य । असि ॥ खं ॥४॥

सा– कात्यायनः – "तार्प्यप्रभृतीनि क्षत्रस्येति प्रतिमन्त्रम्" (काश्रौ १५.५.१५) इति । तार्प्यं घृताक्तं वस्त्रम् । तत्प्रभृतीनि क्रमेण परिधापयेदिति शेषः । पाठस्तु– 'क्षत्रस्योल्बमसि क्षत्रस्य

---

1. S2 om. शिशुः; P1 with markings above पस्त्यासु ins. on the margin पस्त्यामिति गृहनाम ।

2. P1 वृतवान् for कृतवान्; S2 om. सध ... सधादेशः [L. 3]

5. B1 नाभिमानं corrected by us as मदनं

6. B1 द्युम्नरत्यः corrected by us as द्युम्नवत्यः ।

व्याघ्रचर्मास्तरणादिमन्त्राः]

जराय्वसि क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि ' इति । हे तार्प्य, त्वं क्षत्रस्य राजस्थानीयस्य यजमानस्य गर्भत्वेनोपचर्यमाणस्य उल्वम् आवरणभूतः असि । " उल्बावृतो गर्भः " (छांउ ५.८.१) इति श्रुतेरिति । हे पाण्ड्व, त्वं जरायु गर्भवेष्टनम् । तादृग्भूतोऽसि । " नाभ्या संनद्धा गर्भा जायन्ते " (निरुक्त ४.२१) इत्युक्तत्वात् नाभिभूतोऽसि । अनेन मन्त्रेणोष्णीषं संहृत्य पुरस्तादवगूहेत् । अधीवासं प्रतिमुञ्चति– ' क्षत्रस्य योनिरसि ' इति । योनिः गर्भसंभवस्थानम्, तादृगसि ॥

कात्यायनः – " इन्द्रस्य वार्त्रघ्नमिति धनुरातनोति " (काश्रौ १५.५.१६) इति । आतन्यात् । ' असि ' इति मन्त्रशेषः । पाठस्तु– ' इन्द्रस्य वार्त्रघ्नम् ' इति । हे धनुः, त्वम् इन्द्रस्य संबन्धि, वृत्रो येन हन्यत इति वृत्रघ्नं तद्धनुः असि ॥

कात्यायनः – " धनुः प्रयच्छति त्वयाऽयमिति " (काश्रौ १५.५.१९) इति । आततज्यं धनुः प्रदद्यात् । पाठस्तु– ' त्वयाऽयं वृत्रं वध्यात् ' इति । हे धनुः, त्वया अयम् यजमानः वृत्रं शत्रुं वध्यात् हन्यात् ।

कात्यायनः – " मित्रस्य वरुणस्येत्यस्य बाहू विमार्ष्टि " (काश्रौ १५.५.१८) इति । ' मित्रस्य, वरुणस्य ' इति मन्त्रद्वयेन यजमानस्य दक्षिणोत्तरबाहुविमार्जनं कुर्यात् । पाठस्तु–' मित्रस्यासि वरुणस्यासि' इति । हे दक्षिणबाहो, त्वं मित्रस्य संबन्धी भवसि । हे वामबाहो, त्वं वरुणस्य संबन्धी भवसि ॥४॥

~~~~~~~~~~~~~~~~~~~~~~

आ– तार्प्यं परिधापयति– ' क्षत्रस्योल्बम् ' इति । ' क्षत्रस्य ' इत्यादीनां चतुर्णां यजुषां तार्प्यपाण्ड्वाधीवासोष्णीषाणि दैवतानि । क्षत्रस्य उल्बं गर्भाधारमुदकम् असि । पाण्ड्वं परिधापयति – ' क्षत्रस्य जराय्वसि ' । जरायुर्गर्भवेष्टनम् । उष्णीषं संहृत्य पुरस्तादवगूहेत् । क्षत्रस्य नाभिः असि । " नाभ्या संनद्धा गर्भा जायन्ते " (निरुक्त ४.२१) इति । अधीवासः प्रतिमुञ्चति -- ' क्षत्रस्य योनिः असि ' । गर्भसंभवस्थानं योनिः । धनुरधितनोति – ' इन्द्रस्य वार्त्रघ्नमसि ' इति । धनुर्दैवत्यं यजुः इन्द्रस्य संबन्धि यत् वार्त्रघ्नं वृत्रोऽनेन हन्यत इति वार्त्रघ्नं धनुरासीत् तत् त्वमासि इति शेषः । धनुः प्रयच्छति । धनुर्दैवत्यं यजुः । त्वया अनेन धनुषा, त्वया अयं यजमानः वृत्रं वध्यात् हन्यात् । बाहू विमार्ष्टि – ' मित्रस्यासि, वरुणस्यासि ' इति । द्वे बाहुदेवत्ये यजुषी । मित्रस्य संबन्धी बाहुः असि । वरुण[स्य] संबन्धी सव्यबाहुः असि ॥४॥

~~~~~~~~~~~~~~~~~~~~~~

3. S2 om. हे पाण्ड्व त्वं

4. S2 om. अनेन ... योनिरसीति । [L. 5]

7. P1 om. पाठस्तु ... इति ।

18. B1 गर्भसनाभिरसि for नाभिरसि

19. B1 after-क्षत्रस्य adds गर्भस्य

23. M3 द्वि for द्वे; M3 °दैवत्ये for °देवत्ये

24. B3 M1 संबन्धि for संबन्धी

रुजाऽसि द्रुबाऽसि क्षुपाऽसि ।
पातैनं प्राञ्चं पातैनं प्रत्यञ्चं पातैनं तिर्यञ्चं दिग्भ्यः पात ॥५॥

रुजा । द्रुबा । क्षुपा ।
पात । एनम् । प्राञ्चम् । प्रत्यञ्चम् । तिर्यञ्चम् । दिग्भ्य इति दिक्ऽभ्यः । पात ॥ कं ॥'५॥

कात्यायनः – "रुजाऽसीति प्रतिमन्त्रमादाय तिस्र इषूः प्रयच्छति" (काश्रौ १५.५.२०) इति । 'रुजाऽसि' इत्यादिभिर्मन्त्रैस्त्रीन् शरानादाय यजमानाय प्रयच्छेत् । तेषां पाठस्तु– 'रुजाऽसि द्रुबाऽसि क्षुपाऽसि' इति । हे इषो, त्वं [v]रुजा [v]असि । रुजो भङ्गे । शत्रूणां भङ्गकरो भवसि । [v]द्रुबा [v]असि । दृ विदारणे । दृणातीति द्रुबा । विदारको भवसि । 'क्षुपा असि' इति । [v]क्षुपा शत्रुकम्पनकारिणी इषुः [v]असि । क्षुप विधूनने ॥

कात्यायनः – "पातैनमित्यभिमृशति" (काश्रौ १५.५.२०) इति । यजमानमभिमृशेत् । पाठस्तु– 'पातैनं प्राञ्चं पातैनं प्रत्यञ्चं पातैनं तिर्यञ्चं दिग्भ्यः पात' इति । हे इषवः [v]प्राञ्चं पूर्वभागेऽवस्थितम् [v]एनं यजमानं [v]पात पालयत । [v]प्रत्यञ्चं पश्चिमदिश्यवस्थितम् [v]एनं [v]पात । [v]तिर्यञ्चं तिर्यग्गतम् [v]एनं [v]पात पालयत । [v]दिग्भ्यः अन्याभ्यो दिग्भ्यः [v]पात ॥५॥

आ–तिस्र इषूरादत्ते– 'रुजाऽसि' इति । 'रुजाऽसि' इत्यादीनां षण्णां यजुषां धनुःसंनद्धेषवो देवताः । रुजो भङ्गे । भङ्गहेतुरिषुः [v]असि । [v]द्रुबा [v]असि । दृ विदारणे । दृणातीति [v]द्रुबा । विदारिका इषुः [v]असि । [v]क्षुपा [v]असि । क्षुप विधूनने । क्षुपतीति क्षुपा, शत्रुकम्पनकारिणी इषुरसि । यजमानाय प्रयच्छति– 'पातैनं प्राञ्चम्' इति । [v]एनं [v]प्राञ्चं प्रागञ्चनं प्राग्गन्तारं हे इषवः, [v]पात पालयत । [v]प्रत्यञ्चं प्रत्यगञ्चनं प्रत्यग्गन्तारम् । [v]तिर्यञ्चं तिर्यगञ्चनं तिर्यग्गन्तारं [v]पात । किं बहुना सर्वाभ्यः [v]दिग्भ्यः [v]पात पालयत ॥५॥

5. P1 om. रुजासीति ... तेषां पाठस्तु – [P. 6]
7. S2 after भङ्गे adds इति धातुः;
8. S2 द्रु for दृ; S2 after विदारणे adds इति धातुः;
P1 दवा for द्रुबा; S2 °कारीषुर् for °कारिणी इषुर्
9. S2 after विधूनने adds इति धातुः
10. S2 °मृश्यति for °मृशति
12. P2 after एनं adds यजमानं
13. S2 om. दिग्भ्य अन्याभ्यो ... पात ।
15. M3 यष्टिर् for °इषुर् ; B1 दवा for द्रुबा; M3 द्रु for दृ,
16. M2 द्रुणाति for दृणाति, B1 दवा for second द्रुबा
17. M3 काटक° for कम्पन°
18. M3 °दातारं for °गन्तारं

न्याघ्रचर्मास्तरणादिमन्त्राः]

आविर्मर्या आवित्तो अग्निर्गृहपतिरावित्त इन्द्रो वृद्धश्रवा
आवित्तः पूषा विश्ववेदा आवित्तौ मित्रावरुणौ धृतव्रतौ ।
आवित्ते द्यावापृथिवी विश्वशंभू आवित्ताऽदितिरुरुशर्मा ॥६॥(४)॥

आविः । मर्याः । आवित्त इत्याऽवित्तः । अग्निः । गृहपतिरिति गृहऽपतिः ।
इन्द्रः । वृद्धश्रवा इति वृद्धऽश्रवाः । पूषा । विश्ववेदा इति विश्वऽवेदाः ।
आवित्तौ इत्याऽवित्तौ । मित्रावरुणौ । धृतव्रता इति धृतऽव्रतौ ।
आवित्ते इत्याऽवित्ते । द्यावापृथिवी इति द्यावापृथिवी । विश्वशंभू इति विश्वऽशंभू ।
आवित्तेत्याऽवित्ता । अदितिः । उरुशर्मेत्युरुऽशर्मा ॥ ध्रोंउ ॥६॥(४)॥

सा– कात्यायनः – "आविर्मर्या इति वाचयति" (काश्रौ १५.५.२१) इति । पाठस्तु–'आविर्मर्या आवित्तो अग्निर्गृहपतिरावित्त इन्द्रो वृद्धश्रवा आवित्तः पूषा विश्ववेदा आवित्तौ मित्रावरुणौ धृतव्रतौ । आवित्ते द्यावापृथिवी विश्वशम्भू आवित्ताऽदितिरुरुशर्मा' इति । हे मर्याः मनुष्या ऋत्विजः, यूयम् आविः अभूत सम्यगनुतिष्ठत । युष्मदनुष्ठितेन कर्मणा अग्निः गृहपतिः भूत्वा आवि [त्तः प्र]त्युपलब्धः । इन्द्रः वृद्धश्रवाः प्रवृद्धकीर्तिर्भूत्वा आवि[त्तः प्र]त्युपलब्धः । पूषा देवः विश्ववेदाः सर्वज्ञो भूत्वा आवित्तः । मित्रावरुणौ देवौ धृतव्रतौ अवधारितकर्माणौ भूत्वा आवित्तौ । तथा द्यावापृथिवी द्यावापृथिव्यौ, विश्वस्य शं सुखम् आभ्यां भवतीति विश्वशंभू, तथाविधे भूत्वा आवित्ते । अदितिः अदीना देवमाता उरुशर्मा । महत् शर्म शरणं सुखं वा यस्याः सा, तथाविधा भूत्वा आवित्ता उपलब्धा ॥६॥

[इत्येकादशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

11. P1 with markings above हे मर्याः ins. on the upper margin – हे मर्या अयं यजमान आवि [र] भूत् प्रकटो बभूवेत्यस्माभिर्गृहपतिरग्निरावेदित एवमिन्द्रादयोऽप्यावेदिता इति भाष्यान्तरम् ।

12. आवित्तोपलब्धः for आवित्युपलब्धः [L. 13]

15. S2 भूया: for भूत्वा

17. P1 with markings above °लब्धा ins. on the upper margin :– अत्र विदि धातुः श्रुत्या लक्षणया व्याख्यातः । तद्यथा आविर्मर्या इत्यनिरुक्तं प्रजापतिर्वा अनिरुक्त इत्यादि ।

आ– आविदो वाचयति–‘ आविर्मर्याः ’ इति । प्राजापत्यं यजुः । आवेदयन्ति ज्ञापयन्ति यजमानमेताभिर्देवताभ्य इत्या[विदः] । आविर्मर्याः । मर्या इति मनुष्यनाम । मरणार्हा मर्याः । हे ᵛमर्याः, ᵛआविः प्रकाशः प्रकटः अयं यजमानो युष्मत्समक्षं कथ्यते । ‘ आवित्तो अग्निर्गृहपतिः ’ इति । श्रुत्युक्तैर्विभक्तिव्यत्ययैर्व्याख्यायन्ते । ᵛअग्निः अग्नये ᵛगृहपतिः यजमानः ᵛआवित्तः आवेदितः ज्ञापितः । ᵛआवित्तः ᵛइन्द्रः ᵛवृद्धश्रवाः । इन्द्राय वृद्धं श्रवो धनं यशो वा यस्य तस्मै इन्द्राय वृद्धश्रवसे आवेदितः । ᵛआवित्तः ᵛपूषा ᵛविश्ववेदाः । पूष्णे विश्ववेदसे सर्वज्ञाय आवेदितः । ᵛआवित्तौ ᵛमित्रावरुणौ ᵛधृतवतौ धृतव्रताभ्याम् । व्रतमिति कर्मनाम । अवधारितकर्माभ्यां मित्रावरुणाभ्याम् आवित्तः आवेदितः । ᵛआवित्ते ᵛद्यावापृथिवी विश्वशंभुवा । विश्वस्य शं सुखम् आभ्यां भवतीति विश्वशंभूः । विश्वशंभूभ्याम् ᵛआवित्तः आवेदितः । ᵛआवित्ता ᵛअदितिः ᵛउरुशर्मा । उरु पृथु शर्म शरणं यस्याः सा उरुशर्मा । उरुशर्मणे अदित्यै आवित्तः आवेदितः । ‘ गृहपतिः ’ इति संबन्धः । एवं स्तुत्या लक्षणया व्याख्यातोऽयं मन्त्रः । यद्वा – गृहपतिः गृहपत्या यजमानेन आवित्तः आवेदितः विज्ञापितः । एवमिन्द्रादयोऽपि यजमानेनावेदितप्रयोजना इति व्याख्येयम् ॥६॥

[इति एकादशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

[अथ पञ्चमोऽनुवाकः]

सा– चतुर्थेऽनुवाके राजाभिषेकार्थं व्याघ्रचर्मास्तरणादिमन्त्रा उक्ताः । पञ्चमे दिगाक्रमणस्य मन्त्रा उच्यन्ते ।

अवेष्टा दन्दशूकाः प्राचीमा रोह गायत्री त्वाऽवतु ।
रथंतरꣳ साम त्रिवृत् स्तोमो वसन्त ऋतुर्ब्रह्म द्रविणम् ॥१॥

अवेष्टा इत्यवऽइष्टाः । दन्दशूकाः । प्राचीम् । आ । रोह । गायत्री । त्वा । अवतु ।
रथंतरमिति रथम्ऽतरम् । साम । त्रिवृदिति त्रिऽवृत् । स्तोमः ।
वसन्तः । ऋतुः । ब्रह्म । द्रविणम् ॥ णें ॥१॥

---

2. B1 M3 एतासां देवतानां – corrected by us as एताभिर्देवताभ्यः
4. M3 om. अग्निः and गृहपतिः; M3 आवित्त ... विश्ववेदाः (L. 6) damaged.
7. M3 om. कर्मनाम अवधारितकर्मा°
10. M3 after पृथु adds महती

दिगाक्रमणमन्त्राः]

सा– कात्यायनः– " अवेष्टा इति लोहायसमाविध्यति केशपाशाय (केशवास्ये ?) सदोऽन्तरुपविष्टाय " (काश्रौ १५.५.२२) इति। सदोऽन्तःस्थिताय केशसंस्कारिणे पुरुषाय अयोमयं लोहं निरस्येत्। पाठस्तु– ' अवेष्टा दन्दशूकाः ' इति। ˇदन्दशूकाः सर्पसदृशाः यज्ञविघ्नकारिणो राक्षसादयः। ˇअवेष्टाः विनाशिता भवन्त्विति शेषः॥

कात्यायनः– " सुन्वन्तमाक्रमयन् दिशः प्राचीमा रोहेति वाचयति प्रतिमन्त्रं प्रतिदिशं यथालिङ्गम् " (काश्रौ १५.५.२३) इति। यजमानं दिशामाक्रमणं कारयन्नध्वर्युरेकैकेन मन्त्रेण तत्तद्दिग्वाचकलिङ्गमनतिक्रम्य तमेव यजमानं वाचयेत्। तत्र प्रथममन्त्रपाठस्तु– ' प्राचीमारोह गायत्री त्वाऽवतु। रथंतरꣳ साम त्रिवृत् स्तोमो वसन्त ऋतुर्ब्रह्म द्रविणम् ' इति। हे यजमान, त्वं ˇप्राचीं दिशम् ˇआरोह आक्रमस्व। तथाविधं त्वां छन्दसां मध्ये ˇगायत्री छन्दः ˇअवतु रक्षतु। साम्नां मध्ये " अभि त्वा शूर नोनुमः " (सासं १.३.१.५.१) इत्यस्याम् ऋच्युत्पन्नं रथंतराख्यं ˇसाम त्वां रक्षतु। स्तोमानां मध्ये ˇत्रिवृत् ˇस्तोमः पालयतु। ऋतूनां मध्ये ˇवसन्तः ˇऋतुः पालयतु। ˇब्रह्म ब्राह्मणजातिस्त्वदीयं ˇद्रविणं धनं रक्षतु। त्रिवृत्स्तोमस्य लक्षणं सामब्राह्मणे समाम्नातम्- " तिसृभ्यो हिंकरोति स प्रथमया तिसृभ्यो हिंकरोति स मध्यमया तिसृभ्यो हिंकरोति स उत्तमयोद्यती त्रिवृतो विष्टुतिः " (तांब्रा २.१.१) इति। अस्यायमर्थः – " उपास्मै गायता " (सासं २.१.१.१.१) इत्यादीनि ऋगात्मकानि त्रीणि सूक्तानि सन्ति। तेषु तिसृभिर्ऋग्भिः हिंकरोति गायेत्। काभिस्तिसृभिः ? प्रथमया। त्रिष्वपि सूक्तेषु या या प्रथमा तया स उद्गाता गायेत्। तथा सति तिसृभिर्गीतं भवति। सोऽयं प्रथमपर्यायः। द्वितीये पर्याये सूक्तत्रयगतया मध्यमया गायेत्। तृतीये पर्याये सूक्तत्रयगतयोत्तमया गायेत्। अनेन प्रकारेण त्रिवृत्स्तोमसंबन्धिनी विशिष्टा स्तुतिः संपद्यते। सेयं ˇस्तुतिः ' उद्यती ' इति नाम्नाऽभिधीयते॥

आ– केशवास्ये लोहायसमाविध्यति – ' अवेष्टाः ' इति। प्राज्यापत्यं यजुः मृत्युनाशने विनियुक्तम्। ˇदन्दशूकाः दंशमशकाः अत्यर्थं दशनशीलाः मृत्यव इहाभिप्रेताः। ˇअवेष्टाः। अवपूर्वो याजिः नाशार्थे वर्तते। नष्टाः नाशिताः। ' प्राचीम् ' इत्यादीनां पञ्चानां यजमानो देवता। प्रथमतृतीयचतुर्था अनुष्टुभः। द्वितीयोष्णिक्। पञ्चमी जगती। हे यजमान, ˇप्राचीम् ˇआरोह प्राचीं दिशमाक्रमस्व। प्राचीमाक्रममाणं यजमानं त्वां ˇगायत्री ˇअवतु पालयतु।

---

4. P1 with markings above शेषः ins. on the lower margins– अवयजातिर्नाशार्थः।

7. S2 om. तत्तद्दिग्° ... वाचयेत्; S2 om. प्रथम°

10. S2 om. त्वां

17. S2 om. first पर्याये

21. B1 प्राच्यादीनां for प्राचीमित्यादीनां

22. B1 M3 पञ्चमा for पञ्चमी

काश्रौ...४

रथंतरं नाम साम त्वा त्वाम् अवतु । त्रिधा त्वावर्तत इति त्रिवृत्स्तोमः स्तुतिश्च त्वां यजमानम् अवतु । वसन्तः ऋतुः च यजमानं त्वामवतु । ब्रह्म ब्राह्मणजातिः त्वामवतु द्रविणं च, सर्वसाधनत्वात् द्रविणं धनं च यजमानं त्वामवतु । ब्रह्म, द्रविणम् इति परस्परविशेषण-विशेष्यभावो वा । एवं 'दक्षिणाम् आरोह' इत्यादयः चतस्रः कण्डिका व्याख्येयाः ॥१॥

दक्षि<u>णा</u>मा रो॑ह <u>त्रि</u>ष्टुप् त्वाऽवतु ।

बृहत् साम॑ पञ्च<u>द</u>श स्तोमो॒ <u>ग्री</u>ष्म <u>ऋ</u>तुः <u>क्ष</u>त्रं द्रवि॑णम् ॥२॥

दक्षि॑णाम् । आ । <u>रो</u>ह । <u>त्रि</u>ष्टुप् । <u>त्रि</u>स्तुबिति <u>त्रि</u>ऽस्तुप् । <u>त्वा</u> । <u>अ</u>व<u>तु</u> ।

<u>बृ</u>हत् । साम॑ । <u>पञ्च</u>द<u>श</u> इति॑ <u>पञ्च</u>ऽद<u>शः</u> । स्तोम॑ः ।

<u>ग्री</u>ष्मः । <u>ऋ</u>तुः । <u>क्ष</u>त्रम् । द्रवि॑णम् ॥ झं ॥२॥

सा– द्वितीयमन्त्रपाठस्तु– 'दक्षिणामा रोह त्रिष्टुप् त्वाऽवतु । बृहत्साम पञ्चदशः स्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणम्' इति । पूर्ववन्न्यायेन योजनीयम् । "त्वामिद्धि हवामहे" (सासं १.३.१.५.२) इत्येतस्यामृच्युत्पन्नं बृहत् साम । पञ्चदशः स्तोमस्त्वेवमाम्नातः– "पञ्चभ्यो हिंकरोति । स तिसृभिः स एकया स एकया । पञ्चभ्यो हिंकरोति । स एकया स तिसृभिः । स एकया पञ्चभ्यो हिंकरोति । [स एकया स एकया स तिसृभिः ।] पञ्चपञ्चिनी पञ्चदशस्य विष्टुतिः" (तांब्रा २.४.१) इति । पूर्वोक्त त्रिवृत् स्तोम एक एव सूक्तत्रयनिष्पाद्यः । अन्ये तु स्तोमाः एकैकेनैव ऋचात्मकेन सूक्तेन निष्पाद्यन्ते । तत्रायं क्रमः – प्रथमपर्याय आवृत्तिः पञ्चभिर्ऋग्भिः गायेत् । इतरे द्वे सकृत् गायेत् । द्वितीयपर्याये प्रथमां सकृद्गायेत् । तृतीयपर्याये मध्यमां सकृद्गायेत् । सेयमेकविंशस्तोमसंबन्धिनी विष्टुतिः सप्तसप्ततीत्यभिधीयते । पञ्चदशः स्तोमः च त्वामवतु । क्षत्रं क्षत्रियजातिस्त्वामवतु । द्रविणं धनं च त्वामवतु । एवं तृतीयचतुर्थौ मन्त्रौ व्याख्येयौ ॥२॥

आ– हे यजमान, दक्षिणां दिशम् आरोह । 'त्रिष्टुप् त्वा अवतु' । दक्षिणां दिशमाक्रममाणं यजमानं त्वां त्रिष्टुप् अवतु । 'बृहत् साम' । बृहत् सामनाम यजमानं त्वामवतु । पञ्चदशः स्तोमः च त्वामवतु । ग्रीष्मः ऋतुः च त्वामवतु । क्षत्रं क्षत्रियजातिस्त्वामवतु । द्रविणं धनं च त्वामवतु ॥२॥

---

1. M3 om. त्वा ... अवतु ।
3. B1 यजमानाय for यजमानं
16. S2 द्वितीये या या प्रथमा सकृत् सकृद्गायेत् for द्वे सकृत् गायेत्
21. M3 om. बृहत्साम ।
22. B1 om. ग्रीष्म ऋतुश्च त्वामवतु; M3 after ग्रीष्म adds नाम

दिगाक्रमणमन्त्राः]

प्रतीचीमा रोह जगती त्वाऽवतु ।
वैरूपꣳ साम सप्तदश स्तोमो वर्षा ऋतुर्विड् द्रविणम् ॥३॥

प्रतीचीम् । आ । रोह । जगती । त्वा । अवतु ।
वैरूपम् । साम । सप्तदश इति सप्तऽदशः । स्तोमः ।
वर्षाः । ऋतुः । विट् । द्रविणम् ॥ घुं ॥३॥

सा- प्रतीचीम् आरोह । त्वां जगती नाम छन्दः अवतु । वैरूपम् साम च त्वामवतु । सप्तदशः स्तोमः च त्वामवतु । वर्षाख्यऋतुः त्वामवतु । विट् वैश्यजातिस्त्वामवतु । द्रविणं धनं च त्वामवतु ॥३॥

आ- एवं 'प्रतीचीमारोह' । त्वां जगती नाम छन्दः अवतु । वैरूपं साम च त्वामवतु । सप्तदशः स्तोमः च त्वामवतु । वर्षा ऋतुः त्वामवतु । विट् वैश्यजातिस्त्वामवतु । द्रविणं च त्वामवतु ॥३॥

उदीचीमा रोहानुष्टुप् त्वाऽवतु ।
वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फलं द्रविणम् ॥४॥

उदीचीम् । आ । रोह । अनुष्टुप् । अनुस्तुबित्यनुऽस्तुप् । त्वा । अवतु ।
वैराजम् । साम । एकविꣳश इत्येकऽविꣳशः । स्तोमः । शरत् ।
ऋतुः । फलम् । द्रविणम् ॥ जुं ॥४॥

सा- 'उदीचीमा रोहानुष्टुप् त्वाऽवतु । वैराजꣳ सामैकविꣳशः स्तोमः शरदृतुः फलं द्रविणम्' इति । उदीचीम् आरोह । त्वाम् अनुष्टुप् अवतु । वैराजं साम त्वामवतु । एकविꣳशः स्तोमः च त्वामवतु । शरत् नाम ऋतुः च त्वामवतु । सर्वस्य च फलरूपं द्रविणं च त्वामवतु ॥४॥

6. S2 om. च त्वामवतु

7-8. P1 त्वदीयद्रविणमवतु for त्वामवतु । द्रविणं धनं च त्वामवतु ।

10. B1 om. च

17. P1 एवमुदीचीमारोह for उदीचीम् ... द्रविणमिति

18. P1 °रोहन्तं त्वाम् for रोह । त्वाम्; P1 छन्दः for साम

आ-- एवमुदीचीमारोह । Vउदीचीम् अरोहन्तं Vत्वाऽनुष्टुप् Vअवतु । Vवैराजं नाम Vसाम च त्वामवतु । Vएकविंश्शः Vस्तोमः च त्वामवतु । Vशरत् नाम Vऋतुः च त्वामवतु । सर्वस्य च फलरूपं Vद्रविणं च त्वामवतु रक्षतु ॥४॥

ऊर्ध्वामा रोह पङ्क्तिस्त्वाऽवतु ।
शाक्वररैवते सामनी त्रिणवत्रयस्त्रिंश्शौ स्तोमौ
हेमन्तशिशिरा ऋतू वर्चो द्रविणम् ।
प्रत्यस्तं नमुचेः शिरः ।।५॥

ऊर्ध्वाम् । आ । रोह । पङ्क्तिः । त्वा । अवतु ।
शाक्वररैवते इति शाक्वररैवते । सामनी इति सामनी ।
त्रिणवत्रयस्त्रिंश्शौ । त्रिनवत्रयस्त्रिंश्शा इति त्रिनवत्रयस्त्रिंश्शौ । स्तोमौ ।
हेमन्तशिशिरौ । ऋतू इत्यृतू । वर्चः । द्रविणम् ।
प्रत्यस्तमिति प्रतिऽअस्तम् । नमुचेः । शिरः ॥ घ्रौ ॥५॥

सा- पञ्चममन्त्रपाठस्तु- ' ऊर्ध्वामा रोह पङ्क्तिस्त्वाऽवतु। शाक्वररैवते सामनी त्रिणवत्रयस्त्रिंश्शौ स्तोमौ हेमन्तशिशिरा ऋतू वर्चो द्रविणम् ' इति । Vवर्चः तेजोऽभिमानी देवो धनं रक्षतु । " प्रोष्वस्मै पुरो रथम् " (सासं २.९.१.१४.१) इत्यस्यामृच्युत्पन्नं साम शाक्वरम् । " रेवतीर्णः सधमाद " (सासं १.२.२.१.९) इत्येतस्यामृच्युत्पन्नं साम रैवतम् । त्रिणवस्तोम एवमाम्नातः – " नवभ्यो हिंकरोति । स तिसृभिः स पञ्चभिः स एकया । नवभ्यो हिंकरोति । स एकया स तिसृभिः स पञ्चभिः । नवभ्यो हिंकरोति । स पञ्चभिः स एकया स तिसृभिर्वज्रो वै त्रिणव इति '' (तांब्रा ३.१.१-२) इति । प्रथमपर्याये प्रथमां त्रिर्गायेत् । मध्यमां पञ्चकृत्वो गायेत् । उत्तमां सकृद्गायेत् । द्वितीयपर्याये प्रथमां सकृद्गायेत् । मध्यमां त्रिर्गायेत् । तृतीयपर्याये उत्तमां पञ्चकृत्वो मध्यमां सकृद्गायेत् । उत्तमां त्रिर्गायेत् । सोऽयं त्रिरावृत्तो नवसंख्योपेतत्वात् त्रिणवनामको वज्रसमानः ॥

त्रयस्त्रिंश्शस्तोम एवमाम्नातः– " एकादशभ्यो हिंकरोति । स तिसृभिः स सप्तभिः स एकया । एकादशभ्यो हिंकरोति । स एकया स तिसृभिः स सप्तभिः । एकादशभ्यो हिंकरोति । स सप्तभिः स एकया स तिसृभिः । अन्तो वै त्रयस्त्रिंशः " (तांब्रा ३.३.१-२) इति । प्रथमपर्याये प्रथमां त्रिर्गायेत । मध्यमां सप्तकृत्व उत्तमां सकृत् । द्वितीयपर्याये प्रथमां सकृत् मध्यमां त्रिरुत्तमां सप्तकृत्वः । तृतीयपर्याये प्रथमां सप्तकृत्वो मध्यमां सकृदुत्तमां त्रिः । सोऽयं त्रयस्त्रिंशः सर्वेषां स्तोमानामन्तः ॥

कात्यायनः – " पादेन सीसं निरस्यति प्रत्यस्तमिति " (काश्रौ १५.५.२४) इति । ' नमुचेः शिरः ' इति मन्त्रशेषः । Vनमुचेः असुरस्य Vशिरः Vप्रत्यस्तं प्रतिगृह्य क्षिप्तम् ॥५॥

दिगाक्रमणमन्त्राः]

आ– एवम् ऊर्ध्वां दिशम् आरोह । ऊर्ध्वां दिशम् आक्रममाणं त्वां पङ्क्तिः नाम छन्दः अवतु । शाक्वररैवते सामनी द्वे त्वाम् अवताम् । त्रिणवत्रयस्त्रिंशस्तोमौ च त्वामवताम् । हेमन्तशिशिरौ च ऋतू त्वामवताम् । वर्चः द्रविणम् । अत्र ब्रह्मवर्चसमेतद्द्रविणं त्वामवतु । सीसं निरस्यति 'प्रत्यस्तं नमुचेः शिरः' इति । असु प्रक्षेपणे । प्रतिगृह्य अस्तं निक्षिप्तं नमुचेः असुरस्य शिरः ॥५॥

सोम॑स्य॒ त्विषि॑रसि॒ तवे॑व मे॒ त्विषि॑र्भूयात् ।
मृ॒त्योः पा॒ह्योजो॑ऽसि॒ सहो॑ऽस्य॒मृत॑मसि ॥६॥

सोम॑स्य । त्विषिः॑ । अ॒सि॒ । तवे॒वेति॒ तव॑ऽइव । मे॒ । त्विषिः॑ । भू॒यात् ।
मृ॒त्योः । पा॒हि॒ । ओजः॑ । सहः॑ । अ॒मृत॑म् । अ॒सि॒ ॥ ढूीं ॥६॥

सा– कात्यायनः – "व्याघ्रचर्मारोहयति सोमस्य त्विषिरिति" (काश्रौ १५.५.२५) इति । अभिषेकार्थं राजानं व्याघ्रचर्मण्यवस्थापयेत् । पाठस्तु– 'सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्' इति । हे व्याघ्रचर्म, त्वं सोमस्य त्विषिः असि दीप्तिरसि । तवेव तव यथा दीप्तिर्वर्तते तथा मे ममापि दीप्तिः भूयात् ॥

कात्यायनः – "रुक्ममधस्पदं कुरुते मृत्योरिति" (काश्रौ १५.५.२६) इति । पादतले हिरण्यं कुर्यात् । 'पाहि' इति मन्त्रशेषः । हे सुवर्ण, त्वं मृत्योः सकाशान्मां पाहि पालय ।

कात्यायनः – "शिरसि नवतर्दं [शततर्दं वा] ओजसीति" (काश्रौ १५.५.२७) इति । नवसंख्या-[कतर्द]युक्तनिष्कपरिमितं वा सुवर्णं यजमानस्य शिरसि कुर्यादिति शेषः । पाठस्तु– 'ओजोऽसि सहोऽस्यमृतमसि' इति । हे हिरण्य, त्वम् ओजः तेजोयुक्तम् असि । सहः असि बलरूपमसि । अमृतम् अविनाशितम् असि ॥६॥

आ– व्याघ्रचर्मारोहति– 'सोमस्य त्विषिरसि' इति । लिङ्गोक्तदैवत्यं यजुः । सोमस्य त्विषिः दीप्तिः असि । तवेव तव त्विषिरिव मे ममापि त्विषिः भूयात् । रुक्ममधः पदं कुरुते । 'मृत्योः पाहि' इति । लिङ्गोक्तदैवत्यं यजुः । हे रुक्म, मृत्योः सकाशात् मां पाहि

---

2. M3 om. सामनी द्वे ।
3. M3 एव for एतद्
10. S2 om. सोमस्य त्विषिरिति
12. S2 भवति for वर्तते
16. S2 नवकृत्वः for नवतर्दं
17. S2 मन्त्रशेषः for शेषः
19. S2 बलम् for बलरूपम् ; S2 प्राणबलम् for अविनाशितम् ।

गोपाय । शिरसि च रुक्मं करोति । 'ओजोऽसि' इति । लिङ्गोक्तदैवत्यानि यजूंषि । ओजः इति मनोबलम् । सहः ब्रह्मेन्द्रियबलम् । अमृतम् इति प्राणबलम् । "प्राणो वा अमृतम्" (माशब्रा १४·४·४·३) इति श्रुतेः ॥६॥

हिरण्यरूपा उषसो विरोक उभा इन्द्रा उदितः सूर्यश्च ।
आ रोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च ।
मित्रोऽसि वरुणोऽसि ॥७॥(५)॥

हिरण्यरूपा इति हिरण्यऽरूपौ । उषसः । विरोक इति विऽरोके ।
उभौ । इन्द्रौ । उत् । इतः । सूर्यः । च ।
आ । रोहतम् । वरुण । मित्र । गर्तम् । ततः । चक्षाथाम् । अदितिम् । दितिम् । च ।
मित्रः । असि । वरुणः । असि ॥ त्रीः ॥७॥(५)॥

सा– कात्यायनः – " बाहू उद्गृह्णाति हिरण्यरूपा इति " (काश्रौ १५·५·२८) इति । 'हिरण्यरूपा' इति मन्त्रेण 'मित्रोऽसि' इत्यनेन वा बाहुद्वयमुत्तानं कुर्यात् । तत्र प्रथममन्त्रपाठस्तु– 'हिरण्यरूपा उषसो विरोक उभा इन्द्रा उदितः सूर्यश्च । आ रोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च' इति । हे वरुण शत्रुनिवारक दक्षिणहस्त, हे मित्र प्रियरूप वामहस्त, युवां हिरण्यरूपौ सुवर्णखचितकवचौ अतिशयेन भासमानौ इन्द्रौ समर्थौ उभौ युवां गर्तं रथस्योपरिभागं गर्तसदृशम् आरोहतम् परकीयमारणेभ्यो रक्षितुम् । चर्मकवचादिभिराच्छादिते सति रथस्योपरिभागो गर्तसदृशो भवति । आरोहणं कदा कर्तव्यमित्युच्यते । उषसः उषःकालानन्तरं [विरोके] । विरोकः विशिष्टदीप्तिः । सूर्यः च उदितः उदयं प्राप्तस्तदा आरोहतमित्यर्थः । ततः रथारोहणादूर्ध्वं, अदितिम् अखण्डितां स्वसेनां दितिं खण्डितां परसेनां चक्षाथाम् । क्रमेणानुग्रहनिग्रहदृष्ट्या समीक्षेथाम् ॥

'मित्रोऽसि वरुणोऽसि' इति वैकल्पिकद्वितीयमन्त्रो व्याख्यातः ॥७॥

[इत्येकादशेऽध्याये पञ्चमोऽनुवाकः ॥१॥]

———

3. J after the break at पालयित्र्यः (Vide com. on KSVI.8.5) resumes from श्रुतेः
11. S2 om. हिरण्यरूपा इतीति; P1 om. इति । हिरण्यरूपा इति मन्त्रेण [L 12]
12. S2 om. वा
14. S2 after वरुण adds हे मित्र; S2 om. हे मित्र प्रियरूप वामहस्त
15. S2 °खचितौ for खचितकवचौ
17. P1 with markings above विरोकः ins. on the margin : विरोके अवसानकाले इति भाष्यान्तरम् । विरोकशब्दस्य सप्तम्यन्तत्वादिदं साधु

दिगाक्रमणमन्त्राः]

आ– बाहू उद्गृह्णाति– 'हिरण्यरूपा' इति । मैत्रावरुणी त्रिष्टुप् यजुरन्ता । हे हिरण्यरूपौ मित्रावरुणौ, उभौ मित्रश्च वरुणश्च । उभौ युवाम् । इन्द्रौ परमैश्वर्यसंपन्नौ । युवयोः कार्यसंपादनार्थम् उषसः उषःकालसंबन्धितया परिदृश्यमानौ । विरोके । रुच दीप्ताविस्यस्य रूपम् । विरोकः विशिष्टतेजःसंपन्नः सूर्यः उदितः च उदयं प्राप्तो विराजते । अतःकारणात् हे वरुण, मित्र उभौ युवां गर्तम् आरोहतं पुरुषमारोहतम् । "बाहू वै मित्रावरुणौ पुरुषो गर्तः" (माशब्रा ५·४·१-१५) इति श्रुतिरध्यात्मविषयं व्याचष्टे । अधिदैवतं तु– गर्तो रथः । तत्पक्षे हे वरुण, हे मित्र, रथम् आरोहतम् । ततः रथारोहणानन्तरं अदितिं दितिं च चक्षाथाम् । अदितिम् अदीनामखण्डितशक्तिम् । समर्थं विहितस्य स्वकर्मणः कर्तारं पश्यतम् । दितिं दीनम् । खण्डितशक्तिम् [अ]विवेकवन्तं छलं नास्तिकवृत्तिं दीनं पश्यतम् । अपरो मन्त्रविकल्पः – 'मित्रोऽसि वरुणोऽसि' इति । बाहू एवोच्येते ॥७॥(५)॥

[इत्येकादशेऽध्याये पञ्चमोऽनुवाकः]

[अथ षष्ठोऽनुवाकः]

सा– पञ्चमे दिगादिक्रमणादिमन्त्रा उक्ताः । षष्ठेऽनुवाके अभिषेकादिमन्त्रा उच्यन्ते ॥

सोमस्य त्वा द्युम्नेनाभि षिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसा ।
इन्द्रस्येन्द्रियेण मरुतामोजसा क्षत्राणां क्षत्रपतिरेध्यति दिद्यून् पाहि ॥१॥
इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय
महते जानराज्याय ।
इममुमुमुष्य पुत्रममुष्याः पुत्रमस्यै विशे ॥२॥
एष वः कुरवो राजैष वः पञ्चाला राजा ।
सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥३॥

---

1. B1 बलं बहेतु गृह्णाति, M3 बलं बाहू उद्गृह्णीम for बाहू उद्गृह्णाति
   B1 संपन्नार्थं; M3 संनहनार्थम् for संपादनार्थं;
3. M3 °दृश्यमानो for °दृश्यमानौ; M3 om. रुच ... विरोकः [L 4]
5. B1 om. पुरुषमारोहतम्
7. B1 तास्मिन् for तत्पक्षे
9. B1 विवेकविशकछलं for [अ]विवेकवन्तं छलं
10. B1 मन्त्रः for मन्त्र°

सोमस्य । त्वा । द्युम्नेन । अभि । सिञ्चामि । अग्नेः । भ्राजसा । सूर्यस्य । वर्चसा ।
इन्द्रस्य । इन्द्रियेण । मरुताम् । ओजसा । क्षत्राणाम् ।
क्षत्रपतिरिति क्षत्रऽपतिः । एधि । अति । दिद्यून् । पाहि ॥ ढयः ॥ १ ॥
*[इमं देवाः] । जानराज्यायेति जानऽराज्याय ॥ ढयः ॥२॥
एष वः ॥३॥

कात्यायनः– " स्थितं प्राञ्चमभिषिञ्चतीतरो(? -°ति पुरोहितोऽ)ध्वर्युर्वा पुरस्तात् पालाशेन प्रथमं पश्चादितरे द्वितीयेन स्वस्तृतीयेन मित्र्यो राजन्यो वैश्यश्चतुर्थेन सोमस्य त्वा द्युम्नेनेति प्रतिमन्त्रम् । अभिषिञ्चामीति सर्वत्र साकाङ्क्षत्वात् । क्षत्राणां क्षत्रपतिरेधीति इमममुममुष्येति च " । (काश्रौ १५.५.३०–३३) इति । रुक्मसहिते व्याघ्रचर्मणि अवस्थितं प्राङ्मुखं राजानं पुरोहितादयः पुरस्तादवस्थाय अभिषिञ्चेयुः । अभिषेकजलपात्राणि चतुर्विधानि । पालाशोदुम्बरन्यग्रोधाश्वत्थानि । तत्र पालाशपात्रेण पुरोहिताध्वर्योरन्यतरः प्रथममभिषिञ्चेत् । उदुम्बरपात्रेण अध्वर्युव्यतिरिक्ता ऋत्विजोऽभिषिञ्चेयुः । ततो न्यग्रोधपात्रेण स्वकीयो बन्धुः कश्चिदभिषिञ्चेत् । तत आश्वत्थपात्रेण मित्रभूतः कश्चित् क्षत्रियो वैश्यश्चाभिषिञ्चेत् । चतुर्विधानामेतेषामभिषेक्तॄणां क्रमेण ' सोमस्याग्नेः सूर्यस्येन्द्रस्य ' इत्येते चत्वारो मन्त्रा द्रष्टव्याः । ' मरुतामोजसा ' इत्ययं चतुर्थमन्त्रशेषः । ' अभिषिञ्चामि ' इति पदमुपरितनेषु त्रिषु मन्त्रेषु अनुवर्तते । 'क्षत्राणाम्' इति चेत्येतावुभौ मन्त्रशेषौ प्रतिमन्त्रमावर्तनीयौ । एतेषां पाठस्तु– ' सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसा । इन्द्रस्येन्द्रियेण मरुतामोजसा क्षत्राणां क्षत्रपतिरेध्यति दिद्यून् पाहि ॥ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्याय । इमममुममुष्य पुत्रममुष्याः पुत्रमस्यै विशे ॥ एष वः कुरवो राजैष वः पञ्चाला राजा । सोमोऽस्माकं ब्राह्मणानां राजा ' इति । हे यजमान, त्वां ˇसोमस्य इन्दोः ˇद्युम्नेन तेजसा ˇअभिषिञ्चामि । ˇअग्नेः ˇभ्राजसा दीप्त्या त्वाम् अभिषिञ्चामि । ˇसूर्यस्य ˇवर्चसा शोचिषा त्वामभिषिञ्चामि । ˇइन्द्रस्य ˇइन्द्रियेण वीर्येण त्वामभिषिञ्चामि । ˇमरुताम् ˇओजसा बलेन त्वामभिषिञ्चामि । एवं सर्वैरभिषिक्तः सन् ˇक्षत्राणां ˇक्षत्रपतिः ˇएधि । सर्वेषां क्षत्रियाणामधिपतिर्भव । ˇअति ˇदिद्यून् । दो अवखण्डने । अवखण्डनसमर्थानरिप्रयुक्तानिष्वादीन् अति अतीत्य अतिक्रम्य अपसार्यैनं यजमानं हे सोमादिदेवसंघ, त्वं ˇपाहि पालय । " इषवो वै दिद्यवः " इति श्रुतेः । यद्वा–शत्रुप्रयुक्तान् सर्वान् बाणादीनपसार्य, हे यजमान, त्वं सर्वां भुवं पालय ॥

ˇमहते प्रभूताय ˇजानराज्याय । जनानां संबन्धि राज्यं जानराज्यम् । तदर्थं हे ˇदेवाः, ˇइमं यजमानम् ˇअसपत्नं ˇसुवध्वम् । शिष्टं पूर्ववद् व्याख्येयम् ॥१–३॥

---

4. * पदपाठलिखितपुस्तकेषु जानराज्यायेति पदं प्रथममन्त्रस्य भागत्वेन स्वीकृतं दृश्यते ।
8. P1 om. अमुम्
12. P1 °भूतं for °भूतः
20. S2 om. वीर्येण
22. S2 अवखण्डनघातो रूपम् for अवखण्डने;
S2 °सामर्थ्ययुक्तानतीत्य for °समर्था°...अतीत्य [L 23]
23. S2 om. हे सोमादि°
26. S2 om. असपत्नं

आ– यजमानमभिषिञ्चति– ' सोमस्य त्वा ' इति । यजमानाभिषेकस्तुतिः । त्रिष्टुप् यजुरन्ता । vसोमस्य चन्द्रस्य vद्युम्नेन द्योतनेन सौम्यतेजसा यजमानं त्वाम् vअभि vसिञ्चामि । vअग्नेः vभ्राजसा दीप्त्या त्वामाभिषिञ्चामि । vसूर्यस्य vवर्चसा रोचिषा त्वामाभिषिञ्चामि । vइन्द्रस्य vइन्द्रियेण वीर्येण त्वामभिषिञ्चामि । vमरुताम् vओजसा बलेन च त्वामभिषिञ्चामि । एवं सर्वैरभिषिक्तः सन् सर्वेषां vक्षत्राणां vक्षत्रपतिः त्वम् vएधि भव । ' अति दिद्यून् पाहि ' । vअति vदिद्यून् । दो अवखण्डने । अवखण्डनसामर्थ्ययुक्तान् इष्वादीन् अति अतीत्य अतिक्रम्य अपसार्य यजमानं vपाहि । " इषवो वै दिद्यवः " इति श्रुतेः ॥

' इमं देवाः ', ' एष वः ' इति द्वौ मन्त्रौ पूर्वं व्याख्यातौ ॥१--३॥

प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः ।
ता आऽववृत्रन्नधरागुदक् ता अहिं बुध्न्यमनु रीयमाणाः ।
विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥४॥

प्र । पर्वतस्य । वृषभस्य । पृष्ठात् । नावः । चरन्ति । स्वसिच इति स्वऽसिचः । इयानाः ।
ताः । आ । अववृत्रन् । अधराक् । उदक् । ताः । अहिम् । बुध्न्यम् । अनु । रीयमाणाः ।
विष्णोः । विक्रमणमिति विऽक्रमणम् । विक्रान्तमिति विऽक्रान्तम् ।
क्रान्तम् । असि ॥ इतिः ॥४॥

सा– कात्यायनः – " अभिषेकेण प्रलिम्पन्ते प्र पर्वतस्येति " (काश्रौ १५.६.८) इति । अभिषेकसंबन्ध्युदकशेषेण प्रलेपनं कुर्यात् । पाठस्तु– ' प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः । ता आऽववृत्रन्नधरागुदक् ता अहिं बुध्न्यमनु रीयमाणाः ' इति । vवृषभस्य वर्षण-

---

1. M3 om. सोमस्य त्वा इति
3. M3 J lacuna सूर्यस्य ...... अभिषिञ्चामि
4. B1 om. च
6. B1 om. इष्वादीन्
7. B1 अवसो दितद्यव, J इषवेदद्युवति– corrected by us as इषवो वै दिद्यवः
8. M3 om. पूर्वं

समर्थस्य पर्वतसदृशस्य मेघस्य पृष्ठाद् उपरिभागात् नावः नौयोग्या बहुला आपः प्रचरन्ति गच्छन्ति । कीदृश्यः ? स्वसिचः स्वमात्मीयं यजमानक्षेत्रं सिञ्चन्तीति स्वसिचः । इयानाः गच्छन्त्यो बाहुल्येन सर्वत्र प्रवहन्त्यः । न हीयत इत्यहिरुत्तमाङ्गम् । बुध्नस्य पादस्याग्रभागो बुध्न्यः शिरःप्रभृति पादाग्रपर्यन्तम् अनुक्रमेण रीयमाणाः गच्छन्त्यस्ता आपः । अधराग् अधोगताः आऽववृत्रन् पुनः पुनरावृत्य स्थितास्तास्तादृश्य आपः उदग् ऊर्ध्वं गता आऽववृत्रन् ॥

कात्यायनः – " चर्मणि त्रिर्विक्रमयति विष्णोरिति प्रतिमन्त्रम् " (काश्रौ १५·६·९) इति । ' विष्णोः ' इति मन्त्रत्रयेण आस्तीर्णे व्याघ्रचर्मणि त्रिवारं पादप्रक्षेपणं कुर्यात् । तेषां पाठस्तु– ' विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ' इति । यजमानस्य मम प्रथमप्रक्रम, त्वं विष्णोः व्यापनशीलस्य जगदीश्वरस्य त्रिविक्रमावतारस्य विक्रमणं प्रक्रमणम् असि । प्रथमपादप्रक्षेपेण जितो भूलोकोऽसि । हे द्वितीय प्रक्रम, त्वं विक्रान्तम् असि । विष्णोः द्वितीयपादप्रक्षेपेण जितमन्तरिक्षमसि । हे तृतीयप्रक्रमण, त्वं क्रान्तं विष्णोः पराक्रमेण जितं त्रिविष्टपम् असि । इमं मन्त्रत्रयं लोकत्रयविजये तैत्तिरीया अप्यामनन्ति– " विष्णुक्रमान् क्रमते विष्णुरेव भूत्वेमांल्लोकानभिजयति " (तैसं १·६·५·४) इति ॥४॥

आ– ' प्र पर्वतस्य ' इति । अब्देवत्या त्रिष्टुप् । या एता आहुतिपरिणामभूता आपस्ताः पर्वतस्य । पर्वतोऽग्निः पार्थिवः । स हि पर्ववान् । पौर्णमास्यामावास्याचातुर्मास्यादिभिः पर्वकल्पैः पर्वभिः पर्वतस्य पर्वताग्नेः वृषभस्य वर्षितुः पृष्ठात् उत्थाय इति शेषः । णु स्तुतौ । नूयन्ते स्तूयन्ते स्तोत्रशस्त्रहोममन्त्रैरिति नावः । नाव्यन्त इति नावः । आहुतिपरिणामभूता आपः चरन्ति गच्छन्ति । आदित्यमण्डलं प्रति स्वसिचः स्वयमेव सिञ्चन्तीति स्वसिचः । इयानाः

---

1. P1 with markings above नावः ins. on the margin नावः नूयन्ते स्तूयन्ते शास्त्रस्तोत्रहोममन्त्रैरिति नाव आपः । णु स्तुतौ इति भाष्यान्तरम् ; S2 om. प्र°
2. S2 आगच्छन्त्यो for गच्छन्त्यो
3. P1 with markings above प्रवहन्त्यः ins. on the margin : यद्वा आदित्यः पर्वतशब्देनोच्यते । तथा चायमर्थः । वर्षितुरादित्यस्य पृष्ठादियानायाः नाव आपः प्रचरन्ति सर्वतो गच्छन्ति । स्वयं सेक्त्र्यः ता आपः प्रावृट्काले अधस्तादाववृत्रन् आवर्तन्ते । ग्रीष्मकाले ऊर्ध्वं अहिं बुध्न्यम् अन्तरिक्षस्थमेघमनुलक्षीकृत्य रीयमाणा गच्छन्त्यः । रियतिर्गत्यर्थः । नाव्या एव यजुष्मत्य इष्टका इत्युपक्रम्य षष्टिश्च ह वै त्रीणि शतान्यादित्यं नाव्या अभिरक्षन्तीति हि श्रुतिः । यद्वा श्रेष्ठस्य हिमवद्विन्ध्यादेः पर्वतस्य पृष्ठाग्निर्गच्छन्त्यो नावा तार्या या महानदीरूपा आपः प्रचरन्ति स्वयं सेक्त्र्यः ता एव राजसूययाजिनोऽर्यायावर्तन्ते गृह्यमाणा अभिषेकपात्रेषु अहिमहन्तारं शत्रूणाम् । बुध्नशब्दो मूलवचनः । तत्र भवं बुध्न्यं प्रधानभूतं यजमानमनुलक्षीकृत्य रीयमाणा ऋत्विग्भिरभिषिच्यमाणा इति भाष्यान्तरम्; P1 बुध्न्यस्य for बुध्नस्य ।
9. S2 om. विक्रमणं
15. B1 पर्वताग्नेः for पर्वतोऽग्निः
17. J नभ्यन्त for नाभ्यन्त

इण् गतौ । "ताच्छील्यवयोवचनशक्तिषु चानश्" (पा ३.२.१२९) । इयानाः गमनशीलाः । ᵛताः आदित्यमण्डलं प्राप्य ᵛआऽववृत्रन् पुनरावर्तन्ते । ᵛअधराक् अधराञ्चनाः आदित्यमण्डलात् भूमिं प्रत्यधोगमनशीलाः । 'उदक् ताः' । ᵛताः पूर्वं भूमेः सकाशात् आदित्यमण्डलं प्रति ᵛउदक् ऊर्ध्वगमनशीलाः ताः आपः ᵛअहिं मेघम् । बुध्नमन्तरिक्षं, तत्र भवो बुध्न्यः । तं ᵛबुध्न्यम् अहिं मेघं मध्यमस्थानम् ᵛअनुरीयमाणाः । रीयतिर्गच्छत्यर्थः । मेघमनु प्रविश्य मेघच्छिद्रैः रीयमाणाः निर्गच्छन्त्यः । भूमिं प्राप्नुवन्तीति शेषः । अथवा आदित्यः पर्वतशब्देनोच्यते । वृषभस्य पर्वतस्य आदित्यस्य पृष्ठात् इयानाः निर्गच्छन्त्यः नावः नाव्याः आपः चरन्ति सर्वतो गच्छन्ति । नाव्याः स्वसिचः उपरि आदित्यस्थाः आपः उच्यन्ते । तथा च श्रुतिः – "नाव्या एव यजुष्मत्य इष्टकाः" (माशब्रा १०.५.४.१४) इत्युपक्रम्य– "षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाव्या अभिसरन्ति" (माशब्रा १०.५.४.१४) इत्याह । ताः प्रावृट्काले आवर्तन्ते । अधराक् उदक् ता अहिं मेघं बुध्न्यम् अनु रीयमाणाः अनुप्रविश्य सुशिशिरं निर्गच्छन्त्यः आगच्छन्तीत्यर्थः । अथवा याः पर्वतस्य हिमवद्विन्ध्यादेः वृषभस्य वर्षितुः सेक्तुः पृष्ठात् उपरिभागात् इयानाः नावः चरन्ति स्वसिचः सेक्त्र्यः, ता एव राजसूययाजिनोऽर्थाय आऽववृत्रन् आकाशादावर्तन्ते । ग्राह्यमाणाः अभिषेकपात्रेषु आपः उदक्ताः उत्क्षिप्ताः उत्पूर्वस्याञ्चतेरेतद्रूपम् । ᵛअधराक् अधोऽञ्चनाः । ᵛअहिम् अहन्तारं प्रति अनुसिच्यमानाः । ता आऽववृत्रन्नित्यादि संबन्धनीयः ॥

चर्मणि त्रिर्विक्रामयति यजमानम् – 'विष्णोर्विक्रमणम्' इति लिङ्गोक्तदैवत्यानि यजूंषि । ᵛविष्णोः यज्ञस्य यत् ᵛविक्रमणं, यच्च ᵛविक्रान्तं, यच्च ᵛक्रान्तं तत् सर्वं त्वम् ᵛअसि इति योजना ॥४॥

प्रजा॑पते॒ न त्वदे॒तान्य॒न्यो विश्वा॑ रू॒पाणि॒ परि॒ ता ब॑भूव ।
यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु व॒यꣳ स्या॑म॒ पत॑यो र॒यी॒णाम् ॥५॥

2. JA M3 ताभिः for ताः; BJ अवर्तते for आवर्तन्ते
5. J om. तं बुध्न्यम्; B1 om. रीयतिर् ... रीयमाणाः
9. B1 after नाव्या adds उ
11. J मध्यमं for बुध्न्यम्
12. B1 सवितुः; J सुशिशैरं for सुशिशिरं
13. B1 एताश्च for ता एव
14. B1 M3 गृह्यमाणः अभिषेकः for ग्राह्यमाणाः अभिषेक°
15. B1 M3 before भवो° adds. अधराञ्च
18. B1 M3 क्रमणं for विक्रमणं

प्रजापत इति प्रजाऽपते । न । त्वत् । एतानि ।
अन्यः । विश्वा । रूपाणि । परि । ता । बभूव ।
यत्कामा इति यत्ऽकामाः । ते । जुहुमः । तत् । नः । अस्तु ।
वयम् । स्याम । पतयः । रयीणाम् ॥ ञः ॥५॥

स्वा– कात्यायनः – " शालाद्वार्ये जुहोति पुत्रेऽन्वारब्धे प्रजापत इति " (काश्रौ १५·६·११) इति । पूर्वं तेनाहवनीयमिदानीं तेन गार्हपत्यं शालाद्वार्यं तस्मिन् जुहुयात् । पाठस्तु– ' प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वय९ स्याम पतयो रयीणाम् ' इति । हे [v]प्रजापते, [v]त्वत् [v]अन्यः कः अपि पुरुषस्त्वत्तः [v]एतानि [v]विश्वा विश्वानि सर्वाणि [v]रूपाणि [v]परिबभूव परिभवितुं समर्थो नाभूत् । परिभवः सृष्टेरप्युपलक्षणम् । सृष्टिसंहारयोः अशक्त इत्यर्थः । अतः [v]ते वयं [v]यत्कामाः [v]जुहुमः, [v]नः अस्माकं [v]तत् फलम् [v]अस्तु । किं च [v]वयं [v]रयीणां [v]पतयः [v]स्याम स्वामिनः भवेम ॥५॥

आ– जुहोति– ' प्रजापते न ' इति । प्राजापत्या त्रिष्टुप् । हे [v]प्रजापते, [v]त्वत् [v]अन्यः देवताविशेषः [v]न । [v]विश्वा विश्वानि [v]एतानि नानाजातीयानि उत्पन्नानि वर्तमानभविष्यत्कालसंबन्धीनि यानि [v]रूपाणि [v]परि परितः समन्ततः न [v]बभूव न भविष्यन्ति न भवन्ति । [v]ताः तानि एतानि विश्वा रूपाणि त्वदन्यानि न बभूवुः न भविष्यन्ति न भवन्ति । एतानि रूपाणि त्वदन्यो यः कश्चिन्न बभूव न भावयांबभूव न भावयिष्यति न भावयति वा । अतो ब्रवीमि– ' यत्कामाः ते जुहुमः ', येन कामेन यत्फलकामनया [v]वयं [v]ते तव [v]जुहुमः [v]तत् [v]नः तत्कामफलं नः अस्माकम् [v]अस्तु । तदाह– ' वयं स्याम पतयः रयीणां ', देवमानुषधनानां [v]पतयः [v]स्याम ॥५॥

रुद्र यत् ते क्रिवि परं नाम ।
तस्मै हुतमस्यमेष्टमसि स्वाहा ॥६॥(६)॥

रुद्र । यत् । ते । क्रिवि । परम् । नाम ।
तस्मै । हुतम् । असि । अमेष्टमित्यमाऽइष्टम् । असि । स्वाहा ॥ यिं ॥६॥(६)॥

---

14. B1 om. न भवन्ति
15. M3 J om. न भवन्ति
16. B1 om. न भावयांबभूव; J om. न भावयति वा ।
18. M3 B1 दैव° for देव; M3 यातुधानानां for °धनानां

रथावहरणादिमन्त्राः]

सा– कात्यायनः– " आग्नीध्रीये पालाशेन शेषान् जुहोति रुद्र यत् ते इति " (काश्रौ १५.६.१२) इति । पालाशपात्रेणाभिषेकशेषभूतान्युदकान्याग्नीध्रसंबन्धिधिष्णे जुहुयात् । पाठस्तु– ' रुद्र यत् ते क्रवि नाम[1] तस्मै हुतमस्यमेष्टमसि स्वाहा ' इति । हे vरुद्र, vते तव vक्रवि । क्रवि हिंसाकरणयोः । जगद्विरोधिनां [1]हिंसाकर्तृकं, सज्जनानां तु सर्वपुरुषार्थस्य कारणभूतं यत् vनाम अस्ति [क्रवीति] vतस्मै नाम्ने vहुतम् अस्तु अभिषेकशेषभूतं पात्रस्थमुदकं हुतमस्तु । तच्च vअमेष्टम् vअसि, अमाशब्दोऽत्र गृहवाची, मदीये गृहे दत्तमस्तु । vस्वाहा इति होमार्थः ॥६॥

[इत्येकादशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

आ– जुहोति – ' रुद्र यत् ते ' इति । रुद्रदेवत्या पङ्क्तिः यजुरन्ता । हे भगवन् श्रीरुद्र, त्वां कीर्तयतां स्मरतां च संसारदुःखं तत्कारणं च द्रावयतीति रुद्रः । तत्संबोधनम् । हे vरुद्र, vते तव vयत् च vनाम । णमु प्रह्वत्वे शब्दे । शृण्वतां कीर्तयतां च चित्तं श्रीभगवच्चरणारविन्दविषयतया नमयन्ति स्वयं नमयतीति [वा] नाम । vपरम् उत्कृष्टं नाम । किं तत् ? vक्रवि । क्रवि हिंसाकरणयोः । जगद्विरोधिनां हिंसाकर्तृ नाम । सज्जनानां तु सर्वपुरुषार्थस्य कारणभूतं क्रवि इति नाम । एवं श्रीरुद्रं संबोध्याथेदानीं कर्तव्यमाह– ' तस्मै हुतमस्यमेष्टमसि ' । vतस्मै नाम्ने नामार्थं vहुतं मया हविः हुतम् vअसि । ' अमेष्टम् असि ' । अमाशब्दोऽत्र गृहवचनः । मदीये गृहे त्वमिष्टम् vअसि । vस्वाहा सुहुतमस्तु ॥

[इत्येकादशेऽध्याये षष्ठोऽनुवाकः ॥]

[अथ सप्तमोऽनुवाकः]

सा– षष्ठेऽनुवाके अभिषेकादिमन्त्रा उक्ताः । सप्तमे रथावहरणादिमन्त्रा उच्यन्ते ।

इन्द्रस्य वज्रोऽसि मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि ।
अव्यथायै त्वा स्वधायै त्वाऽरिष्टः फल्गुनः ।
मरुतां प्रसवेन जयापाम मनसा समिन्द्रियेण ॥१॥

---

1. S2 शेषाणि for शेषान्
9. B1 before त्वां adds यत्; B1 J संसारे for संसार°
10. B1 यच, J वयं for यच्च
11. B1 after तत् adds : ब्रवीमि
12. B1 °कर्तृणां– for °कर्तृ नाम; B1 असज्जनानां for सज्जनानां
B1 om. तु; B1 सर्व° for कारण°;
13. J om. इति नाम रुद्रसंबन्धाय for रुद्रं संबोध्याथ
18. S2 °अवरोहण° for °अवहरण°

इन्द्रस्य । वज्रः । असि । मित्रावरुणयोः । त्वा ।
प्रशास्त्रोरिति । प्रऽशास्त्रोः । प्रशिषेति प्रऽशिषा । युनज्मि ।
अव्यथायै । त्वा । स्वधायै । त्वा । अरिष्टः । फल्गुनः ।
मरुताम् । प्रसवेनेति प्रऽसवेन । जय । आपाम ।
मनसा । सम् । इन्द्रियेण ॥ णाः ॥ १ ॥

कात्यायनः – " वाजपेयवद्रथमवहृत्य " (काश्रौ १५·६·१५) इति । वाजपेये यथा रथावहरणं कृतं, तद्वदत्रापि रथमवहरेत् । पाठस्तु– ' इन्द्रस्य वज्रोऽसि ' इति । हे रथ, त्वम् इन्द्रस्य वज्रसदृशो भवसि ॥

कात्यायनः – " युनक्ति पूर्ववन्मित्रावरुणयोरिति " (काश्रौ १५·६·१५) इति । वाजपेये यथाश्वसंयोजनं कृतं तद्वदत्रापि रथेऽश्वान् संयोजयेत् । पाठस्तु– ' मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि ' इति । प्रशास्त्रोः आज्ञापयित्रोः मित्रावरुणयोः प्रशिषा प्रशासनेन यज्ञसंबन्धिनिमित्तरथे त्वामश्वं युनज्मि युज्यम् ॥

कात्यायनः – " अव्यथायै त्वेति सुन्वन्तं (? सुन्वन्) आरोहति" (काश्रौ १५·६·१७) इति । संयोजिते रथे यजमान आतिष्ठेत् । पाठस्तु– ' अव्यथायै त्वा स्वधायै त्वाऽरिष्टः फल्गुनः ' इति । अरिष्टः अनुपहिंसितः । फल्गुनः अर्जुनः, इन्द्र इत्यर्थः । " अर्जुनो ह वै नामेन्द्रः " (शब्रा २·१·२·११) इति श्रुतेः । एवंभूत इन्द्रः । हे रथ, त्वा त्वाम् अव्यथायै भयरहिताय चलनरहिताय वा । व्यथ भयचलनयोः । आरोहयत्विति शेषः । स्वधायै अन्नरसाय त्वामारोहयतु ॥

कात्यायनः – " मरुतामिति दक्षिणधुर्यं प्रयोजयति (? प्राजति) " (काश्रौ १५·६·१८) इति । युगस्य दक्षिणभागवाहकमश्वं प्रयोजयेत् । पाठस्तु– ' मरुतां प्रसवेन जय ' इति । मरुतां संबन्धिन्या प्रसवेन अनुज्ञया वर्तमानोऽश्वस्त्वमस्मच्छत्रून् जय ॥

कात्यायनः – " गवां मध्ये स्थापयत्यापामेति " (काश्रौ १५·६·१९) इति । प्रगल्भं प्रगच्छन्तमश्वं गोसमूहेऽवस्थापयेत् । ' मनसा ' इति मन्त्रशेषः । वयं मनसा सह आपाम प्राप्तवन्तः ॥

कात्यायनः – धनुरार्त्न्योपस्पृशति गां यजमानः समिन्द्रियेणेति " (काश्रौ १५·६·२०) इति । यजमानो धनुष्कोट्या गाम् उपस्पृशेत् । वयम् इन्द्रियेण वीर्येण संगताः स्मः ॥१॥

---

6. S2 before first वाज° ins. अग्नि; S2 before second वाज° ins. अग्निचयन°

16. S2 चयन° for चलन°;

17. S2 om. व्यथ भयचलनयोः

18. S2 दक्षिणाध्वर्युं for दक्षिणधुर्यं

22. S2 प्रयच्छन्तम् for प्रगच्छन्तम्

23. P1 with markings above प्राप्तवन्तः ins. on the margin आप्लृ व्याप्तौ

रथावहरणादिमन्त्राः]

आ– रथमुपावहरति– ‘ इन्द्रस्य वज्रोऽसि ’ इति। लिङ्गोक्तदैवत्यानि यजूंषि। vइन्द्रस्य vवज्रः vअसि वज्रकल्पः रथोऽसि। तं युनक्ति ‘ मित्रावरुणयोः त्वा ’ इति। vमित्रावरुणयोः vप्रशास्त्रोः प्रशासं कर्त्रोः vप्रशिषा प्रशासनेन रथं vत्वा त्वां vयुनज्मि रथसंबन्धमासादयामि। तमातिष्ठति– ‘ अव्यथायै त्वा ’। व्यथ भयचलनयोः। अभयाय अचलनाय वा। vत्वा त्वामधितिष्ठामि। vस्वधायै अन्नरसाय च त्वामधितिष्ठामीति शेषः। रिषि हिंसायाम्। vअरिष्टः अनुपहिंसितः। vफल्गुनः अर्जुनः। “ अर्जुनो ह वै नामेन्द्रः ” (शब्रा २·१·२·११) इति श्रुतेः। दक्षिणं धुर्यं प्राजति– ‘ मरुतां प्रसवेन ’। vमरुतां संबन्धिन्याम् अभ्यनुज्ञायां वर्तमानः शत्रून् vजय। मध्ये गवामुपच्छाति– ‘ आपाम मनसा ’। वयं vमनसा सह। आप्लृ व्याप्तौ। व्या(प्रा ?)प्तवन्तः। धनुरात्न्यौ गामुपस्पृशति– ‘ सम् इन्द्रियेण ’ इति। वयम् vइन्द्रियेण संगताः स्मः ॥१॥

मा ते इन्द्र ते वयं तुराषाळयुक्तासो अब्रह्मता वि दसाम।
तिष्ठा रथमधि यद्वज्रहस्ता रश्मीन् देव युवसे स्वश्वान् ॥२॥

मा। ते। इन्द्र। ते। वयम्। तुराषाट्। अयुक्तासः। अब्रह्मता। वि। दसाम।
तिष्ठ। रथम्। अधि। यत्। वज्रहस्तेति वज्रऽहस्त। आ।
रश्मीन्। देव। युवसे। स्वश्वानिति सुऽअश्वान् ॥ च्छः ॥२॥

कात्यायनः – “ पूर्वेण यूपं परीत्यान्तःपात्यदेशे स्थापयति मा त इन्द्र इति ” (द्र. काश्रौ १५·६·२२) इति। पाठस्तु– ‘ मा त इन्द्र ते वयं तुराषाळयुक्तासो अब्रह्मता वि दसाम। तिष्ठा रथमधि यद्वज्रहस्ता रश्मीन् देव युवसे स्वश्वान् ’ इति। तूर्णं सहते शत्रूनभिभवतीति तुराषाट्, तस्य संबोधनं हे vतुराषाट्। vइन्द्र vते तव स्वभूतास्ते त्वदधीतत्वेन प्रसिद्धा वयम् vअयुक्तासः त्वया अयुक्ताः सन्तः vअब्रह्मता अब्रह्मतायाः। “ सुपां सुलुक् ” (पा ७·१·३९) इति पञ्चम्या लुक्। परिदृढं त्वदुदे(? दे)–

---

2. M3 B1 ता° for तं
4. B1 om. त्वामधितिष्ठामि। स्वधायै अन्नरसाय च (L 5)
7. J प्राज्यति for प्राजति; M3 °संबन्धिना अभ्यनुज्ञया for संबन्धिन्यामभ्यनुज्ञायां
8. J M3 मध्य° for मध्ये;
B1 °यच्छ for °यच्छति; J om. वयं मनसा; B1 आप्नु for आप्लृ
17. P1 om. पाठस्तु

शक्रं कर्म तद्रहितत्वात् मा विदसाम विविधमुपक्षीणा न भवामः । किन्तु तव यष्टारो भवामः । हे वज्रहस्त इन्द्र देव, रश्मीन् अश्वबन्धनप्रग्रहान् स्वश्वान् शोभनान् इष्टानुसारिणोऽश्वान् यद्यस्मिन् रथे आयुवसे सर्वतः मिश्रयसि तं रथम् अधितिष्ठ आश्रय अस्मदागमनार्थमारोहेत्यर्थः ॥२॥

आ– अग्रेण शालामुद्यच्छति– 'मा ते' इति । प्राजापत्यः संवरणऋषिः । ऐन्द्री त्रिष्टुप् । हे वज्रहस्त, यत् यं रथम् अधितिष्ठसि । हे देव, यस्मिन् रथे त्वमवस्थितः, येन रथेन स्वश्वान् शोभनानश्वान् युवसे आयच्छसि नियुङ्क्षे(ङ्क्षे) । अश्वैश्च रश्मीन् प्रग्रहान् युवसे । हे इन्द्र, ते तव स्वभूते रथे वयम् अयुक्तासः योगरहिताः, अयुक्ताः एव अयुक्तासः, मा विदसाम । दसु उपक्षये । कर्मणि लकारः । मा विदस्येमहि मा उपक्षीयेमहि । हे इन्द्र तुराषाट् । तूर्णं सहत इति तुराषाट् । तस्य संबोधनं, हे तुराषाट्, ते वयं मा विदस्याम । तदुपमया दर्शयितुमाह– अब्रह्मता । लुप्तोपममेतत् । अब्रह्मतेव । ब्रह्मविज्ञानानन्दस्वभावमविनश्वरं, तस्य भावो ब्रह्मता, न ब्रह्मता अब्रह्मता, यथा ब्रह्मस्वभावादन्यद्विदस्येत एवं मा विदस्येमहीत्युपमार्थः ॥२॥

अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा ।
इन्द्रस्येन्द्रियाय स्वाहा मरुतामोजसे स्वाहा ।
पृथिवि मातर्मा मा हिंसीर्मो अहं त्वाम् ॥३॥

अग्नये । गृहपतय इति गृहऽपतये । स्वाहा । सोमाय । वनस्पतये ।
इन्द्रस्य । इन्द्रियाय । मरुताम् । ओजसे ।
पृथिवि । मातः । मा । मा । हिंसीः । मो इति मो । अहम् । त्वाम् ॥ छं ॥३॥

सा– कात्यायनः – "अग्नये गृहपतय इति चत्वारि रथविमोचनीयानि जुहोति प्रतिमन्त्रम्" (काश्रौ १५.६.२३) इति । रथविमोचनार्हान् चतुःसंख्याकान् आहुतिविशेषान् एकैकेन मन्त्रेण

1. S2 om. first भवामः, P1 with markings above first भवामः ins. on the margin – दसु उपक्षये
3. P1 मिश्रयति for मिश्रयसि
6. M3 om. शोभनानश्वान्
7. M3 स्वरिते for स्वभूते; B1 योगे for योग; M3 om. योग ... अयुक्तासः । (L. 8)
10. J M3 अनश्वरं for अविनश्वरं

रथावहरणादिमन्त्राः]

जुहुयात् । तेषां पाठस्तु– ‘अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा । इन्द्रस्येन्द्रियाय स्वाहा मरुतामोजसे स्वाहा’ इति । गृहाधिपतये ^{v}स्वाहा हविर्दत्तमस्तु । वनस्पतिरूपिणे ^{v}सोमाय हविर्दत्तमस्तु । इन्द्रसंबन्धिने इन्द्रियाय वीर्याय ^{v}स्वाहा सुहुतमस्तु । मरुतामोजसे । ^{v}मरुतां संबन्धिने ^{v}ओजसे बलाय ^{v}स्वाहा सुहुतमस्तु ॥

कात्यायनः – “भूमिमवेक्षते पृथिवि मातरिति” (काश्रौ १५.६.२४) इति । पाठस्तु– ‘पृथिवि मातर्मा मा हिꣳसीर्मो अहं त्वाम्’ इति । हे ^{v}मातः जगन्निर्मात्रि हे ^{v}पृथिवि भूमे, ^{v}त्वं ^{v}मा मां ^{v}मा ^{v}हिꣳसीः ^{v}हिंसां मा कार्षीः । अहमपि त्वां पृथिवीं मा हिꣳसिषम् ॥३॥

आ– चत्वारि रथविमोचनीयानि जुहोति– ‘अग्नये गृहपतये’ इति । लिङ्गोक्तदैवत्यानि यजूंषि । ^{v}अग्नये ^{v}गृहपतये ^{v}स्वाहा इति जुहोति । ^{v}सोमाय ^{v}वनस्पतये ^{v}स्वाहा । ^{v}मरुतां संबन्धिने ^{v}ओजसे ^{v}स्वाहा । ^{v}इन्द्रस्य इन्द्रसंबन्धिने ^{v}इन्द्रियाय ^{v}स्वाहा । भूमिमवेक्षते– ‘पृथिवि मातः’ इति । भूमिदैवत्यं यजुः । हे ^{v}पृथिवि हे ^{v}मातः, ^{v}मा मां ^{v}मा ^{v}हिꣳसीः हिंसां मा कार्षीः । मो अहं त्वाम् । ^{v}अहम् अपि पृथिवीं ^{v}त्वां ^{v}मो मा हिंसिषं हिंसां मा कार्षम् ॥३॥

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥४॥

हꣳसः । शुचिषत् । शुचिसदिति शुचिऽसत् । वसुः । अन्तरिक्षसदित्यन्तरिक्षऽसत् ।
होता । वेदिषत् । वेदिसदिति वेदिऽसत् । अतिथिः । दुरोणसदिति दुरोणऽसत् ।
नृषत् । नृसदिति नृऽसत् । वरसदिति वरऽसत् ।
ऋतसदित्यृतऽसत् । व्योमसदिति व्योमऽसत् ।
अब्जा इत्यप्ऽजाः । गोजा इति गोऽजाः ।
ऋतजा इत्यृतऽजाः । अद्रिजा इत्यद्रिऽजाः । ऋतम् । बृहत् ॥ छौः ॥ ४ ॥

---

6. P1 भूते for भूमे
7. S2 हिꣳसिष्ठम् M3 हिंसिष्ट for हिꣳसिषम्
8. J M3 °विमोचनानि for °विमोचनीयानि
10. J प्रेक्षते for अवेक्षते

सा– कात्यायनः – " अवरोहति स हꣳसः शुचिषदिति " (काश्रौ १५·६·२५) इति। रथात् सकाशात् अवरोहणं कुर्यात् । पाठस्तु– ' हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ' इति । हन्ति पृथिवीमिति ᵛहꣳसः रथः । शुचौ देवयजने रथवाहने च सीदतीति ᵛशुचिषत् । स्वस्योपरि यजमानं वासयतीति ᵛवसुः । तरुगुल्माद्यवरुद्धेऽन्तरिक्षे सीदतीति ᵛअन्तरिक्षसत् । ᵛहोता होतृसमानः । तदेव कथमित्युच्यते? वेद्यां सीदतीति ᵛवेदिषत् अतिथिशब्दवाच्यश्च । तदपि कथमित्युच्यते । दुरोणेषु सीदतीति ᵛदुरोणसत् । यो यस्तमारोढुं नयति तस्य तस्य गृहे सीदतीति दुरोणसत् । नृषु मनुष्येषूपकारं कर्तुं सीदतीति ᵛनृषत् । वरे श्रेष्ठे राजगृहे सीदतीति ᵛवरसत् । ऋते यज्ञे वाजपेयादौ सीदतीति ᵛऋतसत् । सूर्यं वोढुं व्योम्न्याकाशे सीदतीति ᵛव्योमसत् । " अप्सुयोनिर्वा अश्वः " (तैब्रा ३·८·४·३; ३.८.९·२; ३·८·२०·४) इति श्रुतेरद्भ्यो जातैरश्वैरुपेतत्वात् ᵛअब्जः । गोशब्दवाच्याद्वज्राज्जायत इति ᵛगोजाः । रथस्य वज्रजन्यत्वं तैत्तिरीयैः समाम्नातम्– " इन्द्रो वृत्राय वज्रं प्राहरत् स त्रेधा व्यभवत् स्फ्यस्तृतीयꣳ रथस्तृतीयं यूपस्तृतीयम् " (तैसं ५·२·६) इति । पष्ठवाहिरूपत्वेन ऋतं यज्ञमुद्दिश्य जातत्वात् ᵛऋतजाः । पाषाणसदृशेभ्यो दृढकाष्ठेभ्यो जातत्वात् ᵛअद्रिजाः । ईदृशो रथः ᵛबृहत् ऋतं प्रौढं राजसूययज्ञं संपादयत्विति शेषः ॥४॥

आ– अवतरति– ' हꣳसः शुचिषत् ' इति । वामदेवः सौरी सप्रपञ्चं परंब्रह्माभिधायिनी अतिजगती । हन्तेर्गत्यर्थस्य रूपं हंस इति । ᵛहंसः भगवानादित्यः । शुचिर्दीप्तौ । शुचौ दीप्तौ सीदतीति ᵛशुचिषत्, आदित्यरूपेण शुचिषत् । षद्लृ विशरणगत्यवसादनेषु । ᵛवसुः वासयिता । वायुरूपेणान्तरिक्षे सीदतीति ᵛअन्तरिक्षसत् । ᵛहोता सर्वेषां देवानाम् आह्वाता । अग्निरूपेण

---

6. S2 om. °वाच्य°

7. S2 गृहेषु for गृहे

11. P1 व्यभजत् for व्यभवत्

12. S2 पृष्ठ° for पष्ठ°

13. P1 adds an alternative explanation of the verse, in the margin – परब्रह्माभिधायिनी अतिच्छन्दा अतिजगती रविस्तुतिः । हन्त्यध्वानं पापं वा हंसो भगवानादित्यमण्डलस्थः । स च शुचिषु स्वदीप्तिषु सीदतीति शुचिषत् । पवित्रपदार्थेषु विशिष्टसंनिधानाद्वा शुचिषत् । वसुर्वासयिता पुरुषरूपेण अन्तरिक्षसद्वायुरूपेण । सर्वप्राणिहृदयाकाशगतो वा । होता यागादिकर्तृप्रेरकत्वेन । वेदिषदग्निरूपेण । अतिथिः पूज्यत्वेन । दुरोणसत् प्रतिगृहे वर्तमानः । दुरोणेति गृहनाम । नृषु सीदतीति प्राणभावेनेति नृषत् । वरेषु ज्ञानिषु ज्ञानरूपेण सीदतीति वरसत् । ऋते सत्ये सीदतीति ऋतसत् । स्वर्गादिसप्तलोकेषु विद्यमानत्वात् व्योमसत् । मत्स्यादिरूपेणाप्सु जायत इत्यब्जाः । गोषु वेदेषु निमित्तभूतेषु हयग्रीवात्मना जातत्वाद्गोजाः । स्वसत्यं पालयितुमवतरतीत्यृतजाः । अद्रिषु जातत्वादद्रिजाः । ऋतं ज्ञानरूपं बृहत् ब्रह्मेति ॥

14. B1 after सौरी adds गायत्री; B1 सप्रपञ्चपरमं for सप्रपञ्चं परं°

16. B1 om. आदित्यरूपेण शुचिषत्

रथावहरणादिमन्त्राः]

वेद्यां सीदतीति वेदिषत् । यश्च अतिथिः अज्ञातकुलगोत्रनामा पुमान् अतिथिः । अयमपि तथाविधः । अतिथिरूपेण दुरोणे गृहे सीदतीति दुरोणसत् । यश्च नृषु मनुष्येषु विवक्षितशास्त्रीय-कर्मज्ञानरूपेण सीदतीति नृषत् । यश्च उत्कृष्टेषु पूज्यादिरूपेण सीदतीति वरसत् । यश्च ऋते सत्ये सीदतीति ऋतसत् । यश्च व्योमसत् व्योम्नि अव्याकृताकाशे व्योमसु अन्तरिक्षेषु सर्वेषु वा सीदतीति व्योमसत् । एवं सर्वत्र स्थितिभावेन स्तुत्वा अथेदानीं सर्वत्रोत्पत्तिद्वारेण स्तौति । यश्च अब्जाः अप्सु भूतसूक्ष्मेषु जायत इत्यब्जाः । गोषु पृथिवीप्रधानेषु भूतेषु चतुर्विधभूतग्रामरूपेण जायत इति गोजाः । यश्च ऋते सत्ये आदित्यमण्डलादौ जायत इति ऋतजाः । अद्रौ पाषाणे अग्निरूपेण जायत इति अद्रिप्रभवा नद्यः अद्रिजाः । मेघो वा अद्रिः, अद्रौ मेघ उदकरूपेण जायत इति अद्रिजाः । ऋतं सत्यम् । ऋ गतौ । ऋतं सर्वत्र व्याप्तं गतं तत्त्वज्ञानात्मकं परं ब्रह्म बृहत् । वृहि वृद्धौ । नित्यशुद्धबुद्धसत्यपरमानन्दलक्षणं ब्रह्म बृहत् इत्यभिधीयते । एवं परब्रह्मवादितास्य मन्त्रस्य । एवं तत्परं ब्रह्म प्रत्यवतरामीति वाक्यशेषः ॥४॥

इयदस्यायुरस्यायुर्मे देहि युङ्ङसि वर्चोऽसि वर्चो मे देहि ।
ऊर्गस्यूर्जं मयि धेहीन्द्रस्य वां बाहू वीर्यकृता उपावहरामि ।।५।।(७)।।

इयत् । असि । आयुः । असि । आयुः । मे । देहि ।
युङ् । असि । वर्चः । असि । वर्चः । मे । देहि ।
ऊर्क् । असि । ऊर्जम् । मयि । धेहि । इन्द्रस्य । वाम् । बाहू इति बाहू ।
वीर्यकृता इति वीर्यऽकृतौ । उपावहरामीत्युपऽअवहरामि ।। ढः ।।५।।(७)।।

1. J om. यश्च ... वरसत् (L. 3)
3. B1 एषः for यश्च
4. B1 om. सीदतीति; B1 अव्याकृते कोशे for अव्याकृताकाशे
5. B1 सर्वस्थिति° for सर्वत्रस्थिति°
8. B1 °भवा for °प्रभवा; B1 om. अद्रिजाः
9. B1 om. ऋतं सत्यम् ; M3 भूतं for गतं
10. B1 om. °सत्य°; B1 om. ब्रह्म
12. B1 वादित्यस्य, J °वादित्यस्य for °वादितास्य; B1 om. तत्°

सा– कात्यायनः – " उपस्पृशति शतमानावियदसीति " (काश्रौ १५·६·२९) इति । शतसंख्यनिष्कपरिमितौ रुक्मविशेषावुपस्पृशेत् । पाठस्तु– ' इयदस्यायुरस्यायुर्मे देहि युङ्ङसि वर्चोऽसि वर्चो मे देहि ' इति । हे रुक्मविशेष, त्वम् ˇइयत् ˇअसि एतावत्परिमाणोऽसि । अत्र तत्परिमाणं हस्तेनाभिनीयते । परिमितत्वादेवायुःस्वरूपोऽसि । तस्मात् ˇआयुः ˇमे प्रयच्छ । ˇयुङ्ङसि धारयितुं योग्योऽसि, । धारिते सति ˇवर्चः ˇअसि तेजस्वी भवसि । अतः ˇमे कान्तिं प्रयच्छ ॥

कात्यायनः – " ऊर्गसीति शाखामुपस्पृशति " (काश्रौ १५·६·३०) इति । औदुम्बरीं शाखामुपस्पृशेत् । पाठस्तु– ' ऊर्गस्यूर्जं मयि धेहि ' इति । हे औदुम्बरि शाखे, त्वम् ˇऊर्क् ˇअसि । अन्नरूपा भवसि । ततः ˇऊर्जम् अन्नं ˇमयि ˇधेहि स्थापय ॥

कात्यायनः – " इन्द्रस्य वामित्यवहरते बाहू " (काश्रौ १५·६·३१) इति । पूर्वं " हिरण्यरूपा उषसः " (कासं ११ १४) इति मन्त्रेण यजमानस्य ˇबाहू उद्गृहीतौ । तयोरिदानीमधस्तादुपावहरणमुच्यते । पाठस्तु– ' इन्द्रस्य वां बाहू वीर्यकृता उपावहरामि ' इति । ˇवीर्यकृतौ वीर्यकरणे समर्थस्य ˇइन्द्रस्य परमैश्वर्ययुक्तस्य यजमानस्य संबन्धिनौ ˇवां युवां ˇबाहू ˇउपावहरामि ॥५॥

[इत्येकादशेऽध्याये सप्तमोऽनुवाकः ॥६॥]

आ– शतमाना उपस्पृशति ' इयदसि ' इति । शतमानदेवत्यं यजुः । ˇइयत् इति परिमाणवचनोऽयं शब्दः । " शतमानमसि आयुरसि । आयुर्हि हिरण्यम् " (शब्रा ४·३·४·२४) इति श्रुतेः । आयुर्मे देहि । ˇमे मह्यं ˇआयुः ˇदेहि । यो हि यदात्मको भवति स एतद्दातुमुत्सहते । यस्मात् ˇशतमानं हिरण्यं त्वम् ˇअसि तस्माच्छताब्दपरिमाणम् ˇआयुः मे देहि । युङ्ङसि । युजिर्योगे । यज्ञं युनक्ति संभारानयनेन दक्षिणादीनां दानेन चेति ˇयुङ् ˇअसि । वर्चोऽसि । ˇवर्चः तेजः ˇअसि यस्मात् तस्मादस्माभिः प्रार्थ्यते वर्चः । वर्चः ˇमे मह्यं ˇदेहि । औदुम्बरीशाखामुपस्पृशति । ऊर्गसि ऊर्जं मयि ' धेहि ' । शाखादैवत्यं यजुः । [त्वम्] ˇऊर्क् अन्नम् [असि], अतः ˇऊर्जं मे ˇधेहि । अवहरति– ' इन्द्रस्य ' इति । बाहुदैवत्यं यजुः । इन्द्रस्य यजमानस्य ˇवीर्यकृतः वीर्यकारिणः संबन्धिनः ˇवां युवां तौ ˇबाहू ˇउपावहरामि ॥५॥

[इत्येकादशेऽध्याये सप्तमोऽनुवाकः ॥]

---

1. S2 °समाना° for °माना°
4. S2 °धीयते for °नीयते; S2 om. प्र°
7. P1 om. पाठस्तु
11. S2 °कारिणः for °करणे
12. S2 om. समर्थस्य
16. M3 अयदात्मको for यदात्मको
17. B1 उत्सुकः for उत्सहते
18. J संभारान् येन, B1 संभारानयेन for संभारानयनेन; B1 om. second असि
20. B1 ऊर्गतं for ऊर्गसि; J om. ऊर्गतं (reconstructed by us as ऊर्गसि)

[अथ अष्टमोऽनुवाकः]

सप्तमेऽनुवाके रथावहरणादिमन्त्रा उक्ताः । अष्टमे आसन्दीस्थापनादिमन्त्रा उच्यन्ते ॥

स्योनाऽसि सुषदाऽसि क्षत्रस्य योनिरसि ।
स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ।।१।।

स्योना । असि । सुषदा । सुसदेति सुऽसदा । क्षत्रस्य । योनिः । असि ।
स्योनाम् । आ । सीद । सुषदाम् । सुसदामिति सुऽसदाम् ।
क्षत्रस्य । योनिम् । आ । सीद ॥ चं ॥१॥

कात्यायनः – " खादिरीमासन्दीं राक्षसीं रज्जूतां (?) व्याघ्रचर्मदेशे निदधाति स्योनासीति " (? द्र. काश्रौ १५·६·३६-३७) इति । रक्षःसंबन्धिनीं खदिरवृक्षनिर्मितामासन्दीं व्याघ्रचर्मप्रदेशे निदध्यात् । ' सुषदासि ' इति मन्त्रशेषः । हे आसन्दि, त्वं स्योना असि सुखकरी भवसि । सुषदा असि सुखेनोपवेष्टुं योग्यासि ॥

कात्यायनः – " अधिवासमस्यामास्तृणाति क्षत्रस्य योनिरिति " (काश्रौ १५·७·२) इति । अस्यामासन्द्यामुपर्याच्छादकं वस्त्रमास्तृणीयात् । ' असि ' इति मन्त्रशेषः । हे अधिवास, त्वं क्षत्रस्य क्षत्रियस्य योनिः मातृवद्धारकत्वेन कारणमसि ॥

कात्यायनः – सुन्वन्तमस्यामुपवेशयति स्योनामासीदेति " (काश्रौ १५·७·३) इति । यजमानमासन्द्यामवस्थापयेत् । पाठस्तु– ' स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ' इति । हे यजमान, शरीरस्य स्योनां सुखकारिणीमेतामासन्दीं पूज्याम् आसीद उपविश । सुषदां सुखेनोपवेष्टुं योग्यामासन्दीम् आसीद क्षत्रस्य कारणभूतामुपविश ॥१॥

---

2. S2 रथाचरण° for रथावरण°; S2 after अष्टमे ins. अनुवाके
8. S2 राज्जसीं for राक्षसीं both readings don't seem to be correct while राज्जसी cannot be derived from रज्जु or रज्जू. राक्षसी could be from रक्षस्. But the आसन्दी which is used in sacrifices can in no way have any relation with रक्षस् evil spirit. The reading we find in Kātyāyana śrauta sūtra is रज्जूतां meaning striped or stickd with cords. But the commentaries have accepted राक्षसी or राज्जसी to try to explain the term.
9. S2 रज्जोः संबन्धिनीं खादिर° for रक्षःसंबन्धिनीं खदिर°
12. S2 योनिरसीति for योनिरिति
16. S2 om.:सुषदामासीद
17. S2 मदीयशरीर for यजमान, शरीरस्य

आ– मैत्रावरुणीपयस्यां प्रति आसन्दीं निदधाति– ' स्योनासि ' इति । आसन्दीदैवत्यं यजुः । स्योनमिति सुखनाम । [v]स्योना सुखरूपा । आसन्दी तत्रोच्चितातल्पखट्वा असि । सुशोभनतया सीदतीति [v]सुषदा असि । [v]क्षत्रस्य योनिः [v]असि । [[v]योनिः] स्थानम् । सुन्वन्तमस्यामुपवेशयति । [v]स्योनाम् [v]आसीद सुखरूपामासन्दीम् आसीद अधिरोह । [v]सुषदाम् [v]आसीद आरोह । [v]क्षत्रस्य [v]योनिः स्थानम् आरोह ॥१॥

नि षसाद धृतव्रतो वरुणः पस्त्यास्वा ।
साम्राज्याय सुक्रतुः ॥२॥

नि । ससाद । धृतव्रत इति धृतऽव्रतः । वरुणः । पस्त्यासु । आ ।
साम्राज्यायेति साम्ऽराज्याय । सुक्रतुरिति सुऽक्रतुः ॥ डो ॥२॥

सा– " निषसादेत्युरोऽस्यालभते " (कात्श्रौ १७·४·७) इति । अस्य यजमानस्योरः संस्पृशेत् । पाठस्तु– ' निषसाद धृतवृतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ' इति । असौ यजमानः [v]धृतव्रतः स्वीकृतयज्ञः वरुणोऽनिष्टनिवारको भूत्वा [v]निषसाद अस्यामासन्दयामुपविवेश । [v]पस्त्यासु बहुषु वैरिगृहेषु आगत्य तत्र साम्राज्यं कर्तुं [v]सुक्रतुः शोभनसंकल्पो भवतु ॥२॥

आ– यजमानस्य उरोऽभिमृश्य जपति– ' निषसाद ' इति । शुनःशेपो वारुणी गायत्री । ' निषसाद धृतव्रतो वरुणः पस्त्यास्वा ' । धृतं व्रतं कर्म येन सः [v]धृतव्रतः । यजमानलक्षणः [v]वरुणः । [v]पस्त्यासु विक्षु प्रजासु [v]आ आधिपत्येन [v]निषसाद निषण्णः । [v]साम्राज्याय साम्राज्यार्थाय [v]सुक्रतुः सुकर्मा शोभनप्रज्ञो भव ॥२॥

---

1. J again lacuna after स्योनासि; B1 om. आसन्दीदैवत्यं यजुः (L 2)
3. B1 सुषदा is spelt here as सुखदा as it often happens in North western Mss. where ष is invariably pronounced as ख. This contamination has manifested itself in writing here in this Ms.
4. B1 सुत्वानन्तरम् corrected by us as सुन्वन्तम्;
 सुखदाम् see above; B1 om. सुखरूपामासन्दीमासीद
10. P1 उरोऽस्याम् for उरोऽस्य; P1 उर आसन्द्यां स्पृशेत् for उरः संस्पृशेत्
13. S2 om. तत्र

अभिभूरस्ययानामेतास्ते पञ्च दिशः कल्पन्ताम् ।
ब्रह्मँस्त्वं ब्रह्मासि ।।३।।
सवितासि सत्यप्रसवो वरुणोऽसि सत्यौजाः ।
इन्द्रोऽसि विशौजा रुद्रोऽसि सुशेवः ।।४।।
प्रियंकर श्रेयस्कर भूयस्कर ।
इन्द्रस्य वज्रोऽसि तेन मे रध्य ।।५।।

अभिभूरित्यभिऽभूः । असि । अयानाम् । एताः । ते । पञ्च । दिशः । कल्पन्ताम् ।
ब्रह्मन् । त्वम् । ब्रह्मा । असि ।। ग्यि ।।३।।
सविता । असि । सत्यप्रसव इति सत्यऽप्रसवः । वरुणः । सत्यौजा इति सत्यऽओजाः ।
इन्द्रः । विशौजाः । रुद्रः । सुशेव इति सुऽशेवः ।। ट्टौ ।।४।।
प्रियंकरेति प्रियम्ऽकर । श्रेयस्कर । श्रेयःकरेति श्रेयःऽकर ।
भूयस्कर । भूयःकरेति भूयःऽकर ।
इन्द्रस्य । वज्रः । असि । तेन । मे । रध्य ।। णां।।५।।

सा– कात्यायनः – "अभिभूरित्यस्मै पञ्चाक्षान् पाणावाधाय" (काश्रौ १५.७.५) इति। पञ्चसङ्ख्याकान् द्यूतसाधनभूतान् कपर्दकादीन् यजमानस्य हस्ते विदध्यात्। पाठस्तु– 'अभिभूरस्ययानामेतास्ते पञ्च दिशः कल्पन्ताम्' इति । हे अक्षदेव, त्वं ते अयानां गत्युपलक्षितसत्कर्मणाम् अभिभूः असि अभितो व्याप्तो भवसि। एताः प्राच्यादयः दिशः ते त्वदर्थं कल्पन्तां स्वस्य प्रयोजनसमर्था भवन्तु ।।

कात्यायनः– "ब्रह्मन्नित्यामन्त्रयते पञ्चकृत्वः। प्रत्याह व्यत्यास१८ सविता वरुण इन्द्रो रुद्र इति त्वं ब्रह्मासीत्यादिभिः ।। आदिनैवान्त्यं प्रियंकरेति च ह्वयत्येवंनामानम्" (काश्रौ १५.७.९-१०) इति। आसन्द्यामुपविष्टो यजमानो राजा स्वमेवार्थं भूमावुपविष्टानध्वर्युप्रभृतींश्चतुर ऋत्विजः क्रमेण ब्रह्मन्नित्यनेन संबोधनप्रथमैकवचनान्तरूपेण पदेनामन्त्रयेत्। तांश्च ऋत्विजः पशुपञ्चमं पुरोहितममात्यं पुरुषं प्रियंकर इत्यनेन नाम्ना संबोधयेत्। एवं पञ्चकृत्वः संबोधनं भवति। तेऽपि ऋत्विजो मन्त्रेण प्रत्युत्तरं ब्रूयुः।

---

15. S2 प्राणिधाय for पाणावाधाय
18. P1 अभिभविता for अभितो व्याप्तो
21. S2 आदिनेवान्तं for आदिनैवान्त्यं

तेषां प्रत्युत्तराणां चतुर्णां मन्त्राणामन्ते ' त्वं ब्रह्मा असि ' इत्येवंरूपः प्रयोगो भागः उत्तरभागश्चतुर्णां चतुर्विधः । ' सविता असि सत्यप्रसवः ' इति प्रथमस्य मन्त्रस्योपरितनो भागः । द्वितीयः ' वरुणोऽसि सत्यौजाः ' इति । तृतीयस्य ' इन्द्रस्य विशौजाः ' इति । चतुर्थस्य ' रुद्रोऽसि सुशेवः ' इति । व्यत्यासमित्यस्यायमर्थः ॥

एवं संबोध्य तेन प्रत्युत्तरे दत्ते पश्चात् द्वितीयं संबोधयेत् । एवमुत्तरत्रापि । तथा सति संबोधनप्रत्युत्तरं योज्यम् । तस्य व्यत्ययस्यानुष्ठानं भवति । आदिनैव इत्यस्यायमर्थः । प्रथमे प्रत्युत्तरमन्त्रः । ' त्वं ब्रह्मासि ' इति प्रथमभागं पठित्वा ' सविता ' इत्यादिक उत्तरभागस्तथा पठितः । एवमुत्तरमन्त्रेष्वपि ' त्वं ब्रह्मा असि ' इत्येवमेव प्रथमभागे पठित्वा तदुत्तरभागान् वदेदिति ॥

तेषां मन्त्रपाठस्तु– ' ब्रह्मँस्त्वं ब्रह्मासि । सवितासि सत्यप्रसवो वरुणोऽसि सत्यौजाः । इन्द्रोऽसि विशौजा रुद्रोऽसि सुशेवः । प्रियंकर श्रेयस्कर भूयस्कर ' इति । हे ब्रह्मन्नध्वर्युरूप ब्राह्मण, ब्रह्मन् त्वं ब्रह्मा असि । एवं चतुर्णामृत्विजामामन्त्रणरूपं मन्त्रमुक्त्वेदानीं प्रथमामन्त्रितस्यर्त्विज उत्तरं ब्रूते । हे राजन्, त्वमेव ब्रह्मा असि ब्राह्मणः भवसि, न त्वहम् । कुतः ? यतस्त्वमेव सविता असि ब्राह्मणधर्मान् पालयन्नस्माकमनुष्ठानायानुज्ञातासि । त्वमेव सत्यप्रसवः अमोघानुज्ञः । अतो ब्राह्मण-वर्णाश्रमधर्माणां त्वदधीनत्वात् त्वमेव ब्रह्मासि । द्वितीयामन्त्रितस्यर्त्विज उत्तरं मन्त्रस्योत्तरभागं ब्रूते । हे राजन्, त्वं वरुणः अनिष्टनिवारकः असि । सत्यौजाः अमोघवीर्यः असि । तृतीयामन्त्रितस्यर्त्विज उत्तरं मन्त्रस्योत्तरभागं ब्रूते । हे राजंस्त्वमेव इन्द्रः असि परमैश्वर्यवानसि । विशौजाः इति छान्दसं रूपम् । विक्षु प्रजासु ओजो बलं यस्य स विशौजास्तादृशोऽसि । चतुर्थामन्त्रितस्यर्त्विज आह । हे राजंस्त्वमेव रुद्रः असि । सुशेवः सुष्ठु सुखवान् त्वमसि । पञ्चमं पुरोहितमाह । प्रियं करोतीति प्रियंकरः, तस्य संबोधनं हे प्रियंकर । श्रेयः करोतीति श्रेयस्करः, तस्य संबोधनं हे श्रेयस्कर । भूयो बहुतरं करोतीति भूयस्करः । एवंभूतकल्याणनाम्ना तमाह्वयेत् ॥

कात्यायनः – " स्फ्यमस्मै प्रयच्छति पुरोहितोऽध्वर्युर्वेन्द्रस्य वज्र इति " (काश्रौ १५·७·११) इति । अध्वर्युपुरोहितयोरन्यतरः अस्मै यजमानाय स्फ्यं प्रयच्छेत् । पाठस्तु– ' इन्द्रस्य वज्रोऽसि तेन मे राध्य ' इति । हे स्फ्य, त्वम् इन्द्रस्य संबन्धी वज्रः असि । " वज्रो वै स्फ्यः " (शब्रा. ५·४·४·१५) इति श्रुतेः । यस्मादेवंभूतस्त्वं तेन कारणेन मे मदर्थं रध्य द्यूतस्थानपरिलेखनरूपं कार्यं साधय ॥५॥

---

8. P1 om. एवम्; P1 पठेत् for वदेत्
14. P1 त्वदधीतत्वात् for त्वदधीनत्वात्;
 P1 ऋत्विगुत्तरं for ऋत्विज उतरं; S2 द्वितीय° for द्वितीया°; S2 om. मन्त्रस्योत्तरभागं;
15. S2 after हे राजन् adds उत्तरमन्त्रस्योत्तरभागं व्याचष्टे । राजन् and om. त्वं;
 S2 तृतीयमन्त्रस्य for तृतीयामान्त्रितस्य
16. S2 रुद्रोऽसि सुशेवः for इन्द्रोऽसि
17. S2 चतुर्थमन्त्रस्य for चतुर्थामन्त्रितस्य
18. S2 सुखे तावत् for सुखवान्; P1 with markings above °शेवः ins. on the right hand margin शेव इति सुखनाम
19. S2 om. हे प्रियंकर
21. P1 om. कात्यायनः

आ– पञ्चाक्षान् पाणावावपति– ‘ अभिभूरसि ’ इति । अस्याक्षो यजमानो वा देवता । द्विपदानुष्टुप् । कृतत्रेताद्वापरकलयश्च चत्वारोऽक्षाः, पञ्चमो रमणः । तत्र कलिः सर्वान् अयान् अभिभवतीति स उच्यते [–अभिभूरिति] । यजमानो वैतत्संबन्धे[न] अभिभूरसीति । [v]अयानां गत्युपलक्षिततत्तत्कर्मणाम् [v]अभिभूः [v]असि अभिभवितासि । [v]एताः ते [v]पञ्च [v]दिशः तद्धर्मोपलक्षितास्ते कृतादयः । [v]कल्पन्तां क्लृप्ता भवन्तु । प्रथममामन्त्रयते यजमानः – ‘ ब्रह्मन् ’ इति । आमन्त्रणानि पञ्चलिङ्गोक्तदैवत्यानि यजूंषि । हे [v]ब्रह्मन्, [v]त्वं [v]ब्रह्मा [v]असि । [v]सविता [v]असि । [v]सत्यप्रसवः इति । ब्रह्मा प्राह । सत्याभ्यनुज्ञः सत्यप्रसवः । सविता त्वमेव ब्रह्मासि । द्वितीयं प्रत्याह– [v]वरुणः [v]असि [v]सत्यौजाः, सत्यमोजो यस्य स सत्यौजाः । तृतीयं प्रत्याह– इन्द्रोऽसि [v]इन्द्रः त्वम् [v]असि वि[शौजाः ।] विक्षु प्रजासु ओजो बलं यस्य सः विशोजा इति वक्तव्ये विशौजाः इति छान्दसम् । चतुर्थं प्रत्याह– सुशेवः [v]रुद्रः त्वम् [v]असि । शेव इति सुखनाम । शोभनं सुखयिता च त्वमसि ।

सुकल्याणनामानमाह्वयति – ‘ प्रियंकर ’ इति । प्रियं करोतीति प्रियंकरः, तत्संबोधनं हे [v]प्रियंकर । श्रेयः निःश्रेयसं करोतीति श्रेयस्करः, तत्संबोधनं [v]श्रेयस्कर । भूयोभूयः बहुतरं महत्तरं वा करोतीति भूयस्करः, तत्संबोधनं [v]भूयस्कर ॥

स्फ्यमस्मै प्रयच्छति– ‘ इन्द्रस्य वज्रोऽसि ’ इति । वज्रदैवत्यं यजुः । [v]इन्द्रस्य [v]वज्रः [v]असि यस्मात् [v]तेन [v]मे मम । रध्यतिर्वशगमने । यजमानं [v]रध्य वशवर्तिनं कुरु । “ यो वै राजा ब्राह्मणादबलीयानमित्रेभ्यो वै स बलीयान् भवति ” (शब्रा ५.४.४.१५) इति श्रुतेः ॥५॥

अ॒ग्निः पृ॑थु॒र्धर्म॑ण॒स्पति॑र्जु॒षा॒णो अ॒ग्निः पृ॑थु॒र्धर्म॑ण॒स्पतिः॑ ।
आज्य॑स्य ह॒विषो॑ वेतु॒ स्वाहा॑ ।
स्वाहा॑कृता॒ः सूर्य॑स्य र॒श्मिभि॑र्यतध्वꣳ सजा॒ताना॑ मध्य॒मेष्ठ्या॑य ॥६॥(८)॥

---

1. M3 तस्य for अस्य
2. M3 मरणः for रमणः
4. B1 om. अयानां ... ... अभिभूरसि
8. B1 om. सत्यम् ... ... स सत्यौजाः ।
9. B1 विक्षु ... प्रत्याह [L 10] lacuna
11. B1 सुशेव इति for शेव इति

अग्निः । पृथुः । धर्मणः । पतिः । जुषाणः । अग्निः । पृथुः । धर्मणः । पतिः । आज्यस्य । हविषः । वेतु । स्वाहा । स्वाहाकृता इति स्वाहाऽकृताः । सूर्यस्य । रश्मिभिरिति रश्मिऽभिः । यतध्वम् । सजातानामिति सऽजातानाम् । मध्यमेष्ठ्याय । मध्यमेस्थ्यायेति मध्यमेऽस्थ्याय । ॥ थः ॥६॥(८)॥

सा- कात्यायनः - "द्यूतभूमौ हिरण्यं निधायाभिजुहोति चतुर्गृहीतेनाग्निः पृथुरिति" (काश्रौ १५.७.१६) इति । द्यूतप्रदेशे हिरण्यं स्थापयित्वा तस्मिंश्चतुर्वारं गृहीतेनाज्येन जुहुयात् । पाठस्तु- 'अग्निः पृथुर्धर्मणस्पतिर्जुषाणो अग्निः पृथुर्धर्मणस्पतिः । आज्यस्य हविषो वेतु स्वाहा' इति । अग्निः आज्यस्य हविषः हवीरूपमाज्यं वेतु पिबतु । स्वाहा इति होमार्थः । कीदृशोऽग्निः ? पृथुः देवानां प्रथमत्वात् पृथुः । "अग्निर्वै देवानामवमः" (काठसं २२.१३, ऐब्रा १.१) इति श्रुत्यन्तरात् । धर्मणस्पतिः जगतः धारकस्य धर्मस्य स्वामी । जुषाणः हूयमानं हविः सेवमानः । अग्निः पृथुः धर्मणस्पतिः इति पुनः पाठ आदरार्थः ॥

कात्यायनः - "अक्षान्निवपति स्वाहाकृता इति" (काश्रौ १५.७.१६) इति । द्यूतसाधनभूतानक्षान् स्थापयेत् । पाठस्तु- 'स्वाहाकृताः सूर्यस्य रश्मिभिर्यतध्वꣳ सजातानां मध्यमेष्ठ्याय' इति । हे अक्षाः, स्वाहाकृताः स्वाहाकारपूर्विकया आहुत्या तर्पिताः सन्तः सजातानां सजातीयानां मध्यमेस्थ्याय मध्यमप्रदेशे यजमानावस्थानाय सूर्यस्य रश्मिभिः यतध्वं स्पर्धां कुरुत ॥६॥

[इत्येकादशेऽध्यायेऽष्टमोऽनुवाकः॥८॥]

आ- हिरण्यमस्मिन्निधाय जुहोति- 'अग्निः पृथुः' इति । आग्नेयी त्रिष्टुप् । देवतानां प्रथमत्वात् पृथुः सर्वज्ञः भगवान् । अत एव धर्मणस्पतिः । अतो देवतोद्देशेन हूयमानं हविः जुषाणः सेवमानः प्रीयमाणो वा । अग्निः पृथुः धर्मणस्पतिः इति पुनर्वचनमादरार्थम् । आज्यस्य घृतस्य हविषः इति कर्मणि षष्ठी । आज्यं हविः वेतु पिबतु । वितिः पानार्थः । स्वाहा इति होमार्थः ।

अथाक्षात् निवपति- 'स्वाहाकृताः' इति । अक्षदेवत्या गायत्री । हे स्वाहाकृताः हे अक्षाः, स्वाहाकारपूर्विकया आहुत्या तर्पिताः सन्तः स्वाहाकृताः यूयं सजातानां समानजन्मनां च भ्रातॄणां मध्यमेष्ठ्याय मध्यमे इति, मध्येभवो मध्यमस्तस्मिन् मध्यमप्रदेशेष्ठ्याय यजमानस्यावस्थानाय । सूर्यस्य रश्मिभिः यतध्वम् । स्पर्धां कुरुतेति संबन्धः ॥६॥

[इत्येकादशेऽध्यायेऽष्टमोऽनुवाकः ॥८॥]

9. S2 om. अग्निः आज्यस्य ... ... स्वाहेति

15. P1 °पूर्वकया for पूर्विकया

18. M3 त्रिपदानुष्टुप् for त्रिष्टुप् ; B1 देवानां प्रथमत्वात् for देवतानां प्रथमात्वात् । (L. 19); M3 om. अतो ... प्रीयमाणो वा । (L. 20)

25. M3 om. भ्रातॄणां

सर्व सूपां हविषामङ्गभूता मन्त्राः]

[अथ नवमोऽनुवाकः]

सा– अष्टमे आसन्दीस्थापनादिमन्त्रा उक्ताः । नवमेऽनुवाके सर्वसूपां हविषामङ्गभूता मन्त्रा उच्यन्ते–

सवित्रा प्रसवित्रा सरस्वत्या वाचा ।
त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मै ॥१॥
बृहस्पतिना ब्रह्मणा वरुणेनौजसाऽग्निना तेजसा सोमेन राज्ञा ।
विष्णुना देवतया दशम्येमं यज्ञं विष्णुमाप्नवानि ॥२॥(९) ।

सवित्रा । प्रसवित्रेति प्रऽसवित्रा । सरस्वत्या । वाचा ।
त्वष्ट्रा । रूपैः । पूष्णा । पशुभिरिति पशुऽभिः । इन्द्रेण । अस्मै ॥छं॥१॥
बृहस्पतिना । ब्रह्मणा । वरुणेन । ओजसा । अग्निना । तेजसा । सोमेन । राज्ञा ।
विष्णुना । देवतया । दशम्या । इमम् । यज्ञम् । विष्णुम् । आप्नवानि ॥ ॐ ॥२॥(९)।

कात्यायनः – "सोमानार्व सख्याय सर्पणम् ॥ सवित्रेत्यनुवाकमुक्त्वा " (काश्रौ १५.८.१५-१६) इति । अनुवाकपाठस्तु– 'सवित्रा प्रसवित्रा सरस्वत्या वाचा । त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मै । बृहस्पतिना ब्रह्मणा वरुणेनौजसाऽग्निना तेजसा सोमेन राज्ञा । विष्णुना देवतया दशम्येमं यज्ञं विष्णुमाप्नवानि ' इति । प्रसवित्रा प्रसवकारिणा सवित्रा देवेन सह सर्पामीति शेषः । वाचा वाग्रूपया सरस्वत्या सह सर्पामि । रूपैः उपलक्षितेन त्वष्ट्रा सह पशुभिः उपलक्षितेन पूष्णा देवेन सह सर्पामि । अस्मै अनेन इन्द्रेण सह सर्पामि ॥१॥

ब्रह्मणा ब्रह्माभिमानिना बृहस्पतिना सह सर्पामि । बलवता वरुणेन सह सर्पामि । तेजस्विना अग्निना सह सर्पामि । राजमानेन सोमेन सह सर्पामि । दशम्या दशसंख्यापूरिकया विष्णुनामिकया देवतया सह सर्पामि । इमं प्रकृतत्वेन पुरोवर्तिनं यज्ञात्मकं विष्णुम् आप्नवानि प्राप्नुयाम् ॥२॥

[इत्येकादशेऽध्याये नवमोऽनुवाकः ॥९॥]

1. S2 सर्व सूपां° for सर्वसूपां°
17. S2 प्रसर्पामि for second सर्पामि
18. S2 प्रसर्पामि for सर्पामि first & second
19. P1 सराजमानेन, S2 यजमानेन, for राजमानेन;
 S2 प्रसर्पामि for सर्पामि; S2 पूर्विकया for पूरिकया
20. S2 प्रसर्पामि for सर्पामि

आ– सर्पति– 'सवित्रा प्रसवित्रा । बृहस्पतिना ' इति लिङ्गोक्तदेवत्यो गायत्री पङ्क्तिः यजुषी वा । सवित्रा अभ्यनुज्ञातस्य कर्त्रा प्रसूतः । प्रसर्पामीति शेषः । एवं सरस्वत्यादीनि योजनीयानि । सरस्वत्या वाचा च प्रसूतः प्रसर्पामि । त्वष्ट्रा रूपैः च प्रसूतः प्रसर्पामि । पूष्णा पशुभिः च प्रसूतः प्रसर्पामि । एवं बृहस्पतिना ब्रह्मणा प्रसूतः । वरुणेन ओजसा प्रसूतः । अग्निना तेजसा प्रसूतः । सोमेन राज्ञा प्रसूतः । विष्णुना देवतया प्रसूतः । दशम्या दशसंख्यापूरिकया च देवतया प्रसूतोऽहम् इमं प्रकृततया पुरोवर्तिनं यज्ञं यज्ञात्मकं विष्णुम् आप्नवानि आप्नुयामिति संबन्धः ॥१-२॥

[इत्येकादशेऽध्याये नवमोऽनुवाकः]

———

[अथ दशमोऽनुवाक]

सा– नवमे सरस्रूपां हविषामङ्गभूता मन्त्रा उक्ताः । दशमेऽनुवाके राजसूयान्तर्गतसौत्रामणीमन्त्रा उच्यन्ते ॥

अश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ।
वायोः पूतः पवित्रेण प्रत्यङ् सोमो अतिस्रुतः ।
इन्द्रस्य युज्यः सखा ॥१॥

अश्विभ्यामित्यश्विभ्याम् । पच्यस्व ।
सरस्वत्यै । इन्द्राय । सुत्राम्ण इति सुऽत्राम्णे । पच्यस्व ।
वायोः । पूतः । पवित्रेण । प्रत्यङ् । सोमः । अतिस्रुत इत्यतिऽस्रुतः ।
इन्द्रस्य । युज्यः । सखा ॥ णूं ॥१॥

कात्यायनः – " पक्त्वौदनं विरूढांश्चूर्णीकृत्याऽश्विभ्यां पच्यस्वेति संसृजति " (काश्रौ १५·९·२५) इति । विशेषेण प्रवृद्धान् व्रीहीन् । वर्द्धन(नेन?)स्थूलतरानित्यर्थः । तांश्चूर्णयित्वा सम्यक् पच्यमानेऽन्ने संदध्यात् । पाठस्तु– ' अश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ' इति । अश्विभ्याम्

2. B1 सरस्वत्यादिभिर्योजनीयम् for सरस्वत्यादीनि योजनीयानि (L. 3)

6. S2 °संख्यया पूर्तैकर्ता corrected by us as above.

10. P1 °सूयगत° for °सूयान्तर्गत°

19. P1 पक्वौदनवितृण्णान् for पक्त्वौदनं; S2 चूर्णं कृत्वा for चूर्णीकृत्य

अश्विनोरर्थाय पाकं कुरु। सरस्वत्यै देव्यै पच्यस्व पाकं कुरुष्व। इन्द्राय सुत्राम्णे शोभनत्राणाय सुत्रातव्याय वा इन्द्राय। भैषज्यं हीन्द्रस्य कर्तव्यम्। पच्यस्व॥

कात्यायनः – "कुशैः परिस्रुतं पुनाति वायोः पूतः" (द्र. काश्रौ १५.१०.१०) इति। पाठस्तु– 'वायोः पूतः पवित्रेण प्रत्यङ् सोमो अतिस्रुतः। इन्द्रस्य युज्यः सखा' इति। वायोः संबन्धी पवित्रेण कुशमयेन पूतः शोधितः सोमः प्रत्यङ् अधोमुखः सन् अतिस्रुतः अतिक्रम्य गतः। कीदृशः सोमः? इन्द्रस्य युज्यः योगार्हः सखा सखिभूतः॥१॥

आ– इत उत्तरं चरकसौत्रामणी[यम्]अश्विनोरार्षम्। सुरां संदधाति– 'अश्विभ्याम्' इत्यादीनि त्रीणि लिङ्गोक्तदैवत्यानि यजूंषि। अश्विभ्यां पच्यस्व पाकं कुरुष्व। सरस्वत्यै इन्द्राय सुत्राम्णे शोभनत्राणाय सुत्रातव्याय वा। भैषज्यं हीन्द्रस्य कर्तव्यम्। सौत्रामण्यां सुरां पुनाति– 'वायोः पूतः पवित्रेण' इति। सोमो गायत्री। वायोः पूतः वायुसंबन्धी सोमः पूतः। पवित्रेण पवनेन पूतः। प्रत्यङ् अधोमुखः। अतिस्रुतः। स्रु गतौ। अतिक्रम्य गतः। सः सोमः इन्द्रस्य युज्यः योगार्हः समानयोगी च सखा च। समानख्यातः कथमिन्द्रं हिनस्तीति शेषः॥१॥

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमउक्तिं न जग्मुः।
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे॥२॥
युवꣳ सुराममश्विना नमुचा आसुरे सचा।
विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम्॥३॥
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः।
यत् सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक्॥४॥१०॥

1. P1 om. पाकं कुरुष्व। इन्द्राय; P1 om. शोभनत्राणाय and वा (L. 2)
2. P1 om. भैषज्यं ... कर्तव्यम्; S2 हीदं for हीन्द्रस्य
3. S2 केशैः परिस्कृतं for कुशैः परिस्रुतं; P1 °स्रुतं for °स्रुतं
4. P1 om. वायोः संबन्धी; S2 after संबन्धी adds सोमः
5. S2 अतिक्रमन् for अतिक्रम्य
7. B1 आर्षे for °आर्षम्
8. B1 after अश्विभ्याम् ins. अश्विनोरार्षम्
9. B1 हीदं for हीन्द्रस्य
11. M3 after °मुखः adds सन्; M3 स्रुग् for° स्रुतः; स्रु गतौ for स्रु गतौ

कुवित् । अङ्ग । यवमन्त इति यवऽमन्तः । यवम् । चित् ।
यथा । दान्ति । अनुपूर्वमित्यनुऽपूर्वम् । वियूयेति विऽयूय ।
इहेहेतीहऽइह । एषाम् । कृणुहि । भोजनानि ।
ये । बर्हिषः । नमउक्तिमिति नमःऽउक्तिम् । न । जग्मुः ।
अश्विभ्यामित्यश्विऽभ्याम् । त्वा । सरस्वत्यै । इन्द्राय । सुत्राम्ण इति सुऽत्राम्णे ॥झिः॥२॥
युवम् । सुरामम् । अश्विना । नमुचौ । आसुरे । सचा ।
विपिपानेति विऽपिपाना । शुभः । पती इति पती ।
इन्द्रम् । कर्मस्विति कर्मऽसु । आवतम् ॥ टिं ॥३॥
पुत्रमिवेति पुत्रम्ऽइव । पितरौ । अश्विना । उभा ।
इन्द्र । आवधुः । काव्यैः । दंसनाभिः ।
यत् । सुरामम् । वि । अपिबः । शचीभिः ।
सरस्वती । त्वा । मघवन्निति मघऽवन् । अभिष्णक् ॥ ञ्मैं ॥४॥१०॥

[एष ते चतस्रः ॥४॥ अपो देवाश्च ॥४॥ सविता त्वा तिस्रः ॥३॥ सोमस्य त्विषि षट् ॥६॥ अवेष्टा सप्त ॥७॥ सोमस्य त्वा षट् ॥६॥ इन्द्रस्य वज्रः पञ्च ॥५॥ स्योनासि षट् ॥६॥ सवित्रा द्वे ॥२॥ अश्विभ्यां चतस्रः ॥४॥]

[दशानुवाकेषु सप्तचत्वारिंशत् ॥४७॥ एष ते तेजोऽसि सप्तचत्वारिंशत् ॥ अर्थेत ओजस्वतीरापोऽपां पतिरपांगर्भः सूर्यवर्चसः सूर्यत्वचो व्रजाक्षितो वाशा मान्दाः शाक्वरीर्जनभृतो विश्वभृतः शैष्ठा आपः॥]

[इति शुक्लयजुर्वेदकाण्वसंहितापाठे एकादशोऽध्यायः ॥११॥]

सा– कात्यायनः – "ग्रहं गृह्णाति कुविदङ्गेति" (काश्रौ १५.१०.१२) इति । पाठस्तु– 'कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमउक्तिं न जग्मुः । उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे॥ युवꣳ सुराममश्विना नमुचा आसुरे सचा । विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥ पुत्रमिव पितरा अश्विनोभेन्द्रावधुः काव्यैर्दंसनाभिः । यत् सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ' इति ॥

---

20. S2 गृहे for ग्रहं; P1 S2 after गृह्णाति ins. इति

अङ्ग हे सोम, यथा केचिज्जनाः यवमन्तः बहुयवसंपन्नाः सन्तः कुवित् बहुलं यवं चित् सर्वं यवमयं सस्यम् अनुपूर्वम् आनुपूर्व्येण वियूय पृथक्कृत्य दान्ति लुनान्ति। तथा ये यजमानाः बर्हिषः बर्हिष्मतः यज्ञस्य नमउक्तिं नमस्कारवचनं हविर्लक्षणमन्त्रं वचनं वा आदाय न जग्मुः न प्राप्नुवन्ति। एषां यजमानानां संबन्धीनि भोजनानि संभोग्यानि धनानि इहेह अस्मिन् यजमान एव कृणुहि कुरु। अतोऽश्विसरस्वत्यादिदेवतार्थं त्वं सोम उपयामेन पात्रेण गृहीतो भवसि। अश्व्यादिदेवतार्थं त्वां सादयामीति शेषः। अत्रेतिहासमाचक्षते– नमुचिर्नामासुरपुत्र इन्द्रस्य सखीभूत आस। स चेन्द्रस्य विश्वस्तस्य सुरया वीर्यं पपौ। ततः स इन्द्रः आश्विनौ सरस्वतीं चोपाधावत्। नमुचिनाहं पीतवीर्य इति। ते चापां फेनं वज्रमसिञ्चन्। तेन चेन्द्रो नमुचेः शिरश्चिच्छेद। तत्र लोहितमिश्रः सुरासोमोऽतिष्ठत्। तदेतदुच्यते– हे अश्विना अश्विनौ, युवं युवां नमुचौ आसुरे स्थितं सुरामं सुष्ठु रमणीयं सोमं सचा सह विपिपाना विविधं पिबन्तौ शुभस्पती शोभनस्य कर्मणः पालकौ कर्मसु निमित्तभूतेषु इन्द्रम् आवतं रक्षतं, पुत्रम् इव पितरौ यथा मातापितरौ पुत्रं पालयतस्तथा उभा उभावपि अश्विनौ हे इन्द्र, त्वा त्वाम् आवथुः आवतुः पालितवन्तौ। काव्यैः कवीनां मन्त्रदष्टृणां संबन्धिभिः मन्त्रैः दंसनाभिः कर्मभिः। अश्विनाविन्द्रस्य रक्षणं कृतवन्ताविति कथमवगम्यते तदुच्यते– यत् यस्मात् कारणात् हे इन्द्र, त्वं शचीभिः कर्मभिः नमुचिवधादिकर्माणि कृत्वेत्यर्थः। सुरामं सुष्ठु रमणीयं सोमं व्यपिबः विशेषेण पानं कृतवानसि। हे मघवन् इन्द्र, त्वा त्वां सरस्वती देवी अभिष्णक् शुद्धं कृतवती। तस्मादश्विनौ त्वामवतुरिति संबन्धः ॥२–४॥

[इत्येकादशेऽध्याये दशमोऽनुवाकः ॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः।

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते वेदार्थप्रकाशे काण्वसंहिताभाष्ये एकादशोऽध्यायः॥

आ– ग्रहं गृह्णाति– 'कुविदङ्ग' इति। 'कुविदङ्ग' इत्यादि तृचम्। सुकीर्तिकक्षीवन्तौ ऋषी। आद्या सौम्या अनिरुक्ता त्रिष्टुप्। युवमश्विसरस्वतीदेवत्यानुष्टुप्। पुत्रमिव इन्द्रदेवत्या त्रिष्टुप्। कुवित् इति बहुनाम। अङ्ग इति क्षिप्रनाम। हे सोम यथा केचिज्जनपदाः

---

1. P1 with markings above कुवित् ins. on the margin कुविदिति बहुनाम
3. S2 om. बर्हिष्मतः; S2 om. आदाय
4. S2 एतस्मिन् for अस्मिन्
5. P1 उपयमानेन for उपयामेन
6. S2 om. अत्रेतिहासम् ... तदेतदुच्यते (L. 9)
12. P1 with markings above आवथुः writes on the margin पुरुषव्यत्ययः; S2 अवतुः for आवतुः
21. P1 °संहितायां for° संहिताभाष्ये
22. M3 om. first कुविदङ्ग इति।
23. M3 निरुक्ता for अनिरुक्ता

कुवित् बहुक्षेत्रम् अङ्ग क्षिप्रं यवमन्तः बहुयवसंपन्नाः । चित् शब्दः वितर्के । यवं यथा कुवित् बहुलं यवमयं सस्यं दान्ति । दाप् लवने । लुनन्ति । अनुपूर्वम् आनुपूर्व्येण दात्वा च वियूय पृथक्कृत्य निश्चित्य इहेहैषां । 'कृणुहि भोजनानि ' । इह च धनानि उत्पन्नान्यादाय एषां यजनानां भोजनानि भोग्यानि कृणुहि कुरु । ' ये बर्हिषो नमउक्तिम् ' । ये यजमानाः बर्हिषः उपरि स्थिताः । नमः इत्यन्ननाम । उक्तिर्वचनम् । हविर्लक्षणमन्नमादाय उक्तिं याज्यामभिधाय ये यजन्ति तेषाम् एषां भोजनानि कृणुहि । एवं चित् न जग्मुः । य एवं क्रियापारं न गच्छन्ति । चित् तेषां न कृणुहीत्यर्थादुक्तं भवति । यद्वा– ये यजमानाः बर्हिषः नमउक्तिं न यज्ञसंबन्धितया क्लृप्तं नमः हविर्योग्यमन्नम् आदाय उक्तिं या [ज्या] भिधानमिव यथास्थितं तथैव ये यजन्ति तेषामेषामिति संबन्धः ॥१॥

उपयामगृहीतः असि अश्विभ्यां त्वा त्वां गृह्णामि । सरस्वत्यै त्वा सोमं गृह्णामि । इन्द्राय सुत्राम्णे त्वा सोमं त्वां गृह्णामि । एष ते तव योनिः । अश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय सुत्राम्णे सोमं त्वां सादयामीति शेषः ॥२॥

' युवꣳ सुरामम् ' इति अनुवाक्या । ' युवꣳ सुराममश्विना ' । हे अश्विनौ, युवं युवां सुरामं सुरमणीयं नमुचौ आसुरे असुरे नमुचौ स्थितं सुरामं सोमं सचा सह भूत्वा एकीभूय विपिपाना विविधं पिबन्तौ । हे शुभस्पती शुभस्य पती स्वामिनौ कर्मसु निमित्तभूतेषु स्वकर्मकरणार्थम् इन्द्रम् आवतं रक्षतम् ॥३॥

' पुत्रमिव पितरौ ' इति । पितरौ पुत्रम् इव यथा पालयतः तथा उभा उभौ अश्विना हे इन्द्र, त्वा त्वाम् आवधुः । अव रक्षणे । पुरुषव्यत्ययः । अवतुः पालितवन्तौ । काव्यैः । कवेर्भावः काव्यम् । कविभिः मन्त्रद्रष्टृभिः दꣳसनाभिः । दंसमिति कर्मनाम । कर्मभिश्च मन्त्रैश्चाश्विनौ इन्द्रस्य पालनं कृतवन्ताविति कथमवगम्यते ? यत् यस्मात् सुरामं सोमं त्वं

---

1. M3 after कुवित् ins. इति
3. M3 B1 येषां for एषां
4. B1 भोज्यानि for भोग्यानि
5. M3 बर्हिषि for बर्हिषः
9. M3 यच्छति for यजन्ति
10. M3 after असि ins. अतः; B1 om. सरस्वत्यै त्वा सोमं गृह्णामि

vव्यपिबः पीतवानासि । vशचीभिः कर्मभिः नमुचेः शिरश्चिच्छेद । छित्त्वा च न विमुह्यासि । हे vमघवन् समग्रधनसंपन्न, vत्वा vसरस्वती vअभिष्णक् । ष्णा शौचे इत्यस्य रूपम् । सर्वतः शुद्धिमापादितवती । कण्ड्वादिषु पाठाच्च । भैषज्यं कृतवती वा इत्येव संबन्धः ॥४॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपुरीपूज्यपाद-
परमकारुण्यासादितश्रीकृष्णभक्तिसांम्राज्यस्य　१
श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदि-श्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते
काण्ववेदमन्त्रभाष्यसंग्रहे एकादशोऽध्यायः ॥११॥

---

1. B1 मुह्यासि for विमुह्यासि
2. B1 °ष्णुक्° for °ष्णक्
3. B1 om. वा

द्वादशोऽध्याय

[अथ प्रथमोऽनुवाकः]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥१॥

एकादशेऽध्याये राजसूयमन्त्रा निरूपिताः । अथ द्वादशादि-एकोनविंशान्तेष्वष्टस्वध्यायेषु अग्निचयनयागाङ्गसंभूता मन्त्रा निरूप्यन्ते । तत्र द्वादशेऽध्याये उखासंभरणादिमन्त्रा वर्ण्यन्ते । तत्र प्रथमेऽनुवाके सावित्रहोमाभ्यादानमन्त्रा उच्यन्ते ॥

युञ्जानः प्र॒थ॒मं मन॑स्त॒त्त्वाय॑ स॒वि॒ता धिय॑ः ।
अ॒ग्नेर्ज्योति॑र्नि॒चाय्य॑ पृ॒थि॒व्या अध्याभ॑रत् ॥१॥

यु॒ञ्जानः । प्र॒थ॒मम् । मन॑ः । त॒त्त्वाय॑ । स॒वि॒ता । धिय॑ः ।
अ॒ग्नेः । ज्योति॑ः । नि॒चाय्येति॑ नि॒ऽचाय्य॑ । पृ॒थि॒व्याः । अधि॑ । आ । अ॒भ॒र॒त् ॥क्रीं॥१॥

कात्यायनः – "अष्टागृहीतं जुहोति संततमुद्गृह्णन् युञ्जानः इति" (काश्रौ १६·२·७) इति । जुह्वामष्टवारं गृहीतमाज्यम् अजस्रं धारापातं यथा भवति तथा हस्तमुन्नतं कुर्वन् जुहुयात् । अत्रेदं चिन्तनीयं– 'युञ्जानः' इत्यादीनां मध्ये किमेकैकं मन्त्रमुच्चार्य जुहुयात्, आहोस्वित् सर्वान् मन्त्रान् उच्चार्येति । तत्राह– यावुपादेयावुभौ पक्षौ क्रमेण तौ तैत्तिरीये प्रदर्श्येते– "यं कामयेत पापीयान्त्स्यादित्येकैकं तस्य जुहुयादाहुतीभिरेवैनम् अपगृह्णाति । पापीयान् भवति यं कामयेत वसीयान्त्स्यादिति सर्वाणि तस्यानुद्रुत्य जुहुयादाहुत्यैनमभिक्रमयति वसीयान् भवत्यथो यज्ञस्यैवैषाऽभिक्रान्तिः" (तैसं ५·१·१-१-२) इति । अस्यायमर्थः । पापीयानतिदरिद्र इत्यर्थः । एकैकं मन्त्रमुच्चार्य होमे सति संश्लेषाभावात् परस्परमपरक्ताभिराहुतिभिरेनं यजमानमपगृह्णाति धनादपेतं करोति । ततो दरिद्रो भवति । वसीयान् वसुमत्तरः । सर्वाण्युच्चार्य होमे तु मन्त्राणां परस्परसंश्लेषात् एकयैवाहुत्या यजमानमभिक्रामयति अभिव्यासं करोति । ततो धनिको भवति । अपि च या अभिक्रमणहेतुरेकाहुतिरेषा यज्ञस्यैवाभिचयनरूपस्याभिक्रान्तिः स्वाधीनता भवति । तत्र प्रथममन्त्रपाठस्तु– 'युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः । अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत्' इति । [v]सविता सर्वस्य प्रेरकः परमेश्वरः

---

6. S2 om. °याग°
12. S2 सकृद्गृह्णन् for संततमुद्गृह्णन्
13. S2 धारायान्तं for धारापातं
15. P1 om. इति
16. S2 after एनम् adds यजमानं; S2 om. यं कामयेत वसीयान् ... दरीयान् (L. 17)
20. P1 वसुमद्दत्तरः for वसुमत्तरः

vप्रथमम् अग्निचयनविषये vमनः vयुञ्जानः समादधानो vधियः इष्टकादिविषयाणि ज्ञानानि vतत्वाय तनित्वा विस्तार्य vअग्नेः vज्योतिः vनिचाय्य निचीयमानस्याग्नेः संबन्धि तेजः सफलानां कर्मणां साधनभूतं निश्चित्य vपृथिव्याः vअध्याभरत् भूमेरुपर्यानीतवान् ॥१॥

आ– अथाष्टावध्याया अग्निसंबन्धाः (द्वाः ?)। तान् प्रजापतिर्ददर्श। साध्या वा ऋषयः प्रजापतिः। यथा च कात्यायनः – अथाग्निं प्रजापतिरपश्यत्। साध्या वा अपश्यन्। सोऽग्निः पञ्चचितिकः। प्रथमा चितिः प्रजापतेः। द्वितीया देवानाम्। तृतीयेन्द्राग्न्योर्विश्वकर्मणश्च। चतुर्थी ऋषीणाम्। पञ्चमी परमेष्ठिनः' इति। अथ पञ्चधा मन्त्रः दर्शितः – प्रजापतिः प्रथमां चितिमपश्यत्। प्रजापतिरेव तस्या आर्षेयम्। देवा द्वितीयां चितिमपश्यन्। देवा एव तस्या आर्षेयम्। इन्द्राग्नी च विश्वकर्मा च तृतीयां चितिमपश्यन्। त एव तस्या आर्षेयम्। ऋषयश्चतुर्थीं चितिमपश्यन्। ऋषय एव तस्या आर्षेयम्। परमेष्ठी पञ्चमीं चितिमपश्यत्। परमेष्ठ्येव तस्या आर्षेयम्। एतत्कर्मसंबद्धमन्त्राणामेव एत ऋषय इत्यर्थः। अथ प्रतिकर्मदर्श (र्शी ?) नः सवितैतानि सावित्राण्यपश्यदिति। 'युञ्जानः' इति। प्रथममष्टौ खण्डिकाः सवितृदृष्टाः। अतस्तासामृषिः सविता। सवितैव देवता च। ताभिः सन्ततमाज्याहुतिर्हूयते। तत्र प्रथमानुष्टुप् अग्न्यारम्भे नियुक्ता। vसविता सूर्यः vप्रथमम् आदौ। युजिर्योगे। मन ज्ञाने। ज्ञानसाधनभूतं vमनः। vयुञ्जानः नियुञ्जन् सविता। अनन्तरं vतत्त्वाय vधियः धीः। तनु विस्तारे। क्त्वो यप् छान्दसः। तत्त्वा तनित्वा धीः विस्तार्य। मनसा बुद्धिं पर्यालोच्य बुद्ध्या चावधार्य। कथं निश्चित्य ?। vअग्नेः vज्योतिः अग्निसंबन्धि यज्ज्योतिः पञ्चसु पशुषु प्रविष्टं तत् v निचाय्य उपलभ्य। 'पृथिव्या अधि'। ततः पशुभ्यः सकाशात् निचाय्य vपृथिव्या vअधि उपरि विशिष्टस्थानं प्रति vआभरत् सविता आहृतवान्। एवमग्निमाहृत्येष्टकाचयनं कृत्वा तत्र प्रतिष्ठितवानिति शेषः ॥१॥

3. P1 with markings above आनीतवान् ins. on the margin:– अग्निः। इष्टकोपरि अग्निं चितवानित्यर्थः।

5. B1 अग्निः; M3 अग्नि for अग्निं; B1 om. वा

6. M3 om. प्रथमा चितिः

7. M3 पञ्चधा तु तद्दर्शिनः for पञ्चधा मन्त्रः दर्शितः

8. M3 om. देवा एव ... पञ्चमीं चितिमपश्यन्। (L. 10)

11. M3 °संबन्ध° for °संबद्ध°

14. B1 अवज्ञाने for ज्ञाने

15. B1 after तत्त्वाय adds सविता

16. M3 B1 क्त्वो लोपः for क्त्वो यप्; M3 om. बुद्धिं पर्यालोच्य

18. M3 अवति च for उपलभ्य; M3 चिताय, B1 विनाय for निचाय्य

युक्तेन मनसा वयं देवस्य सवितुः सवे ।
स्वर्गेयाय शक्त्या ॥२॥

युक्तेन । मनसा । वयम् । देवस्य । सवितुः । सवे ।
स्वर्गेयायेति स्वःऽगेयाय । शक्त्या ॥ खो ॥२॥

सा– अथ द्वितीयः – " युक्तेन मनसा वयं देवस्य सवितुः सवे । स्वर्गेयाय शक्त्या " इति । सवितुः देवस्य सवे प्रसवे वर्तमाना वयं युक्तेन इन्द्रियेभ्यो नियमितेन एकाग्रेण मनसा स्वर्गेयाय स्वर्गलोके गीयमानस्याग्नेः संपादनाय शक्त्या यथासामर्थ्येन प्रयत्नं कुर्म इति शेषः ॥२॥

आ– ' युक्तेन मनसा ' इति । गायत्री । युक्तेन एकाग्रेण मनसा सवितुः देवस्य सवे प्रसवे वर्तमाना वयं स्वर्गेयाय स्वर्गसाधनाय कर्मणे स्वर्गसाधनकर्मार्थं शक्त्या यथाशक्त्या यथासामर्थ्येन प्रयत्नं कुर्म इति शेषः ॥२॥

युक्त्वाय सविता देवान्त्स्वर्यतो धिया दिवम् ।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥३॥

युक्त्वाय । सविता । देवान् । स्वः । यतः । धिया । दिवम् ।
बृहत् । ज्योतिः । करिष्यतः । सविता । प्र । सुवाति । तान् ॥ त्यूं ॥३॥

सा– अथ तृतीयः – " युक्त्वाय सविता देवान्त्स्वर्यतो धिया दिवम् । बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् " इति । सविता तान् इन्द्रियविशेषान् प्रकर्षेण सुवाति । किं कृत्वा ? देवान् मनसा युक्त्वाय क्रीडापरत्वेन चपलानिन्द्रियविशेषान् मनसा विषयेभ्यो युक्त्वाय नियम्य । कीदृशानिन्द्रियविशेषान् ? स्वः यतः स्वर्गच्छतः स्वर्गप्राप्त्यर्थमुद्यतानित्यर्थः । बृहत् ज्योतिः प्रौढं चीयमानस्याग्नेस्तेजो धिया दिवं करिष्यतः तत्तदिष्टकादिविषयया प्रज्ञया द्योतमानं कर्तुमुद्यतान् ॥३॥

आ– ' युक्त्वाय सविता ' इति । अनुष्टुप् । युक्त्वाय इति यक् छान्दसः । सविता अग्निकर्मणे [णि ?] अन्येन कर्मणा यान् देवान् युक्त्वा स्थितः तान् देवान् । कथंभूतान्

6. S2 om. एकाग्रेण
9. B1 om. कर्मणे

इति ? Vस्वः Vयतः Vधिया स्वः स्वर्गं धिया बुद्ध्या कर्मणा वा अन्येन स्वर्गं गच्छतः । Vदिवं द्योतनात्मकम् । Vबृहत् Vज्योतिः आदित्यात्मकं ज्योतिः । Vकरिष्यतः आत्मत्वेन करिष्यतः संस्कुर्वतः आत्मत्वेन भावयतः । तान् देवान् Vसविता Vप्रसुवाति अभ्यनुजानाति ॥३॥

युञ्जते मनं उत युंञ्जते धियो विप्रा विप्रस्य बृहतो विंपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥४॥

युञ्जते मनः ॥ यं ॥४॥

सा– अथ चतुर्थः – ' युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः' इति। Vविप्रस्य ब्राह्मणस्य यजमानस्य संबन्धिनः Vविप्राः ऋत्विजः Vमनः Vयुञ्जते प्रथमं स्वकीयं मनो विषयेभ्यो निवर्त्य समीहितं कुर्वन्ति । Vउत अपि च Vधियः इष्टकादिविषयाणि ज्ञानानि Vयुञ्जते संपादयन्ति । कीदृशस्य विप्रस्य ? Vबृहतः प्रभूताग्निचयनोद्योगेनाभिवृद्धस्य Vविपश्चितः विदुषः प्रयोगाभिज्ञस्य । कीदृशा विप्राः ? Vहोत्राः होमशीलाः कर्मण्यालस्यरहिता इत्यर्थः । Vएकः एव Vविदधे सविता सर्वमिदं निर्मितवान् । कीदृशः सविता ? Vवयुनावित् । दीर्घश्छान्दसः । ऋत्विग्यजमानाभिप्रायज्ञः । कथमेक एव सर्वमिदं कृतवानिति न विस्मेतव्यम् । यतः Vसवितुः Vदेवस्य Vपरिष्टुतिः Vमही । परितः सर्वेषु देवेषु श्रूयमाणा स्तुतिर्महती ॥४॥

आ– ' युञ्जते मनः ' इति । सवितृदेवत्या जगती । सवितुरार्षम् । व्याख्यातम् । अत्र प्रजापतिर्विप्रः बृहद्विपश्चित्, देवास्तु 'विप्राः इति ॥४॥

युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥५॥

युजे । वाम् । ब्रह्म । पूर्व्यम् । नमोभिरिति नमःऽभिः ।
वि । श्लोकः । एतु । पथ्येवेति पथ्याऽइव । सूरेः ।
शृण्वन्तु । विश्वे । अमृतस्य । पुत्राः ।
आ । ये । धामानि । दिव्यानि । तस्थुः ॥ त्रौं ॥५॥

1. M3 om. बुद्ध्या ... स्वर्गं
2. M3 आत्मसात्कुर्वतः मानेन for आत्मत्वेन; M3 om. संस्कुर्वतः
13. P1 कृतवान् for निर्मितवान्; S2 om. सविता; S2 om. दीर्घश्छान्दसः

[सावित्रहोमादिमन्त्राः

सा– अथ पञ्चमः – " युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः । शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः " इति । यजमानः पत्नी चेत्युभौ [वामिति पदेनोच्येते ।] हे दम्पती, वां युवयोरर्थे पूर्व्यं पुरातनैर्महर्षिभिरनुष्ठितं ब्रह्म परिवृढमग्निचयनाख्यं कर्म नमोभिः नमस्कारपूर्वकैरिष्टकोपधानादिभिः युजे संपादयामि । तस्मिन् संपादिते सति सूरेः पण्डितस्य यजमानस्य श्लोकः कीर्तिः वि एतु लोकद्वयं प्राप्नोतु । तत्र दृष्टान्तः – पथ्येव पथः अनपेता पथ्या, यज्ञमार्गात् प्रवृत्ता आहुतिर्यथा लोकद्वयं व्याप्नोति तद्वत् अमृतस्य मरणरहितस्य प्रजापतेः पुत्राः ये देवाः, दिवि भवानि दिव्यानि धामानि स्थानानि आतस्थुः अधिष्ठितवन्तः, ते विश्वे सर्वे देवा अस्य यजमानस्य श्लोकं शृण्वन्तु इति संबन्धः ॥५॥

आ– ' युजे वाम् ' इति । त्रिष्टुप् । दम्पती यजमानौ वामित्युच्येते । वां युवाभ्यामर्थाय नमोभिः सहितं पूर्व्यं ब्रह्म सविताऽहं युजे युनज्मि । ब्रह्मशब्देन सप्तऋषयो ब्राह्मणा इहोच्यन्ते । पूर्व्यशब्देन त एव विशेष्यन्ते । नमोभिः इतीयमेवाहुतिरभिधीयते । नमः-शब्दोऽत्रान्नवचनः । दम्पतियजमानार्थं विशिष्टाहुतिसाहितान् पूर्वान् सप्तब्रह्मऋषीन् युजे इत्यर्थः । किमर्थम् इति । ' वि श्लोक एतु पथ्येव सूरेः ' । पण्डितस्य यजमानस्य विविधः श्लोकः कीर्तित एतु गच्छतु व्याप्नुयात् । कथमिव ? पथ्येव पथः अनपेता पथ्या । यज्ञमार्गात् प्रवृत्ता आहुतिर्यथोभयलोकसंचारिणी भवति एवमस्य यजमानस्योभयलोकसंचारी, विश्लोकः विशिष्ट-कीर्तिर्भवत्वित्यर्थः । ' शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ' । अमृतस्य मृतिरहितस्य प्रजापतेः पुत्राः ये देवाः दिवि भवानि दिव्यानि धामानि स्थानानि ये देवाः आतस्थुः अधिष्ठितवन्तः ते विश्वे सर्वे देवाः अस्य यजमानस्य वि श्लोकं शृण्वन्तु इति संबन्धः । अहो एवं सवितुर्माहात्म्यमिति भावः ॥५॥

यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ॥६॥

3. S2 om. हे दम्पती
4. S2 खण्डितस्य for पण्डितस्य
5. S2 om. तत्र दृष्टान्तः
6. S2 प्रवर्तका for प्रवृत्ता; P1 प्राप्नोति for व्याप्नोति
12. B1 °वाचकः for वचनः; B1 अपूर्वान् for पूर्वान्
15. M3 °लोके for °लोक°
16. B1 सर्वे for विश्वे
18. M3 om. सर्वे
19. B1 अभिप्रायः for भावः

सावित्रहोमादिमन्त्राः]

यस्य॑ । प्र॒याण॑म् । प्र॒या॒न॒मिति॑ प्र॒ऽया॑नम् । अनु॑ । अ॒न्ये । इत् । य॒युः ।
दे॒वाः । दे॒वस्य॑ । म॒हि॒मान॑म् । ओज॑सा ।
यः । पार्थि॑वानि । वि॒म॒म इति॑ वि॒ऽम॒मे । सः । ए॒त॑शः ।
रजां॑सि । दे॒वः । स॒वि॒ता । म॒हि॒त्वनेति॑ म॒हि॒ऽत्व॒ना ॥ ठ्रौं ॥६॥

सा– अथ षष्ठः – ' यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा । यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ' इति । यस्य सवितुः प्रयाणं प्रवृत्तिम् अन्ये सर्वे देवाः अनुययुः इत् अवश्यमनुगच्छन्त्येव । अस्य देवस्य महिमानं महत्त्वं च ओजसा बलेन अनुययुः । यः सविता पार्थिवानि पृथिवीगतानि रजांसि परमाणून् विममे विशेषेण गणयित्वा निश्चितवान्, सः सविता देवः महित्वना महत्त्वेन एतशः व्याप्तवान् । एति सर्वत्र गच्छतीत्येतशः ॥६॥

आ– कोऽयं सवितेति तमाह– ' यस्य प्रयाणम् ' इति । सावित्री जगती । यस्य देवस्य प्रयाणं प्रथमगमनम् अनु इत् अपि । अन्ये अपि सप्तगणात्मकादयो ये देवाः ययुः जग्मुः अतः अनुगताः, तेऽपि देवाः यस्य देवस्य महिमानं माहात्म्यं महाभाग्यं तद्विभूतिं च ओजसा बलेन ययुः प्राप्नुयुः । सः सविता । किं च । यः पार्थिवानि पृथिवीकार्यभूतानि रजांसि विममे । (भू ?) प्रभृतयस्त्रयो लोका रजांसीत्युच्यन्ते । एतांस्त्रीन् लोकान् शास्त्ययम् । तस्यैतद्रूपम् ' एतशः ' इति । एतशः एतज्जगत्, सर्वं स्थावरजङ्गमात्मकं जगत्, यः देवः महित्वना स्वमाहात्म्येन विममे निर्मितवान्, सः श्रीभगवान् प्रजापतिरिव, सवितेत्यर्थः । यद्वा – एतशः इति सविता । यद्वा – एतश इत्यश्वनामसु पठितम् । स ह्यश्वरूपेण समस्तमेतज्जगदवष्टभ्य स्थितः । तथा ह्यभिहितम् – "उषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुः " (तैसं ७·५·२५·१, बृउ १.१.१) इत्यादिना ॥६॥

देव॑ सवितः॒ प्र सु॑व य॒ज्ञं प्र सु॑व य॒ज्ञप॑तिं॒ भगा॑य ।
दि॒व्यो ग॑न्ध॒र्वः के॑त॒पूः केतं॑ नः पुनातु वा॒चस्प॑ति॒र्वाचं॑ नः स्वदतु ॥७॥

6. S2 after सवितुः adds प्रजापतेः
9. P1 after सविता adds प्रजापतिः
10. M3 सोऽयं for कोऽयं
11. M3 om. अपि; M3 अन्ये तु for अन्ये अपि
12. B1 अनु for अतः; M3 om. तेऽपि
13. M3 om. सः; B1 साहिता for सविता
16. M3 om. महित्वना; M3 om. सः श्री भगवान्
18. B1 अवस्थितः for स्थितः

देव । सवितरिति सवितः । प्र । सुव । यज्ञम् ।
प्र । सुव । यज्ञपतिमिति यज्ञऽपतिम् । भगाय ।
दिव्यः । गन्धर्वः । केतपूरिति केतऽपूः । केतम् । नः । पुनातु ।
वाचः । पतिः । वाचम् । नः । स्वदतु ॥ ड्राः ॥७॥

सा– अथ सप्तमः – "देव सवितः प्रसुव यज्ञं प्र सुव यज्ञपतिं भगाय। दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु" इति। हे सवितः देव, यज्ञम् अग्निचितिं प्रसुव प्रकर्षेण प्रेरय। यज्ञपतिं यजमानं च प्रसुव। किमर्थम्? भगाय सौभाग्याय। दिव्यः दिवि स्वर्गे भवः कश्चिद् गन्धर्वः केतपूः, केतं परकीयचित्ते वर्तमानं ज्ञानं पुनाति शोधयतीति केतपूः। स च नः अस्माकं केतं चित्तवर्ति-ज्ञानं पुनातु भ्रान्तिपरिहारेण शोधयतु। वाचस्पतिः नः अस्मदीयां वाचं स्वदतु स्वादयतु ॥७॥

आ– 'देव सवितः' इति व्याख्यातम्। इयांस्तु विशेषः। केतमग्निं पुनातीति केतपूः वाचस्पतिः वाचं नः स्वदतु इति। "वाग्वा इदं कर्म प्राणो वाचस्पतिः" (शब्रा ६·३·१·१८) इति ॥७॥

इमं नो देव सवितर्यज्ञं प्र णय देवाव्यं सखिविदं
सत्राजितं धनजितं स्वर्जितम् ।
ऋचा स्तोमं समर्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्तनि स्वाहा ॥८॥

इमम् । नः । देव । सवितः । यज्ञम् । प्र । नय । देवाव्यमिति देवऽअव्यम् ।
सखिविदमिति सखिऽविदम् । सत्राजितमिति सत्राऽजितम् ।
धनजितमिति धनऽजितम् । स्वर्जितमिति स्वःऽजितम् ।
ऋचा । स्तोमम् । सम् । अर्द्धय । गायत्रेण । रथन्तरमिति रथम्ऽतरम् ।
बृहत् । गायत्रवर्तनीति गायत्रऽवर्तनि । स्वाहा ॥ जाः ॥८॥

सा– अथाष्टमः – 'इमं नो देव सवितर्यज्ञं प्र णय देवाव्यं सखिविदं सत्राजितं धनजितं स्वर्जितम्। ऋचा स्तोमं समर्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्तनि स्वाहा' इति॥ हे सवितः देव, नः अस्मान् इमं यज्ञं प्रणय प्रापय। कीदृशम्? देवाव्यं देवानामवनार्हो देवाव्यस्तम्। सखिविदं सखायं

---

6. S2 om, यज्ञमग्निचितिं
21. S2 om. अथ
23. P1 om, प्रापय; S2 om. सखायं

स्वनिष्पादकं यजमानं वेत्तीति सखिवित्। तं ᵛसखिविदम्। सत्राणि द्वादशाहादीनि जयति वशीकरोतीति सत्राजित्। तं ᵛसत्राजितम्। तानि हि चीयमानमग्निमपेक्षन्ते। धनं जयति फलरूपेण संपादयतीति धनजित् तं ᵛधनजितम्। स्वः स्वर्गं जयति फलत्वेन संपादयतीति स्वर्जित्। तं ᵛस्वर्जितम्। किं च ᵛऋचा स्तोत्रहेतु-सामाधारभूतया ऋचा ᵛस्तोमं स्तोत्रं सामावृत्तिरूपं संघातं वा ᵛसमर्धय समृद्धं कुरु। ᵛगायत्रेण साम्ना सह ᵛरथन्तरं साम समर्धय। गायत्रं सामैव वर्तनी मार्गो यस्य बृहतः साम्नस्तत् ᵛगायत्रवर्तनि गायत्रसामसहितं ᵛबृहत् साम समर्धय। ᵛस्वाहा इति होमः (मार्थः ?) ॥८॥

आ– ' इमं नः ' इति। सावित्री जगती यजुरन्ता। हे ᵛदेव ᵛसवितः, ᵛनः अस्माकम् ᵛइमं ᵛयज्ञं ᵛप्रणय प्रापय। कथंभूतम् ? ᵛदेवाव्यम्। देवाः अस्मिन् यज्ञे अव्यन्ते रक्ष्यन्ते तर्प्यन्त इति देवाव्याः । अव रक्षणे। देवानामवनार्हो देवाव्यस्तम्। ᵛसखिविदम् सखायो विद्यन्ते यस्य सः सखिवित्, तम्। सत्राशब्दः सत्यवचनः। सत्यं ब्रह्म। तद् यो जयति स सत्राजित्। तं ᵛसत्राजितम्। धनं गवादिकं जयतीति धनजित्। तं ᵛधनजितम्। स्वः स्वर्गलोकं जयतीति स्वर्गजित्। तं ᵛस्वर्गजितम्। ᵛऋचा ऋग्वेदेन सह ᵛस्तोमं स्तुतिं त्रिवृदादिकं स्तोमं ᵛसमर्धय अभिवृद्धिं गमय। ᵛगायत्रेण साम्ना सह ᵛरथन्तरं साम समर्धय। ᵛबृहत्। कथंभूतं बृहत् ? ᵛगायत्रवर्तनि। गायत्र्याः संबन्धि गायत्रम्। वर्त्यतेऽनेनेति वर्तनम्। वर्तनमस्यास्तीति वर्तनि। गायत्रं यस्य बृहतः वर्तनि वर्त्मभूतं तत् बृहद् गायत्रवर्तनि। ᵛस्वाहा इति होमार्थः ॥८॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
आ ददे गायत्रेण छन्दसाऽङ्गिरस्वत्।
पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भर।
त्रैष्टुभेन छन्दसाऽङ्गिरस्वत् ॥९॥

---

1. S2 यजति for जयति
3. P1 after किं च adds हे देव
6. S2 om. स्वाहा इति होमः
7. B1 om. इमं यज्ञं (L. 8)
8. B1 after °भूतं adds यज्ञं
10. B1 om. तद् यो
13. B1 om. °वृद्धिं गमय; B1 महा° for सह
14. B1 M3 प्रवर्तनम् for वर्तनम्

देवस्य त्वा ॥

आ । दुदे । गायत्रेण । छन्दसा । अङ्गिरस्वत् ।

पृथिव्याः । सधस्थादिति सधऽस्थात् । अग्निम् । पुरीष्यम् । अङ्गिरस्वत् । आ । भर ।

त्रैष्टुभेन । त्रैस्तुभेनेति त्रैस्तुभेन । छन्दसा । अङ्गिरस्वत् ॥ चूं ॥९॥

सा– कात्यायनः – " देवस्य त्वेत्यभ्रिमादाय " (काश्रौ १६·२·८) इति । अत्राभ्रिशब्देन उभयतस्तीक्ष्णीकृतोऽरत्निप्रमाणको दण्डविशेष उच्यते । तं गृह्णीयादित्यर्थः । पाठस्तु– ' देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददे गायत्रेण छन्दसाऽङ्गिरस्वत् । पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भर । त्रैष्टुभेन छन्दसाऽङ्गिरस्वत् ' इति । vसवितुः vदेवस्य vप्रसवे प्रेरणे सति vअश्विनोः संबन्धिभ्यां vबाहुभ्यां vपूष्णः vहस्ताभ्यां साङ्गुलिभ्यां बाहुभ्यां साधनभूताभ्यां सहायभूतेन vगायत्रेण vछन्दसा युक्तः सन् vआददे स्वीकरोमि । तत्र दृष्टान्तः – vअङ्गिरस्वत् । अङ्गिरस ऋषयः पूर्वं यथा त्वां स्वीकृतवन्तस्तद्वत् । हे अग्ने, त्वं vपृथिव्याः vसधस्थात् उत्सङ्गात् vपुरीष्यम् vअग्निम् vआभर आहर । पुरीषशब्देन पांसुभूता शुष्का मृदुच्यते । तदर्हतीति पुरीष्योऽग्निः । मृदमादायोखां कृत्वा तस्यामग्निः स्थाप्यते । अतो मृदग्न्योरभेदोपचारेण मृदाहरणमेवाग्न्याहरणमिति विवक्षितत्वात् पुरीषमग्निमाहरेत्युच्यते । अयं चोपचारोऽग्निचयनप्रकरणे सर्वत्रानुवर्तिष्यते । तथा vत्रैष्टुभेन vछन्दसा मृदाहरेति । vअङ्गिरस्वत् इति दृष्टान्तः पूर्ववत् ॥९॥

आ– अभ्रिमादत्ते– ' देवस्य त्वा ' इति । व्याख्यातम् । ' आ ददे ' इति अग्निदेवत्याऽनुष्टुप् । vअङ्गिरस्वत् अङ्गिरसा तुल्यमङ्गिरोवत् । अङ्गिरस्वदिति छान्दसं पदम् । अङ्गिरस्वदभ्रिः । vगायत्रेण vछन्दसा अहम् vआददे गृह्णामि । एवं गृहीता सती अङ्गिरस्वत् अभ्रिः त्वं vपृथिव्याः vसधस्थात् सहस्थानात् उत्सङ्गात् vपुरीष्यं पशव्यं पशुभ्यो हितम् vअग्निम् vआभर । " हृग्रहोर्भश्छन्दसि° " (पा ८·२·३२ वा १) इति भकारः । आहर । vत्रैष्टुभेन vछन्दसा च त्वम् vअङ्गिरस्वत् ॥९॥

6. P1 तां for तं

9. P1 om. बाहुभ्यां पूष्णः P1 with markings above साङ्गुलिभ्यां ins. on the margin साग्राभ्यां

10. P1 with markings above अङ्गिरस्वत् ins. on the margin अङ्गिरसा तुल्यं वर्तत इत्याङ्गिरस्वत्

11. P1 आभरः for आभर

12. S2 after अग्निः adds एव

14. P1 after °वर्तिष्यते adds अङ्गिरस्वत् पूर्ववत् ; S2 आहरणमिति for आहरेति

16. B1 अग्निम् for अभ्रिम्

19. B1 om. सहस्थाना

अग्निरसि नार्यसि त्वया वयमग्निꣳ शकेम खनितुम् ।
सधस्थ आ जागतेन छन्दसाऽङ्गिरस्वत् ॥१०॥

अग्निः । असि । नारी । असि । त्वया । वयम् । अग्निम् । शकेम । खनितुम् ।
सधस्थ इति सधऽस्थे । आ । जागतेन । छन्दसा । अङ्गिरस्वत् ॥ कुं ॥१०॥

सा– अग्निः असि उखां निर्मातुं मृत् खननीया तस्याः खननहेतुः काष्ठविशेषोऽसि । नारी असि स्त्रीरूपा चासि । यद्वा– न विद्यते अरिर्यस्यास्तव सेयं नारीति छान्दसं रूपम् । खननकाले पाषाणादिना तव नास्ति कुण्ठीभाव इत्यर्थः । किं च त्वया युक्ता वयं सधस्थे पृथिव्या उत्सङ्गे आ समन्तात् अग्निं पुरीष्यं खनितुं जागतेन छन्दसा शकेम शक्ता भवेम । अङ्गिरस्वत् इति पूर्ववत् ॥१०॥

आ– 'अग्निरसि' इति । अग्निदैवत्याऽनुष्टुप् । त्वम् अग्निः वज्रः असि । नारी स्त्री च त्वम् असि । किं च 'त्वया वयम् अग्निं शकेम खनितुम्' । सधस्थे पृथिव्याः सहस्थाने अग्निं स्थापयितुं त्वया कारणभूतेन वयं खनितुं पृथिवीं खनितुं कुण्ठीकर्तुं शकेम शक्ता भवेम । आ जागतेन छन्दसा अङ्गिरस्वत् । व्याख्यातम् ॥१०॥

हस्त आधाय सविता बिभ्रदभ्रिꣳ हिरण्ययीम् ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याऽभरदानुष्टुभेन
छन्दसाऽङ्गिरस्वत् ॥११॥१॥

हस्ते । आधायेत्याऽधाय । सविता । बिभ्रत् । अभ्रिम् । हिरण्ययीम् ।
अग्नेः । ज्योतिः । निचाय्येति निऽचाय्य । पृथिव्याः । अधि । आ । अभरत् ।
आनुष्टुभेन । आनुस्तुभेनेत्यानुऽस्तुभेन । छन्दसा । अङ्गिरस्वत् ॥ डें ॥११॥१॥

सा– कात्यायनः – "हस्त आधायेत्येनामभिमन्त्रयते" (काश्रौ १६·२·८) इति । पाठस्तु– 'हस्त आधाय सविता बिभ्रदभ्रिꣳ हिरण्ययीम् । अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याऽभरदानुष्टुभेन छन्दसाऽङ्गिरस्वत्' इति । सविता प्रेरकः परमेश्वरः हस्ते हिरण्ययीं सुवर्णमयीम् अभ्रिम् आधाय

5. S2 om. मृत् and तस्याः
9. B1 M3 before त्वं add अभ्रिः
12. B1 om. आ

स्थापयित्वा बिभ्रत् धारयन् अग्नेः संबन्धि ज्योतिः निचाय्य निश्चित्य पृथिव्याः अधि भूमेः सकाशात् आनुष्टुभेन छन्दसा आभरत् आहृतवान् । अङ्गिरस्वत् इति पूर्ववत् ॥११॥

[इति द्वादशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

आ– अग्निमामन्त्रयते 'हस्त आधाय' इति । आग्निदेवत्याऽनुष्टुप् । यजुरन्ता । सविता देवः हस्ते अग्निम् आधाय स्थाप्य (?) हिरण्ययीं हिरण्मयीम् अमृतमयीं वा आभ्रिं बिभ्रत् धारयन् अग्नेः ज्योतिः निचाय्य दृष्ट्वा उपलभ्य ततः पृथिव्याः अधि सकाशात् आभरत् आहृतवान् । आनुष्टुभेन छन्दसा च आङ्गिरस्वत् आहृतवान् ॥११॥

[इति द्वादशेऽध्याये प्रथमोऽनुवाकः]

[अथ द्वितीयोऽनुवाकः]

सा– प्रथमेऽनुवाके सावित्रहोमाभ्यादानमन्त्रा उक्ताः । द्वितीये मृदाक्रमणमन्त्रा उच्यन्ते ॥

प्रतूर्तं वा<u>जि</u>न्ना द्र<u>व</u> वरि॑ष्ठामनु॑ <u>सं</u>वत॑म् ।

<u>दि</u>वि <u>ते</u> जन्म॑ प<u>र</u>म<u>म</u>न्तरि॑<u>क्षे</u> त<u>व</u> नाभि॑ः पृ<u>थि</u>व्याम<u>धि</u> योनि॒<u>रि</u>त् ॥१॥

प्रतू॑र्त॑मि<u>ति</u> प्रऽतू॑र्त॑म् । <u>वा</u>जि॑न् । आ । द्र॑<u>व</u> ।

वरि॑ष्ठाम् । अनु॑ । <u>सं</u>व<u>त</u>मिति॑ <u>स</u>म्ऽव॑तम् ।

<u>दि</u>वि । <u>ते</u> । जन्म॑ । प॒रमम् । <u>अ</u>न्तरि॑क्षे ।

तव॑ । नाभि॑ः । पृ<u>थि</u>व्याम् । अधि॑ । योनि॑ः । इत् ॥ छयों ॥१॥

सा– कात्यायनः – "अश्वप्रभृतींश्च प्रत्यृचं प्रतूर्तं युञ्जाथां योगे योग इति" (काश्रौ १६.२.१०) इति । च शब्दादनु (दभि ?) मन्त्रयत इत्यनुवर्तते । त्रीनश्वगर्दभाजान् प्रतूर्तमित्यादीनां मध्ये क्रमेणैकैकर्चा अभिमन्त्रयते । प्रथमाया ऋचः पाठस्तु– 'प्रतूर्तं वाजिन्नाद्रव वरिष्ठामनु संवतम् । दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरित्' इति । संवन्यते सम्यग्भज्यते मृद्ग्रहणार्थं सेव्यत इति खननयोग्या भूमिः संवत । सा च पाषाणाद्यभावेनातिप्रशस्तत्वात् वरिष्ठेत्युच्यते ।

5. M3 om. हिरण्ययीं
6. M3 बिभ्रते for बिभ्रत्
7. M3 B1 आहूतवान् for आहृतवान्
18. S2 तृणेन for त्रीन्; S2 इत्यस्यां for इत्यादीनां
19. P1 एकैकपर्वा for एकैकर्चा
20. P1 with markings above संवन्यते ins. on the margins संपूर्वस्य वन षण संभक्ताविति धातोः क्विबन्तस्येदं रूपम्

हे वाजिन् शीघ्रगामिन्नश्व, वरिष्ठां संवतम् अनु लक्ष्य प्रतूर्तम् आ द्रव शीघ्रमागच्छ। ते तव अश्वस्य दिवि द्युलोके परमम् उत्कृष्टं जन्म रोहितादिदेवाश्वरूपेण द्युलोके जन्म प्रसिद्धम्। "रोहितेन त्वाऽग्निर्देवता गमयत्वित्याहैते वै देवाश्वाः" (तैसं १·७·४·३) इति हि श्रुत्यन्तरेणाम्नातम्। तथा तव नाभिः अन्तरिक्षे वर्तते। नियुन्नामका हि वायोरश्वास्तदीयं रथं वहन्तोऽन्तरिक्षे संचरन्ति। तद्रूपेणास्यान्तरिक्षवर्तित्वम्। नाभिशब्देन कृत्स्नशरीरमुपलक्ष्यते। इदमपि च पृथिव्याम् अधि योनिः भूमेरुपरि तव निवासस्थानं तु प्रत्यक्षमेव दृश्यते। एवंमहिमा त्वं शीघ्रमागच्छेति पूर्वत्रान्वयः ॥१॥

आ– अश्वमभिमन्त्रयते– 'प्रतूर्तम्' इति। अश्वदेवत्या आस्तारपङ्क्तिः। हे वाजिन्, प्रतूर्तम्। त्वरतेरेतद्रूपम्। प्रकर्षेण [तूर्तं] तूर्णम् आ द्रव आगच्छ। 'वरिष्ठामनुसंवतम्'। अनुसंपूर्वस्य वनोतेः क्विपि वैतद्रूपम् अनुसंवत्। तम् अनुसंवतम् अनुसंभजनम्। हे वाजिन्, अतिक्षिप्रम् उत्कृष्टतमं संभजनमाद्रवेत्यर्थः। उत्कृष्टं संभजनमधुना दर्शयितुमाह– 'दिवि' इति। हे वाजिन्, दिवि द्युलोके ते तव परमम् उत्कृष्टतमम् आदित्यरूपेण जन्म भविष्यति। अपि च अन्तरिक्षे तव नाभिः उदरं, पृथिव्याम् अधि उपरि योनिः स्थानम्। पादावित्यर्थः। इत् अपि च। एवं विराड्रूपेणाश्वः स्तूयते ॥१॥

युञ्जाथाꣳ रासभं युवमस्मिन् यामे वृषण्वसू।
अग्निं भरन्तमस्मयुम् ॥२॥

युञ्जाथाम्। रासभम्। युवम्। अस्मिन्। यामे। वृषण्वसू इति वृषण्ऽवसू।
अग्निम्। भरन्तम्। अस्मयुमित्यस्मऽयुम्। त्यौ ॥२॥

सा– अथ द्वितीयः – 'युञ्जाथाꣳ रासभं युवमस्मिन् यामे वृषण्वसू। अग्निं भरन्तमस्मयुम्' इति। हे वृषण्वसू, यागनिष्पादनद्वारा फलाभिवर्षणनिमित्तभूतं वसु धनं ययोस्तौ। तत्संबोधनम्। एवंभूतौ हे दम्पती, युवं युवाम् अस्मिन् यामे। यामो मृद्ग्रहणरूपो नियमविशेषः। तस्मिन्निमित्तभूते

2. P1 om. °अश्व°
5. P1 अन्तारिक्षे for अन्तरिक्ष°
7. P1 अश्वि° for अश्व°; M3 °दैवत्या for °देवत्या
8. M3 after वरिष्ठाम् ins. उत्कृष्टाम्
11. B1 om. उत्कृष्टतमम्
13. M3 om. इत्
20. S2 भूलोके for °भूतौ हे

सति vरासभं गर्दभं vयुञ्जाथाम् बध्नीतम् । कीदृशं रासभम् ? vअग्निं vभरन्तम् । अग्निहेतुं मृदं वोढुं समर्थम् । vअस्मयुम् अस्मानात्मन इच्छन्तम्, अस्मद्धितैषिणमित्यर्थः ॥२॥

आ– रासभमभिमन्त्रयते– ' युञ्जाथाम् ' इति । कुश्रीः गार्दभी गायत्री । हे vवृषण्वसू अध्वर्युयजमानौ । वृषा सेक्ता गर्दभः स ययोर्वसु धनं तौ वृषण्वसू । तत्संबोधनं वृषण्वसू । vयुवम् अध्वर्युयजमानौ युवाम् vअस्मिन् vयामे कालोपलक्षिते अस्मिन् कर्मणि vरासभं गर्दभं vयुञ्जाथाम् । vअस्मयुम् अस्मान् कामयमानम् vअग्निं vभरन्तं हरन्तं रासभं vयुञ्जाथाम् इति संबन्धः ॥२॥

योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
सखाय इन्द्रमूतये ॥३॥

योगेयोग इति योगेऽयोगे । तवस्तरमिति तवःऽतरम् ।
वाजेवाज इति वाजेऽवाजे । हवामहे ।
सखायः । इन्द्रम् । ऊतये ॥ ठै ॥३॥

सा– अथ तृतीयः – " योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये " इति । युज्यते अनुष्ठीयत इति योगः कर्म । vयोगेयोगे तत्तत्कर्मणि vतवस्तरं बलवत्तरम् । अजम् vइन्द्रम् इन्द्रियप्रदम् vऊतये रक्षणाय vवाजेवाजे तत्तदन्नप्राप्तिनिमित्तम् । vसखायः परस्परसख्यं प्राप्ताः ऋत्विग्यजमाना वयं vहवामहे आह्वयामः ॥३॥

आ– अजमभिमन्त्रयते– ' योगेयोगे ' इति । शुनःशेपः । अजदेवत्या गायत्री । तवः इति बलनाम । vयोगेयोगे कर्मणिकर्मणि कर्तव्ये vवाजेवाजे देवानां मनुष्याणां चान्ने अन्ने दातव्येऽवस्थिते, हे vसखायः हे ऋत्विगादयः, vइन्द्रम् इन्द्रियवन्तं वीर्यवन्तं vतवस्तरं बलवत्तरं बलिनमेनमजं vहवामहे आह्वयामः । vऊतये । अव रक्षणे । अवनाय रक्षणाय । हवामहे इति संबन्धः ॥३॥

---

3. M3 om. रासभमभिमन्त्रयते

5. B1 रासभगर्णं for रासभं

13. P1 om. युज्यते अनुष्ठीयत इति [L 14]; P1 with marking above तव° ins. on the margin– तव इति बलनामसु पठितम् ।

मृदाक्रमणमन्त्राः]

प्रतूर्व॒न्नेह्य॑वक्राम॒न्नश॑स्ती रु॒द्रस्य॒ गाण॑पत्यं मयो॒भूरेहि॑ ।
उ॒र्व॒न्तरि॑क्षं॒ वीहि स्व॒स्तिग॑व्यूति॒रभ॑यानि कृ॒ण्वन् पू॒ष्णा स॒युजा॑ स॒ह ॥४॥

प्र॒तूर्व॒न्निति॑ प्र॒ऽतूर्व॑न् । आ । इ॒हि॒ । अ॒व॒क्रा॒म॒न्नित्य॑व॒ऽक्राम॑न् । अश॑स्तीः ।
रु॒द्रस्य॑ । गाण॑पत्य॒मिति॑ गाण॑ऽपत्यम् । म॒यो॒भू॒रिति॑ म॒यः॒ऽभूः । आ । इ॒हि॒ ।
उ॒रु । अ॒न्तरि॑क्षम् । वि । इ॒हि॒ । स्व॒स्तिग॑व्यूति॒रिति॑ स्व॒स्तिऽग॑व्यूतिः ।
अभ॑यानि । कृ॒ण्वन् । पू॒ष्णा । स॒युजेति॑ स॒ऽयुजा॑ । स॒ह ॥ घं॑ःवूः । ॥४॥

सा– कात्यायनः – " अनुपस्पृशन्नुत्क्रामयत्येनान् प्राचः प्रतिमन्त्रं प्रतूर्वन्नुर्वन्तरिक्षं पृथिव्याः सधस्थादिति " (काश्रौ १६·२·११) इति । अश्वादीनां स्पर्शनमकुर्वन्नध्वर्युः ' प्रतूर्वन् ' इत्येतेषां क्रमेणैकैकेन मन्त्रेण एतानश्वादीन् प्रागभिमुखान् मृदाक्रमणार्थं निर्गमयेत् । तत्र प्रथममन्त्रपाठस्तु– ' प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यं मयोभूरेहि ' इति । हे अश्व, त्वम् ᵛएहि आगच्छ । किं कुर्वन् ? ᵛप्रतूर्वन् विरोधिनः शत्रून् हिंसन्, त्वरयन्निति वा । ᵛअशस्तीः ᵛअवक्रामन् भ्रातृव्यैः क्रियमाणा अपकीर्तीर्निवारयन् । ᵛरुद्रस्य क्रूरदेवस्य यद् ᵛगाणपत्यं पशुसमूहपतित्वं तस्माद्गाणपत्यादागत्य ᵛमयोभूः अस्माकं सुखं भावयन् एहि आगच्छ ॥

अथ द्वितीयः – ' उर्वन्तरिक्षं वीहि स्वस्तिगव्यूतिरभयानि कृण्वन् पूष्णा सयुजा सह ' इति । स्वस्ति इत्यविनाशिनाम । विनाशरहिता गव्यूतिः क्रोशद्वयोपलक्षितो मार्गो यस्य सः ᵛस्वस्तिगव्यूतिः । हे गर्दभ, तादृशस्त्वं ᵛसयुजा, सहायभूतो वर्तत इति सयुक् । तादृशेन ᵛपूष्णा पोषकेण सह ᵛअभयानि ᵛकृण्वन् व्याघ्रादिभ्यः भयपरिहारं कुर्वन् ᵛउरु विस्तीर्णम् ᵛअन्तरिक्षं ᵛवीहि विशेषेण प्राप्नुहि ॥४॥

आ– अश्वरासभावुत्क्रामयति– ' प्रतूर्वन् ' इति । विराड्रूपा त्रिष्टुप् । यजुर्गर्भा अश्वस्तुतिः । ' उर्वन्तरिक्षं वीहि ' इति यजुः । अर्धर्चेनाश्वः स्तूयते । ' अवक्रामन् अशस्तीः ' । अशस्तान् पाप्मना दुष्टान् मार्गान् ᵛअवक्रामन् परिहृत्य पादक्षेपं कुर्वन् प्रत्वरमाणः आगच्छ । ᵛमयोभूः सुखस्य भावयिता भूत्वा ᵛरुद्रस्य पशुपतेः ᵛगाणपत्यं गणपतित्वं पाहि ।

7. S2 उत्क्रमयति ... क्रचः for उत्क्रामयति ... प्राचः
9. S2 om. प्रागभिमुखान्
12. P1 with markings above मयो° ins. in the margin मय इति सुखनामसु पठितम् ।
15. S2 °रहितो for °रहिता
16. P1 यस्य सः for इति
18. B1 यज्ञगर्दभा, M3 यजुर्गर्गा corrected by us as यजुर्गर्भा
19. B1 यज्ञः अर्धत्वेनाश्वः श्रूयते, M3 यज्ञः अर्धश्रेश्वनाम स्तूयते reconstructed by us as अर्धर्चेनाश्वः स्तूयते

रासभमुत्क्रामयति– 'उर्वन्तरिक्षम्' इति। उरु विस्तीर्णम् अन्तरिक्षं रक्षोभिरनाकुलं स्वस्ति वीहि प्राप्नुहि। स्वस्ति इत्यविनाशिनाम। गव्यूतिः क्रोशद्वयोपलक्षितो मार्गः। मार्गं स्वस्ति नाशादिरहितं कुर्वन्। प्रभूतयवसोदकं मार्गं कुर्वन्। अभयानि ऋत्विग्यजमानादीनां च अभयप्रदानं कुर्वन्। पुष्यतीति पूषा पृथिवी। तेन पूष्णा पृथिव्या सयुजा यागभूमित्वेन सयुजा समानयोगिन्या सह उरु अन्तरिक्षं विस्तीर्णं रक्षोभिरनाकुलम् अन्तरिक्षं स्थानं वीहि व्याप्नुहीति संबन्धः ॥४॥

पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भर।
अग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामः ॥५॥

पृथिव्याः। सधस्थादिति सधऽस्थात्। अग्निम्। पुरीष्यम्। अङ्गिरस्वत्। आ। भर। अच्छ। इमः। भरिष्यामः॥ कुं ॥५॥

सा– अथ तृतीयः – 'पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भर' इति। हे अज, त्वं पृथिव्याः भूमेः सधस्थात् खनितुं योग्यात्। कृत्स्नापि मृत्तिका सह तिष्ठति मिलित्वा वर्तते तत्रेति सधस्थः प्रदेशविशेषस्तस्मात् प्रदेशात्। पुरीष्यं पांसुरूपं शुष्कमृत्तिकायोग्यम्। यद्वा – पुरीष्यं पशव्यं पशुभ्यो हितम्। "पशवो वै पुरीषम्" (शब्रा ६·३·१३५) इति श्रुतेः। तादृशम् अग्निम् अग्न्यवस्थानहेतुभूतां मृदम् आभर आहर। तत्र दृष्टान्तः – अङ्गिरस्वत् यथापूर्वमङ्गिरस ऋषयः अग्निमाहृतवन्तस्तद्वत्॥

कात्यायनः – "अग्निपूज्ज्वलत्सु पिण्डं गच्छत्यग्निं पुरीष्यमिति" (काश्रौ १६·३·१२) इति। अग्निपूज्ज्वलितेषु सत्सु उखार्थं चतुरस्रे श्वभ्रेऽवस्थितं मृन्मयपिण्डं प्रति अध्वर्य्वादयो गच्छेयुः। पाठस्तु– 'अग्निं पुरीष्यमङ्गिरस्वदच्छेम' इति। पुरीष्यं पुरीषार्हम् अग्निम् अङ्गिरस्वत् अच्छ इमः अभिगच्छामः॥

कात्यायनः – "पुरुषमीक्षतेऽग्निं पुरीष्यमिति" (काश्रौ १६·२·१३) इति। यं कञ्चित् पुरुषं पश्येत्। पाठस्तु– 'अग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामः' इति। भरिष्यामः संपादयामः। शेषं पूर्ववत् ॥५॥

आ– अजमुत्क्रामयति– 'पृथिव्याः सधस्थात्' इति। एतानि त्रीणि यजूंषि आग्नेयानि। पृथिव्याः सधस्थात् सहस्थानात् पुरीष्यं पशव्यं पशुभ्यो हितम्। "पशवो वै पुरीषम्" (शब्रा ६·३·१·३८) इति श्रुतेः। अग्निम् आङ्गिरस्वत् अङ्गिरसा तुल्यमङ्गिरस्वत्।

4. M2 पूर्णा for पूष्णा
11. S2 आङ्गिरः for अज
14. S2 पशुहितं for पशुभ्यो हितं
17. S2 ज्वलत्सु for उज्ज्वलत्सु
18. S2 ज्वालितेषु for उज्ज्वालितेषु; S2 अभ्रे for श्वभ्रे; P1 after श्वभ्रे adds गर्ते

मृदाक्रमणमन्त्राः]

आभर आहर । ब्रह्माऽध्वर्युयजमाना गच्छन्ति । ' अग्निं पुरीष्यमङ्गिरस्वदच्छेमः ' । अच्छामे (?) राप्तुमिति शाकपूणिः । अग्निं पशव्यम् अङ्गिरा इव आप्तुम् इमः अभिगच्छामः । ' अग्निं पुरीष्यमङ्गिरस्वदच्छेमः ' इत्यग्निं पशव्यम् । 'अङ्गिरस्वदच्छेमः ' इति अनद्धा पुरुषमीक्षते । अग्निं पुरीष्यम् अङ्गिरस्वत् अङ्गिरा इव भरिष्यामः ॥५॥

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आ ततन्थ ॥६॥

अनु । अग्निः । उषसाम् । अग्रम् । अख्यत् ।
अनु । अहानि । प्रथमः । जातवेदा इति जातऽवेदाः ।
अनु । सूर्यस्य । पुरुत्रेति पुरुऽत्रा । च । रश्मीन् ।
अनु । द्यावापृथिवी इति द्यावापृथिवी । आ । ततन्थ ॥ ब्यों ॥६॥

सा– कात्यायनः – " वल्मीकवपामादाय छिद्रेण पिण्डमीक्षतेऽन्वग्निरिति " (काश्रौ १६·२·१५) इति । वल्मीकस्य योऽवयवः उन्नतलेनाभिवृद्धः सेयं वपा । तां छिद्ररहितां वपां स्वीकृत्य तस्याश्छिद्रेण मृन्मयं पिण्डं पश्येत् । पाठस्तु – ' अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आ ततन्थ ' इति । अयमादित्यरूपः अग्निः उषसाम् उषः–कालानाम् अग्रम् उपक्रमम् अनु अख्यत् अनुक्रमेण प्रकाशितवान् । जातं वेत्ति वेदयतीति वा जातवेदाः । अयमग्निः प्रथमः मुख्यः सन् अहानि अप्यन्वख्यत् । किं च सूर्यस्य पुरुत्रा पुरून् बहून् रश्मीन् अन्वख्यत । किं च द्यावापृथिव्यावुभे अप्यनुक्रमेण आततन्थ आततान सर्वतो व्याप्तवान् ॥६॥

आ– ' अन्वग्निः ' इति आग्नेयी त्रिष्टुप् । प्रजापतिरूपेणाग्निः स्तूयते –' अन्वग्निरुषसामग्रमख्यत् ' । उषसाम् अग्रम् आदित्यम् अनु यः अग्निः अख्यत् । ख्या प्रकथने । अनुप्रथितः दीप्यत इत्यर्थः । यश्चाग्निः अहानि अनुदीप्यते । प्रथमः आद्यः । जातं जातं वेत्ति वेदयतीति वा जातवेदाः जातप्रज्ञानः । ' अनु सूर्यस्य पुरुत्रा च रश्मीन् ' । यः च सूर्यस्य रश्मीन्

---

12. P1 तत्रसेन, S2 तत्रत्येन corrected by us as उन्नतत्वेन

14. S2 om. आदित्यरूपः

17. P1 with markings above आततन्थ ins. on the margin बभूताततन्थेति छन्दसि निपातितः

21. B1 सूर्यः स्वररश्मीन् for सूर्यस्य रश्मीन्

पुरुत्रा पृथून् बहून् रश्मीन् अनुदीप्यते। 'अनु द्यावापृथिवी '। यश्च द्यावापृथिवी अनु स्वकीयं रश्मिजालम् आततन्थ आतनोति। ततन्थेति छान्दसं पदम्। तमग्निं पश्याम इति शेषः ॥६॥

आगत्य॑ वाज्यध्वा॑न॒ꣳ सर्वा॒ मृधो॒ वि धू॑नुते।
अ॒ग्निꣳ स॒धस्थे॑ मह॒ति चक्षु॑षा॒ नि चि॑कीषते ॥७॥

आ॒गत्येत्या॑ऽगत्य॑। वा॒जी। अध्वा॑नम्। सर्वाः॑। मृधः॑। वि। धू॒नु॒ते।
अ॒ग्निम्। स॒धस्थ॒ इति॑ स॒धऽस्थे॑। म॒ह॒ति। चक्षु॑षा। नि। चि॒क्री॒ष॒ते॒ ॥ छीं ॥७॥

सा– कात्यायनः – "आगत्येत्यभिमन्त्रयतेऽश्वम् " (काश्रौ १६·२·१७) इति। पाठस्तु– 'आगत्य वाज्यध्वानꣳ सर्वा मृधो वि धूनुते। अग्निꣳ सधस्थे महति चक्षुषा नि चिकीषते' इति। वाजी वेगवानश्वः अध्वानं मार्गम् आगत्य प्राप्य सर्वाः मृधः मार्गश्रमादीन् सर्वान् बाधकान् विधूनुते विविधं कम्पयति विनाशयतीत्यर्थः। यत्र पांसवः सहावतिष्ठन्ते तत्स्थानं सधस्थम्। महति विस्तीर्णे सधस्थे अयमश्वः चक्षुषा दृष्ट्वा अग्निम् अग्निहेतुं मृदं निचिकीषते नितरां चिकीषते संपादयितुमिच्छति ॥७॥

आ– अश्वमभिमन्त्रयते– 'आगत्य वाजी' इति। अश्वदेवत्याऽनुष्टुप्। 'आगत्य वाजी'। वाजवान् अश्वः अध्वानं मार्गम् आगत्य आगम्य सर्वाः मृधः सर्वान् संग्रामान् विधूनुते कम्पयति अपनयति। 'अग्निꣳ सधस्थे महति'। सधस्थे पृथिव्यां महति उत्कृष्टप्रदेशे वर्तमानं विगतप्रवासंतया आग्निम् उदराग्नियुक्तमश्वं चक्षुषा निचिकीषते पश्यतीत्यर्थः ॥७॥

आ॒क्रम्य॑ वाजिन् पृ॒थि॒वीम॒ग्निमि॑च्छ रु॒चा त्वम्।
भूमे॑र्वृ॒त्वाय॑ नो ब्रूहि॒ यत॒ः खने॑म॒ तं व॒यम् ॥८॥

आ॒क्रम्येत्या॑ऽक्रम्य॑। वा॒जि॒न्। पृ॒थि॒वीम्। अ॒ग्निम्। इ॒च्छ॒। रु॒चा। त्वम्।
भूमेः॑। वृ॒त्वाय॑। नः॒। ब्रू॒हि॒। यतः॑। खने॑म। तम्। व॒यम् ॥ ग्यूं ॥८॥

---

1. B1 सन् for अनु
2. M3 पश्यामि for पश्यामः
12. P1 चेतु, S2 चेयदेतुं corrected by us as चिकीषते
15. M3 om. आगम्य
17. M3 om अश्वं ... पश्यतीत्यर्थः; B1 पश्यन्ति for पश्यति

मृदाक्रमणमन्त्राः]

सा– "आक्रम्येत्यनेन मृत्पिण्डमधिष्ठापयति" (काश्रौ १६.२.१८) इति । आक्रम्येत्यनेन मन्त्रेण पिण्डस्योपरि अश्वस्य पादप्रक्षेपणं कुर्यात् । पाठस्तु– 'आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा त्वम् । भूमेर्वृत्वाय नो ब्रूहि यतः खनेम तं वयम्' इति । हे वाजिन् अश्व, त्वं पृथिवीं भूमिम् आक्रम्य पादस्पर्शेन परीक्ष्य रुचा । रुचिर् दीप्तौ । स्वकीयेन तेजसा मानसज्ञानेनेत्यर्थः । अग्निम् इच्छ अग्निहेतुं मृदं निश्चेतुं भूमेः भूमिं वृत्वाय वरणं कृत्वा दृष्ट्वेत्यर्थः, नः अस्माकं ब्रूहि । अयं प्रदेशोऽग्निहेतुमृद्योग्य इति कथय । यतः यस्मात् प्रदेशात् तादृशी मृल्लभ्यते तं प्रदेशं वयं खनेम खननमवदारणं करवाम ॥८॥

आ– अश्वेन पिण्डमधिष्ठापयति– 'आक्रम्य वाजिन्' इति । वाजिदेवत्याऽनुष्टुप् । हे वाजिन्, हे अश्व, पृथिवीम् आक्रम्य अवष्टभ्य स्थितः त्वम् अग्निम् इच्छ । [रुचा दीप्त्या] अग्न्यवगमहेतुभूतया अग्निम् इच्छ अग्न्यन्वेषणं कुरु । 'भूमेः वृत्वाय नो ब्रूहि'। वृतु वर्तने । क्त्वो यक् । स्पर्शनार्थः । भूमेः इति कर्मणि षष्ठी । भूमिं वृत्वा स्पृष्ट्वा भूप्रदेशं स्पर्शयित्वा नः अस्माकं ब्रूहि कथय । 'यतः खनेम'। यतः यस्मात् प्रदेशात् यं प्रदेशं प्राप्य वयम् अग्न्यर्थं खनेम तम् अग्निं नो ब्रूहीति संबन्धः ॥८॥

द्यौस्ते॑ पृ॒ष्ठं पृ॑थि॒वी स॒धस्थ॑मा॒त्माऽन्तरि॑क्षꣳ समु॒द्रो योनिः॑ ।
वि॒ख्याय॒ चक्षु॑षा॒ त्वम॒भि ति॑ष्ठ पृतन्य॒तः ॥९॥

द्यौः । ते॒ । पृ॒ष्ठम् । पृ॒थि॒वी । स॒धस्थ॒मिति॑ स॒धऽस्थ॑म् ।
आ॒त्मा । अ॒न्तरि॑क्षम् । स॒मु॒द्रः । योनिः॑ ।
वि॒ख्याये॑ति॑ वि॒ऽख्याय॑ । चक्षु॑षा । त्वम् । अ॒भि । ति॒ष्ठ । पृ॒त॒न्य॒तः ॥ झुं ॥९॥

सा– कात्यायनः – "द्यौस्त इति पृष्ठस्योपरि पाणिं धारयति" (काश्रौ १६.२.१९) इति । अश्वस्य पृष्ठभागे संमानार्थं हस्तमवस्थापयेत । पाठस्तु– 'द्यौस्ते पृष्ठं पृथिवी सधस्थमात्माऽन्तरिक्षꣳ समुद्रो योनिः । विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यतः' इति । हे अश्व, द्यौः द्युलोकः ते तव पृष्ठम् । पृथिवी भूलोकः तव सधस्थम् अग्निना सहस्थानम् । अन्तरिक्षलोकस्तव मध्यशरीरवर्ती जीवात्मा । समुद्रः तव योनिः जन्मकारणम् । "अप्सु योनिर्वा अश्वः" (शब्रा १३.२.२.१८) इति श्रुतेः । एवं स्तूयमानः त्वं चक्षुषा विख्याय उखायोग्यां मृदं विलोक्य पृतन्यतः संग्रामं कर्तुमिच्छतः शत्रून् राक्षसादीन् तस्यां मृदि गूढरूपेणावस्थितान् अभितिष्ठ पादेनाक्रम्य विनाशय ॥९॥

2. P1 with markings above कुर्यात् ins. on the margin कारयेत् .
4. S1 om. रुचिर् दीप्तौ
6. P1 भूर्लभ्यते for मृल्लभ्यते
8. B1 अग्ने corrected by us as अश्वेन; M3 om. अश्वेन ... अग्न्यव° (L. 10)

आ– अश्वं स्तौति पृष्ठस्योपरि पार्णि धारयन्– 'द्यौस्ते पृष्ठम्' इति । अश्वदेवत्या बृहती । हे अश्व, ते तव द्यौः द्युलोकः पृष्ठम् । पृथिवी सधस्थं सहस्थानं पादौ । आत्मा अन्तरिक्षम् । अन्तरिक्षं शरीरम् । समुद्रः उदकं योनिः उत्पत्तिस्थानम् । तं त्वामेवं-प्रभावं ब्रवीमि । 'विख्याय चक्षुषा' । विख्याय निरीक्ष्य त्वम् अभि तिष्ठ पृतन्यतः । पुरुषान् प्रति त्वम् अभि आभिमुख्येन तिष्ठ ॥९॥

उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन् ।
वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनन्त उपस्थे अस्याः ॥१०॥

उत् । क्राम । महते । सौभगाय ।
अस्मात् । आस्थानादित्याऽस्थानात् । द्रविणोदा इति द्रविणःऽदाः । वाजिन् ।
वयम् । स्याम । सुमता इति सुऽमतौ । पृथिव्याः ।
अग्निम् । खनन्तः । उपस्थ इत्युपऽस्थे । अस्याः ॥ न्यें ॥१०॥

सा– कात्यायनः – "अनुपस्पृशन्नुत्क्रामेत्युत्क्रामयति" (काश्रौ १६·२·१९) इति । अश्वस्पर्शनमकुर्वन्नस्मात् स्थानात् तमश्वं निर्गमयेत् । पाठस्तु– 'उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन् । वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनन्त उपस्थे अस्याः' इति । हे वाजिन् अश्व, द्रविणोदाः धनप्रदस्त्वं महते सौभगाय अस्मद्भाग्याभिवृद्ध्यर्थम् अस्मात् आस्थानात् खननप्रदेशात् उत्क्राम उद्गतो भव । वयं तु पृथिव्याः सुमतौ अनुग्रहे चित्ते स्याम तिष्ठेम । कीदृशा वयम् ? अस्याः उपस्थे पृथिव्या उपरिभागे अग्निहेतुं मृदं खनन्तः खनितुमुद्योगं कुर्वन्तः ॥१०॥

आ– अश्वमुत्क्रामयति– 'उत्क्राम' इति । अश्वदेवत्या त्रिष्टुप् । विराड् वा । हे वाजिन् हे अश्व, अस्मात् आस्थानात् उत्क्राम उद्गच्छ । महते सौभगाय महदैश्वर्याय । सौभगशब्दोऽयं विशिष्टैश्वर्यवचनः । यत्र त्वं तिष्ठसि तत्र हि द्रविणोदाः द्रविणदास्त्वम् । किं च यस्याः पृथिव्याः उपस्थे उत्सङ्गे अग्निम् उद्दिश्य मृत्पिण्डं खनन्तः अस्याः पृथिव्याः सुमतौ शोभनदानादिगुणयुक्तमतौ वयं स्याम ॥१०॥

3. M3 उत्पन्न° for उत्पत्ति°
4. P1 om. त्वम्
12. P1 °स्पर्शम् for स्पर्शनम् (L. 13)
13. P1 निगमयेत् for निर्गमयेत्
19. M3 सौभगाय शब्दो for सौभगशब्दो°
22. M3 शोभनानां द्वि for शोभनदानादि; B1 °युक्तौ for युक्तमतौ

मृदाक्रमणमन्त्राः]

उद॑क्रमीद् द्रवि॒णोदा वा॒ज्यर्वाऽक॒ः सु लो॒कꣳ सुकृ॑तं पृथि॒व्याम् ।
तत॑ः खनेम सु॒प्रतीक॑म॒ग्निꣳ स्वो॒ रुहा॑णा॒ अधि॒ नाक॑मुत्त॒मम् ॥११॥

उत् । अ॒क्र॒मी॒त् । द्र॒वि॒णो॒दा इति॑ द्र॒वि॒णः॒ऽदाः । वा॒जी । अर्वा॑ ।
अक॒रित्यक॑ः । सु । लो॒कम् । सु॒कृ॑त॒मिति॒ सु॒ऽकृ॑तम् । पृ॒थि॒व्याम् ।
तत॑ः । ख॒ने॒म॒ । सु॒प्रती॑क॒मिति॑ सु॒ऽप्रती॑कम् । अ॒ग्निम् ।
स्व॒रिति॒ स्व॑ः । रुहा॑णाः । अधि॑ । नाक॑म् । उ॒त्त॒ममित्यु॑त्ऽत॒मम् ॥ क्रौं ॥११॥

सा– कात्यायनः – "उदक्रमीदित्यभिमन्त्रयते" (काश्रौ १६.२.२०) इति । उत्क्रामन्तमश्वमभिमन्त्रयेत् । अश्वदेवत्या विराट्छन्दस्का प्रजापत्यार्षी । पाठस्तु– 'उदक्रमीद् द्रविणोदा वाज्यर्वाकः सुलोकꣳ सुकृतं पृथिव्याम् । ततः खनेम सुप्रतीकमग्निꣳ स्वो रुहाणा अधि नाकमुत्तमम्' इति । द्रविणोदाः यागकरणे धनप्रदः । वाजी तथैवान्नप्रदः । अर्वा गमनकुशल इत्यर्थः । तादृशोऽयमश्वः अस्मात् स्थानात् उदक्रमीत् उदगच्छत् । स उत्क्रान्तोऽश्वः सुकृतम् आक्रमणेन विरुद्धराक्षसानपहृत्य सुष्ठु कृतं सु लोकं शोभनं लोकं खननदेशं पृथिव्याम् अकः अकरोत् । ततः तस्मात् प्रदेशादग्नियोग्यां मृदं वयं खनेम । कीदृशमग्निम् ? सुप्रतीकं सुमुखम् । खनितारो वयं कीदृशाः ? स्वः स्वर्गम् अधि रुहाणाः आरोहणं कुर्वन्तः । कीदृशं स्वर्गम् ? नाकम् । कं सुखम्, अकं दुःखम्, तद्रहितम् । उत्तमम् उत्कृष्टम् ॥११॥

आ– अथैनमश्वमुत्क्रामन्तमभिमन्त्रयते– 'उदक्रमीत्' इति । अश्वदेवत्या त्रिष्टुप् । द्रविणोदाः द्रविणस्य धनस्य दाता । वाजी वाजवानश्वः । अर्वा अरणशीलः । अर्वा अतिचञ्चल इत्यर्थः । वाजी यतः प्रदेशात् उदक्रमीत् उत्क्रान्तवान् । उत्क्रम्य च 'अकः सु लोकꣳ सुकृतं पृथिव्याम्' । सुकृतं सुष्ठु कृतं सु शोभनं लोकं स्थानम् अंकः कृतवान् पृथिव्याम् । ततः तस्मात् प्रदेशात् खनेम खननं कुर्मः । स्वः रुहाणाः स्वर्गं लोकं रुहाणाः रोहन्तः । अधीत्युपरिभाव ऐश्वर्यं वा । नाकम् । कमिति सुखनाम । न कम् अकम् असुखम् । यत्र मृतानां न असुखमिति नाको लोकः । तम् अधि नाकम् उत्तमम् उत्कृष्टम् । इत्थंभूतस्य लोकस्य प्राप्तये एतत् कर्म कुर्म इत्यभिप्रायः ॥११॥

7. S2 अथैनमश्वमुत्क्रमन्तमभिमन्त्रयते for उदक्रमीदित्यभिमन्त्रयते;
S2 om. उत्क्रामन्त ... मन्त्रयेत् [L. 8]
12. S2 om. °लोकं; S2 आ अकः for अकः
16. B1 उत्क्रमन्तम् for उत्क्रामन्तम्
18. B1 उत्क्रमधः for उत्क्रम्य च
19. B1 सुकृतं सुष्ठुकृतं लोकं सुकृतं सुशोभनं लोकं, M3 सुकृतं सुष्टुतं सुकृतं लोकं सुकृतं सुशोभनं लोकं reconstituted as सुलोकं... शोभनं लोकं; B1 after कृतवान् ins. असि

[मृदाक्रमणमन्त्राः

आ त्वा॑ जिघर्मि॒ मन॑सा घृ॒तेन॑ प्रतिक्षि॒यन्तं॒ भुव॑नानि॒ विश्वा॑ ।
पृथुं ति॑र॒श्चा वय॑सा बृ॒हन्तं॒ व्यचि॑ष्ठ॒मन्नै॑ रभ॒सं दृशा॑नम् ॥१२॥

आ । त्वा॒ । जि॒घ॒र्मि॒ । मन॑सा । घृ॒तेन॑ ।
प्र॒ति॒क्षि॒यन्त॒मिति॑ प्र॒तिऽक्षि॒यन्त॑म् । भुव॑नानि । विश्वा॑ ।
पृ॒थुम् । ति॒र॒श्चा । वय॑सा । बृ॒हन्त॑म् ।
व्यचि॑ष्ठम् । अन्नैः॑ । र॒भ॒सम् । दृशा॑नम् ॥ कें ॥१२॥

सा- " मृदमभिजुहोत्या त्वा जिघर्मीति व्यतिषक्ताभ्यामृग्भ्याम् " (काश्रौ १६.२.२२) इति । संश्लिष्टाभ्याम् ' आ त्वा जिघर्मि ' इति द्वाभ्यामृग्भ्यां पूर्वोक्तां मृदमभिलक्ष्य जुहुयात् । प्रथमऋचः पाठस्तु- ' आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा । पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ' इति । हे अग्ने, त्वामहं ᵛमनसा ध्यायन् ᵛघृतेन आज्येन ᵛआजिघर्मि आक्षारयामि दीपयामि वा । घृ क्षरणदीप्त्योः । कीदृशं त्वाम् ? ᵛविश्वा ᵛभुवनानि ᵛप्रतिक्षियन्तं सर्वेषु लोकेषु प्रत्येकमेव निवसन्तम् । ᵛतिरश्चा ᵛपृथुं तिर्यक्प्रमाणेन विस्तृतं, ᵛवयसा ᵛबृहन्तं वयउपलक्षितेन कालेन प्रौढम्। पृथुमित्यनेन बहुदेशव्याप्तिः। अनेन तु बहुकालव्याप्तिः। ᵛव्यचिष्ठम् अतिशयेन विविधमञ्चनं गमनं यस्य तादृशम् । ᵛअन्नैः श्रद्धया निक्षिप्तैर्घृतादिभिर्हविर्भिः ᵛरभसं शीघ्रमेव ᵛदृशानं पुनर्वर्द्धमानतया दर्शनीयम् ॥१२॥

आ- मृदमभिजुहोति- ' आ त्वा जिघर्मि ' इति । आग्नेयी त्रिष्टुप् । गृत्समदः । घृ क्षरणदीप्त्योः । ᵛआ जिघर्मि ᵛमनसा श्रद्धया पूतेन ᵛघृतेन आज्येन अग्ने, त्वाम् आसिञ्चामि । कथंभूतं त्वाम् इति । ' प्रतिक्षियन्तं भुवनानि विश्वा ' । विश्वानि सर्वाणि ᵛभुवनानि भूतजातानि ᵛप्रतिक्षियन्तं प्रत्येकं सर्वत्र निवसन्तम् । ' पृथुं तिरश्चा ' । ᵛतिरश्चा तिर्यगञ्चनेन ᵛपृथुं महान्तम् । ' वयसा बृहन्तम् ' । ᵛवयसा कालोपलक्षितेन ᵛबृहन्तम् । ᵛव्यचिष्ठं, विपूर्वस्याञ्चतेरिष्ठनि चैतद्रूपम् । अतिशयेन व्यञ्चनवन्तम् अवकाशवन्तम् । ' अन्नैः रभसम् ' । रभ राभस्ये । स्वस्मिन् श्रद्धया निक्षिप्तैः घृतादिभिः ᵛअन्नैः राभस्ययुक्तम् उत्साहवन्तं, तैरन्नैर्वर्धमानतया ᵛदृशानं दर्शनीयम् । दृश्यमानं भगवन्तमग्निं त्वां जिघर्मीति संबन्धः ॥१२॥

11. S2 om. घृ क्षरणदीप्त्योः
13. P1 with markings above कालेन ins. on the margin धूमेन काष्ठेन वा
14. S2 om. रभसं
17. B1 सुतेन for पूतेन; M3 अग्निं for अग्ने
18. B1 भूतानि for भुवनानि
19. M3 भुवनजातानि for भूतजातानि
21. B1 om. अवकाशवन्तम्
22. M3 तस्मै, B1 तेस्त्रैः corrected by us as तैरन्नैः

आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराणः ॥१३॥

आ । विश्वतः । प्रत्यञ्चम् । जिघर्मि । अरक्षसा । मनसा । तत् । जुषेत ।
मर्यश्रीरिति मर्यऽश्रीः । स्पृहयद्वर्ण इति स्पृहयत्ऽवर्णः । अग्निः ।
न । अभिमृश इत्यभिऽमृशे । तन्वा । जर्भुराणः ॥ णूं ॥१३॥

सा- अथ द्वितीया- 'आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत । मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराणः' इति । अहं विश्वतः सर्वतः । 'प्रत्यञ्चं जिघर्मि अरक्षसा मनसा'। प्रत्यगात्मतया प्रतीयमानमग्निम् आ जिघर्मि घृतेन हविषा आरक्षयामि । सोऽप्यग्निः अरक्षसा मनसा क्रौर्यरहितेन चित्तेन तत् घृतं जुषेत सेवताम्, अयम् अग्निः मर्यश्रीः मनुष्यैर्यजमानैराश्रीयत इति मर्यश्रीः मनुष्यप्रियश्रीर्वा । स्पृहयद्वर्णः यजमानैः स्पृहणीयरूपः । न अभिमृशे अभिमर्शनं कर्तुं न शक्यः । कीदृशः ? तन्वा शरीरेण जर्भुराणः । जृभी गात्रविनामे । इतस्ततश्च गच्छन् । ईदृशमग्निम् आजिघर्मीति योजना ॥१३॥

आ- 'आ विश्वतः' इति गृत्समदः । आग्नेयी विराट् । विश्वतः सर्वतः । प्रत्यञ्चं प्रत्यगात्मतया प्रतीयमानं श्रीभगवन्तमग्निं त्वाम् अरक्षसा रक्षोदोषरहितेन महाभागेन मनसा अहम् आ जिघर्मि आसिञ्चामि । 'तत् जुषेत' । तत् हविस्त्वं जुषस्व । अत्र पुरुषव्यत्ययः । मर्यश्रीः स्पृहयद्वर्णः स्पृहयद्भिः आकाङ्क्षां कुर्वद्भिः वर्णमिच्छद्भिश्च । वर्ण्यत इति वर्णः । वर्ण वर्णनक्रियाविस्तारगुणवचनेषु । 'तन्वा जर्भुराणः' । जृभी गात्रविनामे । इतश्चेतश्च गच्छन् । तन्वा त्वदीयेन शरीरेण । भगवान् अग्निः त्वं श्रद्धाहीनैः क्षिप्तं हविः न अभिमृशे अभिमर्शनमपि न करोषीत्यभिप्रायः ॥१३॥

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।
दधद्रत्नानि दाशुषे ॥१४॥

परि । वाजपतिरिति वाजऽपतिः । कविः । अग्निः । हव्यानि । अक्रमीत् ।
दधत् । रत्नानि । दाशुषे ॥ गौ ॥१४॥

7. P1 om. अरक्षसा मनसा
9. S2 आश्रयणीया श्रीर्यस्य सः for यजमानै ... प्रियश्रीर्वा [L 10]
10. P1 with markings above °मृशे ins. on the margin सुपां सुलुगिति सोः शे चादेशः
14. B1 after भगवन्तं adds ताम्; M3 °भाग्येन for °भागेन
15. M3 पुरुषस्य प्रत्ययः for पुरुषव्यत्ययः
18. M3 °मुखे for °मपि

सा– कात्यायनः – "अभ्र्या पिण्डं त्रिः परिलिखति परि वाजपतिरिति बहिर्बहिरुत्तरोत्तरया" (काश्रौ १६.२.२३) इति। खननसाधनभूतयाऽभ्र्या मृत्पिण्डस्य परितो रेखात्रयं कुर्यात्। तत्प्रकार उच्यते– परि वाजपतिः इत्येतयर्चा प्रथमा रेखा। ततो बहिस्तस्या उत्तरया परि त्वाऽग्ने इत्यनयर्चा द्वितीया रेखा। ततोऽपि बहिस्तस्या अप्युत्तरया त्वमग्ने इत्यनयर्चा तृतीया रेखेति। तत्र प्रथमायाः पाठः – 'परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे' इति। अयम् ᵛअग्निः ᵛहव्यानि परितः ᵛअक्रमीत् स्वीकृतवान्। कीदृशोऽग्निः? ᵛवाजपतिः वाजस्यान्नस्य पालयिता। ᵛकविः क्रान्तदर्शी। किं कुर्वन्? ᵛदाशुषे हविर्दत्तवते यजमानाय ᵛरत्नानि रमणीयानि धनानि ᵛदधत् प्रयच्छन् ॥१४॥

आ– परिलिखति– 'परि वाजपतिः' इति। सोमकः। आग्नेयी गायत्री। ᵛवाजपतिः अन्नस्य पतिः। ᵛकविः क्रान्तदर्शनः। ᵛअग्निः सर्वज्ञो भगवान्। ᵛदधत् ᵛरत्नानि रमणीयानि धनानि ᵛदाशुषे दानशीलाय यजमानाय दधतु प्रयच्छतु। तेन दत्तानि ᵛहव्यानि हवींषि ᵛपरि ᵛअक्रमीत्। परिक्रमणमत्र लक्षणार्थः ॥१४॥

परिं त्वाऽग्ने पुरं व॒यं विप्रं॑ सहस्य धीमहि ।
धृषद्वर्णं दिवेदिवे भेत्तारं भङ्गुरावताम् ॥१५॥

परि॑। त्वा॒। अ॒ग्ने॒। पुर॑म्। व॒यम्। विप्र॑म्। स॒ह॒स्य॒। धी॒म॒हि॒।
धृ॒षद्व॑र्ण॒मिति॑ धृ॒षत्ऽव॑र्णम्। दि॒वेदि॑व॒ इति॑ दि॒वेऽदि॑वे।
भे॒त्तार॑म्। भ॒ङ्गु॒राव॑ताम्। भ॒ङ्गु॒रव॑ता॒मिति॑ भ॒ङ्गु॒रऽव॑ताम् ॥ लिं ॥१५॥

सा– अथ द्वितीया– 'परि त्वाऽग्ने पुरं वयं विप्रꣳ सहस्य धीमहि। धृषद्वर्णं दिवेदिवे भेत्तारं भङ्गुरावताम्' इति। हे ᵛसहस्य, बलेन मथ्यमानोऽग्निः सहस्यः। हे तादृश ᵛअग्ने, वयं त्वां ᵛपरिधीमहि परितः स्वीकुर्मः। परितो ध्यायाम इति वा। कीदृशं त्वाम्? ᵛपुरम् अपेक्षितफलानां पूरयितारं ᵛविप्रं ब्राह्मणजात्यभिमानिनं देवम्। ᵛधृषद्वर्णं धृषन् वैरिणां धर्षयिता वर्णः स्वरूपं यस्य असौ धृषद्वर्णः।

2. P1 पुरतो for परितो
7. P1 धनादीनि for धनानि
10. M3 om. अन्नस्य पतिः
11. M3 शीलाय for दानशीलाय
20. S2 om. परितो ध्यायाम इति वा।
21. S2 om. धृषन् ... धृषद्वर्णः

मृदाक्रमणमन्त्राः]

दिवेदिवे प्रतिदिनं भङ्गुरावतां भेत्तारं, भञ्जनीयं पापं भङ्गुरं तदेषामस्तीति भङ्गुरवन्तः विघातकारिणो राक्षसादयस्तेषां भेत्तारं विनाशयितारम् ॥१५॥

आ– 'परि त्वा' इति । वायुर्नाम ऋषिः । आग्नेयी अनुष्टुप् । सहस्य । सहसा बलेन मथ्यमानोऽग्निः सहस्यः । सहते वा सहस्यः । तत्संबोधनं सहस्य । हे भगवन्नग्ने, हे सहस्य । 'भेत्तारं भङ्गुरावताम्' । भङ्गुरमनवस्थितं मनो येषां ते भङ्गुरवन्तः । छान्दसो दीर्घः । तेषां, भङ्गुरावताम् अनवस्थितचित्तानां भेत्तारं तच्चित्तभेदकरम् । धृषद्वर्णम् । ञिधृषा प्रागल्भ्ये । धृषन्त्या प्रगल्भया धिया वर्ण्यत इति धृषद्वर्णः । तं धृषद्वर्णं विप्रम् । प्रा पूरणे । अभीष्टफलस्य अविशेषेण पूरकं विप्रम् । पुरं पुरतः स्थितं श्रीभगवन्तमग्निं च त्वा दिवेदिवे अहन्यहनि परिधीमहि परितः सर्वप्रकारेण वयं धीमहि । ध्यै चिन्तायामित्यस्य रूपम् । छान्दसं संप्रसारणम् । ध्यायाम इत्यर्थः ॥१५॥

त्वम॑ग्ने द्युभिस्त्वमा॑शुशुक्षणिस्त्वमद्भ्यस्त्वमश्म॑नस्परि॑ ।
त्वं वने॑भ्यस्त्वमोष॑धीभ्यस्त्वं नृणां नृ॑पते जायसे शुचि॑ः ॥१६॥(२)॥

त्वम् । अग्ने । द्युभिरिति द्युऽभिः । आशुशुक्षणिः । अद्भ्य इत्यत्ऽभ्यः । अश्मनः । परि॑ । वने॑भ्यः । ओष॑धीभ्यः । नृणाम् । नृपत इति नृऽपते । जायसे । शुचि॑ः ॥ द्वौ ॥१६॥२॥

सा– अथ तृतीया– 'त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः' इति । हे अग्ने, त्वं द्युभिः स्वर्गनिमित्तभूतैस्तेजोभिरुपलक्षितो मथ्यमानः तत्र तत्र यागशालासु जायसे । किं च त्वम् आशुशुक्षणिः आर्द्रां भूमिं शीघ्रमेव शोषयिता जायसे । आशु शुचा दीप्त्या क्षिणोति हिनस्तीति विग्रहः । त्वम् अद्भ्यः वर्षधाराभ्योऽशनिरूपेण जायसे । त्वम् अश्मनः परि पाषाणस्योपरि पाषाणान्तरसंघट्टनेन जायसे । त्वं वनेभ्यः दावाग्निरूपेण जायसे । त्वम् ओषधीभ्यः ओषधिकार्येभ्यो भेषजेभ्यस्त्वं जायसे । यद्वा– वंशद्वयसंघर्षणादिभ्यो जायसे । नृणां नृपते सर्वेषामपि मनुष्याणां पालक, त्वं गृहेगृहे शुचिः शुद्धिहेतुः सन् जायसे । 'पुनर्दाहेन मृन्मयम्' इति श्रुतेः ॥१६॥

[इति द्वादशाध्याये द्वितीयोऽनुवाकः ॥२॥]

1. P1 with markings above भङ्गुरा° ins. on the margin दीर्घश्छान्दसः; P1 om. पापं
2. S2 om. भेत्तारं
16. S2 om. तेजोभिर् ... मथ्यमानः

काखं...११

आ– 'त्वमग्ने' इति । गृत्समदः । आग्नेयी त्रिष्टुप् । हे भगवन् vअग्ने, vद्युभिः अहोभिर्निमित्तभूतैर्मथ्यमानः vत्वं vजायसे । vआशुशुक्षणिः । आशु क्षिप्रं शुचा दीप्त्या क्षिणोति हिनस्ति शीतादिकमिति सनोति संभजत इति वा आशुशुक्षणिः । आङ्पूर्वस्य शोचतेः दीप्तिकर्मणः सन्नन्तस्य रूपमाशुशुक्षणिरिति । vत्वम् vअद्भ्यः सकाशात् उपरि विद्युदात्मना जायसे । vत्वम् vअश्मनः पाषाणात् vपरि जायसे । vत्वं vवनेभ्यः अरणिकाष्ठेभ्यः जायसे । vत्वम् vओषधीभ्यः वंशादिभ्यो जायसे । vत्वं vनृणां मनुष्याणाम् अग्निहोत्रिणां जायसे । हे vनृपते नृणां पालयितः, vशुचिः । शुचि दीप्तौ । दीप्यत इति शुचिः । जातोऽपि सद्यः शुद्धः पाप्मानं शोचकश्च त्वमेवेति संबन्धः ॥१६॥

[इति द्वादशेऽध्याये द्वितीयोऽनुवाकः] ॥२॥

[अथ तृतीयोऽनुवाकः]

द्वितीयेऽनुवाके मृदाक्रमणमन्त्रा उक्ताः । तृतीये तु मृत्खननमन्त्रा उच्यन्ते ।

देवस्य॑ त्वा सवि॒तुः प्र॑स॒वेऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो हस्ता॑भ्याम् ।
पृ॒थि॒व्याः स॒धस्था॑द॒ग्निं पु॑री॒ष्य॑मङ्गि॒र॒स्वत् ख॑नामि ।
ज्योति॑ष्मन्तं त्वाऽग्ने सु॒प्रती॑क॒मज॑स्रेण भा॒नुना॒ दीद्य॑तम् ।
शि॒वं प्र॒जाभ्योऽहि॑ꣳसन्तं पृ॒थि॒व्याः स॒धस्था॑द॒ग्निं पु॑री॒ष्य॑मङ्गि॒र॒स्वत् ख॑नामः ॥१॥

दे॒वस्य॑ । त्वा॒ ।
पृ॒थि॒व्याः । स॒धस्था॒दिति॑ स॒धऽस्था॑त् । अ॒ग्निम् । पु॒री॒ष्य॑म् । अ॒ङ्गि॒र॒स्वत् । ख॒ना॒मि ।
ज्योति॑ष्मन्तम् । त्वा॒ । अ॒ग्ने॒ । सु॒प्रती॑क॒मिति॑ सु॒ऽप्रती॑कम् ।
अज॑स्रेण । भा॒नुना॑ । दीद्य॑तम् ।
शि॒वम् । प्र॒जाभ्य॒ इति॑ प्र॒ऽजाभ्यः॑ । अहि॑ꣳसन्तम् । पृ॒थि॒व्याः । स॒धस्था॒दिति॑
स॒धऽस्था॑त् । अ॒ग्निम् । पु॒री॒ष्य॑म् । अ॒ङ्गि॒र॒स्वत् । ख॒ना॒मः ॥ धिः ॥१॥

1. M3 श्रीभग॰ for भग॰
2. B1 om. आशु ... इति वा आशुशुक्षणिः (L. 3)
4. B1 om. दीप्ति ... आशुशुक्षणिरिति; B1 om. त्वमद्भ्यः ... जायसे। (L. 5)
5. M3 om. त्वम्; M3 अकारण॰ for अरणि॰
6. B1 ॰होतॄणां, M3 ॰होत्रीणां for ॰होत्रिणां

मृत्खननमन्त्राः]

कात्यायनः – "अभ्र्या पिण्डं खनति देवस्य त्वेति" (काश्रौ १६.२.२३) इति। पाठस्तु– 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत् vखनामि । ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमजस्रेण भानुना दीद्यतम्। शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत् खनामः' इति। 'देवस्य त्वा' इत्यादिर्व्याख्यातसमानार्थः॥

हे vअग्ने vपृथिव्याः vसधस्थात् उपरिमदेशात् vपुरीष्यं पशुयोग्यम् vअग्निं त्वाम् अङ्गिरा इव vखनामि। अङ्गिरसः इव वयं खनामः। कीदृशं त्वाम्? vज्योतिष्मन्तं ज्वालायुक्तं vसुप्रतीकं सुमुखम्। vअजस्रेण vभानुना निरन्तरं वर्तमानेन रश्मिना vदीद्यतं प्रकाशमानम्। vप्रजाभ्यः प्रजोपकारार्थं vशिवं शान्तम्। अत अव vअहिꣳसन्तं हिंसामकुर्वन्तम् ॥१॥

आ– खनति– 'देवस्य त्वा' इति व्याख्यातम्। 'पृथिव्याः सधस्थात्' इति। अग्निदेवत्याऽत्यष्टिः। vपृथिव्याः vसधस्थात् सहस्थानात्। vअग्निं vपुरीष्यं पशव्यम्। अङ्गिरसा तुल्यम् vअङ्गिरस्वत्। एवंविधमग्निम् अङ्गिरस्वत् vखनामि। पुनरग्निं विशिनष्टि– vज्योतिष्मन्तं ज्योतिषा संयुक्तं त्वां हे vअग्ने, vसुप्रतीकं सुसुखं सुमुखं वा। vअजस्रेण अनवच्छिन्नेन vभानुना दीप्त्या vदीद्यतं दीप्यमानम्। vशिवं शान्तम्। vप्रजाभ्यः प्रजार्थं vशिवम् vअहिंसन्तं प्राणिनां हिंसामकुर्वाणम्। vपृथिव्याः vसधस्थात् vअग्निं vपुरीष्यम्। पुरीषः पशुः। तद्धितं पुरीष्यं पशव्यम्। अङ्गिरसा तुल्यम् vअङ्गिरस्वत् vखनामः ॥१॥

अ॒पां पृ॒ष्ठम॑सि॒ योनि॑र॒ग्नेः स॑मु॒द्रम॒भित॑ः पिन्व॑मानम् ।
वर्ध॑मानो म॒हाँ आ च॒ पुष्क॑रे दि॒वो मात्र॑या वरि॒म्णा प्र॑थस्व ॥२॥

अ॒पाम्। पृ॒ष्ठम्। अ॒सि॒। योनि॑ः। अ॒ग्नेः। स॒मु॒द्रम्। अ॒भित॑ः। पिन्व॑मानम्।
वर्ध॑मानः। म॒हान्। आ। च॒। पुष्क॑रे।
दि॒वः। मात्र॑या। व॒रि॒म्णा। प्र॒थ॒स्व॒ ॥ ल्वै ॥२॥

---

8. S2 after अकुर्वन्तम् adds पृथिव्याः अधस्थादग्निं पुरीष्यं पशुभ्यो हितम् अङ्गिरसा तुल्यं खनामः

10. M3 त्रिष्टुप् for अत्यष्टिः

12. M3 सह युक्तं for संयुक्तं

13. B1 दीप्यन्तं for दीद्यतं, S2 after दीद्यतं adds दीप्यन्तं

14. B1 अहिं for हिंसामकुर्वाणम् and om. पृथिव्या ... पुरीष्यम्;
B1 पुरीष्यः for पुरीषः; M3 om. पुरीषः

15. B1 भरिष्यामः for खनामः M3 before खनामः adds भरिष्या

सा– कात्यायनः – "तस्मिन् पुष्करपर्णमपां पृष्ठमिति" (काश्रौ १६·२·२४) इति । "विमाष्टर्यैनदिव इति" (काश्रौ १६·२·२५) इति । अपां पृष्ठमसीत्यनेनास्तीर्णे कृष्णाजिने पद्मपत्रं निधाय दिव इत्यनेन तदेव शोधयेत् । तत्र पाठस्तु– 'अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् । वर्धमानो महाँ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व' इति । हे पुष्करपर्ण, त्वम् [v]अपां [v]पृष्ठम् [v]असि पृष्ठवदुपरिभागे वर्तमानमसि । तथा [v]अग्नेः [v]योनिः असि अग्निहेतोरुदः कारणमसि । तथा [v]समुद्रम् [v]अभितः [v]पिन्वमानम् । समुद्रसमानस्य तडाकजलस्य परितः प्रीतिकरम् । किं च [v]वर्धमानः [v]महान् इति लिङ्गव्यत्ययः । [v]पुष्करे उदके [v]आ समन्तान्महत् प्रभूतं सत् वर्धमानं वृद्धियुक्तमसि । एवंभूतस्त्वं [v]वरिम्णा वरिष्ठया [v]दिवः [v]मात्रया आकाशस्य परिमाणेन [v]प्रथस्व विस्तृतं भव ॥२॥

आ– पुष्करपर्णं कृष्णाजिनस्योपरिष्टात् स्थापयति– 'अपां पृष्ठमसि' इति । स्वराट् पुष्करपर्णदेवत्या पङ्क्तिः । [v]अपां [v]पृष्ठम् उपरिस्थानम् [v]असि । हे पुष्करपर्ण, [v]अग्नेः अग्न्यर्थस्य पिण्डस्य त्वं [v]योनिः कारणम् असि । अतस्त्वं 'समुद्रमभितः पिन्वमानम्' । उपपदविभक्तिर्द्वितीया । समुद्रस्य उदकस्य [v]आभितः परितः [v]पिन्वमानम् । पिन्वतिः प्रीणनार्थः । प्रीतिं कुर्वाणं पुष्करपर्णं त्वां [v]पुष्करे [v]वर्धमानः [v]महान् समुद्रः स्वयं च [v]पिन्वमानः त्वं वर्धस्व । केन इति ? तदाह– 'दिवो मात्रया' इति । द्युलोकस्य परिमाणेन [v]वरिम्णा वरिष्ठया मात्रया [v]प्रथस्व वर्धस्व । "पुष्करपर्णम् । अपां पृष्ठमसि योनिरग्नेरिति । अपां ह्येतत् पृष्ठं योनिर्ह्येतदग्नेः समुद्रमभितः पिन्वमानमिति समुद्रो ह्येतदभितः पिन्वते वर्धमानो महाँ आ च पुष्कर इति वर्धमानः" (शब्रा ६·४·१·७-८) इत्यादिश्रुतेः ॥२॥

शर्म॑ च॒ स्थो वर्म॑ च॒ स्थोऽच्छि॑द्रे बहु॒ले उ॒भे ।
व्यच॑स्वती॒ सं व॑साथां भृ॒तम॒ग्निं पु॒रीष्य॑म् ॥३॥
सं व॑साथाꣳ स्व॒र्विदा॑ स॒मीची॒ उर॑सा॒ त्मना॑ ।
अ॒ग्निम॒न्तर्भ॑रि॒ष्यन्ती॒ ज्योति॑ष्मन्त॒मज॑स्र॒मित् ।
पु॒री॒ष्यो॑ऽसि वि॒श्वभ॑रा॒ अथ॑र्वा त्वा प्रथ॒मो निर॑मन्थदग्ने ॥४॥

1. S2 lacuna after तास्मिन् इत्यनेन
3. P1 तत् for तत्र
10. M3 om. स्वराट्
11. M3 अनद्धस्य for अग्न्यर्थस्य
12. B1 द्वितीयः for द्वितीया
14. B1 पुष्करेण for पुष्करे; B1 after वर्धमानो ins. अहं

मृत्खननमन्त्राः]

शर्म॑ । च॒ । स्थः॒ । वर्म॑ । च॒ । स्थः॒ ।
अच्छि॑द्रे॒ इत्यच्छि॑द्रे । ब॒हु॒ले इति॑ ब॒हु॒ले । उ॒भे इत्यु॒भे ।
व्यच॑स्वती॒ इति॑ व्यच॑स्वती । सम् । व॒सा॒था॒म् । भृ॒तम् । अ॒ग्निम् । पु॒री॒ष्य॑म् ॥ थूं ॥३॥
सम् । व॒सा॒था॒म् । स्व॒र्विदेति॑ स्वः॒ऽविदा॑ । स॒मी॒ची॒ इति॑ स॒मीची॑ । उर॑सा । त्मना॑ ।
अ॒ग्निम् । अ॒न्तः । भ॒रि॒ष्यन्ती॒ इति॑ भ॒रि॒ष्यन्ती॑ । ज्योति॑ष्मन्तम् । अज॑स्रम् । इत् ।
पु॒री॒ष्यः॑ । अ॒सि॒ । वि॒श्वभ॑रा॒ इति॑ वि॒श्वभ॑राः ।
अथ॑र्वा । त्वा॒ । प्र॒थ॒मः । निः । अ॒म॒न्थ॒त् । अ॒ग्ने॒ ॥ त्राः ॥४॥

सा– कात्यायनः – "आलभत उभे शर्म च स्थ इति" (काश्रौ १६.२.२३) इति । उभे कृष्णाजिनपुष्करपर्णे संस्पृशेत् । पाठस्तु–'शर्म च स्थो वर्म च स्थोऽच्छिद्रे बहुले उभे । व्यचस्वती संवसाथां भृतमग्निं पुरीष्यम् । संवसाथाꣳ स्वर्विदा समीची उरसा त्मना । अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित्' इति । हे कृष्णाजिनपुष्करपर्णे, ᵛउभे युवां ᵛशर्म ᵛच ᵛस्थः अग्नेः सुखकारिणी अपि भवथः । तथा ᵛवर्म ᵛच ᵛस्थः कवचवद्रक्षके भवथः । कीदृशे ? ᵛअच्छिद्रे छिद्ररहिते ᵛबहुले विस्तीर्णे ᵛव्यचस्वती आच्छादनप्रकारवती पुटिकादिसदृशे इत्यर्थः । तथाविधे युवां ᵛसंवसाथां सम्यगिदमाच्छादयतम् । ततः ᵛपुरीष्यम् ᵛअग्निं ᵛभृतं धारयतम् । किं च युवां ᵛत्मना स्वयमेव परनिरपेक्षे सती ᵛउरसा उरःसदृशेन भवदीयस्वरूपेण ᵛसंवसाथां सम्यगाच्छादयतम् । कीदृशे युवाम् ? ᵛस्वर्विदा स्वर्गविदा स्वर्गलाभसाधने इत्यर्थः । त्मनेत्यस्य विशेषणं वा । ᵛसमीची मृद्धन्धनायानुकूले ᵛअजस्रम् ᵛइत् निरन्तरमेव ᵛज्योतिष्मन्तं तेजस्विनम् ᵛअग्निम् ᵛअन्तः स्वोदरे ᵛभरिष्यन्ती धरिष्यन्ती ॥

कात्यायनः – "पिण्डं पुरीष्योऽसि । पाणिभ्यां परिगृह्णाति" (काश्रौ १६.२.२७) इति । उखानिर्माणयोग्यं मृन्मयं पिण्डं हस्ताभ्यां गृह्णीयात् । पाठस्तु– 'पुरीष्योऽसि विश्वभरा अथर्वा त्वा प्रथमो निरमन्थदग्ने' इति । हे मृत्पिण्ड, त्वं ᵛपुरीष्यः ᵛअसि पुरीषस्य बहुलस्य पांसोर्योग्योऽसि । अत एव ᵛविश्वभराः विश्वं कृत्स्नं सुखारूपं बिभर्तीति विश्वभराः । असुन्प्रत्ययान्तः । हे ᵛअग्ने, अथर्वाख्य-ऋषिः ᵛप्रथमः इतरेभ्यः पूर्वभावी सन् ᵛत्वा त्वां ᵛनिरमन्थत् निःशेषेण मथितवान् । अत्राथर्वणः प्रथमनिर्मन्थनं नाम प्रथमदर्शनमित्यभिप्रायं तैत्तिरीयो दर्शयति– "अग्निर्देवेभ्यो निलायत तमथर्वाऽन्वपश्यदथर्वा त्वा प्रथमो निरमन्थदग्न इत्याह य एवैनमन्वपश्यत् तेनैवैनꣳ सं भरति" (तैसं ५.१.४) इति ॥३–४॥

आ– उभे पुष्करपर्णे अभिमृशति–'शर्म च' इति, 'सꣳवसाथाम्' इति च । द्वे अनुष्टुभौ । कृष्णाजिनपुष्करपर्णदेवत्ये । हे कृष्णाजिनपुष्करपर्णे, युवां ᵛशर्म ᵛच ᵛस्थः शरणं च स्थः

11. P1 om. अपि
14. P1 उरसः for उरसा
21. S2 om. असुन्प्रत्ययान्तः
22. S2 after अत्र ins. अपि
24. P1 समं for सं°
26. B1 M3 °वासाधाम् for वसाथाम्
27. B1 om. कृष्णाजिन ... देवत्ये; M3 om. स्थः ... । भवथः । ... कवचं

भवथः । [v]वर्म [v]च [v]स्थ: कवचं संनहनं च भवथ: । [v]अच्छिद्रे छिद्ररहिते [v]बहुले महाप्रमाणे [v]उभे कृष्णाजिनपुष्करपर्णे युवां ब्रवीमि । [v]व्यचस्वती अवकाशवती भूत्वा [v]संवसाथाम् आच्छादयतम् । आच्छाद्य च [v]पुरीष्यं पशव्यम् [v]अग्निं [v]भृतं बिभृतम् । भरणं कुरुतम् ॥३॥

[v]संवसाथां [स्वर्विदा] । यज्ञसूर्यदेवाहर्वचनः स्वःशब्दः । स्वः वेत्तीति स्वर्वित् । तेन [v]स्वर्विदा स्वर्विदा रूपेण । यद्वा– द्विवचनस्थाने छान्दस आकारः । स्वर्विदी । [v]समीची समीचीने एकचित्ते भूत्वा [v]उरसा [v]त्मना च हृदयेन विज्ञानेन । कृष्णाजिनपुष्करपर्णे युवाम् एनं पिण्डरूपम् [v]अग्निं [v]सं॒॑वसाथाम् आच्छादयतम् । किं च– 'अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तम्' । [v]ज्योतिष्मन्तं तेजस्विनं पिण्डस्थम् [v]अग्निम् [v]अन्त: मध्ये [v]भरिष्यन्ती धारयमाणे युवाम् [v]अजस्रम् [v]इत् , एवं निरन्तरमनुपक्षीणं कुरुतमिति शेषः ॥

पिण्डमभिमृशति– 'पुरीष्योऽसि' इति । अग्निदैवत्यं यजुः । [v]पुरीष्य: [v]असि पशव्यस्त्वमसि । [v]विश्वभरा: सर्वस्य धारकः पोषको वा । [v]अथर्वा [v]त्वा च प्राणः । "अथर्वा प्राण एतदग्रे निरमन्थत्" (शब्रा ६·४·२·१) इति श्रुतेः । 'प्रथमो [निरमन्थद]-ग्रे' । त्वां [v]प्रथमः प्राणः [v]निरमन्थत् निर्मन्थनं कृतवान् ॥४॥

त्वाम॑ग्ने पुष्क॑रा॒दध्यथ॑र्वा॒ निर॑मन्थत ।
मू॒र्ध्नो विश्व॑स्य वा॒घत॑: ॥५॥

त्वाम् । अ॒ग्ने॒ । पुष्क॑रात् । अधि॑ । अथ॑र्वा । निः । अ॒म॒न्थ॒त॒ ।
मू॒र्ध्नः । विश्व॑स्य । वा॒घत॑: ॥ सं ॥५॥

3. B1 om. आच्छादयतम्; M3 आच्छायेताम् corrected by us as आच्छादयतम्
M3 बिभ्रतम् हरणं for बिभृतम् । भरणं
5. M2 °वासाथां for °वासाथां; B1 °आहवनीय° for अहर्
6. B1 after समीची adds तस्य वचने
8. B1 आच्छायेथाम; M3 आच्छाथेताम् for आच्छादयतम्;
B1 M3 after ज्योतिष्मन्तं add पिण्डस्थमग्निम् ।
9. B1 धरिष्यन्ती for भरिष्यन्ती
10. B1 after इत् adds इव त्यक्तं प्रतौ तत्प्रसन्तरातरो (?) यं and om. एवं ... शेषः,
M3 करोमि for कुरुतम्
11. B1 om. पिण्डमभि ... छान्दसं रूपं upto vsk 12.3.10
13. M3 आदो च प्राणः प्राणो वा for अथर्वा त्वा च प्राणः
14. M3 प्रथमं for प्रथमः

मृत्खननमन्त्राः]

सा– कात्यायनः – " त्वामग्न इति षड्भिः सर्वं सकृद्धृत्वा ॥ पुष्करपर्णे निदधाति " (काश्रौ १६.२.२८–१६.३.१) इति । त्वामग्न इत्यादिमन्त्रषट्केन मृन्मयं पिण्डं निःशेषमेकवारमपहृत्य पद्मपत्रे निदध्यात् । तत्र प्रथममन्त्रपाठः – ' त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ' इति । हे vअग्ने अथर्वाख्य ऋषिः vपुष्करात् vअधि पद्मपत्रस्योपरि vत्वां vनिरमन्थत निःशेषेण मथितवान् । अत एव तैत्तिरीयैः समाम्नातम्– " पुष्करपर्णे ह्येनमुपश्रितमविन्दन् " (तैसं ५.१.४) इति । कीदृशात् पुष्करात् ? vमूर्ध्नः उत्तमाङ्गवत् प्रशस्तात् । vविश्वस्य vवाघतः । सर्वस्य जगतो वाहकादिह पुष्करपर्णमग्निमन्थनादियज्ञनिष्पादनद्वारेण सर्वं जगन्निर्वहति ॥५॥

आ– पिण्डं हरति– ' त्वामग्ने ' इति षड्भिराग्नेयीभिः । तत्र तिस्रो गायत्र्यः । भरद्वाजः । द्वे त्रिष्टुभौ । एका बृहती । त्वाम् vअग्ने, vत्वां vपुष्करात् vअधि उदकात् सकाशात् । " आपो वै पुष्करं प्राणोऽथर्वा " (शब्रा ६.४.२.२) इति श्रुतेः । ' मूर्ध्नः विश्वस्य वाघतः ' । वाघत इति ऋत्विङ्नामसु पठितम् । vवाघतः तु ते vमूर्ध्नः शिरसि । व्यत्ययः । सर्वस्य तेजसः मूर्धानमग्निं त्वाम् अरण्योर्जनयन्ति, सर्वस्य वा कर्मणोऽङ्गभूतम् ॥५॥

तमु॑ त्वा द॒ध्यङ् ऋषिः॑ पु॒त्र ई॑धे॒ अथ॑र्वणः ।
वृ॒त्र॒हणं॑ पुरन्द॒रम् ॥६॥

तम् । ऊँ इत्यूँ । त्वा॒ । द॒ध्यङ् । ऋषिः॑ । पु॒त्रः । ई॒धे॒ । अथ॑र्वणः ।
वृ॒त्र॒हणं॑म् । वृ॒त्र॒ह॒नमिति॑ वृ॒त्रऽह॒नं॑म् । पु॒रं॒द॒रमिति॑ पु॒रंऽ द॒रम् ॥ डां ॥६॥

सा– अथ द्वितीया – ' तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरंदरम् ' इति । हे अग्ने, vअथर्वणः vपुत्रः दध्यङ्ङ्नामक vऋषिः vतम् vउ vत्वा vईधे तमेव त्वां vवृत्रहणम् अघनाशिनं vपुरन्दरं रुद्ररूपेणासुरसंबन्धिनां त्रयाणां पुराणां विदारयितारम् ॥६॥

आ– ' तमु त्वा ' इति । उकार एवार्थे । दध्यङ्नामा vऋषिः मन्त्राणां द्रष्टा । vअथर्वणः vपुत्रः vदध्यङ् । vवृत्रहणं वृत्रस्य हन्तारम् । पाप्मनो वा हन्तारम् । vपुरंदरम् असुरपुराणां च दारयितारम् । इन्धी दीप्तौ । आदीपयामि आदीपयति वा । अग्नेरपि परमैश्वर्ययोगादिन्द्रात्मना स्तुतिः ॥६॥

तमु॑ त्वा पा॒थ्यो वृषा॒ समी॑धे दस्यु॒हन्त॑मम् ।
ध॒नं॒ज॒यꣳ रणे॑रणे ॥७॥

---

6. P1 पुष्करपर्णात् for पुष्करात्; S2 after इह ins. इति; पुष्करपर्णे for पुष्करपर्णम्

18. P1 नाम for °नामकः; P1 त्वमेव for तमेव

तम् । ऊँ इत्यूँ । त्वा । पाथ्यः । वृषा । सम् । ईधे । दस्युहन्तममिति दस्युऽहन्तमम् ।
धनंजयमिति धनम्ऽजयम् । रणेरण इति रणेऽरणे ॥ तं ॥७॥

सा– अथ तृतीयः – 'तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनंजयं रणेरणे' इति । हे अग्ने, पाथ्यनामकः कश्चिदृषिः । ˇतम् ˇउ ˇत्वा ˇसमीधे तमेव त्वां प्रज्वालितवान् । कीदृशं त्वाम् ? ˇदस्युहन्तमं तस्कराणाम् अतिशयेन हन्तारम् । ˇरणेरणे ˇधनंजयं तेषु तेषु संग्रामेषु धनस्य जेतारम् ॥६॥

आ– 'तमु त्वा पाथ्यः' इति । ˇउ इवार्थे । ˇरणेरणे संग्रामे ˇधनंजयं धनस्य जेतारम् । ˇदस्युहन्तमं शत्रूणां हन्तृतमम् । ˇतम् एवाग्निं ˇत्वा त्वाम् । पथः अनपेतः ˇपाथ्यः । वृष सेचने । ˇवृषा रेतसः सेक्ता । अत्र पाथ्यो वृषेति मन उच्यते । "मनो वै पाथ्यो वृषा" (शब्रा ६·४·२·४) इति श्रुतेः । ˇसमीधे संदीपयति ॥६॥

सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञं सुकृतस्य योनौ ।
देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥८॥

सीद । होतरिति होतः । स्वे । ऊँ इत्यूँ । लोके । चिकित्वान् । सादय । यज्ञम् ।
सुकृतस्येति सुऽकृतस्य । योनौ ।
देवावीरिति देवऽअवीः । देवान् । हविषा । यजासि ।
अग्ने । बृहत् । यजमाने । वयः । धाः ॥ ध्लौं ॥ ॥८॥

सा– अथ चतुर्थः – 'सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञं सुकृतस्य योनौ । देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः' इति । हे ˇहोतः, होमनिष्पादकाग्ने, ˇचिकित्वान् अभिज्ञस्त्वं ˇस्वे ˇउ ˇलोके स्वकीय एव स्थाने उत्तरवेदिरूपे ˇसीद उपविश । ˇयज्ञं च मे ˇसुकृतस्य ˇयोनौ पुण्यकर्मणो योग्यस्थाने ˇसादय स्थापय । देवानवितुं तर्पयितुं वेति कामयत इति ˇदेवावीः देवप्रियः । तादृशस्त्वं ˇदेवान् ˇहविषा ˇयजासि पूजयसि । किं च– हे ˇअग्ने, त्वं ˇयजमाने दीर्घायुः ˇधाः स्थापय ॥७॥

आ– 'सीद होतः' इति । देवश्रवाः । त्रिष्टुबाग्नेयी । हे श्रीभगवन्नग्ने देवानां ˇहोतः, ˇस्वे ˇउ एव ˇलोके स्वकीय एव लोके कृष्णाजिने ˇचिकित्वान् परिदृष्टकारी त्वं स्वमधिकारं जानन् ˇसीद आसीद । ˇसादय ˇयज्ञं ˇसुकृतस्य कर्मणः ˇयोनौ स्थाने कृष्णाजिने । "कृष्णाजिनं

4. P1 त्वमेव for तमेव
19. S2 °कर्मणोपयोग्य° for °कर्मणो योग्य°; S2 om. अवितुं तर्पयितु
22. H2 om. श्री°
23. M3 °दृष्टकरित्वं स्वम्; H3 °दुष्टकरित्वं त्वम्; H2 °दुष्टकारि त्वम् corrected by us as दृष्टकारी त्वं स्वम°
24. H2 om. सीद

मृत्खननमन्त्राः]

वै सुकृतस्य योनिः " (शब्रा ६·४·२·६) इति श्रुतेः । अतः कृष्णाजिने यज्ञं सादय । छान्दसो दीर्घः । आसादय स्थापय । यज्ञे विस्तार्यमाणे अवघातः पेषणं सोमनिधनादिकं च कृष्णाजिने भवतीत्येतदभिप्रायेणैतदभिहितम् । हे श्रीभगवन्नग्ने, यतस्त्वं देवावीः देवानामवनशीलः तर्पणशीलश्च, अतः देवान् हविषा यजासि । छान्दसमेतत् । तत् त्वां पुनः प्रार्थयामि । हे श्रीभगवन्नग्ने, यजमाने बृहत् महत् वयः महदायुष्यं धाः धेहि ॥८॥

नि होता॑ होतृ॒षद॑ने॒ विदा॑नस्त्वे॒षो दी॑दि॒वाँ अ॑सदत् सु॒दक्षः॑ ।
अद॑ब्धव्रतप्रमति॒र्वसि॑ष्ठः सहस्रंभ॒रः शुचि॑जिह्वो अ॒ग्निः ॥९॥

नि । होता॑ । हो॒तृ॒षद॑ने । हो॒तृ॒सद॒न॒ इति॑ हो॒तृ॒ऽसद॑ने । वि॒दा॑नः ।
त्वे॒षः । दी॒दि॒वानिति॑ दी॒दि॒ऽवान् । अ॒स॒द॒त् । सु॒द॒क्ष इति॑ सु॒ऽद॒क्षः॑ ।
अद॑ब्धव्रतप्रमति॒रित्यद॑ब्धव्रतऽप्रमतिः । वसि॑ष्ठः ।
स॒ह॒स्रं॒भ॒र इति॑ स॒ह॒स्रं॒ऽभ॒रः । शुचि॑जिह्व॒ इति॑ शुचि॑ऽजिह्वः । अ॒ग्निः ॥ ग्युं ॥९॥

सा– अथ पञ्चमः – 'नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत् सुदक्षः । अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः' इति । होतृषदने होमनिष्पादकस्य योग्यस्थाने उत्तरवेदिरूपे अग्निः नि नितराम् असदत् समीपे स्थितवान् । कीदृशोऽग्निः ? होता देवानामाह्वाता विदानः स्थानाभिज्ञः । त्वेषः दीप्तिमान् । दीदिवान् देवेभ्यो हविषो दाता । सुदक्षः कुशलः । अदब्धव्रतप्रमतिः । अहिंसिते कर्मणि प्रकृष्टा मतिर्यस्य सः तथाविधः । वसिष्ठः अतिशयेन वासयिता । सहस्रसंख्याकानि हवींषि पोषयतीति सहस्रंभरः । शुचिः शुद्धा होमयोग्या जिह्वा ज्वाला यस्यासौ शुचिजिह्वः ॥९॥

आ– स्थापयति– 'नि होता' इति । गृत्समदः । त्रिष्टुबाग्नेयी । 'नि होता' इति । होता यस्मिन् सीदति तद्धोतृषदनम् । तस्मिन् होतृषदने स्थाने विदानः स्वमधिकारं जानानः । त्वेषः । त्विष दीप्तौ । दीप्तप्रज्ञः । दीदिवान् देदीव्यमानः । सुदक्षः साधु क्षिप्रकारी । अदब्धव्रतप्रमतिः अदब्धम् अनुपहिंसितं व्रतम् आज्ञारूपं कर्म च प्रकृष्टा च मतिर्यस्य स

2. H3 विसार्यमाणे for विस्तार्यमाणे; H2–3 M3 अयं वातः पोषणं for अवघातः पेषणं; M3 °सिद्धादिकं for °निधनादिकं
3. H2–3 om. श्री°; M3 after भगवन् adds बृहती
5. H2 om. श्री°
16. P1 om. सः
18. H2–3 स्थापयेति for स्थापयति
20. M3 देदीप्यमानः for देदीव्यमानः
21. H2–3 after प्रकृष्टा om. च

तथाविधः । [v]वसिष्ठः श्रेष्ठश्च । सहस्रं भरतीति [v]सहस्रंभरः । शुचयः शुद्धाः दीप्ताश्च जिह्वाः यस्य सः [v]शुचिजिह्वः । एवंविधः स श्रीभगवान् [v]अग्निः त्वं [v]नि [v]असदत् निषण्णः उपविष्टो भव ॥९॥

सꣳ सीद॑स्व म॒हाँ३ अ॑सि॒ शोच॑स्व दे॒व॒वीत॑मः ।
वि धू॒मम॑ग्ने अ॒रु॒षं मि॑येध्य सृ॒ज प्र॑शस्त द॒र्श॒तम् ॥१०॥(३)॥

सम् । सी॒द॒स्व॒ । म॒हान् । अ॒सि॒ । शोच॑स्व । दे॒व॒वीत॑म॒ इति॑ दे॒व॒ऽवीत॑मः ।
वि । धू॒मम् । अ॒ग्ने॒ । अ॒रु॒षम् । मि॒ये॒ध्य॒ ।
सृ॒ज । प्र॒श॒स्तेति॑ प्रऽशस्त । द॒र्श॒तम् ॥ च्युं ॥१०॥(३)॥

सा– अथ षष्ठः – 'सꣳ सीदस्व महाँ३ असि शोचस्व देववीतमः । वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम्' इति । हे [v]अग्ने, त्वमस्मिन् पुष्करपर्णे [v]संसीदस्व सम्यगुपविश । त्वमनेकक्रतुहेतुत्वात् [v]महान् [v]असि । देवान् वेति गच्छतीति देववीः । अतिशयेन देववीः इति [v]देववीतमः । तादृशस्त्वं [v]शोचस्व दीप्यस्व । हे [v]मियेध्य मेधार्ह [v]प्रशस्त उत्कृष्टाग्ने, [v]दर्शतं दर्शनीयम् [v]अरुषम् आरोषणमत्युग्रं [v]धूमं विशेषेण [v]सृज ॥१०॥

[इति द्वादशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

आ– 'सꣳ सीदस्व' इति । कण्वः आग्नेयी बृहती । हे भगवन् [v]अग्ने, मेध्य यतस्त्वं [v]महान् [v]असि अतस्त्वं [v]संसीदस्व संगत्य सीदस्व । यतस्त्वं [v]देववीतमः देवतानां तर्पयितृतमः अतस्त्वं [v]शोचस्व दीप्यस्व । 'वि धूममग्ने अरुषं मियेध्य सृज' । हे श्रीभगवन् [v]अग्ने । मेध्य इति प्राप्ते [v]मियेध्य इति छान्दसं रूपम् । मेधार्ह हे यज्ञिय, [v]अरुषम् अरोचनं [v]धूमं [v]विसृज

1. H2–3 om. सहस्रं भरतीति
2. M3 om. सः; M3 H2 स्व, H3 स्वर् for त्वं
10. S2 om. सं; P1 °क्रतु° for °क्रतु°; S2 om. °हेतु°
11. S2 देवावीः for both देववीः
12. P1 with markings. above मियेध्य ins. on the margin मेध्येति प्राप्ते छान्दसो विप्रकर्षः ।
15. M3 om. हे भगवन् अग्ने ... सृज (L 17)
16. H2–3 स्वंगत्या for संगत्य
18. B1 om. पिण्डमभि (vsk 12.3.4) ... छान्दसं रूपम्; M2 H2–3 मेधाहि for मेधार्ह; M3 यज्ञ for यज्ञिय; M3 H2–3 B1 भार्ष for अरुषं; B1 घनं for धूमं ।

मृदाहरणमन्त्राः]

परित्यज । हे प्रशस्तलक्षणसंपन्न, हे श्रीभगवन्नग्ने, दर्शतं दर्शनीयम् । उत्तरमाहुतिपरिणामरूपं दर्शनीयमिति शेषः ॥१०॥

[इति द्वादशेऽध्याये तृतीयोऽनुवाकः ॥]

[अथ चतुर्थोऽनुवाकः]

तृतीयेऽनुवाके मृत्खननमन्त्रा उक्ताः । चतुर्थे मृदाहरणमुच्यते ॥

अपो देवीरुप सृज मधुमतीरयक्ष्माय प्रजाभ्यः ।
तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥१॥

अपः । देवीः । उप । सृज ।
मधुमतीरिति मधुऽमतीः । अयक्ष्माय । प्रजाभ्य इति प्रऽजाभ्यः ।
तासाम् । आस्थानादित्याऽस्थानात् । उत् । जिहताम् ।
ओषधयः । सुपिप्पला इति सुऽपिप्पलाः ॥ त्रीं ॥१॥

कात्यायनः – "अपः श्वभ्रेऽवनयत्यपो देवीरिति" (काश्रौ १६·३·२) इति । अवटे उदकान्यासिञ्चेत् । पाठस्तु– 'अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः । तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः' इति । हे अध्वर्यो, त्वं देवीः देवनशीला अपः उप सृज अस्मिन्नवटप्रदेशे आसिञ्च । कीदृशीरपः ? मधुमतीः मधुररसोपेताः । किमर्थम् ? अयक्ष्माय प्रजाभ्यः प्रजानामारोग्याय । तासां सिक्तानामपाम् आस्थानात् सुक्षेत्ररूपादस्मात् खननप्रदेशात् सुपिप्पलाः शोभनफलाः ओषधयः आसमन्तात् उज्जिहताम् उत्पद्यन्ताम् ॥१॥

आ– अवटे अप आसिञ्चति– 'अपो देवीः' इति । सिन्धुद्वीपः । आपी न्यङ्कुसारिणी बृहती । 'वि धूममग्ने' इत्यानन्तर्यात् अत्र कर्तृत्वेनाग्निर्विवक्ष्यते । द्यौर्वा । प्रजाभ्यः, अत्र विभक्तिव्यत्ययः, प्रजानाम् । अयक्ष्माय, यक्ष्मा व्याधिः, अयक्ष्मार्थम् । 'मधुमतीर्देवीरपः उप सृज' इति संबन्धः । देवीः देवनादिगुणयुक्ताः मधुमतीः रसवतीः वृष्टिरूपाः अपः उपसृज

---

1. H2 प्रशस्तदर्शनसुलक्ष्मण°; H3 प्रशस्तदर्शन° for प्रशस्तलक्षण°;
   H2–3 M3 before दर्शनीयं add दर्शनं; B1 after दर्शनीयम् ins. इत्यतः

14. P1 after अध्वर्यो adds अग्ने भवन्

19. M3 H2 विचक्ष्यते, B1 विवक्षते for विवक्ष्यते; H3 om. द्यौर्वा ... मधुमतीः (L. 20)

21. M3 देव° for देवनादि°; M3 om. रसवतीः ... सुपिप्पलाः (P. 92. L. 2)
    H3 सारस्वतीः for रसवतीः

निक्षिप । तासां भूमिगतानामपाम् आस्थानात् अपां रससंबन्धितया अपां रसं सिक्तसुक्षेत्रलक्षणस्थानात् सुपिप्पलाः । सु सुष्ठु सुप्पिपलं फलं यासामोषधीनां ताः सुपिप्पलाः । ताः फलपाकान्ताः ओषधयः शाल्यादयः उज्जिहताम्, ओहाङ् गतौ, उद्गच्छन्तु ॥१॥

सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम् ।
यो देवानां चरसि प्राणथेन कस्मै देव वषळस्तु तुभ्यम् ॥२॥

सम् । ते । वायुः । मातरिश्वा । दधातु ।
उत्तानायाः । हृदयम् । यत् । विकस्तमिति विऽकस्तम् ।
यः । देवानाम् । चरसि । प्राणथेन । कस्मै । देव । वषट् । अस्तु । तुभ्यम् ॥ गो॥ २॥

सा – कात्यायनः – "सं त इति जलमवक्षिपति" (काश्रौ १६·३·३) इति । पाठस्तु– 'सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम् । यो देवानां चरसि प्राणथेन कस्मै देव वषळस्तु तुभ्यम्' इति । हे पृथिवि, उत्तानायाः ऊर्ध्वाभिमुखत्वेन अवस्थितायाः ते तव हृदयं हृदयसदृशं खननस्थानं विकस्तम् अवटरूपेण विकसितं तत्स्थानं वायुः संदधातु । पूर्वोक्तेन जलप्रक्षेपणेन तृणादिपूरणेन वा वायुर्यथा पूर्वं तथा सम्यक् करोतु । कीदृशो वायुः ? मातरिश्वा मातर्यन्तरिक्षे सर्वप्राणिनां नियन्तरि परिच्छेदकारिणि शेते तिष्ठति इति मातरिश्वा । हे देव द्योतनादिगुणयुक्त वायो, यस्त्वं देवानामग्न्यादीनां प्राणथेन प्राणभावेन चरसि व्यवहरसि, तस्मै प्रजापतिरूपाय तुभ्यं वषट् अस्तु वषट्कृतं भवतु ॥२॥

आ– वायुना संदधाति– 'सं ते वायुः' इति । अर्धः पार्थिवोऽर्धो वायव्यः । एवं द्विदेवत्या त्रिष्टुप् । हे पृथिवि, उत्तानायाः उन्मुखतया विस्तृतायाः ते तव हृदयम् अवटरूपेण

1. B1 आ आस्थानात् अपां रससंबान्धितया । अपां रसं पृक्तसुक्षेत्रलक्षणस्थानात्;
H3 [... ...] अपसंबद्धितया [... ...] अपां रसं पृक्तसुक्षेत्र दू [?]
कलक्षणस्थानात् for आस्थानात् ... ... स्थानात् [L. 2]
2. B1 om ताः फलपाकान्ताः (L. 3)
10. P1 देवा for देव
11. S2 °मुखेन for °मुखत्वेन
13. P1 after मातरिश्वा ins. वयति वर्द्धते गच्छतीति वा मातरिश्वा । टुओश्वि गतिवृद्धयोः ।
15. P1 after प्राणथेन ins. थकारो भावप्रत्ययार्थकः
16. S2 om. °कृतं
17. M3 अर्थः पार्थिवो वायव्यः, H2 अन्धः पार्थिवोऽधो वाषुपव्ययव्यः, H3 अन्धः पार्थिवोऽधो वायव्यः– all corrupt, for अर्धः पार्थिवोऽर्धः वायव्यः
18. M3 om. द्वि°; B1 after विस्तृतायाः adds सत्याः

मृदाहरणमन्त्राः]

विकस्तं विकासितम् । एतद्वायुरूपमुच्यते– 'यः देवानां चरसि प्राणथेन'। यः च त्वं देवानाम् अग्न्यादीनां वागादीनां च देवानां प्राणथेन । थकारो भावप्रत्ययः । प्राणत्वेन चरसि । हे वायो, कस्मै । कः प्रजापतिः । कस्मै प्रजापतये तुभ्यम् इयं पृथिवी वषट् अस्तु वषट्कृता भवतु ॥२॥

सुजातो ज्योतिषा सह शर्म वरूथमासदत् स्वः ।
वासो अग्ने विश्वरूपꣳ सं व्ययस्व विभावसो ॥३॥

सुजात इति सुऽजातः । ज्योतिषा । सह ।
शर्म । वरूथम् । आ । असदत् । स्वरिति स्वः ।
वासः । अग्ने । विश्वरूपमिति विश्वऽरूपम् ।
सम् । व्ययस्व । विभावसो इति विभाऽवसो ॥ दुं ॥३॥

सा– कात्यायनः – "पुरस्तात् पश्चाद्दक्षिणत उत्तरतश्चास्तीर्णयोरन्तानुद्गृह्णाति सुजात इति" (काश्रौ १६·३·५) इति । पूर्वादिचतुर्दिक्षु प्रसारितकृष्णाजिनपुष्करपर्णयोरन्तानूर्ध्वाभिमुखं समूहेत । पाठस्तु– 'सुजातो ज्योतिषा सह शर्म वरूथमासदत् स्वः' इति । सुजातः सुष्ठूत्पन्नोऽग्निः ज्योतिषा स्वकीयेन तेजसा सह शर्म सुखं यथा भवति तथा स्वः स्वर्गसदृशं वरूथं कृष्णाजिननिर्मितं गृहम् आसदत् आसीदतु ॥

कात्यायनः – "त्रिवृता मुञ्जयोक्त्रेणोपनह्यति वासो अग्न इति" (काश्रौ १६·३·५) इति । त्रिगुणेन मुञ्जनिर्मितेन दाम्ना बध्नीयात् । पाठस्तु– 'वासो अग्ने विश्वरूपꣳ संव्ययस्व विभावसो' इति । हे विभावसो । विभा दीप्तिरेव वसु धनं यस्यासौ विभावसुस्तादृश हे अग्ने, विश्वरूपꣳ बहुप्रकाररूपं वासः कृष्णाजिनरूपं वस्त्रं संव्ययस्व सम्यक् परिधानं कुरु ॥३॥

आ– आस्तीर्णयोरन्तानुद्गृह्णाति– 'सुजातो ज्योतिषा' इति । आग्नेय्यनुष्टुप् । ज्योतिषा सह संयुक्तः शोभनतया सुजातः अयमग्निः वरूथं वरणीयं स्वः स्वर्गाख्यं शर्म शरणं गृहम् आसदत् आसीदत् । हे अग्ने, हे विभावसो, विश्वरूपं विचित्ररूपं वासः वस्त्रं संव्ययस्व । व्येञ् संवरणे । परिधत्स्व ॥३॥

उदु तिष्ठ स्वध्वरावा नो देव्या धिया ।
दृशे च भासा बृहता सुशुक्वनिराऽग्ने याहि सुशस्तिभिः ॥४॥

1. M3 om. यः च त्वं, H2 om. त्वं
12. S2 om. सुजातः
13. P1 चतुर्थं° for वरूथं
14. P1 before गृहं adds वरूथं
17. P1 om. एव; S2 तादृशास्त्वं for तादृश हे
21. M3 om. आसीदत् ; M3 वरूथं; H3 वयूं for वस्त्रं

उत् । ऊँ इत्यूँ । तिष्ठ । स्वध्वरेति सुऽअध्वर । अव । नः । देव्या । धिया ।
दृशे । च । भासा । बृहता । सुशुक्वनिरिति सुऽशुक्वनिः ।
आ । अग्ने । याहि । सुशस्तिभिरिति सुशस्तिऽभिः ॥ दैं ॥४॥

सा– कात्यायनः – "उत्तिष्ठति पिण्डमादायोदु तिष्ठेति" (काश्रौ १६·३·७) । मृत्पिण्डं स्वीकृत्योत्तिष्ठेत् । पाठस्तु– 'उदु तिष्ठ स्वध्वरावा नो देव्या धिया । दृशे च भासा बृहता सुशुक्वनिराऽग्ने याहि सुशस्तिभिः' इति । हे ᵛस्वध्वर सुष्ठु यागविधारक ᵛअग्ने, ᵛउत् ᵛउ ᵛतिष्ठ उत्तिष्ठैव । उत्थाय च ᵛनः अस्मान् ᵛदेव्या देवनस्वभावया क्रीडापरया [ᵛधिया] बुद्ध्या ᵛअव पालय । हे अग्ने, ᵛबृहता ᵛभासा प्रौढेन तेजसा ᵛसुशुक्वनिः सुष्ठु शुचां रश्मीनां वनिर्वनिता संभक्ता यः सोऽयं सुशुक्वनिः । तादृशः सन् ᵛसुशस्तिभिः शोभनकीर्तिभिः सह ᵛदृशे सर्वैः प्राणिभिर्द्रष्टुम् ᵛआ ᵛयाहि आगच्छ ॥४॥

आ– अथैनमादायोत्तिष्ठति– 'उदु तिष्ठ' इति । आग्नेयी पथ्या बृहती । हे ᵛस्वध्वर हे सुयज्ञ, ᵛउत्तिष्ठ, ᵛउ अपि च तत उत्थाय च देव्या देवसंबन्धिन्या ऐश्वर्ययुक्तया ᵛधिया बुद्ध्या ᵛनः अस्मान् ᵛअव पालय । छान्दसो दीर्घः । किं च हे श्रीभगवन् ᵛअग्ने, ᵛनः अस्माकं ᵛदृशे दर्शनाय ᵛच ᵛबृहता महता ᵛभासा प्रकाशेन ᵛसुशुक्वनिः । शुच दीप्तावित्यस्य सुपूर्वस्य क्वनिबन्तस्य रूपम् । साधु शुचा संदीप्तः । ᵛसुशास्तिभिः साधु शिंक्षितैरश्वैः ᵛआयाहि आगच्छ ॥४॥

ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥५॥

ऊर्ध्वः । ऊँ इत्यूँ । सु । नः । ऊतये । तिष्ठ । देवः । न । सविता ।
ऊर्ध्वः । वाजस्य । सनिता । यत् । अञ्जिभिरित्यञ्जिऽभिः ।
वाघद्भिरिति वाघतऽभिः । विह्वयामह इति विऽह्वयामहे ॥ त्रें ॥५॥

सा– कात्यायनः – "ऊर्ध्वबाहुः प्राञ्चं प्रगृह्णात्यूर्ध्व ऊ षु ण इति" (काश्रौ १६·३·८) इति । बाहुद्वयमूर्ध्वाभिमुखे कृत्वा मृत्पिण्डं प्रागञ्चनं स्वीकुर्यात् । पाठस्तु– 'ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो

4. S2 उत्तिष्ठेत् for उत्तिष्ठति
6. P1 पाहि for याहि
8. S2 प्रौढ° for प्रौढेन
11. H2 om. उ अपि च; H3 om. उ; B1 अथ for ततः; B1 after च adds यया
12. H2–3 om. बुद्धया
13. B1 H3 after च add भासा; B1 H3 om. भासा
22. S2 पूर्वाभि° for ऊर्ध्वाभि°

मृदाहरणमन्त्राः]

न सविता । ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ' इति । हे अग्ने, नः अस्माकम् ऊतये रक्षणाय ऊर्ध्वः ऊ षु तिष्ठ ऊर्ध्वं एव सन्नवस्थितो भव । क इव ? ' देवो न सविता ' । यथा सविता देवः ऊर्ध्वः सन् नः अस्मान् रक्षति तद्वत् । यस्त्वम् ऊर्ध्वः सन् वाजस्य सनिता अन्नस्य दाता भव । यत् यस्मात् कारणात् अञ्जिभिः मन्त्राभिव्यञ्जकैः वाघद्भिः हव्यवाकैर्ऋत्विग्भिः विह्वयामहे वयमेवंविधं त्वामाह्वयामः । तस्मादूर्ध्वं एव तिष्ठेति पूर्वत्रान्वयः ॥५॥

आ– अथैनमित ऊर्ध्वं प्राञ्चं गृह्णाति– ' ऊर्ध्व ऊ षु णः ' इति । उपरिष्टात् बृहती आग्नेयी । ऊर्ध्व ऊ सु नः । ऊ एव सु सुष्ठु नः अस्माकम् ऊतये अवनायैव । हे अग्ने, त्वम् ऊर्ध्वः तिष्ठ सुशोभनतया उपरिभागवासी तिष्ठ । सोपमानं तदेव विशिनष्टि-- देवो न सविता । नकार उपमार्थीयः । वाजस्य अन्नस्य सनिता संभक्ता ऊर्ध्वः ऊर्ध्वस्थितः सविता देवः इव तत्र तिष्ठेति संबन्धः । ' यदञ्जिभिर्वाघद्भिः ' । यत् यस्मात् अञ्जिभिः अभिव्यञ्जकैः वाघद्भिः रश्मिभिः उपलक्षितं त्वां विह्वयामहे विविधमाह्वयामः ॥५॥

स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रः शिशुः परि तमांस्यक्तून् प्र मातृभ्यो अधि कनिक्रदद्गाः ॥६॥

सः । जातः । गर्भः । असि । रोदस्योः ।
अग्ने । चारुः । विभृत इति विऽभृतः । ओषधीषु ।
चित्रः । शिशुः । परि । तमांसि । अक्तून् ।
प्र । मातृभ्य इति मातृऽभ्यः । अधि । कनिक्रदत् । गाः ॥ ञ्रौं ॥६॥

सा– कात्यायनः – " अश्वप्रभृतीनभिमन्त्रयते स जातः स्थिरो भवेति " (काश्रौ १६.३.९) इति । ' स जातः ' इति मन्त्रत्रयेण त्रीन् अश्वरासभाजान् क्रमेण अभिमन्त्रयेत् । तत्र प्रथममन्त्रपाठः – ' स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु । चित्रः शिशुः परि तमांस्यक्तून् प्र मातृभ्यो अधि कनिक्रदद्गाः ' इति । हे अग्ने, सः त्वं रोदस्योः द्यावापृथिव्योः गर्भः गर्भरूपः सन् इदानीं जातः असि । कीदृशस्त्वम् ? चारुः पूजनीयः ओषधीषु विभृतः पुरोडाशलक्षणासु होतव्यविषयासु

2. P1 after न ins. नकार उपमार्थः
4. S2 मात्राभिर्व्यञ्जकैः for मन्त्राभिव्यञ्जकैः
8. B1 सोमपानदेव, H2–3 पे सापमानं तदेव for सोपमानं तदेव
9. B1 om. ऊर्ध्वस्थितः
11. J2–3 आह्वयामहे for आह्वयामः
18. S2 °प्रभृतिभिर् for °प्रभृतीन्
19. P1 सुजात इति for स जात इति
21. S2 om. गर्भरूपः
22. S2 om. पुरोडाश ...... यद्वा (P. 96, L. 1)

निमित्तभूतासु विहृतो विहरणविषयं प्रापितः । यद्वा– पूज्यमानश्चौषधीषु दृश्योऽग्निरूपः सन् विशेषेण पोषितः । चित्रः नानावर्णाभिर्ज्वालाभिर्विविधरूपः, इदानीमुत्पन्नत्वात् शिशुः । अक्तून् इति लिङ्गव्यत्ययः । अक्तूनि रात्र्युपलक्षितानि तमांसि परि परिहरन् । तादृशस्त्वं मातृभ्यः ओषध्यर्थम् अधि कनिक्रदत् अधिक्रन्दन् प्र गाः प्रकर्षेण गच्छ । यथा लोके शिशुर्मातरमुद्दिश्य क्रन्दन्नादरेण गच्छति तद्वदित्यर्थः ॥६॥

आ– अश्वमभिमन्त्रयते– ' स जातः ' इति । त्रिष्टुप् । अग्नीकृत्याश्वं स्तौति । हे श्रीभगवन् अग्ने, यस्त्वं रोदस्योः द्यावापृथिव्योः गर्भः इव जातः असि । हे अग्न्यात्मकाश्व, हे अग्ने, चारुः विभृतः ओषधीषु घासादिरूपेण तव विषयभूतेषु सत्सु चारुर्विभृतः अतिचारुरूपं धृतवानसि । अतश्चारुर्विभृतस्त्वमसि । चित्रः विचित्रः शिशुः प्र मातृभ्यः । विभक्तिव्यत्ययः । प्र मातापित्रोः द्यावाभूम्योः शिशुः । अक्तून् । लिङ्गव्यत्ययः । अक्तुशब्दो रात्रिवचनः । रात्र्युपलक्षितानि अक्तूनि तमांसि परि प्रति अगम्यमानं रात्र्यन्धकारं दृष्ट्वा अधि कनिक्रदत् अत्यर्थं हेषितशब्दं कुर्वन् गाः निवासस्थानं प्रति गच्छेत्यर्थः । अथवा इमं मन्त्रं श्रुतिः स्वयमेव व्याचष्टे– ' सोऽश्वमभिमन्त्रयते । स जातो गर्भो असि रोदस्योरितीमे वै द्यावापृथिवी रोदसी तयोरेष जातो गर्भोऽग्ने चारुर्विभृत ओषधीष्विति सर्वासु ह्येष चारुर्विभृत ओषधिषु चित्रः शिशुः परि तमाꣳस्यक्तूनिति चित्रो वा एष शिशुः परेण तमाꣳस्यक्तूनति रोचते प्र मातृभ्यो अधि कनिक्रदद्गा इत्योषधयो वा एतस्य मातरस्ताभ्य एष कनिक्रदत् प्रैति तदश्वे वीर्यं दधाति " (शब्रा ६·४·४·२) इति ॥६॥

1. P1 om. पूज्यमानश्च; S2 पूज्यमानस्य; for पूज्यमानश्च; P1 दशाग्नि° for दृश्योऽग्नि°
2. P1 with markings above अक्तून् ins. on the margin:– अक्तुशब्दो रात्रिवचनः
3. P1 after परि ins. परिरित्र रात्रवचनः
4. P1 after गच्छ ins. अक्तून् रात्रिसंबन्धीनि तमांसि वर्जयन् मातृभ्य ओषधिवनस्पतिभ्यः सकाशादाक्रदन् (कनिक्रदत्) गः प्रयाहीति शेष इति भाष्यान्तरम् ।
6. H2–3 अति°; M3 अनि° for अग्नी°; B1 अग्निं for अश्वं
8. B1 after ओषधिषु add ओषधीवनस्पातिषु
9. H2–3 om. अतः; H2–3 om. विचित्रः
11. B1 om. परि
12. B1 हर्षित; M3 हे भेत°; H2 महहेत°; H3 हेहेत° all wrong for हेषित; M3 B1 आगच्छ for गाः; M3 B1 ins. स्व° before निवास°; H2–3 om. प्रति
13. B1 om. वै
15. B1 विरोचते, H3 अपि रोचते for अतिरोचते (L. 16)
17. H2 दधातु for दधाति

मृदाहरणमन्त्राः]

स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ।।७।।

स्थिरः । भव । वीड्वङ्ग इति वीळुऽअङ्गः । आशुः । भव । वाजी । अर्वन् ।
पृथुः । भव । सुषदः । सुसद इति सुऽसदः । त्वम् ।
अग्नेः । पुरीषवाहणः । पुरीषवाहन इति पुरीषऽवाहनः ।। द्व्यूं ।।७।।

सा– अथ द्वितीयः – ' स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ' इति । अग्नेः हेतुभूतं पुरीषं यो गर्दभो वहति तादृश हे गर्दभ, इयर्ति गच्छतीति [अर्वा हे] ᵛअर्वन् गमनकुशलः ᵛत्वं ᵛस्थिरः स्खलनरहितः ᵛवीड्वङ्गः दृढकायः ᵛभव । ᵛआशुः वेगवान् ᵛवाजी अन्नहेतुश्च ᵛभव । ᵛपृथुः विस्तीर्णपृष्ठः ᵛसुषदः ᵛअग्नेः सुखासनश्च ᵛभव । पुरीषशब्देन पांसुरूपा मृदुच्यते । तां वहतीति ᵛपुरीषवाहणः तादृशश्च भव ।।७।।

आ– रासभमभिमन्त्रयते– ' स्थिरो भव ' इति । रासभदेवत्या उष्णिगनुष्टुब् वा । हे ᵛअर्वन्, ᵛस्थिरः ᵛभव स्थातव्यो निश्चलो भव । अत्र अश्ववाचकाः शब्दाः स्तुत्यर्थं रासभे प्रयुक्ताः । ᵛवीड्वङ्गः च दृढाङ्गश्च भव । ᵛआशुः ᵛभव अतिशीघ्रगमनो भव । ᵛवाजी अन्नवान् भव । अर्वन् अरणवन् । अर्वा गतिविशेषवान् भव । तत्संबोधनम् अर्वन् । ᵛपृथुः पृथुलः ᵛभव । ᵛसुषदः शोभनसदवान् भव । यतस्त्वम् ᵛअग्नेः ᵛपुरीषवाहणः । अग्नेः पुरीषं सुवर्णमलंकारत्वेन वहतीति पुरीषवाहनः । पुरीषं सैकतं भवतीति पुरीषवाहनत्वं रासभस्य प्रसिद्धम् ।।७।।

शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवी अभि शोचीर्माऽन्तरिक्षं मा वनस्पतीन् ।।८।।

शिवः । भव । प्रजाभ्य इति प्रऽजाभ्यः । मानुषीभ्यः । त्वम् । अङ्गिरः ।
मा । द्यावापृथिवी इति द्यावापृथिवी । अभि । शोचीः ।
मा । अन्तरिक्षम् । मा । वनस्पतीन् ।। ज्युं ।।८।।

8. S2 after °रहितः adds कीदृशः; S2 om. भव
9. S2 om. second भव
12. H2–3 स्तुत्यर्थाः for स्तुत्यर्थं
13. H2–3 M3 om. दृढाङ्गश्च
15. B1 °सवनवान् for °सदवान्; M3 स्वर्णम्, H3 वर्णम् for सुवर्णम्°

[मृदाहरणमन्त्राः

सा– अथ तृतीयः – ' शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवी अभि शोचीर्मान्तरिक्षं मा वनस्पतीन् ' इति । अङ्गिरोभिर्ऋषिभिः पूर्वसंपादितत्वात् अङ्गसौष्टवाद्वा अयमग्निरङ्गिराः । "[अङ्गिरा वा अग्निर्] आग्नेयोऽजः" (शब्रा ६·४·४·४) इत्यभिधानात् । हे अङ्गिरः मे त्वं मानुषीभ्यः मनोः संबन्धिनीभ्यः प्रजाभ्यः शिवः शान्तः भव । किं च त्वं द्यावापृथिवी द्यावापृथिव्यौ अभिलक्ष्य मा शोचीः शोकं संतापं मा कार्षीः । तथा अन्तरिक्षं मा अभि शोचीः । तथा वनस्पतीन् मा अभि शोचीः ॥८॥

आ– अजमभिमन्त्रयते– ' शिवो भव ' इति । अजदेवत्याऽनुष्टुब् बृहती वा । हे अज, प्रजाभ्यः अर्थाय शिवः शान्तः भव । मानुषीभ्यः मनुष्यसंबन्धिनीभ्यः अर्थाय हे अङ्गिरः । अङ्गिरा इत्यग्निः । " आग्नेयोऽजः " (शब्रा ६·४·४·४) इत्यभिधानात् । मा द्यावापृथिवी अभिशोचीः मा अभिसंतापयेः संतापं मा कार्षीः । अन्तरिक्षं च मा अभिशोचीः त्वं मा संतापयेः । वनस्पतीन् त्वं मा अभिशोचीः मा संतापयेः ॥८॥

प्रैतु वाजी कनिक्रदन्नानदद्रासभस्पत्वा ।
भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ॥९॥

प्र । एतु । वाजी । कनिक्रदत् । नानदत् । रासभः । पत्वा ।
भरन् । अग्निम् । पुरीष्यम् । मा । पादि । आयुषः । पुरा ॥ ष्यं ॥९॥

सा– कात्यायनः – " धारयत्येषामुपरि पिण्डमनुपस्पृशन् प्रैतु वाजी वृषाग्निमित्यश्वखरयोः " (काश्रौ १६·३·१०) इति । अश्वादीनां त्रयाणामुपरिभागे मृन्मयपिण्डस्पर्शनमकुर्वन् अध्वर्युर्धारयेत् । तत्राश्वगर्दभयोरुपरि ' प्रैतु वाजी, वृषाग्निम् ' इत्येतन्मन्त्रद्वयेन धारयेत् । तत्र प्रथममन्त्रपाठस्तु– ' प्रैतु वाजी कनिक्रदन्नानदद्रासभस्पत्वा । भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ' इति । अयं वाजी तुरगः प्रैतु प्रकर्षेण गच्छतु । किं कुर्वन् ? कनिक्रदत् अत्यन्तं हेषितं कुर्वन् । रासभः च प्रैतु । नानदत् गर्दभरटितेन सर्वा दिशोऽनुनादयन् । पत्वा पतनशीलः । पुरीष्यम् अग्निं दाहकं भरन् धारयन्नपि आ कर्मसमाप्तेः स्वकीयात् आयुषः पुरा मा पादि अपमृत्युना मृतो मा भूत् ॥९॥

3. P1 om. आग्नेयो ... °धानात्
6. P1 om. अभि°
7. M3 °दैवत्या for °देवत्या
8. B1 शोभनो for शान्तः
10. B1 °संतापय for °संतापयेः
11. B1 °संतापय for °संतापयेः
18. S2 अश्वा° for अश्व°; S2 एतद्द्वयेन मन्त्रेण for एतन्मन्त्रद्वयेन
20. S2 °नादितेन for °रटितेन
21. S2 om. सर्वा दिशोऽनु°; S2 om. धारयन्

मृदाहरणमन्त्राः]

आ– 'प्रैतु वाजी' इति वाजिदेवत्याऽनुष्टुप् । वाजी अश्वः कनिक्रदत् अत्यर्थं स्वयं ह्रेषितशब्दान् कुर्वन् नानदत् स्वहेषितेन सर्वा दिशो नादयत् प्रकर्षेण एतु आगच्छतु । रासभसाम्येनायमपि रासभः । पत्वा पतनशीलः । पुरीष्यं पशव्यम् अग्निं भरन् धारयन् । 'मा पादि आयुषः पुरा' । आयुषः क्षयात् प्राक् । मा पादीनि माङ्योगान्नाडागमः । मा पादि मा विनश्यतात् ।।९।।

वृषाऽग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम् ।
अग्न आ याहि वीतये ।
ऋतꣳ सत्यमृतꣳ सत्यमग्निं पुरीष्यमङ्गिरस्वद्भरामः ।।१०।।

वृषा । अग्निम् । वृषणम् । भरन् । अपाम् । गर्भम् । समुद्रियम् ।
अग्ने । आ । याहि । वीतये ।
ऋतम् । सत्यम् । ऋतम् । सत्यम् ।
अग्निम् । पुरीष्यम् । अङ्गिरस्वत् । भरामः ।। श्यौं ।।१०।।

सा– अथ द्वितीयः – "वृषाऽग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम्" इति । वृषा वर्षणे सेचने समर्थो गर्दभः वृषणं फलाभिवर्षणसमर्थम् अग्निं भरन् वहन् गच्छन्निति शेषः । कीदृशमग्निम् ? अपां गर्भं मेघस्थानां जलानां मध्ये विद्युद्रूपम् । समुद्रियं समुद्रे वडवाग्निरूपेणोत्पन्नम् ।

कात्यायनः – "अग्न आयाहीत्याहृत्य खरात्" (काश्रौ १६·३·११) इति । गर्दभात् सकाशान्मृत्पिण्डमाहरेत् । 'वीतये' इति मन्त्रशेषः । हे अग्ने, त्वं वीतये प्रजननाद्यर्थम् आयाहि आगच्छ ॥

कात्यायनः – "छागस्य ऋतꣳ सत्यमित्या निधानात्" (काश्रौ १६·३·११) इति । अजस्योपरि खरादाहृतं मृत्पिण्डं धारयन् प्राग् द्वारपर्यन्तादागच्छेयुः । पाठस्तु– 'ऋतꣳ सत्यमृतꣳ सत्यम्' इति । अत्र ऋतसत्यशब्दाभ्यामादित्याग्नी विवक्षितौ । तादृगुभयरूप[मग्नि]मध्याहरामीति शेषः । ऋतꣳ सत्यम् इति पुनर्वचनमादरार्थम् ॥

कात्यायनः – "पुरीषमीक्षते पूर्ववदग्निं पुरीष्यमिति" (काश्रौ १६·३·१३) इति । 'अङ्गिरस्वद्भरामः' इति मन्त्रशेषः । पूर्ववद् व्याख्येयम् ॥१०॥

3. H2 रासभे for रासभ°
4. M3 H2–3 after पादि ins. इति; M3 आयुष्यक्षयात् for आयुषः क्षयात्
13. S2 वीर्येण for वर्षणे
14. S2 कलाभि° for फलाभि°, P1 गच्छेति for गच्छन्निति
18. S2 अभिधारयन् for आ निधानात्
19. S2 भार° for द्वार°

[मृदाहरणमन्त्राः

आ-- 'वृषाऽग्निम्' इति। आग्नेयी महाबृहती। चत्वरोऽष्टका जागतश्च महाबृहती। वृषणं भरन् धारयन् अपां गर्भम् अपां गर्भभूतम्। समुद्रे भवः समुद्रयः [तं] समुद्रियं भरन्। अग्निं वृष सिञ्च। वृष सेचने॥

'अग्न आयाहि' इति। हे श्रीभगवन् अग्ने, आयाहि आगच्छ। वीतये भोगाय। अत्र विभज्य विनियोगः। छागस्योपरि धारयन् जपति– 'ऋतꣳ सत्यम्' इति। ऋतम् अग्निः। सत्यम् आदित्यः। यद्वा – ऋतमादित्यः। सत्यमग्निः। उभयरूपमध्याहरिष्यामीति शेषः। अनद्धापुरुषमीक्षते। अग्निं पुरीष्यम् अङ्गिरस्वत्। पुरीष्यम् अग्निं भरामः इति ॥१०॥

ओष॑धयः॒ प्रति॑ मोदध्वम॒ग्निमे॒तꣳ शि॒वमा॒यन्त॑म॒भ्यत्र॑ यु॒ष्माः ।
व्यस्य॒न् विश्वा॒ अनि॑रा॒ अमी॑वा नि॒षीद॑न्नो॒ अप॑ दु॒र्मतिं॑ ज॑हि ॥११॥

ओष॑धयः। प्रति॑। मो॒द॒ध्व॒म्। अ॒ग्निम्। ए॒तम्।
शि॒वम्। आ॒य॒न्त॒मित्या॒ऽय॒न्त॑म्। अ॒भि। अत्र॑। यु॒ष्माः।
व्यस्य॒न्निति॒ वि॒ऽअस्य॑न्। विश्वाः॑। अनि॑राः। अमी॑वाः।
नि॒षीद॑न्। नि॒सीद॒न्निति॒ नि॒ऽसीद॑न्। नः॒। अप॑। दु॒र्म॒ति॒मिति॒ दुः॒ऽम॒तिम्। ज॒हि॒॥ थ्रैं व् ॥११॥

सा– कात्यायनः – "उत्तरत आहवनीयस्योद्धतावोक्षिते सिकतोपकीर्णे परिवृते प्राग्द्वारे पिण्डं निदधत्योषधय इति" (काश्रौ १६·३·१४) इति। आहवनीयस्योत्तरभागे यस्मिन् देशे मृत्पिण्डो निधीयते तस्मिन् देशे उच्छिष्टादिशङ्कोपेतस्योपरितनतृणाद्युपेतमृद्भागस्यापसारणं कर्तव्यम्। तदेतदुद्धननं कृत्वा उदकेनावोक्ष्य सिकतां प्रसार्य तस्य देशस्य परितः प्रावरणं कृत्वा प्राग्द्वारं कुर्यात्। तस्मिन् द्वारे 'ओषधयः' इति द्वाभ्यां मन्त्राभ्यां मृत्पिण्डं निदध्यात्। तत्र प्रथममन्त्रपाठस्तु– 'ओषधयः प्रति मोदध्वमग्निमेतꣳ शिवमायन्तमभ्यत्र युष्माः। व्यस्यन् विश्वा अनिरा अमीवा निषीदन्नो अप दुर्मतिं जहि' इति। हे ओषधयः, अत्र अस्मिन् देशे युष्माः युष्मानभिमुखीकृत्य आयन्तम् आगच्छन्तं शिवं शान्तम् एतं प्रतीयमानम् अग्निं प्रति मोदध्वम्। हे अग्ने, निषीदन् अस्मिन् अस्मिन् प्रदेशे निविशमानः त्वं विश्वाः, सर्वाः, न विद्यते इरा अन्नं याभिस्ताः अनिराः अनावृष्ट्यादयस्ताः व्यस्यन् निरस्यन्, अमीवा व्याधींश्च निरस्यन् नः अस्माकं दुर्मतिं प्रमादालस्यादियुक्तां बुद्धिम् अपजहि अपनय ॥११॥

1. H2–3 M3 बृहती for महाबृहती
4. M3 om. आगच्छ; M3 om. अत्र ... ... °योगः (L 5)
6. B1 अध्याहरन्ति for अध्याहरिष्यामि
14. P1 उद्धतावेक्षिते for उद्धतावोक्षिते
19. P1 om. हे
20 S2 om. युष्माः
23. S2 om. अपनय

मृदाहरणमन्त्राः]

आ– उपावहरति– 'ओषधयः प्रति' इति । द्वे त्रिष्टुबनुष्टुभौ ओषधिदेवत्ये । हे vओषधयः, vअत्र vयुष्माः युष्मान् vअभि आभिमुख्येन vआयन्तम् आगच्छन्तं vशिवं शान्तरूपम् vएतं प्रतीयमानम् vअग्निं vप्रति vमोदध्वम् । अनेनार्धर्चेन ओषध्यात्मकमग्निमाह– 'व्यस्यन् विश्वा' इति । vविश्वाः सर्वाः vअनिराः । इरा इत्यन्ननाम, इरा न भवन्ति ता अनिराः अनावृष्ट्यादयः ताः vव्यस्यन् । असु क्षेपणे । विक्षिपन् निरस्यन् । vअमीवाः व्याधीन् [च] व्यस्यन् निरस्यन् । vनिषीदन् निविशमानः अस्माकं vदुर्मतिं दुर्विषयाभिमुखीं मतिम् vअपजाहि ॥११॥

ओषधयः प्रति गृभ्णीत पुष्पवतीः सुपिप्पलाः ।
अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासदत् ॥१२॥

ओषधयः । प्रति । गृभ्णीत । पुष्पवतीरिति पुष्पऽवतीः । सुपिप्पला इति सुपिप्पलाः ।
अयम् । वः । गर्भः । ऋत्वियः ।
प्रत्नम् । सधस्थमिति सधऽस्थम् । आ । असदत् ॥ ट्रीं ॥१२॥

सा– अथ द्वितीयः – 'ओषधयः प्रति गृभ्णीत पुष्पवतीः सुपिप्पलाः । अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासदत्' इति । vपुष्पवतीः प्रशस्तपुष्पोपेताः vसुपिप्पलाः शोभनफलोपेताः हे vओषधयः, एनमग्निं vप्रतिगृभ्णीत स्वीकुरुत । vअयम् अग्निः vवः युष्माकम् vऋत्वियः ऋतुकालीनः vगर्भः भूत्वा vप्रत्नं पुरातनं vसधस्थं गर्भयोग्यं स्थानम् vआसदत् प्राप्तवान् ॥१२॥

आ– हे vओषधयः एनमग्निं vप्रतिगृभ्णीत प्रतिगृह्णीत । कथंभूता इति । vपुष्पवतीः पुष्पवत्यः पुष्पसंपन्नाः vसुपिप्पलाः शोभनफलवत्यः ओषधयः अग्निं प्रतिगृह्णीत । यः vअयं vवः युष्माकम् ओषधीनां vगर्भः vऋत्वियः ऋतुषु भवः ऋतव्यः प्राप्तकालः । vप्रत्नं पुराणं शाश्वतिकं vसधस्थं सहस्थितं साधुस्थानम् vआसदत् आगच्छत् । तमेतमग्निम् ओषधयः प्रतिगृह्णीतेति संबन्धः ॥१२॥

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीतौ ॥१३॥(४)॥

3. H2–3 M3 एतत्, B1 एवं नं for एतम्; M2 om. अग्निं
15. P1 with markings above सधस्थं ins. on the margin सहभयं; P1 स्वर्ग° for गर्भ°
16. M3 B1 om. प्रतिगृभ्णीत ..... अग्निं (L 17)
18. M3 ऋत्विक्षु for ऋतुषु
19. B1 सहभुव°; M3 सहभुव° for साधु°

वि । पाजसा । पृथुना । शोशुचानः । बाधस्व । द्विषः । रक्षसः । अमीवाः ।
सुशर्मण इति सुऽशर्मणः । बृहतः । शर्मणि । स्याम् ।
अग्नेः । अहम् । सुहवस्येति सुऽहवस्य । प्रणीतौ । प्रनीता इति प्रऽनीतौ ॥ ठं ॥१३॥(४)॥

सा– कात्यायनः – "वि पाजसेति प्रमुच्यैनम्" (काश्रौ १६.३.१५) इति । एवं मुञ्जयोक्त्रेण बद्धं मृत्पिण्डं विस्रंसेत् । पाठस्तु– 'वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः । सुशर्मणो बृहतः शर्मणि स्यामग्नेरह५ सुहवस्य प्रणीतौ' इति । हे अग्ने, vपृथुना विस्तृतेन vपाजसा बलेन vशोशुचानः अत्यन्तं दीप्यमानस्त्वं vद्विषः शत्रून् vरक्षसः राक्षसान् vअमीवाः रोगांश्च विशेषेण vबाधस्व । vअहं vसुशर्मणः शोभनसुखस्य vबृहतः प्रौढस्य vसुहवस्य सुखेनाह्वातुं शक्यस्य vअग्नेः vप्रणीतौ परिचर्यायां क्रियमाणायां सत्यां [शर्मणि] तस्मिन् सुखे vस्याम् सर्वदाऽवतिष्ठेयम् ॥१३॥

[इति द्वादशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

आ– 'वि पाजसा' इति । उत्कीलः कात्यः । आग्नेयी त्रिष्टुप् । हे अग्ने, पाज इति बलनाम । vपृथुना विस्तीर्णेन vपाजसा बलेन vशोशुचानः दीप्यमानोऽग्निस्त्वं vद्विषः द्वेष्यान् vरक्षसः च राक्षसान् vअमीवाः व्याधींश्च vवि vबाधस्व । एवं प्रत्यक्षतो याचित्वा अथेदानीं परोक्षीकृत्य आशिष आशास्ते । vसुशर्मणः साधुशर्मणः vबृहतः महतः vसुहवस्य शोभनाह्वानस्य vअग्नेः vप्रणीतौ प्रकृष्टनीतियुक्तौ vशर्मणि शरणे vअहं vस्याम् । भवेयमिति संबन्धः ॥१३॥

[इति द्वादशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

[अथ पञ्चमोऽनुवाकः]

चतुर्थेऽनुवाके मृदाहरणमुक्तम् । पञ्चमे तूखानिर्माणमुच्यते ।

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ॥१॥

आपः । हि । स्थ । मयोभुव इति मयःऽभुवः । ताः । नः । ऊर्जे । दधातन ।
महे । रणाय । चक्षसे ॥ डां ॥१॥

7. P1 after बलेन ins. पाज इति बलनाम
9. S2 om. क्रियमाणायां
14. M3 om. वि

उखानिर्माणमन्त्राः]

सा- कात्यायनः – "आपो हि ष्ठेति पर्णकषायपक्वमुदकमासिञ्चति पिण्डे" (काश्रौ १६.३.१७) इति । पलाशसंभवं कषायम् । तैलपक्वमुदकम् आपो हि ष्ठेति तृचेन मृन्मयपिण्डे आलिञ्चेत् । तत्र प्रथमायाः पाठस्तु– 'आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे' इति । हि शब्द एवकारार्थः प्रसिद्धार्थो वा । हे आपः, यूयमेव मयोभुवः स्थ सुखस्य भावयित्र्यो भवथ । अन्नपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम् । ताः तादृश्यो यूयं नः अस्मान् ऊर्जे रसाय भवदीयरसानुभवार्थं दधातन स्थापयत । किं च महे महते रणाय रमणीयाय चक्षसे दर्शनाय दधातन । अस्मान् परब्रह्मसाक्षात्कारयोग्यान् कुरुतेत्यर्थः ॥१॥

आ-- अप उपस्पृशति-- 'आपो हि ष्ठा' इति । तृचमब्देवत्यं गायत्रम् । सिन्धुद्वीपः । आप्लृ व्याप्तौ । आप्यते प्राणिनां सर्वं कार्यं याभिरित्यापः । तत्संबोधनं हे आपः । या यूयं मयोभुवः । मय इति सुखनाम । मयसा सुखेन भवन्तीति मयोभुवः स्थ भवथ । हि यस्मात् एवंभूताः तस्मात् ताः आपः नः अस्मान् ऊर्जे अन्नाय दधातन स्थापयत । "तप्तनप्तनथनाश्च" (पा ७.१.४५) इति नकारश्छान्दसः । यथा वयं सर्वस्य भोगस्य भोक्तारो भवेम तथा कुरुतेत्यभिप्रायः । 'महे रणाय चक्षसे' । मह पूजायामित्यस्य क्विबन्तस्य चतुर्थ्यन्तं रूपं महे इति । महे महते रणाय रमणीयाय चक्षसे दर्शनाय ज्ञानाय । अस्मान् दधातनेत्यनुवर्तते । एतदुक्तं भवति । महत् यद्दर्शनं परब्रह्मविषयं रमणीयं च यत् तदस्माकं कुरुतेति ॥१॥

योवः शिवतमो रसस्तस्य भाजयतेह नः ।
उशतीरिव मातरः ॥२॥

यः । वः । शिवतम इति शिवऽतमः । रसः । तस्य । भाजयत । इह । नः ।
उशतीरिवेत्युशतीःऽइव । मातरः ॥ छं ॥२॥

सा- अथ द्वितीयः – 'यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः' इति । वः युष्माकं शिवतमः सुखैकहेतुः यः रसः अस्ति सः इह अस्मिन् कर्मणि नः अस्मान् तस्य भाजयत तं रसं प्रापयत । तत्र दृष्टान्तः – उशतीः इव मातरः कामयमानाः प्रीतियुक्ता मातरो यथा स्वकीयस्तन्यरसं पाययन्ति तद्वत् ॥२॥

1. S2 om. पिण्डे; P1 with markings above काषायं ins. on the margin पालाशत्वग्भिः क्वथितमुदकं
4. P1 with markings above मयो° ins. on the margin मय इति सुखनाम, S2 om. भावयित्र्यो भवथ [L 5]
7. S2 परतः for परब्रह्म°
8. M3 दैवत्यं for देवत्यं
10. B1 om. मयसा ... चक्षसे [L 13]
15. B1 H3 om. च
22. S2 om. तं रसं प्रापयत

आ-- 'यो वः शिवतमो रसः' इति । ^{v}वः युष्माकं ^{v}यः ^{v}शिवतमः, शिवो रसः, शिवतरो रसः, शिवतमो रसः, शान्ततमः ^{v}रसः । ^{v}तस्य ^{v}भाजयत तस्य रसस्य भागिनः कुरुत । ^{v}इह ^{v}नः इहैव जीवतः स्थितान् नः अस्मान् तद्भागसंपन्नान् कुरुत । 'उशतीरिव मातरः' । वश कान्तौ । कृतसंप्रसारणस्यैतद्रूपम् । ^{v}उशतीः कामयमानाः ^{v}मातरः ^{v}इव पुत्रस्य हितं कामयमानाः मातर इव । यथा पुत्रस्य हितं मातरः स्वयमेव कामयन्त्यः तत्तत्प्राप्तिसाधनानि संपादयन्ति तथाऽस्माकमपि सर्वं सुखसाधनं यूयमेव संपादयतेति भावः ॥२॥

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ॥३॥

तस्मै । अरम् । गमाम । वः । यस्य । क्षयाय । जिन्वथ ।
आपः । जनयथ । च । नः ॥ सां ॥३॥

सा- अथ तृतीयः – 'तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः' इति । 'तस्मा अरं गमाम' । अलमिति प्राप्ते लकारस्थाने रेफादेशः । हे आपः, ^{v}तस्मै । षष्ठ्यर्थे चतुर्थी । तस्य रसस्य अधस्तनमन्त्रयाचितस्य ^{v}वः युष्मत्संबन्धिनः अलं पर्याप्तिं ^{v}गमाम प्राप्नुमः । ^{v}क्षयाय इति षष्ठ्यर्थे चतुर्थी । यस्य इति [अनेन] समानाधिकरण्यात् । ^{v}यस्य आहुतिपरिणामभूतस्य क्षयस्य निवासस्यैकदेशेन यूयं ^{v}जिन्वथ तर्पयथ । किंच हे ^{v}आपः यूयं ^{v}नः अस्मान् ^{v}जनयथ प्रजोत्पादनं कुरुत ॥३॥

आ- 'तस्मा अरम्' इति । ^{v}अरम् अलम् । रेफश्छान्दसः । ^{v}तस्मै अधस्तनमन्त्रयाचिताय ^{v}वः युष्मत्संबन्धिने शिवतमरसाय तत्प्राप्तये च । अस्मदर्थं रसं संपादयितुं यूयमेवालं समर्थाः पर्याप्ताः । युष्मदर्थं शिवतमं रसं ^{v}गमाम गच्छेम । तद्रसविषये वैतृष्ण्यम् अलंप्रत्ययो वा । ^{v}नः अस्माकं भूयादित्यभिप्रायः । 'यस्य क्षयाय' इति । ^{v}यस्य आहुतिपरिणामभूतस्य रसस्य

3. M2 om. स्थितान्
4. B1 om. मातर इव
6. B1 M3 om. सर्वं
12. S2 om. अलमिति ... °संबन्धिनः [L, 13]
13. S2 भृशं for पर्याप्तिं
14. S2 om. यस्य इति ... °करण्यात्
15. P1 with markings above जिन्वथ ins. on the margin जिन्वतिः प्रीतिकर्मा
16. S2 कुरुथ for कुरुत
17. M3 H3 om. इति and add गमाम वो यस्य क्षयाय जिन्वथ ; M3 °मन्त्रेण for °मन्त्र°
19. B1 युष्मद्दत्तं for युष्मदर्थं

उखानिर्माणमन्त्राः]

अस्मासु ᵛक्षयाय निवासार्थं ᵛजिन्वथ । जिन्वतिः प्रीतिकर्मा । प्रीतिमुत्पादयथ अस्मान् तर्पयथ । आपो जनयथ । हे ᵛआपः, ᵛनः अस्मान् शिवतमरसस्य भोक्तृत्वेन ᵛजनयथ । अनेन क्रमेणाजान (णापां ?) देवतात्वमाशास्यते ॥३॥

मि॒त्रः सु॒ꣳसृज्य॑ पृथि॒वीं भूमिं॑ च॒ ज्योति॑षा स॒ह ।
सु॒जा॑तं जा॒तवे॑दसमय॒क्ष्माय॑ त्वा॒ सꣳ सृ॑जामि प्र॒जाभ्यः॑ ॥४॥

मि॒त्रः । सु॒ꣳसृज्येति॑ स॒म्ऽसृज्य॑ । पृ॒थि॒वीम् । भूमि॑म् । च॒ । ज्योति॑षा । स॒ह ।
सु॒जा॑त॒मिति॑ सु॒ऽजा॑तम् । जा॒तवे॑द॒स॒मिति॑ जा॒तऽवे॑दसम् । अ॒य॒क्ष्माय॑ ।
त्वा॒ । सम् । सृ॒जा॒मि॒ । प्र॒जाभ्य॒ इति॑ प्र॒ऽजाभ्यः॑ ॥ थुं ॥४॥

सा– कात्यायनः – "अजलोमभिः सꣳसृजति मित्रः सꣳसृज्येति" (काश्रौ १६·३·१८) इति । पाठस्तु– 'मित्रः सꣳसृज्य पृथिवीं भूमिं च ज्योतिषा सह । सुजातं जातवेदसमयक्ष्माय त्वा सꣳ सृजामि प्रजाभ्यः' इति । ᵛमित्रः आदित्यो देवः ᵛपृथिवीं विस्तृतां द्युलोकं ᵛभूमिं ᵛच भूर्लोकं च ᵛज्योतिषा ज्वलनाख्येन तेजसा ᵛसह ᵛसꣳसृज्य एकीकृत्य मह्यमध्वर्यवे प्रयच्छत्विति शेषः । अहमपि ᵛसुजातं ᵛजातवेदसम् अजलोमाख्यमग्निं त्वां ᵛप्रजाभ्यः प्रजानाम् ᵛअयक्ष्माय रोगाभावाय ᵛसꣳसृजामि ॥४॥

आ– अजलोमभिः संसृजति– 'मित्रः सꣳसृज्य' इति । मित्रदेवत्या उपरिष्टाद्बृहती । अध्वर्युराह– ᵛमित्रः आदित्यः ᵛपृथिवीं द्युलोकं ᵛभूमिम् इमां भूमिं ᵛच ᵛज्योतिषा । अत्र ज्योतिः-- शब्दः अजलोमवचनः । अजस्याग्नेयत्वात् । अजलोमभिः ᵛसंसृज्य एकीकृत्य द्यावापृथिव्यावेकीकृत्य आदित्यो मह्यं प्रयच्छत्विति शेषः । अहमपि च गृहीत्वा ᵛसुजातं कल्याणजातं त्वां ᵛजातवेदसं जातमजालोमाख्यमग्निं ᵛप्रजाभ्यः प्रजानाम् ᵛअयक्ष्माय अव्याधित्वाय ᵛसंसृजामि ॥४॥

रु॒द्राः सु॒ꣳसृज्य॑ पृथि॒वीं बृ॒हज्ज्योति॒ः समी॑धिरे ।
तेषां॑ भा॒नुरज॑स्र॒ इच्छु॒क्रो दे॒वेषु॑ रोचते ॥५॥

1. H2–3 M3 after जिन्वथ add अरं

11. P1 with markings above भूर्लोकं ins. on the margin अत्र पृथिवीशब्दो द्युलोकवचनः । भूमिशब्दसंनिध्यात् ।

12. S2 om. सह; P1 after शेषः ins. ज्योतिषाजलोम्ना आग्नेयोऽज इति श्रुतेः ज्योतिःशब्दवाच्यत्वं तस्येति भाष्यान्तरम्

17. H2–3 कल्याणं for कल्याण°

18. B1 लोमेन त्वाम् for °लोमाख्याम्; H3 M3 अव्याधितत्वाय for अव्याधित्वाय

रुद्राः । सुंस्सृज्येति सुम्ऽसृज्य॑ । पृथिवीम् । बृहत् । ज्योति॑ः । सम् । ईधिरे ।
तेषा॑म् । भानुः । अज॑स्रः । इत् । शुक्रः । देवेषु॑ । रोचते ॥ ङुं ॥५॥

सा– कात्यायनः – "शर्कराऽयोरसाश्मचूर्णैः रुद्राः स॑स्सृज्येति" (काश्रौ १६·३·१९) इति। पाषाणसहिता मृत्तिका शर्करा। तया अयःसारेण अश्मचूर्णैः संसृजेत्। पाठस्तु– 'रुद्राः संसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे। तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते' इति। रुद्रनामका देवाः ᵛपृथिवीम् उखा-निष्पादकां मृदं शर्कराऽयोरसाश्मचूर्णैः ᵛसंसृज्य ᵛबृहत् ᵛज्योतिः प्रौढमग्निं ᵛसमीधिरे सम्यग् दीपितवन्तः। ᵛतेषां रुद्राणां चायमग्निः ᵛभानुः भासमानः ᵛअजस्रः ᵛइत् निरन्तर एव ᵛशुक्रः दीप्तियुक्तः ᵛदेवेषु ᵛरोचते शोभते ॥५॥

आ– शर्कराऽयोरसाश्मचूर्णैः संसृजति– 'रुद्राः स॑स्सृज्य' इति। रुद्रदेवत्याऽनुष्टुप्। ᵛरुद्राः ᵛपृथिवीं पार्थिवं ᵛबृहत् ᵛज्योतिः अग्निलक्षणं पार्थिवं पिण्डं शर्कराऽयोरसाश्मचूर्णैः ᵛस॑स्सृज्य एकीकृत्य उखायां ᵛसमीधिरे संदीपितवन्तः। रुद्राः उखायामग्निं संवत्सरं धारितवन्तः। ᵛतेषां रुद्राणां फलमाह– ᵛभानुः। भा दीप्तौ। दीप्तिः। ᵛअजस्रः। जसु उपक्षये। ᵛइत् शब्द एवार्थे। अनुपक्षीण एव। ᵛशुक्रः शुद्धः। ᵛदेवेषु, निर्धारणे सप्तमी। रुद्राणामनुपक्षीण एव। शुद्धो भानुः ᵛरोचते दीप्यते ॥५॥

स॑स्सृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम्।
हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् ॥६॥

स॑स्सृष्टामिति सम्ऽसृष्टाम्। वसुभिरिति वसुऽभिः। रुद्रैः।
धीरैः। कर्मण्याम्। मृदम्।
हस्ताभ्याम्। मृद्वीम्। कृत्वा। सिनीवाली। कृणोतु। ताम् ॥ जिं ॥६॥

सा– कात्यायनः – "स॑स्सृष्टामिति संयौति" (काश्रौ १६·३·२०) इति। 'स॑स्सृष्टाम्' इति मन्त्रत्रयस्य प्रतीकमिदं पूर्वोक्तामजलोमशर्करादियुक्तां मृदमुखाकरणाय मृदु यथा भवति तथा हस्ताभ्यां संयवनं कुर्यात्। प्रथममन्त्रपाठस्तु– 'स॑स्सृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम्। हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम्' इति। पूर्वमन्त्रे रुद्रशब्देन वसवोऽप्युपलक्षिताः। अतः ᵛधीरैः बुद्धिमद्भिः

---

6. S2 om. शर्करायोरसाश्मचूर्णैः; S2 सहज्योतिः for बृहत् ज्योतिः
10. M3 H3 पृथिवी° for बृहत्°
11. B1 उषायां for उखायां; M3 H3 संजीवित° for संदीपित°
12. H3 दीप्तः for दीप्तिः
13. H2–3 ये अनुपक्षीणे for अनुपक्षीणः
23. P1 after बुद्धिमद्भिः ins. रप्रत्ययो मत्वर्थीयः

उखानिर्माणमन्त्राः]

वसुभिः रुद्रैः च सꣳसृष्टां शर्करादिभिः संयोजितां कर्मण्याम् उखाकर्मयोग्यां मृदं मृत्तिकां सिनीवाली इन्दुकलायुक्ताऽमावास्याभिमानिनी देवता । स्वहस्ताभ्यां तां मृदं मृद्वीं मृदुरूपां कृत्वा कृणोतु उखां करोतु ॥६॥

आ-- तिसृभिरनुष्टुब्भिः सिनीवाल्यादिभिर्देवताभिः मृदं संयौति-- 'सꣳसृष्टां वसुभिः' इति । 'सिनीवाली' इति द्वे सिनीवालीदेवत्ये । अनुष्टुभौ । धीरैः वसुभिः देवैः रुद्रैः च देवैः संसृष्टां सेवितां संसर्गप्राप्ताम् । कर्मणे संपद्यते या सा कर्मण्या । मृदं मृत्तिकां सिनीवाली दृष्टेन्दुः तदभिमानिनी देवता । हस्ताभ्यां स्वपाणिभ्यां मृद्वीं मृदुरूपां कृत्वा तां कर्मण्यां कृणोतु करोतु ॥६॥

सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा ।
सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥७॥

सिनीवाली । सुकपर्देति सुऽकपर्दा । सुकुरीरेति सुऽकुरीरा । स्वौपशेति सुऽऔपशा । सा । तुभ्यम् । अदिते । महि । आ । उखाम् । दधातु । हस्तयोः ॥ टिं ॥७॥

सा-- अथ द्वितीयः -- 'सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा । सा तुभ्यमदिते मह्योखां दधातु हस्तयोः' इति । या सिनीवाली सुकपर्दा । कपर्देति स्त्रीणामुचितः केशबन्धविशेषः । शोभनः कपर्दो यस्याः सा सुकपर्दा । [सुकुरीरा] कुरीरशब्देन स्त्रीभिः शृङ्गारार्थं शिरसि धार्यमाणं कालकमुच्यते । शोभनं कुरीरं यस्याः सा सुकुरीरा । [स्वौपशा] सु उपशेते सम्यक् शयनं कुरुते यैरवयवविशेषैस्ते सर्वेऽप्युपशाः । तेषां समूह औपशः । शोभन औपशो यस्याः सा स्वौपशा । हे महि प्रौढे अदिते अखण्डनीये । "आदितिरदीना देवमाता" (नि ४.२२) इति यास्कवचनात् । तादृशि हे भूमे, सा सिनीवाली तुभ्यं तव हस्तयोः उखाम् आदधातु स्थापयतु ॥७॥

आ-- या सिनीवाली सुकपर्दा । कपर्दः केशसंयमनप्रकारः । साधुसंयमिता वेणिर्वा कपर्दः । सुशोभनः कपर्दो यस्याः सा सुकपर्दा । सुकुरीरा । कुरीरो मकुटः शोभनो यस्याः सा सुकुरीरा । स्वौपशा । शोभनमुपशेते या सा सूपशा । सैव स्वौपशा । विदग्धा शयने करचरणकूजितादिभिः

2. S2 before स्व° adds पुनरपि
3. S2 कृणोतु for करोतु
4. M3 H2-3 om. देवताभिः ... ... देवैः (L 5)
14. S2 °धिया for °विशेषः
15. P1 after उच्यते । adds मुकुट इति भाष्यान्तरम्
16. S2 उपनतं कुरुते for सु उपशेते ... कुरुते
20. S2 °संयमना for °संयमिता
21. B1 मकुरः for मकुटः
22. H2-3 M3 om. सैव स्वौपशा

विलासैः विलासवती च स्वौपशा। सा हे अदिते महि महीरूपे, तुभ्यं हस्तयोः उखां दधातु स्थापयतु ॥७॥

उखां कृणोतु शक्त्या बाहुभ्यामदितिर्धिया ।
माता पुत्रं यथोपस्थे साऽग्निं बिभर्तु गर्भ आ ॥८॥

उखां । कृणोतु । शक्त्या । बाहुभ्यामिति बाहुऽभ्याम् । अदितिः । धिया ।
माता । पुत्रं । यथा । उपस्थ इत्युपऽस्थे । सा । अग्निं । बिभर्तु । गर्भे । आ ॥ चूं ॥८॥

सा– अथ तृतीयः – 'उखां कृणोतु शक्त्या बाहुभ्यामदितिर्धिया । माता पुत्रं यथोपस्थे साऽग्निं बिभर्तु गर्भ आ' इति । इयम् अदितिः धिया बुद्धिकौशलेन बाहुभ्यां हस्तकौशलेन च इमाम् उखां कृणोतु । यथा लोके माता स्वकीयं पुत्रम् उपस्थे उत्सङ्गे बिभर्ति तथेयं अदितिः गर्भे उत्सङ्गे गतमग्निमा कर्मसमाप्तेः बिभर्तु धारयतु ॥८॥

आ-- 'उखां कृणोतु' इति अदितिदेवत्याऽनुष्टुप् । अदितिः बाहुभ्यां शक्त्या सामर्थ्येन धिया बुद्ध्या उखां कृणोतु करोतु । 'माता पुत्रं यथोपस्थे साऽग्निम्' । माता यथा उपस्थे उत्सङ्गे पुत्रं बिभर्ति तथा सा अदितिः गर्भे । गर्भशब्दः उखाऽभ्यन्तरवचनः । गर्भे अग्निं बिभर्तु धारयतु । आ, आकारोऽत्र आत्मनो योग्यां क्रियामाक्षिपति ॥८॥

मखस्य शिरोऽसि वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्
ध्रुवासि पृथिव्यसि ।
धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान् यजमानाय ।
रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वद् ध्रुवाऽस्यन्तरिक्षमसि ।
धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान् यजमानाय ।
आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाऽङ्गिरस्वद् ध्रुवाऽसि द्यौरसि ।
धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान् यजमानाय ।
विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वद् ध्रुवाऽसि दिशोऽसि ।
धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान् यजमानाय ।
अदित्यै रास्नाऽस्यदितिष्टे बिलं गृभ्णातु ॥९॥

11. H2-3 after बाहुभ्यां add स्वबाहुभ्यां
12. B1 om. करोतु
14. M3 om. आ; B1 om. अत्र

उखानिर्माणमन्त्राः]

मखस्य । शिरः । असि । वसवः । त्वा । कृण्वन्तु । गायत्रेण । छन्दसा । अङ्गिरस्वत् ।

ध्रुवा । असि । पृथिवी । असि ।

धारय । मयि । प्रजामिति प्रऽजाम् । रायः । पोषम् । गौपत्यम् ।

सुवीर्यमिति सुऽवीर्यम् । सजातानिति सऽजातान् । यजमानाय ।

रुद्राः । त्रैष्टुभेन । त्रैस्तुभेनेति त्रैस्तुभेन । अन्तरिक्षम् ।

आदित्याः । जागतेन । द्यौः ।

विश्वे । त्वा । देवाः । वैश्वानराः । कृण्वन्तु । आनुष्टुभेन । आनुस्तुभेनेत्यानुऽस्तुभेन ।

छन्दसा । अङ्गिरस्वत् । ध्रुवा । असि । दिशः । असि ।

अदित्यै । रास्ना । असि । अदितिः । ते । बिलम् । गृभ्णातु ॥ त्र्यौं ॥९॥

सा– कात्यायनः – " यजमान उखां करोति मृदमादाय मखस्य शिर इति " (काश्रौ १६·३·२३) इति । यजमानोऽध्वर्युणा दत्तां मृदं गृहीत्वोखां कुर्यात् । 'असि' इति मन्त्रशेषः । हे मृत्पिण्ड, त्वं ˇमखस्य यज्ञस्य शिरःस्थानम् ˇअसि ॥

कात्यायनः – " वसवस्त्वेति प्रथयति " (काश्रौ १६·३·२३) इति । 'वसवस्त्वा' इत्यादिभिः-चतुर्भिर्मन्त्रैः प्रथितामुखां कुर्यात् । उखानिर्माणे तेषामवान्तरविनियोगस्तु कात्यायनसूत्रे द्रष्टव्यः । तत्र प्रथममन्त्रपाठस्तु– ' वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाऽङ्गिरस्वद् ध्रुवाऽसि पृथिव्यसि । धारया मयि प्रजा१ रायस्पोषं गौपत्य१ सुवीर्य१ सजातान् यजमानाय ' इति । हे उखे, त्वां ˇवसवः देवाः सहकारिणः ˇगायत्रेण ˇछन्दसा सह ˇअङ्गिरस्वत् अङ्गिरस इव ˇकृण्वन्तु निष्पादयन्तु । अतस्त्वं ˇध्रुवा ˇअसि दृढा भवसि पृथिवीरूपा चासि । किं च उखाकर्तरि ˇमयि ˇप्रजां पुत्रादिकां ˇधारय स्थापय । तथा ˇरायस्पोषं धनस्य पुष्टिं च धारय । ˇगौपत्यं गवां पतित्वं च मयि स्थापय । तथा सुवीराणां कर्म ˇसुवीर्यम् । तच्च मयि स्थापय । ˇसजातान् समानोदरे जातान् भ्रातॄन् ˇयजमानाय मह्यं धारय ॥

अथ द्वितीयः – ' रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वद् ध्रुवाऽस्यन्तरिक्षमसि । धारया मयि प्रजा१ रायस्पोषं गौपत्यं सुवीर्य१ सजातान् यजमानाय ' इति । पूर्ववद् व्याख्येयम् ॥

अथ तृतीयः – ' आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाऽङ्गिरस्वद् ध्रुवाऽसि द्यौरसि । धारया मयि प्रजा१ रायस्पोषं गौपत्यं सुवीर्य१ सजातान् यजमानाय ' इति । पूर्ववद् व्याख्येयम् ॥

अथ चतुर्थः – ' विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वद् ध्रुवाऽसि दिशोऽसि । धारया मयि प्रजा१ रायस्पोषं गौपत्यं सुवीर्य१ सजातान् यजमानाय ' इति । विश्वेषां नराणां संबन्धिनः ˇवैश्वानराः । एवंभूताः ˇविश्वे ˇदेवाः, हे उखे, त्वां ˇकृण्वन्तु । अन्यत् समानम् ॥

14. P1 °विधिस्तु for °विनियोगस्तु; P1 om. तत्र

16. P1 वस्वाख्याः for वसवः; P1 °कारिणा for °कारिणः

18. S2 असि for भवसि; S2 om. मयि

19. P1 धन° for धनस्य

20. P1 after मह्यं adds मम

कात्यायनः – " वर्त्तिं सर्वतः करोत्यदित्यै रास्नेति " (काश्रौ १६·३·३०) इति । रशनासदृशी भाण्डस्य गर्भतः रेखावर्त्तिस्ताम् उखायामुत्तरभागे सर्वतः कुर्यात् । ' असि ' इति मन्त्रशेषः । हे रज्जो, त्वम् अदित्यै भूमिरूपाया उखाया रास्ना असि काञ्चीगुणस्थानीया रशना भवसि ॥

कात्यायनः – " बिलं गृह्णात्यदितिष्ट इति " (काश्रौ १६·४·३) इति । उखाया अन्तश्छिद्रं कुर्यात् । पाठस्तु– ' अदितिष्टे बिलं गृभ्णातु ' इति । हे उखे, ते तव बिलम् अन्तश्छिद्रं अदितिः भूमिः गृभ्णातु करोतु धारयतु ॥९॥

आ– मृत्पिण्डमादत्ते– ' मखस्य शिरोऽसि ' इत्यादीनि मृत्पिण्डदेवत्यानि यजूंषि । आहवनीयः मखस्य यज्ञस्य शिरः । मृत्पिण्डो ह्यग्निधारकत्वेन लक्षणया शिर उच्यते । तं प्रथयति । वसवः नाम देवाः । हे उखे, त्वां गायत्रेण छन्दसा सह । अङ्गिरसा तुल्यमङ्गिरोवत् कृण्वन्तु । यतश्च त्वम् अङ्गिरोवत् कृता अतश्च त्वं ध्रुवा असि स्थिरा असि । पृथिवी च असि । अतस्त्वां ब्रवीमि । मयि यजमाने प्रजां धारय स्थापय । किं च रायस्पोषं धनस्य पुष्टिं च धारय । गौपत्यं गवां पतित्वं च मयि धारय । सुवीर्यं सुवीराणां कर्मसु वीर्यं च मयि धारय । सजातान् समानोदरे जातान् भ्रातॄन् यजमाने धारय स्थापयेति सर्वत्र संबन्धः ।

उत्तरेषु मन्त्रेषु अयं विशेषः । त्रैष्टुभेन छन्दसा त्वा कृण्वन्तु इति । ध्रुवा असि अन्तरिक्षम् असि । जागतेन छन्दसा आदित्याः त्वा कृण्वन्तु । ध्रुवा असि द्यौः असि । आनुष्टुभेन छन्दसा विश्वे देवाः वैश्वानराः विश्वेषां देवानां (नराणां ?) संबन्धित्वाद्वैश्वानराः त्वां कृण्वन्तु । ध्रुवा असि दिशः असि । समानमन्यत् ॥

अदित्यै अदित्याः रास्ना असि रशना असि । अदितिर्नाम देवमाता । ते तव बिलं मध्यं गृभ्णातु निदधातु ॥९॥

कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये ।
पुत्रेभ्यः प्रायच्छददितिः श्रपयानिति ॥१०॥

---

2. S2 तादृशी for भाण्डस्य
8. M3 H2–3 अपि for हि
10. B1 यतः यत्त्वं for यतश्च त्वं; M3 आङ्गिरोवतीं for आङ्गिरोवत् ; M3 H2–3 कृत्वा for कृता
12. B1 आधि for च मयि
13. H2–3 om. च
17. B1 om. विश्वेषां ... °नराः (L 18)
18. H2–3 °संबन्धि° for °संबन्धित्वात्
20. B1 M3 गृह्णातु for गृभ्णातु; H2–3 विदधातु for निदधातु

उखानिर्माणमन्त्राः]

कृत्वाय॑ । सा । म॒हीम् । उ॒खाम् । मृ॒न्म॒यी॒मिति॑ मृ॒त्ऽमयी॑म् । योनि॑म् । अ॒ग्नये॑ । पु॒त्रेभ्य॑ः । प्र । अ॒य॒च्छ॒त् । अदि॑तिः । श्र॒पया॑न् । इति॑ ॥ द्व्यौं ॥ १० ॥

सा- कात्यायनः – " कृत्वायेति निदधाति " (काश्रौ १६·४·४) । निष्पन्नामुखां स्थापयेत् । पाठस्तु– ' कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये । पुत्रेभ्यः प्रायच्छददितिः श्रपयानिति ' इति । सा इयम् अदितिः मृन्मयीं मृत्कार्यां योनिम् अग्नये अग्नेः कारणभूताम् उखां कृत्वाय निष्पाद्य पुत्रेभ्यः स्वपुत्रलक्षणेभ्यः श्रपणकारिभ्यः प्रायच्छत् प्रददातु । किं ब्रवीतीति तदुच्यते– श्रपयान् इति श्रपयन्तु भवन्त इति ब्रुवन्ती ॥१०॥

आ– ' कृत्वाय सा ' इति । अनुष्टुब् उष्णिग्वा अदितिदेवत्या । या उक्तगुणा अदितिः सा मह्रीं महीभूतां मृन्मयीं च मृद्विकाराम् उखाम् उखालक्षणसंपन्नां योनिं स्थानम् अग्नये अग्न्युत्पादनार्थं कल्पितस्थानं कृत्वाय । " क्त्वो यक् " (पा ७·१·४७) । क्त्वाप्रत्ययस्य छान्दसो यगागमः । अदितिः पुत्रेभ्यः प्रायच्छत् प्रादात् । इति श्रपयान् । श्रा पाके । श्रपयतु (न्तु ?) इति शब्दः प्रयोजनप्रख्यापनार्थः । श्रपयत्वि(न्वि ?)ति स्वपुत्रेभ्यः प्रायच्छदिति संबन्धः ॥१०॥

वस॑वस्त्वा धूपयन्तु गाय॒त्रेण॒ छन्द॑साऽङ्गिर॒स्वद्-
रु॒द्रास्त्वा॑ धूपयन्तु त्रैष्टु॑भेन॒ छन्द॑साऽङ्गिर॒स्वत् ।
आ॒दि॒त्यास्त्वा॑ धूपयन्तु॒ जाग॑तेन॒ छन्द॑साऽङ्गिर॒स्वद्-
विश्वे॑ त्वा दे॒वा वैश्वान॒रा धूपय॒न्त्वानु॑ष्टुभेन॒ छन्द॑साऽङ्गिर॒स्वत् ।
इन्द्र॑स्त्वा धूपयतु॒ वरु॑णस्त्वा धूपयतु॒ विष्णु॑स्त्वा धूपयतु ॥११॥(५)॥

वस॑वः । त्वा॒ । धू॒प॒य॒न्तु॒ । गा॒य॒त्रेण॑ । छन्द॑सा । अ॒ङ्गि॒र॒स्वत् ।
रु॒द्राः । त्रैष्टु॑भेन । त्रैस्तु॒भे॒नेति॒ त्रैस्तु॑भेन ।
आ॒दि॒त्याः । जाग॑तेन । विश्वे॑ । त्वा॒ । दे॒वाः । वै॒श्वा॒न॒राः । धू॒प॒य॒न्तु॒ ।
आनु॑ष्टुभेन । आनु॑स्तु॒भे॒नेत्यानु॑ऽस्तुभेन । छन्द॑सा । अ॒ङ्गि॒र॒स्वत् ।
इन्द्र॑ः । वरु॑णः । विष्णु॑ः । त्वा॒ । धू॒प॒य॒तु॒ ॥ ज्रूं ॥११॥ (५) ॥

5. S2 om. मृत्कार्यां°; P1 om. अग्नये; S2 कृत्वा फलं for कृत्वाय
6. S2 om. first इति
8. M3 युक्त° for उक्त°
9. H2 M3 मृण्मयीं for मृन्मयीं
11. B1 अदि, M3 H2-3 अदिति for इति
13. M3 H3 सु° for स्व°

सा– कात्यायनः – "सप्तभिरश्वशकृद्भिरुखां धूपयति दक्षिणाऽग्निदीप्तैरेकैकेन वसवस्त्वेति प्रतिमन्त्रम्" (काश्रौ १६·४·८) इति । 'वसवस्त्वा' इत्यादिभिर्मन्त्रैः क्रमेणैकैकेन मन्त्रेण दक्षिणाग्नौ प्रज्वलितैरश्वसंबन्धिभिः शकृद्भिरुखां संधूपयेत् । तेषां पाठस्तु– 'वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वत् । आदित्यास्त्वा धूपयन्तु जागतेन छन्दसाऽङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत् । इन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयतु" इति । हे उखे, त्वामष्टौ वसवः सहकारिणा गायत्रेण छन्दसा सह अङ्गिरस इव धूपयन्तु अश्वशकृज्जन्येन धूमेन धूपयन्तु संस्कुर्वन्तु । एवमुत्तरेष्वपि षट्सु योज्यम् ॥११॥

[इति द्वादशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

आ– सप्तभिरश्वशकृद्भिरुखां धूपयति– 'वसवस्त्वा' इति । लिङ्गोक्तदेवत्यानि यजूंषि । वसवः देवाः । गायत्रेण छन्दसा सह उखां त्वां धूपयन्तु । धूप संतापे । त्रैष्टुभेन छन्दसा रुद्राः उखां त्वां धूपयन्तु । जागतेन छन्दसा सह आदित्याः त्वामुखां धूपयन्तु । आनुष्टुभेन छन्दसा वैश्वानराः विश्वे देवाः उखां त्वां धूपयन्तु । इन्द्रः त्वा धूपयतु । वरुणः त्वा धूपयतु । विष्णुः त्वा धूपयतु ॥११॥

[इति द्वादशेऽध्याये पञ्चमोऽनुवाकः ॥]

[अथ षष्ठोऽनुवाकः]

पञ्चमे उखानिर्माणमुक्तम् । षष्ठेऽनुवाके तु तत्संस्कार उच्यते ॥

अदि॑तिष्ट्वा दे॒वी वि॒श्वदे॑व्यावती ।
पृ॒थि॒व्याः स॒धस्थे॑ अङ्गि॒र॒स्वत् ख॑नत्ववट ॥१॥

अदि॑तिः । त्वा॒ । दे॒वी । वि॒श्वदे॑व्यावती । वि॒श्वदे॑व्यव॒तीति॑ वि॒श्वदे॑व्यऽवती ।
पृ॒थि॒व्याः । स॒धस्थ॒ इति॑ स॒धऽस्थे॑ । अ॒ङ्गि॒र॒स्वत् । ख॒न॒तु । अ॒व॒ट॒ ॥ छं ॥१॥

कात्यायनः – "अभ्र्या श्वभ्रं चतुरस्रं खनत्यदितिष्ट्वेति" (काश्रौ १६·४·९) इति । खननसाधनेन काष्ठविशेषेण अश्रिचतुष्टयोपेतमवटं खनेत् । पाठस्तु– 'अदितिष्ट्वा देवी विश्वदेव्यावती । पृथिव्याः सधस्थे अङ्गिरस्वत् खनत्ववट' इति । विश्वेषु देवेषु साधवो विश्वदेव्याः, तेऽस्याः सन्तीति विश्वदेव्यावती । तादृशीयम् अदितिः देवी पृथिव्याः सधस्थे भूम्या उपरि हे अवट, त्वा त्वाम्

2. S2 दक्षिणेन for दक्षिण°
6. S2 °कारेण for °कारिणा
9. M3 °दैवत्यानि for °देवत्यानि
22. S2 अश्रि for अश्रि°
23. S2 विश्वेदेवाः for विश्वदेव्य [१]:

ᵛअङ्गिरस्वत् अङ्गिरसः इव ᵛखनतु। अनेन मन्त्रेण अदितेरेव खननकर्तृत्वमिति तैत्तिरीयेऽपि श्रूयते– " अदितिस्त्वेत्याहेयं वा अदितिरदित्यैवादित्यां खनत्यस्या अक्रूरंकाराय न हि स्वः स्वᳬ हिनस्ति " (तैसं ५·१·७) इति। अस्यायमर्थः – इयं भूमिरेवादितिशब्देन विवक्षिता अवटखननमपि भूम्यामेव। ततोऽदितेः खननकर्तृत्वे सति भूमेर्हिंसा न भवति। न हि लोके कश्चिदपि स्वयं स्वात्मानं हिनस्ति। तस्मात् खननलक्षणक्रूरकार्यकरणाभावायेत्थमदितिकर्तृत्वं संपद्यत इति ॥१॥

आ– अभ्र्या श्वभ्रं खनति– ' अदितिष्ट्वा ' इति। अवटदेवत्योष्णिक्। हे ᵛअवट हे कूप, ᵛत्वा त्वाम् ᵛअदितिः ᵛदेवी ᵛखनतु। विश्वेषु देवेषु साधवो विश्वदेव्याः। तैः सहिता ᵛविश्वदेव्यावती। ᵛपृथिव्याः ᵛसधस्थे। अङ्गिरसा तुल्यः ᵛअङ्गिरस्वत्। अवट, त्वाम् अदितिः खनतु ॥१॥

देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः।
पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखे।
धिषणास्त्वा देवीर्विश्वदेव्यावतीः।
पृथिव्याः सधस्थे अङ्गिरस्वदभीन्धतामुखे।
वरूत्रीष्ट्वा देवीर्विश्वदेव्यावतीः।
पृथिव्याः सधस्थे अङ्गिरस्वच्छ्रपयन्तूखे।
ग्नास्त्वा देवीर्विश्वदेव्यावतीः।
पृथिव्याः सधस्थे अङ्गिरस्वत् पचन्तूखे।
जनयस्त्वाऽछिन्नपत्रा देवीर्विश्वदेव्यावतीः।
पृथिव्याः सधस्थे अङ्गिरस्वत् पचन्तूखे ॥२॥

देवानाम्। त्वा। पत्नीः। देवीः। विश्वदेव्यावतीः। विश्वदेव्यवतीरिति विश्वदेव्यऽवतीः।
पृथिव्याः। सधस्थ इति सधऽस्थे। अङ्गिरस्वत्। दधतु। उखे।
धिषणाः।
अभि। इन्धताम्।

1. P1 अङ्गिराः for अङ्गिरसः
2. P1 S2 अदितिरादित्यास्या for अदितिरादित्यैवादित्यां खनत्यस्या; S2 अक्रूरकारणाय for अक्रूरंकाराय; P1 S2 हिंस्त्रः सं॰ for हि स्वः स्वᳬ
6. H2–3 om. अभ्र्या … … खनति; M3 खनतु for खनति
8. B1 अवटं for अवट

वरूत्रीः ।

श्रपयन्तु ।

ग्नाः ।

पचन्तु ।

जनयः । अच्छिन्नपत्रा इत्यछिन्नऽपत्राः ॥ द्वौ ॥२॥

सा- कात्यायनः – "श्रपणमास्तीर्य यथाकृतमवदधाति देवानां त्वेति" (काश्रौ १६·४·११) इति । पाठस्तु- 'देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखे' इति । ᵛविश्वदेव्यावतीः, विश्वेषां देवानां योग्याः उपचाराः, विश्वेषु देवेषु साधवो वा विश्वदेव्याः । तैः सहिता विश्वदेव्यावत्यः । एवंभूताः ᵛदेवानां पत्न्यो देव्यः ᵛपृथिव्याः ᵛसधस्थे उपरि अङ्गिरस इव हे ᵛउखे, त्वां ᵛदधतु स्थापयन्तु ॥

कात्यायनः – उखां न्युब्जां श्रपणेनावच्छाद्य दक्षिणाग्न्यग्निना दीपयति धिषणास्त्वेति" (काश्रौ १६·४·१२) इति । अवाचीनाम् उखां श्रपणसाधनेन तृणादिना प्रच्छाद्य दक्षिणाग्नेरानीतेन वह्निना दीपयेत् । पाठस्तु- ' धिषणास्त्वा देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वदभीन्धतामुखे ' इति । विद्याभिमानिन्यो देवताः ᵛधिषणाः, ताः देव्यः । हे ᵛउखे, त्वाम् ᵛअभीन्धताम् । इन्धी दीप्तौ ॥

कात्यायनः – " वरूत्रीष्ट्वेतीक्षमाणो जपति '' (काश्रौ १६·४·१४) इति । पाठस्तु- ' वरूत्रीष्ट्वा देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वच्छ्रपयन्तूखे ' इति । हे उखे, वृण्वन्तीति वरूत्रयोऽहोरात्राणि, अहोरात्राभिमानिन्यो देवताः । "अहोरात्राणि वै वरूत्रयोऽहोरात्रैर्हीदꣳ सर्वं वृतम्" (शब्रा ६·५·४·६) इति श्रुतेः । एवंभूता वरूत्रयो हे ᵛउखे, त्वां ᵛश्रपयन्तु ॥

कात्यायनः – " पचति ग्ना जनय इति द्वाभ्याम् " (काश्रौ ? ?) इति । पाठस्तु- 'ग्नास्त्वा देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वत् पचन्तूखे ' इति । ᵛग्नाः छन्दोऽभिमानिन्यो देवताः । " छन्दांसि वै ग्नाश्छन्दोभिर्हि स्वर्गं लोकं गच्छन्ति " (शब्रा ६·५·४·७) इति श्रुतिः ॥

द्वितीयमन्त्रः – "जनयस्त्वाऽच्छिन्नापत्रा देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वत् पचन्तूखे" इति । ᵛजनयः नक्षत्राणि ᵛअच्छिन्नपत्राः अनवच्छिन्नपतनाः । "नक्षत्राणि वै जनयः" (शब्रा ६·५·४·८) इति श्रुतेः ॥२॥

---

6. S2 तस्मिन्नुखां यथाकृतां स्थापयेत् for यथाकृतमवदधाति; S2 om. देवानां त्वेति

8. S2 om. उपचाराः; P1 om. वा

9. P1 after °वत्यः ins. सुपां सुलुगिति पूर्वसवर्णः; S2 देव्याः for देव्यः

11. S2 दक्षिणाग्निना for दक्षिणाग्न्यग्निना

12. S2 अर्वाचीनाम् for अवाचीनाम्

15. S2 श्रपयति for ईक्षमाणो जपति

16. S2 कृण्वन्स्त्वितीति for वृण्वन्तीति

20. S2 om. ग्नाश्छन्दो° ... ... देवताः । (L 21)

उखासंस्कारमन्त्राः]

आ– इत उत्तरं पञ्चसु यजुःषु श्रुत्युक्तानि ह्यभिधेयानि व्याख्यायन्ते– ‘ देवानां त्वा ’ इति । उखादेवत्यानि पञ्च यजूंषि । ^{v}देवानां ^{v}त्वा ^{v}पत्नीः ^{v}देवीः ^{v}विश्वदेव्यावतीः देवानां पत्नीः पत्न्यः ओषधयः । “ ओषधयो वै देवानां पत्न्यः ” (शब्रा ६.५.४.४) इति श्रुतेः । विश्वदेव्यावत्यो देव्यो देवानां पत्न्य ओषधयः हे उखे, त्वां ^{v}पृथिव्याः ^{v}सधस्थे ^{v}अङ्गिरस्वत् अङ्गिरा इव ^{v}दधतु स्थापयन्तु । अग्निना दीपयति– ‘ धिषणास्त्वा ’ इति । ^{v}धिषणाः वाचः ^{v}अभीन्धताम् । इन्धी दीप्तौ । इन्धताम् । श्रपयति– ‘ वरूत्रीष्ट्वा ’ इति । ^{v}वरूत्रीः वरूत्रयः अहोरात्राणि । “ अहोरात्राणि वै वरूत्रयोऽहोरात्रैर्हीदꣳ सर्वं वृतम् ” (शब्रा ६.५.४.६) इति श्रुतेः । हे ^{v}उखे, त्वां ^{v}श्रपयन्तु । इत उत्तरं मन्त्राणामर्थः पूर्ववदेव । ^{v}ग्नाः । “ छन्दांसि वै ग्नाः ” (शब्रा ६.५.४.७) [इति श्रुतेः] । त्वां ^{v}पचन्तु । “ छन्दोभिर्हि स्वर्गं लोकं गच्छन्ति ” (शब्रा ६.५.४.८) इति श्रुतेः । ^{v}जनयः ^{v}त्वा । “ नक्षत्राणि वै जनयः ” (शब्रा ६.५.४.८) इति श्रुतेः । ^{v}अच्छिन्नपत्राः अच्छिन्नपतनाः जनयः नक्षत्राणि तारकाः सततयायिन्यः हे ^{v}उखे, ^{v}त्वां ^{v}पचन्तु ॥२॥

मित्रस्य॑ चर्षणी॒धृतोऽवो॑ दे॒वस्य॑ सान॒सि ।
द्यु॒म्नं चि॒त्रश्र॑वस्तमम् ॥३॥

मि॒त्रस्य॑ । च॒र्ष॒णी॒धृत॒ इति॑ च॒र्ष॒णि॒ऽधृतः॑ । अवः॑ । दे॒वस्य॑ । सा॒न॒सि । द्यु॒म्नम् । चि॒त्रश्र॑वस्तम॒मिति॑ चि॒त्रश्र॑वःऽतमम् ॥ ञौ ॥३॥

सा– कात्यायनः – “ आचरति मित्रस्येति ” (काश्रौ १६.४.१५) इति । आचरणमुपचरणम् । तत् कुर्यात् । पाठस्तु– ‘ मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ’ इति । ^{v}मित्रस्य ^{v}देवस्य ^{v}सानसि सनातनं पुराणं ^{v}द्युम्नं यशः, वयं स्तुम इति शेषः । कीदृशं यशः ? ^{v}अवः रक्षणम् । ^{v}चित्रश्रवस्तमम् अतिशयेन श्रवणीयम् । कथंभूतस्य मित्रस्य ? ^{v}चर्षणीधृतः मनुष्याणां धारयितुः । यद्वा– अवो यशश्च यजमानेष्टं साधयतु ॥३॥

1. B1 मह्यभि° for ह्यभि°
2. B1 om. देवानां ... ... °वतीः
3. B1 om. ओषधयो वै ... ... इति श्रुतेः । (L 4)
4. B1 om. विश्व° ... ... ओषधयः; H2–3 om. देव्यो; H2 om. त्वां
5. B1 om. पृथिव्याः ... ... वाचः
6. H3 after वाचः adds हे उखे; M3 श्रपयन्तु, B1 श्रपयतु for श्रपयति
11. M3 om. अच्छिन्नपत्राः
12. S2 after यशः ins. तु

आ– आचरति– 'मित्रस्य चर्षणीधृतः' इति। विश्वामित्रो मित्रदेवत्या गायत्री। चर्षणयो मनुष्याः। चर्षणीन् मनुष्यान् धारयतीति चर्षणीधृत्, तस्य चर्षणीधृतः। छान्दसो दीर्घः। मनुष्याणां धारणाधिकृतस्य देवस्य अवः अवनं रक्षणम्। सानसि सनातनं पुराणम्। द्युम्नं यशः अन्नम्। चित्रश्रवस्तमम् अतिशयेन चयनीयं श्रवस्तमं, वयं स्तुम इति वाक्यशेषः। याचेमहीति वा। यद्वा– यस्य मित्रस्य चर्षणीधृतः अवः पालनं देवस्य पुराणं द्युम्नं चित्रश्रवस्तमं यजमानार्थं साधयतु ॥३॥

देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या।
अव्यथमाना पृथिव्यामाशा दिश आपृण ॥४॥

देवः। त्वा। सविता। उत्। वपतु।
सुपाणिरिति सुऽपाणिः। स्वङ्गुरिरिति सुऽअङ्गुरिः।
सुबाहुरिति सुऽबाहुः। उत। शक्त्या।
अव्यथमाना। पृथिव्याम्। आशाः। दिशः। आ। पृण॥ टूं ॥४॥

सा– कात्यायनः – "उद्वपति श्रपणं देवस्त्वेति" (काश्रौ १६.४.१८) इति। पक्वानि श्रपणानि उद्वासयेत्। पाठस्तु– 'देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या' इति। हे उखे, सविता देवः स्वकीयया शक्त्या त्वाम् उद्वपतु। आच्छादिताच्छूपणात् प्रकाशीकरोतु। उत समुच्चये। किंभूतः सविता? सुपाणिः शोभनहस्तः स्वङ्गुरिः शोभनाङ्गुलिः। रेफस्य लादेशः। सुबाहुः शोभनभुजः॥

कात्यायनः – "उखामुत्तानां करोत्यव्यथमानेति" (काश्रौ १६.४.२०) इति। हे उखे, त्वम् अव्यथमाना व्यथामप्राप्नुवती सती पृथिव्यां स्थिता आशाः दिशः विदिशश्च आपृण पूरय आहुतिरसेन ॥४॥

2. B1 after °धृतः adds इति। विश्वामित्रो मित्रस्य चर्षणीधृतः।

3. B1 धारणादि° for धारणाधि°; M3 धारणार्थः धारणाय कृत्यस्य; H3 धारणां धारणाधिकृतस्य for धारणाधिकृतस्य; H2–3 पुरातनं for पुराणं

4. H2–3 M3 चायनीयं for चयनीयं; B1 after श्रवस्तमं adds यशस्तमं

14. P1 after उद्वासयेत् add उखामुत्तानां करोत्यव्यथमानेतीति च; P1 after शक्त्या adds अव्यथमाना पृथिव्यामाशा दिश आ पृणेति।

16. S2 om. शोभनहस्तः; P1 लस्यादेशः for लादेशः

17. S2 om. शोभनभुजः; P1 after °भुजः adds सन्नुखामुत्तानां करोतु।

18. S2 om. हे उखे

उखासंस्कारमन्त्राः]

आ– उखामुद्वपति– 'देवस्त्वा' इति। सवितृदेवत्या बृहती। सुपाणिः शोभनपाणिः स्वङ्गुरिः स्वङ्गुलिः। लकारस्य रेफश्छान्दसः। सुबाहुः शोभनबाहुः सविता देवः शक्त्या सामर्थ्येन उत अपि च बुद्धेरुपलक्षणार्थः। त्वा त्वाम् उखाम् उद्वपतु उद्वपनेन प्रकाशीकरोतु। सवित्रोद्वापिता सती उखा त्वम् अव्यथमाना अचलन्ती पृथिव्यां स्थिता आशाः विदिशः दिशः प्राच्यादिदिशः आपृण आहुतिरसेनापूरय ॥४॥

उत्थाय बृहती भवोदु तिष्ठ ध्रुवा त्वम् ।
मित्रैतां त उखां परि ददाम्यभित्या
एषा मा भेदि ।
वसवस्त्वाऽऽ छृन्दन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्-
रुद्रास्त्वाऽऽ छृन्दन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वत् ।
आदित्यास्त्वाऽऽ छृन्दन्तु जागतेन छन्दसाऽङ्गिरस्वद्
विश्वे त्वा देवा वैश्वानरा आ छृन्दन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत् ॥५॥(६)॥

उत्थाय । बृहती । भव । उत् । ऊँ इत्यूँ । तिष्ठ । ध्रुवा । त्वम् ।
मित्र । एताम् । ते । उखाम् । परि । ददामि । अभित्यै ।
एषा । मा । भेदि ।
वसवः । त्वा । आ । छृन्दन्तु ॥ किः ॥५॥(६)॥

स्रा– कात्यायनः– "उद्यच्छन्ति उत्थायेति" (काश्रौ १६·४·२१) इति। अवटाद्बहिरुखामानयेत्। पाठस्तु– 'उत्थाय बृहती भवोदु तिष्ठ ध्रुवा त्वम्' इति। हे उखे, त्वम् उदु तिष्ठ अवटाद्बहिरागत्योत्थिता भव। उत्थाय बृहती प्रौढा भव। ईदृशी त्वं ध्रुवा स्थिरा भव। उकारः पादपूरणः॥

कात्यायनः – "पात्रे करोति मित्रैतामिति" (काश्रौ १६·४·२२) इति। अवटादूर्ध्वमानीतामुखां पात्रे स्थापयेत्। पाठस्तु– 'मित्रैतां त उखां परि ददाम्यभित्या। एषा मा भेदि' इति। हे मित्र, एताम् उखां ते तव परिददामि परित्राणाय प्रयच्छामि। किमर्थम्? अभित्यै अभेदनाय। एषा उखा गृहीता सती मा भेदि मा भिद्यताम्॥

---

2. H2–3 M3 om. शोभनबाहुः
3. H2–3 °लक्षणार्थं for °लक्षणार्थः
5. B1 om. दिशः प्राच्यादिदिशः
18. S2 om. हे उखे ... ... ईदृशी (L 19)
19. S2 उ for उकारः
20. P1 om. कात्यायनः
22. P1 om. परित्राणाय प्रयच्छामि

कात्यायनः – " अजापयसाऽवसिञ्चति वसवस्त्वेति प्रतिमन्त्रम् " (काश्रौ १६.४.२३) इति। 'वसवस्त्वा' इत्यादिभिश्चतुर्भिर्मन्त्रैः पृथक् पृथगजाक्षीरेणोखामासिञ्चेत्। तेषां पाठस्तु– 'वसवस्त्वाऽऽ-छृन्दन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्रुद्रास्त्वाऽऽ छृन्दन्तु त्रैष्टुभेन. छन्दसाऽङ्गिरस्वत्। आदित्यास्त्वाऽऽ छृन्दन्तु जागतेन छन्दसाऽङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा आ छृन्दन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत्' इति। हे उखे, वसुनामका देवा अङ्गिरस इव त्वाम् ˇआछृन्दन्तु आसिञ्चन्तु। एवमुत्तरत्र योज्यम् ॥५॥

[इति द्वादशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

आ– उद्यच्छति– 'उत्थाय' इति। अनुष्टुप्। पूर्वोऽर्धर्च उखादेवत्यः। उत्तरो मैत्रः। हे उखे, एतस्मादुद्वपनस्थानात् ˇउत्थाय ˇबृहती महती ˇभव। ततः ˇउत्तिष्ठ। उत् उच्चैः उत्थाय च प्रवर्तस्व स्वकीये कर्मणि, यतः ˇत्वं ˇध्रुवा स्थिरासि स्वभावतः॥

पात्रे करोति– 'मित्र' इति। हे ˇमित्र, ˇते तव ˇएताम् ˇउखां ˇपरिददामि। ˇअभित्त्यै अभेदनाय। ˇएषा च उखा ˇमा ˇभेदि मा भिद्यताम्॥

आ छृन्दन्ति– 'वसवस्त्वा' इति। लिङ्गोक्तदेवत्यानि यजूंषि। ˇवसवः देवाः ˇगायत्रेण ˇछन्दसा उखां त्वाम् ˇआछृन्दन्तु। उत्तराण्येवमेव योज्यानि ॥५॥

[इति द्वादशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

[अथ सप्तमोऽनुवाकः]

षष्ठेऽनुवाके उखासंभार उक्तः। सप्तमे त्वौद्ग्रभणमन्त्राः समिदाधानमन्त्राश्चोच्यन्ते॥

आकूतिमग्निं प्रयुजꣳ स्वाहा
मनो मेधामग्निं प्रयुजꣳ स्वाहा ।
चित्तं विज्ञातमग्निं प्रयुजꣳ स्वाहा
वाचो विधृतिमग्निं प्रयुजꣳ स्वाहा ।
प्रजापतये मनवे स्वाहाऽग्नये वैश्वानराय स्वाहा ॥१॥
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति
द्युम्नं वृणीत पुष्यसे स्वाहा ॥२॥

---

5. S2 om. आछृन्दन्तु आ°

7. B1 om. उत्थायेति ... ... स्थिरासि (L 9)

8. H2–3 उद्वपनार्थम् for उद्वपनस्थानात्; M3 उद्वापन° for उद्वपन°; M3 om. बृहती ... ... उत्थाय च (L 9)

औद्ग्रभणादिमन्त्राः]

आकूतिमित्याऽकूतिम् । अग्निम् । प्रयुजमिति प्रऽयुजम् । स्वाहा ।
मनः । मेधाम् ।
चित्तम् । विज्ञातमिति विऽज्ञातम् ।
वाचः । विऽधृतिमिति विऽधृतिम् । अग्निं । प्रयुजमिति प्रऽयुजम् । स्वाहा ।
प्रजापतय इति प्रजाऽपतये । मनवे । अग्नये ।
वैश्वानराय ॥ खैं ॥१॥
विश्वे । देवस्य ॥ व ॥२॥

कात्यायनः – "प्राकृतान्यौद्ग्रभणानि हुत्वा सप्ताग्निकान्याकूतिमिति प्रतिमन्त्रम्" (काश्रौ १६·४·३०) इति। दीक्षाकाले सोमयागकर्तव्यानि 'आकूत्यै प्रयुजेऽग्नये स्वाहा' इति औद्ग्रभणानि हुत्वा पश्चादग्निचयनसंबन्धीनि 'आकूतिमग्निं प्रयुजं स्वाहा' इत्यादीनि सप्तौद्ग्रभणानि प्रत्येकं जुहुयात् ॥ पाठस्तु– 'आकूतिमग्निं प्रयुजं स्वाहा मनो मेधामग्निं प्रयुजं स्वाहा । चित्तं विज्ञातमग्निं प्रयुजं स्वाहा वाचो विधृतिमग्निं प्रयुजं स्वाहा । प्रजापतये मनवे स्वाहाऽग्नये वैश्वानराय स्वाहा ॥ विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा' इति । आकूतिरस्मदीयः सङ्कल्पोऽनुष्ठानविषयः । तं प्रति प्रयुजं प्रेरकम् अग्निम् उद्दिश्य स्वाहा सुहुतमस्तु । अनुष्ठेयस्मरणसाधनं यत् मनः, श्रुतयोर्मन्त्रतन्त्रयोर्धारणाशक्तिर्मेधा तदुभयं प्रति प्रयोजकम् अग्निम् उद्दिश्य सुहुतमिदमस्तु । अविज्ञातस्य अनुष्ठानस्य ज्ञानसाधनं यत् चित्तं, यदपि तेन चित्तेन ज्ञातमनुष्ठानं तदुभयं प्रति प्रेरकम् अग्निम् उद्दिश्य सुहुतमस्तु । वाचः मन्त्रपाठरूपायाः विधृतिं विधारणं प्रति प्रेरकम् अग्निम् उद्दिश्य सुहुतमस्तु । मनवे च मनुष्याणां जनकाय प्रजापतये सुहुतमस्तु । विश्वेषां नराणाम् अनुग्राहकत्वेन वैश्वानराय अग्नये सुहुतमस्तु ॥१॥

विश्वः मर्तः सर्वो मनुष्यः नेतुः फलप्रापकस्य देवस्य दानादिगुणयुक्तस्य सख्यं सखिभावं वुरीत वृणुते प्रार्थयते । किं च, विश्वः सर्वो जनः राये धनाय इषुध्यति प्रार्थयते । तत्कर्मस्वयं धातुः पठितः । किं च, पुष्यसे पोषणाय द्युम्नं यशोऽन्नं वा । यास्केनोक्तत्वात् (द्र· नि ५·५) । वृणीत सर्वो जनः प्रार्थयते । स्वाहा तस्मै प्रेरकाय देवाय सुहुतमस्तु ॥२॥

आ– औद्ग्रभणानि जुहोति– 'आकूतिम्' इति । लिङ्गोक्तदेवत्यानि यजूंषि । आकूतमाकूतिः आत्मनो धर्मः मनसः प्रेरणाहेतुरभिप्रायविशेषः । स एवात्राग्निः । कर्माणि प्रयुङ्क्त इति प्रयुक् । तं प्रयुजं स्वाहा सुहुतमस्तु । "नमःस्वस्ति°" (पा २·३·१६) इत्यादिना उपपदविभक्तिश्चतुर्थी । 'आकूत्यै प्रयुजेऽग्नये स्वाहा' इत्येवमेवोपरितना अपि मन्त्रा व्याख्येयाः ।

---

14. P1 युञ्जं for प्रयुजं; S2 om. अग्निम्

20. S2 om. सर्वो मनुष्यः

24. H2-3 औद्ग्रावाहणानि for औद्ग्रभणानि

27. H2-3 M3 °तनमन्त्रा अपि for °तना अपि मन्त्राः

मनः मेधां मनसः प्रवृत्तिम् अग्निम् । चित्तं विज्ञातम् । ततश्चित्तस्य चिन्तनस्य संस्कारस्य वा विज्ञान-(त ?)स्य प्रवृत्तिम् । वाचः विधृतिम् । ततः वाचः विधारयिता अग्निः प्रकाशको भवति । प्रजापतये मनवे मनोऽनुकारिणे अग्नये वैश्वानराय विश्वानरपुत्राय ॥१॥

'विश्वो देवस्य' इति व्याख्यातम् ॥२॥

मा सु भित्था मा सु रिषोऽम्ब धृष्णु वीरयस्व सु ।
अग्निश्चेदं करिष्यथः ॥३॥

मा । सु । भित्थाः । मा । सु । रिषः । अम्ब । धृष्णु । वीरयस्व । सु ।
अग्निः । च । इदम् । करिष्यथः ॥ हुं ॥३॥

सा– कात्यायनः – "अध्वर्युयजमानयोरन्यतर उखामाहवनीयेऽधिश्रयति मा सु भित्था इति" (द्र. काश्रौ १६.४.३१) इति । मन्त्रद्वयस्य प्रतीकग्रहणमिदम् । अनेन मन्त्रेण 'दृंहस्व' इत्युत्तरेण अध्वर्युयजमानयोरन्यतर उखामाहवनीये स्थापयेत् । तत्र प्रथममन्त्रपाठस्तु– 'मा सु भित्था मा सु रिषोऽम्ब धृष्णु वीरयस्व सु । अग्निश्चेदं करिष्यथः' इति । हे उखे, त्वं मा भित्थाः भिन्ना मा भव । तदिदमभिन्नत्वं सुष्ठु कर्तव्यम् । तथा मा रिषः स्फुटनेनापि हिंसिता मा भव । तदेतदस्फुटनं सुष्ठु कर्तव्यम् । सर्वात्मना द्वैधीभावो भेदः । लेशस्य पृथग्भावः स्फुटनम् । तदुभयं तव मा भूदित्यर्थः । हे धृष्णु धर्षणयुक्ते हे अम्ब हे मातः, उखे त्वं वीरयस्व शोभनमग्निधारणलक्षणं वीरकर्म कुरुष्व । किं च अग्निः च त्वं च मिलित्वा इदम् अस्मदीयं कर्म करिष्यथः ॥३॥

आ– 'मा सु भित्थाः' इति, 'दृंहस्व' इति च द्वे उखादेवत्ये गायत्रीत्रिष्टुभौ । 'अग्निश्चेदम्' इति पादमाग्नेयम् । हे उखे । भिद विदारणे । मा सु भित्थाः मा भिद्यस्व । सुशब्दोऽनर्थकः । 'मा सु रिषः' । रिषतिर्हिंसार्थः । मा रिषः स्वात्मानं मा हिंसीः । हे अम्ब हे मातः, धृष्णु धृष्टं प्रगल्भं वीरयस्व । अग्निधारणलक्षणं शोभनं वीरकर्म कुरुष्व । किं च, इत उतरम् अग्निः च त्वं इदं कर्म आ समाप्तेः करिष्यथः ॥३॥

---

1. H2 चिन्तन° for चिन्तनस्य
13. P1 om. प्रथम°
16. S2 before तव adds ते
20. M3 om. मा भिद्यस्व ... ... °नर्थकः (L 21)
21. M3 om. रिषतिर् ... ... रिषः; H2–3 मा सु रिषः for मा रिषः; M3 स्वामात्मानं, H3 त्वामात्मानं for स्वात्मानं
22. H2–3 प्रभिभूतं for प्रगल्भं
23. M3 H2–3 इह for इदं; H2–3 आसनान्तः; M3 आसमान्तः for आसमाप्तेः

औद्ग्रभणादिमन्त्राः]

दृꣳहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृताऽसि ।
जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ॥४॥

दृꣳहस्व । देवि । पृथिवि । स्वस्तये । आसुरी । माया । स्वधया । कृता । असि ।
जुष्टम् । देवेभ्यः । इदम् । अस्तु । हव्यम् ।
अरिष्टा । त्वम् । उत् । इहि । यज्ञे । अस्मिन् ॥ श्यूः ॥४॥

सा– अथ द्वितीयमन्त्रः – 'दृꣳहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृतासि । जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन्' इति । हे पृथिवि देवि, मृत्कार्यत्वात् पृथिवीरूपत्वं, मन्त्रैर्निष्पादितत्वात् देवतात्वम् । तथाविधे हे उखे, स्वस्तये यजमानस्य क्षेमार्थं दृꣳहस्व दृढा भव । आसुरी माया शम्बराद्यसुरनिर्मितमायेव स्वधया कृता असि कव्यप्रधानया स्वधया निर्मिताऽसि । स्वधाशब्देनान्नमात्रमुपलक्ष्यते । अन्नेन निमित्तभूतेन तद्धेतुयागसिद्ध्यर्थं निष्पादितासि । आसुरी माया यद्वदचिन्त्यरचनारूपं चित्रं वस्तु सहसा भूत्वा प्रतिभाति तद्वत् त्वमपि द्विस्तनत्वादिरचनया युक्ता निष्पन्नाऽसीत्यर्थः । त्वन्मुखान्निष्पत्स्यमानम् इदं हव्यं जुष्टं प्रियम् अस्तु । त्वम् अपि अरिष्टा केनाप्यहिंसिता सती अस्मिन् यज्ञे उदिहि उद्गता भव ॥४॥

आ– 'दृꣳहस्व' इति । पृथिवीशब्दः पृथिवीकार्यभूतायामुखायां वर्तते । हे उखे हे पृथिवि हे देवि, दृꣳहस्व स्वात्मानं दृढीकुरु । स्वस्तये अविनाशाय । 'आसुरी माया स्वधया कृतासि'। असुः प्राणः, परमात्मा तत्र रमते इति असुरः प्राणदेवता । प्राणदेवतासंबन्धिनी आसुरी । माया आत्मने मापयति ज्ञापयतीति माया प्रज्ञा । स्वधया । स्वधाशब्दोऽन्नवचनः । अन्नेन निमित्तभूतेन कृता असि । किं च– 'जुष्टम् देवेभ्यः' । जुष्टम् अभिरुचितम् इदं हव्यं हविः अस्तु । त्वत्प्रसादात् उखायामग्नावाहुतयो हूयन्ते । अस्मिन् यज्ञे वर्तमाने उखा त्वम् अपि अरिष्टा अनवखण्डिता हिंसारहिता वा उदिहि उद्गच्छ ॥४॥

द्रुवन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः ।
सहसस्पुत्रो अद्भुतः ॥५॥

9. H2–3 विना for स्वधया निर्मिताऽसि [L 10]

10. P1 अन्नमत्र for अन्नमात्रम्; S2 तेन for अन्नेन

16. H2–3 M3 प्राणो देवता for प्राणदेवता, H2–3 M3 om. प्राणदेवता°

17. M3 माज्मिने, B1 मात्मने, H3 मान्दमाने for माया आत्मने

18. H2–3 M3 अग्निनिमित्त° for निमित्त°

19. H2–3 'उखाधो°, M3 उखास्तो° for उखायाम्; B1 om. अग्नौ; B1 हयन्ते for हूयन्ते

द्र्वन्न इति द्रुऽअंन्नः । सर्पिरासुतिरिति सर्पिःऽआसुतिः । प्रत्नः । होता । वरेण्यः । सहसः । पुत्रः । अद्भुतः ॥ ञो ॥५॥

सा- "त्रयोदशास्यां प्रादेशमात्राः समिध आदधाति ॥ घृताक्तां कार्मुकीं द्र्वन्न इति" (काश्रौ १६·४·३३-३५) इति । अस्यां तप्यमानायामुखायां प्रादेशपरिमितास्त्रयोदशसंख्याकाः समिध आदध्यात् । तत्र प्रथमं कार्मुकसंबन्धिनीं घृतेनाक्तां समिधं 'द्र्वन्नः' इत्येतेनादध्यात् । पाठस्तु- 'द्र्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः' इति । अत्रोत्पत्स्यमानोऽग्निरेतैर्विशेषणैः प्रशस्यते । द्रुशब्देन वृक्षा उच्यन्ते । "द्रुषदमित्याह । [वनस्पतयो वै द्रुः ।] वनस्पतीनामेवैतेन सूयते" (तैब्रा १·३·८·१) इति श्रुत्यन्तरात् । द्रवो वृक्षा एवान्नं यस्यासौ ˇद्र्वन्नः । सर्पिराहारत्वेन सूयते प्रक्षिप्यते यस्मिन्निति ˇसर्पिरासुतिः । ˇप्रत्नः पुरातनः ˇहोता देवानामाह्वाता ˇवरेण्यः वरणीयः । ˇसहसः बलस्य ˇपुत्रः । मथनहेतुना बलेनोत्पद्यमानत्वात् ˇअद्भुतः आश्चर्यरूपः । एवंभूत उखायां तिष्ठमानोऽग्निः कार्मुकीं समिधं भक्षयत्विति शेषः ॥५॥

आ- उख्येऽग्नौ त्रयोदश समिध आदधाति । त्रयोदशभिराग्नेयीभिः ऋग्भिः । तत्र द्वे गायत्र्यौ । 'द्र्वन्नः' इति । द्रु गतौ । द्रवणात् । द्रु [र्] एव स[मि]त् अन्नं यस्य स ˇद्र्वन्नः । सर्पिर्घृतम् आसुतिरासवस्थानीयं यस्याग्नेः स ˇसर्पिरासुतिः । ˇप्रत्नः पुराणः ˇहोता देवानामाह्वाता ˇवरेण्यः वरणीयः । ˇसहसः ˇपुत्रः बलस्य पुत्रः । बलेन मथ्यमानो जायत इति । ˇअद्भुतः अत्यन्ताभिनवः अनन्यसमः । य एवंविधगुणोऽग्निः स कार्मुकीं समिधं भक्षयत्विति शेषः ॥५॥

परस्या अधि संवतोऽवराँ३ अभ्यातर ।

यत्राहमस्मि ताँ३ अव ॥६॥

परस्याः । अधि । संवत इति सम्ऽवतः । अवरान् । अभि । आ । तर । यत्र । अहम् । अस्मि । तान् । अव ॥ ख्रि ॥६॥

3. S2 om. अस्यां; P1 °मात्रीः for °मात्राः; P1 घृतोन्नां for घृताक्तां, P1 after घृताक्तां ins. उन्दी क्लेदने
5. P1 om. पाठस्तु
7. S2 यजते for सूयते
8. P1 यस्मात् for यस्य; S2 after द्र्वन्नः adds: द्रु गतौ द्रवः अन्नं यस्य सः । सर्पिः घृतम् आसवः स्थानं यस्येति वा
10. P1 after बलस्य adds वायोः; P1 प्रथम° for मथन°
13. B1 om. इति
15. B1 om. बलस्य पुत्रः
16. H2-3 M3 after समिधं ins. अग्निं

औद्ग्रभणादिमन्त्राः]

सा– कात्यायनः – "वैकङ्कतीं परस्या इति" (काश्रौ १६.४.३६) इति। वैकङ्कतवृक्षसंबन्धिनीं समिधं 'परस्याः' इत्यनेनादध्यात्। पाठस्तु– 'परस्या अधि संवतोऽवराँ३ अभ्यातर। यत्राहमस्मि ताँ३ अव' इति। सम्यग्वनुते देवान् भजते यस्यां क्रियायां सा क्रिया संवत्, तस्याः संवतः। vपरस्याः vसंवतः vअधि उत्कृष्टाया इष्टेरधिष्ठानायास्त्वम् vअवरान् निकृष्टान् अप्यस्मान् vअभ्यातर आभिमुख्येनागत्य दुःखानि तारय। vयत्र येषु बन्धुषु vअहम् vअस्मि vतान् अपि बन्धून् vअव रक्ष ॥६॥

आ– वैकङ्कतीमादधाति– 'परस्या अधि' इति। विरूप आङ्गिरस ऋषिः। आग्नेयी गायत्री। संवत इति संग्रामनाम। vपरस्याः संबन्धिनः vसंवतः vअधि संग्रामात् सकाशात् vअवरान् अस्मदीयान् vअभ्यातर, हे अग्ने, अभ्यागच्छ। ततः vयत्र जनपदे vअहम् vअस्मि अहं स्थितोऽस्मि vतान् जनपदान् vअव पालय तर्पय॥६॥

परमस्याः परावतो रोहिदश्व इहा गहि।
पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मृधः ॥७॥

परमस्याः। परावत इति पराऽवतः।
रोहिदश्व इति रोहित्ऽअश्वः। इह। आ। गहि।
पुरीष्यः। पुरुप्रिय इति पुरुऽप्रियः। अग्ने। त्वम्। तर। मृधः ॥ द्विं ॥७॥

सा– कात्यायनः – "औदुम्बरीं परमस्या इति" (काश्रौ १६.४.३७) इति। उदुम्बरवृक्षसंबन्धिनीं समिधमादध्यात्। पाठस्तु– 'परमस्याः परावतो रोहिदश्व इहा गहि। पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मृधः' इति। हे vअग्ने, vपरमस्याः vपरावतः अतिदूरात्। परावच्छब्दो दूरनामसु पठितः। [परमाशब्दस्य] छान्दसी सर्वनामसंज्ञा। vइह vआगहि अत्रागच्छ। कीदृशस्त्वम्? vरोहिदश्वः। लोहितवर्णोऽश्वो यस्यासौ रोहिदश्वः। इ (अ?) त एवान्यत्राम्नायते –"रोहितेन अग्निर्देवानागच्छति" [इति]। पुरीषम् उखाहेतुभूतं पांसुं वहतीति vपुरीष्यः। पुरूणां बहूनां यजमानानां प्रियः vपुरुप्रियः। तादृशः vत्वं vमृधः vतर शत्रूनतिलङ्घय ॥७॥

आ– औदुम्बरीमादधाति– 'परमस्याः परावतः' इति। अनुष्टुबाग्नेयी आरुणिः। परावदिति दूरनामसु पठितम्। 'परमस्याः परावतः'। vपरमस्याः अतिदूरदिशः vपरावतः ततोऽ-

3. P1 before सम्यग् adds हे वैकङ्कती समित्

9. B1 after अवरान् adds अपरान्

17. P1 om. पाठस्तु

18. S2 om. हे अग्ने ... ... °संज्ञा (L 19)

19. S2 om. अत्र

24. H3 M3 °दर्शः for °दिशः

प्यतिदूरात्। रोहिदश्वः। रोहितोऽश्वोऽग्नेः प्रसिद्धः। रोहित्। रोहितोऽश्वो यस्याग्नेस्तत्संबोधनं रोहिदश्व (?)। इह आगहि आगच्छ। यतस्त्वं पुरीष्यः पशव्योऽसि। पुरुप्रियः बहूनां प्रियश्च। आगत्य च हे अग्ने, त्वं मृधः संग्रामात् तर। तरतिरत्र विनाशार्थः ॥७॥

यदग्ने कानि कानि चिदा ते दारूणि दध्मसि।
सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥८॥

यत्। अग्ने। कानि। कानि। चित्। आ। ते। दारूणि। दध्मसि।
सर्वम्। तत्। अस्तु। ते। घृतम्। तत्। जुषस्व। यविष्ठ्य ॥ सें ॥८॥

सा– "अपरशुवृक्णां यदग्न इति" (काश्रौ १६·४·३८) इति। परशुना [न] छिन्नां समिधमादध्यात्। पाठस्तु– 'यदग्ने कानि कानि चिदा ते दारूणि दध्मसि। सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य' इति। हे अग्ने, त्वदर्थे यत् यानि कानि कानि चित् दारूणि। दारुशब्देनात्र कुठारच्छेदनरहितमवदारितं काष्ठमुच्यते। तादृशानि कानि कान्यप्यरण्ये पतितानि काष्ठान्यानीय दध्मसि धारयामः। तत् सर्वं काष्ठजातं ते त्वदर्थं घृतं घृतवत् प्रियम् अस्तु। हे यविष्ठ्य, युवतम तत् दारुजातं जुषस्व सेवस्व ॥८॥

आ– अपरशुवृक्णामादधाति– 'यदग्ने' इति। जमदग्निः आग्नेय्यनुष्टुप्। हे श्रीभगवन् अग्ने, यत् यानि कानि कानि चित् दारूणि समिधः ते त्वयि वयं आ दध्मसि। इकारश्छान्दसः। दध्मः। तत् सर्वं ते तव घृतम् अस्तु स्यात्। यविष्ठ्य। स्वार्थे यत्प्रत्ययः। यविष्ठ एव यविष्ठ्यः युवतमः। तत्संबोधनं यविष्ठ्य। तत् घृतं जुषस्व सेवस्व ॥८॥

यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति।
सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥९॥

यत्। अत्ति। उपजिह्विकेत्युपऽजिह्विका। यत्। वम्रः। अतिसर्पतीत्यतिऽसर्पति।
सर्वम्। तत्। अस्तु। ते। घृतम्। तत्। जुषस्व। यविष्ठ्य ॥ चुं ॥९॥

---

1. B1 om. रोहित्; M3 इति for second रोहितः
8. P1 परशु° for अपरशु°
12. S2 om. ते
14. B1 °वृक्षम्, M3 H2 °वृक्षाम् for °वृक्णा; H2–3 before हे add यदग्ने कानि कानिचिदा ते रूपाणि
15. B1 M3 H2–3 रूपाणि for दारूणि
16. M3 H2–3 after सर्वं ins. अग्ने

सा– कात्यायनः – "अधःशयां यदत्तीति" (काश्रौ १६.४.३९) इति। स्वयमेव भूमौ पतितां समिधमादध्यात्। पाठस्तु– 'यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति। सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य' इति। प्रौढाः प्रधानाः ज्वाला जिह्वास्तत्समीपवर्तिनी क्षुद्रज्वालोपजिह्विका। अस्माभिरानीतेषु दारुषु मध्ये यत् दारु महारण्ये दावाग्निः उपजिह्विका अत्यल्पज्वाला अत्ति भक्षयति ईषद्दहतीत्यर्थः। वम्रशब्दः पिपीलिकासदृशं क्षुद्रजीवमाचष्टे। स च यत् काष्ठम् अतिसर्पति अतिशयेन प्राप्नोति; काष्ठावयवेषु तत्र तत्र सारं भक्षयतीत्यर्थः; तत् सर्वं घृतम् अस्तु इत्यादि पूर्ववत् ॥९॥

आ– अधःशयामादधाति– 'यदत्ति' इति । आग्नेय्यनुष्टुप्। यत् यत् काष्ठम् अत्ति भक्षयति उपजिह्विका उपदीका यदत्ति; यत् वम्रः वल्मीकः यत् काष्ठम् अतिसर्पति अतीत्य वर्धते; तत् सर्वं ते घृतम् अस्तु। हे यविष्ठ्य, अतः तत् घृतं जुषस्व ॥९॥

अहरहरप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै।
रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥१०॥

अहरहरित्यहःऽअहः। अप्रयावमित्यप्रऽयावम्। भरन्तः।
अश्वायेवेत्यश्वायऽइव। तिष्ठते। घासम्। अस्मै।
रायः। पोषेण। सम्। इषा। मदन्तः।
अग्ने। मा। ते। प्रतिवेशा इति प्रतिऽवेशाः। रिषाम ॥ त्रैं ॥१०॥

सा– कात्यायनः – "पालाशीः प्रत्यृचमहरहरित्युपोत्तमां क्षत्रियस्येच्छन्नुत्तमां पुरोहितस्यान्यस्योभे स्वाहाकारः सर्वासु" (काश्रौ १६.४.४०-४४) इति। त्रयोदशसंख्यासु समित्सु मध्ये 'द्वन्नः' इत्यादिभिर्मन्त्रैः कार्मुक्यादीन् पञ्च समिद्विशेषान् संधाय इत उत्तरैः 'अहरहः' इत्यादिकैर्मन्त्रैः क्रमेण पलाशसंबन्धिनीः समिध आदध्यात्। यदि क्षत्रियो यजमानः स्यात्तत्र उपोत्तमामादध्यात्। यदि पुरोहितः स्यात्तत्रान्तिमामादध्यात्। यदि क्षत्रियपुरोहिताभ्यामुभाभ्यां व्यतिरिक्तः स्यात्तत्रोपोत्तमामन्तिमे उभे समिधावादध्यात्। सर्वास्वृक्षु स्वाहाकारः प्रयोक्तव्यः। त्रयोदशसंख्यापक्षे 'अहरहः' इत्ययं षष्ठो मन्त्रः। 'अहरहरप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै। रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम' इति। हे अग्ने, ते तव प्रतिवेशाः प्रत्यसन्ना वयं मा रिषाम हिंसनं मा प्राप्नुमः। किं कुर्वन्तः? रायस्पोषेण धनपुष्ट्या इषा अन्नेन च मदन्तः हर्षं कुर्वन्तः। तथा अहरहः अप्रयावं प्रतिदिनं पृथग्भावमकृत्वा, एकमपि दिनमवर्जयित्वेत्यर्थः। अस्मै अग्नये घासं समिद्रूपं भक्ष्यं भरन्तः संपादयन्तः। तत्र दृष्टान्तः – तिष्ठते अश्वायेव। वाजिशालायां बध्वा स्थापिताय प्रौढायाश्वाय एकमपि दिनमवर्जयित्वा यथा घासं प्रयच्छन्ति तद्वत् ॥१०॥

---

1. S2 after अत्ति adds उपेति

16. S2 om. इच्छन्

25. P1 with insertion on the margin, adds यू मिश्रणे इत्यस्य नपूर्वस्य णमुलन्तस्य रूपम्।

[औदूग्रभणादिमन्त्राः

आ– पालाश्य उत्करा भवन्ति– 'अहरहः' इति 'नाभा पृथिव्या' इति च द्वे आग्नेय्यौ त्रिष्टुभौ। हे श्रीभगवन् अग्ने, अहरहः सततम् अस्मै अग्नये तुभ्यम् अप्रयावं विशिष्टमन्नं भरन्तः। कथमिवेति सोपमानं दर्शयति– अश्वायेव तिष्ठते घासम्। तिष्ठते पुरतः स्थिताय यथा अश्वाय अश्वार्थं घासं यवसं हरन्त्येवम् अस्मै तुभ्यमन्नमाहरन्तः। त्वद्दत्तेन रायस्पोषेण युष्मद्दत्तया इषा च अन्नेन च मदन्तः हर्षं कुर्वन्तः। मदं प्राप्तवन्तो वयं हे श्रीभगवन्नग्ने, ते त्वदीयाः प्रतिवेशाः प्रतिवेशिकाः त्वदाश्रयाः मा रिषाम मा विनश्येमहि ॥१०॥

नाभा पृथिव्याः समिधाने अग्नौ रायस्पोषाय बृहते हवामहे ।
इरंमदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥११॥

नाभा । पृथिव्याः । समिधान इति समऽइधाने । अग्नौ ।
रायः । पोषाय । बृहते । हवामहे ।
इरंमदमितीरम्ऽमदम् । बृहदुक्थमिति बृहत्ऽउक्थम् । यजत्रम् ।
जेतारम् । अग्निम् । पृतनासु । सासहिम् । ससहिमिति ससहिम् ॥ थूं ॥११॥

सा– अथ सप्तमः – 'नाभा पृथिव्याः समिधाने अग्नौ रायस्पोषाय बृहते हवामहे। इरंमदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम्' इति। नाभा पृथिव्याः पृथिवीरूपाया उखाया नाभौ मध्ये समिधाने सम्यक् दीप्यमाने अग्नौ [आहवनीयाख्ये] तदभिमानिनम् अग्निं देवं हवामहे आह्वयामः। किमर्थम्? बृहते प्रौढाय रायस्पोषाय धनस्य पोषाय। कीदृशमग्निम्? इरंमदम्। इरयाऽन्नेन माद्यति(इति)इरंमदः, तथाविधम्। बृहन्ति प्रौढानि उक्थानि प्रशंसनानि यस्यासौ बृहदुक्थः, तादृशम्। यजत्रं यागहेतुम्। जेतारं रक्षसादिविषये जयशीलम्। पृतनासु संग्रामेषु [सासहिम्] अस्मच्छत्रूणामतिशयेन सोढारम् ॥११॥

---

1. H2–3 before पालाश्य add अवनयत्; B1 पालाश्यत्तरा for पालाश्य उत्कराः। The readings here should be पालाशा उत्कराः or पालाश्य उखाः; the word उत्करः is masculine and means rubbish heap which hardly applies in the present context, but no Manuscript has any other variant.

4. M3 H2–3 om. यथा; B1 हरन्तीति वासै, M3 हरत्यैवासै H3 अहरन्त्यैवासै for हरन्त्येवम् अस्मै

5. B1 M3 H2–3 प्राप्ता वा for प्राप्तवन्तो

15. S2 om. नाभौ

औद्ग्रभणादिमन्त्राः]

आ– vनाभा vपृथिव्याः नाभौ सर्वेषामाश्रयभूते नाभिस्थानीये vसमिधाने vअग्नौ संदीप्यमाने आहवनीये अग्नौ प्रसिद्धाग्निलक्षणाधिष्ठाने । 'रायस्पोषाय बृहते'। vबृहते महते vरायस्पोषाय धनस्य पोषाय मद्धनस्य पुष्ट्यर्थं वक्ष्यमाणगुणविशिष्टमग्न्यभिमानिदेवतारूपं श्रीभगवन्तम् vअग्निं वयं vहवामहे आह्वयामहे । कथंभूतमिति । 'इरंमदं बृहदुक्थं यजत्रं जेतारमग्निम्' इति । इरा इत्यन्ननाम । इरया अन्नेन माद्यतीति इरंमदः । तम् vइरंमदम् । vबृहदुक्थं बृहच्छस्त्रम् । सर्वाणि भूतानि अन्तर्यामितया उत्पादयतीति श्रीभगवानग्निरुक्थ इत्युच्यते । बृहंश्चासावुक्थश्चेति बृहदुक्थः, तम् । यजते यागं कुरुते यजमानायाभीष्टं राति ददाति इति यजत्रः, तं vयजत्रम् । vजेतारम् । जयतीति जेता, तं जेतारम् । vपृतनासु संग्रामेषु vसासहिं सोढारम् अभिभावितारं श्रीभगवन्तं सर्वज्ञमग्निं वयं हवामहे इति संबन्धः ॥११॥

याः सेना अभीत्वरीराव्याधिनीरुगणा उत ।
ये स्तेना ये च तस्करास्तांस्ते अग्नेऽपि दधाम्यास्ये ॥१२॥

याः । सेनाः । अभीत्वरीरित्यभिऽइत्वरीः । आव्याधिनीरित्याऽव्याधिनीः । उगणाः । उत ।
ये । स्तेनाः । ये । च । तस्कराः ।
तान् । ते । अग्ने । अपि । दधामि । आस्ये ॥ छूयैं ॥१२॥

सा– अथाष्टमः – 'याः सेना अभीत्वरीराव्याधिनीरुगणा उत । ये स्तेना ये च तस्करास्तांस्ते अग्नेऽपि दधाम्यास्ये' इति । vयाः काश्चित् परकीयसेनाः vअभीत्वरीः अस्मदाभिमुख्येन गमनशीलाः vआव्याधिनीः सर्वतोऽस्मान् पीडयन्त्य vउगणाः उत्कृष्टगणोपेता बहुस्तोमा इत्यर्थः । एवंविधा याः vसेनाः सन्ति, vउत अपि च vये vस्तेनाः गुप्तचौराः vये vच vतस्कराः प्रकटाः vतान् सर्वान् हे vअग्ने, vते तव vआस्ये मुखे vअपि vदधामि प्रक्षिपामि ॥१२॥

आ– 'याः सेनाः' इत्यादयः सर्वा अनुष्टुभः आग्नेय्यः । प्रागन्नपतीयाया(?) वा । vयाः vसेनाः । क्वरप्प्रत्ययान्तस्येण् गताविত्यस्य रूपम् इत्वरीरिति । अभीत्वर्यः अभियायिन्यः । vआव्याधिनीः, या आविद्ध्यन्तीत्याव्याधिन्यः आव्याधिनीः । उतशब्दोऽप्यर्थे । vउगणाः । उद्गूर्णो गणो यासां सेनानां ता उगणाः । पृषोदरत्वाच्छब्दसाधुत्वम् । vये च vस्तेनाः चोराः vये vच vतस्कराः ।

---

2. M3 H2–3 अप्रसिद्धानि, B1 प्रसिद्धानि for प्रसिद्धाग्नि°

3. B1 महद्धनस्य for मद्धनस्य

16. P1 after अभित्वरीः ins. इण् गतौ अस्मादण् नशजसर्तिभ्य इति क्यच् ह्रस्वस्य तुक् टित्वात् ङीप् ।

17. P1 after उगणा ins. पृषोदरत्वात्तकारलोपः

"तस्करस्तत्करोति यत्पापकम्" (नि ३·१४) इति नैरुक्ताः। इति vतान् तांश्च हे श्रीभगवन् vअग्ने, vते vआस्ये तव मुखे vअपिदधामि प्रक्षिपामि भक्षणाय ॥१२॥

दꣳष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्कराँ३ उत ।
हनुभ्याꣳस्तेनान् भगवस्ताꣳस्त्वं खाद सुखादितान् ॥१३॥

दꣳष्ट्राभ्याम् । मलिम्लून् । जम्भ्यैः । तस्करान् । उत ।
हनुभ्यामिति हनुऽभ्याम् । स्तेनान् । भगव इति भगऽवः ।
तान् । त्वम् । खाद । सुखादितानिति सुऽखादितान् ॥ ठिं ॥१३॥

सा– अथ नवमः – 'दꣳष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्कराँ३ उत। हनुभ्याꣳस्तेनान् भगवस्ताँस्त्वं खाद सुखादितान्' इति। गुप्ताः प्रकटाश्च ये द्विविधाश्चौराः। प्रकटा अपि पुनर्द्विविधाः – अरण्येषु मार्गमध्ये अपहृत्य प्रत्यहमेव पलायमानाः प्रकटाः। ततोऽप्यतिप्रकटाः निर्भया ग्रामेष्वेवागत्य बन्दीकाराः। तेऽप्यत्र मलिम्लव इत्युच्यन्ते। मलं पापाधिक्यमेषामस्तीति मलिनः। तथाविधा भूत्वा म्लायन्ति चौर्यं कुर्वन्तीति मलिम्लवः। दन्तपङ्क्तिमध्ये याभ्यां तीक्ष्णदन्ताभ्यां क्रमुकादिफलं भक्ष्यते ते दंष्ट्रे। ततः पुरोवर्तिनो दृश्यमाना दन्ता जम्भ्याः। अन्तर्लीने च हनू। तत्र vमलिम्लून् vदंष्ट्राभ्यां पीडयित्वा vजम्भ्यैः vतस्करान् अपि पीडयित्वा vहनुभ्यां vस्तेनान् पीडयित्वा हे vभगवः पूजनीयाग्ने, vतान् सर्वान् सुष्ठु खादितान् पुनर्जीवनरहिता यथा भवन्ति तथा vत्वं vखाद भक्षय ॥१३॥

आ– 'दंष्ट्राभ्याम्' इति। दंशनशीलाभ्यां vदंष्ट्राभ्यां दृढाभ्याम्। vमलिम्लून् मलिम्लवः ठकाः। ठकयन्तीति ठकाः मूढाः। तान् vतस्करान् vउत परवित्तापहरणकरान्। vजम्भ्यैः। जभि जृभि गात्रविनामे। जम्भनात् गात्रविनामात् जम्भः। जम्भवृत्तिमाश्रिताः [स्थिताः] तदर्हा [वा] जम्भ्याः। तैः तस्करान् उत अपि च। vहनुभ्यां प्रसिद्धहनुभ्यां vस्तेनान्, vभगवः हे भगवन् महदैश्वर्ययुक्त, vतान् एतान् vसुखादितान् vत्वं vखाद ॥१३॥

---

2. H2–3 M3 अभि° for अपि°

12. S2 मलिम्लुचः for मलिम्लवः

13. S2 मलिम्लुचः for मलिम्लून्

16. M3 दंष्ट्रासु for दंष्ट्राभ्यां; B1 दाढाभ्यां° for दृढाभ्यां

17. B1 ढकाः ढय (? क) यन्तीति ढकाः, M3 धकाः। धकयन्तीति धकः for ठकाः … ठकाः; H3 भूत्याम्, M3 व्याढाम for मूढाः; B1 om. उत; B1 °हारकरणान्, M3 °हारार्थान्; H2–3 °हरणकथान् for °हरणकरान्

19. H2 om. प्रसिद्धहनुभ्यां

20. M3 H3 after खाद add दंष्ट्राभ्यां मलिम्लून् जम्भ्यैः तस्करान् हनुभ्यां स्तेनान् त्वं खाद

औद्ग्रभणादिमन्त्राः]

ये जनेषु मलिम्लवः स्तेनासस्तस्करा वने ।
ये कक्षेष्वघायवस्तांस्ते दधामि जम्भयोः ॥१४॥

ये । जनेषु । मलिम्लवः । स्तेनासः । तस्कराः । वने ।
ये । कक्षेषु । अघायवः । अघयव इत्यघऽयवः ।
तान् । ते । दधामि । जम्भयोः ॥ क्युं ॥१४॥

सा– अथ दशमः – 'ये जनेषु मलिम्लवः स्तेनासस्तस्करा वने । ये कक्षेष्वघायवस्तांस्ते दधामि जम्भयोः' इति । ग्रामवर्तिषु ᵛजनेषु ᵛवने गच्छत्सु च ᵛये त्रिविधाः पूर्वोक्ताश्चौराः सन्ति, ᵛये चान्ये व्याघ्रादयः ᵛकक्षेषु कुञ्जेषु स्थित्वा ᵛअघायवः भवन्ति । अघं पापं हिंसनमिच्छन्तीत्यघायवः । ᵛतान् सर्वान् ᵛते तव ᵛजम्भयोः ᵛदधामि स्थापयामि ॥१४॥

आ– ᵛये ᵛजनेषु ᵛमलिम्लवः ᵛस्तेनासः स्तेनाः ᵛवने अटव्यां ये ᵛतस्कराः वनाश्रिताः । कुञ्जेषु नदीपर्वतकक्षेषु ᵛअघायवः । अघं पापं परहिंसादिरूपं परस्मै इच्छन्तीति अघायवः । ᵛतान् ᵛते तव ᵛजम्भयोः ᵛदधामि स्थापयामि भक्षणाय ॥१४॥

यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्यो अस्मान् धिप्साच्च सर्वं तं मस्मसा कुरु ॥१५॥

यः । अस्मभ्यम् । अरातीयात् । अरातियादित्यरातिऽयात् ।
यः । च । नः । द्वेषते । जनः ।
निन्दात् । यः । अस्मान् । धिप्सात् । च । सर्वम् । तम् । मस्मसा । कुरु ॥ ड्वैं ॥१५॥

सा– अथैकादशः – 'यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः । निन्दाद्यो अस्मान् धिप्साच्च सर्वं तं मस्मसा कुरु' इति । पूर्वं चौरभेदा दर्शिताः । इदानीं शत्रुभेदा उच्यन्ते । ते च चतुर्विधाः । अरातयो द्वेषिणो निन्दका [जिघांसव] श्चेति । तत्र दातव्यत्वेन प्राप्तं धनं यो न ददाति सोऽयमरातिः । कार्यविघातं यः करोति स द्वेषी । वाग्दौर्जन्यमात्रं यः करोति स निन्दकः । हन्तुकामश्चतुर्थः । तत्र ᵛयः

7. S2 ग्रीष्म° for ग्राम°
8. P1 with insertion after second अघायवः adds on the margin छन्दसि परेच्छायामित्यघशब्दात् क्यच् । क्यः छन्दसीत्युप्रत्ययः । एवमघायुरिति सिद्धिः
11. M3 कुञ्जरेषु for कुञ्जेषु
12. B1 om. ते; H2-3 M3 भक्षयामि for भक्षणाय
19. P1 S2 त्रिविधाः for चतुर्विधाः

अस्मभ्यम् अरातीयात् अरातित्वमिच्छति, यः च जनः नः अस्मान् द्वेषते कार्यनाशेन बाधते, यः अन्यः निन्दात् निन्दति, यः च अपरः अस्मान् धिप्सात्। दम्भेः सन्नन्तस्य अभ्यासलोपः। दम्भितुं हिंसितुमिच्छति, यश्च नोऽस्मान् द्वेषते कार्यनाशेन बाधते तं सर्वं जनं मस्मसा कुरु, चूर्णनजन्यस्य शब्दस्यानुकरणं मस्मसेति। चूर्णीकुर्वित्यर्थः ॥१५॥

आ– 'योऽस्मभ्यम्' इति। यः मनुष्यः अस्मभ्यम् अस्मदर्थम् अरातीयात् अरातिवदाचरेत। अरातिः शत्रुः। 'यश्च नो द्वेषते जनः'। यः च जनः नः अस्मान् द्वेषते द्वेषं करोति। अस्मान् यः च निन्दात् निन्दति। यः अस्मान् धिप्सात्। दम्भतेः सनि अभ्यासलोपः। यो दम्भितुमिच्छतीति। धिप्सात् हिंसितुमिच्छेत्। तं सर्वं शत्रुजातं मस्मसा। मस्मसेति डाजन्तोऽयं शब्दोऽनुकरणे। यथा भक्ष्यमाणे मस्मसाशब्दं कुर्वन्ति तथा कुरु इत्यर्थः ॥१५॥

सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम्।
सꣳशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ॥१६॥

सꣳशितमिति सम्ऽशितम्। मे। ब्रह्म।
सꣳशितमिति सम्ऽशितम्। वीर्यम्। बलम्।
सꣳशितमिति सम्ऽशितम्। क्षत्रम्। जिष्णु।
यस्य। अहम्। अस्मि। पुरोहित इति पुरःऽहितः ॥ थीः ॥१६॥

सा– अथ द्वादशः – "सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम्। सꣳशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः" इति। मे मदीयं ब्राह्मण्यं सꣳशितं सम्यक् शितं तीक्ष्णीकृतं, शास्त्रीयमार्गवर्ति कृतमित्यर्थः। तथा वीर्यं शक्तिः बलं शरीरशक्तिस्तदुभयं सꣳशितं स्वकार्यक्षमं कृतम्। तथा यस्य क्षत्रियस्य अहं पुरोहितः अस्मि मे मदीयं तत् क्षत्रं जिष्णु जयशीलं यथा भवति तथा संशितम् ॥१६॥

1. P1 with insertion after अरातीयात् adds on the margin अरातिरिवाचरेत्

3. S2 तत् for तं, °जनस्य for °जन्यस्य

4. P1 with insertion after मस्मसेति adds on the margin डाच्प्रत्ययान्तः

6. H3 M3 trans. यः च जनः after नः अस्मान्

9. B1 H2–3 शब्दानुकारः; M3 शब्दानुकरणम् for शब्दोऽनुकरणे

10. B1 H2–3 M3 कुर्वन्तीत्यर्थः for कुर्वित्यर्थः

18. S2 om. शितं

20. S2 om. अस्मि

औद्ग्रभणादिमन्त्राः]

आ– पुरोहितस्यादधाति– 'संशितं मे ब्रह्म' इति। शो तनूकरणे। उपसर्गव्यत्ययः। निशितं तीक्ष्णीकृतम्। मे मम पुरोहितस्य ब्रह्म वेदः निशितं च। वीर्यं वीरकर्म सामर्थ्यं च बलं च संशितम्। क्षत्रं क्षतात् त्रायत इति क्षत्रम्। जिष्णु जयशीलं क्षत्रं संशितं निशितम्। यस्य यजमानस्य अहं ब्रह्मतेजःसंपन्नोऽहं पुरोहितः। पुरः पूर्वमेव अनिष्टनिवृत्त्यर्थमिष्टप्राप्त्यर्थं च यजमानेन हितः निहितः। मामनुगृह्णीष्वेत्यभिहितः पुरोहितः। तस्य यजमानस्य वीर्यं निशितमित्यादिना संबन्धः ॥१६॥

उदे॑षां बा॒हू अ॑तिर॒मुद्वर्चो॒ अथो॒ बल॑म्।
क्षि॒णोमि॒ ब्रह्म॑णा॒ऽमित्रा॒नुन्न॑यामि॒ स्वाँ३ अ॒हम् ॥१७॥

उत्। ए॒षाम्। बा॒हू इति॑ बा॒हू। अ॒ति॒र॒म्। उत्। वर्चः॑। अथो॒ इत्यथो॑। बल॑म्।
क्षि॒णोमि॑। ब्रह्म॑णा। अ॒मित्रा॑न्। उत्। न॒या॒मि॒। स्वान्। अ॒हम् ॥ च॒लूं ॥१७॥

सा– अथ त्रयोदशः – 'उदेषां बाहू अतिरमुद्वर्चो अथो बलम्। क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि स्वाँ३ अहम्' इति। एषां स्वकीयानां राजब्राह्मणादीनां मध्य एकैकस्य बाहू उदतिरम् उत्कर्षेण वर्द्धितवानस्मि। लौकिकोक्तिरियम्। लोके हि यस्मादुत्कृष्टो भवति तं जना एवमाहुः। स्वकीयं हस्तम् उपरितनं कृतवानिति। वर्चः कान्तिः। तामप्युदतिरम्। अथ अपि च बलं शरीरशक्तिमप्युदतिरम्। ब्रह्मणा मन्त्रसामर्थ्येन अमित्रान् शत्रून् क्षिणोमि क्षीणान् करोमि। स्वान् स्वकीयान् पुरुषान् अहम् उन्नयामि उत्कर्षं प्रापयामि ॥१७॥

आ– 'उदेषाम्' इति। एषां नृपाणां बाहू भुजदण्डौ ब्रह्मणा नियमाधीनेन वीर्यवत्तमेन वेदेन उदतिरम् उद्धरितवानस्मि। वर्चः क्षात्रं तेजः उदतिरम्। अथ बलम्। क्षात्रं बलं च। ब्रह्म उदतिरम्। उद्धरितवानस्मि। किं च, क्षिणोमि ब्रह्मणा अमित्रान् नाशयामि। किं च, उन्नयामि स्वान् स्वकीयान् पुत्रपौत्रादीन् अहम् उन्नयामि उद्गमयामीति संबन्धः ॥१७॥

---

1. M3 H2–3 पुरोहिताश्च for पुरोहितस्य
3. B1 om. second क्षत्रं and निशितम्
4. B1 om. second अहं
5. B1 M3 om. निहितः
6. B1 H2–3 M3 इत्यादीनि for इत्यादिना
17. B1 H2–3 नियामाधीतेन; M3 नियमाधिनेन for नियमाधीनेन
18. M3 om. अथो ... उदतिरम् [L 19]

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्रप्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ।
विश्वकर्मणे स्वाहा ॥१८॥

अन्नपत इत्यन्नऽपते । अन्नस्य । नः । देहि । अनमीवस्य । शुष्मिणः ।
प्रप्रेति प्रऽप्र । दातारम् । तारिषः । ऊर्जम् । नः । धेहि ।
द्विपद इति द्विऽपदे । चतुष्पदे । चतुःपद इति चतुःऽपदे ।
विश्वकर्मण इति विश्वऽकर्मणे । स्वाहा ॥ मे ॥१८॥

सा– एवं त्रयोदशमन्त्रानुक्त्वा तथोत्तमौ द्वौ वैकल्पिकमन्त्रा उच्येते । तत्र प्रथमः – 'अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे । विश्वकर्मणे स्वाहा ' इति । हे ᵛअन्नपते अग्ने, ᵛअनमीवस्य रोगरहितस्य ᵛशुष्मिणः बलहेतोः ᵛअन्नस्य प्राप्तिं ᵛदेहि । प्र दातारं प्रकर्षेण हविषो दातारं यजमानं प्रतारिषः प्रकर्षेण दुरितानि तारय । ᵛनः अस्माकं ᵛद्विपदे मनुष्याय ᵛचतुष्पदे पशवे च ᵛऊर्जं बलम् अन्नं वा ᵛधेहि संपादय । ᵛविश्वकर्मणे समस्तजगत्सृष्टिस्थित्यादिकर्मकर्त्रे तुभ्यं ᵛस्वाहा सुहुतमस्तु ॥१८॥

आ– समिधमादधाति– ' अन्नपते ' इति । अन्नदेवत्योपरिष्टाद्बृहती । हे ᵛअन्नपते हे अग्ने, ᵛअन्नस्य स्वमंशं ᵛनः अस्मभ्यं ᵛदेहि प्रयच्छ । ᵛअनमीवस्य । अमीवा व्याधिः, तद्विरोधिनः अनमीवस्य । शुष्मं बलनाम, तद्वतः । एवंगुणविशिष्टस्य अन्नस्यांशं देहीति संबन्धः । यद्वा, कर्मणि षष्ठी । ᵛप्रप्र ᵛदातारम् । अतिशयार्थे उपसर्गाभ्यासः । प्रकर्षेण अन्नस्य दातारं ᵛतारिषः प्रवर्धय । किं च, ᵛऊर्जम् अन्नं ᵛनः अस्मासु ᵛधेहि स्थापय । ᵛद्विपदे ᵛचतुष्पदे । द्विपदर्थं चतुष्पदर्थं धेहि स्थापय ॥

समिधोऽपहृत्याज्यं जुहोति– ᵛविश्वकर्मणे समस्तजगत्सृष्टिस्थितिपालनादिकर्मकर्त्रे ᵛस्वाहा सुहुतमस्तु ॥१८॥

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥१९॥(७)॥

---

8. S2 उच्यन्ते for उच्येते; प्रथममन्त्रः for प्रथमः

पुनरिति पुनः । त्वा । आदित्याः । रुद्राः । वसवः । सम् । इन्धताम् ।
पुनः । ब्रह्माणः । वसुनीथेति वसुऽनीथ । यज्ञैः ।
घृतेन । त्वम् । तन्वम् । वर्धयस्व ।
सत्याः । सन्तु । यजमानस्य । कामाः । स्वाहा ॥ झः ॥१९॥

[युञ्जानैकादश ॥११॥ प्रतूर्तं वाजिन् षोडश ॥१६॥ देवस्य त्वा दश ॥१०॥ अपो देवीस्त्रयोदश ॥१३॥ आपो ह्येकादश ॥११॥ अदितिष्ट्वा पञ्च ॥५॥ आकूतिमेकोनविंशतिः ॥१९॥ सप्तानुवाकेषु पञ्चाशीतिः ॥८५॥ युञ्जानग्नेजातान् पञ्चाशीतिः ॥८५॥]

[इति शुक्लयजुर्वेदकाण्वपदसंहितायां द्वादशोऽध्यायः ॥१२॥]

सा– अथ द्वितीयः – पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ' इति । हे अग्ने, त्वाम् ᵛआदित्याः ᵛरुद्राः ᵛवसवः च ᵛपुनः ᵛसमिन्धताम् उपशान्तं पुनः संदीपयन्तु । हे ᵛवसुनीथ, वसूनां धनानां नेतः प्रापयितः, ᵛब्रह्माणः ब्राह्मणा ऋत्विजः ᵛयज्ञैः निमित्तभूतैस्त्वां ᵛपुनः समिन्धताम् । ᵛत्वं च ᵛघृतेन तुष्टः सन् ᵛतन्वम् आत्मीयं शरीरं ᵛवर्धयस्व । ततस्त्वयि तुष्टे सति ᵛयजमानस्य ᵛकामाः ᵛसत्याः ᵛसन्तु । ᵛस्वाहा इति होमार्थः ॥१९॥

[इति द्वादशेऽध्याये सप्तमोऽनुवाकः ॥७॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये द्वादशोऽध्यायः ॥१२॥

आ– समिधमादधाति– ' पुनस्त्वा ' इति । आग्नेयी त्रिष्टुप् । हे श्रीभगवन्नग्ने, अग्निं त्वाम् ᵛआदित्याः ᵛपुनः ᵛसमिन्धताम् । ᵛरुद्राः ᵛवसवः च समिन्धतां संदीपयन्तु । ᵛब्रह्माणः ब्राह्मणाः ऋत्विगादयः समिन्धताम् । हे ᵛवसुनीथ । नीथा स्तुतिरुच्यते । वसुलाभनिमित्ता नीथा स्तुतिर्यस्य स वसुनीथः । तत्संबोधनं ᵛवसुनीथ । ᵛयज्ञैः यागैः ᵛघृतेन च ᵛतन्वं शरीरं ᵛवर्धयस्व

---

9. S2 om. समिन्धतां समिन्धताम [L 11]
11. S2 om. second सं
21. B1 H2–3 om. रुद्राः; M3 om. ब्रह्माणः
22. H3 om. ब्राह्मणाः

अभिवृद्धिं गमय । एवं ^{v}यजमानस्य ^{v}कामाः विशिष्टफलविषयः ^{v}सत्याः सवितथाः ^{v}सन्तु । ^{v}स्वाहा इति होमार्थः ॥१९॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवसूरिपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते
५ काण्ववेदमन्त्रभाष्यसंग्रहे द्वादशोऽध्यायः ॥१२॥

———

5. H2–3 after द्वादशोऽध्यायः ॥ add इति श्रीमते विरूपाय जगतामानन्दरूपिणे । वेदिमध्याद्भवायैव नमो ब्रह्मात्मने सदा ॥; M3 श्रीमते विश्वरूपाय जगदानन्दरूपिणे । वेदिमध्योद्भवायैव नमो ब्रह्मात्मने सदा ॥ श्रीमते शुक्लवर्णाय हयग्रीवाय विष्णवे । नमोऽस्तु ब्रह्मगुरवे चन्द्रमण्डलवासिने ॥ कृष्णाय नमः ॥ हरिः ॐ ॥

त्रयोदशोऽध्यायः ।

[अथ प्रथमोऽनुवाकः ।]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

द्वादशेऽध्याये उखासंभरणादिमन्त्रा उक्ताः । त्रयोदशे तु रुक्मधारणादिमन्त्रा उच्यन्ते । तत्र प्रथमेऽनुवाके आसन्द्यामुखाग्निस्थापनं प्रतिपाद्यते ॥

दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत् सुरेताः ॥१॥

दृशानः । रुक्मः । उर्व्या । वि । अद्यौत् ।
दुर्मर्षमिति दुःऽमर्षम् । आयुः । श्रिये । रुचानः ।
अग्निः । अमृतः । अभवत् । वयोभिरिति वयःऽभिः ।
यत् । एनम् । द्यौः । अजनयत् । सुरेता इति सुऽरेताः ॥ टों ॥१॥

सा– कात्यायनः – " यजमानकण्ठे रुक्मं प्रतिमुञ्चते दृशानो दृशानो रुक्म इति " (काश्रौ १६·५·१) इति । सुवर्णनिर्मितः फलकाकार आभरणविशेषो रुक्मस्तं कण्ठे बध्नीयात् । पाठस्तु– ' दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत् सुरेताः ' इति । ᵛदृशानः दर्शनीयरूपः ᵛरुक्मः आभरणविशेषः ᵛउर्व्या महत्या दीप्त्या ᵛव्यद्यौत् विद्योतते । किं कुर्वन् ? ᵛदुर्मर्षं केनाप्यतिरस्कार्यम् ᵛआयुः जीवनं ᵛश्रिये श्रयितुं ᵛरुचानः वाञ्छन् । तथाविधः ᵛअग्निः ᵛवयोभिः अन्नलक्षणैर्हविभिः ᵛअमृतः ᵛअभवत् । ᵛयत् यस्मात् ᵛएनम् अग्निं ᵛद्यौः द्युलोकवासी देवगणः ᵛसुरेताः सन् ᵛअजनयत् तस्मादमृतत्वं युक्तम् ॥१॥

आ– यजमानः कण्ठे रुक्मं प्रतिमुञ्चते– ' दृशानो रुक्मः ' इति । त्रिष्टुप् । आदित्यव्याजेन रुक्मस्तुतिः । ᵛदृशानः दृश्यमानः प्रत्यक्षत उपलभ्यमानः ᵛरुक्मः रोचनः ᵛउर्व्या महत्या दीप्त्या ᵛव्यद्यौत् विद्योतमानः । यस्य च ᵛदुर्मर्षम् ᵛआयुः । दुर्मर्षम् अनवखण्डितम् आयुः जीवनम् । ᵛश्रिये ᵛरुचानः । यश्च जनेभ्यः श्रियं दातुं रोचते सोऽयम् ᵛअग्निः ᵛअमृतः

---

17. P1 after रुचानः adds रोचमानः; P1 इच्छन् for वाञ्छन्; P1 om. °विधः
18. S2 एतम् for एनम्
20. B1 H2–3 before यजमानः add हरिः ॐ; H2–3 B1 कर्णे for कण्ठे; M3 H2–3 °व्यासेन for व्याजेन
22. B1 जीवितं; B1 °षण्डितं for °खण्डितं

अमरणधर्मा [v]अभवत् । [v]वयोभिः अन्नैः पशुपुरोडाशप्रभृतिभिः । [v]यत् [v]एनं [v]द्यौः [v]अजनयत् जनितवती । [v]सुरेताः शोभनरेताः । "सुरेता ह्येषा यस्या एषोऽग्निः" (द्र. शब्रा ६.७.२.३) । रेतः पुत्रः । द्वितीयममृतत्वकारणमग्नेः ॥१॥

नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची ।
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन् द्रविणोदाः ॥२॥

नक्तोषासा । नक्तोषसेति नक्तोषसा । समनसेति सऽमनसा । विरूपे इति विऽरूपे । धापयेते इति धापयेते । शिशुम् । एकम् । समीची इति सम्ऽईची । द्यावाक्षामा । रुक्मः । अन्तः । वि । भाति । देवाः । अग्निम् । धारयन् । द्रविणोदा इति द्रविणःऽदाः ॥ डैर्य् ॥२॥

सा– कात्यायनः – "परिमण्डलाभ्यामिण्ड्वाभ्यामुखां परिगृह्णाति नक्तोषासेति" (काश्रौ १६.५.३) इति । वर्तुलाभ्यामुखाधारणसाधनभूताभ्यामिण्ड्वाभ्यामुखां गृह्णीयात् । पाठस्तु– 'नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची' इति । नक्तं चोषाश्च नक्तोषसौ, रात्रिदिवसावित्यर्थः । [v]समनसा परस्परमैकमत्ययुक्ते । [v]विरूपे । रात्रिः दिवसः कृष्णा शुक्ल इत्येवं विलक्षणे । [v]समीची समीच्यावनुकूले सत्ये । [v]एकं [v]शिशुम् अग्निरूपं [v]धापयेते । धेट् पाने, पाययेते । सायंप्रातरग्निहोत्रादिकर्मभिर्मातापितरौ बालमिव यजमानकर्तृकमग्निधारणं संपादयतः ॥

कात्यायनः – "हरति द्यावाक्षामेति" (काश्रौ १६.५.४) इति । परिगृहीतामुखामाहवनीयदेशस्य प्राचीनदेशं प्रत्याहरेत् । पाठस्तु– 'द्यावाक्षामा रुक्मो अन्तर्वि भाति' इति । द्यावा द्युलोके क्षामा क्षितौ भूलोके [v]अन्तः तदुभयमध्यवर्तिन्यन्तरिक्षे [v]रुक्मः रोचमानोऽग्निः [v]विभाति विशेषेण प्रकाशते ॥

कात्यायनः – "आहवनीयस्य पुरस्तादुद्गात्रासन्दीवदासन्द्यां चतुरस्रायां शिक्यवत्यां निदधाति देवा अग्निमिति" (काश्रौ १६.५.५) इति । आहवनीयस्य प्राग्वेदे उद्गात्रासन्दी चतुरस्रयुक्ता याऽऽसन्दी स्थिता तस्या उपरि स्थिते शिक्ये आहृतामुखां स्थापयेत् । पाठस्तु– 'देवा अग्निं धारयन् द्रविणोदाः' इति । दीव्यन्ति व्यवहरन्तीति [v]देवाः प्राणास्ते च [v]द्रविणोदाः यागद्वारेण द्रविणं धनरूपं फलं प्रयच्छन्ति । तादृशा यजमानस्य प्राणा अग्निमेतं [v]धारयन् अधारयन् । अत्र देवशब्दस्य प्राणत्वं तैत्तिरीया आमनन्ति– "देवा अग्निं धारयन् द्रविणोदा इत्याह । प्राणा वै देवा द्रविणोदाः" (तैसं ५.१.१०.४) इति ॥२॥

---

12. S2 after समीची adds द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन् दविणोदाः; S2 रात्रि for रात्रि°

13. S2 °युक्तौ for °युक्ते; S2 कृष्ण° for कृष्णा

14. S2 °कूलं सत्यं for °कूले सत्ये; S2 om. धापयेते ... बालमिव (L 15)

16. P1 हरन् जपति for हरति

उखाग्निस्थापनमन्त्राः]

आ– द्वाभ्यामुखां परिगृह्णाति– ‘ नक्तोषासा ’ इति । आग्नेयी त्रिष्टुप् । नक्ता रात्रिः । उषाशब्देनाहरुच्यते । एवं नक्तोषासा नक्तोषसौ रात्र्यहनी समनसा समनसे मनसा सहिते एकमनस्के । छान्दसस्त्वाकारः । विरूपे नानारूपे । कृष्णा रात्रिः शुक्लमहरिति एवंरूपे रात्र्यहनी । यथा लोके मातापितरौ एकम् एकाकिनं शिशुं बालमनुगच्छतः तथा सायंप्रातरग्निहोत्रादिभिः कर्मभिः समीची सम्यगञ्चने सती धापयेते अग्निमनु धापयेते अनुगच्छतः । ताभ्यां ताभ्यां गृह्णामीति शेषः ।

हरन् जपति– ‘ द्यावाक्षामा रुक्मः ’ [इति] । द्यावाक्षामा द्यावापृथिव्यौ अन्तः उभयोर्मध्ये यः रुक्मः रोचनः दीप्यमानः विभाति देदीप्यते तम् आहरामीति शेषः ॥

निदधाति– ‘ देवा अग्निं धारयन् द्रविणोदाः ’ [इति] । एवंविधम् अग्निं द्रविणोदाः धनस्य प्रदातारो यं धारयन् अधारयन् तमहं धारयामि इति शेषः ॥२॥

विश्वा॑ रू॒पाणि॒ प्रति॑ मुञ्चते क॒विः प्रासा॑वीद् भ॒द्रं द्वि॒पदे॒ चतु॑ष्पदे ।
वि नाक॑मख्यत् स॒वि॒ता वरे॑ण्योऽनु॒ प्र॒याण॑मु॒षसो॒ वि रा॑जति ॥३॥

विश्वा॑ । रू॒पाणि॑ । प्रति॑ । मु॒ञ्च॒ते॒ । क॒विः ।
प्र । अ॒सा॒वी॒त् । भ॒द्रम् । द्वि॒पद॒ इति॑ द्वि॒ऽपदे॑ । चतु॑ष्पदे । चतु॑ःपद॒ इ॒ति॒ चतु॑ःऽपदे ।
वि । नाक॑म् । अ॒ख्य॒त् । स॒वि॒ता । वरे॑ण्यः ।
अनु॑ । प्र॒याण॑म् । प्र॒यान॒मिति॑ प्र॒ऽयान॑म् । उ॒षस॑ः । वि । रा॒ज॒ति॒ ॥ ठ्णिः ॥३॥

सा– कात्यायनः – “ शिक्यपाशं प्रतिमुञ्चते षडुद्यामं विश्वा रूपाणीति ” (काश्रौ १६·५·६) इति । षडूर्ध्वाभिमुखा रज्जवो यस्मिन् तथाविधं शिक्यपाशं बध्नीयात् । पाठस्तु– ‘ विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद् भद्रं द्विपदे चतुष्पदे । वि नाकमख्यत् सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ’ इति । कविः विद्वान् वरेण्यः श्रेष्ठः सविता देवः विश्वा रूपाणि समस्तानि जगद्रूपाणि

1. B1 इन्द्राभ्यां, M3 इन्द्राग्निभ्यां for द्वाभ्याम् ; B1 M3 om. उखां
2. B1 उखा° for उषा°; B1 नक्तोखासा for नक्तोषासा; M3 H2–3 नक्तोषसे for नक्तोषसौ
5. B1 om. अग्निमनु धापयेते
7. M3 H2–3 om. रुक्म इति ।
9. B1 om. एवं ... द्रविणोदाः
17. S2 °मुञ्चति for °मुञ्चते
20. S2 om. देवः

vप्रतिमुञ्चते स्वस्मिन् स्वीकरोति प्रकाशयतीत्यर्थः । vद्विपदे vचतुष्पदे मनुष्याणां पशूनां च vभद्रं स्वस्वव्यवहारप्रकाशनरूपं श्रेयः vप्रासावीत् संपादितवान् । vनाकं स्वर्गं विशेषेण vअख्यत् प्रकाशितवान् । vउषसः vप्रयाणम् vअनु उषःकालेऽतीते सति vविराजति स्वयं विशेषेण प्रकाशते ॥३॥

आ– शिक्यपाशं प्रतिमुञ्चति– 'विश्वा रूपाणि' इति । श्यावाश्वः सवितृदेवत्या जगती । vविश्वा विश्वानि सर्वाणि vरूपाणि सर्ववस्तूनि । vकविः क्रान्तदर्शनोऽयं vप्रतिमुञ्चते । प्रतिपूर्वो मुचिस्तत्तदुचितधारणे वर्तते । चक्षुरिन्द्रियरूपेण तदनुग्राहकप्रकाशरूपेण च सर्वं प्रकाशयतीत्यर्थः । यद्वा- विश्वा रूपाणि प्रतिमुञ्चत इति सर्वाणि ऐश्वर्यरूपाणि तेजोरूपाणि [च] प्रतिमुञ्चते । स्वस्य तेजोरूपं विग्रहे भूषणादिरूपेण प्रतिमुञ्चत इति । आस्थाय यथाशोभनं भूषयित्वा vद्विपदे vचतुष्पदे द्विपाद्भ्यः चतुष्पाद्भ्यश्च vभद्रं भन्दनीयं कल्याणं रूपं vप्रासावीत् सर्वं द्रष्टुं प्रसवम् अनुज्ञां दत्तवान् । दत्त्वा च 'वि नाकम् अख्यत्'। vसविता प्रसविता । vवरेण्यः सर्वैर्दृष्टादृष्टकार्यार्थिभिर्वरणीयो देवः । vनाकम् सर्वेन्द्रियाह्लादकरं, नाकं सुखविशेषं यः vव्यख्यत्, द्युलोकं वा विख्यापयति प्रकाशयति । 'अनु प्रयाणमुषसो विराजति' । एवं गुणाविशिष्टः स श्रीभगवान् सविता vउषसः vप्रयाणं प्राभिगमनम् vअनु पश्चात् vविराजति स्वयं दीप्यते । एवमुषाः सवितुः पुरोगामिनीति सवितैव स्तूयते । एवंविधः सविता स शिक्यं प्रतिमुञ्चतु इति शेषः ॥३॥

सुपर्णोऽसि गरुत्माँस्त्रिवृत् ते शिरः ।
गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ ।।४।।
स्तोम आत्मा छन्दाᳪस्यङ्गानि यजूᳪषि नाम ।
साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः ।।५।।

4. B1 शावश्वः, H2–3 M3 श्यावश्वः for श्यावाश्वः
5. B1 °दर्शनो यः, H3 °दर्शनाय, M3 °दर्शनायं for °दर्शनोऽयं
6. M3 H2–3 °ग्रह° for °ग्राहक°
7. B1 om. तेजोरूपाणि
8. B1 °रूप° for °रूपं; B1 आस्थापय for आस्थाय
9. B1 नन्दनीयं, H2–3 M3 भजनीयं for भन्दनीयं; B1 कल्याण° for कल्याणं
10. B1 om. प्रसविता
13. H2 M3 om. सः; B1 उखसो for उषसः
14. M3 H2–3 सवितेव for सवितैव; H3 M3 सुरुक्मं, B1 H2 स रुक्मं for शिक्यं

उखाग्निस्थापनमन्त्राः]

सुपर्णोऽसि गरुत्मान् दिवं गच्छ स्वः पत ।
विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्द आ रोह ।
पृथिवीमनु वि क्रमस्व ।
विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभं छन्द आ रोह ।
अन्तरिक्षमनु वि क्रमस्व ।
विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आ रोह ।
दिवमनु वि क्रमस्व ।
विष्णोः क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभं छन्द आ रोह ।
दिशोऽनु वि क्रमस्व ॥६॥

सुपर्ण इति सुऽपर्णः । असि । गरुत्मान् । त्रिवृदिति त्रिऽवृत् । ते । शिरः ।
गायत्रम् । चक्षुः । बृहद्रथन्तरे इति बृहत्ऽरथन्तरे । पक्षौ ॥ ङ्यं ॥४॥
स्तोमः । आत्मा । छन्दांसि । अङ्गानि । यजूंषि । नाम ।
साम । ते । तनूः । वामदेव्यमिति वामऽदेव्यम् ।
यज्ञायज्ञियमिति यज्ञाऽयज्ञियम् । पुच्छम् । धिष्ण्याः । शफाः ॥ झं ॥५॥
सुपर्ण इति सुऽपर्णः । असि । गरुत्मान् । दिवम् । गच्छ । स्वरिति स्वः । पत ।
विष्णोः । क्रमः । असि । सपत्नहेति सपत्नऽहा । गायत्रम् । छन्दः । आ । रोह ।
पृथिवीम् । अनु । वि । क्रमस्व ।
अभिमातिहेत्यभिऽमातिहा । त्रैष्टुभम् । त्रैस्तुभमिति त्रैस्तुभम् ।
अन्तरिक्षम् ।
अरातीयतः । अरातियत इत्यरातिऽयतः । हन्ता । जागतम् ।
दिवम् ।
शत्रूयतः । शत्रुयत इति शत्रुऽयतः । हन्ता ।
आनुष्टुभम् । आनुस्तुभमित्यानुऽस्तुभम् । छन्दः । आ । रोह ।
दिशः । अनु । वि । क्रमस्व । ढयें ॥६॥

[उखाग्निस्थापनमन्त्राः

सा- कात्यायनः – "सुपर्णोऽसीत्यभिमन्त्रयेत्" (काश्रौ १६.५.७) इति । पाठस्तु– 'सुपर्णोऽसि गरुत्माꣳस्त्रिवृत् ते शिरः । गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोम आत्मा छन्दाꣳस्यङ्गानि यजूꣳषि नाम । साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः ॥ सुपर्णोऽसि गरुत्मान् दिवं गच्छ स्वः पत' इति । हे अग्ने, त्वं सुपर्णः पक्षिरूपः असि, पक्ष्याकारेण चेष्यमाणत्वात् । अत एव तैत्तिरीयैराम्नायते– "वयसां वा एष प्रतिमया चीयते यदग्निः" (तैसं ५.५.३.२) इति । तत्र दृष्टान्तः – गरुत्मान् यथा पक्षिराजस्तद्वत् पक्षा (? क्ष्या) कारस्य अवयवाः संपद्यन्ते । 'त्रिवृत् ते शिरः' । बहिष्पवमानस्तोत्रे योऽयं त्रिवृत् स्तोमः स एव शिरस्थानीयः । प्रजापतिमुखजत्वेनोत्तमं यद् गायत्राख्यं साम तनूः त्वदीयं चक्षुः । ये बृहद्रथन्तराख्ये सामनी ते तव पक्षस्थानीये । यः पञ्चदशस्तोमः स तव आत्मा अन्तःकरणम् । यानि गायत्र्यादीनि छन्दांसि तानि तव हृदयाद्यङ्गस्थानीयानि । यानि यजूंषि तानि तव नामस्थानीयानि । यद्वामदेवाख्यं साम तत् तव तनूः शरीरस्थानीयम् । यद्यज्ञायज्ञियाख्यं साम तत् तव पुच्छस्थानीयम् । ये सौमिकवेद्यां होत्रादिधिष्ण्यास्ते तव शफस्थानीयाः । हे अग्ने, एवंभूतस्त्वं यतः गरुत्मान् गरुड इव सुपर्णः पक्षिरूपः असि । अतः दिवम् आकाशं प्रति गच्छ । तत्रापि स्वः पत स्वर्गं लोकं प्राप्नुहि ॥

कात्यायनः – "विष्णुक्रमान् क्रमते विष्णोरिति प्रतिमन्त्रम् । चतुर्थे दिशो वीक्षते दिशोऽनु वि क्रमस्वेति" (काश्रौ १६.५.११-१३) इति । 'विष्णोः क्रमोऽसि' इत्यादिभिश्चतुर्भिर्मन्त्रैः क्रमेण चतुरः पादविन्यासान् कुर्यात् । तत्र चतुर्थमन्त्रगतेन 'दिशोऽनु विक्रमस्व' इति मन्त्रशेषेण दिशोऽवलोकयेत् । तेषां पाठस्तु– 'विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्द आ रोह । पृथिवीमनु वि क्रमस्व । विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभं छन्द आ रोह । अन्तरिक्षमनु वि क्रमस्व । विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आ रोह । दिवमनु वि क्रमस्व । विष्णोः क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभं छन्द आ रोह । दिशोऽनु वि क्रमस्व' इति । यज्ञप्रयोगं कृत्स्नं व्याप्नोतीति विष्णुर्यजमानः । यद्वा– विष्णुना परमेश्वरेणाभेदोपचारं कृत्वा विष्णुरित्युच्यते । हे प्रथमपादविन्यास, त्वं सपत्नहा शत्रुघाती विष्णोः क्रमः असि । तादृशस्त्वं गायत्रं छन्द आरोह अनुग्राहकत्वेन स्वीकुरु । ततः पृथिवीम् अनु विक्रमस्व भूदेवतारूपमिमं प्रदेशं विशेषेण व्याप्नुहि । एवमुत्तरेष्वपि योज्यम् । अभिमातिहा पापघाती । "पाप्मा वा अभिमातिः" (शब्रा ३.१.४.९) इति श्रुत्यन्तरात् । अरातिर्दातव्यस्य दानाभावस्तमात्मन इच्छतीति अरातीयन्, तस्य हन्ता विनाशकः । प्रहारे शत्रुत्वं तदिच्छतीति शत्रूयन्, तस्य हन्ता विनाशकः । अत्र सर्वत्र यजमानः स्वात्मानं विष्णुत्वेन भावयेत् । चतुर्णां प्रक्रमाणां प्रदेशान् पृथिव्यादिलोकरूपत्वेन भावयेत् । गायत्र्यादिच्छन्दोभिमानिदेवतास्तेषां प्रक्रमाणामनुग्राहिकाः ॥४–६॥

आ – अभिमन्त्रयते– 'सुपर्णोऽसि' इति, 'स्तोम आत्मा' इति च द्वे गरुत्मद्देवत्ये गायत्रीबृहत्यौ विषध्न्यौ । सुपर्णः साधुपतनस्त्वम् असि । गरुत्मान्, गरुत् पक्षस्तद्वान् गरलवान् वा । 'त्रिवृत् ते शिरः' । त्रिधा आवर्तते इति त्रिवृत् स्तोमः ते तव शिरः मस्तकम् । गायत्रं गायत्र्या संमितं ते चक्षुः । बृहद्रथन्तरे सामनी ते पक्षौ ॥४॥

स्तोमः पञ्चविधः स्तोमः ते आत्मा अन्तःकरणम् । छन्दांसि एकविंशतिश्छन्दांसि ते अङ्गानि तत्रावयवाः । यजूंषि नाम शुक्लकृष्णाख्यानि ते नाम । साम ते तनूः

---

15. S2 om. दिशोऽवलोकयेत्

28. M3 H3 °वचनः, B1 °पर्णः for °पतनः

32. B1 H2 तन्वः for तनूः

vवामदेव्यम् । [वामदेव्यं] साम ते तनूः शरीरम् । यज्ञायज्ञियाख्यं साम vपुच्छं प्रतिष्ठा । vधिष्ण्याः अग्नयः vशफाः खुराः ॥५॥

यतश्च त्वमेवंगुणः vसुपर्णः vगरुत्मान् vअसि अतस्त्वां ब्रवीमि— 'दिवं गच्छ स्वः पत' इति । vदिवं द्युलोकं vगच्छ । तत्रापि vस्वः सुखविशेषाभिव्यक्तिस्थानं vपत गच्छ ॥

विष्णुक्रमान् क्रमते— 'विष्णोः क्रमोऽसि' इति । लिङ्गोक्तदेवत्यानि यजूंषि प्रत्येकं गायत्राणि वा । vविष्णोः यज्ञस्य अग्नेर्यतः vक्रमः vअसि । क्रमु पादविक्षेपे, क्रमणमसि । vसपत्नहा च शत्रुघातकश्च । अतः vगायत्रम् आग्नेयं vछन्दः vआरोह अधितिष्ठस्व । vअनु गायत्रं छन्दोऽधिरुह्य अनन्तरं vपृथिवीं vविक्रमस्व । एवमेव vविष्णोः vक्रमः vअसि । अतः vअभिमातिहा । मा हिंसायामित्यस्याभिपूर्वस्य रूपम् । "सपत्नो वा अभिमातिः" (शब्रा ३·९·४·९) इति श्रुतेः । अभिमातिं सपत्नं हन्तीति अभिमातिहा । त्वं विष्णु (ष्णोः ?) क्रमः [असि ।] अतः त्रैष्टुभम् अतिवीर्यवत्तमं vछन्दः vआरोह । तदारुह्य च vअनु पश्चात् vअन्तरिक्षं vविक्रमस्व । एवं vविष्णोः vक्रमः vअसि । अतः vअरातीयतः । अरातिः शत्रुः, अरातिरिवाचरन्ति अरातीयन्तीत्यरातीयन्तस्तान् शत्रून् vहन्ता । अतः vजागतं vछन्दः vआरोह । तदारुह्य अनन्तरं vदिवम् vअनु vविक्रमस्व । एवं vविष्णोः vक्रमः vअसि । vशत्रूयतः शत्रुवदाचरन्ति शत्रूयन्तीति शत्रूयन्तस्तान् vहन्ता घातकः । अतः अनुष्टुप्छन्दः vआरोह । ततोऽनन्तरं vदिशः vअनु vविक्रमस्व ॥६॥

अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥७॥

अक्रन्दत् । अग्निः । स्तनयन्निवेति स्तनयन्ऽइव । द्यौः ।
क्षाम । रेरिहत् । वीरुधः । समञ्जन्निति सम्ऽअञ्जन् ।
सद्यः । जज्ञानः । वि । हि । ईम् । इद्धः । अख्यत् ।
आ । रोदसी इति रोदसी । भानुना । भाति । अन्तरित्यन्तः ॥ ध्व्यः ॥७॥

---

2. M3 H2–3 om. अग्नयः
3. B1 अतः for यतः
5. H2–3 धिष्ण्यक्रमात् कर्म, M3 धिष्ण्यक्रमात् क्रमति for विष्णुक्रमान् क्रमते; B1 क्रमात् for क्रमते
6. M3 गायत्र्याणि for गायत्राणि, B1 च for वा
10. B1 after क्रमः adds अतिवीर्यवत्तमः
11. B1 om. अतिवीर्यवत्तमं; B1 H2–3 M3 after अन्तरिक्षम् ins. अनु
12. H2–3 after असि ins. इति
14. M3 H2–3 om. विष्णोः

सा– कात्यायनः – "प्रागुदञ्चं प्रगृह्णात्यक्रन्ददग्निरिति" (काश्रौ १६·५·१४) इति। पाठस्तु– 'अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्। सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः' इति। अत्राग्निः पर्जन्यरूपत्वेन स्तूयते। अयम् Vअग्निः Vअक्रन्दत् अस्मदरिष्टनिवारणार्थं गर्जतु। किमिव? Vस्तनयन् Vइव Vद्यौः, यथा द्युलोकस्थो मेघो गर्जन् सस्यशोषणभीतिं निवारयति तद्वत्। किं कुर्वन्? Vक्षाम दाहकमस्मद्विरुद्धं Vरेरिहत् लेलिहानः Vवीरुधः Vसमञ्जन् पुष्पलतावदस्मदनुकूलानि सम्यगभिव्यञ्जयन् Vहि यस्मात् Vजज्ञानः उत्पद्यमानः Vसद्यः इदानीमेव Vइद्धः दीप्तः Vव्यख्यत् विविधं जगत् प्रकाशयति। Vईम् इत्यनर्थकमव्ययम्। Vरोदसी द्यावापृथिव्योः Vअन्तः Vभानुना रश्मिना स्वयम् Vआ Vभाति समन्तात् प्रकाशते ॥७॥

आ– ऊर्ध्वबाहुः प्रागुदञ्चमग्निं गृह्णाति– 'अक्रन्ददग्निः' इति। वत्सप्रिराग्नेयी त्रिष्टुप्। 'अक्रन्ददग्निः स्तनयन्निव द्यौः'। क्रन्दि (दि ?) गतिशोषणयोः (!)। अत्र Vद्यौः इति पर्जन्योऽभिधीयते। पर्जन्यः Vस्तनयन् Vइव गर्जन्निव अयम् Vअग्निः Vअक्रन्दत् क्रन्दते विस्फूर्जते। एवम् अन्येऽपि पर्जन्यधर्माः अग्नेः प्रदर्श्यन्ते। 'क्षामा रेरिहद्वीरुधः समञ्जन्'। क्षामाशब्देन पृथिव्युच्यते। द्वितीयार्थे च प्रथमा। क्षै क्षये। "क्षायो मः" (पा ८·२·५३) इति Vक्षामा। छान्दसं पदम्। यथा पर्जन्य उदकभावमुपगच्छन् अत्यर्थं वीरुधः समञ्जन् व्याप्नुवन् स्वगुणांस्तत्र रञ्जयन् क्षामां पृथिवीं लिहति आस्वादयति तथायमग्निः स्वकीयज्वालासमूहेन सस्यफलोत्पत्त्यर्थं स्वोष्मणा Vवीरुधः ओषधीर्गुल्मादीन् Vसमञ्जन् Vक्षामा Vरेरिहत्। लिह आस्वादने। छान्दसो रेफः, अलेलिहत्, अत्यर्थम् आस्वादनं कृतवान्। किं च– 'सद्यो जज्ञानो वि हीमिद्धो अख्यत्'। यथा पर्जन्यः Vसद्यः एव Vजज्ञानः अभ्ररूपेण जायमानः Vवि Vहि Vईम् एव Vइद्धः वृष्टिधाराशतसहस्रैरिद्धः वि Vअख्यत् विख्यापयति। हि प्रसिद्धम्। एवमयमग्निर्जायमानः सद्यस्तदानीमेवेद्धो दीप्तः सन् इदं सर्वं विख्यापयतीति प्रसिद्धम्। किं च– 'आ रोदसी भानुना भात्यन्तः'। यथा पर्जन्यः Vभानुना विद्युद्रूपेण Vरोदसी Vअन्तः द्यावापृथिव्योरन्तः स्थितः Vभाति एवमग्निरपि द्यावापृथिव्योरन्तः स्थितो भातीत्येवमयमग्निः पर्जन्यवद्दर्षिणा स्तूयते ॥७॥

1. S2 after second इति adds अग्निं पिण्डावर (?) प्रगृह्णाति
7. S2 om. ईम् ... अव्ययम्
10. M3 after अक्रन्द° lacuna upto अयम् (L 11). [The root क्रदि or even क्रन्द does not mean गतिशोषणयोः]
13. B1 क्षि for क्षै
14. B1 उदकस्वभावम्, H2–3 M3 उदस्वभावम् for उदकभावम्
15. B1 स्वकीयं जलं for स्वकीयज्वाला°
16. H2–3 M3 सव्य°; B1 अस्य for सस्य°; B1 समञ्जयन् for समञ्जन्
19. M3 प्रसिद्धः for प्रसिद्धम्; B1 om. एवम् ... प्रसिद्धम् (L 20)
22. H2–3 M3 om. भाति ... °स्थितो

उखाग्निस्थापनमन्त्राः]

अग्नेऽभ्यावर्तिन्नभि मा नि वर्तस्वायुषा वर्चसा प्रजया धनेन ।
सन्या मेधया रय्या पोषेण ॥८॥

अग्ने । अभ्यावर्तिन्नित्यभिऽआवर्तिन् । अभि । मा । नि । वर्तस्व ।
आयुषा । वर्चसा । प्रजयेति प्रऽजया । धनेन ।
सन्या । मेधया । रय्या । पोषेण ॥ त्युं ॥८॥

सा– कात्यायनः – " अवहरत्यग्नेऽभ्यावर्तिन्निति " (काश्रौ १६·५·१५) इति । 'अग्नेऽभ्यावर्तिन् ' इत्यादिभिश्चतुर्भिर्मन्त्रैरुख्यमग्निमवहरेत् । तत्र प्रथममन्त्रपाठस्तु–' अग्नेऽभ्यावर्तिन्नभि मा नि वर्तस्वायुषा वर्चसा प्रजया धनेन । सन्या मेधया रय्या पोषेण ' इति । आभिमुख्येनावर्तितुं शीलमस्यास्तीति अभ्यावर्ती । तादृश हे अग्ने, आयुरादिभिः सह मामभिलक्ष्य नि नितरां वर्तस्व आवर्तस्व । आयुरपमृत्युरहितं जीवनम् । वर्चः कान्तिर्बलं वा । प्रजापुत्रादिधनं रत्नसुवर्णादि । सनिः बन्ध्वादिभ्यः संपादितस्य दानम् । मेधा श्रुतार्थधारणाशक्तिः । रयिः पश्वादिः । पोषः पश्वादेः पुष्टिः । एतैः सर्वैरायुरादिभिः सह मां शीघ्रमागच्छेत्यर्थः ॥८॥

आ– अवहरति । पञ्चाग्नेय्यः पराः–' अग्नेऽभ्यावर्तिन् ' [इति] । ऊर्ध्वं बृहती । हे भगवन् अग्ने हे अभ्यावर्तिन्, अभ्यावर्तनशील: अभि मा निवर्तस्व आवर्तस्व । ' आयुषा वर्चसा '। आयुरित्यन्ननाम । आयुषा अन्नेन वा, वर्चसा तेजसा, प्रजया संतत्या धनेन । षणु दाने । सन्या दानेन लाभेन । मेधया धारणवत्या । रय्या रत्नसुवर्णालंकाररूपया पोषेण धनपुष्ट्या च । सहसा मामभिनिवर्तस्व इति संबन्धः ॥८॥

अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः ।
अधा पोषस्य पोषेण पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि ॥९॥

अग्ने । अङ्गिरः । शतम् । ते । सन्तु । आवृत इत्याऽवृतः ।
सहस्रम् । ते । उपावृत इत्युपऽआवृतः ।
अध । पोषस्य । पोषेण । पुनः । नः । नष्टम् । आ । कृधि ।
पुनः । नः । रयिम् । आ । कृधि ॥ छिः ॥९॥

9. S2 om. नि नितरां; P1 om. आवर्तस्व
10. S2 om. जीवनम्; S2 कीर्तिर्बलं चायुः for कान्तिर्बलं वा
14. B1 M3 om आवर्तस्व
17. B1 om. संबन्धः

सा– अथ द्वितीयः – ' अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः । अधा पोषस्य पोषेण पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि ' इति । हे अङ्गिरः अङ्गसौष्ठवयुक्ताग्ने, ते तव आवृतः शतं सन्तु आवृतशक्तयः शतसंख्याका भवन्तु । तथा ते तव उपावृतः उपावृत्तिशक्तयः शत[सहस्र ?] संख्याका भवन्तु । स्वस्यैवावर्तनमावृत् । समीपवर्तिनां पुरुषाणां द्रव्यविशेषाणां वा वर्तनमुपावृत् । अस्मासु स्नेहातिशयेन त्वमपि पुनः पुनरावर्तस्व । त्वदीयाः पुरुषास्त्वदीयानि च द्रव्याणि पुनः पुनरावर्ततामित्यर्थः । अध अपि च शतसहस्रसंख्याकानामावृत्युपावृत्तिशक्तीनां यः पोषः समृद्धिस्तस्यापि पोषस्य अन्यः पोषोऽयुतलक्षादिसंख्याका वृद्धिस्तादृशेन पोषेण नः अस्मदीयं नष्टं धनं पुनः भूयोऽपि आ कृधि आवृत्तं कुरु । पुनः भूयोऽपि नः अस्मदीयं रयिं पूर्वसंपादितं धनं आ कृधि सर्वतः संपादितं कुरु ॥९॥

आ– ' अग्ने अङ्गिरः ' इति । महाबृहती । हे भगवन् अग्ने अङ्गिरः । अङ्गं पदादिकं, तस्यास्तीति अङ्गी शरीरम्, तेन अशितपीतान्नं रसीकरोतीति अङ्गिराः, तत्संबोधनं हे अङ्गिरः । ' शतं ते सन्तु आवृतः ' । आवर्तन्ते यैस्ते आवृतः, एषां शतम् । ते शतं शतानि सन्तु । उपावृतः सहस्रं ते सन्तु । तथा पोषस्य अन्नादेः पोषेण सह ' पुनर्नो नष्टमा कृधि ' । नः अस्मान् प्रति पूर्वं नष्टम् आ कृधि आगमय । करोतिरत्रागमार्थः । रयिं नष्टं रयिं पुनः नः अस्मान् प्रति आ कृधि आगमय ॥९॥

पुन॑रू॒र्जा नि व॑र्तस्व॒ पुन॑रग्न इ॒षायु॑षा ।
पुन॑र्नः पाह्य॒ꣳह॑सः ॥१०॥

पुन॒रिति॑ । ऊ॒र्जा । नि । व॒र्त॒स्व॒ । पुन॒रिति॑ । अ॒ग्ने॒ । इ॒षा । आयु॑षा ।
पुन॒रिति॑ । नः॒ । पा॒हि॒ । अꣳह॑सः ॥ ळिं ॥१०॥

सा– अथ तृतीयः – ' पुनरुर्जा नि वर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यꣳहसः ' इति । हे अग्ने, त्वम् ऊर्जा क्षीरादिरसेन सह पुनः निवर्तस्व अत्रागच्छ । इषा अन्नेन आयुषा जीवनेन च सह पुनः आगच्छ । आगतस्त्वं नः अस्मान् पुनः कृतात् अंहसः पापात् पाहि रक्ष ॥१०॥

3. S2 om. उपावृतः; P1 उपशक्तयः for उपावृत्तिशक्तयः
4. S2 आवृतः for आवृत्
10. B1 om. अग्ने ... तस्यास्तीति (L 11)
11. B1 H2-3 अङ्गिरः for अङ्गी
13. B1 om. उपा ... सन्तु; B1 यज for सह
14. B1 om. पूर्वं नष्टम् and करोतिर् ... आगमय (L 15)
21. S2 after आगच्छ add अनेनायुषा जीवनेन; S2 om. आयुषा जीवनेन
22. S2 आगत्य च for आगतस्त्वं

उखाग्निस्थापनमन्त्राः]

आ– ' पुनरूर्जा ' आग्नेयी गायत्री । अभ्यासस्त्वादरार्थः । हे भगवन् अग्ने, इषा अन्नेन ऊर्जा विशिष्टक्षीराद्युपसेवनेन सहस्थितेन आयुषा जीवनेन सह पुनः पुनः निवर्तस्व । पुनः नः पाहि अंहसः पापात् सकाशात् नः अस्मान् पाहि रक्ष ॥१०॥

स॒ह र॒य्या नि व॑र्त॒स्वाग्ने॒ पिन्व॑स्व॒ धार॑या ।
वि॒श्वप्स्न्या॑ वि॒श्वत॒स्परि॑ ॥११॥

स॒ह । र॒य्या । नि । व॒र्त॒स्व॒ । अग्ने॑ । पिन्व॑स्व । धार॑या ।
वि॒श्वप्स्न्येति॑ वि॒श्वऽप्स्न्या॑ । वि॒श्वत॑ः । परि॑ ॥ कं ॥११॥

सा– अथ चतुर्थः – ' सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ' इति। हे अग्ने, रय्या धनेन सह निवर्तस्व । प्सा भक्षणे । विश्वैः प्सायते भक्ष्यते पीयत इति विश्वप्स्नी, तादृश्या वृष्टिधारया विश्वतः परि सर्वेषां तृणधान्यलतापादपानामुपरि पिन्वस्व सिञ्चस्व ॥११॥

आ– ' सह रय्या ' इति । आग्नेयी गायत्री । हे भगवन् अग्ने, सह रय्या धनेन निवर्तस्व नितरां वर्तस्व । हे भगवन्नग्ने, पिन्वस्व धारया । पिन्वतिः सेचनार्थः । धारया सिञ्चस्व, अनवच्छिन्नया धारया पुनः पुनः आप्यायस्वेत्यर्थः । कथंभूतया धारयेति ? विश्वप्स्न्या । प्सा भक्षणे, सर्वजनोपभोग्यया । विश्वतः परि विश्वं सर्वतः स्वार्थेन पूरयित्वा विश्वप्स्न्या धारया पिन्वस्व इति संबन्धः ॥११॥

आ त्वा॑ऽहार्षम॒न्तर॑भूर्ध्रु॒वस्ति॒ष्ठावि॑चाचलिः ।
विश॑स्त्वा॒ सर्वा॑ वाञ्छन्तु॒ मा त्वद्रा॒ष्ट्रमधि॑ भ्रशत् ॥१२॥

आ । त्वा॒ । अ॒हा॒र्ष॒म् । अ॒न्तः । अ॒भूः॒ । ध्रु॒वः । ति॒ष्ठ॒ । अवि॑चाचलि॒रित्यवि॑ऽचाचलिः ।
विश॑ः । त्वा॒ । सर्वा॑ः । वा॒ञ्छ॒न्तु॒ । मा । त्वत् । रा॒ष्ट्रम् । अधि॑ । भ्र॒श॒त् ॥ कैं ॥१२॥

सा– कात्यायनः – " उपरिनाभि धारयन्ना त्वाऽहार्षमित्यभिमन्त्रयते " (काश्रौ १६·५·१६) इति । उख्यमग्निं नाभेरूर्ध्वं धारयन् अभिमन्त्रणं कुर्यात् । पाठस्तु– ' आ त्वाऽहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ' इति । हे अग्ने, त्वाम् आऽहार्षम् आहृतवानस्मि ।

2. M3 om. सह
9. S2 after भक्षणे adds इति धातुः
10. P1 with insertion after सिञ्चस्व adds पिन्वतिः सेचनार्थः
12. M3 om. नितरां वर्तस्व
13. H3 M3 °च्छिन्नदानार्थं धरया (?) for °च्छिन्नयां धारया
21. B1 om. आ त्वाऽहार्षम्

त्वं चोखायाम् ^{v}अन्तः ^{v}अभूः अवस्थितोऽसि । ^{v}अविचाचलिः अत्यन्तं चलनरहितः ^{v}ध्रुवः ^{v}तिष्ठ । ^{v}सर्वाः ^{v}विशः प्रजा अन्नानि वा । "अन्नं वै विशः" (शब्रा ४·३·३·१२) इति श्रुतेः । त्वां ^{v}वाञ्छन्तु । ^{v}त्वत् त इदं ^{v}राष्ट्रं ^{v}मा ^{v}अधि ^{v}भ्रशत् शून्यं मा भूयात् । त्वमस्मिन् राष्ट्रे स्थित्वा सर्वाः प्रजाः पाहीत्यर्थः ॥१२॥

आ- उपरिनाभि धारयन्नभिमन्त्रयते- 'आ त्वाऽहार्षम्' इति । ध्रुवदेवत्याऽनुष्टुप् । 'आ त्वाऽहार्षम्' । यतः द्युलोकात् ^{v}त्वा अन्न त्वाम् ^{v}आऽहार्षम् आहृतवानस्मि। त्वं च ^{v}अन्तः ^{v}अभूः अन्तर्नाभ्यामुपरि शरीरमध्ये अभूः स्याः । अतस्त्वां ब्रवीमि- 'ध्रुवस्तिष्ठाविचाचलिः' । ^{v}ध्रुवः स्थिरः सन् ^{v}तिष्ठ । ^{v}अविचाचलिः स्वकार्ये चलनरहितो भव । किं च- 'विशस्त्वा सर्वा वाञ्छन्तु' । ^{v}सर्वाः ^{v}विशः प्रजाः ^{v}वाञ्छन्तु अन्नं ^{v}त्वा त्वाम् । आसदास्मासु तिष्ठत्विति अन्नं वाञ्छन्ति । 'मा त्वद्राष्ट्रमधि भ्रशत्' । जनपदसमूहः ^{v}राष्ट्रं ^{v}मा भ्रश्य [तु] । भ्रंशु अधःपतने । ^{v}त्वत् त्वत्तः अन्नात् इदं राष्ट्रं मा अधि भ्रशत् मा विनश्येत् । अन्नशून्यं मा भूदित्यर्थः ॥१२॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥१३॥

उत् । उत्तममित्युत्ऽतमम् । वरुण । पाशम् । अस्मत् ।
अव । अधमम् । वि । मध्यमम् । श्रथाय । श्रथयेति श्रथय ।
अथ । वयम् । आदित्य । व्रते । तव । अनागसः । अदितये । स्याम ॥ चौं ॥१३॥

सा- कात्यायनः - "पाशादुन्मुच्योदुत्तममिति" (काश्रौ १६·५·१७) इति । शिक्यपाशं विस्रंसेत् । पाठस्तु- 'उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम' इति । हे ^{v}वरुण, ^{v}उत् ^{v}उत्तमम् उत्तमाङ्गे शिरसि स्थापितं त्वदीयं ^{v}पाशं ^{v}श्रथय उत्कृष्य श्रथय । ^{v}अस्मत् अस्मत्तः सकाशात् विनाशय । ^{v}अधमम् अधमाङ्गे पादप्रदेशे स्थापितं पाशमवकृष्य विनाशय । ^{v}मध्यमं मध्यमप्रदेशे स्थापितं पाशं विच्छेदय । ^{v}अथ पाशत्रयविनाशनानन्तरं हे ^{v}आदित्य अदितिपुत्र ^{v}वरुण, ^{v}वयम् ^{v}अनागसः पापरहिताः सन्तः ^{v}तव ^{v}व्रते त्वदीयकर्मणि ^{v}अदितये अखण्डितत्वाय ^{v}स्याम योग्या भवेम ॥१३॥

आ- पाशान् मुञ्चति- 'उदुत्तमम्' इति । शुनःशेपो वारुणी त्रिष्टुप् । वरुणस्य उत्तमाधममध्यमलक्षणाः पाशाः सन्ति । तत्र हे ^{v}वरुण, ^{v}उत् ^{v}उत्तमं ^{v}पाशम् । श्रथ शैथिल्ये ।

8. B1 om. आ°
11. H2-3 M3 भूयात् for भूत्°
20. S2 om. अस्मत् अस्मत्तः सकाशात्
25. H2-3 after उत् उत्तमं adds उत्तव उत्तमं; M3 उत्तमं

पाशं vश्रथाय । vअस्मत् अस्मत्तः उत् श्रथय । पाशं शिथिलीकृत्य ऊर्ध्वं नय । vअव vअधमं पाशम् अव श्लथय अवाचीनं गमय। ' वि मध्यमम् ' । vमध्यमं पाशं स्थानस्थितमेव vवि श्लथय । vअथ एवंकृते सति हे vआदित्य हे आदितिपुत्र, vवयं vतव vव्रते तवाज्ञाभूते कर्मणि वर्तमाना vअनागसः अनपराधाः अपापाश्च सन्तः वयम् vअदितये अदीनतायै अनवखण्डितैश्वर्याय च तत्साधनयोग्याः vस्याम भवेम ॥१३॥

अग्ने॑ बृ॒हन्नु॒षसा॑मू॒र्ध्वो अ॑स्थान्निर्जग॒न्वान् तम॑सो॒ ज्योति॒षाऽऽग॑ात् ।
अ॒ग्निर्भा॒नुना॒ रुश॑ता॒ स्वङ्ग॒ आ जा॒तो विश्वा॒ सद्मा॑न्यप्राः ।।१४।।

अग्ने॑ । बृ॒हन् । उ॒षसा॑म् । ऊ॒र्ध्वः । अ॒स्था॒त् ।
नि॒र्ज॒ग॒न्वानिति॑ निः॒ऽज॒ग॒न्वान् । तम॑सः । ज्योति॑षा । आ । अ॒गा॒त् ।
अ॒ग्निः । भा॒नुना॑ । रुश॑ता । स्वङ्ग॒ इति॑ सु॒ऽअङ्गः॑ ।
आ । जा॒तः । विश्वा॑ । सद्मा॑नि । अ॒प्राः॒ ॥ छूलौं ॥१४॥

सा– कात्यायनः – " प्रगृह्णात्यग्ने बृहन्निति " (काश्रौ १६.५.१७) इति । पाठस्तु– ' अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषाऽऽगात् । अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः ' इति । अयम् vअग्निः vबृहन् महान् vउषसाम् vअग्रे उषसां मुखे vऊर्ध्वः vअस्थात् अग्निहोत्रादौ बोध्यमान उत्तिष्ठति । vज्योतिषा स्वकीयेन तेजसा vतमसः vनिर्जगन्वान् निर्गतः सन् vआऽगात् इहागतः । कीदृशः अग्निः ? vरुशता तमो हिंसता vभानुना रश्मिना vस्वङ्गः शोभनशरीरः । किंच– vजातः उत्पन्नमात्र एव vविश्वा vसद्मानि सर्वाणि स्थानानि vआऽप्राः स्वकीयेन तेजसा सर्वत्र पूरितवान् ॥१४॥

आ– प्रतिगृह्णाति– ' अग्ने बृहन् ' इति । त्रितः । आग्नेयी त्रिष्टुप् । आदित्यात्मना अग्निस्तुतिः । ' अग्ने बृहन्नुषसाम् ' । [vउषसाम्] vअग्ने पुरतः यः vबृहन् स्वभावतो महान् vतमसः शार्वरतमसः सकाशात् vनिर्जगन्वान् निर्गच्छन् vऊर्ध्वः vअस्थात् ऊर्ध्वं गमनमास्थितः । vज्योतिषा अहर्लक्षणेन ज्योतिषा तेजसा सह vआऽगात् आगतवान् । एवंभूतो सोऽग्निरिति

---

1. H2–3 M3 शिथिलं कृत्वा for शिथिलीकृत्य
3. M3 अदितेः for अदिति°; M3 तव ज्याहन्ते for तवाज्ञाभूते
4. S2 om. सन्तः; M3 H2–3 वा for च
14. S2 om. उषसाम् अग्रे
17. P1 after आप्राः ins. प्रा पूरणे; P1 with markings above पूरितवान् ins. on the margin अत्रादित्यात्मनाग्नेः स्तुतिरिति ज्ञेयम्
20. H2–3 शर्वरी° for शार्वर°; B1 om. निर्गच्छन्

सूर्याग्न्योरेकत्वनिर्देशः । शास्त्रदृष्ट्या अग्निः भानुना रुशता अतिनिष्ठुरेण भानुना तेजसा स्वङ्गः आ जातः शोभनाङ्गो जातः । विश्वा विश्वानि सद्मानि सदनानि स्थानानि आऽप्राः । प्रा पूरणे । स्वतेजसा आपूरितवान् । प्रत्यक्षतोऽयमर्थ उपलभ्यते ॥१४॥

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥१५॥

हꣳसः शुचिषत् ॥ स्न ॥१५॥

सा– कात्यायनः – "अवहरति हꣳसः शुचिषदित्यासन्दयां करोति बृहदिति" (काश्रौ १६.५.१८-१९) इति । 'हꣳसः शुचिषत्' इत्यनेन मन्त्रेण उखामवहृत्य 'बृहत्' इति तस्योत्तमेन पदेन आसन्दयां स्थापयेत् । पाठस्तु– 'हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्' इति । अयं मन्त्रः पूर्वमेकादशेऽध्याये व्याख्यातः । अत्राग्निपरत्वं द्रष्टव्यम् ॥१५॥

आ– आहरति– 'हꣳसः शुचिषत्' इति । वामदेवः । हंसदेवत्या जगती यजुरन्ता 'बृहत्' इति यजुः । व्याख्यातो मन्त्रः ॥१५॥

सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् ।
मैनां तपसा माऽर्चिषाऽभि शोचीरन्तरस्याꣳ शुक्रज्योतिर्वि भाहि ॥१६॥

सीद । त्वम् । मातुः । अस्याः । उपस्थ इत्युपऽस्थे ।
विश्वानि । अग्ने । वयुनानि । विद्वान् ।
मा । एनाम् । तपसा । मा । अर्चिषा । अभि । शोचीः ।
अन्तः । अस्याम् । शुक्रज्योतिरिति शुक्रऽज्योतिः । वि । भाहि ॥ ज्याः ॥१६॥

सा– कात्यायनः – "उपतिष्ठते सीद त्वमिति" (काश्रौ १६.५.२०) इति । 'सीद त्वम्' इत्यादिभिस्त्रिभिर्मन्त्रैरुपस्थानं कुर्यात् । तत्र प्रथममन्त्रपाठस्तु– 'सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् । मैनां तपसा माऽर्चिषाऽभि शोचीरन्तरस्याꣳ शुक्रज्योतिर्वि भाहि' इति । हे अग्ने, त्वं मातृसमानाया अस्याः उखायाः उपस्थे उत्सङ्गे सीद त्वमुपविश । कीदृशस्त्वम् ? विश्वानि वयुनानि

2. B1 om. शोभनाङ्गो जातः

3. B1 अप्रत्यक्षतो° for प्रत्यक्षतो°

11. S2 om. अत्र ... द्रष्टव्यम् ।

12. M3 after वामदेवः adds ऋषिः

सर्वान् ज्ञानोपायान् विद्वान् जानन्। एनाम् उखां तपसा संतापेन मा अभिशोचीः अत्यन्तं मा दीपय। अर्चिषा ज्वालया च मा शोचीः। तपः कार्यम्, अर्चिः कारणम्। कार्येण भूयान् तापो भवति। कारणेन त्वीषत्। तदुभयं मा कुर्वित्यर्थः। अस्याम् उखायाम् अन्तः शुक्रज्योतिः निर्मलप्रकाशः सन् विभाहि विशेषेण दीप्यस्व ॥१६॥

आ– उपतिष्ठते– 'सीद त्वम्' इति। त्रिभिराग्नेयीभिरेका त्रिष्टुप्। द्वे अनुष्टुभौ। हे श्रीभगवन्नग्ने। 'सीद त्वम् मातुरस्या उपस्थे'। अस्याः उखायाः उपस्थे उत्सङ्गे मध्ये त्वं सीद त्वमवस्थानं कुरु। हे अग्ने, विश्वानि सर्वाणि वयुनानि प्रज्ञानानि, प्रज्ञानविषयतया स्थितानि वस्तूनि च विद्वान् जानन् त्वम् [अव] स्थानं [कुरु]। किंच– उखायामवस्थानं कुर्वन्। 'मैनां तपसा'। एनाम् उखां तपसा तापेन मा अभिशोचीः मा संतापयेः। 'माऽर्चिषा'। अर्चिषा ज्वालया मा अभिशोचीः अभिसंतप्तां मा कार्षीः। किंच– 'अन्तरस्याम्'। अस्याम् उखायां अन्तः मध्ये अवस्थितः शुक्रज्योतिः शुद्धकर्मनिमितं ज्योतिः दीप्तिः विभाहि विविधं दीप्यस्व ॥१६॥

अन्तरग्ने रुचा त्वमुखायाः सदने स्वे ।
तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव ॥१७॥

अन्तः । अग्ने । रुचा । त्वम् । उखायाः । सदने । स्वे ।
तस्याः । त्वम् । हरसा । तपन् । जातवेद इति जातऽवेदः । शिवः । भव ॥ध्यु॥१७॥

सा– अथ द्वितीयः– 'अन्तरग्ने रुचा त्वमुखायाः सदने स्वे। तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव' इति। हे अग्ने, त्वम् उखायाः अन्तः मध्ये स्वे सदने स्वकीये स्थाने रुचा दीप्त्या युक्तः सन् सीदेति शेषः। हे जातवेदः, त्वं तस्याः उखायाः शिवः भव सुखप्रदो भव। किं कुर्वन्? हरसा तेजसा तपन् प्रज्वलन् ॥१७॥

आ– 'अन्तरग्ने रुचा त्वमुखायाः सदने स्वे'। हे श्रीभगवन् अग्ने, उखायाः अन्तः स्वे स्वकीये सदने रुचा स्वकीयया दीप्त्या सहितः त्वं वर्तसे। तस्याः उखायाः हरसा ज्योतिषा तपन् दीप्यमानः त्वं हे जातवेदः, जाते जाते विद्यमानः सर्वतः शिवः भव अस्माकं शान्तो भव ॥१७॥

---

5. M3 om. एका
6. B1 उत्सङ्ग° for उत्सङ्गे
7. H2 om. सर्वाणि
9. M3 om. अभिशोची .. वि भाहि (L 11)
10. H2–3 om. अभिसंतप्तां ... दीप्यस्व (L 12)
21. H2–3 om. अन्तरग्ने

शिवो भूत्वा मह्यमग्ने अथो सीद शिवस्त्वम् ।
शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहाऽसदः ॥१८॥

शिवः । भूत्वा । मह्यम् । अग्ने । अथो इत्यथो । सीद । शिवः । त्वम् ।
शिवाः । कृत्वा । दिशः । सर्वाः । स्वम् । योनिम् । इह । आ । असदः ॥ क्रैं ॥१८॥(१)॥

सा– अथ तृतीयः – 'शिवो भूत्वा मह्यमग्ने अथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहाऽसदः ' इति । हे vअग्ने, vमह्यं मदर्थं vशिवः शान्तः vभूत्वा vअथ अनन्तरं vत्वं vशिवः vसीद सर्वान् प्रति शान्तः उपविशः । vसर्वाः vदिशः vशिवाः शान्ताः vकृत्वा vइह अस्यामुखायां vस्वं vयोनिं स्वकीयं स्थानम् vआऽसदः आगत्योपविश ॥१८॥

[इति त्रयोदशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

आ– ' शिवो भूत्वा ' इति । हे भगवन् vअग्ने, vमह्यं त्वं vशिवः भव शान्तो भव vअथ अपि च vशिवः vत्वं शान्तस्त्वं स्वस्थाने vसीद उपविश । उपविश्य च vसर्वाः vदिशः vशिवाः vकृत्वा vइह vस्वं vयोनिं स्वां योनिम् vआऽसदः आविशः ॥१८॥

[त्रयोदशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

[अथ द्वितीयोऽनुवाकः ।]

प्रथमेऽनुवाके वह्नेरासन्द्यां स्थानमुक्तम् । द्वितीये तस्याग्नेरुपस्थानमुच्यते ॥

दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥१॥

दिवः । परि । प्रथमम् । जज्ञे । अग्निः ।
अस्मत् । द्वितीयम् । परि । जातवेदा इति जातऽवेदाः ।
तृतीयम् । अप्स्वित्यप्ऽसु । नृमणाः । नृमना इति नृऽमनाः । अजस्रम् ।
इन्धानः । एनम् । जरते । स्वाधीरिति सुऽआधीः ॥ श्रौं ॥१॥

6. S2 om. अथ
11. B1 after first च adds शिवो भूत्वा च

उखाग्नेरुपस्थानमन्त्राः]

स्रा- कात्यायनः – " वात्सप्रेण च दिवसस्परीत्येकादशभिः । अनुवाकेनैके " (काश्रौ १६·५·२३–२४) इति । अत्र च-शब्देन ' उपतिष्ठते ' इत्यनुवर्तते । वत्सप्रऋषेः संबन्धी वात्सप्रो ' दिवस्परि ' इत्यनुवाकः। तत्र केचिदेकादशभिर्मन्त्रैरासन्द्यामुपरि स्थितम् उखाग्निमुपतिष्ठेत इति वदन्ति। अन्ये तु वात्सप्रेण सर्वेणानुवाकेनोपस्थानं कुर्यादिति वदन्ति ॥

तत्र प्रथममन्त्रपाठः – ' दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः । तृतीयमप्सु नृमणा अजस्रमिन्धान एवं जरते स्वाधीः ' इति। ▾अग्निः ▾प्रथमं ▾दिवः ▾परि द्युलोकस्य उपरि प्रथमं ▾जज्ञे सूर्यरूपेणोत्पन्नः । ▾अस्मत् ▾परि अस्मदीयमनुष्यलोकस्योपरि ▾जातवेदाः ▾द्वितीयं जज्ञे प्रसिद्धवह्निरूपेण द्वितीयं जन्म प्राप्तवान् । ▾अप्सु समुद्रे ▾तृतीयं जज्ञे बडवानलरूपेणोत्पन्नः । ▾अजस्रं त्रिष्वपि जन्मसु ▾नृमणाः नृषु यजमानेषु मनोऽनुग्रहबुद्धिर्यस्यासौ नृमणाः । ▾एनम् ईदृशमग्निम् ▾इन्धानः पुरोडाशादिना दीपयन् ▾स्वाधीः स्वायत्तचित्तः ▾जरते जीर्यते जरापर्यन्तं परिचरतीत्यर्थः ॥१॥

आ– उपतिष्ठते– ' दिवस्परि ' इति । वत्सप्रीर्भालन्दनः । द्वादशर्चमाग्नेयं त्रैष्टुभम् । ' दिवस्परि प्रथमं जज्ञे ' । ▾अग्निः ▾दिवः ▾परि दिवः सकाशात् ▾प्रथमम् आदौ ▾जज्ञे जातः । अग्निः ' अस्मत् द्वितीयं परि जातवेदाः ' । ▾अस्मत् अस्मत्तः परितः सकाशात् ▾द्वितीयम् अग्निम् अजनयत् । प्रथमोत्पन्नाग्न्यपेक्षया द्वितीयत्वम् अग्नेः । " स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत " (शब्रा १४·४·२·११) इति श्रुतेः । ▾तृतीयम् ▾अप्सु अन्तर्व्यवस्थितं तृतीयमग्निं जनयति । " तृतीयमद्भ्योऽजनयत् " (शब्रा ६·७·४·३) इति श्रुतेः । ▾नृमणाः नृषु मनुष्येषु अग्न्याधानाधिकारियजमानेषु मनो यस्याग्नेः स नृमनाः नृमणाः । एवं बहुजन्मा योऽग्निस्तम् ▾अजस्रम् अनवच्छिन्नम् ▾इन्धानः संदीपयन् यजमानः ▾एनं तमग्निं ▾जरते । जृष् झृष् वयोहानौ । अयं धातुर्जनेरर्थे वर्तते, जनयति । ▾स्वाधीः शोभना आहिता बुद्धिर्धीः यस्य स स्वाधीः ॥१॥

विद्मा ते॑ अग्ने त्रे॒धा त्र॒याणि॑ वि॒द्मा ते॒ धाम॒ विभृ॑ता पुरु॒त्रा ।
वि॒द्मा ते॒ नाम॑ पर॒मं गुहा॒ यद्वि॒द्मा तमुत्सं॒ यत॑ आज॒गन्थ॑ ॥२॥

---

2. S2 वात्सप्र° for वत्सप्र°

7. S2 om. सूर्य° ... द्वितीयं ; S2 before जज्ञे adds अस्मत्

10. S2 om. स्वाधी; S2 पचति for परिचरति

12. B1 om. आदौ ... सकाशात् (L 13)

13. M3 ends with अस्मत्तः

14. H3 om. स मुखाच्च योनेः

18. H3 °जन्मानोऽग्निः for °जन्मा योऽग्निः

वि॒द्म । ते॒ । अ॒ग्ने॒ । त्रे॒धा । त्र॒याणि॑ ।

वि॒द्म । ते॒ । धाम॑ । विभृ॒तेति॒ विऽभृ॑ता । पु॒रु॒त्रेति॑ पु॒रु॒ऽत्रा ।

वि॒द्म । ते॒ । नाम॑ । प॒रमम् । गुहा॑ । यत् ।

वि॒द्म । तम् । उत्सम् । यतः॑ । आ॒ज॒गन्थेत्या॑ऽज॒गन्थ॑ ॥ टाः ॥२॥

सा- अथ द्वितीयः – 'विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा । विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ' इति । हे अग्ने, यानि पूर्वस्मिन् मन्त्रे 'दिवस्परि' इत्यादिना त्रेधा स्वरूपाण्युक्तानि आदित्याग्निबडवानलरूपाणि तानि त्रिसंख्याकानि ते तव संबन्धीनि रूपाणि वयं विद्म जानीमः । किंच- ते तव संबन्धीनि विभृता बहुषु प्रदेशेषु गार्हपत्याहवनीयान्वाहार्यपचनशामित्राग्नीध्रीयरूपेषु बृंहितानि पुरुत्रा पुरूणि धाम धामानि स्थानान्यपि विद्म । किंच- ते तव परमम् उत्कृष्टं गुहा गुह्यं गोप्यं 'देवेद्धो मन्विद्धः' इत्यादिमन्त्रप्रतिपाद्यं नाम यत् अस्ति तदपि विद्म । देवादीनां नाम मन्त्रान्तरे संबोधनबलादवगम्यते । 'अग्ने देवेद्ध मन्विद्ध मन्द्रजिह्व' इति मन्त्रान्तरम् । किंच यतः उत्सरूपात् प्रस्रवणात् आजगन्थ वैद्युतरूपेण त्वमागतोऽसि तम् अपि उत्सं जलरूपं विद्म ॥२॥

आ- 'विद्मा ते' इति । हे श्रीभगवन् अग्ने, त्रेधा त्रिधा विभक्तानि त्रयाणि अग्निवायुसूर्याख्यानि त्रीणि रूपाणि ते त्वदीयानि विद्म जानीमः । विद्मा ते [धाम] धामानि त्रयाणि स्थानानि विभृता विहृतानि पुरुत्रा रूपाणि बहुरूपाणि विद्म । 'विद्मा ते नाम परमं गुहा यत्' । नामानि ते तवाभिप्रेतानि धामानि जन्मानि । नामानि आहवनीयगार्हपत्यदक्षिणाग्नय इति । परमं गुहा यत् गुहायामन्तःकरणाख्यायां गुहायामवस्थितं परमं ब्रह्मलक्षणं ते स्वरूपं विद्म । 'तमुत्सं यत आजगन्थ' । हे श्रीभगवन्नग्ने, यतः सकाशात् त्वम् आजगन्थ आगतोऽसि तम् उत्सम् उत्कृष्टतया सनोतीति उत्सस्तं विद्म ॥२॥

---

8. S2 om. जानीमः
9. S2 om. पुरुत्रा पुरूणि धाम
11. P1 नामत्वं for नाम
12. P1 उत्साह° for उत्स°; P1 त्वाम् for तम्
14. B1 om. श्री°
16. B1 प्रस्थानानि for स्थानानि; H2–3 om. विभृता विहृतानि
17. H2–3 om. जन्मानि; H2–3 after नामानि add वा; H2–3 °अग्नि इयति for °अग्नय इति (L 18)
18. H2–3 परं for परमं
19. B1 om. श्री°
20. H2–3 तत् for तम्

उखाग्नेरुपस्थानमन्त्राः]

समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन् ॥३॥

समुद्रे । त्वा । नृमणाः । नृमना इति नृऽमनाः । अप्स्वित्यप्ऽसु । अन्तः ।
नृचक्षा इति नृऽचक्षाः । ईधे । दिवः । अग्ने । ऊधन् ।
तृतीये । त्वा । रजसि । तस्थिवांसमिति तस्थिऽवांसम् ।
अपाम् । उपस्थ इत्युपऽस्थे । महिषाः । अवर्धन् ॥ प्रलौं ॥३॥

सा– अथ तृतीयः – 'समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् । तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन्' इति । हे ᵛअग्ने, त्वाम् ᵛईधे यजमानोऽहं दीपयामि। कीदृशो यजमानः ? ᵛनृमणाः, नृषु मनुष्येषु कर्मानुष्ठानपरेषु ऋत्विक्षु मनोऽनुसंधानकारणं चित्तं यस्यासौ नृमणाः, ᵛनृचक्षाः, नृषु पुरुषेषु वेदपारंगतेषु मध्ये चष्टे मन्त्रान् विस्पष्टं वक्तीति नृचक्षाः। कीदृशं त्वाम् ? ᵛतस्थिवांसम् वडवानलरूपेणावस्थितम् । तथा ᵛअप्सु वृष्टिरूपासु ᵛअन्तः वैद्युतरूपेणावस्थितम् । तथा ᵛदिवः द्युलोकस्य ᵛऊधन् ऊधःस्थानीये ᵛतृतीये समुद्रवृष्ट्यपेक्षया तृतीयस्थाने ᵛरजसि रञ्जनात्मके तेजोमण्डले सूर्यरूपेण तस्थिवांसम् । ᵛमहिषाः महान्तो यजमानाः ᵛअपाम् ᵛउपस्थे उत्सङ्गे ᵛअवर्धन् अवर्धयन् ॥३॥

आ– 'समुद्रे त्वा' इति। हे श्रीभगवन् ᵛअग्ने, ᵛसमुद्रे वर्तमानं त्वां ᵛनृमणाः प्रजापतिः ᵛईधे दीपयति। 'अप्स्वन्तर्नृचक्षा ईधे' । ᵛअप्सु ᵛअन्तः वर्तमानं त्वां ᵛनृचक्षाः प्रजापतिः ईधे दीपयति। 'दिवो अग्न ऊधन्'। हे श्रीभगवन् अग्ने, ᵛदिवः ᵛऊधन्। व्यत्ययः। ऊधसि महोदके दिवः द्युलोकस्य संबन्धीनि महोदकप्रदेशे आदित्यात्मना स्थितं त्वां ᵛतृतीये ᵛत्वा रजसि परब्रह्मणि रजसि तेजसि परमादित्यात्मना ᵛतस्थिवांसं स्थितवन्तं तम् ᵛअपाम् ᵛउपस्थे उत्सङ्गे व्यवस्थितम् अग्निं त्वां ᵛमहिषाः महान्तः ᵛअवर्धन् वर्धयांचक्रे। "प्राणो वै महिषाः" (द्र. शब्रा ६.७.४.५) इति श्रुतेः । "ऋत्विजो वै महिषाः" (शब्रा १२.८.१.२) इति श्रुतेः वा ॥३॥

अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥४॥

15. B1 om. श्री°
17. H2–3 ऊधाधि for ऊधसि
18. H2 तृतीये च, H3 तृतीये चरासि for तृतीये त्वा रजसि
19. H2–3 परमात्मा आदित्यात्मा for परमादित्यात्मना; H2 स्थितं, B1 स्थितिमन्तं for स्थितवन्तं

कासं ... २०

अक्रन्ददग्निः ॥ अ ॥४॥

सा– अथ चतुर्थः – " अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः " इति । पूर्वानुवाकेऽयं मन्त्रो व्याख्यातः ॥४॥

आ – व्याख्यातो मन्त्रः ॥४॥

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा विभात्यग्र उषसामिधानः ॥५॥

श्रीणाम् । उदार इत्युत्ऽआरः । धरुणः । रयीणाम् ।
मनीषाणाम् । प्रार्पण इति प्रऽअर्पणः । सोमगोपा इति सोमऽगोपाः ।
वसुः । सूनुः । सहसः । अप्स्वित्यप्ऽसु । राजा ।
वि । भाति । अग्रे । उषसाम् । इधानः ॥ द्रैं ॥५॥

सा– अथ पञ्चमः – ' श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः । वसुः सूनुः सहसो अप्सु राजा विभात्यग्र उषसामिधानः ' इति । ᵛश्रीणां गवाश्वादीनां संपदाम् ᵛउदारः उत्कर्षेण प्रार्पयिता, ᵛरयीणां धनानां ᵛधरुणः धारयिता, ᵛमनीषाणाम् अपेक्षितानां स्वर्गादिफलानां ᵛप्रार्पणः प्रार्पयिता, ᵛसोमगोपाः यजमानेन अनुष्ठेयस्य सोमयागस्य रक्षिता, ᵛवसुः सर्वस्य निवासहेतुः, ᵛसहसः मन्थनादौ वेगरूपस्य बलस्य पुत्रः, ᵛअप्सु वृष्टिरूपासु ᵛराजा वैद्युतरूपेण दीप्यमानः, ᵛउषसाम् ᵛअग्रे प्रातःकाले ᵛइधानः अग्निहोत्रे दीप्यमानोऽग्निः ᵛविभाति विशेषेण भासते ॥५॥

आ– ' श्रीणामुदारः ' इति । ᵛश्रीणां लक्ष्मीणाम् ᵛउदारः उत् आरः । रा दाने । उत्कृष्टतया दाता, ᵛरयीणां धनानां ᵛधरुणः धारयिता, ᵛमनीषाणां ᵛप्रार्पणः बुद्धीनामर्पकः अभिलषितानां कामानां प्रार्पयिता, ᵛसोमगोपाः धिष्ण्योऽग्निः, सोमं गोपायतीति सोमगोपाः । व्यत्ययः । ᵛवसुः वासयिता प्राणिनामिति धनवान् । जनानामुपकारकत्वात् वास्यते अनेनेति वसुः । ᵛसूनुः ᵛसहसः बलस्य पुत्रः । बलान्मथ्यमानो जायत इति । ᵛअप्सु अवहितो वरुणात्मना ᵛराजा । ' विभात्यग्र उषसामिधानः ' । ᵛउषसाम् ᵛअग्रे आदित्यात्मना ᵛइधानः इन्धानः दीप्यमानः ᵛविभाति उषःकाले अग्नीनां प्रादुष्करणं क्रियते । तदभिप्रायोऽयम् ॥५॥

3. P1 om. अयं
13. P1 after प्रार्पयिता adds दाता । उदारो दातृमहतोरित्यभिधानात् ।
14. P1 वास° for निवास°
15. P1 om. मन्थनादौ
19. H2-3 om. कामानां
21. B1 om. अवहितो वरुणात्मना

उखाग्नेरुपस्थानमन्त्राः]

विश्व॑स्य के॒तुर्भुव॑नस्य॒ गर्भ॒ आ रोद॑सी अपृणा॒ज्जाय॑मानः ।

वी॒ळुं चि॒दद्रि॑मभिनत् प॒राय॒ञ्जना॒ यद॒ग्निमय॑जन्त॒ पञ्च॑ ॥६॥

विश्व॑स्य । के॒तुः । भुव॑नस्य । गर्भः॑ ।

आ । रोद॑सी॒ इति॒ रोद॑सी । अ॒पृ॒णा॒त् । जाय॑मानः ।

वी॒ळुम् । चि॒त् । अद्रि॑म् । अ॒भि॒न॒त् । प॒राय॒न्निति॑ प॒राऽयन् ।

जनाः॑ । यत् । अ॒ग्निम् । अय॑जन्त । पञ्च॑ ॥ इ॒ये॑ ॥६॥

सा– अथ षष्ठः – 'विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः । वीळुं चिदद्रिमभिनत् परायञ्जना यदग्निमयजन्त पञ्च' इति । विश्वस्य केतुः सर्वस्य जगतो ज्ञाता भुवनस्य लोकस्य गर्भः गर्भवदन्तरवस्थितः जायमानः जायमान एव रोदसी द्यावापृथिव्यौ अपृणात् सर्वतः स्वतेजसा पूरयति । पञ्च यजमानसहिताः ऋत्विग्रूपाः पञ्चसंख्याकाः जनाः अग्निम् अयजन्त। तदानीं परायन् आहुतिरूपेणादित्यसमीपं गच्छन् वीळुं चित् दृढमेव अद्रिं पर्वतसमानं मेघम् अभिनत् विदारितवान् ॥६॥

आ– 'विश्वस्य केतुः' इति । चतुर्थः पादः प्रथमं व्याख्यायते । 'जना यदग्निमयजन्त पञ्च' । पञ्च जनाः चत्वारो वर्णाः निषादपञ्चमाः यत् यम् अग्निम् अयजन्त यजनं कृतवन्तः, सोऽग्निः विश्वस्य केतुः सर्वस्य प्राणिजातस्य केतुः प्रज्ञानम्। आदित्यात्मना भुवनस्य गर्भः भुवनस्य जातस्य वाय्वात्मना गर्भः, स हि प्राणभावेन सर्वेषां भूतानामन्तश्चरति । यः आ रोदसी अपृणात् जायमानः, द्यावापृथिव्यौ आपृणात्, आपूरयति स्वतेजांसि । स एव मध्यमं स्थानमारुह्य इन्द्रात्मना स्थितः । वीळुं चित् अद्रिम् अतिदृढमप्यद्रिम् अभितः अद्रिपक्षभेदं कृतवान् । मेघं वा । परायन् परावतो गच्छन् वि [अ] दारयदिति ॥६॥

उ॒शिक् पा॑व॒को अ॑र॒तिः सु॑मे॒धा मर्ते॑ष्व॒ग्निर॒मृतो॒ नि धा॑यि ।

इय॑र्ति धू॒मम॑रु॒षं भरि॑भ्र॒दुच्छु॒क्रेण॑ शो॒चिषा॒ द्यामिन॑क्षन् ॥७॥

8. S2 om. सर्वस्य जगतो ज्ञाता

14. B1 निषादः पञ्चमः for निषादपञ्चमाः; H2–3 अयम् for यम्

16. B1 जातः for गर्भः; H2 जातानां for भूतानां

17. H–23 om. स्व°

उशिक् । पावकः । अरतिः । सुमेधा इति सुऽमेधाः ।
मर्तेषु । अग्निः । अमृतः । नि । धायि ।
इयर्ति । धूमम् । अरुषम् । भरिभ्रत् ।
उत् । शुक्रेण । शोचिषा । द्याम् । इनक्षन् ॥ ङ्यों ॥७॥

सा– अथ सप्तमः – 'उशिक् पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि । इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन्' इति । vअरतिः यागरहितेषु प्रीतिरहितः । शोभना मेधा सेवकाभिप्रायधारणशक्तिर्यस्यासौ vसुमेधाः । vअमृतः मरणरहितस्तादृशः vअग्निः vमर्तेषु यजमानेषु vनि vधायि निहितः । vअरुषम् अरोपं चक्षुराद्युपद्रवरहितं vधूमं vभरिभ्रत् अतिशयेन धारयन् vशुक्रेण vशोचिषा निर्मलेन तेजसा प्रभारूपेण vद्याम् आकाशम् vइनक्षन् आप्नुवन् vउत् vइयर्ति ऊर्ध्वं प्रसारयति ॥७॥

आ– 'उशिक् पावकः' । वश कान्तौ । अस्य कृतसंप्रसारणस्यैतद्रूपम् । vउशिक् कान्तः मेधावी vपावकः पावयिता vअरतिः अलंमतिः पर्याप्तमतिः । अरक्तः रतिशून्यो वा अरतिः । vसुमेधाः कल्याणप्रज्ञः साधुप्रज्ञो वा । vमर्तेषु vअग्निः अमरणधर्मा vनि vधायि देवैर्न्यधायि । लुप्ताडागमं पदम् । निहितः त्वमस्य लोकस्याध्यक्षः । 'इयर्ति धूममरुषम्' । vअरुषम् अरोचनं vधूमम् [vउत्] vइयर्ति उद्गमयति । 'भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन्' । vद्यां द्युलोकं vशुक्रेण vशोचिषा vइनक्षन् । णह बन्धने । अतिशयेन संबद्धं कुर्वन् । vउत् अपि इदं जगदपि चित्रं vभरिभ्रत् धारयति । लुप्ताडागममिदं पदम् ॥७॥

दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत् सुरेताः ॥८॥

दृशानो रुक्मः ॥ द ॥८॥

सा– अथाष्टमः – 'दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत् सुरेताः' इति । पूर्ववत् व्याख्येयम् ॥८॥

---

12. H2 पर्याप्तमिति अरं तेषु, H3 पर्याप्तमिति अरक्तेषु B1 पर्याप्तमभि अभाक्तिषु for पर्यायमतिः अरक्तः
14. H2 अन्तोऽस्य, H3 अन्नोऽस्य, B1 त्वनोऽस्य for त्वमस्य
15. H2-3 om. उत्°;
16. H2-3 विबन्धने for बन्धने; B1 H2 संबन्धं for संबद्धं
17. B1 H3 चित्रधा, H2 चित्रया for चित्रं; B1 धारयतु for धारयति

उखाग्नेरुपस्थानमन्त्राः]

आ— ' दृशानो रुक्मः ' इति । व्याख्यातो मन्त्रः ॥८॥

यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ॥९॥

यः । ते । अद्य । कृणवत् । भद्रशोच इति भद्रऽशोचे ।
अपूपम् । देव । घृतवन्तमिति घृतऽवन्तम् । अग्ने ।
प्र । तम् । नय । प्रतरमिति प्रऽतरम् । वस्यः । अच्छ ।
अभि । सुम्नम् । देवभक्तमिति देवऽभक्तम् । यविष्ठ ॥ थौं ॥९॥

सा— अथ नवमः – ' यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने । प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ' इति । हे भद्रशोचे कल्याणदीप्ते अग्ने, देव ते तव अद्य अस्मिन् दिने घृतवन्तम् अपूपम् उपस्तरणाभिघारणोपेतं पुरोडाशं यः यजमानः कृणवत् करोति, हे यविष्ठ युवतम, देवभक्तं देवेषु भक्तियुक्तं तं पुरोडाशकारिणं यजमानम् अच्छ स्वच्छम् अभि सुम्नम् अभिमतं सुखं प्राप्तुं प्रकर्षेण नय प्रेरय । कीदृशं सुम्नम् ? प्रतरं प्रकृष्टतरं वस्यः अतिशयेन निवासकारणम् ॥९॥

आ— ' यस्ते अद्य कृणवत् ' इति । हे श्रीभगवन् हे भद्रशोचे कल्याणदीप्ते हे अग्ने हे देव, अद्य प्रतिपदि यः यजमानः ते तुभ्यं घृतवन्तम् आज्याभिघारयुक्तम् अपूपं पुरोडाशं कृणवत् करोति तं देवभक्तं देवसेवकं यजमानं हे यविष्ठ युवतम अथवा मिश्रयितृतम हे अग्ने, प्रतरं प्रतरणीयं वस्यः । वस निवासे, यो वसनार्हो लोकः, व्यत्ययः । तं वस्यम् अभि सुम्नं सुखात्मकम् अच्छ । " अच्छ अभेः । आप्तुमिति शाकपूणिः " (निरुक्त ५.२८) । एवंविधं लोकं प्राप्तुं प्र प्रकर्षेण नय ॥९॥

आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥१०॥

10. S2 om. यः

11. S2 om. अच्छ स्वच्छं

14. B1 om. श्री°

15. H2–3 अभ्या° for आज्या°

16. B1 om. करोति

आ । तम् । भज । सौश्रवसेषु । अग्ने ।
उक्थउक्थ इत्युक्थेऽउक्थे । आ । भज । शस्यमाने ।
प्रियः । सूर्ये । प्रियः । अग्ना । भवाति ।
उत् । जातेन । भिनदत् । उत् । जनित्वैरिति जनिऽत्वैः ॥ जौं ॥१०॥

सा– अथ दशमः – 'आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने । प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनदद्‌दुज्जनित्वैः' इति । शोभनं श्रवः कीर्तिः सुश्रावस्तस्य संबन्धीनि तत्कारणानि कर्माणि सौश्रवसानि, तेषु कर्मसु, उक्थउक्थे निष्केवल्यप्रउगादिरूपे तत्तच्छस्त्रे शस्यमाने सति तं देवभक्तं यजमानम् आ भज सर्वतः सेवय (स्व ?) । निरन्तरं कर्मानुष्ठायिनं कुर्वित्यर्थः । 'आ भज' इति द्विरुक्तेर्वाक्यद्वयमिदं कर्तव्यम् । कर्मसु प्रेरयेत्येकं वाक्यम् । तत्तच्छस्त्रे प्रेरयेति द्वितीयम् । अयं यजमानः सूर्ये प्रियः भवाति भवतु । अग्ना वह्नावपि प्रियः भवतु । तथा जातेन उत्पन्नेन पुत्रेण उद्‌भिनदत् उद्‌भेदं वृद्धिं प्राप्नोतु तथा जनित्वैः जनिष्यमाणैः पौत्रादिभिश्च उद्भिनदत् ॥१०॥

आ– 'आ तं भज सौश्रवसेषु' इति । हे भगवन् अग्ने, तं यजमानं सौश्रवसेषु साधु श्रवणीयेषु यज्ञक्रतुषु उक्थउक्थे यज्ञे यज्ञे शस्यमाने प्रशस्यमाने तं यजमानं त्वं भज सेवस्व । 'प्रियः सूर्ये' । यः यजमानः [सूर्ये प्रियः सः] अग्ना अग्नौ च प्रियः यजमानः भवाति । उज्जातेन उत्कृष्टतया जातेन औरसेन पुत्रेण उज्जनित्वैः जनिष्यमाणैः पुत्रादिभिः भिनदत् धर्मार्थकामान् यो भिनत्ति विभज्य करोति तं यजमानम् आ भज इति संबन्धः ॥१०॥

त्वामग्ने यजमाना अनु द्यून् विश्वा वसु दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः ॥११॥

त्वाम् । अग्ने । यजमानाः । अनु । द्यून् । विश्वा । वसु । दधिरे । वार्याणि ।
त्वया । सह । द्रविणम् । इच्छमानाः ।
व्रजम् । गोमन्तमिति गोऽमन्तम् । उशिजः । वि । वव्रुः ॥ घ्यों ॥११॥

सा– अथैकादशः – 'त्वामग्ने यजमाना अनु द्यून् विश्वा वसु दधिरे वार्याणि । त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः' इति । हे अग्ने, यजमानाः सर्वे द्यून् प्रतिदिनं त्वाम् अनु त्वामेवानुगच्छन्तः वार्याणि वरणीयानि विश्वा सर्वाणि वसु वसूनि धामानि दधिरे धृतवन्तः । त्वया सह अवस्थितास्ते यजमानाः द्रविणम् इच्छमानाः पुनरप्यधिकं द्रव्यं काङ्क्षन्तः उशिजः धनसाध्यानि कर्माणि कामयमानाः गोमन्तं गोभिर्बहुभिर्युक्तं व्रजं गोनिवासस्थानं विवव्रुः विशेषेण वृतवन्तः ॥११॥

10. S2 अग्नावपि for अग्ना
13. H2–3 बलवर्णीयेषु for श्रवणीयेषु; H2–3 स्वे स्वे for सेवस्व
15. H2–3 पात्रा for पुत्रा°

आ– 'त्वामग्ने' इति। हे श्रीभगवन् ^{v}अग्ने, ^{v}यजमानाः ^{v}त्वाम् उद्दिश्य ^{v}अनु ^{v}द्यून्। द्युरित्यहर्नाम। अहन्यहनि विश्वानि ^{v}वसु वसूनि ^{v}वार्याणि वरणीयानि गोभूहिरण्यादीनि ^{v}दधिरे धारयन्ति। ^{v}त्वया ^{v}सह ^{v}द्रविणं यज्ञफलम् ^{v}इच्छमानाः कामयमानाः। ^{v}व्रजम्, व्रज्यत इति व्रजः, तं व्रजम्, ^{v}गोमन्तं, गावो रश्मयः आदित्यसंबन्धिनः, तैः सयुंक्तो देवयानाख्यो मार्गः गोमान्, तं गोमन्तम्। ^{v}उशिजः मेधाविनः ज्ञानकर्मसमुच्चयकारिणः यजमानाः ^{v}विवव्रुः तत्फलभागार्थं देवयानाख्यं मार्गं वृतवन्त इत्यर्थः ॥११॥

अस्ताव्यग्निर्नराᳬ सुशेवो वैश्वानर ऋषिभिः सोमगोपाः।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥१२॥२॥

अस्तावि। अग्निः। नराम्। सुशेव इति सुऽशेवः।
वैश्वानरः। ऋषिभिरित्यृषिऽभिः। सोमगोपा इति सोमऽगोपाः।
अद्वेषे इत्यऽद्वेषे। द्यावापृथिवी इति द्यावापृथिवी। हुवेम।
देवाः। धत्त। रयिम्। अस्मे इत्यस्मे। सुवीरमिति सुऽवीरम्॥ त्रं ॥१२॥२॥

सा– अथ द्वादशः – 'अस्ताव्यग्निर्नराᳬ सुशेवो वैश्वानर ऋषिभिः सोमगोपाः। अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम्' इति। ^{v}अग्निः ^{v}ऋषिभिः ऋत्विग्भिर्यजमानैः ^{v}अस्तावि स्तुतोऽभूत्। कीदृशोऽग्निः? ^{v}नरां नराणां मनुष्याणां ^{v}सुशेवः शोभनं सुखयिता। ^{v}वैश्वानरः विश्वनरसंबन्धी ^{v}सोमगोपाः सोमस्य रक्षिता। ^{v}अद्वेषे द्वेषरहिते ^{v}द्यावापृथिवी ^{v}हुवेम वयमाह्वयामः। हे ^{v}देवाः, यूयं ^{v}सुवीरं शोभनपुत्रोपेतं ^{v}रयिं धनम् ^{v}अस्मे अस्मासु ^{v}धत्त स्थापयत ॥१२॥

[इति त्रयोदशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

आ– 'अस्ताव्यग्निः' इति। ^{v}अस्तावि ^{v}अग्निः स्तुतः। ^{v}नरां, छान्दसं पदम्, मनुष्याणां ^{v}सुशेवः शोभनं सुखयिता, ^{v}वैश्वानरः ^{v}ऋषिभिः ऋत्विग्यजमानैः अस्तावि स्तुतोऽभूत्। ^{v}सोमगोपाः सोमस्य गोप्ता ^{v}अद्वेषे द्वेषरहिते ^{v}द्यावापृथिवी ^{v}हुवेम आह्वयामः। हे ^{v}देवाः, ^{v}धत्त ^{v}रयिम् ^{v}अस्मे अस्मासु रयिं धनं धत्त स्थापयत। ^{v}सुवीरं सुपुत्रं च अस्मासु स्थापयत ॥१२॥

[इति त्रयोदशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

---

3. B1 om. यज्ञ° and कामयमानाः
19. B1 om. अस्तावि अग्निः स्तुतः ... यजमानैः (L 20); B1 H2–3 स्तुतोऽसि for स्तुतोऽभूत्.
22. B1 om. धत्त

[देवयजनपरिग्रहमन्त्राः

[अथ तृतीयोऽनुवाकः ।]

द्वितीयेऽनुवाके वह्नेरुख्यस्योपस्थानसुक्तम् । अथ तृतीये चयनार्थस्य देवयजनस्य परिग्रहोऽभिधीयते ॥

समिधाऽग्निं दुवस्यत घृतैर्बोधयतातिथिम् ।
आऽस्मिन् हव्या जुहोतन ॥१॥

समिधाग्निम् ॥ स ॥१॥

कात्यायनः – " उख्यस्योत्तरतः समिदाधानꣳ समिधाग्निमिति " (काश्रौ १६·६·१५) इति। प्रागुदेशे शकटावस्थापनानन्तरमुख्याग्नेरुत्तरतः ' समिधाऽग्निम् ' इत्यनेन मन्त्रेण समिधमादध्यात् । पाठस्तु– ' समिधाऽग्निं दुवस्यत घृतैर्बोधयतातिथिम् । अस्मिन् हव्या जुहोतन ' इति। हे ऋत्विग्यजमानाः, एतम् अग्निं समिधा दुवस्यत परिचरत। घृतैः एतस्यैष्टैः अतिथिम् इवैनं बोधयत। ततश्च अस्मिन् हव्या हव्यानि हवींषि आजुहोतन साकल्येन जुहुत ॥१॥

आ–वनीवाहनम् (?)। ' समिधाग्निम् ' इत्यादयः पञ्च कण्डिकाः आग्नेय्यः । व्याख्यातो मन्त्रः ॥१॥

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः ।
स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ॥२॥

उत् । ऊँ इत्यूँ । त्वा । विश्वे । देवाः । अग्ने । भरन्तु । चित्तिभिरिति चित्तिऽभिः ।
सः । नः । भव । शिवः । त्वम् ।
सुप्रतीक इति सुऽप्रतीकः । विभावसुरिति विभाऽवसुः ॥ थ्रूं ॥२॥

सा– कात्यायनः – " उद्यम्योदु त्वेति दक्षिणतोऽनसि करोति ॥ स्थाल्याम् " (काश्रौ १६·६·१६) इति । आसन्द्यामवस्थितम् उख्याग्निमुद्धृत्य शकटस्य दक्षिणभागे स्थालीमवस्थाप्य तस्यामवस्थापयेत्। पाठस्तु– ' उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः। स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ' इति। हे अग्ने, विश्वे सर्वेऽपि देवाः प्राणरूपाः चित्तिभिः उद्यमनकुशलाभिर्धीवृत्तिभिः उत् ऊर्ध्वमेव त्वां भरन्तु धारयन्तु। सः त्वं नः अस्माकं शिवः शान्तः सुप्रतीकः सुमुखः विभावसुः प्रभाया वासयिता च भव ॥२॥

---

7. S2 om. समिधाग्निम् ... आदध्यात्। पाठस्तु (L 9)

12. H2-3 खण्डिकाः for कण्डिकाः

देवयजनपरिग्रहमन्त्राः]

आ– उद्यच्छति– ' उदु त्वा ' इति । ऋषिस्तापसः । आग्नेय्यनुष्टुप् । हे श्रीभगवन् Vअग्ने, Vत्वा त्वां Vविश्वे Vदेवाः Vचित्तिभिः । चिती संज्ञाने । Vउत् Vभरन्तु । तैरेवं भ्रियमाणः Vसः Vसुप्रतीकः शोभनमुखः Vविभावसुः विभूतधनश्च Vत्वं अस्माकं Vशिवः Vभव ॥२॥

प्रेद॑ग्ने ज्योति॑ष्मान् याहि शि॒वेभि॑र॒र्चिभि॒ष्ट्वम् ।
बृ॒हद्भि॑र्भा॒नुभि॒र्भास॑न् मा हिं॑सीस्त॒न्वा॑ प्र॒जाः ।।३।।

प्र । इत् । अ॒ग्ने॒ । ज्योति॑ष्मान् । या॒हि॒ । शि॒वेभिः॑ । अ॒र्चिभि॒रित्य॒र्चिऽभिः॑ । त्वम् ।
बृ॒हद्भि॒रिति॑ बृ॒हत्ऽभिः॑ । भा॒नुभि॒रिति॑ भा॒नुऽभिः॑ । भास॑न् ।
मा । हि॒ꣳसीः॒ । त॒न्वा॑ । प्र॒जा इति॑ प्र॒ऽजाः ॥ त्र्यृ॒चं ॥३॥

सा– कात्यायनः – "गार्हपत्यं पश्चादनड्वाहौ युक्त्वा प्रेदग्न इति प्राङ् यात्वा" (काश्रौ १६.६.१८) इति । पूर्वमवस्थापितशकटे गार्हपत्यस्य पश्चिमे भागे द्वौ बलीवर्दौ प्रतिमुच्य पश्चात् प्रगच्छेत् । पाठस्तु– 'प्रेदग्ने ज्योतिष्मान् याहि शिवेभिरर्चिभिष्ट्वम् । बृहद्भिर्भानुभिर्भासन् मा हिꣳसीस्तन्वा प्रजाः' इति । हे Vअग्ने, Vशिवेभिः Vअर्चिभिः शान्ताभिर्ज्वालाभिः Vज्योतिष्मान् प्रकाशयुक्तः Vत्वं Vप्रयाहि देवयजनप्रदेशं प्रयाह्येव । Vबृहद्भिः Vभानुभिः प्रौढैः रश्मिभिः Vभासन् जगदवभासयन् Vतन्वा स्वकीयेन दाहकेन शरीरेण Vप्रजाः Vमा Vहिꣳसीः ॥३॥

आ– 'प्रेत्' [इति] । अनुष्टुप् । हे श्रीभगवन् Vअग्ने, Vत्वम् Vइत् त्वमपि Vशिवेभिः शान्तैः Vअर्चिभिः ज्वालाभिः Vज्योतिष्मान् प्रकाशसंपन्नो भूत्वा Vप्रयाहि । तथापि Vबृहद्भिः Vभानुभिः दीप्तिभिः Vभासन् दीप्यमानः Vतन्वा तव शरीरेण Vप्रजाः Vमा Vहिꣳसीः मा भस्मीकुरु ॥३॥

अक्र॑न्दद॒ग्निः स्त॒नय॑न्निव॒ द्यौः क्षामा॒ रेरि॑हद्वी॒रुधः॑ सम॒ञ्जन् ।
स॒द्यो ज॑ज्ञा॒नो वि हीमि॒द्धो अख्य॒दा रोद॑सी भा॒नुना॑ भात्य॒न्तः ।।४।।

अक्र॑न्दद॒ग्निः ॥ अ ॥४॥

1. B1 om. श्री°
11. P1 om. पाठस्तु
12. S2 om. ज्वालाभिः
13. S2 om. देव°; S2 भासयन् for भासन्
15. H2 om. त्वमपि
17. H2–3 om. दीप्तिभिः

[देवयजनपरिग्रहमन्त्राः

सा– कात्यायनः – "अक्षे गर्जत्यक्रन्ददग्निरिति जपति" (काश्रौ १६·६·२०) इति। आगमनकाले शकटस्याक्षे ध्वनिं कुर्वति सति इमं मन्त्रं जपेत्। पाठस्तु– 'अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्। सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः' इति। पूर्ववद्व्याख्येयम् ॥४॥

आ– 'अक्रन्ददग्निः' इति। व्याख्यातो मन्त्रः ॥४॥

प्रप्रायम॒ग्निर्भ॑र॒तस्य॑ शृण्वे॒ वि यत् सूर्यो॒ न रोच॑ते बृ॒हद्भाः।
अ॒भि यः पू॒रुं पृत॑नासु त॒स्थौ दी॒दाय॒ दैव्यो॒ अति॑थिः शि॒वो नः ॥५॥

प्रप्रेति॒ प्रऽप्र । अ॒यम् । अ॒ग्निः । भ॒र॒तस्य॑ । शृ॒ण्वे॒ ।
वि । यत् । सूर्यः॑ । न । रोच॑ते । बृ॒हत् । भाः ।
अ॒भि । यः । पू॒रुम् । पृत॑नासु । त॒स्थौ ।
दी॒दाय॑ । दैव्यः॑ । अति॑थिः । शि॒वः । न॒ः ॥ त्रिः ॥५॥

सा– कात्यायनः – "उत्तरतः समिदाधानं प्रप्रेति" (काश्रौ १६·६·२१) इति। प्रयाणानन्तरं शकटमवस्थाप्य उख्याग्नेरुत्तरभागे समिधमादध्यात्। पाठस्तु– 'प्रप्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद्भाः। अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः' इति। अयम् अग्निः भरतस्य हविर्भरणवतो यजमानस्य आह्वानं शृण्वे शृणोतु। यत् योऽग्निः सूर्यः न सूर्य इव भाः भासमानः सन् बृहत् रोचते अत्यन्तं दीप्यते। यः अग्निः पृतनासु संग्रामेषु पूरुं जयपूर्तिम् अभि तस्थौ सर्वतः करोति, सोऽग्निः नः अस्माकम् अतिथिः भवतु अतिथिरिव समागच्छतु। कीदृशोऽग्निः ? दैव्यः देवेभ्यो हितः शिवः परमङ्गलरूपः ॥५॥

आ– 'प्रप्रायम्' इति। वसिष्ठः आग्नेयी त्रिष्टुप्। 'प्रप्रायमग्निः'। प्रप्र इत्यादरार्थः। महता प्रकर्षेण अयम् अग्निः भरतस्य प्रजापतेः शृण्वे। व्यत्ययः। शृणोतीति। भरतस्य वचनमिति शेषः। 'वि यत् सूर्यो न रोचते बृहद्भाः'। वियत् वियति गगने सूर्यः न सूर्य इव बृहत् समिदाधानानन्तरमेव बृहत महान् भूत्वा भाः भारूपः दीप्तरूपः सन् रोचते दीप्यते। 'अभि यः पूरुं पृतनासु'। संग्रामेषु पूरुम् असुरराक्षसं यः अभितस्थौ अभितिष्ठति, सः एतया समिधा आप्यायितः दैव्यः देवसंबन्धी दीदाय दीप्यते। एवं दीप्यमानः अतिथिः अतिथिधर्मा नः अस्माकं जनानां शिवः शान्तः भव ॥५॥

आपो॑ दे॒वीः प्रति॑ गृभ्णीत॒ भस्मै॒तत् स्यो॒ने कृ॑णुध्वꣳ सुर॒भा उ॑ लो॒के।
तस्मै॑ नमन्तां॒ जन॑यः सुपत्नीर्मा॒तेव॑ पु॒त्रं बिभृता॒प्स्वे॑नत् ॥६॥

17. S2 एव for इव

देवयजनपरिग्रहमन्त्राः]

आप॑ः । दे॒वीः । प्रति॑ । गृ॒भ्णी॒त । भस्म॑ । ए॒तत् ।
स्यो॒ने । कृ॒णु॒ध्व॒म् । सु॒र॒भौ । ऊँ॒ इत्यूँ॑ । लो॒के ।
तस्मै॑ । न॒म॒न्ता॒म् । जन॑यः । सु॒प॒त्नी॒रिति॑ सु॒ऽप॒त्नीः॑ ।
मा॒तेवेति॑ मा॒ताऽइ॑व । पु॒त्रम् । बि॒भृ॒त । अ॒प्स्वित्य॒प्ऽसु । ए॒न॒त् ॥ ध॒ः ॥६॥

स्रा– कात्यायनः – "अप्सूख्यभस्मावपनं पलाशपुटेनापो देवीरित्येकया ततो द्वाभ्याम्" (काश्रौ १६·६·२३) इति । 'आपो देवीः' इत्येकयर्चा, तस्या उत्तराभ्याम् 'अप्स्वग्ने' इत्युभाभ्यामृग्भ्यां च पलाशपत्रनिर्मितेन पात्रेण उख्याग्नेरुपरिस्थितं भस्म आदाय जलेषु प्रक्षिपेत् । तत्र प्रथमायाः पाठः – 'आपो देवीः प्रति गृभ्णीत भस्मैतत् स्योने कृणुध्व१ँ सुरभा उ लोके । तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृताप्स्वेनत्' इति । हे vआपः vदेवीः देव्यः, vएतत् vभस्म उख्याग्नेरुपरि सञ्चितं भस्म vप्रतिगृभ्णीत । एतत् प्रतिगृहीतं भस्म vस्योने सुखकरे vसुरभौ सुगन्धियुक्त एव vलोके स्थाने vकृणुध्वं स्थापयत । [vसुपत्नीः] शोभनः पतिः वरुणरूपो यासां ताः सुपत्न्यः । "आपो वरुणस्य पत्नयः आसन्" (तैसं ५·५·४) इति ह्यन्यत्राम्नातत्वात् । vजनयः अग्नेर्जनन्य आपः । वाडवं वैद्युतरूपमग्निं प्रत्यपां जननीत्वम् । ईदृश्य आपः vतस्मै भस्मरूपायाग्नये vनमन्तां प्रह्वीभवन्तु । तमग्निं पालयितुं वश्याः सावधाना भवन्त्वित्यर्थः । हे आपः, यूयं vमातेव यथा लोके माता vपुत्रं पोषयति तद्वत् vएनत् इमं भस्मरूपमग्निं vअप्सु एकरूपासु युष्मासु अवस्थाप्य vबिभृत पोषयत ॥६॥

आ– 'आपो देवीः' इति । अब्देवत्या त्रिष्टुप् । हे vआपः, vदेवीः देव्यः vएतत् vभस्म vप्रतिगृभ्णीत स्वागतादिभिः प्रतिगृह्णीत । स्वागतादिभिरित्ययं शिष्टव्यवहारः । एवं व्रतात् (?) परिगृह्य 'एतत् स्योने कृणुध्वं सुरभा उ लोके' । vएतत् vभस्म vस्योने सुखावहे सुखरूपे vसुरभौ । उकारः समुच्चयार्थः । पुष्पधूपादिभिः सुरभिगन्धयुते vलोके स्थाने शय्यायां वा vकृणुध्वम् । 'तस्मै नमन्तां जनयः सुपत्नीः' । vतस्मै अस्मै भस्मरूपायाग्नये vजनयः vसुपत्नीः सुपत्न्यः रूपलावण्ययौवनालंकारवैदग्ध्यसंपन्नाः जनयः जनिहेतवः आपः vनमन्ताम् । "तस्मै नमन्तां जनय इत्यापो वै जनयोऽद्भ्यो हीद१ँ सर्वं जायते सुपत्नीरित्यग्निना वा आपः सुपत्न्यो मातेव पुत्रं बिभृत" (शब्रा ६·८·२·३) इत्यादि श्रुतेः । 'मातेव पुत्रं बिभृताप्स्वेनत्' । vमाता vपुत्रम् उपस्थे [यथा] बिभर्ति एवं यूयं च vअप्सु vएनत् एतत् भस्म । नमन्तां भस्म प्रतिग्रहीतुमुपगच्छन्तु, नमस्कारं कुर्वन्तु । नत्वा च vबिभृत गोपायत ॥६॥

7. S2 om. आदाय
17. H2–3 om. स्वागतादिभिः प्रतिगृह्णीत; B1 om. शिष्ट°; H2–3 विशिष्ट °for शिष्ट°
18. B1 व्रता for व्रतात्
19. B1 °गन्धाद्ये, H2–3 °गन्धस्य for °गन्धयुते
20. H2–3 om. अस्मै
23. B1 om. मातेव ... एनत्; H3 एनं for एनत्
24. H2–3 after बिभर्ति ins. इव
25. B1 H2–3 नम्य for नत्वा

[देवयजनपरिग्रहमन्त्राः

अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे ।
गर्भे सञ्जायसे पुनः ॥७॥

अप्स्वित्यप्ऽसु । अग्ने । सधिः । तव । सः । ओषधीः । अनु । रुध्यसे ।
गर्भे । सन् । जायसे । पुनरिति पुनः ॥ ङ्यिं ॥७॥

सा– अथ द्वितीयः – ‘अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः’ इति । हे अग्ने, सधिः सहो बलं भस्मरूपम् अप्सु वर्तते । सः त्वम् ओषधीः अनु रुध्यसे । व्रीहियवाद्यौषधीरनुसरसि जाठराग्निरूपेण तत्स्वीकारात् । अरण्योः गर्भे स्थितः [सन्] पुनःपुनः जायसे ॥७॥

आ– ‘अप्स्वग्ने’ [इति] । विरूपः आग्नेयी गायत्री । अधस्तनेन मन्त्रेण भस्मातिथित्वेन अवस्थाप्य अथेदानीं गायत्र्यनुष्टुभ्याम् अग्नेः सर्वगतत्वं प्रकाशयन् भस्माभ्यवहरणमेवापह्नुते– ‘अप्स्वग्ने’ इति । आग्नेयी गायत्री । हे श्रीभगवन् अग्ने, सधिः समानस्थानः, समानतयाऽधीयतेऽस्मिन्निति सधिः । तव अप्सु समानस्थानम् । ‘सौषधीरनु रुध्यसे’ । सः अग्निः त्वं सर्वबीजमवस्थाय ओषधीः अनुरुध्यसे त्वमोषधिपरिणाममनु परिणमसे । ततः गर्भे संबध्यमानः पुनः जायसे ॥७॥

गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् ।
गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ॥८॥

गर्भः । असि । ओषधीनाम् । गर्भः । वनस्पतीनाम् ।
गर्भः । विश्वस्य । भूतस्य । अग्ने । गर्भः । अपाम् । असि ॥ हिं ॥८॥

सा– अथ तृतीयः – ‘गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि’ इति । हे अग्ने, त्वं भेषजरूपैरोषधिविशेषैरुत्पस्यमानत्वात् ओषधीनां गर्भः असि । तथा अरणिभ्यामुत्पत्स्यमानत्वात् वनस्पतीनां गर्भः असि । तथा विश्वस्य भूतस्य सर्वस्य प्राणिजातस्य जठरे वर्तमानत्वात् गर्भः असि । वाडववैद्युतरूपेण अपां गर्भः असि ॥८॥

आ– किंच ‘गर्भो असि’ [इति] । आग्नेयी अनुष्टुप् । हे श्रीभगवन् अग्ने, त्वम् ओषधीनां गर्भः असि । वनस्पतीनां पनसादीनां गर्भः असि । अपाम् अपि त्वं गर्भः असि ॥८॥

6. S2 °रञ्जसि for °सरसि
11. B1 om. तव
12. B1 H 2-3 अव स्थापय्य for अवस्थाय
19. S2 °मानस्य for °मानत्वात्; S2 om. ओषधीनां … सर्वस्य (L 20)

देवयजनपरिग्रहमन्त्राः]

प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने ।
सꣳसृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनराऽसदः ॥९॥

प्रसद्येति प्रऽसद्य । भस्मना । योनिम् । अपः । च । पृथिवीम् । अग्ने ।
सꣳसृज्येति समऽसृज्य । मातृभिरिति मातृऽभिः । त्वम् ।
ज्योतिष्मान् । पुनः । आ । असदः ॥ ढघु ॥९॥

सा– कात्यायनः – "अनामिकया प्रास्तादादत्ते प्रसद्येति" (काश्रौ १६·६·२९) इति । उदकेषु प्रक्षिप्ताद्भस्मनः सकाशादनामिकया अङ्गुल्या किंचिद्भस्म 'प्रसद्य' इत्यादिभिश्चतुर्भिर्मन्त्रैरादद्यात् । तत्र प्रथममन्त्रपाठः – 'प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । सꣳसृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनराऽसदः' इति । हे अग्ने, भस्मना सह योनिं कारणभूतां पृथिवीं प्रसद्य प्रपद्य । किं पृथिवीमेव ? नेत्याह– अपः च योनिभूताः प्रतिपद्य । किंच– मातृभिः अद्भिः पृथिव्या च सꣳसृज्य एकीभूय त्वं भृशं ज्योतिष्मान् पुनः पश्चात् स्वयमेव स्थानमुखाम् आऽसदः आसीद ॥९॥

आ– 'प्रसद्य' इति । चतस्र आग्नेय्यः । तत्र द्वे अनुष्टुभौ । द्वे गायत्र्यौ । हे भगवन् अग्ने, अपः च पृथिवीं च योनिं स्थानं भस्मना भस्मरूपेण प्रसद्य अवस्थाय मातृभिः अद्भिः पृथिवीं संसृज्य संगत्य त्वं ज्योतिष्मान् अतिशयेन ज्योतिःसंपन्नो भूत्वा पुनः आऽसदः अस्यामुखायां पुनः आसीद ॥९॥

पुनरासद्य सदनमपश्च पृथिवीमग्ने ।
शेषे मातुर्यथोपस्थेऽन्तरस्याꣳ शिवतमः ॥१०॥

पुनः । आसद्येत्याऽसद्य । सदनम् । अपः । च । पृथिवीम् । अग्ने ।
शेषे । मातुः । यथा । उपस्थ इत्युपऽस्थे ।
अन्तः । अस्याम् । शिवतम इति शिवऽतमः ॥ णुं ॥१०॥

सा– अथ द्वितीयः – 'पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्याꣳ शिवतमः' इति । हे अग्ने, अपः पृथिवीं च सदनं पुनः आसद्य आस्थाय शिवतमः सन् अस्याम् उखायाम् अन्तः मध्ये मातुः उपस्थे इव शेषे स्वपिषि ॥१०॥

आ– 'पुनरासद्य' इति । हे श्रीभगवन् अग्ने, अपः च पृथिवीं च ते सदनं स्थानं पुनः आसद्य पुनरास्थाय अनन्तरम् 'अन्तरस्याꣳ शिवतमः' अस्याम् उखायाम्

14. B1 after मातृभि : adds निर्मात्रीभिः; B1 संगम्य for संगत्य

अन्तः मध्ये त्वं शिवतमः भूत्वा शेषे । शीङ् स्वप्ने । स्वपिषि । ' मातुर्यथोपस्थे ' । मातुः उपस्थे उत्सङ्गे यथा पुत्रः शेते यथा येन प्रकारेण शेते तथा त्वमपि उखायामन्तः शेषे इति संबन्धः ॥१०॥

पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा ।
पुनर्नः पाह्यꣳहसः ॥११॥

पुनरूर्जा ॥ स ॥११॥

सा– अथ तृतीयः – ' पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाह्यꣳहसः ' इति । हे अग्ने, त्वम् ऊर्जा क्षीरादिरसेन सह पुनः निवर्तस्व अत्रागच्छ । इषा अन्नेन आयुषा सह पुनः आगच्छ । नः अस्मान् पुनःपुनः कृतात् अꣳहसः पाहि पालय ॥११॥

आ– ' पुनरूर्जा ' ' सह रय्या ' इति द्वौ मन्त्रौ गायत्रौ व्याख्यातौ ॥११–१२॥

सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया ।
विश्वप्स्न्या विश्वतस्परि ॥१२॥

सह रय्या ॥ स ॥१२॥

सा– अथ चतुर्थः – ' सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ' इति । हे अग्ने, रय्या धनेन सह निवर्तस्व । प्सा भक्षण इति धातुः । विश्वैः सर्वैः प्सायते भक्ष्यते पीयत इति विश्वप्स्नी । तादृश्या धारया विश्वतः परि सर्वेषां तृणधान्यलतापादपानामुपरि पिन्वस्व सिञ्च ॥१२॥

बोधा मे अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुष्टे तन्वं वन्दे अग्ने ॥१३॥

बोध । मे । अस्य । वचसः । यविष्ठ ।
मꣳहिष्ठस्य । प्रभृतस्येति प्रऽभृतस्य । स्वधाव इति स्वधाऽवः ।
पीयति । त्वः । अनु । त्वः । गृणाति ।
वन्दारुः । ते । तन्वम् । वन्दे । अग्ने ॥ ओं ॥१३॥

---

1. H2-3 om. मातुः उपस्थे (L 2)

देवयजनपरिग्रहमन्त्राः]

सा– कात्यायनः – "प्रास्योखायामुपतिष्ठते बोधा म इति" (काश्रौ १६.६.३०) इति। अनामिकया स्वीकृतं भस्म प्रक्षिप्य 'बोधा मे' इति द्वाभ्यां मन्त्राभ्यामुख्याग्नेरुपस्थानं कुर्यात्। तत्र प्रथममन्त्रपाठः – 'बोधा मे अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः। पीयति त्वो अनु त्वो गृणाति वन्दारुष्टे तन्वं वन्दे अग्ने' इति। हे स्वधावः स्वधोपलक्षितान्नवन् यविष्ठ युवतम हे अग्ने, मदीयस्य अस्य वचसः स्तुतिरूपस्य बोध तात्पर्यं बुध्यस्व। कीदृशस्य वचसः? मꣳहिष्ठस्य अतिशयेनाभिवृद्धिहेतोः प्रभृतस्य प्रकृष्टेनादरेण संपादितस्य श्रोत्रपथं प्रापितस्येत्यर्थः। पीयति। स्फायी वृद्धावित्यस्माद्धातोर्निष्पन्नः पीयतिशब्दः। त्वशब्द एकार्थे वर्तते। भवदीयस्तुतिकारिणोर्द्वयोर्यजमानर्त्विजोर्मध्ये एकः स्तोता वृद्धमधिकं वक्ति। उचितोक्तिमुल्लङ्घ्य निन्दारूपेण अतिप्रशंसारूपेण वा यत्किञ्चिदुक्तिंत आक्रोशतीत्यर्थः। त्वः अन्य एकः स्तोता अनु गृणाति अनुकूलमुचितमेव वक्ति। अतोऽस्मदभिप्रायं बुध्यस्वेति प्रार्थ्यते। वन्दारुः अभिवादनपरोऽहं ते त्वदीयं तन्वं शरीरं वन्दे ॥१३॥

आ– उखायां प्रास्योपतिष्ठते– 'बोधा मे' इति। दीर्घतमाः त्रिष्टुप् आग्नेयी। हे श्रीभगवन् अग्ने हे यविष्ठ मिश्रयितृतम युवतम वा। हे स्वधावः हे अन्नवन्, मे मम अस्य श्रूयमाणस्य वचसः मꣳहिष्ठस्य श्रेष्ठस्य प्रभृतस्य श्रोत्रपथं प्राप्तस्य वचसः अभिप्रायं बोध निबोध। यद्वा– कर्मणि षष्ठी। हे स्वधावः हे अन्नवन्, मंहिष्ठं श्रेष्ठं पूज्यं मंहितं प्रभृतं मे वचः बोध निबोध। 'पीयति त्वः'। पीयतिराक्रोशकर्मा, त्वः एकः पुरुषः। हे अग्ने, त्वां पीयति त्वामाक्रोशति। 'अनु त्वः'। एकः पुरुषः त्वाम् अनु गृणाति स्तौति। कश्चिदाक्रोशति स्तौतीत्येष लोकस्वभावः। एवं च सति 'वन्दारुष्टे तन्वं वन्दे अग्ने'। हे श्रीभगवन् अग्ने, वन्दारुः वन्दनशीलोऽहं ते तन्वं शरीरं वन्दे इति संबन्धः ॥१३॥

स बोधि सूरिर्मघवा वसुपते वसुदावन्।
युयोध्यस्मद्द्वेषाꣳसि विश्वकर्मणे स्वाहा ॥१४॥

सः। बोधि। सूरिः। मघवेति मघऽवा। वसुपत इति वसुऽपते।
वसुदावन्निति वसुऽदावन्।
युयोधि। अस्मत्। द्वेषाꣳसि ॥ ठ्यों ॥१४॥

---

4. S2 °लक्षितान्नं यस्य तत् for °लक्षितान्नवन्
6. S2 भूयिष्ठस्य for अतिशयेन … हेतोः; S2 om. श्रोत्र .. पीयति
7. P1 वर्तेते for वर्तते
9. S2 om. आक्रोशतीत्यर्थः। त्वः अन्यः; P1 गृह्णाति for गृणाति
13. H2–3 om. अन्नवन्
18. H3 °भावः for °स्वभावः

सा– अथ द्वितीयः – ‘ स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्यस्मद्द्वेषाꣳसि ’ इति । हे vवसुपते धनपते हे vवसुदावन् अन्नप्रदाग्ने, vसः त्वम् अस्मदभिप्रायं बुध्यस्व । कीदृशस्त्वम् ? vसूरिः विद्वान् vमघवा धनवान् । तादृशस्त्वं vद्वेषांसि शत्रुभिः कृतान् द्वेषान् अप्रियाणि वा vअस्मत् vयुयोधि अस्मत्तः पृथक्कुरु ॥

कात्यायनः – “ आज्यं विश्वकर्मण इति जुहोति ” (काश्रौ १७.१.१) इति । ‘ स्वाहा ’ इति मन्त्रशेषः । vविश्वकर्मणे समस्तजगत्सृष्टिस्थित्यादिकर्त्रे तुभ्यं vस्वाहा सुहुतमस्तु ॥१४॥

आ– ‘ स बोधि ’ इति सोमाहुतिः । यजुरन्ता गायत्री लिङ्गोक्तदेवत्या । vसः vबोधि यस्त्वं vसूरिः पण्डितः vमघवा च धनवान् । अतः सः त्वं बोधि बुध्यस्व अवगच्छ । अथवा vवसुपते हे धनपते, vवसुदावन् वसोः दातः, vअस्मत् अस्मत्तः vद्वेषाꣳषि दौर्भाग्यानि vयुयोधि पृथक्कुरु । समिधोपहृत्य जुहोति– ‘ विश्वकर्मणे स्वाहा ’ इति यजुषा ॥१४॥

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।

घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥१५॥(३)॥

पुनस्त्वा ॥ प ॥१५॥

सा– कात्यायनः – “ उत्थायादधाति समिधं पुनस्त्वेति ” (काश्रौ १७.१.२) इति । पाठस्तु– ‘पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ’ इति । हे अग्ने, त्वाम् vआदित्याः vरुद्राः vवसवः च vपुनः vसमिन्धतां पुनः संदीपयन्तु । हे vवसुनीथ, वसूनां धनानां [नीथ] नेतः, vब्रह्माणः ब्राह्मणा ऋत्विजः vयज्ञैः निमित्तभूतैस्त्वां vपुनः समिन्धताम् । vघृतेन तुष्टः सन् vतन्वं शरीरं vवर्धयस्व । ततस्त्वयि तुष्टे सति vयजमानस्य vकामाः vसत्याः अमोघाः vसन्तु ॥१५॥

[इति त्रयोदशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

आ– आदधाति समिधम्– ‘ पुनस्त्वा ’ इति । आग्नेयी त्रिष्टुप् यजुरन्ता । व्याख्यातो मन्त्रः ॥१५॥

[इति त्रयोदशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

---

2. P1 अन्नवन् धनप्रदेति वा । हे अग्ने सूरिर्यजमानाभीष्टदानपण्डितः for अन्नप्रद ... विद्वान् (L 3)
3. S2 om. अप्रियाणि वा
8. B1 यतः for यः; H3 आगच्छ for अवगच्छ
19. S2 om. अमोघाः

[अथ चतुर्थोऽनुवाकः ।]

तृतीयेऽनुवाके वह्नेरुख्यस्य चयनदेशं प्रति नयनमुक्तम् । अथ चतुर्थे गार्हपत्यचयनमुच्यते ॥

अपे॑त॒ वी॑त॒ वि च॑ सर्प॒ता॒तो ये॒ऽत्र॒ स्थ पु॑रा॒णा ये च॒ नूत॑नाः ।
अदा॑द्य॒मो॑ऽव॒सानं॑ पृथि॒व्या अक्र॑न्नि॒मं पि॒तरो॑ लो॒कम॑स्मै ॥१॥

अप॑ । इ॒त॒ । वि । इ॒त॒ । वि । च॒ । स॒र्प॒त॒ । अतः॑ ।
ये । अत्र॑ । स्थ । पु॒रा॒णाः । ये । च॒ । नूत॑नाः ।
अदा॑त् । य॒मः । अ॒व॒सा॒नमित्य॑व॒ऽसान॑म् । पृ॒थि॒व्याः ।
अक्र॑न् । इ॒मम् । पि॒तर॑ः । लो॒कम् । अ॒स्मै ॥ ऋचुं॑ः ॥१॥

सा– कात्यायनः–“ पलाशशाखया गार्हपत्यं व्यूहत्यपेत वीतेति ” (काश्रौ १७.१.३) इति । पलाशशाखया गार्हपत्यस्थानव्यूहनं संमार्जनं कुर्यात् । पाठस्तु– ‘ अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः । अदाद्यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ’ इति । यमस्य सर्वभूम्यधिपतित्वात् तद्भृत्याः पृथिव्यां सर्वत्र वर्तन्ते । हे यमभृत्याः, ^{v}अत्र देवयजनस्थाने पुरातनाः ^{v}ये यूयं ^{v}स्थ, ^{v}नूतनाः ^{v}च ^{v}ये यूयं स्थ, ते सर्वेऽपि ^{v}अपेत अस्मात् स्थानादपगच्छत, ^{v}वीत अत्यन्तं विदूरं गच्छत, ^{v}विसर्पत ^{v}च ^{v}अतः अस्मात् स्थानात् अपत्यसंघातं परित्यज्य विविधं गच्छत । ^{v}यमः ^{v}पृथिव्याः इदम् ^{v}अवसानं स्थानम् अस्मभ्यम् ^{v}अदात् । ^{v}पितरः च ^{v}अस्मै यजमानाय ^{v}इमं ^{v}लोकम् ^{v}अक्रन् एतच्चयनस्थानं कृतवन्तः ॥१॥

आ– पलाशशाखया गार्हपत्यं व्यूहति– ‘ अपेत ’ इति । लिङ्गोक्तदेवत्या त्रिष्टुप् । पूर्वार्द्धर्चेनोदरसर्पिण उच्यन्ते । पादेन यमः । पादेन पितरः । ^{v}अप ^{v}इत अपगच्छत । ^{v}अत्र अस्मिन् स्थाने ^{v}ये ^{v}स्थ ये उदरसर्पिणः स्थिताः ते सर्वे यूयं सामान्यतः अपेत अपगच्छत । अत्रापि विशेषमाह– ‘ पुराणाः ’ इति । ये उदरसर्पिणः ^{v}पुराणाः पुरातनाः ते च सर्वे यूयम् ^{v}अतः स्थानात् ^{v}वीत निर्गच्छत । ^{v}ये ^{v}च उदरसर्पिणः विशिष्टस्थाने सर्पणशीलाः ^{v}नूतनाः इदानींतनाः ते ^{v}च सर्वे यूयम् अतः स्थानात् ^{v}विसर्पत शीघ्रं निर्गच्छत । कस्मात् वयमपसर्पाम इति [चेत्] ‘ अदाद्यमोऽवसानं पृथिव्याः ’ । यमयति सर्वं नियमयतीतीश्वरो ^{v}यमः । श्रुत्यपेक्षया

12. P1 with markings above °भृत्याः ins. on the margin हे सर्पा इति भाष्यान्तरम् ।
16. S2 °यजन° for °चयन°
21. H2–3 before इदानीं° add अधुनातनाः
22. B1 अस्मात् for कस्मात्

क्षेत्रं वा यमः । अस्याः पृथिव्याः अवसानम् । अवस्यन्त्यस्मिन्निति अवसानम् । अस्मै यजमानाय अदात् दत्तवान् । अतः यूयमपसर्पतेति संबन्धः । 'अक्रन्निमं पितरो लोकमस्मै' यजमानाय । "विशः पितरः" (शब्रा ७.१.१.४) इति श्रुतेः । इमं लोक पितरः अक्रन् कृतवन्तः । अतोऽपगच्छतेति संबन्धः ॥१॥

संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् ।
अग्नेर्भस्मास्यग्नेः पुरीषमसि ।
चित स्थ परिचित ऊर्ध्वचितः श्रयध्वम् ॥२॥

संज्ञानमिति सम्ऽज्ञानम् । असि । कामधरणमिति कामऽधरणम् ।
मयि । ते । कामधरणमिति कामऽधरणम् । भूयात् ।
अग्नेः । भस्म । असि । अग्नेः । पुरीषम् । असि ।
चितः । स्थ । परिचित इति परिऽचितः । ऊर्ध्वचित इत्यूर्ध्वऽचितः । श्रयध्वम् ॥मो॥२॥

सा– कात्यायनः – "उखां निवपति संज्ञानमिति" (काश्रौ १७.१.४) इति । ऊखरप्रदेशस्थान् पांसून् गार्हपत्यस्थाने निवपेत् । पाठस्तु– 'संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात्' इति । हे उखास्वरूप त्वं संज्ञानं पशुसंबन्धि सम्यक् ज्ञानम् असि । पशवो ह्याघ्राणेन सम्यक् ज्ञात्वा तमूखरप्रदेशं लिहन्ति । तथा कामधरणम् असि । 'यदमुष्या यज्ञियमासीत् तदस्यामधात् त उखा अभवन्' इति श्रुत्यन्तरे यज्ञियांशत्वेनोक्तत्वात् यज्ञद्वारा कामानां धारकमसि । अतः ते तव यत् कामधरणसामर्थ्यं तद् मयि भूयात् ॥

कात्यायनः – "सिकताश्चाग्नेर्भस्मेति" (काश्रौ १७.१.६) इति । पाठस्तु– 'अग्नेर्भस्मास्यग्नेः पुरीषमसि' इति । हे सिकतास्वरूप, त्वम् अग्नेः भस्म भासकम् असि । सिकताधारो ह्यग्निरतितीक्ष्णो भवति । तथा त्वम् अग्नेः अवस्थानाय पुरीषम् असि पांसुरूपमसि ॥

कात्यायनः – "परिश्रिद्भिः परिश्रयति चितः स्थेति" (काश्रौ १७.१.७) इति । परिश्रयणसाधनादिभिः शर्कराभिः प्रसारयेत् । पाठस्तु– 'चित स्थ परिचित ऊर्ध्वचितः श्रयध्वम्' इति । चीयन्त भूमौ प्रक्षिप्यन्त इति चितः । हे शर्कराः, यूयं चितः, स्थ भूमौ प्रक्षिप्ता भवथ । परिचितः परितः प्रक्षिप्ताः, ऊर्ध्वचितः सिकतानामूर्ध्वं प्रक्षिप्ताः । तादृश्यो यूयं श्रयध्वम् इदं गार्हपत्यायतनं सेवध्वम् ॥२॥

आ– उल्बसंस्तवः पशुसंस्तवश्च अनेनेत्याह– 'संज्ञानमसि' इति । उल्बपशुसिकतादैवत्यानि त्रीणि यजूंषि । संज्ञानम् असि । समित्येकीभावमाचष्टे । यत एकं ज्ञानमसीति

1. B1 अवस्थाने for अवसानम्
2. B1 H2–3 अवसर्पतेति for अपसर्पतेति
12. P1 उषां for उखां
13. P1 वपेत् for निवपेत्
20. S2 अग्नेरेव for अग्नेः अव॰
23. P1 प्रसार्यन्ते for प्रक्षिप्यन्ते

उल्बस्तुतिः । [v]कामधरणम् असि, कामान् धारयति संपादयतीति, कामधरणम् । " पशवो वा ऊषाः पशवः कामधरणम् " (शब्रा ७.१.१.८) इति श्रुतेः । ' मयि ते कामधरणं भूयात् ' । [v]ते त्वदीयं [v]कामधरणं [v]मयि [v]भूयात् । " पशवो मयि भूयासुः " (द्र. शब्रा ७.१.१.८) इति श्रुतेः । उल्बाभिप्रायमेकवचनम् । सिकता निवपति– ' अग्नेर्भस्मासि ' । [v]अग्नेः [v]भस्म भवसि । सिकतास्तुतिः – ' अग्नेः पुरीषमसि ' । सितकात्मकं [v]पुरीषम् [v]असि । " अग्नेरेतद्वैश्वानरस्य रेतो यत् सिकताः " (शब्रा ७.१.१.१०) इति श्रुतेः । " परिश्रिद्भिः परिश्रयति चित स्थ " इति । चि चयने, अस्य क्विपि बहुवचनान्तं रूपं चित इति । परिश्रिद्देवत्याः यूयं [v]चितः [v]स्थ भवथ । परि समन्ताच्च चितः स्थ । [v]ऊर्ध्वाचितः भूत्वा एनम् अग्निं [v]श्रयध्वम् ॥२॥

अ॒यꣳ सो अ॒ग्निर्यस्मि॒न्त्सोम॒मिन्द्रः॑ सु॒तं द॒धे ज॒ठरे॑ वावश॒ानः ।
स॒ह॒स्रियं॒ वाज॒मत्यं॒ न सप्तिꣳ॑ सस॒वान्त्सन्त्स्तू॑यसे जातवेदः ॥३॥

अ॒यम् । सः । अ॒ग्निः । यस्मि॑न् । सोम॑म् । इन्द्रः॑ ।
सु॒तम् । द॒धे । ज॒ठरे॑ । वा॒व॒शा॒नः ।
स॒ह॒स्रिय॑म् । वाज॑म् । अत्य॑म् । न । सप्ति॑म् ।
स॒स॒वानिति॑ स॒स॒ऽवान् । सन् । स्तू॒य॒से॒ । जा॒त॒वे॒द॒ इति॑ जातऽवेदः ॥ इत्रौं ॥३॥

सा– कात्यायनः – " चतस्रो दक्षिणोत्तराः प्राचीरुपदधाति दक्षिणत उदङ्ङ्यꣳ सो अग्निरिति प्रत्यृचम् " (काश्रौ १७.१.८) । गार्हपत्यस्य मध्यप्रदेशे दक्षिणमारभ्य उत्तरापवर्गाः प्रागग्राश्चतस्र इष्टका दक्षिणतः स्थित्वा उदङ्मुखः सन् ' अयं सोऽग्निः ' इत्यादिभिश्चतसृभिर्ऋग्भिः क्रमेणोपदध्यात् । तत्र प्रथमा– ' अयꣳ सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः । सहस्रियं वाजमत्यं न सप्तिꣳ ससवान्त्सन्त्स्तूयसे जातवेदः ' इति । [v]यस्मिन् गार्हपत्यचितिरूपेऽग्नौ सति [v]वावशानः कामयमानः [v]इन्द्रः [v]सुतम् अभिषुतं [v]सोमं [v]जठरे [v]दधे स्वोदरे धारयति [v]सः तादृशः [v]अयम् [v]अग्निः इदानीमिष्टकाभिश्चीयते इति शेषः । हे [v]जातवेदः अग्ने, त्वम् [v]अत्यं [v]न [v]सप्तिं सततगमनकुशलमश्वमिव [v]सहस्रियं सहस्रसंख्याकेन धनेन संमितं [v]वाजम् अन्नं [v]ससवान् दत्तवान् [v]सन् यजमानैः [v]स्तूयसे ॥३॥

---

1. B1 H3 °धारणम् for first °धरणम्
2. B1 H3 °धारणम् for first °धरणम्
3. B1 वै for मयि
4. H 2–3 om. उल्बा° ... इति श्रुतेः (L 6)
7. B1 om. चितः स्थ । इति
8. B1 येन, H2–3 एतम् for एनम्
23. P1 स्तूयते for स्तूयसे

[गार्हपत्यचयनमन्त्राः

आ– गार्हपत्य इष्टकाभिश्चीयते– 'अय९ सः' इति । षळर्चमाग्नेयं त्रैष्टुभम् । विश्वामित्रः । चतुर्थी षष्ठी च अनुष्टुभौ । इष्टकोपधानं कुर्वन् अभिनयेन दर्शयति । अथ गार्हपत्योऽग्निश्चीयते, यस्मिन् चिते सति सुतम् अभिषुतं सोमं वावशानः कामयमानः इन्द्रः परमैश्वर्ययुक्तः जठरे उदरे दधे धारयति । कथंभूतं सोमं दध इति । सहस्रियं वाजम् अन्नम् अत्यं सर्वस्य जगतः । अत सातत्यगमने । संततमवगम्यमानम् । न, नकारः संप्रत्यर्थे, अनन्तरम् । भक्षणादेव मदकरं सप्तिं सरणं तृप्तिकरम् । न केवलमस्मिन् चिते इन्द्रः सोमं जठरे धारयति, किं तर्हि ? त्वमपि ससवान् । वन षण संभक्तौ । हवींषि संभजमानः सन् । हे जातवेदः, ऋत्विग्यजमानादिभिः स्तूयसे इति ॥३॥

अग्ने॒ यत् ते॑ दि॒वि वर्चः॑ पृथि॒व्यां यदोष॑धीष्व॒प्स्वा य॑जत्रा ।
येना॒न्तरि॑क्षमु॒र्वा॑त॒तन्थ॑ त्वे॒षः स भा॒नुर॑र्ण॒वो नृ॒चक्षाः॑ ॥४॥

अग्ने॑ । यत् । ते॒ । दि॒वि । वर्चः॑ । पृ॒थि॒व्याम् ।
यत् । ओष॑धीषु । अ॒प्स्वि॒त्य॒प्ऽसु । आ । य॒ज॒त्र॒ ।
येन॑ । अ॒न्तरि॑क्षम् । उ॒रु । आ॒त॒तन्थे॒त्या॑ऽत॒तन्थ॑ ।
त्वे॒षः । सः । भा॒नुः । अ॒र्ण॒वः । नृ॒चक्षा॒ इति॑ नृ॒ऽचक्षाः॑ ॥ टूः ॥४॥

सा- अथ द्वितीया– 'अग्ने यत् ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्रा । येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः' इति । हे यजत्र यज्ञनिष्पादकेष्टकारूप अग्ने, ते तव यत् वर्चः तेजः दिवि द्युलोके सूर्यरूपेण वर्तते, पृथिव्यां वह्निज्वालारूपेण वर्तते, तथा यत् तेजः ओषधीषु परिपावकत्वाकारेण वर्तते, अप्सु वडवानलरूपेण वर्तते, येन त्वदीयवर्चसा विद्युद्रूपेण उरु विस्तीर्णम् अन्तरिक्षम् आततन्थ सर्वतो विस्तारितवानसि प्रकाशितवानित्यर्थः । त्वेषः दीप्तिमान् सः त्वदीयवर्चःसमूहो भानुः भासकः अर्णवः समुद्र इव [वि]स्तीर्णः । नृचक्षाः मनुष्यान् प्रख्यापयिता । तथाविधतेजोरूपामिष्टकामुपदधामीति शेषः ॥४॥

आ– 'अग्ने यत् ते' इति । हे श्रीभगवन् अग्ने, यत् ते दिवि वर्चः यत् ते तव दिवि द्युलोके वर्चः आदित्यलक्षणं तेजः, पृथिव्यां यद् वर्चः आग्नेयं तेजः प्रसिद्धम्, ओषधीषु ओषधीनां सस्यादिफलपरिपाकहेतुः यद्वर्चः, अप्सु कारणत्वेन स्थितं यत् वर्चः,

1. H2–3 इष्टका चीयते, B1 इष्टका अभिचीयन्ते for इष्टकाभिश्चीयते
3. B1 स्तुतम् अभिष्टुतं for सुतमभिषुतं
4. H2–3 दधाति for दध इति
5. B1 अनन्तम् for संततम् ; B1 एतदुदकरसम् for एव मदकरम्
6. H2–3 स्थिते for चिते
8. B1 H2–3 स्तूयते for स्तूयसे
19. S2 after °शितवान् ins. असि
23. H2–3 om. दिवि

गार्हपत्यचयनमन्त्राः]

आ यजत्र यत् आ समन्तात् यष्टव्यं वर्चः। एतानि उक्तानि वर्चांसि तव भूयांसि। 'येनान्तरिक्षमुरु'। येन वर्चसा अन्तरिक्षम् उरु विस्तीर्णं त्वम् आततन्थ आतनोषि विस्तारयसि। त्वेषः सः भानुः। त्विषि दीप्तौ। महत् तद्वर्चः। दीप्तः अर्णवः उदकवान्। अर्ण इत्युदकनाम। अथवा "अरणवान् गमनवान् वायुः सः" (शब्रा ७·१·१·२३) इति श्रुतेः। नृचक्षाः, नॄन् चक्षते जानातीति नृचक्षाः, नृणां शुभाशुभकर्मद्रष्टा। एवं त्रिस्थानोऽत्राग्निः स्तुतः ॥४॥

अग्ने॑ दि॒वो अर्ण॒मच्छा॑ जिगा॒स्यच्छा॑ दे॒वाँ३ ऊ॑चिषे॒ धिष्ण्या॒ ये।
या रो॑च॒ने प॒रस्ता॒त् सूर्य॑स्य॒ याश्चा॒वस्ता॑दुप॒तिष्ठ॑न्त॒ आपः॑ ॥५॥

अग्ने॑। दि॒वः। अर्ण॑म्। अच्छ॑। जि॒गा॒सि॒।
अच्छ॑। दे॒वान्। ऊ॒चि॒षे॒। धिष्ण्याः॑। ये।
याः। रो॒च॒ने। प॒रस्ता॑त्। सूर्य॑स्य।
याः। च॒। अ॒वस्ता॑त्। उ॒प॒तिष्ठ॑न्त॒ इत्यु॑प॒ऽतिष्ठ॑न्ते। आपः॑ ॥ ड्यौ॑ ॥५॥

सा– अथ तृतीया – 'अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ३ ऊचिषे धिष्ण्या ये। या रोचने परस्तात् सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः' इति। हे इष्टकारूप अग्ने, दिवः सकाशात् अर्णम् अच्छ आभिमुख्येन जिगासि प्राप्नोषि। यागद्वारेण वृष्टिं संपादयसीत्यर्थः। ये देवा धिष्ण्याधारास्तान् देवान् अच्छ आभिमुख्येन ऊचिषे हविः स्वीकुरुतेति ब्रूषे। त्वय्यत्रोपहितायां आहूता इव देवा आगत्य हविः स्वीकरिष्यन्तीत्यर्थः। सूर्यस्य देवस्य रोचने दीप्तिरूपे मण्डले सति याः आपः परस्तात् ऊर्ध्वदेशे उपतिष्ठन्ते वर्तन्ते, याः च अवस्तात् अधोभागे वर्तन्ते ताः सर्वास्त्वय्युपहितायामिह गामेष्यन्तीति शेषः ॥५॥

आ– 'अग्ने दिवः' इति। हे श्रीभगवन् अग्ने, दिवः द्युलोकस्य संबन्धि अर्णम् उदकम् अच्छ। "अच्छ अभेः। आप्तुम् इति शाकपूणिः" (निरुक्त ५·२८) इति। अर्णमाप्तुं जिगासि अभिगच्छसि। 'अच्छा देवाँ३ ऊचिषे धिष्ण्या ये'। देवान् अच्छ आप्तुम् ऊचिषे उक्तवानसि। कान् देवान् इति आह– 'धिष्ण्या ये'। ये धिष्ण्याः अग्नयः तान् देवान् आप्तुं जिगासीति संबन्धः ॥

याः रोचने दीप्यमाने लोके स्थितस्य सूर्यस्य परस्तात् या आपः वृष्टिबीजभूताः ताः आपः उपतिष्ठन्ते। सूर्यस्य अवस्तात् अधस्तात् ता आपः उपतिष्ठन्ते। तास्त्वम् आ–(अ ?)पः अभिजिगासीति संबन्धः। त्वमेवैतैः रूपैः परिणमयेत्यभिप्रायः ॥५॥

---

1. B1 om. उक्तानि; H3 लघीयांसि for भूयांसि
16. P1 °स्थितायां for °हितायां
27. S2 °णामय for °णमय

पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः ।
जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः ॥६॥

पुरीष्यासः । अग्नयः । प्रावणेभिः । प्रवणेभिरिति प्रवणेभिः । सजोषस इति सऽजोषसः
जुषन्ताम् । यज्ञम् । अद्रुहः । अनमीवाः । इषः । महीः ॥ ज्ञां ॥६॥

सा– अथ चतुर्थी – 'पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः । जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः' इति । एते अग्नयः इष्टकारूपा अस्मदीयमिमं यज्ञं जुषन्तां सेवन्ताम् । कीदृशा अग्नयः? पुरीष्यासः पुरीषे पांसुरूपे भवाः । प्रावणेभिः प्रकर्षेण संभजनशीलैः मनोभिः सजोषसः परस्परं समानप्रीतयः । अद्रुहः हिंसारहिताः, अनमीवाः रोगरहिताः, इषः अभीष्टप्राप्तिहेतवः, महीः प्रौढाः । तथाविधाभिरूपा इष्टका उपदधामीति शेषः ।।६॥

आ– 'पुरीष्यासः' इति । अत्र बहुवचनमिष्टकापेक्षम् । पुरीष्यासः ये पुरीषाः पशवस्तेभ्यो हिताः अग्नयः इष्टकाः प्रावणेभिः । प्रुङ् गतौ, प्रावणैर्गमनैः लोकव्याप्तिभिः सजोषसः समानप्रीतयः समानसेविनो वा । समानं हि लोकं सेवन्ते, अतः यज्ञम् अद्रुहः अहिंसितारः जुषन्ताम् । 'अनमीवाः इषो महीः'। किंच– याश्च अनमीवाः बुभुक्षालक्षणव्याधेः निवृत्तिकरा या इषः अन्नभक्तयस्ताः महीः अतिप्रभूताश्च जुषन्तां सेवन्ताम् ॥६॥

इळामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥७॥

इळाम् । अग्ने । पुरुदꣳसमिति पुरुऽदꣳसम् । सनिम् । गोः ।
शश्वत्तममिति शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजावेति विजाऽवा । अग्ने ।
सा । ते । सुमतिरिति सुऽमतिः । भूतु । अस्मे इत्यस्मे ॥ मौं ॥७॥

सा– कात्यायनः – "इळामग्न इति पश्चिमे प्रतिमन्त्रमुत्तरतः" (काश्रौ १७·१·११) इति । स्वयमुत्तरतः स्थित्वा गार्हपत्यस्य पश्चिमभागे 'इळामग्ने', 'अयं ते योनिः' इत्येताभ्यां द्वाभ्याम् ऋग्भ्यां द्वे इष्टके उपदध्यादिति शेषः । तत्र प्रथमायाः पाठः – 'इळामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे' इति । हे अग्ने,

5. S2 चतुर्थः for चतुर्थी

10. H3 पुरीष्यासः पशव्याः बहुभ्यो; B1 पुरीष्याः पशव्यास्तेभ्यो for पुरीषाः पशव्यस्तेभ्यः (L 11)

11. H2–3 °व्यापिभिः for °व्याप्तिभिः

13. B1 after अनमीवाः adds अमीवाः; B1 यः बुभुक्षानुपलक्षण व्याधिः, H2 बहुलक्षणव्याधेः, H3 बहुक्षालक्षणव्याधेः for बुभुक्षालक्षणव्याधेः

14. B1 निवृत्तिं for निवृत्ति°

गार्हपत्यचयनमन्त्राः]

हवमानाय होतुं प्रवृत्ताय यजमानाय गोः सनिं गवादिपशूनां दातारं साध संपादय। कीदृशं दातारम्? इळां सर्वैरीड्यं प्रशंसनीयं पुरुदंसं बहुधा दर्शनीयं बहुकर्मसाधनीभूतं वा शश्वत्तमम् अत्यन्तमविच्छेदेन वर्तमानम्। किंच – त्वत्प्रसादात् नः अस्माकं सूनुः स्यात् पुत्रो भवतु। कीदृशः? तनयः औरस इत्यर्थः। पुत्रसामान्यस्य सूनुशब्देनोक्तत्वात् दत्तपुत्रादिव्यावृत्त्यै विशेषविवक्षया तनयशब्दः प्रयुज्यते। विजावा विविधानां जनयिता हे अग्ने, ते तव सा सुमतिः तथाविधा अनुग्रहबुद्धिः अस्मे भूतु अस्मासु भवतु ॥७॥

आ– पश्चिमे उपदधाति– 'इळामग्ने' इति। हे श्रीभगवन् अग्ने, पुरुदंसं बहुकर्मसाधनभूताम् इळां सुखात्मिकाम्। यत्तूक्तं श्रुत्या "पशवो वा इळा" (शब्रा ७·१·१·२७) इति तद्बलीवर्दनोत्पाद्यत इत्यनेन हेतुना। 'सनिं गोः शश्वत्तमम्'। सनिं दानं, गोः सनिं गोः संबन्धितया पयोघृतादिकं शाश्वतिकं शश्वत्तमम्। अत्र लिङ्गव्यत्ययः। शश्वत्तमाम् अनपायिनीं गोः सनिम्। हवमानाय स हि देवानाह्वयतीति हवमानः, देवानामाह्वानकर्ता, तस्मै हवमानाय होमं कुर्वते यजमानाय साध साधय। एतदुक्तं भवति– सोपसेचनं शाश्वतिकं यजमानाय साधयेति॥

किंच– 'स्यान्नः सूनुस्तनयो विजावाग्ने'। हे श्रीभगवन् अग्ने, नः अस्माकं तनयः औरसः पुत्रः, स च सुनोतीति सूनुः सोमाभिषवकर्त्ता, तत्कर्तुं योग्य इति एवं गुणवान् विजावा च। विजा प्रजातिः, तद्वान् विजावा। यद्वा– विजयशीलः पितरं स्ववीर्येणोपजयतीति विजा, तद्वान् विजावा। 'अग्ने सा ते सुमतिर्भूत्वस्मे'। हे श्रीभगवन् अग्ने, यया सुमत्या त्वमेतत् करोषि सा सुमतिः अस्मे अस्मासु भूतु भूयात् ॥७॥

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः।
तं जानन्नग्न आ रोहाथा नो वर्धया रयिम् ॥८॥

अयं ते ॥ त्र ॥८॥

सा– अथ द्वितीयायाः पाठः – 'अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आ रोहाथा नो वर्धया रयिम्' इति। हे अग्ने, अयम् इष्टकारूपः पदार्थः ते तव योनिः उत्पत्तिहेतुः ऋत्वियः ऋतुकालीनस्त्रीपुरुषसंगम इव। यतः योनेः जातः उत्पन्नस्त्वम् अरोचथाः दीप्यमानोऽसि। तं तथाविधं योनिं जानन् अवगच्छन् आरोह प्राप्नुहि। अथ अनन्तरं नः अस्माकं रयिं धनं वर्धय ॥८॥

1. P1 with markings above गोः ins. on the margin पयोदधिघृतादिकमिति भाष्यान्तरम्।
2. S2 om. बहु ... भूतं वा
22. S2 द्वितीयः for द्वितीयायाः पाठः

आ– द्वितीयामुपदधाति– ' अयं ते ' इति । व्याख्यातो मन्त्रः ॥८॥

चिदसि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ।
परिचिदसि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ॥९॥

चित् । असि । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद ।
परिचिदिति परिऽचित् । असि ।
तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद ॥ युं ॥९॥

सा– कात्यायनः – " चिदसीति पूर्वे दक्षिणतः प्रतिमन्त्रम् " (काश्रौ १७·१·१२) इति । दक्षिणतः स्थित्वा पूर्वभागे ' चिदसि ' इति मन्त्रद्वयेन इष्टके उपदध्यात् । तत्र प्रथममन्त्रपाठः – ' चिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ' इति । भोगांश्चिनोति संपादयतीति चित् । हे इष्टके, त्वं चित् असि । या देवता त्वामभिमन्यते तया देवतया अनुगृहीता त्वं ध्रुवा स्थिरा भूत्वा सीद तिष्ठ । तत्र दृष्टान्तः – अङ्गिरस्वत् अङ्गिरोभिरुपहितेष्टका यथा ध्रुवा भवति तद्वत् ॥

अथ द्वितीया– ' परिचिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ' इति । परितो भोगांश्चिनोति संपादयतीति परिचित् । शेषं पूर्ववत् ॥९॥

आ– पुरस्तादुपदधाति– ' चिदसि ' इति । चिदसीत्यादीनि यजूंषि लिङ्गोक्तदेवतानि । चिञ् चयने । चित् चिता असि । सादयति तया देवतया आचितासि । अङ्गिरस्वत् प्राणवत् । यथा हि प्राणः सर्वमङ्गं व्याप्य अवस्थितः एवं त्वमपि ध्रुवा स्थिरा सीद निविशस्व । " प्राणो वा आङ्गिराः " (शब्रा ६·१·२·२८) इति श्रुतेः । द्वितीयामुपदधाति– परिचित् आसि इति । आसादयति तया देवतया इति ॥९॥

लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् ।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन् ॥१०॥

लोकम् । पृण । छिद्रम् । पृण । अथो इत्यथो । सीद । ध्रुवा । त्वम् ।
इन्द्राग्नी इतीन्द्राग्नी । त्वा । बृहस्पतिः ।
अस्मिन् । योनौ । असीषदन् । असीसदन्नित्यसीसदन् ॥ ट्वू ॥१०॥

---

1. B1 om. द्वितीयाम् ... मन्त्रः ॥
10. P1 after °गृहीता adds सती
12. P1 तृतीया for द्वितीया
16. H2 om. प्राणवत्; B1 एतं for अङ्गं
18. H2 after आसादयति adds इति

गार्हपत्यचयनमन्त्राः]

कात्यायनः – " तिसृषु लोकंपृणासु मन्त्रो दशसु च " (द्र. काश्रौ १७·१·१७) इति। अत्र 'मन्त्रः' इत्येतत् ' लोकं पृण ', ' ता अस्य ' इत्येतन्मन्त्रद्वयस्य प्रतीकम्। लोकंपृणसंज्ञकास्त्रयोदशेष्टकाः। तासामुपधानकाले एतन्मन्त्रद्वयं प्रयोक्तव्यम्। तत्रायं प्रथमः – ' लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम्। इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योना असीषदन् ' इति। हे इष्टके, लोकं गार्हपत्यचयनार्थप्रदेशे पूर्वोक्ताभिरिष्टकाभिरनाक्रान्तमवशिष्टं स्थानं पृण पूरय। तथा छिद्रं पृण किंचिदपि छिद्रं यथा न दृश्यते तथा पूरय। अत्यन्तं श्लिष्टा भवेत्यर्थः। अथ अपि च ध्रुवा दृढा सती सीद अवतिष्ठस्व। इन्द्राग्नी बृहस्पतिः चैते देवाः अस्मिन् योनौ स्थाने त्वाम् असीषदन् सादितवन्तः ॥१०॥

आ– लोकंपृणामुपदधाति– ' लोकं पृण ' इति। लिङ्गोक्तदेवत्याऽनुष्टुप्। यदि लोकं स्थानं पृण पूरयासि छिद्रं सुषिरं च पृण पूरय, अग्नेरवयवभूतो भव। अथ अपि च सीद विशस्व। ध्रुवा असि निश्चला त्वम् असि। इन्द्राग्नी बृहस्पतिः च अस्मिन् योनौ स्थाने त्वा त्वाम् असीषदन् आसादयतु। न हि मानुषोऽध्वर्युस्त्वां सादयितुं समर्थ इत्यभिप्रायः ॥१०॥

ता अस्य सूदंदोहसः सोमं श्रीणन्ति पृश्नयः।
जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः ॥११॥

ताः। अस्य। सूदंदोहस इति सूदम्ऽदोहसः। सोमम्। श्रीणन्ति। पृश्नयः। जन्मन्। देवानाम्। विशः। त्रिषु। आ। रोचने। दिवः॥ ङ्यीं॥११॥

सा– अथ द्वितीयः – ' ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः। जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः ' इति। दिवः रोचने स्वर्गस्य प्रकाशके अस्य यजमानस्य जन्मन् जन्मनिमित्तभूते सति देवानां संबन्धिन्यः विशः प्रजारूपाः पृश्नयः अल्पगोसदृशाः सूददोहसः अन्नस्य दोहयित्र्यः ताः इष्टकाः त्रिषु प्रातःसवनादिषु सवनेषु आ समन्तात् सोमं श्रीणन्ति पक्वं कुर्वन्ति ॥११॥

आ– सूददोहसाधिवदति – ' ता अस्य ' इति। अब्देवत्याऽनुष्टुप्। श्रुत्यनुसारेणायं मन्त्रो व्याख्यायते – ' ता अस्य सूददोहसः ' इति। अस्य विशः। " यज्ञो वै विशः " (शब्रा ८·७·३·२१) इति श्रुतेः। अस्य विशो यज्ञस्य संबन्धिनं सोमं देवानां जन्मन् जन्मनि संवत्सरे। " संवत्सरो वै देवानां जन्म " (शब्रा ८·७·३·२१) इति श्रुतेः। संवत्सरे

5. S2 अवसानं for स्थानं

7. S2 विश्वे ते for चैते

24. B1 श्रुतिः for श्रुतेः, B1 यस्य for यज्ञस्य

25. B1 श्रुति for श्रुतेः

संवत्सरे सोमयाजीति विहितं सोमयागकाले । ˇत्रिषु ˇआ ˇरोचने आरोचनेषु सवनेषु सत्सु । " सवनानि वै त्रीणि रोचनानि " (शब्रा ८·७·३·२१) इति श्रुतेः । ˇदिवः द्युलोकात् च्युता यज्ञाहुतिपरिणामभूता या आपः ˇताः ˇसूददोहसः । " आपो वै सूदोऽन्नं दोहः " (शब्रा ५·७·३·२१) इति श्रुतेः । ˇपृश्नयः च ओषधिवनस्पत्यन्नरसभूताः । पृश्नयश्च सोमं ˇश्रीणन्ति आश्रयन्तीति दिवश्च्युता या आपः पृश्निलक्षणान्नरसयुक्ता सूददोहसंज्ञकाः ता आपो देवानां जन्मनि संवत्सरे प्राप्तस्य विशः सोमयागस्य त्रिषु आरोचनेषु सवनेषु स्थितं सोमं श्रीणन्तीति संबन्धः ॥११॥

इन्द्रं॒ विश्वा॑ अवीवृधन्त्समु॒द्रव्य॑चसं॒ गिर॑ः ।
र॒थीत॑मꣳ र॒थीनां॒ वाजा॑नाꣳ सत्प॑तिं॒ पति॑म् ॥१२॥

इन्द्र॑म् । विश्वा॑ः । अ॒वी॒वृ॒ध॒न् । स॒मु॒द्रव्य॑चस॒मिति॑ स॒मु॒द्रऽव्य॑चसम् । गिर॑ः । र॒थीत॑मम् । र॒थीत॑म॒मिति॑ र॒थिऽत॑मम् । र॒थीना॑म् । र॒थि॒ना॒मिति॑ र॒थिना॑म् । वाजा॑नाम् । सत्प॑ति॒मिति॒ सत्ऽप॑तिम् । पति॑म् ॥ ध्विय ॥१२॥

सा– कात्यायनः – " चात्वालदेशात् पुरीषं निवपतीन्द्रं विश्वा इति " (काश्रौ १७·१·१८) इति । चात्वालदेशाच्छुष्कं पांसुमादाय अस्मिन् गार्हपत्यचयने निवपेत् । पाठस्तु – ' इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमं रथीनां वाजानाꣳ सत्पतिं पतिम् ' इति । ˇविश्वाः सर्वाः ˇगिरः अस्मदीयाः स्तुतयः ˇइन्द्रम् ˇअवीवृधन् वर्धितवन्तः । कीदृशमिन्द्रम् ? ˇसमुद्रव्यचसं समुद्रवद् व्याप्तवन्तम् । ˇरथीनां, रथिनां दीर्घश्छान्दसः । रथयुक्तानां योद्धृणां मध्ये ˇरथीतमम् अतिशयेन रथयुक्तम् । ˇवाजानाम् अन्नानां ˇपतिं स्वामिनं ˇसत्पतिं सन्मार्गवर्तिनां पालकम् ॥१२॥

आ– पुरीषं निवपति– ' इन्द्रं विश्वाः ' इति । जेता माधुच्छन्दसः । ऐन्द्र्यनुष्टुप् । ˇसमुद्रव्यचसं, समुद्रवत् विविधाञ्चनयुक्तं समुद्रव्यचसं, नानागतियुक्तमक्षोभ्यबलं च । ˇरथीनां मध्ये रथयुद्धलब्धतेजसां रथिनां ˇरथीतमम् । ˇवाजानाम् अन्नानां ˇपतिम् । ˇसत्पतिं, सतां विहितकर्मानुष्ठानेन निर्मलचेतस्तया आत्मेच्छास्तित्वबुद्धिसंपन्नाः सन्तः, तेषां पतिं तम् ˇइन्द्रं परमैश्वर्ययुक्तं ˇविश्वाः ˇसर्वाः ˇगिरः ऋग्यजुःसामात्मिकाः बहुविधस्तुतिलक्षणाः वाचः ˇअवीवृधन् वर्धयन्ति ॥१२॥

1. H3 °कारे for °काले; B1 om. सवनेषु; H2-3 संवत्सर° for सत्सु
2. B1 श्रुतिः for श्रुतेः
6. H2-3 after सवनेषु adds सत्त्वेषु
17. S2 om. रथिनां दीर्घश्छान्दसः
20. H2-3 विविधचलन° for विविधाञ्चन°

गार्हपत्यचयनमन्त्राः]

समितꣳ संकल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ ।
इषमूर्जमभि संवसानौ ॥१३॥

सम् । इतम् । सम् । कल्पेथाम् । संप्रिया इति समऽप्रियौ ।
रोचिष्णू इति रोचिष्णू । सुमनस्यमाना इति सुऽमनस्यमानौ ।
इषम् । ऊर्जम् । अभि । संवसाना इति सम्ऽवसानौ ॥ वां ॥१३॥

सा– कात्यायनः – "उख्यं निवपति समितमिति" (कात्रौ १७·१·१९) इति । 'समितम्' इत्यादिभिः चतसृभिर्ऋग्भिस्तस्मिन् गार्हपत्यचयने उख्याग्निं निवपेत् । तत्र प्रथमायाः पाठः – 'समितꣳ संकल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि संवसानौ' इति । यदिदं गार्हपत्यं चयनमभिहितं तस्मिन्नुखाग्निनिवपनवेलायां द्वावग्नी संपद्येते । पूर्वसिद्धोऽग्निरेकः उख्योऽग्निरपरः । तावुभौ संबोध्येदमुच्यते । हे अग्नी, युवामुभौ ᵛसमितं संगतौ भवतम् । संगत्य च ᵛसंकल्पेथां सम्यग्यज्ञस्य कल्पनं निष्पादनं कुरुत । कीदृशौ युवाम् ? ᵛसंप्रियौ सम्यक् परस्परं प्रीतियुक्तौ ᵛरोचिष्णू दीप्यमानौ ᵛसुमनस्यमानौ परस्परं सौमनस्यं प्राप्तौ ᵛइषम् अन्नम् ᵛऊर्जं रसं च ᵛअभि ᵛसंवसानौ अभितः सम्यक् संपादयन्तौ ॥१३॥

आ– चित्येऽग्नावुख्यं निवपति– 'समितम्' इत्यादिभिश्चतसृभिः । तत्राद्योष्णिक् । तत उपरिष्टाद्बृहती । तत उष्णिक् । ततो बृहती वा । तिस्रोऽग्निदैवत्याः । तृतीयोख्याग्निदेवत्या । यौ युवां ᵛसंप्रियौ स्वाहुतिप्रियौ संगतिप्रियौ च । ᵛरोचिष्णू । रुच दीप्तौ । रोचनशीलौ च । ᵛसुमनस्यमानौ परस्परं शोभनं चिन्तयन्तौ । 'इषमूर्जमभि संवसानौ' । ᵛइषम् अन्नम् ᵛऊर्जम् उपसेचनं सर्पिरादिकम् ᵛअभि ᵛसंवसानौ अभ्यवहरन्तौ । अभिसंपूर्वस्य वसतेरर्थान्तरे वृत्तिः । तदुभौ भवतः । "आहवनीयगार्हपत्यौ" इति श्रुतेः । आहवनीयगार्हपत्यौ विशेष्यौ । एवंविधौ तौ युवां ᵛसमितं संगतिं कुरुतम् । इण् गतावित्यस्य रूपम् । ᵛसंकल्पेथां च । एकसंकल्पौ भवतमित्याशास्महे ॥१३॥

सं वां मनाꣳसि सं व्रता समु चित्तान्याऽकरम् ।
अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं यजमानाय धेहि ॥१४॥

6. P1 उक्थ्यं for उख्यं; S2 निर्वपति for निवपति
7. P1 प्रथममन्त्र° for प्रथमायाः
14. H2–3 चित्येऽग्निम् for चित्येऽग्नौ
16. B1 om. स्वाहुतिप्रियौ संगतिप्रियौ
19. B1 H2–3 °गार्हपत्ये for first °गार्हपत्यौ; H3 विशेषौ for विशेष्यौ
21. B1 after इति ins. एतत्

सम् । वाम् । मनांꣳसि । सम् । व्रता । सम् । ॐ इत्यूँ । चित्तानि । आ । अकरम् ।
अग्ने । पुरीष्य । अधिपा इत्यधिऽपाः । भव । त्वम् । नः ।
इषम् । ऊर्जम् । यजमानाय । धेहि ॥ छः ॥१४॥

सा– अथ द्वितीया – 'सं वां मनांꣳसि सं व्रता समु चित्तान्याऽकरम् । अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं यजमानाय धेहि ' इति । हे पूर्वोक्तावग्नी, वां युवयोः मनांसि मनोजन्यान् संकल्पान् समाकरं सर्वतः संगतानि करोमि । तथा व्रतानि कर्माणि समाकरम् । तथा चित्तानि कर्मविषयज्ञानानि समाकरं सम्यक् संगतानि करिष्यामि । हे पुरीष्य पांसुयुक्त अग्ने मिलितोभयाग्निस्वरूप, नः अस्माकम् अधिपाः भव अधिकं पालयिता भव । तादृशः त्वं यजमानाय इषम् अन्नम् ऊर्जं रसं च धेहि ॥१४॥

आ– ' सं वाम् ' इति । हे भगवन् अग्ने, वां युवयोः आहवनीयगार्हपत्ययोः आ आभिमुख्येन नः अस्माकं मनांꣳसि बुद्ध्यहंकारमनांसि समकरं सम्यक् कृतवानस्मि । सं व्रता व्रतानि । व्रतमिति कर्मनाम । वां युवयोः विषयकर्माणि समकरं कृतवानस्मि । ' सम् उ चित्तानि ' च । चित्तशब्देन संस्कारा मनोगता उच्यन्ते । सम् उ । उकारो व्यर्थः । चित्तानि अपि समकरम् । श्रीभगवन्नग्ने, एवमुभयत्र अभिमानिदेवतारूपमेकं त्वां प्रार्थये । हे अग्ने, पुरीष्य अधिपाः पशव्यानामधिपाः त्वं भव । त्वं नः अस्माकं यजमानाय इषम् ऊर्जं क्षीराद्युपसेचनं च धेहि देहि ॥१४॥

अग्ने त्वं पुरीष्यो रयिमान् पुष्टिमाँ२ असि ।
शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहाऽसदः ॥१५॥

अग्ने । त्वम् । पुरीष्यः । रयिमानिति रयिऽमान् । पुष्टिमानिति पुष्टिऽमान् । असि ।
शिवाः । कृत्वा । दिशः । सर्वाः । स्वम् । योनिम् । इह । आ । असदः ॥ ञ्लूं ॥१५॥

सा– अथ तृतीया – ' अग्ने त्वं पुरीष्यो रयिमान् पुष्टिमाँ२ असि । शिवाः कृत्वा दिशः सर्वा स्वं योनिमिहाऽसदः ' इति । हे अग्ने, द्व्यात्मकः त्वं पुरीष्यः पुरीषार्हः पशुसंयुक्तः रयिमान् धनवान् पुष्टिमान् अपि असि । सर्वाः दिशः शिवाः शान्ताः कृत्वा इह अस्मिंश्चयने स्वं योनिं स्वकीयं स्थानम् आऽसदः प्राप्नुहि ॥१५॥

7. P1 S2 मीलितो° for मिलितो; P1 om. °अग्नि°
11. H3 संकरं for समकरं
12. H3 संकरं for समकरं
14. H3 संकरम् for °समकरम्; B1 om. श्री°
22. S2 भगवन् for द्व्यात्मकः

गार्हपत्यचयनमन्त्राः]

आ– 'अग्ने त्वम्' इति। हे श्रीभगवन् अग्ने, त्वं पुरीष्यः पशव्यः रयिमान् धनवान् पुष्टिमान् च असि। यतः अतः शिवाः कृत्वा 'दिशः सर्वाः'। दिशः सर्वाः शिवाः शान्ताः कृत्वा स्वं स्वकीयां योनिम् इह अस्मिन् स्थाने आऽसदः सदनमकरोः कुरुष्व॥१५॥

भवतं नः समनसौ सचेतसा अरेपसौ।
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥१६॥

भवतं नः ॥ भ ॥१६॥

सा– अथ चतुर्थी – 'भवतं नः समनसौ सचेतसा अरेपसौ। मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः' इति। योऽग्निः पुरातनो यश्चोख्यस्तौ युवां नः अस्मदर्थं समनसौ मनसः सहितौ सचेतसौ परस्परं समानचित्तयुक्तौ। अन्यविषयं मनः परित्यज्य अस्मदनुग्रहाभिमुखत्वं समनस्त्वम्। तस्मिन् अनुग्रहे परस्परप्रतिपत्तिराहित्यं सचेतस्त्वम्। अरेपसौ पापरहितौ, अस्मद्विषये प्रामादिकेन अपराधेनापि कोपाभावः पापराहित्यं, भवतं यथोक्तगुणयुक्तावुभौ तिष्ठतम्। पापराहित्यमेव स्पष्टीक्रियते– यज्ञं मा हिंसिष्टम् अस्मदीयं कर्म मा विनाशयतम्। हे जातवेदसौ, उभावग्नी युवाम् अद्य अस्मिन् अनुष्ठानदिने नः अस्मदर्थं शिवौ शान्तौ भवतम्॥१६॥

आ– 'भवतं नः' इति व्याख्यातो मन्त्रः ॥१६॥

मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योना अभारुखा।
तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु ॥१७॥(४)॥

मातेवेति माताऽइव। पुत्रम्। पृथिवी। पुरीष्यम्।
अग्निम्। स्वे। योनौ। अभाः। उखा।
ताम्। विश्वैः। देवैः। ऋतुभिरित्यृतुऽभिः। संविदान इति सम्ऽविदानः।
प्रजापतिरिति प्रजाऽपतिः। विश्वकर्मेति विश्वऽकर्मा। वि। मुञ्चतु ॥ प्रों ॥१७॥(४)॥

सा– कात्यायनः – "मातेव पुत्रमिति शिक्याद्विमुच्य" (काश्रौ १७·१·२१) इति। उखामित्यनुवर्तते। पाठस्तु– 'मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योना अभारुखा। तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु' इति। यथा लोके माता पुत्रं बिभर्ति तथा पृथिवीरूपेयम् उखा स्वे योनौ स्वकीयगर्भस्थाने पुरीष्यम् एतम् अग्निम् अभाः अभार्षीत् धारितवती। डुभृञ् प्रथमपुरुषस्य रूपं बिभर्ति। ताम् उखां प्रजापतिः विमुञ्चतु शिक्यपाशान्मुक्तां करोतु। कीदृशः प्रजापतिः? विश्वैः देवैः ऋतुभिः च संविदानः ऐकमत्यं गतः विश्वसृष्टिरूपं कर्म यस्यासौ विश्वकर्मा ॥१७॥

[इति त्रयोदशोऽध्याये चतुर्थोऽनुवाकः ॥४॥]

---

7. S2 चतुर्थः for चतुर्थी

[भूकर्षणमन्त्राः

आ– उखां शिक्याद्विमुञ्चति – ‘ मातेव पुत्रम् ’ इति । उखादेवत्या त्रिष्टुप् । उखास्तुतिः । ‘ मातेव पुत्रम् ’ । येयमुखा पृथिवी पृथिवीरूपमवस्थाय मृण्मयीभूत्वा पुरीष्यं पशव्यं स्वे स्वकीयायां योनौ उत्सङ्गे कृत्वा माता इव पुत्रं माता पुत्रमुत्सङ्गेऽवस्थाप्य शोभत इव । उखा सती अभाः दीप्तिं कृतवत्यसि । तामुखामिदानीं विश्वैः देवैः ऋतुभिः च सह, अहो महत् कर्म ते कृतम् इत्येवं संविदानः संवादं कुर्वन् प्रजापतिः विश्वकर्मा च त्वां शिक्याद् विमुञ्चतु ॥१७॥

[इति त्रयोदशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

———

[अथ पञ्चमोऽनुवाकः ।]

चतुर्थेऽनुवाके गार्हपत्यचयनमुक्तम् । अथ पञ्चम आहवनीयचयनार्थं भुवः कर्षणमुच्यते ॥

अ॒सु॑न्वन्त॒मय॑जमानमिच्छ स्ते॒नस्ये॒त्यामन्वि॑हि॒ तस्क॑रस्य ।
अ॒न्यम॒स्मदि॑च्छ॒ सा त॑ इ॒त्या नमो॑ देवि निर्ऋ॑ते॒ तुभ्य॑मस्तु ॥१॥

असु॑न्वन्तम् । अय॑जमानम् । इ॒च्छ॒ ।
स्ते॒नस्य॑ । इ॒त्याम् । अनु॑ । इ॒हि॒ । तस्क॑रस्य ।
अ॒न्यम् । अ॒स्मत् । इ॒च्छ॒ । सा । ते॒ । इ॒त्या ।
नमः॑ । दे॒वि॒ । नि॒र्ऋ॒त॒ इति॑ निः॒ऽऋ॒ते । तुभ्य॑म् । अ॒स्तु॒ ॥ खौं ॥१॥

सा– कात्यायनः – “ अनुस्पृशन्नसुन्वन्तमिति प्रत्यृचम् ” (काश्रौ १७.१.२३–१७.१.२४) इति । उपाभिना प्रदध्याः कृष्णवर्णा निर्ऋतिदेवताकास्तिस्र इष्टका नैर्ऋत्यदेशे ‘ असुन्वन्तम् ’ इति तृचेन उपदध्यात् । तत्र प्रथमायाः पाठस्तु– ‘ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ’ इति । हे निर्ऋते देवि, यः सोमयागं न करोति, यश्च हविर्यज्ञं न करोति तादृशम् असुन्वन्तम् अयजमानं च ग्रहीतुम् इच्छ । किं च – स्तेनः प्रच्छन्नचोरः यश्च तस्करः प्रकटचोरस्तयोः इत्यां गतिम् अन्विहि अनुगच्छ । पृष्ठतो गत्वा तावपि गृहाणेत्यर्थः । सर्वथा सोमं सुन्वद्भ्यो हविर्यज्ञेभ्श्च यष्टृभ्यः अस्मत् अन्यम् इच्छ न त्वस्मानिच्छ । सा ते दुष्टशिक्षा तव इत्या गतिश्च । या एवंभूता तस्यै तुभ्यं नमः अस्तु ॥१॥

आ– नैर्ऋतीनामिष्टकानामुपधानं तिसृभिः । त्रिष्टुप् । ‘ असुन्वन्तम् ’ इति नैर्ऋतं तृचम् । असुन्वन्तम् अयजमानम् । हे निर्ऋते, सोमाभिषवमकुर्वाणं यजमानलक्षणरहितं

1. B1 उषा° for first and second उखा°
17. P1 after first इति adds पूर्वसूत्रशेषः
22. S2 om. न त्वस्मानिच्छ
24. B1 तिसृभिः for त्रिष्टुप्

भूकर्षणमन्त्राः]

अयजमानम् अन्यैर्यज्ञक्रतुभिर्ग्रहीतुम् इच्छ प्रतीच्छ (प्रतिगच्छ ?)। किं च – 'स्तेनस्येत्यामन्विहि तस्करस्य '। स्तेनस्य चौरस्य इत्याम् इतिं गतिम् अनु अनुकुर्वन् इहि प्रयाहि । तस्करस्य। चौरं कर्म करोतीति तस्करः । तस्यावृत्तिमेवान्विहि नान्यस्य । 'अन्यमस्मदिच्छ '। अस्मत् अन्यं पुरुषं ग्रहीतुम् इच्छ। अतस्त्वां ब्रवीमि– 'सा त इत्या '। ते तव सा पूर्वोक्ता इत्या गतिरिति संबन्धः। एवं दण्डकर्मोक्त्वा अथेदानीं साम्ना चाह– 'नमो देवि निर्ऋते तुभ्यमस्तु '। हे निर्ऋते देवि, तुभ्यं नमः अस्तु ॥१॥

नमः सु ते निर्ऋते तिग्मतेजोऽयस्मयं वि चृता बन्धमेतम् ।
यमेन त्वं यम्या संविदानोत्तमे नाके अधि रोहयैनम् ॥२॥

नमः । सु । ते । निर्ऋत इति निःऽऋते । तिग्मतेज इति तिग्मऽतेजः ।
अयस्मयम् । वि । चृत । बन्धम् । एतम् ।
यमेन । त्वम् । यम्या । संविदानेति समऽविदाना ।
उत्तम इत्युत्ऽतमे । नाके । अधि । रोहय । एनम् ॥ दौ ॥२॥

सा– अथ द्वितीया– 'नमः सु ते निर्ऋते तिग्मतेजोऽयस्मयं वि चृता बन्धमेतम् । यमेन त्वं यम्या संविदानोत्तमे नाके अधि रोहयैनम् ' इति । हे निर्ऋते, दक्षिणपश्चिममध्यमस्थितावान्तरदिगभिमानिनि देवि ते, तिग्मं तीक्ष्णं तेजो यस्याः सा तिग्मतेजाः, तस्याः संबोधनं हे तिग्मतेजः, ते तुभ्यं सु सुष्ठु नमः अस्तु । अयस्मयम् अयोनिर्मितं शृङ्खलावद् दृढम् एतं बन्धं स्वर्गप्राप्तिप्रतिबन्धकमिमं पाप्मानं विचृत विनाशय। ततस्त्वं यमेन अग्निना यम्या च पृथिव्या च संविदाना एकमत्यं गता सती एनं यजमानम् उत्तमे नाके सर्वसुखोपेते दुःखमात्ररहिते स्वर्गे अधि रोहय स्थापय ॥२॥

आ– 'नमः सु ते ' इति । हे निर्ऋते, ते तव सु शोभनं नमः नमस्कारोऽस्तु । तिग्मं तीव्रमुत्साहतेजो यस्याः सा तिग्मतेजाः, तत्संबोधनं हे तिग्मतेजः । 'अयस्मयं विचृता बन्धमेतम् '। एतं प्रतीयमानम् अयस्मयम् अयोमयवदतिदृढतमं बन्धम्। बध्यते निबध्यते

1. B1 यजमानम् for अयजमानम्; H2-3 om. प्रतीच्छ
2. H2-3 om. स्तेनस्य ... तस्करस्य
14. S2 °दिग्विमानिनि for °दिगभिमानिनि
15. S2 om. तस्याः
16. S2 after अयस्मयम् ins. अस्मदीयम्
17. P1 after विनाशय । adds चृती छेदने; P1 एव for second च
21. B1 एवं for एतं, H2-3 after °मानम् add अयोमयम्

क्षेत्रज्ञोऽनेनेति बन्धः, तं vविचृत । चृततिः छेदनकर्मा । विच्छिन्धि येनाहं बद्धः । आजवं (आजीवं ?) जीवभावलक्षणेन जनित्वा म्रियते, मृत्वा च जायते इत्येवंरूपेण येन बन्धेनाहं बद्धस्तं बन्धं त्वं विचृत छिन्धीति संबन्धः । किं च – vयमेन अग्निना vयम्या च पृथिव्या च vसंविदाना संवादं कुर्वाणा च vत्वम् एकमतीभूत्वा vउत्तमे vनाके उत्कृष्टे स्वर्गे vअधि vरोहय vएनं यजमानम् अधिरोह्य स्थापय ॥२॥

यस्यास्ते घोर आसञ्जुहोम्येषां बन्धानामवसर्जनाय ।
यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाऽहं परि वेद विश्वतः ॥३॥

यस्याः । ते । घोरे । आसन् । जुहोमि ।
एषाम् । बन्धानाम् । अवसर्जनायेत्यवऽसर्जनाय ।
याम् । त्वा । जनः । भूमिः । इति । प्रमन्दत इति प्रऽमन्दते ।
निर्ऋतिमिति निःऽऋतिम् । त्वा । अहम् । परि । वेद । विश्वतः ॥ ण्यः ॥३॥

सा– अथ तृतीया– 'यस्यास्ते घोर आसञ्जुहोम्येषां बन्धानामवसर्जनाय । यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाऽहं परिवेद विश्वतः' इति । हे vघोरे क्रूररूपे निर्ऋतिदेवि, vयस्याः vते तव vआसन् आसनि आस्ये मुखे vजुहोमि आहुतिवदिष्टकामुपदधामि । किमर्थम् ? vबन्धानां यजमानस्य परलोकप्राप्तिप्रतिबन्धकानाम् vएषां पाप्मनाम् vअवसर्जनाय विनाशार्थम् । vयां vत्वा vजनः जन्तुमात्ररूपः शास्त्रसंस्काररहितः vभूमिः vइति vप्रमन्दते स्तौति, भूमिर्निर्ऋतिदेवीति । vअहं तु शास्त्राभिज्ञतया तादृशीं त्वां vविश्वतः सर्वथापि vनिर्ऋतिम् एव vपरिवेद सम्यग्जानामि । तत्र तावत् निर्ऋतिरित्येतद्देवताया नामधेयम् । अवयवार्थश्चैवं व्युत्पादनीयः । सर्वदेवसाधारणादेवयजनान्निकृष्य स्वतन्त्रे देशे निर्ऋतिः प्राप्तिर्यस्याः सा निर्ऋतिः । तदिदं प्रकारद्वयमभिप्रेत्य विश्वतः इत्युक्तम् ॥३॥

आ– 'यस्यास्ते' इति । हे vघोरे विषमशीले निर्ऋतिदेवते, vयस्याः यथोक्तलक्षण-संपन्नायास्तस्याः vते तव vआसन् । "पद्दन्नोमास्°" (पा. ६·१·६३) इत्यादिना आस्य इत्यस्य आसन्नित्यादेशः । आसन् आसनि आस्ये ते मुखे हविः vजुहोमि । किमर्थमिति ? vएषां vबन्धानाम् vअवसर्जनाय विमोकाय बन्धनिवृत्त्यर्थमित्यर्थः । सा त्वमेतान् बन्धान् अस्मत्तः अवसृज । किं च– vयां vत्वा निर्ऋतिदेवत्याम् इष्टकां त्वाम् अयं vजनः लोकः vभूमिः vइति कृत्वा vप्रमन्दते स्तौति, अतो vनिर्ऋतिं त्वाम् vअहम् अपि स्तौमि । कुत इति ? vपरिवेद vविश्वतः सर्वतः त्वामहं परिवेद जानामि ॥३॥

---

1. B1 संबन्धः for बन्धः; H2–3 om. चृततिः; H2–3 बन्धः for बद्धः
20. B1 om. यस्यास्ते ... तस्याः ते (L 21)

भूकर्षणमन्त्राः]

यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् ।
तं ते वि ष्याम्यायुषो न मध्यादथैतं पितुमद्धि प्रसूतः ।
नमो भूत्यै येदं चकार ॥४॥

यम् । ते । देवी । निर्ऋतिरिति निःऽऋतिः । आबबन्धेत्याऽबबन्ध ।
पाशम् । ग्रीवासु । अविचृत्यमित्यविऽचृत्यम् ।
तम् । ते । वि । स्यामि । आयुषः । न । मध्यात् ।
अथ । एतम् । पितुम् । अद्धि । प्रसूत इति प्रऽसूतः ।
नमः । भूत्यै । या । इदम् । चकार ॥ नूः ॥४॥

सा– कात्यायनः – "शिक्यरुक्मपाशेण्ड्वासन्दीः परेणास्यति यं त इति" (काश्रौ १७·२·४) इति । शिक्यादीन् प्रक्षिपेत् । पाठस्तु– 'यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् । तं ते वि ष्याम्यायुषो न मध्यादथैतं पितुमद्धि प्रसूतः' इति । हे यजमान, 'ते तव ग्रीवासु ग्रीवायाः संबन्धिषु प्रदेशविशेषेषु यं पाशं निर्ऋतिः देवी आबबन्ध आ समन्तात् बद्धवती । कीदृशं पाशम् ? अविचृत्यं विनाशयितुमशक्यं दृढमित्यर्थः । ते त्वदीयं ग्रीवास्थं तं पाशं विष्यामि विमुञ्चामि । तच्च विमोचनं त्वदीयस्य आयुषः मध्यात् आरभ्य न भवति किंतु कृत्स्नेऽप्यायुषि । अथ पाशविमोकान्तरं प्रसूतः अभ्यनुज्ञातः त्वम् एतं पितुम् एतदन्नम् अद्धि भक्षय ॥

कात्यायनः – "उत्तिष्ठन्ति नमो भूत्या इति" (काश्रौ १७·२·५) इति । उत्थानं कुर्युः । पाठस्तु– 'नमो भूत्यै येदं चकार' इति । या देवी इदम् अग्निलक्षणं कर्म चकार कृतवती तस्यै भूत्यै श्रीरूपिण्यै देव्यै नमः अस्तु ॥४॥

आ– शिक्यरुक्मपाशेण्ड्वासन्दीः परेणास्यति– 'यं ते देवी' इति । यजमानदेवत्या त्रिष्टुप् । हे यजमान, निर्ऋतिः देवी ते तव ग्रीवासु कण्ठे यं पाशं शिक्यपाशं रुक्मपाशं च आबबन्ध बद्धवती । कथंभूतं पाशमिति ? अविचृत्यम् । चृती छेदने । अविचृत्यमविच्छेद्यम् अनेवंविदुषा अनवखण्डनीयम् । तं ते तव पाशं विष्यामि । स्यतिरुपसृष्टो विमोचने च । पाशं विमुञ्चामि । 'आयुषो न मध्यात्' । "अग्निर्वा आयुस्तस्यैतन्मध्यं यच्चितो गार्हपत्यो भवत्यचित आहवनीयः" (शब्रा ७·२·१·१५) इति श्रुतेः । आयुषः अग्नेः मध्यात् गार्हपत्यात् अग्नेः न विष्यामि न विमुञ्चामि । पाशान् मुञ्चामि, नाग्नेरित्यर्थः । 'अथैतं

13. S2 after ते adds तत्; P1 विमोचयामि for विमुञ्चामि
15. S2 after त्वम् adds अयमग्निनिवेशनः; P1 एवं for एतं
21. B1 बद्धवान् for बद्धवती
23. B1 om. अग्निर्वा ... इति श्रुतेः (L 24)

पितुमद्धि प्रसूतः ' । अथ अनन्तरं पाशान्मुक्तोऽग्निरुपास्थाय स्थितः । प्रसूतः अभ्यनुज्ञातः निर्ऋत्या यजमानस्त्वम् एतं पितुम् । पितुरित्यन्ननाम । अद्धि । अद भक्षणे । भक्षय ॥

उदपात्रं निषिच्यान्तरात्मेष्टकामुत्तिष्ठन्ति– ' नमो भूत्यै ' इति । भूतिदेवत्या विराडेकपदा । नमः भूत्यै श्रियै । ' येदम् ' । या इदम् अग्निलक्षणं कर्म चकार कृतवती तस्यै नमः ॥४॥

नि॒वेश॑नः सं॒गम॑नो॒ वसू॑नां॒ विश्वा॑ रू॒पाऽभि च॑ष्टे॒ शची॑ऽभिः ।
दे॒व इ॑व सवि॒ता स॒त्यध॒र्मेन्द्रो॒ न त॑स्थौ सम॒रे प॑थी॒नाम् ॥५॥

नि॒वेश॑न॒ इति॑ नि॒ऽवेश॑नः । सं॒गम॑न॒ इति॑ सं॒ऽगम॑नः । वसू॑नाम् ।
विश्वा॑ । रू॒पा । अ॒भि । च॒ष्टे॒ । शची॑भिः ।
दे॒व इ॒वेति॑ दे॒वःऽइ॑व । स॒वि॒ता । स॒त्यध॒र्मेति॑ स॒त्यऽध॑र्मा ।
इन्द्रः॑ । न । त॒स्थौ॒ । स॒म॒र इति॑ स॒म्ऽअ॒रे । प॒थी॒नाम् ॥ मे ॥५॥

सा– कात्यायनः – " शालाद्वार्योपस्थानं निवेशन इति " (काश्रौ १७.२.६) इति । पाठस्तु– ' निवेशनः संगमनो वसूनां विश्वा रूपाऽभि चष्टे शचीभिः । देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ' इति । अयमग्निः निवेशनः यजमानानां स्वगृहे निवेशयिता । वसूनां संगमनः प्रजापशुरूपाणां द्रव्याणां प्रापकः । तादृशः सन् शचीभिः स्वकीयाभिः शक्तिभिः विश्वा रूपा सर्वाणि रूपाणि अभि चष्टे सर्वतः ख्यापयति प्रकटीकरोति । तत्र दृष्टान्तः – सविता देव इव यथा सूर्यः सर्वाणि रूपाणि प्रकाशयति तद्वत् । कीदृशोऽग्निः ? सत्यधर्मा । सत्योऽवश्यंभाविफलोपेतो धर्मोऽग्निहोत्रादिलक्षणो यस्यासौ सत्यधर्मा । इन्द्रः परमैश्वर्यवान् । अत एव पथीनां समरे न तस्थौ परिपन्थिनां शत्रूणां युद्धे स्वयमागत्य न तिष्ठति । किंतु स्वकीयनामग्रहणमात्रेण ते पलायन्त इत्यर्थः । काकुर्वा ॥५॥

आ– शालाद्वार्योपस्थानं– ' निवेशनः संगमनः ' इति । आग्नेयी त्रिष्टुप् । विश्वावसुदेवगन्धर्वः । पृथिवीलोकसंस्तुतोऽयमग्निः । निवेश्यत इति निवेशनः । वसूनां धनानां संगमनः संगच्छत इति । विश्वा रूपा विश्वानि रूपाणि आहवनीयदक्षिणाग्निरिति (?) प्रणीताग्नीध्रधिष्ण्यप्रमृतीनि रूपाणि शचीभिः कर्मभिः अभिचष्टे अभिपश्यति । देव इव सविता सविता देवः यथा पश्यति तथा त्वमपि सत्यधर्मा च अवितथधर्मचारी । यश्च इन्द्रः न इन्द्र इव तस्थौ स्थितवान् समरे संग्रामे पथीनाम् । विभक्तिव्यत्ययः । पथिभिः परिपन्थिभिः सह समरे यः तस्थौ तं वयं स्तुम इति वाक्यशेषः ॥५॥

2. B1 before पितुरिति adds एतत्
15. S2 om. अभिचष्टे .. रूपाणि (L 16)
18. S2 om. काकुर्वा
23. H2-3 °कारी for °चारी

भूकर्षणमन्त्राः]

सीरा॑ युञ्जन्ति क॒वयो॑ यु॒गा वि त॑न्वते॒ पृथ॑क् ।
धीरा॑ दे॒वेषु॑ सुम्न॒या ।।६।।

सीरा॑ । यु॒ञ्जन्ति॒ । क॒वयः॑ । यु॒गा । वि । त॒न्व॒ते॒ । पृथ॑क् ।
धीराः॑ । दे॒वेषु॑ । सु॒म्न॒येति॑ सु॒म्न॒ऽया ॥ खं ॥६॥

सा– कात्यायनः – "नियुज्यमानमभिमन्त्रयते सीरा युञ्जन्तीति" (काश्रौ १७.२.११) इति। बलीवर्दैः सह नियुज्यमानं लाङ्गलं 'सीरा युञ्जन्ति' इत्यादिमन्त्रद्वयेन अभिमन्त्रयेत्। तत्र प्रथममन्त्रपाठः – 'सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नया' इति। ᵛकवयः कृषिकर्माभिज्ञाः ᵛसीरा सीरं लाङ्गलं ᵛयुञ्जन्ति सज्जीकुर्वन्तु । तथा ᵛयुगा सुष्ठु द्वादशकक्ष्याविशेषेष्वपेक्षितानि युगानि ᵛवितन्वते एकैकं विस्तारयन्तु। कीदृशाः कवयः? ᵛधीराः धैर्ययुक्ता अनलसा इत्यर्थः। तथा ᵛदेवेषु देवताविषयेषु ᵛसुम्नया। सुम्नं सुखमिच्छन्तीति सुम्नायवः ॥६॥

आ– सीरं युज्यमानमभिमन्त्रयते– 'सीरा युञ्जन्ति', 'युनक्त सीरा' इति द्वाभ्याम्। द्वे सीरदेवते। आद्या गायत्र्यपरा त्रिष्टुप्। सौम्यो बुधः। ᵛसीरा सीरान्। पूजार्थं बहुवचनम्। सीरं हलं ᵛकवयः मेधाविनः ᵛयुञ्जन्ति नियुञ्जन्ति। ᵛयुगा युगानि ᵛपृथक् योग्यतया ᵛवितन्वते संयुञ्जते स्वयम् । कथंभूता इति? ᵛधीराः धीमन्तः क्षेत्रविशेषविदः । किमर्थं युञ्जन्तीति? ᵛदेवेषु ᵛसुम्नया । सुम्नमिति सुखनाम। द्वितीयार्थे तृतीया । देवेषु सुम्नं कर्तुं धीराः कवयो युगानि वितन्वते इति संबन्धः ॥६॥

यु॒नक्त॒ सीरा॒ वि यु॒गा त॑नुध्वं कृ॒ते योनौ॑ वपते॒ह बीज॑म् ।
गि॒रा च॑ श्रु॒ष्टिः सभ॑रा॒ अस॑न्नो॒ नेदी॑य॒ इत् सृ॒ण्यः॑ प॒क्वमेया॑त् ।।७।।

यु॒नक्त॑ । सीरा॑ । वि । यु॒गा । त॒नु॒ध्व॒म् ।
कृ॒ते । योनौ॑ । व॒प॒त॒ । इ॒ह । बीज॑म् ।
गि॒रा । च॒ । श्रु॒ष्टिः । सभ॑रा॒ इ॒ति॒ सऽभ॑राः । अस॑त् । नः॒ ।
नेदी॑यः । इत् । सृ॒ण्यः॑ । प॒क्वम् । आ । इ॒या॒त् ॥ ङिः ॥७॥

सा– अथ द्वितीयः – 'युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम्। गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमेयात्' इति। हे कर्षकाः, ᵛसीरा ᵛयुनक्त लाङ्गलं योजयत।

7. S2 प्रथमायाः for प्रथममन्त्र°
11. H2–3 om. सीरं; H2–3 नियुज्य° for युज्य°
12. B1 बन्धुः for बुधः
13. B1 योग्यतरो for योग्यतया

[सूकर्षणमन्त्राः

^{v}युगा वितन्वते ^{v}वितनुध्वं युगानि विस्तारयत। ^{v}कृते कर्षणेन संस्कृते ^{v}इह अस्मिन् ^{v}योनौ स्थाने ^{v}बीजं व्रीह्यादिकं ^{v}वपत। किं च – तद्बीजं ^{v}गिरा आशीर्वादरूपेण मङ्गलवाक्येन युक्तमिति शेषः। ^{v}श्रुष्टिः तत्र निष्पन्नः स्तम्बः। "गिरा च श्रुष्टिः सभरा असदिति वाग्वै गीरन्नं श्रुष्टिः" (शब्रा ७-२-२-५) इति शतपथश्रुतेः। ^{v}नः अस्मदर्थं ^{v}सभराः ^{v}असत् फलभारयुक्तोऽस्तु। ^{v}पक्वं फलं ^{v}नेदीयः ^{v}इत् अन्तिकतममेव अल्पकालनिष्पाद्यमेव सत् ^{v}सृण्यः सृण्या लवणसाधनेन दात्रेण लूनं सत् ^{v}एयात् अस्मत्समीपमागच्छतु ॥७॥

आ– 'युनक्त सीरा' इति। ^{v}सीरा सीरं ^{v}युनक्त सीरं यथायोग्यं नियोजत। ^{v}वि ^{v}युगा युगानि वि ^{v}तनुध्वम्। अत्रापि यथायोग्यं शम्यायोक्तृप्रभृतिभिः वितनुध्वं विस्तारयत। ^{v}कृते ^{v}योनौ स्थाने क्षेत्रे कृते संस्कृते सति ^{v}इह अस्मिन् ^{v}बीजं व्रीह्यादि ^{v}वपत बीजावापं कुरुत। ^{v}गिरा ^{v}च वाचा 'या ओषधीः' इत्यादिकया मन्त्रवाचा बीजं वपत। ^{v}श्रुष्टिः अन्नजातिः व्रीह्यादिकाः ^{v}सभराः। भरसा, भरणेन फल[व्राते]न सह वर्तत इति सभराः अमितफलाः। श्रुष्टिः ^{v}असत् स्यात्। 'नो नेदीय इत्सृण्यः पक्वमेयात्'। अस्माकं ^{v}नेदीयः अन्तिकतमम् ^{v}इत्। इच्छब्दोऽनर्थकः, अप्यर्थो वा। ^{v}सृण्यः दात्रं लवनसाधनम्। दात्रं ^{v}पक्वम् ओषधम् ^{v}एयात्। एतदुक्तं भवति। अतिधनत्वादोषधीनां दात्रं भूमेः दात्रपूरमोषधमागच्छेत् यथा तथा वपतेति ॥७॥

शुनं सु फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः।
शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तमस्मे ॥८॥

शुनम्। सु। फालाः। वि। कृषन्तु। भूमिम्।
शुनम्। कीनाशाः। अभि। यन्तु। वाहैः।
शुनासीरा। हविषा। तोशमाना।
सुपिप्पला इति सुऽपिप्पलाः। ओषधीः। कर्तम्। अस्मे इत्यस्मे ॥ ज्ञों ॥८॥

1. P1 befor स्थाने adds क्षेत्र
3. S2 om. गिरा च ... °श्रुतेः (L 4)
5. S2 om. °तम°
8. B1 सामयोक्त्र° for शम्यायोक्तृ
9. H2–3 क्षत्र° for क्षेत्रे; B1 H2–3 संकृते for संस्कृते
10. B1 अत्र for मन्त्र°
11. H2–3 भरसा ... सभराः (L 12)
14. H2–3 अथ for अति°

भूकर्षणमन्त्राः]

सा– कात्यायनः– " कृषति शुनꣳ सु फाला इति प्रत्यृचम् " (द्र. काश्रौ १७.२.१२) इति । 'शुनꣳ सु फालाः' इत्यादिभिश्चतसृभिर्ऋग्भिः कर्षणं कुर्यात् । तत्र प्रथमा– 'शुनं सु फाला वि कृषन्तु भूमिꣳ शुनं कीनाशा अभि यन्तु वाहैः । शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तमस्मे ' इति । vसुफालाः । त्रिफला विशरणे । शोभनं फालं अविरोपणमाकर्षणं येषां ते सुफालाः । vकीनाशाः कर्षकाः vभूमिं vशुनं सुखं यथा भवति तथा । शुनमिति सुखनाम । vविकृषन्तु कर्षणं कुर्वन्तु । कीनाशाः हलिनः कर्षकाः vवाहैः बलीवर्दैः सह vशुनं सुखं यथा भवति तथा vअभियन्तु अभितः प्रवर्तन्ताम् । हे vशुनासीरा, शुनो वायुः, सीर आदित्यस्तावुभौ युवामेवं क्षेत्रे कृष्टे सति vहविषा उदकेन vतोशमाना तोशमानौ भूमिं निघ्नन्तौ vसुपिप्पलाः शोभनफलोपेताः vओषधीः vअस्मे अस्मभ्यं vकर्तं कुरुतम् । विकरणव्यत्ययश्छान्दसः । बीजावापं कुरुतमित्यर्थः ॥८॥

आ– चतस्रः सीताः कृषति चतसृभिः ऋग्भिः – 'शुनꣳ सु फाला' इति । 'शुनं सु', 'घृतेन सीता', 'लाङ्गलम्', 'कामं कामदुघे' इति चतस्रः सीतादेवत्यः । कुमारहारीतः । द्वे त्रिष्टुभौ । तृतीया पङ्क्तिः । चतुर्थ्यनुष्टुप् । vशुनम् इति सुखनाम । vसुफालाः । त्रिफला विशरणे । शोभनं फालम् आविशरणमाकर्षणं येषां ते सुफाला लाङ्गलिनः vभूमिं vविकृषन्तु । कृष विलेखने । सुखेन विलिखन्तु । vशुनं सुखं vकीनाशाः हलिनः vअभियन्तु vवाहैः । अनडुद्भिः सहिताः अभियन्तु अभिगच्छन्तु । एवं क्षेत्रे कृष्टे सति vशुनासीरा । शुनो वायुः, सीर आदित्यः । सरणात् सीरश्च, तौ । छान्दसो दीर्घः । शुनासीरौ । छान्दसस्त्वाकारः । vहविषा । हविषेत्युदकनाम । उदकेन vतोशमाना । तोशतिर्वधकर्मा । छान्दसस्त्वाकारः । तोशमानौ भूमिं निघ्नन्तौ । vसुपिप्पलाः । पिप्पलं फलम् । सु शोभनं पिप्पलं फलं यासामोषधीनां ताः सुपिप्पलाः vओषधीः vकर्तम् vअस्मे अस्मभ्यमस्मदर्थम् । कर्तं कुरुतं बीजावापं कुरुतमित्यर्थः ॥८॥

घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्जस्वती पयसा पिन्वमानाऽस्मान्त्सीते पयसाऽभ्या ववृत्स्व ॥९॥

घृतेन । सीता । मधुना । सम् । अज्यताम् ।
विश्वैः । देवैः । अनुमतेत्यनुऽमता । मरुद्भिरिति मरुत्ऽभिः ।
ऊर्जस्वती । पयसा । पिन्वमाना ।
अस्मान् । सीते । पयसा । अभि । आ । ववृत्स्व ॥ ज्यों ॥९॥

---

4. P1 after फालं ins. लोहम्; P1 एषां for येषां
5. P1 कीदृशाः for कीनाशाः; P1 om. हलिनः
6. S2 प्रवर्तयताम् for प्रवर्तन्ताम्
8. P1 with markings above °मानौ ins. on the margin :– तोशतिर्वधकर्मा
9. S2 om. विकरणव्यत्ययश्छान्दसः
13. B1 लाङ्गलग्रथिना; H2–3 लाङ्गलिना for लाङ्गलिनः
14. B1 विलेषने सुखेन विलिषन्तु for विलेखने सुखेन विलिखन्तु

सा– अथ द्वितीया – 'घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः। ऊर्जस्वती पयसा पिन्वमानाऽस्मान्त्सीते पयसाऽभ्या ववृत्स्व' इति। इयं सीता लाङ्गलपद्धतिः मधुना मधुरेण घृतेन उदकेन समज्यतां संसिच्यताम्। अत एव सा विश्वैः देवैः मरुद्भिः च अनुमता समीचीनेयमित्यङ्गीकृता सा पुनः ऊर्जस्वती रसवती पयसा पिन्वमाना जलेनाप्यायिता वर्तते। हे सीते, जलेनाप्यायिता त्वम् अस्मान् प्रति अभ्याववृत्स्व अभित आवृता भव ॥९॥

आ– घृतमित्युदकनाम। विश्वैः देवैः वृष्टे(र)धिशीतैः मरुद्भिः च देवैः अनुमता अभ्यनुज्ञाता सीता। सीता नाम देवता घृतेन उदकेन मधुना उदकेन च समज्यतां संसिच्यताम्। ऊर्जस्वती अन्नवती पयसा पिन्वमाना पयसा पयोदधिघृतादिना पिन्वमाना आपूर्यमाणा। पिन्व [पिवि] मिन्व [मिवि] सेचने। आसिच्यमाना। एवं संस्तूयमाने हे सीते, अस्मान् अभ्याववृत्स्व आभिमुख्येन आवर्तस्व ॥९॥

लाङ्गलं पवीरवत् सुशेवꣳ सोमपित्सरु।
तदुद्वपति गामविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहणम् ॥१०॥

लाङ्गलम्। पवीरवत्। सुशेवमिति सुऽशेवम्। सोमपित्सर्विति सोमपिऽत्सरु।
तत्। उत्। वपति। गाम्। अविम्। प्रफर्व्यमिति प्रऽफर्व्यम्। च। पीवरीम्।
प्रस्थावदिति प्रस्थाऽवत्। रथवाहणम्। रथवाहनमिति रथऽवाहनम् ॥ क्षूं ॥१०॥

सा– अथ तृतीया – 'लाङ्गलं पवीरवत्सुशेवं सोमपित्सरु। तदुद्वपति गामविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहणम्' इति। इदं लाङ्गलम् उद्वपति। उद्धतानि प्रौढलोष्टानि यथा भवति तथा कर्षणं कुर्यादित्यर्थः। कीदृशं लाङ्गलम्? पवीरवत् वज्रवत्तीक्ष्णोपान्तं सुशेवं कर्षकैः सुष्ठु सेवितुं शक्यम्। अतितीक्ष्णत्वेन सहसा भूमिभेदात् कर्षकाणां नास्ति प्रयास इत्यर्थः। सोमपित्सरु। सोमं पिबतीति सोमपा यजमानः। तस्मिन् यजमाने त्सरु भूमौ त्सरणशीलम्। अनेन कर्षणेन फलाधिक्ये सति गवादिबाहुल्यप्रसारणं यजमानः प्राप्नोत्विति शेषः। तत्र गौरविरित्युभयं प्रसिद्धम्। प्रफर्वी प्रथमवयस्का कन्या। पीवरी पुष्टाङ्गी। प्रस्थावत् प्रयाणसमर्थम्। रथवाहणम्। रथं वोढुं योग्यमश्वादिकम्। यदा हि कृषिः समृद्धा भवति तदानीमेतत् सर्वं यजमानस्य सुलभम् ॥१०॥

---

8. H3 सु° for सं°; H2–3 om. अन्नवती
18. S2 °तीक्ष्णोपेतम् for °तीक्ष्णोपान्तम्
19. P1 after सहसा ins. शीघ्रं; S2 om. सोमपित्सरु
20. S2 om. तस्मिन्; S2 यजमानरूपायां for यजमाने;
S2 om. त्सरु; P1 trans. त्सरु after भूमौ; P1 एतत् for अनेन

भूकर्षणमन्त्राः]

आ – 'लाङ्गलम्' इति । गत्यर्थस्य गलेः रूपं लाङ्गलमिति । [v]लाङ्गलं हलम् । [v]पवीरवत् वज्रबलवत् । [v]सुशेवम् । शेवमिति सुखनाम । सुशोभनं शेवं सुखं यस्य तत्सुशेवम् । [v]सोमपित्सरु । सोमं पिबतीति सोमपाः यजमानः, तस्मिन् सोमपि यजमाने भूमौ त्सरणशीलं त्सरु, यद्वा – सोमपि यजमाने पापं सरति नाशयतीति सोमपित्सरु । यद्वा – सोमः पीयते येन चमसेन तत्सोमपि, तस्य सोमपेः त्सरु वृन्तं सोमपित्सरु । पिकारसकारयोर्मध्ये तुगागमश्छान्दसः । सोमपित्सरु यदिष्टभूतं लाङ्गलं [v]तत् [v]उद्वपति उद्गमयति । [v]गां भूमिम् [v]अविम् अवरुद्धकर्मयुक्तां गां [v]प्रफर्व्यं [v]च । फर्वतिर्गतिकर्मा । प्रकर्षेण फर्व्या गम्या प्रफर्व्या, ताम् । छान्दसं पदम् । प्रथमयुवतिः । [v]पीवरीम् उन्नतस्तनकपोलां ताम् उद्वपति । [v]प्रस्थावत् [v]रथवाहणम् । प्रस्थानं प्रस्था प्रस्थानयुक्तम् उत्कृष्टजवोपेतं वा । छान्दसम् । रथं वहतीति रथवाहणः अश्वः उद्वपतीत्यनुषज्यते ॥१०॥

कामं कामदुघे धुक्ष्व मित्राय वरुणाय च ।
इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः ॥११॥

कामम् । कामदुघ इति कामऽदुघे । धुक्ष्व । मित्राय । वरुणाय । च ।
इन्द्राय । अश्विभ्यामित्यश्विऽभ्याम् । पूष्णे ।
प्रजाभ्य इति प्रऽजाभ्यः । ओषधीभ्यः ॥ ठां ॥११॥

सा– अथ चतुर्थः – 'कामं कामदुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः' इति । काम्यन्त इति कामा भोगास्तान् कामान् दोग्धि संपादयतीति कामदुघा लाङ्गलपद्धतिः । हे [v]कामदुघे, मित्रादीनाम् ओषध्यन्तानां [v]कामम् अपेक्षितं भोगं [v]धुक्ष्व संपादय ॥११॥

---

1. B1 om. गत्यर्थस्य ... लाङ्गलमिति
2. H2–3 om. शेवं
3. H2–3 सोमपी यजमानभूमौ for सोमपि यजमाने भूमौ; H2–3 सरण° for त्सरण°
5. B1 H2–3 तस्य सोमपि तत् सरु for तस्य सोमपेः त्सरु H2 वृक्तं for वृन्तं
6. H2–3 अवनयुक्ता धर्मा for अवरुद्धकर्मयुक्तां
7. B1 om. फर्व्या गम्या प्र°
8. H2–3 उच्छृत°, B1 उन्नत° for उच्छ्रूव°; H2–3 om. प्रस्थावद्रथ... अनुषज्यते (L 9)
9. B1 after °वपति ins. इव
17. P1 with insertion above °ध्यन्तानां writes on the margin :– तदेवेभ्यः तेभ्यः सकाशादिति वा

आ– एवं बहुभिः संसृज्यमानं लाङ्गलं स्तौति – ‘ कामं कामदुघे ’ इति । सीतोच्यते । हे vकामदुघे हे सीते । कामानां दोग्ध्री, तत्संबोधनं कामदुघे । vकामम् अस्मदपेक्षितं काम्यमानं फलं vधुक्ष्व । दुह प्रपूरणे । प्रपूरय । केषामित्यत आह– vमित्राय vवरुणाय vच vइन्द्राय च vअश्विभ्याम् आश्विनीदेवताभ्यां vपूष्णे vप्रजाभ्यः सर्वाभ्यः vओषधीभ्यः चार्थाय । चकारः समुच्चयार्थः । एतेभ्योऽर्थाय कामं धुक्ष्वेति संबन्धः ॥११॥

वि मुंच्यध्वमघ्न्या देवयाना अगन्म तमसस्पारमस्य ।
ज्योतिरापाम ।।११।।

वि । मुच्यध्वम् । अघ्न्याः । देवयाना इति देवऽयानाः ।
अगन्म । तमसः । पारम् । अस्य ।
ज्योतिः । आपाम ॥ घं ॥१२॥

सा– कात्यायनः – “अनडुहो विमुच्य विमुच्यध्वमिति” (काश्रौ १७.२.२०) इति । बलीवर्दान् विसृजेत् । पाठस्तु– ‘ विमुच्यध्वमघ्न्या देवयाना अगन्म तमसस्पारमस्य । ज्योतिरापाम ’ इति । हे vअघ्न्याः अहन्तव्या गावो बलीवर्दाः, यूयं vविमुच्यध्वं युगानि मुञ्चत । vदेवयानाः देवतार्थं कर्मकारिणो यूयम् vअस्य क्रियात्मकस्य vतमसः vपारं तीरं वयम् vअगन्म पारं गताः स्म इति । संवदध्वमिति शेषः । अतो वयं vज्योतिः सुखाभिव्यञ्जकं यज्ञलक्षणम् vआपाम प्राप्तवन्तः ॥१२॥

आ– अनडुहो विमुञ्चति – ‘ वि मुच्यध्वम् ’ इति । अनडुही गायत्री । एवं जगतः स्थितिनिमित्तभूतां कृषिमनिर्वर्त्य कृतकृत्याः सन्तो युगात् vविमुच्यध्वम् । हे vअघ्न्याः । अघ्न्या इति गोनामसु पठितम् । अत्र परं पशवः । अहन्तव्याः अघ्न्याः । vदेवयानाः देवतार्थं कर्मकारिणः । यद्वा – देवयानमार्गनिमित्तभूताः । ‘ अगन्म तमसस्पारमस्य ’ । vअस्य क्रियात्मकस्य vतमसः संसारात्मकस्य वा तमसः vपारं तीरं वयम् vअगन्म, पारंगता स्मेति संवदध्वमिति शेषः । अतो वयं vज्योतिः सुखाभिव्यञ्जकं यज्ञलक्षणं ज्योतिः । यद्वा – परंपरया परमात्मस्वरूपं ज्योतिः vआपाम प्राप्तवन्तः ॥१२॥

---

2. H2–3 कामानां for काम्यमानं

3. B1 धुङ्क्ष for धुक्ष्व

22. P1 after प्राप्तवन्तः ins. आप्लृ व्याप्तौ ।

भूकर्षणमन्त्राः]

सजूरब्दो अयवोभिः सजूरुषा अरुणीभिः ।
सजोषसा अश्विना दꣳसोभिः सजूः सूर एतशेन
सजूर्वैश्वानर इळया घृतेन स्वाहा ॥१३॥

सजूरिति सऽजूः । अब्दः । अयवोभिरित्ययवःऽभिः । उषाः । अरुणीभिः । सजोषसा इति सऽजोषसौ । अश्विना । दꣳसोभिरिति दꣳसःऽभिः । सूरः । एतशेन । वैश्वानरः । इळया । घृतेन । स्वाहा ॥ त्नुं ॥१३॥(५)॥

सा – कात्यायनः – 'अभिजुहोति सजूरब्द इति' (काश्रौ १७·३·३) इति । कुशस्तम्बे जुहुयात् । पाठस्तु – 'सजूरब्दो अयवोभिः सजूरुषा अरुणीभिः । सजोषसा अश्विना दꣳसोभिः सजूः सूर एतशेन सजूर्वैश्वानर इळया घृतेन स्वाहा' इति । ᵛअयवोभिः इत्यनेन पदेन मासाश्चार्धमासाश्चोच्यन्ते । तैः ᵛअब्दः संवत्सरः ᵛसजूः समानप्रीतियुक्तो भवत्विति शेषः । तथा ᵛउषाः प्रातःकालाभिमानिनी [देवता] ᵛअरुणीभिः अरुणवर्णाभिः कान्तिभिः ᵛसजूः समानप्रीतियुक्ता । तथा ᵛअश्विना अश्विनौ देवौ ᵛदंसोभिः कर्मभिः ᵛसजोषसौ समानप्रीतियुक्तौ। तथा ᵛसूरः आदित्यः ᵛएतशेन एतन्नाम्ना ऋषिणा स्वेन [अश्वेन] वा [ᵛसजूः] समानप्रीतियुक्तः । तथा ᵛवैश्वानरः अग्निः ᵛइळया अन्नरूपेण हविषा ᵛसजूः समानप्रीतियुक्तो भवतु । एवंविधेभ्यः सर्वेभ्यो देवेभ्यः ᵛघृतेन आहुतिरूपेण क्षरणरूपेणाज्येन ᵛस्वाहा सुहुतमस्तु ॥१३॥

[इति त्रयोदशेऽध्याये पञ्चमोऽनुवाकः]

———

आ – कुशस्तम्बे जुहोति– ' सजूरब्दः ' इति । लिङ्गोक्तदैवतं यजुः । लिङ्गोक्तदेवत्या जगती वा । ᵛसजूः समानजोषणः ᵛअब्दः संवत्सरः ᵛअयवोभिः । अयवोभिः - शब्देन (अयवः - शब्देन ?) यवाश्चायवा ? मासाश्चार्धमासाश्चोच्यन्ते। ' सजूरुषा अरुणीभिः '। अरुणवर्णाभिः गोभिः ᵛसजूः समानजोषणः ᵛउषाः उषसा युक्तः अब्दः, उषांसि वा। ᵛसजोषसा सजोषसौ समानप्रीतियुक्तौ अश्विनौ ᵛदꣳसोभिः कर्मभिः । ᵛसजूः समानजोषणः ᵛसूरः पण्डितः ᵛएतशेन

11. S2 om. प्रातःकालाभिमानिनी
12. S2 om. कान्तिभिः
13. P1 after °युक्तौ adds भवताम् ।
17. H3 आश°, B1 स्रुवा° for कुश°; H2–3 °स्तम्बं for °स्तम्बे
18. B1 om. सजूः
20. B1 उखाः for उषाः
21. B1 स° for समान°

अश्वेन। ^{v}सजूः ^{v}वैश्वानरः परमेश्वरः ^{v}इळया। इळा आग्नेयी पृथिवी गौर्वागन्नं वा इळा। अनया सजूर्वैश्वानरः। सजूर्भवतीति शेषः। ^{v}घृतेन हविषा ^{v}स्वाहा सुहुतमस्तु ॥१३॥

[इति त्रयोदशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

[अथ षष्ठोऽनुवाकः।]

पञ्चमेऽनुवाके भुवः कर्षणमुक्तम्। षष्ठे ओषधिवापोऽभिधीयते ॥

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।
मनै नु बभ्रूणामह२ं शतं धामानि सप्त च॥१॥

याः। ओषधीः। पूर्वाः। जाताः। देवेभ्यः। त्रियुगमिति त्रिऽयुगम्। पुरा।
मनै। नु। बभ्रूणाम्। अहम्। शतम्। धामानि। सप्त। च ॥ ङं ॥१॥

कात्यायनः – "या ओषधीरिति पञ्च तृचैर्वपति" (द्र. काश्रौ १७·३·८) इति। 'या ओषधीः' इत्यादिभिः पञ्चदशसंख्याकाभिः ऋग्भिः पञ्च तृचानि संपद्यन्ते। तैस्तृचैः सर्वा ओषधीर्निर्वपेत्। तत्रेयं प्रथमा – 'या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामह२ं शतं धामानि सप्त च' इति। युगशब्दः कालवाची। ^{v}त्रियुगं वर्षाः शरद्वसन्त इति कालत्रयमुद्दिश्य ^{v}पुरा सृष्ट्यादौ ^{v}देवेभ्यः सकाशात् ^{v}याः ओषधयः ^{v}पूर्वाः प्रथमा ^{v}जाताः उत्पन्नाः। ^{v}बभ्रूणां प्राणिभरणसमर्थानां परिपाकेन पिङ्गलवर्णानां वा तासामोषधीनां ^{v}शतं ^{v}धामानि शतसंख्याकानि धामानि भेदान् ^{v}सप्त ^{v}च विशेषाकारेण ग्राम्यानारण्यांश्च सप्तधान्यभेदान् ^{v}अहं ^{v}मनै ^{v}नु मन्ये जानामि ॥१॥

आ– क्षेत्रे सर्वौषधं वपति– 'या ओषधीः' इति। अत्र पञ्चविंशतिरनुष्टुभः। ओषधीस्तुतिः। ऋषिराथर्वणो भिषक्। पञ्चदश बीजावपने विनियुक्ताः। ^{v}याः ^{v}ओषधीः ओषधयः। अत्र विभक्तिव्यत्ययः। ^{v}पूर्वाः प्रथमाः अन्याभ्यः ओषधीभ्यः भविष्यत्कालसंबन्धिनीभ्यः पूर्वाः ^{v}जाताः ^{v}देवेभ्यः ऋतुभ्योऽर्थाय। "ऋतवो वै देवाः" (शब्रा ७·२·४·२६) इति श्रुतेः। ऋतवो ह्योषधिसमृद्धाः कार्या इति। 'त्रियुगं पुरा'। त्रीणि युगानि समाहृतानि ^{v}त्रियुगं

---

1. B1 गौर्वागन्तव्या for गौर्वागन्नं वा
15. S2 om. second धामानि
17. H2–3 आग्नेयी for पञ्चविंशतिः
18. H3 °वापने for °वपने
20. B1 क्रतुभ्यो° for ऋतुभ्यो°, क्रतवो for ऋतवो

त्रिकालमित्यर्थः । वसन्ते प्रावृषि शरदि वा । vपुरा पूर्वं वसन्तादिषु पूर्वस्मिन् संवत्सरे उत्पन्नाः ओषधयः अस्मिन् क्षेत्रे उप्यन्ते । किं तेषा(तासा ?)मित्यत आह– vमनै vनु । मन ज्ञाने । मन्ये जानामि । तासां vबभ्रूणां बभ्रुवर्णानाम् । बभ्रुः सोमः । बभ्रूणां vशतं vधामानि । धामशब्दः स्थानपर्यायः । संवत्सरोपलक्षितमेकैकं स्थानम् । यदिदं शतायुः अतः ‘ शतं धामानि सप्त च ’ । ये सप्तशीर्षण्याः प्राणाः तानेतदाह– vसप्त vच इति । एवं तासामोषधीनां शतं धामानि सप्तोत्तराणि मनै मन्ये इति संबन्धः । अथवा त्रीणि युगानि समाहृतानि त्रियुगम् । कलिद्वापरत्रेतायुगलक्षणं पुरा त्रियुगम् । पुरा उपरि यत् कृतयुगं तत्रापि पुरा कृतयुगादौ या ओषधीः पूर्वा जाता देवेभ्यः । पूर्वाः देवादीनां जङ्गमानामुत्पत्तेः पूर्वाः प्रथमा जाताः या ओषधयस्तासां बभ्रूणाम् । भृञ् भरणे । सर्वजगद्भरणहेतुत्वात् बभ्रवः ओषधयः । तासां बभ्रूणामोषधीनां धामानि जन्मस्थानानि नामानि च । शतं शतसंख्याकानि विशेषतस्त्वपरिमितानि । सामान्यतस्तु सप्त च सप्तसंख्यायुक्तानि तानि vअहं मनै नु मन्ये जानामीति । प्रसिद्धं तु जङ्गमानामुत्पत्तेः प्राक् ओषधीनां जन्मेति ओषधयः स्तूयन्ते । तथा च सप्त[स्थाना]नि “ मेधया तपसाऽजनयत् पिता ” इति श्रुतेः । “ मुख्या वै स्थावराः स्मृताः ” इति स्मृतेश्च । ओषधीनां प्रथमजत्वं पुराणप्रसिद्धमिह स्तूयते ॥१॥

शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥२॥

शतम् । वः । अम्ब । धामानि । सहस्रम् । उत । वः । रुहः ।
अध । शतक्रत्व इति शतऽक्रत्वः । यूयम् । इमम् । मे । अगदम् । कृत ॥ घृं ॥२॥

---

1. H3 वत्सरे for संवत्सरे
2. H2–3 om. मन ज्ञाने
3. H2 before बभ्रुः adds अत्र
4. B1 H2–3 यदि तं for यदिदं
7. B1 कृतं for कृत°
8. H3 देवानां for देवादीनां
9. H3 om. ओषधयः
10. B1 om. जन्म°
11. H3 परि° for अपरि°
12. B1 अवैमि for जानामि; H3 पूर्वं for प्राक्; B1 प्रसूयन्ते for स्तूयन्ते

सा – अथ द्वितीया – ' शतं वो अम्ब धामानि सहस्रमुत वो रुहः । अधा शतक्रत्वो यूयमिमं मे अगदं कृता ' इति । हे vअम्ब, मातृस्थाना ओषधयः vवः युष्माकं vधामानि जातिभेदाः क्षेत्राणि वा vशतं सन्ति । vउत अपि च vवः युष्माकं vरुहः प्ररोहाः अङ्कुराश्च vसहस्रं सन्ति । शतं सहस्रमित्याभ्यामपरिमितत्वमुपलक्ष्यते । vअध अथैवं बहुभेदोपेतत्वे सति शतसंख्याकाः क्रतवो याभिर्युष्माभिर्निष्पाद्यन्ते तादृश्यः vशतक्रत्वः vयूयं vमे मदीयम् vइमं यजमानम् vअगदं vकृत क्षुत्पिपासादिरोगरहितं कुरुत ॥२॥

आ – ' शतं वः ' इति । हे ओषधयः हे vअम्ब हे मातः, हे मातरः, vवः युष्माकं vशतं vधामानि जन्मानि । ' सहस्रम् उत वो रुहः ' । vवः युष्माकम् । रुह बीजजन्मनि । vरुहः रोहणानि, vसहस्रम् अपरिमितं सन्ति । ' अधा शतक्रत्वः ' । vअध अथ एवं सति हे vशतक्रत्वः बहुकर्माणः, vयूयम् vइमं प्रजापतिम् इमं यजमानं वा vमे मम संबन्धिनम् vअगदं vकृत । गदो व्याधिः, तद्रहितोऽगदः । तम् अगदं कृत कुरुध्वम् ॥२॥

ओषधीः प्रति गृभ्णीत पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्ण्वः ॥३॥

ओषधीः । प्रति । गृभ्णीत । पुष्पवतीरिति पुष्पऽवतीः । प्रसूवरीरिति प्रऽसूवरीः ।
अश्वा इवेत्यश्वाःऽइव । सजित्वरीरिति सऽजित्वरीः । वीरुधः । पारयिष्ण्वः ॥ श्रौ ॥३॥

सा – अथ तृतीया– ' ओषधीः प्रति गृभ्णीत पुष्पवतीः प्रसूवरीः । अश्वा इव सजित्वरीर्वीरुधः पारयिष्ण्वः ' इति । हे vओषधीः, vप्रतिगृभ्णीत यूयं प्रतिगृह्णीत । कीदृशीः ? vपुष्पवतीः पुष्पैरुपेताः vप्रसूवरीः फलप्रसववतीः । vअश्वा vइव vसजित्वरीः । संग्रामे यथा अश्वा जयशीलास्तद्वत् फलपर्यन्तत्वात् जयशीलाः । vवीरुधः लतारूपाः vपारयिष्ण्वः फलपाकान्तत्वं परित्यज्य पारं बहुसंवत्सरावसानं प्राप्तुं शीलं यासां तास्तथाविधाः ॥३॥

आ– ' ओषधीः प्रति ' । vओषधीः फलपाकान्ताः vप्रतिगृभ्णीत प्रतिगृह्णीत । कथंभूताः ओषधीरिति ? vपुष्पवतीः पुष्पैः समेताः vप्रसूवरीः फलप्रसववतीः ओषधीः प्रतिगृह्णीत । किं च – ' अश्वा इव सजित्वरीः ' । संग्राम्याः vअश्वाः vइव सहजयशीलाः भूत्वा । vवीरुधः vपारयिष्ण्वः विविधव्याधिं निरुध्यन्तीति वीरुधः । पारप्रवणशीलाः पारयिष्ण्वः, अस्माकं भवतेति शेषः ॥३॥

ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे ।
सनेयमश्वं गां वास आत्मानं तव पूरुष ॥४॥

7. H2–3 माता for मातः; B1 om. मातरः
8. B1 om. जन्मानि; H2–3 °जन्मानि for °जन्मनि
17. P1 om. हे; S2 before ओषधीः adds ऋत्विजः;
24. H3 °प्रवाण° for °प्रवण°

ओषधिवापमन्त्राः]

ओषधीः । इति । मातरः । तत् । वः । देवीः । उप । ब्रुवे ।
सनेयम् । अश्वम् । गाम् । वासः । आत्मानम् । तव । पूरुष । पुरुषेति पुरुष ॥ ढुं ॥४॥

स्सा– अथ चतुर्थी– 'ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे । सनेयमश्वं गां वास आत्मानं तव पूरुष' इति । हे मातरः, मातृसमानाः देवीः देव्यः । इतिशब्दोऽत्र हेत्वर्थे वर्तते । यस्मात् ओषधीः यूयमोषधयस्तस्मात् वः युष्मान् उपब्रुवे प्रार्थये । कथं प्रार्थनमिति तदुच्यते– हे पूरुष, तव त्वदीयं सनेयं सह नेतव्यम् अश्वं, त्वदीयं गां पशुं, वासः त्वदीयं वस्त्रं स्थानं वा, आत्मानं त्वदीयं शरीरम्, एतत्सर्वमोषधयोऽभिवृद्धिं प्रापयन्त्वित्यर्थः ॥४॥

आ – 'ओषधीः' इति । देवीः देवनादिगुणहेतुभूताः । ओषधीः इति इत्थमशनदानारोग्यादिभिरुपकुर्वन्तीः वः युष्मान् मातरः जगतो निर्मात्र्यः इति तत् तन्नाम उपब्रुवे ब्रवीमि । सनेयम् । नीयते नेयं, नयेन सहितं सनेयं सह नेतव्यम् । अश्वं तव गां वासः । तव आत्मानं पूरुष । पुरुष इति व्यत्ययः । पुरुषोऽहमेतत् सर्वं तवेति उपब्रुवे ॥४॥

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत् किलासथ यत् सनवथ पूरुषम् ॥५॥

अश्वत्थे । वः । निषदनम् । निसदनमिति निऽसदनम् । पर्णे । वः । वसतिः । कृता ।
गोभाज इति गोऽभाजः । इत् । किल । असथ ।
यत् । सनवथ । पूरुषम् । पुरुषमिति पुरुषम् ॥ ढुं ॥५॥

स्सा – अथ पञ्चमी – 'अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाज इत् किलासथ यत् सनवथ पूरुषम्' इति । हे ओषधीदेवताः, वः युष्माकम् अश्वत्थे अस्ति निषदनम् अश्वत्थवृक्षच्छायायामुपवेशनस्थानं भवति । पर्णे पलाशवृक्षे वः युष्माकं वसतिः कृता निवासकारणं गृहं कृतम् । देवताधिष्ठितत्वादेव । लोकेऽश्वत्थवृक्षः प्रदक्षिणनमस्कारादिभिः पूज्यते । पलाशवृक्षश्चेध्मादिरूपेण । ईदृश्योऽपि यूयं गोभाजः इत् भवदीयेन स्थावररूपेण भूमिभाज एव भूत्वा असथ किल स्थिता इति लोके प्रसिद्धम् । तत् किमर्थमिति तदुच्यते– यत् यस्मात् कारणात् पूरुषम् इमं यजमानं मनुष्यं सनवथ अन्नदानेन पोषयथ । तस्मादिदं स्थावररूपावस्थानमित्यर्थः ॥५॥

आ – 'अश्वत्थे वः' इति । अश्वत्थे अश्वत्थमये उपभृति वः युष्माकमोषधीनां निषदनम् अवस्थानम् । पर्णे पलाशे पर्णमय्यां जुह्वां वः औषधीनां युष्माकं वसतिः निवासः होमार्थम् अध्वर्युणा कृता । अश्वत्थपर्णयोस्तद्धितलोपश्छान्दसः । 'गोभाज इत् किलासथ यत् सनवथ पूरुषम्' ।

5. P1 after पूरुष adds यजमान; S2 om. तव

8. H2–3 इत्यर्थम् for इत्थम्

[V]किल इति विद्याप्रकर्षे। ततोऽग्नौ हुताः सत्यः ओषधयः [V]गोभाजः। गोशब्देनात्रादित्योऽभिधीयते। गामादित्यं भजन्त इति गोभाजः। [V]इत् एव [V]असथ अभवथ। [V]किल असथ।

" अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥"

(मनुस्मृति ३·७६) इति स्मृतेः। यद्वा – 'अश्वत्थे वो निषदनम्'। तथा हि – अश्वत्थे फलिते सर्वा ओषधयः फलवत्यो भवन्ति। पर्णे च फलिते कोद्रवाः फलिता भवन्ति। गोभाजः पृथिवीभाजश्च उप्ताः सत्यः किल असथ भवथ। यत् यदा एवं भवथ तदा [V]पूरुषं स्वमात्मानं पुरुषाकारं [V]सनवथ भोजनादिभिः उपकारैः संभजध्वम्। एवं दुरवगाहितगतयो यूयमित्यभिप्रायः ॥५॥

यत्रौष॑धीः स॒मग्म॑त॒ राजा॑नः॒ समि॑ता इ॒व।
विप्रः॒ स उ॑च्यते भि॒षग्र॑क्षो॒हाऽमी॑व॒चात॑नः ॥६॥

यत्र॑। ओष॑धीः। स॒मग्म॒तेति॑ स॒म्ऽअग्म॑त। राजा॑नः। समि॑ता इ॒वेति॒ समि॑तौऽइव।
विप्र॑ः। सः। उ॒च्य॒ते। भि॒षक्।
र॒क्षो॒हेति॑ र॒क्षः॒ऽहा। अ॒मी॒व॒चात॑न॒ इत्य॑मी॒व॒ऽचात॑नः॥ त्रां ॥६॥

सा – अथ षष्ठी – 'यत्रौषधीः समग्मत राजानः समिता इव। विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः' इति। [V]यत्र यस्मिन् क्षेत्रे [V]ओषधीः ओषधयो यूयं [V]समग्मत फलप्रदानाय संगता भवत। तत्र दृष्टान्तः – [V]राजानः [V]समिता [V]इव। यथा युद्धे प्रतिपक्षिणः सेनां जेतुं परस्परमनुकूला राजानः संगच्छन्ते एवं संगतास्वोषधीषु [V]विप्रः मेधावी रसवीर्यविपाकाभिज्ञो यः पुरुषः [V]सः [V]भिषक् उच्यते क्षुधादिरोगस्य चिकित्सक इत्यभिधीयते। कथं भिषक्त्वमिति तदुच्यते– [V]रक्षोहा पक्वाभिरेताभिरोषधीभिः पुरोडाशं रक्षोघ्नं कृत्वा रक्षसां हन्ता तदुपद्रवरूपरोगं निवारयति। [V]अमीवचातनः। ओषधिजन्यपथ्यादिभिरमीवान् रोगांश्चातयति नाशयतीत्यमीवचातनः ॥६॥

आ– 'यत्रौषधीः' इति। [V]यत्र यस्मिन् पुरुषे भैषज्यकर्तरि [V]ओषधीः ओषधयः यूयं व्याधिं जेतुं [V]समग्मत समागच्छत। क इव ? [V]राजानः [V]समिता [V]इव, यथा राजानः सामितौ

2. H2–3 after इति add यूयं
7. B1 om. first भवथ; B1 भजथ, H2–3 भवाति for second भवथ
8. H2–3 सनध्वम् for संभजध्वम्; B1 om. इत्यभिप्रायः।
14. S2 षष्ठः for षष्ठी
17. S2 संगताश्च for संगतासु
19. P1 पुरोधसं, S2 पुरोगसं for पुरोडाशं
21. B1 om. यत्रौषधीरिति ...... यूयं
22. H3 कृत्वा for क इव

संग्रामे शत्रुं जेतुं समागच्छन्ति । किं तत्रेत्यत आह– [v]विप्रः [v]सः [v]उच्यते [v]भिषक् । प्रा पूरणे । अपेक्षितफलस्याभिपूरकः विप्रः ब्राह्मणः भिषक् । [v]रक्षोहा राक्षसकृत्यादिदोषघातकः । [v]अमीवचातनः । चातयतिर्नाशने । व्याधिनाशनः । एवंविधो भिषक् सः विप्र उच्यते ॥६॥

अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम् ।
आऽवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥७॥

अश्वावतीम् । अश्ववतीमित्यश्वऽवतीम् । सोमावतीम् । सोमवतीमिति सोमऽवतीम् ।
ऊर्जयन्तीम् । उदोजसमित्युत्ऽओजसम् ।
आ । अवित्सि । सर्वाः । ओषधीः । अस्मै । अरिष्टतातय इत्यरिष्टिऽतातये ॥ थिं ॥७॥

सा – अथ सप्तमी – ‘अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम् । आऽवित्सि सर्वा ओषधीरस्मा अरिष्टतातये’ इति । काचिदोषधिजातिरश्वावती । अश्वा अस्यां सन्तीति अश्वावती । छान्दसो दीर्घः । ओषधिसमृद्धौ सत्यां धनद्वारेण अश्वा लभ्यन्त इत्यर्थः । अन्या काचिदोषधिः सोमावती । सोमयागोऽस्यामस्तीति सोमवती । तस्यां सत्यां सोमयागः कर्तुं शक्यत इत्यर्थः । अपरा जातिरूर्जयन्ती । ऊर्जं बलं प्राणचेष्टां वा करोतीत्यर्थः । अन्या जातिरुदोजाः । उत्कृष्टमोजो धातुरङ्गे यस्याः सा उदोजाः । अन्नद्वारेण शरीरधातून् पोषयतीत्यर्थः । ताः [v]सर्वाः [v]ओषधीः अहम् [v]आऽवित्सि सर्वतो लब्धवानस्मि । किमर्थम् ? [v]अस्मै [v]अरिष्टतातये । अरिष्टस्य भावः अरिष्टतातिः । अस्य यजमानस्य हिंसाराहित्यायेत्यर्थः ॥७॥

आ– ‘अश्वावतीम्’ इति । ‘सर्वा ओषधीः’ इति निर्देशादेकवचनमिह विवक्षितम् । या ओषधयः [v]अश्वावतीम् । अश्वावत्यः अश्वसंपादिन्यः । सर्वत्र छान्दसो दीर्घः । अश्ववत्यः । [v]सोमावतीं सोमवत्यः [v]ऊर्जयन्तीम् ऊर्जयन्त्यः । ऊर्ज बलप्राणनयोः । बलसंपादिन्यः । [v]उदोजसम् । उद्गतमोजो यासामोषधीनां ता उदोजसः । ताः [v]सर्वाः [v]ओषधीः पूर्वमन्त्रोक्तो भिषक् त्वम् [v]आऽवित्सि जानासि । किमर्थमिति – [v]अस्मै [v]अरिष्टतातये । रिषतिर्विनाशार्थः । रिष्टं रिष्टिः विनाशः । न रिष्टम् [अरिष्टं], तायते विस्तार्यत इति । [v]अरिष्टतातये । अस्मै अस्य यजमानस्य रोगनिवर्तनेन अविनाशताविस्तारणार्थं भैषज्यं करोत्विति शेषः ॥७॥

उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते ।
धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥८॥

1. H2–3 after भिषक् add वैद्यः स भिषक्
3. H2–3 om. सः
18. H2–3 बलप्राणधारणाः, B1 प्रबलधारणधारणे for बलप्राणनयोः
19. B1 om. ता उदोजसः
20. B1 om. जानासि

उत् । शुष्माः । ओषधीनाम् ।

गावः । गोष्ठादिव । गोस्थादिवेति गोस्थात्ऽइव । ईरते ।

धनम् । सनिष्यन्तीनाम् । आत्मानम् । तव । पूरुष । पुरुषेति पुरुष ॥ छीं ॥८॥

सा – अथाष्टमी – 'उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनꣳ सनिष्यन्तीनामात्मानं तव पूरुष' इति । ओषधीनां शुष्माः तदुपभोगजन्यजलविशेषाः उदीरते उद्गच्छन्ति । तत्र दृष्टान्तः – गावः गोष्ठात् इव । यथा गावः स्वनिवासस्थानाद् गृहादरण्यदेशं प्रति उद्गच्छन्ति, तद्वत् । कीदृशीनामोषधीनाम् ? हे पूरुष, तव त्वदीयम् आत्मानं शरीरं प्रति धनं सनिष्यन्तीनां धनं दातुमिच्छन्तीनाम् ॥८॥

आ – 'उच्छुष्माः' [इति] । उत् । शुष्माः वीर्याणि । ओषधीनां संबन्धीनि वीर्याणि । ईर् गतौ । उदीरते । अत्र व्यत्ययः । उद्गच्छन्ति प्रकाशीभवन्ति । कथमिव ? 'गावो गोष्ठादिव' । गोष्ठात् स्वनिवासस्थानात् गावः उद्गच्छन्ति इव । किं कुर्वन्तीनामिति । धनं सनिष्यन्तीनां धनं संभजमानानां, यजमानार्थम् । तव आत्मानं च पूरुष । अत्र व्यत्ययः । यज्ञपुरुषं च, पुरु बहुलं सनोति ददातीति पुरुषः, तं संभजमानानाम् ओषधीनां शुष्मा उदीरत इति संबन्धः ॥८॥

इष्कृतिर्नाम वो माताऽथो यूयꣳ स्थ निष्कृतीः ।

सीराः पतत्रिणी स्थन यदामयति निष्कृथ ॥९॥

इष्कृतिः । नाम । वः । माता ।

अथो इत्यथो । यूयम् । स्थ । निष्कृतीः । निःकृतीरिति निःऽकृतीः ।

सीराः । पतत्रिणीः । स्थन । यत् । आमयति । निः । कृथ ॥ झुं ॥९॥

सा – अथ नवमी – 'इष्कृतिर्नाम वो माताऽथो यूयꣳ स्थ निष्कृतीः । सीराः पतत्रिणी स्थन यदामयति निष्कृथ' इति । हे ओषधयः, युष्माकम् इष्कृतिः नाम । नकारलोपश्छान्दसः । निष्कृतिः निष्क्रयणं क्षुधादिविनाशनमेव माता मातृवदुत्पत्तिनिमित्तं; क्षुधादिकं निवारयितुमेव हि भवतीनामुत्पत्तिः । अथो अपि चैवं सति यूयं निष्कृतीः स्थ निष्कृत्यः क्षुधादिविनाशका भवथ । सीराः क्षुधादीनामपसारयित्र्यः । पतत्रिणीः, पतत्रं पतनम्, अस्मान् प्रत्यागमनं तेनागमनेनोपेताः स्थन भवत । यत् क्षुधादिकम् आमयति रोगवद् बाधते तं निष्कृथ विनाशयत ॥९॥

---

9. H2–3 om. उत् शुष्माः

13. H2–3 बहुफलं for बहुलं

25. P1 यः for यत्

ओषधिवापमन्त्राः]

आ– 'इष्कृतिर्नाम' इति। उपसर्गैकदेशलोपश्छान्दसः। निष्कृतिः निष्क्रयणम्। व्याध्यादेर्विनाशनं करोतीति निष्कृतिरिति। वः युष्मदीयायाः मातुः नाम। व्युत्पत्त्यभिप्रायोऽयं मातेति। अथो अपि यूयं निष्कृतीः निष्कृत्य(तयः ?) स्थ व्याधिनिष्क्रयणाः। किं च – सीराः सरणशीलाः पतत्रिणीः। पतत्रं तनूरुहम्। अत्रोपकरतः (कुर्वन्तः ?) महीरुहाः तनूरुहाणि पतत्राणि विषयत्वेन यासां सन्ति ताः पतत्रिण्यः स्थन भवथ। नकारश्छान्दसः। इवार्थे वा। यत् आमयति आमयवदाचरतीति तं निष्कृथ तन्निष्क्रयणं कुरुत ॥९॥

अति विश्वाः परिष्ठा स्तेनइव व्रजमक्रमुः।
ओषधीः प्राचुच्यवुर्यत् किं च तन्वो रपः ॥१०॥

अति। विश्वाः। परिष्ठाः। परिस्था इति परि ऽस्थाः।
स्तेनइवेति स्तेनःऽइव। व्रजम्। अक्रमुः।
ओषधीः। प्र। अचुच्यवुः। यत्। किम्। च। तन्वः। रपः॥ झुं ॥१०॥

सा – अथ दशमी – 'अति विश्वाः परिष्ठा स्तेनइव व्रजमक्रमुः। ओषधीः प्राचुच्यवुर्यत् किं च तन्वो रपः' इति। परिष्ठाः शरीरस्य परितः स्थिता उदरमध्ये प्रविष्टाः विश्वाः सर्वाः ओषधयः अति अजीर्णादिदोषमतिलङ्घ्य अक्रमुः क्रान्ता देहे व्याप्ता इत्यर्थः। तत्र दृष्टान्तः– स्तेनइव व्रजम्। यथा रात्रौ गुप्तचोरो गोष्ठं प्रविश्य गामपहर्तुं सावधानं गोशालायां सर्वतो व्याप्नोति तद्वत्। तन्वः शरीरस्य संबन्धि यत् किं च रपः ज्वरशिरोव्यथागुल्मातिसारादिरूपं पापफलं यत् किंचिदस्ति तत् सर्वम् ओषधीः ओषधयः प्राचुच्यवुः विनाशितवत्यः ॥१०॥

आ– 'अति विश्वाः' इति। विश्वमतीत्य वर्तत इति अतिविश्वाः। पारिष्ठाः परितः सर्वतः व्याधीनधिष्ठाय तिष्ठन्तीति परिष्ठा ओषधयः। कथमिव परिष्ठा इति। 'स्तेन इव व्रजम्'। यथा स्तेनः अनिष्टकरः व्रजं पशुपालनिवासस्थानं परिमुमोषया अधिष्ठाय स्वकार्यं करोति, एवम् अक्रमुः। अनन्तरं च ओषधीः ओषधयः प्राचुच्यवुः प्राच्यावयन्। 'यत् किं च तन्वो रपः'। तन्वः शरीरस्य। रपः रिप्रमिति द्वे पापनामनी भवतः। शरीरस्य यत् किंचन रपः व्याधिजन्मनिमित्तं रपस्तद्व्याधिं च ओषधयः प्राचुच्यवुः प्राच्यवनं कारयेयुः ॥१०॥

---

3. H3 °निष्क्रयणम् for °निष्क्रयणाः
4. B1 अत्रोपकलत। अमीरुहाः for अत्रोपकरतः महीरुहाः
17. P1 after प्राचुच्यवुः ins. च्यु च्यवने।
21. H3 अत्यक्रः for अक्रमुः; H3 om. प्राचुच्यवुः

यदिमा वाजयन्नहमोषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥११॥

यत् । इमाः । वाजयन् । अहम् । ओषधीः । हस्ते । आदध इत्याऽदधे ।
आत्मा । यक्ष्मस्य । नश्यति । पुरा । जीवगृभ इति जीवऽगृभः । यथा ॥ ऊर्मी ॥११॥

सा – अथैकादशी – ' यदिमा वाजयन्नहमोषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ' इति । ᵛयत् यदा ᵛअहं ᵛवाजयन् अन्नमिच्छन् ᵛइमाः ᵛओषधीः ᵛहस्ते आदधामि, तदानीमेव ᵛयक्ष्मस्य क्षुदादिरोगस्य ᵛआत्मा स्वरूपं ᵛपुरा नश्यति भोजनात् प्रागेव नष्टमवश्यं भवति । तत्र दृष्टान्तः– ᵛयथा लोके धीवरैर्जीवस्य शशादेर्ग्रहणात् पुरा भीतः शशः कर्णाभ्यां नेत्रे पिधाय भूमिं संश्लिष्टो मृत इव तिष्ठति तद्वत् ॥११॥

आ – 'यदिमा वाजयन्' [इति] । ᵛइमाः ओषधयः ᵛयत् यं ᵛवाजयन् अवाजयन् । वाजि पूजार्थः । अपूजयन् । सः ᵛअहम् ᵛओषधीः ᵛहस्ते ᵛआदधे आस्थापयामि । ततोऽनन्तरम् ᵛआत्मा ᵛयक्ष्मस्य व्याधेः आत्मा स्वरूपं ᵛनश्यति । 'पुरा जीवगृभो यथा' । जीवन्नेव हिंसार्थं यो गृह्यते पशुर्वा अन्यो वा मनुष्यादिः स जीवगृभ् । तस्य ᵛजीवगृभः वधात् प्रागेव अतिविषादात् मृतोऽहमिति मन्यमानः स्वयमात्मा ᵛयथा नश्येत् एवं व्याधेरात्मापि स्वयं नश्यति ॥११॥

यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः ।
ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥१२॥

यस्य । ओषधीः । प्रसर्पथेति प्रऽसर्पथ ।
अङ्गमङ्गमित्यङ्गम्ऽअङ्गम् । परुष्परुः । परुःपरुरिति परुःऽपरुः ।
ततः । यक्ष्मम् । वि । बाधध्वे । उग्रः । मध्यमशीरिवेति मध्यमशीःऽइव ॥ शिं ॥१२॥

सा – अथ द्वादशी – ' यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः । ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ' इति । ᵛयस्य रोगिणः ᵛअङ्गमङ्गं सर्वाण्यङ्गानि ᵛपरुष्परुः । परुशब्दः पर्ववचनः । सर्वाणि पर्वाणि । हे ᵛओषधीः ओषधयः, यूयं ᵛप्रसर्पथ प्रगच्छथ प्रसर्पणं कुरुथ व्याप्नुथ । ᵛततः अनन्तरमेव ᵛयक्ष्मं व्याधिं ᵛविबाधध्वे तस्मादङ्गपर्वसमुदायात् व्याध्यपगमं कुरुध्वम् । तत्र दृष्टान्तः – ᵛउग्रः उद्गूर्णबलः क्षत्रियः ᵛमध्यमशीरिव । मध्यमं मर्मभागं शृणाति विध्यति हिनस्तीति मध्यमशीः मर्मघातकः सन् यथा शत्रून् बाधते एवमोषधयो यूयमपि रोगिणो रोगं बाधध्वमित्यर्थः ॥१२॥

5. P1 °दशः for °दशी
8. P1 after ग्रहणात् ins. जीवो गृह्यते यस्येति जीवगृभः । भत्वं छान्दसम् ।
14. H2-3 om. यथा
24. P1 om. मर्म°

ओषधिवापमन्त्राः]

आ – 'यस्यौषधीः' इति । [v]यस्य रोगिणः [v]अङ्गमङ्गं सर्वाणि अङ्गानि [v]परुष्परुः । परुशब्दः पर्ववचनः । रोगिणः शरीरस्य सर्वाणि पर्वाणि च । [v]ओषधीः हे ओषधयः, [v]प्रसर्पथ प्रगच्छथ व्याप्नुथ । [v]ततः अनन्तरमेव [v]यक्ष्मं व्याधिं [v]विबाधध्वे, ततः तस्मादङ्गपर्वसमुदायात् व्याध्यपगमं कुरुध्वम् । कथमिव ? 'उग्रो मध्यमशीरिव'। [v]उग्रः क्षत्रियः बद्धगोधाङ्गुलित्राणः । मध्यमं भागं शृणाति विध्यति हिनस्तीति मध्यमशीः मर्मघातकः यथा शत्रुं बाधते एवम् ओषधयो यूयमपि रोगिणो रोगं बाधध्वम् इत्युपमार्थः । यद्वा– उग्रः रुद्रः स एव त्रिशूलमध्यमेन शृणातीति [v]मध्यमशीरिव, यथा युगान्ते सर्वं जगत् भस्मसात् करोति एवं यूयमपि व्याधिं भस्मसात् कुरुध्वमित्यर्थः ॥१२॥

साकं यक्ष्म प्र पत चाषेण किकिदीविना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥१३॥

साकम् । यक्ष्म । प्र । पत । चाषेण । किकिदीविना ।
साकम् । वातस्य । ध्राज्या । साकम् । नश्य । निहाकयेति निऽहाकया ॥ यिं ॥१३॥

सा – अथ त्रयोदशी – 'साकं यक्ष्म प्र पत चाषेण किकिदीविना । साकं वातस्य ध्राज्या साकं नश्य निहाकया' इति । श्लेष्मावरुद्धकण्ठजन्यध्वनेरनुकरणार्थोऽयं किकिशब्दः । किकिना ध्वनिविशेषेण दीव्यति व्यवहरतीति रोगविशेषः किकिदीविः, स च श्लेष्मजन्यः । चाषः कश्चित् पक्षिविशेषस्तद्वत्तीव्रत्वात् पित्तजन्यो रोगश्चाषः । हे [v]यक्ष्म राजयक्ष्मादिरोग, त्वं श्लेष्मजन्येन पित्तजन्येन च बाधेन [v]साकं [v]प्रपत प्रकर्षेण नष्टो भव । तथा [v]वातस्य [v]ध्राज्या वातरोगस्य गत्या व्याध्या सह [v]नश्य नष्टो भव । तथा यया पीडया निहतोऽस्मि हा कष्टमिति शब्दं करोति सा निहाका । तया [v]साकं नश्य नष्टो भव ॥१३॥

आ – 'साकं यक्ष्म' इति । [v]साकं सह हे [v]यक्ष्म । किकीत्येवं शब्दानुकारं कुर्वन् यो दीव्यति देवनं करोति विहरति स किकिदीविः पक्षी । तेन [v]किकिदीविना [v]चाषेण पक्षिणा साकं सह [v]प्रपत निपत । आशुपतनार्थं चाषेण साकमित्यभिहितम् । 'साकं वातस्य ध्राज्या'। वायोर्गत्या सह वेगेन प्रपत । प्रपत्य च [v]साकं [v]नश्य [v]निहाकया । निहन्ति कायमिति

4. B1 H2–3 व्याध्युपगमं for व्याध्यपगमं
5. B1 om. भागं
6. H3 उपमानार्थः for उपमार्थः
7. H3 गृह्णातीति for शृणातीति
19. H3 om. साकं यक्ष्मेति
20. B1 देवनेन for देवनं करोति

निहाका निर्गतिः कृच्छ्रापतिः । तया कृच्छ्रापत्त्या सह नश्य, हे यक्ष्म, नष्टो भव । यद्वा — शब्दानुकरणमेतत् । हा हा कष्टं निहतोऽहं कया ओषध्या ? एवंरूपया शब्दानुकरणभक्त्या सह हे यक्ष्म नश्य ॥१३॥

अन्या वो अन्यामवत्वन्याऽन्यस्या उपावत ।
ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥१४॥

अन्या । वः । अन्याम् । अवतु । अन्या । अन्यस्याः । उप । अवत ।
ताः । सर्वाः । संविदाना इति सम्ऽविदानाः ।
इदम् । मे । प्र । अवत । वचः ॥ क्रं ॥१४॥

सा — अथ चतुर्दशी — 'अन्या वो अन्यामवत्वन्याऽन्यस्या उपावत । ताः सर्वाः संविदाना इदं मे प्रावता वचः' इति । हे ओषधयः, वः युष्माकं मध्ये अन्या काचिदोषधिव्यक्तिः अन्याम् इतरामोषधिव्यक्तिम् अवतु । तथा रक्षिता सा अन्या अन्यस्याः रक्षितायाः उपावत समीपमागत्य तामप्यवतु । वचनव्यत्ययश्छान्दसः । संहत्यकारित्वात् परस्पररक्षकत्वमुचितम् । ताः सर्वाः तथाविधा ओषधयो यूयं संविदानाः परस्परमैकमत्यं गताः सत्यः मे मदीयम् इदं वचः वाक्यं प्रार्थनारूपं प्रावत प्रकर्षेण रक्षत ॥१४॥

आ — 'अन्या वः' इति । वः युष्मान् ओषधीः हे अन्या हे ओषधयः, उपावत । अन्यपक्षेऽपि विशेषमाह— 'अन्यामवत्वन्याऽन्यस्याः' । अन्यस्याः प्रभाववत्याः ओषध्याः अन्यां शक्तिं प्रभावं सामर्थ्यम् अन्या काचिदोषधिः अवतु रक्षतु । एवं च सति ताः सर्वाः ओषधयो यूयं संविदानाः संगम्यमानाः परस्परं संवादं कुर्वाणाश्च । 'इदं मे प्रावता वचः' । मे इदम् उपलभ्यमानं वचः आर्षं वचः वचनं वाक्यं यूयं प्रावत इति संबन्धः ॥१४॥

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥१५॥

याः । फलिनीः । अफलाः । अपुष्पाः । याः । च । पुष्पिणीः ।
बृहस्पतिप्रसूता इति बृहस्पतिऽप्रसूताः । ताः । नः । मुञ्चन्तु । अंहसः ॥ ङिं ॥१५॥

2. H3 after °करणम् ins. हि
12. S2 om. वचन° ..... छान्दसः
19. S2 om. वाक्यं यूयं

ओषधिवापमन्त्राः]

सा – अथ पञ्चदशी – ‘ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ’ इति । ᵛयाः ओषधयः ᵛफलिनीः फलिन्यः फलयुक्ताः ᵛयाः च ᵛअफलाः फलरहिताः याः च ᵛअपुष्पाः पुष्परहिताः ᵛयाः ᵛच ᵛपुष्पिणीः पुष्पयुक्ताः, ᵛताः सर्वाः ᵛबृहस्पतिप्रसूताः बृहस्पतिना प्रेरिताः सत्यः ᵛनः अस्मान् ᵛअंहसः पापात् ᵛमुञ्चन्तु मोचयन्तु । एवमोषधिवापार्थानि पञ्च तृचानि आम्नातानि ॥१५॥

आ – ᵛयाः ᵛफलिनीः या ओषधयः फलिन्यः फलवत्यः । ᵛयाः ओषधयः ᵛअफलाः फलरहिताः । ᵛअपुष्पाः पुष्परहिताश्च । ᵛयाः ᵛच ᵛपुष्पिणीः पुष्पिण्यः पुष्पवत्यः । ᵛबृहस्पतिप्रसूताः । बृहतो ब्रह्मणो देवस्य पत्या श्रीभगवता प्रसूताः अभ्यनुज्ञाताः ओषधयः ᵛनः अस्मान् ᵛअंहसः पापात् ᵛमुञ्चन्तु । एवमोषधिवापार्थानि पञ्च तृचान्याम्नातानि ॥१५॥

मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ।
अथो यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिषात् ॥१६॥

मुञ्चन्तु । मा । शपथ्यात् । अथो इत्यथो । वरुण्यात् । उत ।
अथो इत्यथो । यमस्य । पड्वीशात् ।
सर्वस्मात् । देवकिल्बिषादिति देवऽकिल्बिषात् ॥ लं ॥१६॥

सा – अथ अत्रैव विकल्पिता दशर्च आम्नायन्ते । अथ (तत्र ?) प्रथमा – ‘ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत । अथो यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिषात् ’ इति । ᵛशपथ्यात् । शपथे भवं शपथ्यम् । तस्मात् किल्बिषात् मामोषधयः ᵛमुञ्चन्तु । ᵛअथो अपि च ᵛवरुण्यात् । वरुणे भवं वरुण्यम् । वरुणापराधनिमित्तात् पापात् मां मुञ्चन्तु । ᵛउत अपि च ᵛयमस्य संबन्धिनः ᵛपड्वीशात् । पड्वीशशब्दोऽत्र बन्धनवाची, बन्धननिमित्तात् पापात् मां मुञ्चन्तु । ᵛअथो अपि च ᵛसर्वस्मात् ᵛदेवकिल्बिषात् देवतापराधनिमित्तात् पापान्मां मुञ्चन्तु ॥१६॥

आ – इत उत्तरमनारभ्याधीताः । ‘ मुञ्चन्तु मा शपथ्यात् ’ इत्यादयो दश मन्त्राः । तेषां लिङ्गतो विनियोगो ज्ञातव्यः । ‘ मुञ्चन्तु मा शपथ्यात् ’ । शपथे भवः शपथ्यः । तस्मात् ᵛशपथ्यात् शपथनिमित्तात् किल्बिषात् ओषधयः ᵛमा मां ᵛमुञ्चन्तु । ᵛअथो अपि च ᵛवरुण्यात् । वरुणे भवो वरुण्यः । तस्मात् वरुण्यात् वरुणनिबन्धनात् किल्बिषात् मां मुञ्चन्तु । ᵛउत अपि च ᵛयमस्य । यमयति सर्वं जगन्नियमयतीति यमः । तस्य यमस्य संबन्धिनः । ᵛपड्वीशात् । पड्वीशशब्दो बन्धनवचनः । बन्धनात् बन्धननिमित्तकिल्बिषात् मां मुञ्चन्तु । ᵛअथो अपि च ᵛदेवकिल्बिषात् देवतापराधनिमित्तात् किल्बिषात् मा मुञ्चन्तु । किं वात्र बहुनोक्तेन ᵛसर्वस्मात् किल्बिषात् ब्रह्महत्यादिपापात् मा मां मुञ्चन्तु ॥१६॥

3. H3 om. ताः
8. B1 before बृहस्पति° adds हे; H2–3 बृहस्पतेः for बृहतो; B1 om. अभ्यनुज्ञाताः
26. H3 om. मां मुञ्चन्तु । अथो ... °देवकिल्बिषात् (L 27)

अवयतीः समवदन्त दिव ओषधयस्परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ।।१७।।

अवयतीरित्यवऽयतीः । सम् । अवदन्त । दिवः । ओषधयः । परि ।
यम् । जीवम् । अश्नवामहै ।
न । सः । रिष्याति । पूरुषः । पुरुष इति पुरुषः ॥ त्रीं ॥१७॥

सा – अथ द्वितीया – 'अवयतीः समवदन्त दिव ओषधयस्परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः' इति । द्युलोकात् पतन्तो वृष्टिबिन्दव ओषधिरूपेणोत्पद्यन्ते । तथा च तैत्तिरीयेऽग्निहोत्रब्राह्मणे समाम्नायते – "यावन्तः स्तोका अवापद्यन्त । तावतीरोषधयोऽजायन्त" (तैब्रा २.१.१.१) इति । अतोऽत्रापि दिवः परि स्वर्गस्योपरितनप्रदेशात् अवयतीः अवयत्यः अधस्तात् भूमौ पतन्त्यः ओषधयः समवदन्त परस्परं सम्यगेतद्वचनमुक्तवत्यः । कीदृशं वचनमिति तदुच्यते– यं जीवं प्राणिनम् अश्नवामहै व्याप्नुमः सः पूरुषः न रिष्याति नैव विनश्यतीति ॥१७॥

आ – 'अवयतीः' इति । अवपूर्वस्येतेः रूपम् अवयतीः इति । दिवः द्युलोकात् अवाचीनं पतन्त्यः अवयत्यः ओषधयः परि समवदन्त । परितः सर्वतः परस्परं संवादं कुर्वन्ति । किमिति ? यं जीवं प्राणिनं वयम् अश्नवामहै । अशू व्याप्तौ । व्याप्नुमः । सः पूरुषः न रिष्याति । दीर्घश्छान्दसः । न रिष्यति न विनश्यति ॥१७॥

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
तासामसि त्वमुत्तमाऽरं कामाय शꣳ हृदे ।।१८।।

याः । ओषधीः । सोमराज्ञीरिति सोमऽराज्ञीः ।
बह्वीः । शतविचक्षणा इति शतऽविचक्षणाः ।
तासाम् । असि । त्वम् । उत्तमेत्युत्ऽतमा । अरम् । कामाय । शम् । हृदे ॥ णीं ॥१८॥

सा – अथ तृतीया – 'या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः । तासामसि त्वमुत्तमाऽरं कामाय शꣳ हृदे' इति । सोमराज्ञीः । सोमो राजा यासां ताः सोमराज्यः । बह्वीः बह्व्यः अनेकप्रकाराः शतविचक्षणाः । एवंभूताः याः ओषधीः ओषध्यः (धयः ?) सन्ति, तासाम् ओषधीनां मध्ये हे ओषधीः, उत्तमा उत्कृष्टा त्वं कामाय अरम् अलं समर्था असि । ततः हृदे हृदयाय शं सुखकारिणी भवेति शेषः ॥१८॥

12. B1 om. अवपूर्वस्य° ... अवयतीरिति; H2–3 त्रिबन्धरूपं for रूपम्
13. B1 अवयन्त्यः for अवयत्यः
14. H2–3 [अ] कुर्वन् for कुर्वन्ति; H2–3 om. किमिति
22. S2 om. अनेकप्रकाराः

ओषधिवापमन्त्राः]

आ – [' या ओषधीः ' इति ।] vयाः vओषधीः या ओषधयः vसोमराज्ञीः । सोमो राजा यासामोषधीनां ताः सोमराज्ञ्यः । vबह्वीः बह्व्यः अनन्ताः । vशतविचक्षणाः । शतमिति शतधा वा विचक्ष्यन्ते प्रोच्यन्त इति शतविचक्षणाः । vतासाम् ओषधीनां मध्ये यतः vत्वम् vउत्तमा उत्कृष्टा vअसि । अतः vकामाय vअरम् अलं समर्था भव काम्यमानफलसाधनाय त्वं फलसाधिका भव । तत्रापि vहृदे हृदयाय vशं सुखम् अलं समर्थम् ॥१८॥

या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।
बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यम् ॥१९॥

विष्ठिताः । विस्थिता इति विऽस्थिताः । पृथिवीम् । अनु ।
बृहस्पतिप्रसूता इति बृहस्पतिऽप्रसूताः । अस्यै । सम् । दत्त । वीर्यम् ॥ जौ ॥१९॥

सा – अथ चतुर्थी – ' या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु । बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यम् ' इति । vपृथिवीम् vअनु vविष्ठिताः vबृहस्पतिप्रसूताः बृहस्पतिना प्रेरिताः सोमराज्ञ्यः vयाः ओषधयो यूयम् vअस्यै पृथिव्यै vवीर्यं सामर्थ्यं vसंदत्त सम्यक् प्रयच्छत ॥१९॥

आ – vयाः vओषधीः vसोमराज्ञीः हे सोमराज्ञ्यः । vविष्ठिताः vपृथिवीम् vअनु, विष्ठिताः विविधं स्थिता अनुपविष्टा वा । vताः यूयं vबृहस्पतिप्रसूताः vअस्यै पृथिव्यै vवीर्यं युष्मत्सामर्थ्यं vसंदत्त । इयमपि भूर्वीर्यवती भविष्यतीति ॥१९॥

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।
सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यम् ॥२०॥

याः । च । इदम् । उपशृण्वन्तीत्युपऽशृण्वन्ति । याः । च । दूरम् । परागता इति पराऽगताः ।
सर्वाः । संगत्येति सम्ऽगत्य । वीरुधः । अस्यै । सम् । दत्त । वीर्यम् ॥ णूं ॥२०॥

सा – अथ पञ्चमी – ' याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः । सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यम् ' इति । vयाः vच ओषधिदेवताः vइदं मदीयं प्रार्थनं समीपस्थाः सत्यः vउपशृण्वन्ति, vयाः vच अन्या ओषधिदेवता vदूरं यथा vपरागताः व्यवहिताः सत्यः ईषच्छृण्वन्ति । हे vवीरुधः लतारूपाः vसर्वाः ओषधयः, यूयं vसंगत्य संगता भूत्वा vअस्यै पृथिव्यै vवीर्यं सामर्थ्यं सम्यक् vदत्त ॥२०॥

---

23. P1 om. सर्वाः; S2 पृथग् for सम्यग्

आ – ' याश्च ' इति । vयाः vच समीपस्था ओषधयः vइदं वचनम् vउपशृण्वन्ति, vयाः vच ओषधयः vदूरं vपरागताः व्यवहितदेशस्थाः, ताः vसर्वाः ओषधयः संनिधीकृत्य vसंगत्य संभूय च हे vवीरुधः, vअस्यै ओषध्यै पृथिव्यै च vवीर्यं प्रभावं vसंदत्त ॥२०॥

नाशयित्री बलासस्यार्शस उपचितामसि ।
अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ॥२१॥

नाशयित्री । बलासस्य । अर्शसः । उपचितामित्युपऽचिताम् । असि ।
अथो इत्यथो । शतस्य । यक्ष्माणाम् । पाकारोरिति पाकऽअरोः । असि । नाशनी ॥
॥ ठां ॥२१॥

सा – अथ षष्ठी – ' नाशयित्री बलासस्यार्शस उपचितामसि । अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ' इति । हे ओषधी, त्वं vबलासस्य । बलमस्यति क्षिपतीति बलासस्तस्य । vअर्शसः मूलव्याधेः vनाशयित्री vअसि । किं च vउपचितां शरीरे उपचीयन्तेऽन्ये ये रोगास्ते उपचितस्तेषाम् अपि नाशयित्र्यसि । vअथो अपि च vशतस्य vयक्ष्माणां व्याधीनां शतस्यापि vनाशनी त्वम् vअसि । vपाकारोः क्षयव्याधेरपि नाशनी त्वमसि ॥२१॥

आ – ' नाशयित्री बलासस्य ' इति । अस्यति क्षिपतीति बलासः बलक्षयः, तस्य vबलासस्य vअर्शसः । ऋशतिर्हिंसार्थः । तस्य मूलव्याधेः vनाशयित्री । vउपचिताम् । शरीरे ये रोगाः श्वयथुप्रभृतय उपचीयन्त इत्युपचितस्तेषामुपचितां नाशयित्री vअसि । vअथो vशतस्य vयक्ष्माणां बहुव्याधीनां शतस्यापि vनाशनी त्वम् vअसि । vपाकारोः क्षयव्याधेः । पाकस्य भुक्तपीतान्नादिपाकस्य । रु हिंसायाम् । अरुर्हिंसनशीलः पाकारुः । तस्य पाकारोः नाशनी त्वम् असि । यद्वा– रुच दीप्तौ । अरुर्दीप्तिर्मन्दाग्निः । तस्य नाशनी त्वमसि ॥२१॥

मा वो रिषत् खनिता यस्मै चाहं खनामि वः ।
द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् ॥२२॥

---

10. S2 बलमस्य निक्षिपति for बलमस्यति क्षिपति

12. P1 after त्वमसि । ins. अरुः क्षतमुच्यते । मुखपाकक्षतस्य नाशनी । यद्वा – रुच दीप्तौ । अन्नपाकस्य अरुचिररुः । पृषोदरत्वाच्चकारलोपः । मन्दाग्नित्वम् । तस्य नाशनीत्यर्थः इति भाष्यान्तरम्

15. B1 तस्याः for तस्य; H2–3 मुख° for मूल°

17. H2–3 अरुर्दीप्तिनाशयित्री for नाशनी

19. B1 after तस्य ins. अपि

ओषधिवापमन्त्राः]

मा । वः । रिषत् । खनिता । यस्मै । च । अहम् । खनामि । वः ।
द्विपदिति द्विऽपत् । चतुष्पत् । चतुःपदिति चतुःऽपत् । अस्माकम् ।
सर्वम् । अस्तु । अनातुरम् ॥ इज्जै ॥२२॥

सा – अथ सप्तमी – 'मा वो रिषत् खनिता यस्मै चाहं खनामि वः । द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम्' इति । हे ओषधयः, ˅वः युष्माकं ˅खनिता चिकित्सायै युष्मदीयमूलं ग्रहीतुं खननस्य कर्ता ˅मा ˅रिषत् मा विनश्यतु । ˅अहं ˅च ˅यस्मै रुग्णाय चिकित्सार्थं ˅वः ˅खनामि युष्मन्मूलं ग्रहीतुं खननं करोमि सोऽहमपि मा विनश्यामि । किं बहुना ˅अस्माकं संबन्धि ˅द्विपत् ˅चतुष्पत् वा प्राणिजातं युष्मानुपजीवति तत् ˅सर्वम् ˅अनातुरम् ˅अस्तु ॥२२॥

आ – 'मा वः' इति । रिष हिंसायाम् । ˅वः युष्माकं ˅खनिता मूलखननकर्ता युष्मान् ˅मा ˅रिषत् मा हिंसीत् । ˅यस्मै पुरुषाय ˅वः युष्मान् ˅अहं ˅खनामि । तत्रापि विशेषमाह– ˅द्विपत् द्विपदर्थं ˅चतुष्पत् चतुष्पदर्थम् ˅अस्माकं संबन्धि यद्यद् उद्दिश्य वो युष्मान् खनामि तत्तत् ˅सर्वम् ˅अनातुरम् । आतुरो व्याधिः । तद्रहितमनातुरम् अनाकुलं वा ˅अस्तु भवतु ॥२२॥

ओषधयः सं वदन्ते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥२३॥

ओषधयः । सम् । वदन्ते । सोमेन । सह । राज्ञा ।
यस्मै । कृणोति । ब्राह्मणः । तम् । राजन् । पारयामसि ॥ छ्रिच ॥२३॥

सा – अथाष्टमी – 'ओषधयः सं वदन्ते सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि' इति । ˅ओषधयः ओषधिदेवताः स्वकीयेन स्वामिना ˅सोमेन ˅राज्ञा ˅सह ˅संवदन्ते संवादं कुर्वन्ति । कथं संवाद इत्युच्यते– ˅यस्मै रुग्णाय चिकित्सामस्मदीयमूलादिना ˅ब्राह्मणः ˅कृणोति करोति । हे ˅राजन्, ˅तम् आतुरं ˅पारयामसि वयं पारयामः, तं व्याधेरुत्तारयामः ॥२३॥

आ – 'ओषधयः संवदन्ते' इति । ˅सोमेन ˅राज्ञा ˅सह ˅ओषधयः ˅संवदन्ते संवादं कृतवत्यः । ˅यस्मै पुरुषाय ˅ब्राह्मणः भिषक् भैषज्यं ˅कृणोति, हे ˅राजन् हे सोम, ˅तम् आतुरं ˅पारयामसि । इकारश्छान्दसः । पारयामः । व्याधेः उत्तारयामः ॥२३॥

10.　H3 हिंसत् for हिंसीत्

त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ॥२४॥

त्वाम् । गन्धर्वाः । अखनन् । त्वाम् । इन्द्रः । त्वाम् । बृहस्पतिः ।
त्वाम् । ओषधे । सोमः । राजा । विद्वान् । यक्ष्मात् । अमुच्यत ॥ ह्लुं ॥२४॥

सा – अथ नवमी – 'त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ' इति । हे ᵛओषधे, ᵛत्वां ᵛगन्धर्वाः स्वापेक्षितकार्यसिद्ध्यर्थम् ᵛअखनन् खननमकुर्वन् । ᵛत्वाम् ᵛइन्द्रः अप्यखनत्, तथा ᵛबृहस्पतिः च अखनत् । ᵛविद्वान् ओषधिसामर्थ्यं जानन् ᵛसोमः ᵛराजा ᵛत्वाम् अखनत् । अतस्त्वामयमुपभुज्य ᵛयक्ष्मात् रोगात् ᵛअमुच्यत मुक्तोऽभवत् ॥२४॥

आ – 'त्वां गन्धर्वाः ' इति । ᵛत्वाम् ओषधिं ᵛगन्धर्वाः ᵛअखनन् । स्वापेक्षित-कार्यसिद्ध्यर्थम् ᵛइन्द्रः अपि ᵛत्वाम् अखनत् । ᵛबृहस्पतिः ᵛत्वाम् अखनत् । हे ᵛओषधे, ᵛत्वां ᵛसोमः ᵛराजा चन्द्रमाः पदार्थानां साध्यासाध्यसाधनभावम् ओषधिसामर्थ्यं च ᵛविद्वान् जानन् त्वाम् अखनत् । हे ओषधे, सोमः त्वाम् उपभुज्य ᵛयक्ष्मात् व्याधेः ᵛअमुच्यत मुक्तोऽभवत् ॥२४॥

त्वमुत्तमाऽस्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सोऽस्माकं यो अस्माँ३ अभिदासति ॥२५॥(६)॥

त्वम् । उत्तमेत्युत्ऽतमा । असि । ओषधे । तव । वृक्षाः । उपस्तयः ।
उपस्तिः । अस्तु । सः । अस्माकम् । यः । अस्मान् । अभिदासतीत्यभिऽदासति ।
॥ न्तुं ॥२५॥(६)॥

सा – अथ दशमी – 'त्वमुत्तमाऽस्योषधे तव वृक्षा उपस्तयः । उपस्तिरस्तु सोऽस्माकं यो अस्माँ३ अभिदासति ' इति । हे ᵛओषधे, लतारूपे ᵛत्वम् ᵛउत्तमा उत्कृष्टा ᵛअसि । ᵛतव ᵛवृक्षाः ᵛउपस्तयः त्वदीयबाधापरिहारार्थम् उपस्थिता भवन्तु । ᵛयः ᵛअस्मान् ᵛअभिदासति । दसु उपक्षये । अभिहन्ति, ᵛसः पुरुषः ᵛअस्माकम् ᵛउपस्तिः ᵛअस्तु अस्मदुपद्रवपरिहारायोपस्थितो भवतु ॥२५॥

[इति त्रयोदशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

---

8. P1 om. अयम्; S2 संभुज्य for उपभुज्य
11. B1 पदार्थं for पदार्थानां; H3 om. °असाध्य°; B1 औषधी° for ओषधि°
20. S2 om. लतारूपे; S2 चूतादयः for तव वृक्षाः
21. S2 वृक्षाः तिष्ठन्तीति उपस्तयो for उपस्थिताः; S2 om. दसु उपक्षये
22. S2 स्थिरो for °उपस्थितो

लोकेष्टकोपधानमन्त्राः]

आ – 'त्वमुत्तमाऽसि' इति। जात्यभिप्रायेणैकवचनम्। हे ओषधे, त्वम् उत्तमा उत्कृष्टा असि। तव वृक्षाः चूतादयः उपस्तयः भवन्तु। ओषधीनामुपकाराय वृक्षास्तिष्ठन्तीति उपस्तवो वृक्षाः। तत्र ह्योषधयः प्रसर्पन्ति। अतस्तव वृक्षाः भोग्या भवन्ति। यथा तवैते वृक्षा उपस्तय एवं त्वत्प्रसादात् 'उपस्तिरस्तु सोऽस्माकं यो अस्माꣳ अभिदासति'। दसु उपक्षये। यः पुरुषः अस्मान् अभिदासति आभिहन्ति सः एव पुरुषः त्वत्प्रसादात् अस्माकम् उपस्तिः अस्तु अस्मदुपकाराय अस्मदनुविधायी तिष्ठत्विति संबन्धः ॥२५॥

[इति त्रयोदशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

[अथ सप्तमोऽनुवाकः।]

षष्ठेऽनुवाके ओषधिवापोऽभिहितः। अथ सप्तमे लोकेष्टकोपधानादिमन्त्रा उच्यन्ते ॥

मा मा हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा व्यानट्।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम ॥१॥

मा। मा। हिꣳसीत्। जनिता। यः। पृथिव्याः।
यः। वा। दिवम्। सत्यधर्मेति सत्यऽधर्मा। वि। आनट्।
यः। च। अपः। चन्द्राः। प्रथमः। जजान।
कस्मै। देवाय। हविषा। विधेम ॥ द्विनः ॥१॥

कात्यायनः – "मा मा हिꣳसीदिति प्रत्यृचं प्रतिदिशम्" (काश्रौ १७·३·११) इति। 'मा मा हिꣳसीत्' इत्यादिभिश्चतसृभिर्ऋग्भिः पूर्वादिदिक्क्रमेण लोकेष्टकासंज्ञका लोकरूपा इष्टका उपदध्यादिति शेषः। तत्र प्रथमा – 'मा मा हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा व्यानट्। यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम' इति। यः प्रजापतिः पृथिव्याः जनिता उत्पादकः, यः वा प्रजापतिः सत्यधर्मा अवितथधारणशक्तिः सन् दिवं द्युलोकं व्यानट् व्याप्तवान्। पुनरपि यः प्रजापतिः प्रथमः मुख्यः सन् चन्द्राः आह्लादकारिणीः अपः उदकानि जजान उत्पादयामास। तादृशाय कस्मै प्रजापतये देवाय हविषा विधेम वयं परिचरेम। एवंभूतः प्रजापतिः मा मा हिꣳसीत् हिंसां मा करोतु ॥१॥

---

2. H2–3 om. चूतादयः
3. H2–3 om. यथा तवैते ... अभिदासति (L 4)
17. S2 °देह° for °दिक्°
20. P1 after व्याप्तवान् ins. व्यानडिति व्याप्तिकर्मा

आ – चतस्रो लोकेष्टकाश्चतसृभिर्ऋग्भिरुपदधाति – 'मा मा हिꣳसीत्' इति। ऋषिर्हिरण्यगर्भः। कायी प्राजापत्या त्रिष्टुप्। 'मा मा हिꣳसीज्जनिता यः पृथिव्याः' इति। vपृथिव्याः भूमेः vयः प्रजापतिः vजनिता। 'यो वा दिवं सत्यधर्मा व्यानट्'। वाशब्दः समुच्चयार्थः। vयः vसत्यधर्मा। सत्यं धारयतीति धत्त इति वा सत्यधर्मा प्रजापतिः। vदिवं द्युलोकं vव्यानट्। वि पूर्वस्य व्याप्तिकर्मणोऽश्नोतेः रूपम्। व्यानट् इति श्रुत्या तु सृजत्यर्थे व्याख्यातः। असृजत्। दिवं द्युलोकं व्यानट् सृष्टवान्। 'यश्चापश्चन्द्राः'। वचनव्यत्ययः। चन्द्र इति। चायनीयो दर्शनीयः स्वयं vप्रथमः आद्यः प्रजापतिः। vअपः मनुष्यान् vजजान असृजत। यद्वा– सर्वजगद्बीजभूतानि भूतसूक्ष्माण्याप उच्यन्ते। "आप एवेदमग्र आसुः (बृउ ५.५.१) इति श्रुतेः। एवंगुणविशिष्टो यः प्रजापतिस्तस्मै vकस्मै प्रजापतये vदेवाय देवनादिगुणवते vहविषा पयःप्रभृत्युपलक्षितेनेति। vविधेम इत्यस्य कर्मसापेक्षत्वात् हविर्विधेम। इममेवार्थमाह ब्राह्मणं– "मा मा हिꣳसीज्जनिता यः पृथिव्या इति प्रजापतिर्वै पृथिव्यै जनिता" (शब्रा ७.३.१.२०) इत्यादि। एवंभूतः प्रजापतिः vमा vमा vहिꣳसीत् मा हन्यादिति संबन्धः ॥१॥

अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह।
वपां ते अग्निरिषितो अरोहत् ॥२॥

अभि। आ। वर्तस्व। पृथिवि। यज्ञेन। पयसा। सह।
वपाम्। ते। अग्निः। इषितः। अरोहत् ॥ षिं ॥२॥

सा – अथ द्वितीया – अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह। वपां ते अग्निरिषितो vअरोहत् इति। हे vपृथिवि, vयज्ञेन आघ्रातव्येन vपयसा च तत्फलभूतेन vसह vअभ्यावर्तस्व अस्मदभिमुखेनागच्छ। vइषितः इच्छावान् vअग्निः vते vवपां त्वदीयं वपासदृशमिमं प्रदेशम् vअरोहत् आरोहतु स्वीकरोतु ॥२॥

---

3. B1 om. प्रजापतिः ... समुच्चयार्थः। (L 4)

5. B1 व्याङ्पूर्वस्य व्याप्तिकर्मणाशेन रूपम्। व्या[न]ट् इति। श्रुत्या तु सृज्यर्थे; H2-3 व्यानट् [ ] पूर्वस्य व्याप्तिकर्मणोऽश्ने रूपम्। श्रुत्या (H3 श्रुतवा) तु सृज्यर्थे व्याख्यातः for व्यानट्। विपूर्वस्य व्याप्तिकर्मणोऽश्नोतेः रूपम्। व्यानट् इति। श्रुत्या तु सृजत्यर्थे व्याख्यातः।

6. H2-3 चन्द्रमा for चन्द्र

9. B1 °विशेषो for °विशिष्टो

लोकेष्टकोपधानमन्त्राः]

आ – दक्षिणत उपदधाति – ‘ अभ्यावर्तस्व ’ इति । आग्नेयी गायत्री । हे vपृथिवि, vपयसा vसह हविर्भूतेन पयसा च सह स्थितेन vयज्ञेन vअभ्यावर्तस्व । ‘ वपां ते अग्निरिषितो अरोहत् ’ । अस्याम् vइषितः अभिरुचितिः(तः ?) उपादीप्तः vअग्निः vते तुभ्यं vवपाम् आहुतिम् vअरोहत् स्वीकरोति ॥२॥

अग्ने॒ यत् ते॑ शु॒क्रं यच्च॒न्द्रं यत् पू॒तं यच्च॑ य॒ज्ञिय॑म् ।
तद्दे॒वेभ्यो॑ भरामसि ॥३॥

अग्ने॑ । यत् । ते॒ । शु॒क्रम् । च॒न्द्रम् । पू॒तम् । च॒ । य॒ज्ञिय॑म् ।
तत् । दे॒वेभ्य॑ः । भ॒रा॒म॒सि॒ ॥ शां ॥३॥

सा – अथ तृतीया – ‘अग्ने यत् ते शुक्रं यच्चन्द्रं यत् पूतं यच्च यज्ञियम् । तद्देवेभ्यो भरामसि ’ इति । हे vअग्ने, vयत् vते त्वदीयमङ्गं vशुक्रं दीप्तिमत्, vयत् च अन्यदङ्गं vचन्द्रम् आह्लादकरं, vयत् अप्यन्यदङ्गं vपूतं पवित्रं, vयत् vच अप्यन्यदङ्गं vयज्ञियं यज्ञार्हं vतत् सर्वं लोष्टरूपं vदेवेभ्यः देवानामर्थे vभरामसि संपादयामः ॥३॥

आ – पश्चादुपदधाति – ‘ अग्ने यत् ते ’ इति । आग्नेयी गायत्री । हे श्रीभगवन् vअग्ने, vयत् vते तव vशुक्रं तारं, शुक्रं सारम्, शुक्रं वा शुद्धं, vयत् च vचन्द्रम् आह्लादनीयं vयत् vपूतं पवित्रं vयत् vच vयज्ञियं यज्ञार्हं vतत् तत् सर्वं vदेवेभ्यः अर्थाय देवेभ्यः सकाशात् वा vभरामसि । इकारश्छान्दसः । भरामः संभरामः ॥३॥

इ॒षमू॒र्जम॒हमि॒त आद॑मृ॒तस्य॒ योनिं॑ महि॒षस्य॒ धारा॑म् ।
आ मा॒ गोषु॑ विश॒त्वा त॒नूषु॒ जहा॑मि से॒दिमनि॑रा॒ममी॑वाम् ॥४॥

इष॑म् । ऊर्ज॑म् । अ॒हम् । इ॒तः । आद॑म् । ऋ॒तस्य॑ । योनि॑म् । म॒हि॒षस्य॑ । धारा॑म् ।
आ । मा॒ । गोषु॑ । वि॒श॒तु॒ । आ । त॒नूषु॑ ।
जहा॑मि । से॒दिम् । अनि॑राम् । अमी॑वाम् ॥ शौं ॥४॥

2. B1 om. सह; B1 हविः स्थितेन for सह स्थितेन
3. H2–3 om. अभिरुचितिः
10. S2 त्वदङ्गं for first अङ्गं
11. S2 om. पूतं ... अङ्गं; P1 after भरामसि adds धारयाम
14. H2–3 after तव add यत्
16. H2–3 om. संभरामः

सा – अथ चतुर्थी – 'इषमूर्जमहमित आदमृतस्य योनिं महिषस्य धाराम् । आ मा गोषु विशत्वा तनूषु' इति । ऋतस्य यज्ञस्य योनिं स्थानं महिषस्य महतोऽग्नेः धारां धारणं च इषम् अन्नम् ऊर्जं रसं च इतः अस्मात् प्रदेशात् अहम् आदं स्वीकरोमि । एतत् मा माम् आविशतु आगत्य प्रविशतु । किं च– तनूषु मदीयपुत्रादिशरीरेषु [गोषु] मदीयगोषु च आविशतु ॥

कात्यायनः – "सिकताः प्रमार्ष्टुं जहामि सेदिमिति" (काश्रौ १७.२.१३) इति । तत्र स्थिता वालुकाः प्रमार्जयेत् । पाठस्तु – 'जहामि सेदिमनिराममीवाम्' इति । अनिराम् अन्नरहिताम् अमीवां रोगयुक्तां सेदिं सिकतारूपां भूमिं जहामि परित्यजामि ॥४॥

आ – उत्तरत उपदधाति – 'इषमूर्जम्' इति । त्रिष्टुप् यजमानाशीःप्रायो मन्त्रः । यत् इषम् अन्नं, यच्च ऊर्जं तदुपसेचनं दधिपयोघृतादिकम् । तदिषमूर्जं च इतः उदीच्या दिशः सकाशात् अहम् आदम् आददे गृहीतवानस्मि । 'ऋतस्य योनिं महिषस्य धाराम्' । ऋतस्य सत्यस्य योनिं स्थानं तिस्रो विद्याः कर्मदेवताकज्ञानविषयाः अहमाददे । महिषस्य अग्नेः धारां धारणाम् अहमाददे । 'आ मा गोषु विशत्वा तनूषु' । एतत् सर्वं मा माम् आविशतु । यद्वा– तनूषु पुत्रादिशरीरेषु गोषु मदीयगोषु च आविशतु । सिकताः प्रध्वंसयति – 'जहामि सेदिमनिराममीवाम्' । या सेदिः या अनिरा अमीवा तामुदीच्यां दिशि जहामि परित्यजामि । षिध गत्यामिति गमनशीला सेदिः सिकताख्या । ताम् अनिरां विरोधिनीम् अमीवां व्याधिं जहामीति संबन्धः ॥४॥

अग्ने तव श्रवो वयो महिं भ्राजन्ते अर्चयो विभावसो ।
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ॥५॥

अग्ने । तव । श्रवः । वयः । महि । भ्राजन्ते । अर्चयः । विभावसो इति विभाऽवसो ।
बृहद्भानो इति बृहत्ऽभानो । शवसा । वाजम् । उक्थ्यम् ।
दधासि । दाशुषे । कवे ॥ जूं ॥५॥

सा–कात्यायनः– "कुशस्तम्बेऽग्ने तवेति सिकता न्युप्य" (द्र० काश्रौ १७.२.१५) इति । कुशस्तम्बे 'अग्ने तव' इत्यादिभिः षड्भिर्ऋग्भिः सिकताः प्रक्षिपेदित्यर्थः । तत्र प्रथमा– 'अग्ने तव श्रवो वयो

---

2. S2 after तनूषु adds जहामि सेदिमनिराममीवामिति; S2 om. धारां
9. H2–3 om. first यत्; B1 इत् for second यत्; B1 यद् for second तद्; H3 तदियम् for तदिषम्
11. H3 °देवताकक्षानर° for °देवताकज्ञान°
15. B1 H2–3 षिधू for षिध
16. B1 इवाविरोधिनाम् for विरोधिनीम्

लोकेष्टकोपधानमन्त्राः]

महि भ्राजन्ते अर्चयो विभावसो । बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ' इति । वीयते प्राणिभिरद्यत इति वयोऽन्नम् । हे ˇअग्ने, ˇतव ˇश्रवः त्वदीयत्वेन श्रूयमाणं ˇवयः अन्नं ˇमहि महदस्ति । विभा दीप्तिरेव वसु धनं यस्यासौ विभावसुः । हे ˇविभावसो, ˇअर्चयः तव दीप्तयः ˇभ्राजन्ते दीप्यन्ते । बृहतो भानवो रश्मयो यस्यासौ बृहद्भानुः । कविर्विद्वान् यजमानाभिप्रायज्ञः । तादृश हे अग्ने, ˇदाशुषे हविर्दत्तवते यजमानाय ˇउक्थ्यं शस्त्राद्युपेतयज्ञयोग्यं ˇवाजम् अन्नं ˇशवसा त्वदीयेन बलेन ˇदधासि संपादयसि ॥५॥

आ– ' अग्ने तव ' इति षड्चेन सिकताः निवपति– ' अग्ने तव ' इति । ऋषिः पावकोऽग्निः । षड्चमाग्नेयम् । तत्र प्रथमे चास्तारपङ्क्ती । तिस्रः सतो बृहत्यः । षष्ठी उपरिष्टात् ज्योतिः । ' अग्ने तव श्रवो वयो महि ' । हे भगवन् ˇअग्ने, ˇतव संबन्धी ˇश्रवः धूमः अमुष्मिन् लोके । अग्निं श्रावयतीति श्रवः । ˇवयः अन्नम् । आहुतिपरिणामद्वारेण [तस्य] धूमनिमित्तत्वात् वयो धूम इत्युच्यते । ˇमहि [महि-]मा माहात्म्यम् । अयमग्नेर्महिमा । हे ˇविभावसो विभूतधन हे अग्ने, तव ˇअर्चयः अर्चींषि ˇभ्राजन्ते दीप्यन्ते । किं च– ' बृहद्भानो शवसा वाजमुक्थ्यम् ' । हे ˇबृहद्भानो महादीप्त हे ˇकवे क्रान्तदर्शन, ˇशवसा बलेन सहितम् ˇउक्थ्यम् उक्थार्हं ˇवाजम् अन्नं ˇदधासि ˇदाशुषे हवींषि दत्तवते यजमानाय ददासि ॥५॥

पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥६॥

पावकवर्चा इति पावकऽवर्चाः । शुक्रवर्चा इति शुक्रऽवर्चाः ।
अनूनवर्चा इत्यनूनऽवर्चाः । उत् । इयर्षि । भानुना ।
पुत्रः । मातरा । विचरन्निति विऽचरन् । उप । अवसि ।
पृणक्षि । रोदसी इति रोदसी । उभे इत्युभे ॥ ध्युं ॥६॥

1. S2 विज्यते for वीयते
5. P1 उक्थशस्त्राद्युपेतं for शस्त्राद्युपेत°
10. B1 द्वारे for °द्वारेण
11. B1 om. [महि-] मा
12. H3 विभृत° for विभूत°; H3 कक्षिः for अर्चींषि
13. H3 कान्तिदर्शिनः for क्रान्तदर्शन
14. B1 दधासि for ददासि
15. The Kumbhakoṇam edn. of Shivarama Shastri (1901, Grantha) and the Madras edn. of Bhagavatula Lakshmipati Shastri (1915, Telugu) read उदियर्षि for उदियक्षि. This verse is found in RV. (10.140.2); TS. (4.2.7.3); VS. (12.107) etc., but all read only उदयर्षि। Sātavalekar's edition reads उदियर्षि । A ms of Padapāṭha from Pandharpura reads उत् । इयर्षि ।

सा – अथ द्वितीया – 'पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना। पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे' इति । Vपावकवर्चाः शोधकदीप्तिः Vशुक्रवर्चाः निर्मलदीप्तिः Vअनूनवर्चाः अनल– (अनून ?)दीप्तिः । ईदृशस्त्वं Vभानुना भासा Vउदियर्षि उत्कर्षं गच्छसि। Vउभे Vरोदसी द्यावापृथिव्यौ Vविचरन् परिचरन् Vउपावसि समीपमागत्य रक्षसि । Vपृणक्षि च तयोः संपर्कमपि करोषि । परिचरणे दृष्टान्तः – Vपुत्रः [Vमातरा] मातापितरौ परिचरति तद्वत् ॥६॥

आ– 'पावकवर्चाः' इति । पावयति शोधयतीति पावकं वर्चः तेजो यस्य सः Vपावकवर्चाः पावकशक्तिः । Vशुक्रवर्चाः शुद्धतेजाः शुक्रशक्तिः । Vअनूनवर्चाः संपूर्णवर्चाः संपूर्णशक्तिः । त्वं Vभानुना दीप्त्या Vउदियऋषि उद्गच्छसि। Vपुत्रः Vमातरा मातापितरौ उत्तमे वयसि Vविचरन् उपचरन् Vउपावसि उपसंगम्य पालयसि यथा तथा त्वमपि सर्वं पालयसि । किं च– Vपृणक्षि Vरोदसी द्यावापृथिवी Vउभे त्वं पृणाक्षि पूरयसि ॥६॥

ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥७॥

ऊर्जः । नपात् । जातवेद इति जातऽवेदः । सुशस्तिभिरिति सुशस्तिऽभिः ।
मन्दस्व । धीतिभिरिति धीतिऽभिः । हितः ।
त्वे इति त्वे । इषः । सम् । दधुः । भूरिवर्पस इति भूरिऽवर्पसः ।
चित्रोतय इति चित्रऽऊतयः । वामजाता इति वामऽजाताः ॥ ञ्रुं ॥७॥

सा – अथ तृतीया – 'ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः। त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः' इति। Vऊर्जः अन्नस्य Vनपात् इति विनाशयिता, तादृश हे Vजातवेदः, Vधीतिभिः Vहितः दीप्तिभिर्युक्तः सन् Vसुशस्तिभिः शोभनाभिः स्तुतिभिः Vमन्दस्व हृष्यस्व । Vभूरिवर्पसः नानारूपा यजमानाः Vत्वे त्वयि Vइषः हविर्लक्षणानि अन्नानि Vसंदधुः संपादितवन्तः। ईदृशा यजमानाः Vचित्रोतयः, विचित्रास्त्वया कृता ऊतयो रक्षा येषां ते चित्रोतयः। Vवामजाताः वननीये संभजनीये देशे कुले चोत्पन्नाः ॥७॥

1. Sāyaṇa reads उदियर्षि for उदियऋषि following Andhra and Grantha (Tamil) versions.

3. S2 om. अनलदीप्तिः

5. S2 मातरौ for मातापितरौ

6. B1 H2–3 पावक° for पावकं

7. B1 अद्भुत° for अनून°

8. B1 उदियर्षि for उदियऋषि; H2–3 om. उत्तमे ... पूरयसि (L 10)

लोकेष्टकोपधानमन्त्राः]

आ – ' ऊर्जो नपात् ' इति । ऊर्क्शब्देन आप उच्यन्ते । नपाच्छब्देन च पौत्रः । अद्भ्यः ओषधिवनस्पतयो जायन्ते । ओषधिवनस्पतिभ्योऽग्निर्जायत इति । हे श्रीभगवन् जातवेदः, अपांनपात् अग्निः सुशस्तिभिः साधुशंसनैः त्वां स्तुम इति शेषः । ' मन्दस्व धीतिभिर्हितः ' । धीतिभिः चिताभिः कर्मनिमित्तभूताभिः हितः निहितः विशिष्टस्थाने स्थापितः सन् मन्दस्व हृष्टो भव दीप्यस्व वा । यतः ' त्वे इषः संदधुः ' । त्वे त्वयि इषः अन्नानि । भूरिवर्पसः । भूरीति बहुनाम । वर्प इति रूपनाम । भूरि वर्पः येषां यजमानानां ते भूरिवर्पसः बहुरूपा यजमानाः चित्राणि चायनीयानि ऊतयः अन्नानि तर्पणानि येषां ते चित्रोतयः । वामं वामनीयं वननीयं जातं जन्म येषां ते वामजाताः विशिष्टदेशजातिकुलोत्पन्नाः । इत्येवंविधा यजमानाः त्वयि इषः संदधुः । अतस्त्वं मन्दस्वेति संबन्धः ॥७॥

इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिं क्रतुम् ॥८॥

इरज्यन् । अग्ने । प्रथयस्व । जन्तुभिरिति जन्तुऽभिः । अस्मे इत्यस्मे । रायः । अमर्त्य । सः । दर्शतस्य । वपुषः । वि । राजसि । पृणक्षि । सानसिम् । क्रतुम् ॥ ट्न्यूं ॥८॥

सा – अथ चतुर्थी – ' इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य । स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिं क्रतुम् ' इति । हे अमर्त्य मरणरहित अग्ने, जन्तुभिः पुरोडाशादिहविःप्रदैः प्राणिभिः इरज्यन् दीप्यमानः सन् अस्मे अस्मासु रायः धनानि प्रथयस्व विस्तारय । सः त्वं दर्शतस्य वपुषः दर्शनीयस्य चित्याग्निरूपस्य शरीरस्य मध्ये विराजसि विशेषेण दीप्यसे । सानसिं बहुविधदानार्हं क्रतुम् अस्मदीयं यज्ञं पृणक्षि पूरय पारं गमयेत्यर्थः ॥८॥

आ – ' इरज्यन् ' इति । उत्तरार्धस्य प्रथमं व्याख्या । ' सः दर्शतस्य ' इति । अत्र विभक्तिव्यत्ययः । त्वं दर्शतस्य दर्शतेन दर्शनीयेन वा वपुषः वपुषा विराजसि । सः त्वं सानसिं चिरन्तनं क्रतुं संकल्पं पृणक्षि पूरय । जन्तुभिः मनुष्यैरध्वर्युप्रभृतिभिः चीयमानो

1. H3 ऊर्ज° for ऊर्क्°
2. B1 om. ओषधिवनस्पतयो जायन्ते
3. H3 om. second धीतिभि :
5. B1 om. दीप्यस्व वा; H3 om. यतः ...... संदधुः |;
   H2–3 om. भूरिति ... अन्नानि (L 7)
16. P1 दीयमानः for दीप्यमानः
20. H3 om. वा; H3 om. वपुषः
21. H3 चीयमाने for चीयमानो

(मान ?) हे श्रीभगवन् अग्ने, इरज्यन् निरज्यन् । उपसर्गस्यैकदेशलोपे इरज्यन्निति । रागं कुर्वन् प्रथयस्व पृथुर्भव । स्वार्थे णिच् । हे अमर्त्य मरणधर्मविरोधिन्, अस्मे अस्मासु रायः धनानि प्रथयस्वेत्यनुषज्यते ॥८॥

इ॒ष्कुर्तार॑मध्व॒रस्य॒ प्रचे॑तसं॒ क्षय॑न्त॒ꣳ राध॑सो म॒हः ।
रा॒तिं वा॒मस्य॑ सु॒भगां॑ म॒हीमिषं॑ दधा॑सि सान॒सिꣳ र॒यिम् ॥९॥

इ॒ष्कर्तार॑म् । अ॒ध्व॒रस्य॑ । प्रचे॑त॒समि॒ति॒ प्रऽचे॑तसम् । क्षय॑न्तम् । राध॑सः । म॒हः ।
रा॒तिम् । वा॒मस्य॑ । सु॒भ॒गामिति॑ । सु॒ऽभगा॑म् । म॒हीम् । इष॑म् ।
दधा॑सि । सा॒न॒सिम् । र॒यिम् ॥ छुं ॥९॥

सा – अथ पञ्चमी – ' इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसो महः । रातिं वामस्य सुभगां महीमिषं दधासि सानसिꣳ रयिम् ' इति । अध्वरस्य इष्कर्तारं निष्कर्तारं यज्ञस्य निष्पादकम् । नकारलोपश्छान्दसः । प्रचेतसं प्रकृष्टचित्तयुक्तं क्षयन्तं विशिष्टस्थाने निवसन्तं यजमानं वामस्य वननीयस्य महः महतः राधसः धनस्य रातिं करोषीति शेषः । किं च सुभगां सुष्ठु भजनीयां महीं महतीम् इषम् अन्नं सानसिं संभजनीयं रयिं पश्वादिधनं च दधासि ददासि ॥९॥

आ – ' इष्कर्तारम् ' इति । निरुपसर्गस्य नकारस्य लोपे छान्दसे इष्कर्तारमिति रूपं भवति । अध्वरस्य यज्ञस्य निश्चयेन कर्तारम् । प्रचेतसं प्रकृष्टज्ञानम् । क्षयन्तम् । क्षि निवासगत्योः । विशिष्टस्थाने निवासं कुर्वन्तम् । राध इति धननाम । सप्तम्यर्थे षष्ठी । महः महसि महति राधसि क्षयन्तं धननिमित्ततया गच्छन्तं यजमानं दृष्ट्वा रातिं वामस्य वननीयस्य संभजनीयस्य धनस्य रातिं दानम् । कथंभूतामिति ? सुभगां शोभनधनां दधासि । किं च महीं महतीम् इषं वृष्टिमन्नं वा दधासि ददासि । सानसिम् अतिचिरन्तनं रयिम् अस्मर्यमाणविषयं निधानलक्षणं धनं दधासि ॥९॥

ऋ॒तावा॑नं महि॒षं वि॒श्वद॑र्शतम॒ग्निꣳ सु॒म्नाय॑ दधिरे पु॒रो जना॑ः ।
श्रु॒त्कर्ण॒ꣳ स॒प्रथ॑स्तमं त्वा गि॒रा दैव्यं॒ मानु॑षा यु॒गा ॥१०॥

---

10. S2 यजमानस्य for यज्ञस्य

15. B1 om. निश्चयेन; H3 अनिश्चयेन for निश्चयेन; B1 कर्तरि for कर्तारं

17. B1 °निमितायागच्छन्तम् for °निमित्ततया गच्छन्तम्

19. H2–3 om. ददासि

20. B1 विधात° for निधान°

लोकेष्टकोपधानमन्त्राः]

ऋतावानम् । ऋतवानमित्यृतऽवानम् । महिषम् । विश्वदर्शतमिति विश्वऽदर्शतम् ।
अग्निम् । सुम्नाय । दधिरे । पुरः । जनाः ।
श्रुत्कर्णमिति श्रुत्ऽकर्णम् । सप्रथस्तममिति सप्रथःऽतमम् ।
त्वा । गिरा । दैव्यम् । मानुषा । युगा ॥ दुं ॥१०॥

सा – अथ षष्ठी – ' ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः । श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ' इति । मानुषा जनाः मनुष्यजातियुक्ता जन्तवः ऋत्विग्यजमानाः पुरः पूर्वस्मिन् काले युगा गिरा योग्यया स्थिररूपया वाचा सुम्नाय सुखार्थम् अग्निम् अत्र दधिरे स्थापितवन्तः । कीदृशमग्निम् ? ऋतावानं सत्यवन्तं यज्ञवन्तं वा महिषं महान्तं विश्वदर्शतं सर्वतो दर्शनीयं श्रुत्कर्णं शृण्वत्कर्णम् । यद्विज्ञाप्यते तत् सत्यमेव कर्णेन श्रुत्वा संपादयतीत्यर्थः । सप्रथस्तमम् अतिशयेन प्रथासहितं कीर्तिमन्तम् । तादृशं त्वामग्निं दैव्यं देवेभ्यो हितं दधिरे इत्यन्वयः ॥१०॥

आ – ' ऋतावानम् ' इति । ऋतावानम् ऋतवन्तं सत्यवन्तं महिषं महान्तम् अग्निं विश्वदर्शतं विश्वस्य दर्शनीयम् अग्निमिति । अयमग्निशब्दोऽन्यदेवतानिवृत्त्यर्थः । एवंविधमग्निं पुरः अग्रतः जनाः सुम्नाय यज्ञाय दधिरे स्थापितवन्तः । तथा श्रुत्कर्णं, शृणोत्याह्वानं श्रुत्वा च यस्तथानुतिष्ठति स श्रुत्कर्णस्तम् । सप्रथस्तमम् । प्रथ प्रख्यापने । प्रथनं प्रथः, तेन सह वर्तमानः सप्रथाः । तेषु श्रेष्ठः सप्रथस्तमः । तं सप्रथस्तमं सर्वतः पृथुतमं तिर्यगूर्ध्वमधश्चानवच्छिन्नगतिविज्ञानं दैव्यम् । स्वार्थे ण्यत् । देवं त्वां गिरा स्तुतिलक्षणया वाचा वाक्येन मानुषा युगा मनुष्यमानपरिमितैः मानुषैः युगा युगैः कालावयवैः निमित्तभूतैः सायंप्रातर्दर्शपूर्णामासादिभिः त्वामाह्वयामीति शेषः ॥१०॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।
भवा वाजस्य संगथे ॥११॥

आ । प्यायस्व । सम् । एतु । ते । विश्वतः । सोम । वृष्ण्यम् ।
भव । वाजस्य । संगथ इति सम्ऽगथे ॥ कां ॥११॥

6. P1 with markings above मानुषा ins. on the margin सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः इति जस आकारः ।
14. H3 तथा न for तथाऽनु°; H3 om. तम्; B1 प्रथनेन प्रख्यानेन for प्रथनं प्रथस्तेन (L 15)
16. B1 °गुणाभि° for °गतिवि°
17. H3 मनुष्यात्मना परिनीतैः for मनुष्यमानपरिमितैः; H2-3 मानुष्यैः for मानुषैः

सा – कात्यायनः – "आ प्यायस्वेति सिकतालम्भनमृग्भ्याम्" (काश्रौ १७·३·१६) इति। पूर्वं न्युप्ता सिकता 'आ प्यायस्व' इत्येताभ्यां संस्पृशेत्। तत्र प्रथमा– 'आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे' इति। हे सोम, त्वम् आप्यायस्व सर्वतो वर्धस्व। ते तव वृष्ण्यं वीर्यं विश्वतः सर्वस्मात् समेतु संप्राप्नोतु। वाजस्य अन्नस्य संगथे संगमने त्वं निमित्तं भव ॥११॥

आ – सिकता अभिमृशति – 'आ प्यायस्व' इति। गौतमः सौम्या गायत्री। हे सोम, स्वात्मानम् आप्यायस्व अभिवर्धय। समेतु ते तव विश्वतः सर्वतः वृष्ण्यम्। वृष सेचने। सर्वभूतबीजभूतं वृष्ण्यं त्वां समेतु समागच्छतु। 'भवा वाजस्य संगथे'। वाजस्य अन्नस्य संगथे संगमने भव त्वमन्नभावं प्राप्नुहि ॥११॥

सं ते पयांꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः।
आप्यायमानो अमृताय सोम दिवि श्रवांꣳस्युत्तमानि धिष्व ॥१२॥

सम्। ते। पयांꣳसि। सम्। ऊँ इत्यूँ। यन्तु। वाजाः।
सम्। वृष्ण्यानि। अभिमातिषाहः। अभिमातिसह इत्यभिमातिऽसहः।
आप्यायमान इत्याऽप्यायमानः। अमृताय। सोम।
दिवि। श्रवांꣳसि। उत्तमानीत्युत्ऽतमानि। धिष्व॥ धैं ॥१२॥

सा – अथ द्वितीया – 'सं ते पयांꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः। आप्यायमानो अमृताय सोम दिवि श्रवांꣳस्युत्तमानि धिष्व' इति। हे सोम, ते तव पयांꣳसि पातव्यानि क्षीरादीनि समु यन्तु संप्राप्तानि भवन्तु। तथा वाजाः अन्नान्यपि समुयन्तु। वृष्ण्यानि रेतांस्यपि संयन्तु। कीदृशस्य तव? अभिमातिषाहः। अभिमातिं पाप्मानं सहते तिरस्करोतीत्यभिमातिषाट्। तस्य क्षीरादिसंपत्तौ सत्यां त्वम् आप्यायमानः वर्धमानः अमृताय यजमानस्यामृतत्वाय देवभावाय दिवि द्युलोके उत्तमानि उत्कृष्टानि श्रवांसि अन्नानि धिष्व धारय संपादयेत्यर्थः ॥१२॥

आ– 'सं ते पयांꣳसि' इति। गौतमः। सौम्या त्रिष्टुप्। 'सं ते पयांसि समु यन्तु'। हे सोम, अभिमातिषाहः। अभिमातिं पापलक्षणं शत्रुं सहत इति अभिमातिषाट्। तस्य

3. P1 वर्धयस्व for वर्धस्व
7. B1 त्वम् for स्व°
8. B1 °भूतां, H3 °भूतत्वं for °भूतं
9. B1 ते भवस्यथन्नाभावं, H2-3 संगन्न भव त्वमन्नभागं for संगमने भव त्वमन्नभावं

लोकेष्टकोपधानमन्त्राः]

अभिमातिषाहः । पाप्मनोऽभिभवितुः सोमस्य [v]ते तव [v]पयांसि सारभूतानि [v]संयन्तु त्वामागच्छन्तु । [v]वाजाः अन्नानि संयन्तु । [v]सं [v]वृष्ण्यानि इति रेतांसि संयन्तु । एवमेतैः पयोभिर्वृष्ण्यैः [v]आप्यायमानः हे सोम, त्वम [v]अमृताय भव, प्रजात्यै अमृताय मृतिरहितायै भव, साक्षात् अमृतत्वाय मोक्षाय भव । 'दिवि श्रवांसि' । [v]दिवि द्युलोके [[v]श्रवांसि] यशांसि चन्द्रवद्रमणीयरूपाणि [v]धिष्व धारयस्व ॥१२॥

आ प्यायस्व मदिन्तम सोम विश्वेभिरꣳशुभिः ।
भवा नः सुप्रथस्तमः सखा वृधे ॥१३॥

आ । प्यायस्व । मदिन्तमेति मदिनऽतम । सोम । विश्वेभिः । अꣳशुभिरित्यꣳशुऽभिः ।
भव । नः । सुप्रथस्तम इति सुप्रथःऽतमः । सखा । वृधे ॥ ण्यां ॥१३॥

सा – 'आ प्यायस्व मदिन्तम' इत्यादीनां चतुर्णां मन्त्राणां विनियोगोऽन्वेष्टव्यः । तत्र प्रथममन्त्रपाठस्तु– 'आ प्यायस्व मदिन्तम सोम विश्वेभिरꣳशुभिः । भवा नः सप्रथस्तमः सखा वृधे' इति । हे [v]मदिन्तम अतिशयेन मदवन् [v]सोम, त्वम् [v]आप्यायस्व प्रवृद्धो भव । ततः [v]विश्वेभिः विश्वैः सर्वैः [v]अꣳशुभिः सूक्ष्मांशैः [v]सखा सखिभूतः सन् [v]नः अस्माकं [v]वृधे वर्धनाय [v]सप्रथस्तमः प्रथयितृतमो [v]भव ॥१३॥

आ– गौतमः सौम्योष्णिक् । हे [v]सोम, त्वमात्मानम् [v]आप्यायस्व । [v]मदिन्तम । मदि स्तुतिमोदमदस्वप्नगतिषु । मदयितृतम । यद्वा– मदोऽस्यास्तीति मदी । अतिशयेन मदी मदिन्तमः । तत्संबोधनं मदिन्तम । हे सोम, [v]विश्वेभिः विश्वैः सर्वैः [v]अंशुभिः सूक्ष्मांशैः [v]सप्रथस्तमः प्रथयितृतमः [v]भव । [v]नः अस्माकं [v]सखा त्वं [v]वृधे वर्ध[ना]य ॥१३॥

---

1. H2 हिंसकः, H3 हिंसितुः for अभिभवितुः H3 om. त्वामागच्छन्तु
2. B1 om. इति
3. B1 om. प्रजात्यै; H3 प्रजापत्यै for प्रजात्यै; B1 °रहिताय for °रहितायै
4. B1 वा अमोहाय for मोक्षाय
10. P1 with insertion after अन्वेष्टव्यः writes on the margin:– हौत्रे विनियुक्ता एते ।
16. H3 om. यद्वा

आ तें व॒त्सो मनों यमत् प॒रमाच्चि॑त् स॒धस्था॑त् ।
अग्ने॒ त्वांका॑मया गि॒रा ।।१४।।

आ । ते॒ । व॒त्सः । मनः । य॒म॒त् । प॒रमात् । चि॒त् । स॒धस्था॒दिति॑ स॒धऽस्था॑त् ।
अग्ने॑ । त्वांका॑म॒येति॒ त्वाम्ऽका॑मया । गि॒रा ॥ छां ॥१४॥

सा – अथ द्वितीयः – 'आ ते वत्सो मनो यमत् परमाच्चित् सधस्थात् । अग्ने त्वांकामया गिरा' इति । हे [v]अग्ने, [v]ते तव [v]वत्सः प्रियभूतो यजमानः [v]त्वांकामया त्वा स्तोतुं काम्यमानया [v]गिरा वाचा [v]परमात् [v]चित् [v]सधस्थात् उत्कृष्टादपि स्थानात् [v]मनः अन्तःकरणम् [v]आ [v]यमत् नियच्छतु ॥१४॥

आ– हौत्रम् । 'आ ते वत्सः' इति । आवत्सार आग्नेयी गायत्री । हे श्रीभगवन् [v]अग्ने, [v]ते तव [v]वत्सः यजमानः, पयःपानसामान्यात् वत्सः । स हि पयोव्रती । [v]मनः अन्तःकरणम् । 'परमाच्चित् सधस्थात्' । [v]चित् अपि [v]परमात् अपि उत्तमात् [v]सधस्थात् देवैः सहस्थानात् द्युलोकात् मन आहृत्य [v]त्वांकामया त्वां स्तोतुं काम्यमानया [v]गिरा वस (स्तुति ?)रूपया वाचा मनः [v]आयमत् नियमितवान् ॥१४॥

तुभ्यं॑ ता अ॑ङ्गिरस्तम॒ विश्वाः॑ सु॒क्षि॒तयः॒ पृथ॑क् ।
अग्ने॒ कामा॑य येमिरे ।।१५।।

तुभ्य॑म् । ताः । अ॒ङ्गि॒र॒स्त॒मेत्य॑ङ्गिरःऽतम । विश्वाः॑ । सु॒क्षि॒तय॒ इति॑ सु॒ऽक्षि॒तयः॑ । पृथ॑क् ।
अग्ने॑ । कामा॑य । ये॒मि॒रे ॥ इकौ ॥१५॥

सा – अथ तृतीयः – 'तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे' इति । हे [v]अङ्गिरसस्तम [v]अग्ने, [v]तुभ्यं यजमानैः कृता याः स्तुतयः सन्ति सर्वाः [v]पृथक् प्रत्येकं [v]सुक्षितयः शोभननिवासाः [v]ताः स्तुतयः [v]कामाय यजमानानां मनसोऽभिलाषपूरणार्थं [v]येमिरे नियम्यन्ताम् ॥१५॥

9. B1 H2–3 होत्रम् for हौत्रम् ; B1 अवसारः for आवत्सार
10. H2–3 om. ते तव ... नियमितवान् (L 13)
11. B1 उक्ततमात् for उत्तमात् ; B1 दिवैः for देवैः
12. B1 वसरूपाया वाच मानः for वस [स्तुति] रूपया वाचा मनः (L 13)
19. P1 with insertion above अङ्गिरस्तम writes on the margin अन्नं गिरतीति अङ्गिराः । अतिशयेन तृश इत्याङ्गिरस्तमस्तत्संबोधनम् ।
20. P1 मानसाभि° for मनसोऽभि°

लोकेष्टकोपधानमन्त्राः]

आ– ‘ तुभ्यं ताः ’ इतिः । विरूपः आग्नेयी गायत्री । हे भगवन् [v]अग्ने हे [v]अङ्गिरस्तम । गृ निगरणे । अम् अन्नं गिरतीत्यङ्गिराः । अङ्गिरसां मध्ये अतिशयेनान्नं गिरतीत्यङ्गिरस्तमः । तत् संबोधनं हे अङ्गिरस्तम । [v]तुभ्यं हवींषि दत्वा यजमानेन कृताः याः स्तुतयः [v]ताः [v]विश्वाः सर्वाः [v]पृथक् [v]सुक्षितयः शोभननिवसनाः । स्तुतौ स्तुत्यः तिष्ठति हि । हे श्रीभगवन्नग्ने, [v]कामाय यजमानाः स्वमनसः कामपरिपूरणार्थं मनः [v]येमिरे मनोनियमनं कृतवन्तः ॥१५॥

अ॒ग्निः प्रि॒येषु॒ धाम॑सु॒ कामो॑ भू॒तस्य॒ भव्य॑स्य ।
स॒म्राळेको॒ वि रा॑जति ॥१६॥(७)॥

अ॒ग्निः । प्रि॒येषु॑ । धा॒मस्विति॒ धाम॑ऽसु । काम॑ः । भू॒तस्य॑ । भव्य॑स्य ।
स॒म्राळिति॑ स॒म्ऽराट् । एक॑ः । वि । रा॒ज॒ति॒ ॥ जं ॥१६॥(७)॥

[दशानोऽष्टादश ॥१८॥ दिवस्परि द्वादश ॥१२॥ समिधाग्निं पञ्चदश ॥१५॥ अपेत सप्तदश ॥१७॥ असुन्वन्तं त्रयोदश ॥१३॥ या ओषधीः पञ्चविंशतिः ॥२५॥ मा मा षोळश ॥१६॥ सप्तानुवाकेषु षोळशोत्तरं शतम् ॥११६॥]

[इति शुक्लयजुःकण्वपदसंहितायां त्रयोदशोऽध्यायः ॥१३॥]

———

सा – अथ चतुर्थः – ‘ अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य । सम्राळेको वि राजति ’ इति । [v]भूतस्य उत्पन्नस्य [v]भव्यस्य भविष्यतश्च जनस्य [v]प्रियेषु [v]धामसु अभिरुचितेषु स्थानेषु [v]एकः असहायभूतः सन् [v]विराजति विशेषेण दीप्यते ॥१६॥

[इति त्रयोदशेऽध्याये सप्तमोऽनुवाकः ॥७॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये त्रयोदशोऽध्यायः ॥१३॥

———

1. H2–3 om. तुभ्यं ... अग्ने
2. H2–3 गिरन्तीत्याङ्गिरसः for गिरतीत्याङ्गिराः
3. H2–3 om. हे अङ्गिरस्तम
5. H3 om. स्वमनः° for स्वमनसः, H3 °नियमं for °नियमनं

आ – 'अग्निः प्रियेषु' इति । विरूप आग्नेयी त्रिष्टुप् । ^{v}प्रियेषु अभिरुचितेषु ^{v}धामसु स्थानेषु ^{v}कामः कामपरिपूरकः । ^{v}भूतस्य उत्पन्नस्य ^{v}भव्यस्य भविष्यतश्च । ^{v}सम्राट् । सम्यग्राजत इति सम्राट् । स्वतन्त्रो राजा । ^{v}एकः असहायः सर्वाधिपतिः ^{v}विराजति विविधं दीप्यते ॥१६॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपरिपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्ति-साम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे त्रयोदशोऽध्यायः ॥१३॥

———

4. B1 दीप्यति for दीप्यते

7. H3 om. °वेद°

चतुर्दशोऽध्यायः

[प्रथमोऽनुवाकः।]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

त्रयोदशेऽध्याये यजमानस्य कण्ठे रुक्मधारणादिमन्त्रा उक्ताः। अथ चतुर्दशेऽध्याये यजमानजप-पुष्करपर्णाद्युपधानमन्त्रा उच्यन्ते। तत्र प्रथमेऽनुवाके यजमानजपादिस्रुगुपधानपर्यन्तमन्त्रा निरूप्यन्ते ॥

मयि॑ गृह्णाम्यग्रे॑ अ॒ग्निꣳ रा॒यस्पोषा॑य सुप्र॒जा॒स्त्वाय॑ सु॒वीर्या॑य ।
माम्सु॑ दे॒वताः॑ सचन्ताम् ॥१॥

मयि॑ । गृ॒ह्णा॒मि॒ । अग्रे॑ । अ॒ग्निम् ।
रा॒यः । पोषा॑य । सु॒प्र॒जा॒स्त्वायेति॑ सु॒प्र॒जाः॒ऽत्वाय॑ । सु॒वी॒र्या॒येति॑ सु॒ऽवीर्या॑य ।
माम् । उँ इत्यूँ । दे॒वताः॑ । स॒च॒न्ता॒म् ॥ ङिं ॥१॥

कात्यायनः – "उत्तरवेदिमपरेण तिष्ठन् यजमानो मयि गृह्णामीति जपति" (काश्रौ १७·३·२७) इति। पाठस्तु– 'मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। मामु देवताः सचन्ताम्' इति। अहं यजमानः ᵛअग्रे प्रथमं ᵛमयि आत्मनि ᵛअग्निं ᵛगृह्णामि धारयामि। किमर्थम् ? ᵛरायस्पोषाय धनस्य पुष्टयर्थं ᵛसुप्रजास्त्वाय शोभनपुत्रादिनिष्पादनार्थं ᵛसुवीर्याय शोभनसामर्थ्यार्थं च। किं च– उकारोऽप्यर्थे। ᵛदेवताः अपि एवं स्थितं ᵛमां ᵛसचन्तां संगच्छन्तां प्राप्नुवन्तु ॥१॥

आ – आत्मन्यग्निग्रहणार्थं यजमानो जपति – 'मयि गृह्णामि' इति। 'प्रजापतिः प्रथमां चितिमपश्यत्। प्रजापतिरेव तस्य आर्षेयम्' इति श्रुत्यभिहितत्वात् प्रथमचितिविषयमन्त्राणां प्रजापतिरेव ऋषिः सामान्येन। ऋषिविशेषोक्तिर्यत्र तत्र सोऽप्यृषिः। अग्निदेवत्या ककुप्। 'मयि गृह्णाम्यग्रे अग्निम्'। ᵛअग्रे प्रथमंᵛ मयि आत्मनि ᵛअग्निं ᵛगृह्णामि। स्वात्मन्यग्निदर्शनेन ततोऽग्निं चिनोमीति शेषः। किमर्थमिति ? 'रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय'। ᵛरायस्पोषाय धनस्य पुष्टयर्थं ᵛसुप्रजास्त्वाय सुपुत्रपरिनिष्पत्त्यर्थं ᵛसुवीर्याय सुसामर्थ्यार्थं मय्यग्निं गृह्णामीति संबन्धः।

---

3. P1 before यस्य adds ॐ
18. H2–3 before आत्मनि add हरि ॐ
19. B1 श्रुत्याभि° for first श्रुत्यभि°
20. H2–3 सामान्या for सामान्येन; B1 om. तत्र
21. B1 अग्नेः for first अग्निं
23. B1 शेषः for संबन्धः

किं च– 'मामु देवताः'। उकारोऽप्यर्थे। एवं स्थितं ᵛमां ᵛदेवताः अपि ᵛसचन्ताम्। षच समवाये। देवता अपि मामेव सेवन्ताम् अग्निरिव। एवमेवेममर्थं श्रुतिर्व्याचष्टे– "स गृह्णाति। मयि गृह्णाम्यग्रे अग्निमिति। तदात्मन्येवाग्रेऽग्निं गृह्णीते रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेति। तदु सर्वा आशिष आत्मानुगृह्णीते मामु देवताः सचन्तामिति तदु सर्वान् देवानात्मानुगृह्णीते तद्यत् किंचात्मनोऽधि जनयिष्यन् भवति" (द्र. शब्रा ७·४·१·२) इति ॥१॥

अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम्।
वर्धमानो महाँ३ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व ॥२॥

अपां पृष्ठम् ॥ ब ॥२॥

सा – कात्यायनः – "पुष्करपर्णमुपदधाति स्तम्बे पूर्ववत्" (काश्रौ १७·४·१) इति। पूर्वं मृदाहरणकाले येन मन्त्रेण कृष्णाजिने पुष्करपर्णमुपाधात् इदानीं तेनैव 'अपां पृष्ठमसि' इति मन्त्रेण कुशस्तम्बे पुष्करपर्णमुपदध्यादित्यर्थः। पाठस्तु– 'अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम्। वर्धमानो महाँ३ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व' इति। अयं मन्त्रो द्वादशाध्याये व्याख्यातः ॥२॥

आ – पुष्करपर्णमुपदधाति – 'अपां पृष्ठम्' इति। व्याख्यातो मन्त्रो द्वादशे ॥२॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥३॥

ब्रह्म। जज्ञानम्। प्रथमम्। पुरस्तात्।
वि। सीमतः। सुरुच इति सुऽरुचः। वेनः। आवरित्यावः।
सः। बुध्न्याः। उपमा इत्युपऽमाः। अस्य। विष्ठाः। विस्था इति विऽस्थाः।
सतः। च। योनिम्। असतः। च। वि। वरिति वः ॥ फिः ॥३॥

सा – कात्यायनः – "तस्मिन् रुक्ममधोऽधः पिण्डं बिलं ब्रह्म जज्ञानमिति" (काश्रौ १७·३·२९) इति। तस्मिन् पुष्करपर्णे रुक्मम् अधस्तनबिलं यथा भवति तथा उपदधातीति शेषः। पाठस्तु– 'ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च

---

2. H3 संबाधे for समवाये; H2–3 गृह्णामि for गृह्णाति

3. H2–3 एवाग्निं for एवाग्रेऽग्निं

4. H2–3 आशीर्य for आशिष

21. P1 °दध्यात् for °दधाति

पुष्करपर्णाद्युपधानमन्त्राः]

योनिमसतश्च वि वः' इति। प्रथमं जज्ञानम् आदावुत्पन्नमिदं रुक्मस्वरूपं ब्रह्म परिवृढम् अत्यन्तं महदित्यर्थः। तस्य रुक्मस्य दृष्टान्तत्वेन सूर्यः प्रपञ्च्यते। पुरस्तात् पूर्वस्यां दिशि अवस्थितः वेनः कमनीयः मेधावी वा सूर्यः सीमतः सर्वस्यां सीम्नि सुरुचः शोभनरश्मीन् विशेषेण आवः आवृणोत्। अस्य रुक्मस्य उपमाः उपमानभूताः विष्ठाः विशेषेणावस्थिताः बुध्न्याः बुध्ने मूले पृथिवीरूपे भवाः पदार्थाः ये सन्ति तानपि सः वेनः विवः विवृतवान् प्रकाशितवानित्यर्थः। सतः विद्यमानस्य घटपटादेः योनिं कारणं मृदादिरूपम् असतः च अविद्यमानस्य नरविषाणादेः कारणं मनुष्यमूर्धादिकमपि विवः विवृतवान्। तथाविधेन सूर्येण सदृशोऽयं रुक्मः प्रकाशत इति तात्पर्यार्थः॥३॥

आ – रुक्ममुपदधाति – 'ब्रह्म जज्ञानम्' इति। आदित्यदेवत्या त्रिष्टुप्। सत्यज्ञानानन्दात्मलक्षणं परं ब्रह्म नामरूपाकारेण विवर्तमानं जगज्ज्योतिर्लक्षणादित्याकारेण च विवर्तते। तत् कथमिति तदाह – 'ब्रह्म जज्ञानम्' इति। यथोक्तलक्षणं ब्रह्म जज्ञानं स्वमायया जायमानं प्रथमं पूर्वम्। प्रथयति विस्तारयतीति प्रथमम्। पुरस्तात् प्राच्यां दिशि जायत इति शेषः। दृष्टदृष्टव्यपेक्षया ततोऽनन्तरं 'सीमतः सुरुचो वेन आवः'। वेनः वेनतेः कान्तिकर्मणो रूपम्, वेनतीति वेनः कान्तो मेधावी वा आदित्यः स्वप्रकाशेन। छान्दसं पदम् आवः, व्यावः व्यावृणोत् लोकान् विवृतानकरोत्। ततः स्वप्रकाशविवरणेन सीमतः स्वेन कल्पितमध्यतो मर्यादातः स्वप्रकाशेन सुरुचः। सुशोभना रुक् प्रभा येषां लोकानां ते सुरुचः। स्वावभासकज्योतिःसंपन्नान् लोकांस्तान् सुरुचः अकरोदिति शेषः। 'स बुध्न्याः'। यत् ब्रह्म आदित्योऽभूत् तत्, ब्रह्मात्मकः सः एवादित्यः। बुध्न्याः। बुध्नमन्तरिक्षम्। तत्र भवाः दिशः बुध्न्याः। आदित्यगतिप्रयुक्ता हि दिशः कल्पिता इति। उपमाः। भूतान्यासु उपतिष्ठन्ते

---

5. S2 यदा for पदार्थाः, P1 om. ये

7. P1 with insertion after विवृतवान् writes on the margin :– सतो मूर्तस्य पृथिव्यादेः कारणमसतश्च मूर्तस्य वाय्वादेर्योनिमिति भाष्यान्तरम्; S2 इत्यर्थः for इति तात्पर्यार्थः।

8. B1 after सत्यज्ञान° ins. अनन्त°

9. H3 वर्तमानं for विवर्तमानं; B1 om. °आदित्य°; H3 विवर्ततेति for विवर्तते; B1 after विवर्तते adds किं च

12. B1 दृष्टदृष्टप्रेक्षया, H2–3 दृष्टदृष्ट्यापेक्षया for दृष्टदृष्ट्यपेक्षया; H3 निरन्तरं for अनन्तरं; B1 वेद for first वेनः and om. आवः ... छान्दसं (L 13)

13. H2–3 कान्तमेमवापि वा आदित्यं स्वप्रकाशेन पिच्छान्दसं पदं for कान्तो .. छान्दसं पदम्

15. H2–3 °मध्यमो मवदातः for °मध्यतो मर्यादातः; B1 मर्यादात् for मर्यादातः; H3 सुप्रकाशेन for स्वप्रकाशेन; H3 सुरुचिः for सुरुचः

18. H2–3 उपमा मताभ्येषुपतिषन्तम इति श्रुतेः। उपरि मियन्तमिति चोपमा मता भूतान्युपस्थिताग्नि अपास्थितानीति च उपमा दिशः; B1 उपमा भूता यासु उपतिष्ठन्ते। आदिर्दिग्भिः उपनिर्मीयन्त इति वोपमाः। ताः भूतान्यपरिस्थतानीति वा उपमा दिशः for उपमाः। भूतान्यासु ... उपमा दिशः। (P. 228, L 1)

आभिर्दिग्भिरुपनिर्मीयन्त इति वा उपमाः । तासु भूतान्युपस्थितानीति वा उपमा दिशः । vअस्य जगतो विविधं स्थानामिति दिशः । ' विष्ठाः सतश्च योनिम् ' । पृथिव्यादिभूतत्रयस्य vसतः विद्यमानस्य मूर्तस्य vयोनिं स्थानम् । vअसतः vच वाय्वादिभूतद्वयस्य असतश्चामूर्तस्य योनिं vविवः । छान्दसं पदम् । अवः व्यवः आवृणोतीत्यर्थः । एवं ब्रह्मात्मकः आदित्य एव सर्वान् लोकान् सर्वा दिशः सर्वाणि भूतानि स्वतेजसा अभिव्यनक्ति, नान्य इति स्वकीयेन कर्मणा स्तूयते ॥३॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥४॥

हिरण्यगर्भ इति हिरण्यऽगर्भः । सम् । अवर्तत । अग्रे ।
भूतस्य । जातः । पतिः । एकः । आसीत् ।
सः । दाधार । पृथिवीम् । द्याम् । उत । इमाम् ।
कस्मै । देवाय । हविषा । विधेम ॥ ॐ ॥४॥

सा– कात्यायनः – " उत्तानं प्राञ्चं हिरण्यपुरुषं तस्मिन् हिरण्यगर्भ इति " (काश्रौ १७·४·३) इति । तस्मिन् रुक्मे सुवर्णेन निर्मितं पुरुषम् ऊर्ध्वाभिमुखं यथा भवति तथा ' हिरण्यगर्भः ' इति मन्त्रद्वयेन उपदध्यादिति शेषः । तत्र प्रथममन्त्रपाठस्तु– ' हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ' इति । हिरण्यब्रह्माण्डगर्भरूपेणावस्थितः प्रजापतिः vहिरण्यगर्भः । स च vभूतस्य प्राणिजातस्य vअग्रे vसमवर्तत प्राणिजातोत्पत्तेः पुरा स्वयं शरीरधारी बभूव । स च vजातः उत्पन्नमात्र vएकः एवोत्पत्स्यमानस्य सर्वस्य जगतः vपतिः vआसीत् । अत एव vपृथिवीं vद्यां विस्तीर्णां दिवं vदाधार धृतवान् । vउत अपि च vइमां भूमिं दाधार । तादृशाय vकस्मै प्रजापतये vदेवाय vहविषा vविधेम वयं परिचरेम ॥४॥

---

2. B1 पृथिव्या दिशः तत्र यस्य for पृथिव्यादिभूतत्रयस्य
3. H3 after योनिं adds धा(स्था ?)नं
4. B1 om. अवः
5. H2–3 वेन for स्वकीयेन
14. P1 मन्त्रेण for मन्त्रद्वयेन
17. S2 सर्व° for स च
20. P1 with insertion above कस्मै writes on the margin : कायेति प्राप्ते कस्मै इति छान्दसः ।

पुष्करपर्णाद्युपधानमन्त्राः]

आ– पुरुषमुपदधाति– ‘ हिरण्यगर्भः ’ इति । ऋषिर्हिरण्यगर्भः । कायी त्रिष्टुप् । स प्रजापतिः सोऽग्निः अधियज्ञः स यजमानः हिरण्ययस्य ब्रह्माण्डस्य यो गर्भः हिरण्यगर्भः, हिरण्यं हिरण्मयम् अण्डं गर्भे यस्य सः हिरण्यगर्भः, यो हि हिरण्यगर्भाख्यः पुरुषः समवर्तत । अग्रे प्रथमं शरीरी । यश्च भूतस्य उत्पन्नस्य प्राणिजातस्य पतिः जातः । यद्वा– जातमात्रः पतिरीश्वरः एकः एव आसीत् अभूत् । सः ईश्वरो हिरण्यगर्भः दाधार पृथिवीम् अतिपृथुत्वादन्तरिक्षं पृथिवीं पूर्ववत् क्लृप्तस्थाने दाधार धृतवान् । द्यां द्युलोकं च दाधार । उत इमां भूमिं दाधार । तस्मै कस्मै प्रजापतये देवाय हविषा हविः विधेम हविर्दद्म ॥४॥

द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥५॥

द्रप्सः । चस्कन्द । पृथिवीम् । अनु । द्याम् ।
इमम् । च । योनिम् । अनु । यः । च । पूर्वः ।
समानम् । योनिम् । अनु । संचरन्तमिति सम्ऽचरन्तम् ।
द्रप्सम् । जुहोमि । अनु । सप्त । होत्राः ॥ घाः ॥५॥

सा– अथ द्वितीयः – ‘ द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः । समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ’ इति । द्रव्यान्तरसंघट्टनेन स्फुरितो हिरण्यपुरुषावयवलेशो द्रप्सः । स पृथिवीम् अनु चस्कन्द पृथिव्यां पतित इत्यर्थः । स च द्रप्सो हुतः सन् स्थानत्रयेऽनुसंचरति द्युलोकेऽन्तरिक्षलोके भूलोके च । तदेतदभिप्रेत्य स्मर्यते–

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥

(मनुस्मृति ३·७६) इति । सोऽयमर्थो द्यामित्यादिनाभिधीयते । द्याम् इमं च योनिम् अनु अन्तरिक्षरूपमिदं स्थानमनु संचरति । यः च पूर्वः योऽपि पृथिवीमनु चस्कन्देति पूर्वोक्तस्थानविशेषः तमप्यनु संचरति । समानं सदृशं स्वस्य योग्यं योनिं द्युलोकरूपमादित्यस्थानमनु संचरति । तमिमं त्रिषु स्थानेषु अनुसंचरन्तं द्रप्सं जुहोमि मनसा हुतमिव भावयामि । कुत्र इति होम इति तदुच्यते । अनु सप्त होत्राः इति । यस्यां दिशि द्रप्सः पतितः तद्व्यतिरिक्ता होमयोग्या याः सप्त दिशः सन्ति तास्वनुक्रमेण जुहोमि । यथाऽयं द्रप्सो हुत आदित्यादिस्थानत्रयेषु संचरन्नुपकरोति तथा भावयामीत्यर्थः ॥५॥

---

2. H2–3 om. हिरण्यगर्भः

4. H3 शरीरं यस्य for शरीरी । यश्च

7. B1 om. उतेमां भूमिं दाधार; H2–3 भूरि for भूमिं; H2 om. तस्मै; H3 om. कस्मै

27. P1 after इत्यर्थः । adds असौ वा आदित्यो द्रप्सो दिशः सप्त होत्रा अमुं तदादित्यं दिक्षु प्रतिष्ठापयतीति श्रुतेः ।

आ – 'द्रप्सश्चस्कन्द' इति। द्रप्सरूपादित्यदेवत्या त्रिष्टुप्। अस्यामृचि आदित्यो यथा सर्वं बिभर्ति पालयति च तथोच्यते– आहुतिपरिणामरसनिधानभूतः [v]द्रप्सः आदित्यः [v]चस्कन्द [v]पृथिवीम् उदकरूपेण पृथिवीं प्रस्कन्दति मनुष्यादिधारणाय। 'अनु द्याम्'। [v]द्यां च द्युलोकम् [v]अनु स्कन्दति आहुतिपरिणामभूतेन रसेन देवादिधारणाय। 'इमं च योनिमनु यश्च पूर्वः'। पुनराहुतिग्रहणाय [v]यः [v]च [v]इमं लोकम् [v]अनु स्कन्दति, यः च पूर्वद्रप्सः [v]योनिं स्थानममुं लोकं सुकृतिनां तर्पणाय अनु स्कन्दति। [v]समानं [v]योनिम् एवं सदृशं (योनिम्) [v]अनु [v]संचरन्तं [v]द्रप्सम् आदित्यम् [v]जुहोमि, [v]अनु [v]सप्त [v]होत्राः सप्तसु दिक्षु जुहोमि सप्तसु दिक्षु त्वां स्थापयामि। "असौ वा आदित्यो द्रप्सो दिशः सप्त होत्रा अमुं तदादित्यं दिक्षु प्रतिष्ठापयति" (शब्रा ७·४·१·२०) इति श्रुतेः। तिर्यक् चतस्रो दिशः। अध एका ऊर्ध्वमेका मध्य एका इत्येताः सप्त दिशः ॥५॥

नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥६॥

नमः। अस्तु। सर्पेभ्यः। ये। के। च। पृथिवीम्। अनु।
ये। अन्तरिक्षे। ये। दिवि। तेभ्यः। सर्पेभ्यः। नमः॥ ३२ ॥६॥

सा – कात्यायनः – "उपतिष्ठते यजमानो नमोऽस्त्विति" (काश्रौ १७·४·६) इति। 'नमोऽस्तु' इत्यादिभिस्त्रिभिर्मन्त्रैर्यजमान उपस्थानं कुर्यात्। तत्र प्रथमः – 'नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः' इति। [v]ये [v]के चित् सर्पाः [v]पृथिवीम् [v]अनु गताः तेभ्यः [v]सर्पेभ्यः [v]नमः [v]अस्तु। [v]अन्तरिक्षे अन्तरिक्षलोके वर्तमाना [v]ये सर्पाः, [v]ये च [v]दिवि द्युलोके वर्तमाना राहुप्रभृतयः [v]तेभ्यः [v]सर्पेभ्यः [v]नमः अस्तु ॥६॥

---

1. B1 °रूपा देवता for °रूपादित्यदेवत्या
2. H2–3 °सरे for °रस°
3. H2–3 after °धारणाय add पोषणाय
5. B1 द्युस्थानं for स्थानम्
6. B1 सुकृतां; H2–3 कृतां for सुकृतिनां
9. B1 अधरेकादूर्ध्वका, H2–3 अधरेकोर्ध्वमेका for अध एका ऊर्ध्वमेका (L 10)
18. P1 यक्षलोके for अन्तरिक्षलोके

पुष्करपर्णाद्युपधानमन्त्राः]

आ – सर्पनामभिरुपतिष्ठते – 'नमोऽस्तु सर्पेभ्यः' इति । तृचमानुष्टुभं सर्पदेवत्यम् । ये के च सर्पाः पृथिवीम् अनु व्यवस्थिताः, ये के च सर्पाः अन्तरिक्षे व्यवस्थिताः, दिवि द्युलोके च ये सर्पा व्यवस्थिताः, तेभ्यः सर्पेभ्यः नमः नमस्कारोऽस्तु ॥६॥

या इषवो यातुधानानां ये वा वनस्पतीँरनु ।
ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥७॥

याः । इषवः । यातुधानानामिति यातुऽधानानाम् । ये । वा । वनस्पतीन् । अनु ।
ये । वा । अवटेषु । शेरते । तेभ्यः । सर्पेभ्यः । नमः ॥ इयुं ॥७॥

सा– अथ द्वितीयः – 'या इषवो यातुधानानां ये वा वनस्पतीँरनु । ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः' इति । याः सर्पजातयः यातुधानानां राक्षसानाम् इषवः बाणरूपेण वर्तन्ते, ये चान्ये वनस्पतीन् चन्दनादिवृक्षान् अनुवेष्टयावस्थिताः, ये चान्ये अवटेषु बिलेषु शेरते, तेभ्यः नमः अस्तु ॥७॥

आ – 'या इषवः' इति । यातुं यातनाः दुःखं च ये दधति ते यातुधानाः रक्षः-प्रभृतयः । तेषां याः इषवः इषुकाण्डरूपेण स्थिताः ये सर्पाः, ये वनस्पतीन् पुष्पं विना फलवतो अनु ये वा सर्पा व्यवस्थिताः, अवटेषु बिलेषु ये वा सर्पाः शेरते शयनं कुर्वन्तो व्यवस्थिताः, तेभ्यः सर्पेभ्यः नमः ॥७॥

ये वाऽमी रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥८॥

ये । वा । अमी इत्यमी । रोचने । दिवः । ये । वा । सूर्यस्य । रश्मिषु ।
येषाम् । अप्स्वित्यप्ऽसु । सदः । कृतम् । तेभ्यः । सर्पेभ्यः । नमः ॥ ञें ॥८॥

सा– अथ तृतीयः – 'ये वाऽमी रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः' इति । दिवः द्युलोकस्य रोचने दीप्तिस्थाने ये च अमी सर्पा अस्माभिर्दृश्यमानाः

---

2. H3 before ये के च adds लोकापा सर्पा पृथिवीमनु
10. S2 अनुवेष्टयावेष्टय स्थिता for अनुवेष्टयावस्थिताः
12. B1 H3 after यातनाः add तत्
13. B1 om. पुष्पं विना फलवतो; H2–3 फलवती° for फलवतो
15. H2–3 om. तेभ्यः सर्पेभ्यो नमः ॥

सन्ति, तथा सूर्यस्य रश्मिषु ये वा सर्पा वसन्ति, येषां सर्पाणाम् अप्सु जलेषु सदः स्थानं कृतं, तेभ्यः कृत्स्नेभ्यः नमः अस्तु ॥८॥

आ – 'ये वाऽमी रोचने' इति । ये वा अमी प्रत्यक्षतो दूरे दृश्यमानाः सर्पा दिवः द्युलोकस्य च रोचने दीप्यस्थाने [व्यवस्थिताः, ये च सर्पाः सूर्यस्य रश्मिषु] व्यवस्थिताश्च, येषां सर्पाणाम् अप्सु जलेषु सदः स्थानं कृतं तेभ्यः सर्वेभ्यः नमः ॥८॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ३ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्ताऽसि विध्य रक्षसस्तपिष्ठैः ॥९॥

कृणुष्व । पाजः । प्रसितिमिति प्रऽसितिम् । न । पृथ्वीम् ।
याहि । राजेवेति राजाऽइव । अमवानित्यमऽवान् । इभेन ।
तृष्वीम् । अनु । प्रसितिमिति प्रऽसितिम् । द्रूणानः ।
अस्ता । असि । विध्य । रक्षसः । तपिष्ठैः ॥ ध्यों ॥९॥

सा– कात्यायनः – "पञ्चगृहीतं जुहोति पुरुषे कृणुष्व पाज इति प्रत्यृचं प्रतिदिशम्" (काश्रौ १७·४·७) इति । पञ्चवारं गृहीतमाज्यं हिरण्यये पुरुषे कृणुस्व पाज इत्यादिभिः पञ्चभिर्ऋग्भिः क्रमेण प्राच्याद्यूर्ध्वान्तं पञ्च दिशोऽभिलक्ष्य जुहुयात् । तत्र प्रथमा – 'कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ३ इभेन । तृष्वीमनु प्रसितिं द्रूणानोऽस्ताऽसि विध्य रक्षसस्तपिष्ठैः' इति । हे अग्ने, कृणुष्व कुरुष्व पाजः बलम् । प्रसितिं न मृगबन्धनहेतुभूतां वागुरामिव पृथ्वीं प्रसारिताम् अमवान् अमात्ययुक्तः इभेन गजेन तृष्वीं क्षिप्रगामिनीं प्रसितिं प्रकृष्टसेनां द्रूणानः हिंसन् अस्ता क्षेप्ता धावयिता रक्षसः राक्षसान् तपिष्ठैः अतिसंतापकैर्बाणैः । हे अग्ने, मृगबन्धाय प्रसारितां पाशयामिव रक्षोनिरोधाय प्रौढं बलं कुरु । अमात्ययुक्तो गजेन सहितो राजेव रक्षसामुपरि याहि, क्षिप्रगामिनीं परकीयसेनामनु पृष्ठतो गत्वा पलायनविशिष्टाया अनुधावयिता भव । पलायमानानपि राक्षसान् बाणैस्तीक्ष्णैः विध्य ताडय ॥९॥

---

2. S2 हृतेभ्यः for कृत्स्नेभ्यः
3. H2–3 om. ये वाऽमी ... दीप्यस्थाने (L 4)
4. B1 om. °स्थाने ... सदः (L 5)
16. P1 with insertion above पाजः writes on the margin पाज इति बलनामसु पठितत्वात् ।; S2 om. वागुराम्; S2 अतो नं नरं याहि जमवात् शत्रून् for अमवानमात्ययुक्तः (L 17)
17. P1 with insertions above द्रूणानः writes on the margin द्रूणानो हिंसाकर्म ।
18. S2 पृथिवीं च for पाश्यामिव
20. S2 om. अनु

पुष्करपर्णाद्युपधानमन्त्राः]

आ – जुहोति – ‘ कृणुष्व पाजः ’ इति । पञ्च त्रिष्टुभः प्रतिसराः रक्षोघ्न्य आग्नेय्यः । देवानामार्षं वामदेवार्षं वा । एता आग्नेयीर्वामदेवोऽपश्यदिति च । हे श्रीभगवन् अग्ने । पाजः इति बलनामसु पठितम् । बलं कृणुष्व कुरुष्व । ‘ प्रसितिं न पृथ्वीम् ’ । ‘ प्रसितिः प्रसयनात् । तन्तुर्वा जालं वा ’ (नि ६·१२) । नकार उपमार्थीयः । पृथ्वीं भूमिं प्रसितिं न रक्षोघ्नीं वागुरामिव जालमिव वा कृणुष्व । “ रक्षोघ्ना वै प्रतिसराः । त एतैः प्रतिसरैः सर्वाभ्यो दिग्भ्यो रक्षांसि नाष्ट्रा अपहन्ति ” (माशब्रा ७·४·३३) इति श्रुतेः । अतोऽनन्तरं – ‘ याहि राजेवामवान् ’ । त्वं राजेव भूत्वा अमवान् शत्रून् इमेन । इण् गतौ । ञिभी भये । अनयोः रूपम् । इमेन गतभयेन बलेन शत्रून् याहि । अतिविस्तरं श्रुत्येभशब्दो व्याख्यातः । तृष्वीति क्षिप्रनाम । अत्र विभक्तिव्यत्ययः । तृष्व्या प्रसित्या अतिक्षिप्रया प्रसित्या राक्षोघ्नेन प्रतिसरन्तु । त्वं रक्षोघ्नजाते (ले ?) न वा द्रूणानः । द्रूणातिः हिंसाकर्मा । विहिंसन् । अस्ता असि । असु क्षेपणे । विक्षेप्ताऽसि । एवं धृतास्त्रोऽसि । अतो ब्रवीमि – हे श्रीभगवन्नग्ने, तपिष्ठैः तप्ततमैः निशितैः प्रहारैः रक्षसः राक्षसान् शत्रून् विध्य । व्यध ताडने । ताडय ॥९॥

तव॑ भ्र॒मास॑ आशु॒या प॑त॒न्त्यनु॑ स्पृश धृष॒ता शोशु॑चानः ।
तपूं॑ष्यग्ने जु॒ह्वा॑ पत॒ङ्गानसं॑न्दितो॒ वि सृ॑ज॒ विष्व॑गु॒ल्काः ॥१०॥

तव॑ । भ्र॒मासः॑ । आ॒शु॒येत्या॑शु॒ऽया । प॒त॒न्ति॒ । अनु॑ । स्पृ॒श॒ । धृ॒ष॒ता । शोशु॑चानः ।
तपूं॑षि । अ॒ग्ने॒ । जु॒ह्वा॑ । प॒त॒ङ्गान् ।
असं॑दित॒ इत्यसं॑ऽदितः । वि । सृ॒ज॒ । विष्व॑क् । उ॒ल्काः ॥ ढ्यूं ॥१०॥

सा– अथ द्वितीया– ‘ तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः । तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो वि सृज विष्वगुल्काः ’ इति । भ्रमासः भ्रमणशीला विस्फुलिङ्गा आशुया शीघ्रगामिनः धृषता धार्ष्ट्येन शोशुचानः भृशं दीप्यमानः तपूंषि संतापान् पतङ्गान् पतनशीलान् विस्फुलिङ्गान् असन्दितः अखण्डितः विसृज विशेषेणोत्पादय । विष्वक् सर्वतः उल्काः महाज्वालाः

---

1. H2–3 प्रतिशराः for प्रतिसराः
6. H2–3 नाष्ट्या for नाष्ट्रा
9. B1 °सरन्तं तु ना for °सरन्तु । त्वं (L 10)
19. P1 with insertion above आशुया writes on the margin सुपां स्विति जसो यादेशः।
20. S2 after शीघ्रगामिनः adds: पतन्ति इतस्ततश्च गच्छन्ति ।; S2 with insertion above तपूंषि writes on the margin तपूंषि तापयितॄन् राक्षसाननु स्पृशेति भाष्यान्तरम्; S2 तापयितॄणि रक्षांसि for संतापान्
21. S2 after विस्फुलिङ्गान् adds अनु स्पृश स्पर्शनं कुरु ।

हे अग्ने, तव संबन्धिनो विस्फुलिङ्गाः शीघ्रगामिनः सर्वतः पतन्तु । त्वमपि भृशं दीप्यमानस्तैर्विस्फुलिङ्गैः तान् असुरान् धाष्ट्र्येन अत्यन्तगाढम् अनु स्पृश । पुनरपि जुह्वा हुतेन हविषा त्वमविच्छिन्नः सन् संतापयन् विस्फुलिङ्गान् महाज्वालाश्च असुरबाधनाय सर्वतो बाहुल्येनोत्पादय ॥१०॥

आ– 'तव भ्रमासः' इति । हे श्रीभगवन् अग्ने, तव भ्रमासः भ्रमाः भ्रमणाः वातोद्धूता ज्वालासमूहाः । आशुया । जसः स्थाने यादेशः । आशवः वेगसंपन्नाः पतन्ति इतश्चेतश्च गच्छन्ति । 'अनु स्पृश धृषता' । ञिधृषा प्रागल्भ्ये । धृष्टेन स्वकार्यप्रगल्भेन ज्वालासमूहेन शोशुचानः अतिशयेन दीप्यमानः त्वं हे भगवन्नग्ने, तपूंषि तापकर्तॄणि पतङ्गान् पतंगमनानि रक्षांसि जुह्वा हूयमानस्त्वं धृषता तीव्रज्वालासमूहेन अनु स्पृश स्पर्शनं कुरु । असन्दितः । दो अवखण्डने । अनवखण्डितः सन् रक्षोविघातार्थं विष्वक् । विषु शब्दो नानावचनः । अञ्चतिर्गत्यर्थः । नानागमना उल्काः तिर्यगूर्ध्वमधश्चेत्येवंविधा ज्वालासमूहा उल्काः । रक्षोविघातार्थं त्वं विसृज मुञ्चेत्यर्थः ॥१०॥

प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने मा किष्टे व्यथिरा दधर्षीत् ॥११॥

प्रति । स्पशः । वि । सृज । तूर्णितम इति तूर्णिऽतमः ।
भव । पायुः । विशः । अस्याः । अदब्धः ।
यः । नः । दूरे । अघशंस इत्यघऽशंसः । यः । अन्ति । अग्ने ।
माकिः । ते । व्यथिः । आ । दधर्षीत् ॥ छिः ॥११॥

---

5. B1 वाताहूताः, H2–3 वास्तोद्धूताः for वातोद्धूताः
6. H2–3 धाष्ट्र्येन स्वकार्यप्रागल्भ्येन for धृष्टेन ... प्रगल्भेन
8. B1 पतंगतानि, H2–3 पतंगमनान् for पतंगमनानि
11. B1 मुञ्च मुञ्चेति संबन्धः for मुञ्चेत्यर्थः

पुष्करपर्णाद्युपधानमन्त्राः]

सा– अथ तृतीया– 'प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः। यो नो दूरे अघशꣳसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत्' इति। vस्पशः। स्पश बन्धने। पाशान् vतूर्णितमः अतित्वरितः vपायुः पालयिता vविशः प्रजायाः vअदब्धः केनाप्यहिंसितः। vअघशंसः विचित्रबन्धकारी vअन्ति समीपे vव्यथिः व्यथाकारी vआदधर्षीत् सर्वतो धृष्टो भवतु। हे vअग्ने, विचित्रबन्धकारी राक्षसः vयः अस्माकं वैरी vदूरे वर्तते vयः चान्तिके वर्तते तं प्रति त्वमतित्वरितो बन्धहेतून् पाशान् विविधान् vसृज। केनाप्यहिंसितस्त्वमस्मदादिकाया vअस्याः प्रजायाः पालकः vभव। अथैषा राक्षसजातिः vमाकिः मा कदाचिदपि vते तव त्वदीयानामस्माकं च व्यथिः व्यथयित्री दूरे अन्तिके वा आदधर्षीत् धृष्टा मा भवतु ॥११॥

आ– 'प्रति स्पश' इति। 'यो नो दूरे'। vनः अस्माकम् vअघशंसः vयः vदूरे वसति। पापप्रशंस[न]करो दुर्जनः अघशंसनः। 'योऽन्त्यग्ने'। हे भगवन् vअग्ने, vअन्ति समीपे [वसति] vयः चाघशंसनः तं vप्रति vस्पशः। स्पश बन्धने। स्पशयन्ति बध्नन्तीति स्पशः प्रणिधयः अध्यक्षाः। तान् स्पशः प्रणिधीन् अध्यक्षान् vविसृज प्रेरय। 'तूर्णितमो भवा पायुर्विशो अस्या अदब्धः'। अतिशयेन अविलम्बकारी vतूर्णितमः त्वम् vअस्याः मदीयायाः vविशः प्रजायाः vपायुः पालयिता vभव। [vअदब्धः।] अनुपहिंस्यस्त्वम्। 'माकिष्टे व्यथिरादधर्षीत्'। हे भगवन्नग्ने, अस्मदनुग्रहार्थं प्रवृत्तस्य vते तव vव्यथिः व्यथयिता शत्रुः vमाकिः मा कश्चित् vआदधर्षीत् कश्चिदभ्याधर्षणं मा कुर्यात् ॥११॥

उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ३ ओषतात् तिग्महेते।
यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥१२॥

2. S2 स्पशः स्पर्शः। नः अस्माकं दूरे योऽघशंसः। अघं पापं शंसति ग(इ?)च्छति [इति] अघशंसः अस्मद्रोही यः दूरे वसति यः च अन्ति समीपे अघशंसः हे अग्ने तं प्रति स्पशः। स्पश बन्धन इति धातुः। स्पशयन्ति बध्नन्तीति स्पशो बन्धनकृतः प्रणिधीन् विसृज प्रेरय। अस्याः अस्मदीयायाः विशः प्रजायाः पायुः। पातीति पायुः, पालकः भव। कीदृशस्त्वम्? तूर्णितमः। तूर्णं वेगोऽस्यास्तीति तूर्णी। अत्यन्तं तूर्णी तूर्णितमः वेगवत्तरः। अदब्धः अनुपहिंसितः। हे अग्ने, एवमनुग्रहं प्रति प्रवृत्तस्य ते तव माकिः मा कश्चित् व्यथिः। व्यथयतीति व्यथि व्यथकः शत्रुरादधर्षीत्। धाष्टर्यं मा करोतु। दूरसमीपस्थानस्मच्छत्रून् प्रति त्वरितो बन्धकान् प्रेरय। केनाप्यहिंसितोऽस्मत्प्रजापालको भव। राक्षसाश्च त्वां प्रति धृष्टा मा सन्त्वित्यर्थः। धृष धातोर्लुङि द्वित्वमडभावश्च मायोगात् for स्पशः। स्पश बन्धने ... मा भवतु (L 8). The above is the reproduction of महीधर's commentary. vide VS 13.11)

10. H2–3 om. हे भगवन्नग्ने

13. B1 om. अतिशयेन ... भव। (L 14)

14. H3 om. अनुपहिंस्यस्त्वं; B1 om. माकिष्टे ... कुर्यात् (L 16)

उत् । अग्ने । तिष्ठ । प्रति । आ । तनुष्व ।
नि । अमित्रान् । ओषतात् । तिग्महेत इति तिग्मऽहेते ।
यः । नः । अरातिम् । समिधानेति सम्ऽइधान । चक्रे ।
नीचा । तम् । धक्षि । अतसम् । न । शुष्कम् ॥ छर्याः ॥१२॥

सा– अथ चतुर्थी– 'उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ३ ओषतात् तिग्महेते । यो नो अरातिᳪ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम्' इति । हे vअग्ने, त्वम् vउत्तिष्ठ । ततः vप्रत्यातनुष्व शत्रून् प्रति सर्वतः प्रवर्तस्व । हे vतिग्महेते हे तीक्ष्णायुध, तीक्ष्णज्वालेति वा । त्वम् vअमित्रान् vनि vओषतात् नितरां दह । उष दाहे । हे vसमिधान समिध्यमानाग्ने, vयः vनः अस्माकम् अरातिं शत्रुत्वं vचक्रे, [vतं] vनीचा नीचं कृत्वा vशुष्कम् vअतसं vन शुष्ककाष्ठमिव vधक्षि भस्मीकुरु ॥१२॥

आ– 'उदग्ने तिष्ठ' इति । हे श्रीभगवन् vअग्ने, vउत्तिष्ठ । किं च– vप्रत्यातनुष्व प्रत्यातनुहि ज्वालाप्राग्भारान् विस्तारय । 'न्यमित्रान् ओषतात्तिग्महेते' । तिग्मं तीक्ष्णं हेतिरायुधं यस्य सः, तत्संबोधनं vतिग्महेते । vअमित्रान् शत्रून् vओषतात् । उष दाहे । निर्दह । 'यो नो अरातिं समिधान' । हे vसमिधान समिध्यमान श्रीभगवन्नग्ने, vयः vनः अस्मभ्यम् vअरातिम् अदानं vचक्रे न ददातीत्यर्थः । 'नीचा तं धक्षि' । vनीचा नीचैः कृत्वा नीचमाहावमापाद्य vतं vधक्षि निर्दह । किमिव ? 'अतसं न शुष्कम्' । अतसः वृक्षः । नकार उपमार्थः । vशुष्कं नीरसं वृक्षमिव स्थितं धक्षि ॥१२॥

ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥१३॥

ऊर्ध्वः । भव । प्रति । विध्य । अधि । अस्मत् । आविः । कृणुष्व । दैव्यानि । अग्ने ।
अव । स्थिरा । तनुहि । यातुजूनामिति यातुऽजूनाम् ।
जामिम् । अजामिम् । प्र । मृणीहि । शत्रून् ॥ ख्यौं ॥१३॥

सा– अथ पञ्चमी– 'ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने । अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून्' इति । हे vअग्ने, त्वम् vऊर्ध्वः vभव उद्युक्तो भव । vअस्मत् vअधि

10. B1 om. उदग्ने तिष्ठति ।

14. B1 om. नीचा नीचैः .. आपाद्य

15. H2-3 नः for नकारः

पुष्करपर्णाद्युपधानमन्त्राः]

अस्माकमुपरि ये शत्रवः प्रवृत्तास्तान् vप्रतिविध्य । हे अग्ने, vदैव्यानि वीर्याणि vआविष्कृणुष्व । vयातुजूनां गमने जवप्रधानानां vस्थिरा स्थिराणि वीर्याणि vअव अवनतानि यथा भवन्ति तथा vतनुहि कुरु । जामिः पुनः पुनस्ताडितः शत्रुरजामिरताडितः । तादृशान् सर्वान् vप्रमृणीहि मारय । मृणातिर्मरणार्थः ॥१३॥

आ– ' ऊर्ध्वो भव ' इति । vऊर्ध्वः vभव ऊर्ध्वस्तिष्ठ । स्थित्वा च vप्रति vविध्य प्रति ताडय । vअध्यस्मत् अस्मदुपरि व्यवस्थितान् vआविष्कृणुष्व प्रकाशीकुरुष्व । हे श्रीभगवन् vअग्ने, vदैव्यानि देवसंबन्धीनि कर्माणि दैव्यानि आविष्कृणुष्व । ' अव स्थिरा तनुहि ' । vस्थिरा स्थिराणि धनूंषि vअवतनुहि अवतारय । vयातुजूनां यातुधानानां [जवन]प्रधानानां स्थिराणि धनूंषि अवतनुहीति संबन्धः । ' जामिमजामिं प्र मृणीहि शत्रून् ' । यज्ञस्य vजामिं पुनरुक्तम् vअजामिं कृत्वा अपुनरुक्तं कृत्वा vशत्रून् vप्रमृणीहि । मृणातिर्मरणार्थः । प्रमारय शत्रूनित्यर्थः ॥१३॥

अग्नेष्ट्वा तेजसा सादयामि ।
अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् ।
अपाꣳ रेताꣳसि जिन्वति ॥१४॥
इन्द्रस्य त्वौजसा सादयामि ।
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥१५॥१॥

अग्नेः । त्वा । तेजसा । सादयामि ।
इन्द्रस्य । त्वा । ओजसा । सादयामि ॥ शो ॥१४॥

1. S2 वर्तमानान् शत्रून् for ये शत्रवः प्रवृत्तास्तान् ; S2 after °विध्य adds प्रति ताडय; S2 om. हे अग्ने; S2 देवसंबन्धीनि कर्माणि for वीर्याणि; S2 after आविष्कृणुष्व adds प्रकटय; S2 किं च– जाम्यजामिशब्दौ पुनरुक्तापुनरुक्त-वचैना । जामिमजामिं पुनरुक्तमपुनरुक्तं कृत्वा पुनः पुनस्ताडितमताडितं वा शत्रून् for यातुजूनां ... सर्वान् (L 3)
3. S2 om. मारय and after मरणार्थः; adds रिपून् मारय
4. H2–3 ऊर्ध्वं तिष्ठ for ऊर्ध्वस्तिष्ठ; B1 om. प्रति विध्य
6. B1 om. कर्माणि दैव्यानि
7. B1 om. प्रधानानां
8. B1 पुनरुक्तिं for पुनरुक्तं
9. B1 अपुनरुक्तिं for अपुनरुक्तं

भु॒वः । य॒ज्ञस्य॑ । रज॑सः । च॒ । ने॒ता ।

यत्र॑ । नि॒युद्भि॒रिति॑ नि॒युत्ऽभिः । सच॑से । शि॒वाभिः ।

दि॒वि । मू॒र्धान॑म् । द॒धि॒षे॒ । स्व॒र्षाम् । स्व॒ःसामिति॑ स्व॒ःऽसाम् ।

जि॒ह्वाम् । अ॒ग्ने॒ । च॒कृ॒षे॒ । ह॒व्य॒वाह॒मिति॑ ह॒व्य॒ऽवाह॑म् ॥ ष्ठौं ॥१५॥

सा– कात्यायनः – " कार्ष्मर्यमयीं दक्षिणतो घृतपूर्णामग्नेष्ट्वेति " (काश्रौ १७·४·१२) इति। कार्ष्मर्यो नाम वृक्षविशेषः । तेन निर्मितां घृतेन पूरितां स्रुचं पुरुषस्य दक्षिणभागे उपदध्यादिति शेषः । पाठस्तु– 'अग्नेष्ट्वा तेजसा सादयामि । अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् । अपाꣳ रेतांसि जिन्वति ' इति । हे स्रुक्, ᵛत्वा त्वाम् ᵛअग्नेः संबन्धिना ᵛतेजसा ᵛसादयामि । 'अग्निर्मूर्धा ' इत्ययं मन्त्रः तृतीयेऽध्याये व्याख्यातः ॥

कात्यायनः – एवमौदुम्बरीमुत्तरतो दधिपूर्णामिन्द्रस्य त्वेति " (काश्रौ १७·४·१३)। उदुम्बर-वृक्षेण निर्मितां दध्ना पूरितां स्रुचमुत्तरभागे स्थापयेत् । पाठस्तु– 'इन्द्रस्य त्वौजसा सादयामि । भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ' इति । हे स्रुक्, ᵛइन्द्रस्य ᵛओजसा बलेन ᵛत्वा त्वां ᵛसादयामि । अयमग्निर्भूलोकस्य

5. S2 om. कार्ष्मर्यमयीं दक्षिणतो

6. S2 कार्ष्मर्यमयीं पदमात्रदीर्घां षडङ्गुलविपुलां घृतपूर्णां प्रागग्रां स्रुचम् अग्निष्ट्वा इति यजुषा अग्निः मूर्धा इति ऋचा वोपदधाति for कार्ष्मर्यो ... विशेषः । (vide महीधर)

9. S2 पूर्ववत् for तृतीयेऽध्याये

10. P1 om. एवम्; S2 एवंविधामेवौदुम्बरीं दधिपूर्णां स्रुचमुत्तरे उपदधाति for उदुम्बरवृक्षेण ... स्थापयेत् (vide महीधर) (L 11)

11. S1 after सादयामि adds स्थापयामि

13. S2 हे अग्ने त्वं यदा हव्यवाहम् । हव्यं वहतीति हव्यवाट् । तम् । हविषो वोढ्रीं जिह्वां ज्वालां चकृषे करोषि । लडर्थे लिट् । तदा यज्ञस्य द्रव्यदेवतात्यागात्मनः नेता भुवः भवसि । रजसो यज्ञपरिणामरूपोदकस्य च नेता भवसि जगद्रक्षार्थम् । भवतेर्लेटि मध्यमैकवचने सिपि " इतश्च लोपः " (पा ३.४.८७) इतीकारलोपे " लेटोऽडाटौ " (पा ३.४.८४) इति अडागमे " अचिश्नुधातु° " (पा. ६.४.७७) इत्युवङादेशे च कृते भुव इति रूपम् । कुत्र नेता भवसीत्यत आह– यत्र यस्मिन् स्थाने शिवाभिः मङ्गलरूपाभिः नियुद्भिः अश्वाभिः त्वं सचसे संबन्धं प्राप्नोषि । नियुतः वायोः इत्युक्ते नियुतो नाम वायोरश्वाः । ताभिर्वायुर्लक्ष्यते । वायुना चान्तरिक्षं च लक्ष्यते । यत्र च दिवि द्युलोके मूर्धानम् आदित्यं दधिषे धारयसि । लिट् लडर्थे । किंभूतं मूर्धानम् ? स्वर्षाम् । स्वः स्वर्गं सनोति ददाति स्वर्षाः । षणु दाने । विट्प्रत्ययः। " विड्वनोरनुनासिकः स्यात् " (पा. ६.४.४१) इति नकारस्याकारः । यद्वा– स्वः स्वर्गे स्यति तिष्ठतीति स्वर्षाः, तम् । षोऽन्तकर्मणि क्विप् । अन्तरिक्षे द्युलोके च यज्ञस्य रजसश्च नेता भवसीत्यर्थः । यत्रेत्यस्य संहितायां " निपातस्य च " (पा ६.३.१३६) इति दीर्घः । यस्य तवैतत् कर्म तं त्वां सुग्रूपेण सादयामीति शेषः । (vide महीधर VS 13.15) for अयमग्निः ... चकृषे करोषि ॥ (P 239, L 5)

पुष्करपर्णाद्युपधानमन्त्राः]

तत्रानुष्ठेयस्य vयज्ञस्य तस्मिन् यज्ञे प्रवर्तकस्य vरजसः रजोगुणस्य vनेता निर्वाहकः। हे अग्ने, तादृशस्त्वं vयत्र यस्यां vदिवि सूर्यरूपो भूत्वा vनियुद्भिः रथे नितरां योज्यमानाभिः vशिवाभिः उत्तमाभिरश्वजातिभिः vसचसे समवैषि, तस्यां दिवि vमूर्धानं शिरोवदुन्नतस्थितिं सूर्यं vदधिषे धारयसि । कीदृशं मूर्धानम् ? vस्वर्षाम्। सुवः (स्वः ?) स्वर्गे स्यति सर्वदा तिष्ठतीति स्वर्षाः, तं स्वर्षाम्। सोमपाशब्दवत् पुंलिङ्गोऽयम् । हे vअग्ने, त्वमस्मिन् यज्ञे vहव्यवाहं हविषः प्रापिकां vजिह्वां ज्वालां vचकृषे करोषि ॥१४-१५॥

[इति चतुर्दशेऽध्याये प्रथमोऽनुवाकः ॥१५॥]

आ– प्रथमां स्रुचमुपदधाति आग्नेयेन यजुषा 'अग्नेष्ट्वा' इति। आग्नेय्या ऋचा वा गायत्र्या। हे स्रुक् vअग्नेः संबन्धिना तेजसा त्वां स्रुचं vसादयामि ॥

'अग्निर्मूर्धा' इति व्याख्यातो मन्त्रः ॥

द्वितीयामुपदधाति ऐन्द्रेण यजुषा – 'इन्द्रस्य' इति। vइन्द्रस्य संबन्धिना vओजसा बलेन त्वां स्रुचं vसादयामि। द्वितीयां चोपदधाति अनया ऋचा ॥१४॥

'भुवो यज्ञस्य' इति। ऋषिस्त्रिशिराः। आग्नेयी त्रिष्टुप्। हे श्रीभगवन् vअग्ने, तव vस्वर्षां प्रतिपक्षदहनसमर्थां vहव्यवाहम्। हव्यं वहतीति हव्यवाट्। तां हविषो वोढ्रीं vजिह्वां ज्वालालक्षणां जिह्वां vचकृषे करोषि। यत्र vदिवि vमूर्धानं धारयसि। अथानन्तरमेव vभुवः भवनशीलस्य vयज्ञस्य यागस्य देवतोद्देशेन द्रव्यत्यागात्मकस्य त्वं vनेता असि। vरजसः च देवयानपितृयाणमार्गानुसारिणः vरजसः उदकस्य च यज्ञपरिणामभूतस्य नेता प्रापकोऽसि जगदुत्पत्त्यर्थम्। कुत्र नेतेति तदाह– 'यत्रा नियुद्भिः सचसे शिवाभिः'। vयत्र यस्मिन् स्थाने vनियुद्भिः vशिवाभिः शान्ताभिर्नियुद्भिः अश्वैः। नियुतो वायोरित्यादिष्टोपयोजनानीति वचनात्। नियुत इति वायोरश्वनाम। नियुद्भिः अश्वैः सहितो वायुर्यत्र वर्तते तत्र त्वं vसचसे इति संबन्धः ॥१५॥

---

11. H2-3 ज्वलनेन for बलेन
14. B1 om. ज्वालालक्षणां जिह्वां
15. B1 om. यागस्य
19. H3 अनु for यत्र

[अथ द्वितीयोऽनुवाकः ।]

प्रथमेऽनुवाके यजमानजपादिस्रुगुपधानान्ता मन्त्रा उक्ताः । द्वितीये तु स्वयमातृण्णादीष्टकोपधानमन्त्रा उच्यन्ते ॥

ध्रुवाऽसि धरुणाऽऽस्तृता विश्वकर्मणा ।
मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृꣳह ॥१॥

ध्रुवा । असि । धरुणा । आस्तृतेत्याऽस्तृता । विश्वकर्मणेति विश्वऽकर्मणा ।
मा । त्वा । समुद्रः । उत् । वधीत् ।
मा । सुपर्ण इति सुऽपर्णः । अव्यथमाना । पृथिवीम् । दृꣳह ॥ ठं ॥१॥

कात्यायनः – "स्वयमातृण्णां पुरुषे शर्करां छिद्रां ध्रुवासीति" (काश्रौ १७.४.१५) इति । शर्कराख्यानां क्षुद्रपाषाणानां मध्ये पुरुषप्रयत्नमन्तरेण या स्वत एव छिद्रयुक्ता सेयं शर्करा स्वयमातृण्णा, तां सुवर्णनिर्मिते पुरुषे 'ध्रुवाऽसि' इत्यादिभिर्मन्त्रैरुपदध्यादिति शेषः । तत्रायं प्रथमः– 'ध्रुवाऽसि धरुणाऽऽस्तृता विश्वकर्मणा । मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृꣳह' इति । हे स्वयमातृण्णे, त्वं ᵛध्रुवा स्थिरा ᵛअसि । कीदृशी त्वम् ? ᵛधरुणा भूमिरूपेण विश्वस्य धारयित्री । अत एव ᵛआस्तृता केनाप्यहिंसिता । ᵛविश्वकर्मणा जगत्कर्त्रा सुकृता सुष्ठु निर्मिता । ᵛसमुद्रः त्वां ᵛमा ᵛउद्वधीत् स्वोदरमध्ये निमज्जनलक्षणं वधं मा कार्षीत् । ᵛसुपर्णः पक्षिराजोऽपि सर्पोद्धरणवेलायां त्वामादाय ᵛमा उद्वधीत् दूरे परित्यागलक्षणं वधं मा कार्षीत् । एवं सति ᵛअव्यथमाना भयरहिता त्वं ᵛपृथिवीम् इमां ᵛदृꣳह दृढीकुरु ॥१॥

आ– स्वयमातृण्णामुपदधाति– 'ध्रुवाऽसि' इत्यादिभिस्तिसृभिः ऋग्भिः यजुषा । स्वयमातृण्णादेवत्योर्ध्वबृहती । ᵛध्रुवा ᵛअसि स्थिराऽसि । स्वत एव ᵛधरुणा च अन्येषां

2. S2 before प्रथमे adds चतुर्दशे; S2 °जपपुष्करपर्णाद्युपधानमन्त्राः for जपादिस्रुगुपधानान्ता मन्त्राः; S2 अनुवाके for तु
10. S2 पुरुषोपरि ध्रुवेत्यादिचतुर्भिर्ऋग्भिः स्वयमातृण्णामुपदधाति । कीदृशीं शर्कराम् ? पाषाणमयीम् । छिद्रां स्वाभाविकछिद्रयुताम् । सच्छिद्राश्ममयीष्टकैव स्वयमातृण्णोच्यत इति सूत्रार्थः । पाठस्तु for शर्कराख्यानां ... इति शेषः (L 11) (vide महीधर, VS 13.16)
13. S2 after धारयित्री adds विश्वं करोतीति विश्वकर्मा । अत एवास्तृता ।
14. S2 तेन for केन; P1 after अहिंसिता ins. आस्तृता विश्वकर्मणा सर्वकर्त्रा प्रजापतिनोपाहितासि इति भाष्यान्तरम् ; P1 after निर्मिता ins. तैत्तिरीयशाखायां सुकृतेत्यधिकपाठात्तदभिप्रायमिदं व्याख्यानम्; S2 after निर्मिता adds आस्तृता उपहिता ।
15. P1 S2 सर्पोधमन° for सर्पोद्धरण°
19. H2-3 om. अन्येषां

धारयित्री । ‘आस्तृता विश्वकर्मणा’ । विश्वकर्मा प्रजापतिः तेन सर्वस्य कर्त्रा आस्तृता आच्छादिता उपहिता चासि । एवं चेत् त्वां ब्रवीमि — ‘मा त्वा समुद्र उद्वधीत्’ । त्वा स्वयमातृण्णां त्वां समुद्रः रुक्मः मा उद्वधीत् मा उद्वध्यात् । ‘मा सुपर्णः’ । सुष्ठुपर्णः पुरुषः पुण्यपापलक्षणपक्षवान् मा उद्वधीत् । “रुक्मो वै समुद्रः पुरुषः सुपर्णः” (शब्रा ७.४.२.५) इति श्रुतेः । त्वं च अव्यथमाना अचलन्ती पृथिवीं दृꣳह दृढीकुरु ॥१॥

प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन् ।
व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ॥२॥
भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥३॥

प्रजापतिरिति प्रजाऽपतिः । त्वा । सादयतु । अपाम् । पृष्ठे । समुद्रस्य । एमन् ।
व्यचस्वतीम् । प्रथस्वतीम् । प्रथस्व । पृथिवी । असि ॥ क्लिल्यं ॥२॥
भूः । भूमिः । अदितिः । विश्वधाया इति विश्वऽधायाः । विश्वस्य । भुवनस्य । धर्त्री ।
पृथिवीम् । यच्छ । पृथिवीम् । दृꣳह । पृथिवीम् । मा । हिꣳसीः ॥ डुं ॥३॥

सा– अथ द्वितीयः – ‘प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन् । व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ॥ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः’ इति । हे स्वयमातृण्णे, प्रजापतिः अपां पृष्ठे उदकानामुपरि समुद्रस्य समुदनशीलस्योदकसंघातस्य एमन् । एतेर्धातोर्मनिन् । सप्तम्येकवचनम् । एमनि अवस्थाने सादयतु स्थापयतु । कीदृशीं त्वाम् ? व्यचस्वतीम् अभिव्यक्तियुक्तां प्रथस्वतीं विस्तारयुक्ताम् । त्वमपि प्रथस्व अस्यश्रितेः प्रथनं कुरु । किं च– त्वं पृथिव्यामुत्पन्नत्वात् पृथिवी असि । भूः असि सुखानां भावयित्र्यसि । भूमिः असि मृन्मयपृथिव्यभिमानिभूमिदेवताऽसि । अदितिः असि अखण्डनीयाऽसि । विश्वधायाः विश्वस्य पोषयित्र्यसि, तथा विश्वस्य भुवनस्य सर्वस्य लोकस्य धर्त्री धारयित्री असि । तादृशी त्वं पृथिवीं यच्छ नियतां कुरु । पृथिवीं दृꣳह दृढीकुरु । पृथिवीं मा हिꣳसीः पृथिव्या हिंसां मा कुरु ॥२–३॥

---

1. B1 om. विश्वकर्मा
2. H3 वा for च; B1 om. चेत्
4. B1 after °वधीत् adds इति ।
17. S2 अवसादने for अवस्थाने
20. S2 मृन्मया° ... °मानिनी° for मृन्मय° ... °मानि°

आ– ‘ प्रजापतिष्ट्वा ’। स्वयमातृण्णदेवत्याऽनुष्टुप् । [v]प्रजापतिः [v]त्वा स्वयमातृण्णां त्वाम् आसादयतु। आसादयितुं स हि समर्थः । स्थानविशेषमाह– ‘ अपां पृष्ठे समुद्रस्येमन् ’। [v]अपां [v]पृष्ठे अपामुपरि [v]समुद्रस्य समुदनस्य द्रवणधर्मयुक्तस्य उदकसंघातस्य [v]एमन्। इणो मनिन् , सप्तम्येकवचनम्। एमनि अवसादने । कथंभूतामवसादयतीति– [v]व्यचस्वतीं व्यञ्चनवतीं [v]प्रथस्वतीं पृथुत्वयुक्तां; प्रजापतिः आसादयत्विति संबन्धः । [v]प्रथस्व। प्रथ प्रख्याने। प्रजापतिना आसादिता त्वं प्रथस्व पृथुभावं गच्छ । यतस्त्वं [v]पृथिवी [v]असि अतो ब्रवीमि ॥२॥

‘ भूरसि ’ इति। स्वयमातृण्णदेवत्या प्रस्तारपङ्क्तिः। स्वभावत एव साच्छिद्रः पाषाणः स्वयमातृण्णा। [v]भूः [v]असि [v]भूमिः [v]असि [v]अदितिः [v]असि [v]विश्वधायाः। विश्वमस्यां निहितमिति विश्वधायाः । [v]विश्वस्य [v]भुवनस्य सर्वस्य भूतग्रामस्य [v]धर्त्री धारयित्री । यतस्त्वं पृथिवी जना (?) असि अतस्त्वं [v]पृथिवीं [v]यच्छ स्वात्मानं निगृह्णीष्व। [v]पृथिवीम् आत्मानं दृढीकुरु। [v]पृथिवीम् आत्मानं [v]मा [v]हिꣳसीः मा हन्याः ॥३॥

विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
अग्निष्ट्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन
तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥४॥

विश्वस्मै । प्राणाय । अपानायेत्यपऽआनाय । व्यानायेति विऽआनाय ।
उदानायेत्युत्ऽआनाय । प्रतिष्ठायै । प्रतिस्थाया इति प्रतिऽस्थायै । चरित्राय ।
अग्निः । त्वा । अभि । पातु । मह्या । स्वस्त्या । छर्दिषा । शंतमेनेति शंऽतमेन ।
तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद ॥ पाः ॥४॥

सा– अथ तृतीयः – ‘विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय । अग्निष्ट्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ’ इति । [v]विश्वस्मै सर्वस्मै प्राणापानव्यानोदानाख्यवायुवृत्तिलाभाय [v]प्रतिष्ठायै स्वगृहे स्थितिलाभाय [v]चरित्राय शास्त्रीया-

---

2. H2–3 om. स हि
3. H3 समुन्दनस्य for समुदनस्य
5. B1 व्यञ्चनयन्तीं for व्यञ्चनवतीं
6. H2–3 प्रख्यापने for प्रख्याने; B1 आसादयिता for आसादिता; B1 प्रथयस्व for प्रथस्व
10. B1 trans. भुवनस्य after सर्वस्व and om. भूतग्रामस्य
22. S2 प्राणायापानाय व्यानाय for प्राणापानव्यानोदानाख्य°

स्वयमातृण्णा-इष्टकामन्त्राः]

चरणाय, प्राणिनामेतस्य सर्वस्य सिद्ध्यर्थम् अयम् vअग्निः त्वामभितः vपातु रक्षतु । केन रक्षणमिति ? vमह्या vस्वस्त्या महत्या योगक्षेमसंपत्त्या vशंतमेन vछर्दिषा अत्यन्तसुखकारिणा गृहविशेषेण । तव स्वामिभूता या देवता vतया vदेवतया अनुगृहीता vध्रुवा स्थिरा सती vसीद इहोपविश । अङ्गिरसां चयनानुष्ठाने यथा त्वं ध्रुवा स्थिरा तद्वत् ॥४॥

आ– ' विश्वस्मै प्राणाय ' इति यजुषा च स्वयमातृण्णामुपदधाति । अस्य यजुषः स्वयमातृण्णा देवता vविश्वस्मै सर्वस्मै vप्राणाय सर्वप्राणार्थम् vअपानाय vव्यानाय vउदानाय vप्रतिष्ठायै । प्रति तिष्ठत्यनयेति प्रतिष्ठा । तस्मै (तस्यै ?) । vचरित्राय चरणाय त्वां सादयामीति शेषः । किं च– vअग्निः vत्वा vअभिपातु पालयतु । vमह्या महत्या vस्वस्त्या अविनाशेन । vछर्दिषा । छर्दिरिति गृहनाम । vशंतमेन सुखतमेन छर्दिषा गृहेण हेतुभूतेन सादयति । vतया vदेवतया vअङ्गिरस्वत् । अङ्गिरसा तुल्या vध्रुवा स्थिरा vसीद इहास्व ॥४॥

काण्डा॑त्काण्डात् प्ररोह॑न्ती पर॑षःपरुषस्परि॑ ।
एवा नो॑ दूर्वे॒ प्र त॑नु स॒हस्रे॑ण श॒तेन॑ च ॥५॥

काण्डा॑त्काण्डादिति॒ काण्डा॑त्ऽकाण्डात् । प्ररोह॒न्तीति॑ प्रऽरोह॑न्ती ।
पर॑षःपरुष इति पर॑षःऽपरुषः । परि॑ ।
ए॒व । न॒ः । दूर्वे॒ । प्र । त॒नु॒ । स॒हस्रे॑ण । श॒तेन॑ । च॒ ॥ ढि ॥५॥

सा– कात्यायनः – " मूलाग्रवतीं दूर्वां काण्डात्काण्डादिति " (काश्रौ १७.४.१८) इति । मूलाग्रोपेतां दूर्वां 'काण्डात्काण्डात्' इति मन्त्रद्वयेनोपदध्यादिति शेषः । तत्र प्रथम मन्त्रपाठस्तु– ' काण्डात्काण्डात् प्ररोहन्ती परुषःपरुषस्परि । एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ' इति । काण्डशब्दः स्तम्बवाची । यावन्तः काण्डा स्तम्बाः सन्ति तत्रैककस्मात् स्तम्बात् प्रकर्षेण दूर्वोत्पद्यते । एकस्मिन्नपि स्तम्बे यावन्ति परूंषि पर्वाणि सन्ति तत्रैककस्य पर्वणः परितः प्रकर्षेण दूर्वोत्पद्यते । हे दुर्वे, त्वं तत्तत्काण्डात् तत्तत्पर्वणः प्रकर्षेणोत्पद्यमाना वर्तसे । vपरुषःपरुषः vपरि vकाण्डात्काण्डात् सर्वतः vप्ररोहन्ती सती यथा शताङ्कुरा भवसि vएव एवमनेन प्रकारेण vनः अस्मदर्थं शतसंख्याकेन सहस्रसंख्याकेन च त्वदीयभेदेन तत्तत्स्वरूपं vप्रतनु विस्तृतं कुरु ॥५॥

2. S2 गृहेण अत्यन्तसुखकारणादिभिर्विशेषेण for अत्यन्त ... विशेषेण
9. B1 om. सुखतमेन; B1 सादयामि for सादयति
10. B1 विदास्व, H2–3 विश्वस्व for इहास्व
17. P1 मन्त्रेण for मन्त्रद्वयेन
19. S2 om. स्तम्बात्
23. P1 after कुरु । ins. हे दूर्वे एवं पुत्रपौत्रनप्त्रादिभिः शतसहस्रसंख्यैर्नोऽस्मान् प्रतनु विस्तारयेति भाष्यान्तरम् ।

आ– अग्निदृष्टां दूर्वेष्टकामुपदधाति– ' काण्डात्काण्डात् ', ' या शतेन ' इति द्वाभ्यामनुष्टुब्भ्याम् । अग्निदृष्टं दूर्वेष्टकादेवत्यम् । भूमौ जटाभिः संबद्धं पर्व काण्डम् । असंबद्धं पर्व परुः । Vकाण्डात्काण्डात् Vप्ररोहन्ती उद्यदङ्कुरवती । Vपरुषःपरुषः Vपरि पर्वणः परि प्ररोहन्ती च दूर्वा । यथा शताङ्कुरा त्वं भवसि । Vएव एवं Vनः अस्मान् हे Vदूर्वे, Vप्रतनु विस्तारय Vसहस्रेण Vशतेन Vच शतसहस्रसंख्याकैः पुत्रादिभिर्विस्तारयेति संबन्धः ॥५॥

या शतेनं प्रतनोषिं सहस्रेण विरोहसि ।
तस्यांस्ते देवीष्टके विधेमं हविषां वयम् ॥६॥

या । शतेनं । प्रतनोषीतिं प्रऽतनोषिं । सहस्रेण । विरोहसीतिं विऽरोहसि ।
तस्याः । ते । देवि । इष्टके । विधेमं । हविषां । वयम् ॥ चिं ॥६॥

सा– अथ द्वितीयः – ' या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयम् ' इति । हे दूर्वे, Vया त्वं शतसंख्याकेन स्वरूपेण Vप्रतनोषि अत्यन्तं विस्तारयसि, तथा सहस्रसंख्याकेन आकारेण Vविरोहसि, हे Vइष्टके, Vदेवि Vतस्याः Vते Vवयं Vहविषा Vविधेम परिचरेम ॥६॥

आ– ' या शतेन प्रतनोषि ' । Vया दूर्वा त्वं काण्डानां Vशतेन Vप्रतनोषि अङ्कुराणां Vसहस्रेण Vविरोहसि । ' तस्यास्ते देवीष्टके ' । हे Vदेवि Vइष्टके दूर्वेष्टके, Vतस्याः Vते तव Vहविषा सह स्थानं Vवयं Vविधेम ॥६॥

यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥७॥

याः । ते । अग्ने । सूर्ये । रुचः ।
दिवम् । आतन्वन्तीत्याऽतन्वन्ति । रश्मिभिरितिं रश्मिऽभिः ।
ताभिः । नः । अद्य । सर्वाभिः । रुचे । जनाय । नः । कृधि ॥ छं ॥७॥

सा– कात्यायनः – " यास्त इति द्वियजुषम् " (काश्रौ १७·४·२०) इति । ' यास्ते ' इति मन्त्रद्वयेन मन्त्रद्वयोपेतामिष्टकामुपदध्यात् । तत्र प्रथममन्त्रपाठस्तु– ' यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः । ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ' इति । हे Vअग्ने, Vसूर्ये सूर्यमण्डले अवस्थिताः

---

11. P1 after अत्यन्तं adds आत्मानं

12. S2 om. ते

24. S2 om. अवस्थिताः

ते त्वदीयाः याः रुचः दीप्तयः रश्मिभिः रश्मिस्वरूपेण दिवम् अन्तरिक्षम् आतन्वन्ति सर्वतो व्याप्नुवन्ति। या अग्नेर्दीप्तयस्ता एव सूर्योदयकाले सूर्यरश्मयो भवन्ति। एतच्च तैत्तिरीये अग्निहोत्रब्राह्मणे समाम्नातम्- "उद्यन्तं वाऽऽदित्यमग्निरनु समारोहति" (तैब्रा २.१.२.१३) इति। ताभिः सर्वाभिः दीप्तिभिः अद्य अस्मिन् दिने नः अस्मदर्थं नः अस्मदीयाय पुत्रभृत्यादिजनाय च रुचे अधिकप्रकाशाय कुरु ॥७॥

आ- द्वियजुषमुपदधाति इन्द्राग्निभ्यां दृष्टाभ्यां द्वाभ्यामनुष्टुब्भ्यां मन्त्रलिङ्गोक्तदेवताभ्याम्- 'यास्ते अग्ने' इति। द्वियजुषमाग्नेयमानुष्टुभम् इन्द्राग्निभ्यां दृष्टम्। हे श्रीभगवन् अग्ने, तव सूर्ये अवस्थिताः याः ते रुचः दीप्तयः दिवं द्युलोकम् आतन्वन्ति प्रकाशयन्ति ताभिः सर्वाभिः रुग्भिः रश्मिभिः अद्य नः अस्मान् जनाय जनानां च रुचे विवक्षितार्थ-प्रकाशनाय [नः] अस्मान् [कृधि] त्वं [कुरु] ॥७॥

या वो॑ दे॒वाः सूर्ये॒ रुचो॒ गोष्वश्वे॑षु॒ या रुच॑ः ।
इन्द्रा॑ग्नी॒ ताभि॒ः सर्वा॑भी॒ रुचँ॑ नो धत्त बृहस्पते ॥८॥

या । वः॒ । दे॒वाः॒ । सूर्ये॑ । रुच॑ः । गोषु॑ । अश्वे॑षु । याः । रुच॑ः ।
इन्द्रा॑ग्नी॒ इतीन्द्रा॑ग्नी । ताभि॑ः । सर्वा॑भिः । रुच॑म् । नः॒ । ध॒त्त॒ । बृ॒ह॒स्प॒ते ॥ ग्नेँ ॥८॥

सा- अथ द्वितीयः - 'या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः। इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते' इति। हे देवाः, वः युष्माकं संबन्धिन्यः सूर्यमण्डले वर्तमाना याः रुचः दीप्तयः सन्ति, तथा गोषु अश्वेषु च या दीप्तयः सन्ति हे इन्द्राग्नी, हे बृहस्पते, त्रयोऽपि यूयं नः अस्मदर्थं रुचं धत्त ॥८॥

आ- 'या वो देवाः'। वः युष्माकं सूर्ये याः रुचः दीप्तयः, गोषु [अश्वेषु च] याः रुचः [सन्ति], हे इन्द्राग्नी, हे बृहस्पते, ताभिः सर्वाभिः रुग्भिर्दीप्तिभिः रुचं दीप्तिं नः अस्मभ्यं धत्त दत्तेति संबन्धः ॥८॥

वि॒राड्ज्योति॑रधारयत् स्व॒राड्ज्योति॑रधारयत् ।
प्र॒जाप॑तिष्ट्वा सादयतु पृ॒ष्ठे पृ॑थि॒व्या ज्योति॑ष्मतीम् ॥९॥
विश्व॑स्मै प्रा॒णाया॑पा॒नाय॑ व्या॒नाय॒ विश्वं॒ ज्योति॑र्यच्छ ।
अ॒ग्निष्टेऽधि॑पति॒स्तया॑ दे॒वत॑याऽङ्गि॒र॒स्वद् ध्रु॒वा सी॑द ॥१०॥

---

4. S2 om. च

9. H3 om. सर्वाभिः; B1 ऋग्भिः for रुग्भिः; H2-3 om. रश्मिभिः; B1 विवक्षितार्थे, H2-3 विवक्षितार्थं for विवक्षितार्थ°

[स्वयमातृण्णा-इष्टकामन्त्राः

विराळिति विऽराट् । ज्योतिः । अधारयत् । स्वराळिति स्वऽराट् । ज्योतिः । अधारयत् । प्रजापतिरिति प्रजाऽपतिः । त्वा । सादयतु । पृष्ठे । पृथिव्याः । ज्योतिष्मतीम् ॥ढिं॥९॥ विश्वस्मै । प्राणाय । अपानायेत्यपऽआनाय । व्यानायेति विऽआनाय । विश्वम् । ज्योतिः । यच्छ । अग्निः । ते । अधिपतिरित्यधिऽपतिः । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद ॥ डूं ॥१०॥

सा– कात्यायनः – " विराट् स्वराडिति रेतःसिचौ प्रतिमन्त्रम् " (काश्रौ १७·४·२२) इति । रेतःसिचाख्ये द्वे इष्टके ' विराट् ', ' स्वराट् ' इति एकैकेन मन्त्रेणोपदध्यात् । तयोः पाठस्तु– ' विराड्ज्योतिरधारयत् स्वराड्ज्योतिरधारयत् ' इति । विशेषेण राजत इति विराट् । एवंविधा रेतःसिचाख्या प्रथमेष्टका अस्मदनुग्रहार्थं ज्योतिः अग्निम् अधारयत् धारयतु । स्वयं राजत इति स्वराट् । एतत्समाख्या द्वितीयेष्टका ज्योतिः आदित्याख्यम् अधारयत् । " विराडयं लोकः स इममग्निं ज्योतिर्धारयत्यसौ वै लोकः स्वराट् सोऽसुमादित्यं ज्योतिर्धारयति " (द्र. शब्रा ७·४·२·२३) इति श्रुतेः ।।

कात्यायनः – " प्रजापतिरिति विश्वज्योतिषम् " (काश्रौ १७·४·१३) इति । विश्वज्योतिः-संज्ञकामिष्टकां ' प्रजापतिष्ट्वा ' इति मन्त्रेण उपदध्यात् । पाठस्तु– ' प्रजापतिष्ट्वा सादयतु पृष्ठे पृथिव्या ज्योतिष्मतीम् । विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ । अग्निष्टेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ' इति । पृथिव्याः पृष्ठे उपरि ज्योतिष्मतीं ज्योतिषोपेतां त्वा त्वामिष्टकां प्रजापतिः सादयतु स्थापयतु । विश्वस्मै सर्वस्मै प्राणादिसंपत्त्यर्थं विश्वं ज्योतिः सर्वं ज्योतिः यच्छ । हे इष्टके, त्वं गृह्णीष्व । अग्निः च ते तव अधिपतिः स्वामी देवता । तया देवतया ध्रुवा स्थिरा सती सीद उपविश । अङ्गिरस्वत् । पुरा अङ्गिरसां चयनाख्ये कर्मणि यथा स्थिराऽऽसीः तद्वदत्रापीत्यर्थः ॥९–१०॥

आ– रेतःसिचावुपदधाति– ' विराड् ज्योतिः ' इति । विराडयं लोकः, स्वराडसौ लोकः । ' प्रजापतिष्ट्वा ' । ज्योतिषानि यजूंषि । ' विराड्ज्योतिरधारयत् ' । विराट् अयं लोकः ज्योतिः इममग्निम् अधारयत् । द्वितीयामुपदधाति– ' स्वराट् ' इति । स्वराट् असौ लोकः ज्योतिः आदित्यम् अधारयत् धारयाति । विश्वज्योतिषमुपदधाति– ' प्रजापतिष्ट्वा ' इति । पृथिव्याः पृष्ठे उपरि ज्योतिष्मतीं ज्योतिषा संयुक्तां विश्वज्योतिषम् इष्टकां त्वां प्रजापतिः सादयतु ॥९॥

किमर्थमिति ? विश्वस्मै सर्वस्मै प्राणाय प्राणनार्थं जीवनार्थम् । अपानाय । अप अवाग् व्यापारार्थम् । व्यानाय अपानदानयोः विशेषतः संबन्धव्यापारार्थम् । विश्वं ज्योतिः इष्टकां यच्छ निगृह्णीष्व ॥

10. S2 om. अग्निम्

28. H3 व्यापनार्थम् for व्यापारार्थम् ।

स्वयमातृण्णा–इष्टकामन्त्राः ।

▼अग्निः ▼ते ▼अधिपतिः अग्निश्च तवाधिपतिः त्वां सादयतु । ▼तया ▼देवतया ▼अङ्गिरस्वत् अङ्गिरसा तुल्या ▼ध्रुवा ▼सीद ॥१०॥

मधुश्च माधवश्च वासन्तिका ऋतू अग्नेरन्तःश्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
वासन्तिका ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु
तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ॥११॥

मधुः । च । माधवः । च । वासन्तिकौ । ऋतू इत्यृतू ।
अग्नेः । अन्तःश्लेष इत्यन्तःऽश्लेषः । असि ।
कल्पेताम् । द्यावापृथिवी इति द्यावापृथिवी । कल्पन्ताम् । आपः । ओषधयः ।
कल्पन्ताम् । अग्नयः । पृथक् । मम । ज्यैष्ठ्याय । सव्रता इति सऽव्रताः ।
ये । अग्नयः । समनस इति सऽमनसः ।
अन्तरा । द्यावापृथिवी इति द्यावापृथिवी । इमे इतीमे ।
वासन्तिकौ । ऋतू इत्यृतू । अभिकल्पमाना इत्यभिऽकल्पमानाः ।
इन्द्रमिवेतीन्द्रम्ऽइव । देवाः । अभिसंविशन्त्वित्यभिऽसंविशन्तु ।
तया । देवतया । अङ्गिरस्वत् । ध्रुवे इति ध्रुवे । सीदतम् ॥ जैं ॥११॥

सा– कात्यायनः – "ऋतव्ये मधुश्च माधवश्चेति" (काश्रौ १७·४·२४) इति । ऋतव्याख्ये द्वे इष्टके उपदध्यादिति शेषः । पाठस्तु– 'मधुश्च माधवश्च वासन्तिका ऋतू अग्नेरन्तःश्लेषोऽसि । कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः। ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे । वासन्तिका ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम्' इति । ▼मधुः चैत्रो मासः, ▼माधवः वैशाखः । तावुभौ वसन्तसंबन्धिनौ ऋत्ववयवौ । हे तादृश वसन्ताख्य ऋतो, त्वं चीयमानस्य ▼अग्नेः ▼अन्तःश्लेषः ▼असि । यथा कुड्यस्यान्तर्दार्ढ्यार्थं काष्ठपाषाणादयः श्लिष्यन्ते तद्वत् । ▼मम अग्निं चिन्वतो यजमानस्य ▼ज्यैष्ठ्याय उत्कर्षार्थमिमे द्यावापृथिव्यौ ▼कल्पेतां स्वोचितमुपकारं संपादयताम् । ▼आपः च ▼ओषधयः च ▼कल्पन्तां स्वोचितमुपकारं

---

23. P1 after चीयमान° ins. संवत्सररूप°

25. S1 om. कल्पेतां

संपादयन्तु । समानं व्रतं कर्म येषां ते [v]सव्रताः । एकस्मिन् कर्मण्यवस्थिता आहवनीयाद्यग्नयः अपि [v]पृथक् [v]कल्पन्तां प्रत्येकं स्वस्वोचितव्यापारं संपादयन्तु । किं च– [v]इमे [v]द्यावापृथिवी [v]अन्तरा अनयोर्द्यावापृथिव्योर्मध्ये वर्तमानाः [v]समनसः एकमनस्काः [v]ये [v]अग्नयः ते सर्वेऽपि वसन्तसंबन्धिनौ [v]ऋतू ऋत्ववयवौ [v]अभिकल्पमानाः सर्वतः संपादयन्तः एतत्कर्म [v]अभिसंविशन्तु । तत्र दृष्टान्तः – [v]इन्द्रम् [v]इव [v]देवाः । यथा अन्ये सर्वे देवा इन्द्रमभितः सेवन्ते तद्वत् । हे ऋतव्ये इष्टके, युवां [v]तया [v]देवतया अङ्गिरसां कर्मणीव [v]ध्रुवे स्थिरे सत्यौ [v]सीदतम् उपविशतम् ॥११॥

आ– ऋतव्ये उपदधाति– ' मधुश्च ' इति । वसन्तर्तुदेवत्यं यजुः । [v]मधुः चैत्रो मासः, [v]माधवः वैशाखो मासः । तौ मिलित्वा वसन्तऋतुः । [v]वासन्तिकौ [v]ऋतू । द्विवचनमविवक्षितम् । स्वार्थे तद्धितः । वसन्त ऋतुः । यद्वा– वसन्तस्य संबन्धिनौ मासौ वासन्तिकौ मधुमाधवौ ऋतू । सः (त्वं) [v]अग्नेः संवत्सराख्यस्य [v]अन्तःश्लेषः [v]असि । अन्तः मध्ये व्यवस्थितः श्लेषः असि आश्लेषकारोऽसि तस्य च । [v]कल्पेतां [v]द्यावापृथिवी द्यावापृथिव्यौ । [v]ज्यैष्ठ्याय ज्येष्ठभावायेत्यनुषङ्गः । [v]आपः [v]कल्पन्तां ज्यैष्ठ्याय । [v]ओषधयः च ज्यैष्ठ्याय कल्पन्ताम् । [v]अग्नयः ज्यैष्ठ्याय कल्पन्ताम् । [v]पृथक् [v]मम च तव च पृथक् नाना कल्पन्तामिति संबन्धः । स्वयमातृण्णा दूर्वेष्टका द्वियजू रेतःसिचौ विश्वज्योतिः ऋतव्ये इत्यादिना आग्नेय्येष्टकाः पृथक् नानाभूताः ज्यैष्ठ्याय ज्येष्ठभावाय [v]सव्रताः समानकर्माणः । समानं हि कर्म इष्टकानामिष्टका (अग्नि ?) चयनं नाम । किं च– [v]ये [v]समनसः समानमनस्काः [v]अग्नयः [v]अन्तरा मध्ये [v]इमे [v]द्यावापृथिवी द्यावापृथिव्यौ च । [v]वासन्तिकौ वासन्तिकौ [v]ऋतू । वासन्तिकः स्वार्थे तद्धितः । वसन्तऋतुश्च (श्च ?) । वचनव्यत्ययः । [v]अभिकल्पमानाः । एवं कल्पमाना अग्न्यादयः सर्वाः इष्टकाः देवाः परिचरणार्थम् [v]इन्द्रम् [v]इव इमं वसन्तऋतुम् [v]अभिसंविशन्तु आसादयन्तु । ' तया देवतया ' इति । [v]तया [v]देवतया [v]अङ्गिरस्वद् [v]ध्रुवे [v]सीदतम् हे । ऋतव्ये इष्टके, सीदतम् ॥११॥

---

1. P1 after अवस्थिताः adds येऽग्नयः
8. H3 after ऋतुः ins. अभूत्; H2 om. वसन्तऋतुः ... आश्लेषकारोऽसि (L 11)
11. B1 om. आश्लेषकारोऽसि
12. H2-3 अन्यत्रापि for इति; H2-3 om. अग्नयः ज्यैष्ठ्याय कल्पन्ताम् (L 13)
13. B1 om. तव च
14. B1 पृथक् पृथक् for पृथक्
15. B1 after ज्यैष्ठ्याय adds ज्येष्ठतमाय
19. B1 एवं for इमं
21. H2-3 after सीदतम् add ध्रुवस्या (स्था ?)ने सीदतम्

स्वयमातृण्णा-इष्टकामन्त्राः]

अषाळ्हाऽसि सहमाना सहस्वारातीः सहस्व पृतनायतः ।
सहस्रवीर्याऽसि सा मा जिन्व ॥१२॥

अषाळ्हा । असि । सहमाना ।
सहस्व । अरातीः । सहस्व । पृतनायत इति पृतनाऽयतः ।
सहस्रवीर्येति सहस्रऽवीर्या । असि । सा । मा । जिन्व ॥ छिं ॥१२॥

सा– कात्यायनः– " अषाळ्हाऽसीत्यषाळ्हाम् " (काश्रौ १७.४.२५) इति । अषाढसंज्ञकामिष्टकाम् 'अषाळ्हाऽसि' इति मन्त्रद्वयेन उपदध्यादिति शेषः। तत्रायं प्रथमः– 'अषाळ्हाऽसि सहमाना सहस्वारातीः सहस्व पृतनायतः। सहस्रवीर्याऽसि सा मा जिन्व' इति। हे इष्टके, त्वम् अषाळ्हा केनाप्यपरिभूता सहमाना विरोधिनः परिभवशीला असि । ये अस्मभ्यं दातव्यं धनं न प्रयच्छन्ति तथाविधाः अरातीः शत्रून् सहस्व अभिभव । पृतनायतः ये च संग्राममिच्छन्तः शत्रवस्तानपि सहस्व । किं च– या त्वं सहस्रवीर्या स्वभावतः सहस्रधा वीर्यवती असि, सा त्वं मा मां जिन्व प्रीणय ॥१२॥

सहस्वेमा अभिमातीः सहस्व पृतनायतः ।
सहस्व सर्वं पाप्मानꣳ सहमानाऽस्योषधे ॥१३॥(२)॥

सहस्व । इमाः । अभिमातीरित्यभिऽमातीः । सहस्व । पृतनायत इति पृतनाऽयतः ।
सहस्व । सर्वम् । पाप्मानम् । सहमाना । असि । ओषधे ॥ जां ॥१३॥(२)॥

सा– अथ द्वितीयः – 'सहस्वेमा अभिमातीः सहस्व पृतनायतः। सहस्व सर्वं पाप्मानꣳ सहमानाऽस्योषधे' इति। हे ओषधे इष्टके, इमाः अभिमातीः शत्रुभूताः प्रजाः सहस्व अभिभव, तथा पृतनायतः संग्रामकाङ्क्षिणः शत्रून् सहस्व । सहमाना त्वं स्वभावतः अभिभवनशीला असि। अतस्त्वं सर्वं पाप्मानं सहस्व अभिभव ॥१३॥

[इति चतुर्दशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

आ– 'अषाळ्हाऽसि' इति, 'सहस्वेमाः' इति द्व्यृचं सविता अपश्यत् । देवा अपश्यन् । इष्टकादेवत्येऽनुष्टुभौ । नाम्ना अषाळ्हा असि परस्य तेजोऽसहन्ती असि । श्रुत्यभिप्रेतमिदं नाम । सहमाना च अभिभवनशीला च स्वभावतः । अतस्त्वां ब्रवीमि–

19. S2 after स्वभावतः adds सर्वं

'सहस्वाराती: '। Vअरातीः अदानशीलान् शत्रून् Vसहस्व अभिभव । ये च Vपृतनायतः । पृतना संग्रामः, आत्मनो ये संग्राममिच्छन्ति ते पृतनायतः । तानपि Vसहस्व अभिभव । किं च– यतस्त्वं स्वभावतः Vसहस्रवीर्या Vअसि सहस्रधा वीर्यवती असि, अतः Vसा त्वं Vमा मां Vजिन्व प्रीणय ॥१२॥

Vसहस्व Vइमाः Vअभिमातीः इमान् शत्रून् सहस्व अभिभव । Vपृतनायतः संग्रामकाङ्क्षिणः Vसहस्व । हे Vओषधे हे इष्टके, यतस्त्वं स्वभावतः Vसहमाना Vअसि, अतस्त्वं Vसर्वं Vपाप्मानं सर्वं पापं Vसहस्व अभिभव ॥१३॥

[तृतीयोऽनुवाकः ।]

द्वितीयेऽनुवाके स्वयमातृण्णादीष्टकोपधानमन्त्रा उक्ताः । तृतीये तु कूर्माभ्यञ्जनमन्त्रा उच्यन्ते ॥

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥१॥

मधु । वाताः । ऋतायते । ऋतयत इत्यृतऽयते । मधु । क्षरन्ति । सिन्धवः ।
माध्वीः । नः । सन्तु । ओषधीः ॥ ङां ॥१॥

सा– कात्यायनः – " कूर्मं दधिमधुघृतैरनक्ति मधु वाता इति " (काश्रौ १७.४.१७) इति । ' मधु वाताः ' इति मन्त्रत्रयेण दध्यादिभिः कूर्ममञ्ज्यात् । तत्र प्रथममन्त्रपाठस्तु– ' मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ' इति । ऋतं यज्ञमात्मन इच्छन्तीति ऋतायत्, तस्मै Vऋतायते । दीर्घश्छान्दसः । यजमानाय । Vवाताः वायवः Vमधु Vक्षरन्ति मधुररसं स्रावयन्ति । Vसिन्धवः समुद्राश्च मधुररसं स्रावयन्ति । Vओषधीः ओषधयोऽपि Vनः अस्मदर्थं Vमाध्वीः मधुरसोपेताः Vसन्तु ॥१॥

---

1. H2–3 ते for ये
3. H2–3 om. अतः सा त्वं
5. B1 om. शत्रून्
15. P1 मन्त्रेण for मन्त्रत्रयेण
17. S2 om. ऋतायते । दीर्घश्छान्दसः; P1 ऋतायतेति for ऋतायते
19. P1 after सन्तु ins. ऋतायते यजमानाय वाता वायवो मधु मधुमन्तः सुखकारिणो वान्त्विति शेषः । मधुमदित्यत्र ह्रस्य मतुप्-प्रत्ययस्य सर्वत्रानुषङ्गो द्रष्टव्यः । साकाङ्क्षत्वात् । Vसिन्धवः स्यन्दमाना नद्यः माध्वीर्मधुररसोपेता नोऽस्माकं सन्त्विति भाष्यान्तरम् ॥

कूर्माभ्यञ्जनमन्त्राः]

आ– कूर्मं दधिमधुघृतैरनक्ति– ‘ मधु वाताः ’ इत्यादि तृचं वैश्वदेवं गायत्रं गौतमार्षम् । Vमधु Vवाताः वायवः मधुमन्तः Vऋतायते । छान्दसो दीर्घः । ऋतयते ऋतं यज्ञं कर्तुमिच्छते यजमानाय । मधु छान्दसं पदम् । मधूनि । वाताः वायवः मधुमन्तो रसवन्तो वाताः वान्त्विति शेषः । Vमधु Vक्षरन्ति Vसिन्धवः स्यन्दमानाः नद्यः । क्षर क्षरणे । मधुधाराः प्रवाहान् स्रवन्तु । ‘ माध्वीर्नः सन्त्वोषधीः ’ । Vनः अस्माकम् Vओषधीः ओषधयः Vमाध्वीः मधुवत्यो रसवत्यः Vसन्तु ॥१॥

मधु नक्तमुतोषसो मधुमत् पार्थिवꣳ रजः ।
मधु द्यौरस्तु नः पिता ॥२॥

मधु । नक्तम् । उत । उषसः । मधुमदिति मधुऽमत् । पार्थिवम् । रजः ।
मधु । द्यौः । अस्तु । नः । पिता ॥ घिं ॥२॥

सा– अथ द्वितीयः – ‘ मधु नक्तमुतोषसो मधुमत् पार्थिव१ रजः । मधु द्यौरस्तु नः पिता ’ इति । Vनक्तं रात्रिः Vमधुमत् (?) अस्तु, Vउत अपि च Vउषसः मधुमत्यः सन्तु । Vपार्थिवं पृथिव्यात्मकमिदं Vरजः मातृभूतोऽयं लोकः मधुररसोपेतम् Vअस्तु । Vनः अस्माकं Vपिता पितृभूतः Vद्यौः द्युलोको मधुमत् मधुमान् Vअस्तु ॥२॥

आ– Vमधु Vनक्तं रात्रिः Vमधुमत् Vअस्तु । Vउत अपि च Vउषसः मधुमत् मधुमत्यः सन्तु । ‘ मधुमत् पार्थिवं रजः ’ । पृथिव्यात्मकमिदं Vरजः मातृभूतोऽयं लोकः Vमधुमत् रसवत् अस्तु । मधुमदित्यत्र श्रुतो मतुप् सर्वैर्मधुशब्दैरनुषज्यते । आकाङ्क्षितत्वात् विवक्षितत्वाच्च । Vमधु Vद्यौः Vअस्तु Vनः अस्माकं Vपिता पितृभूता द्यौः मधुमती अस्तु ॥२॥

मधुमान्नो वनस्पतिर्मधुमाँ३ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥३॥

मधुमानिति मधुऽमान् । नः । वनस्पतिः । मधुमानिति मधुऽमान् । अस्तु । सूर्यः ।
माध्वीः । गावः । भवन्तु । नः ॥ च्लं ॥३॥

---

2. H2 om. मधुमन्तः; H3 om. वायवो मधुमन्तः

5. B1 om. नः अस्माकम् ओषधीः

17. H2–3 साकाङ्क्षितत्वात्; for आकाङ्क्षितत्वात् B1 om. विवक्षितत्वात्

[कूर्माभ्यञ्जनमन्त्राः

सा– अथ तृतीयः – मधुमान्नो वनस्पतिर्मधुमाँ३ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ' इति। vवनस्पतिः अश्वत्थादि vनः अस्मदर्थं vमधुमान् vअस्तु माधुर्यरसोपेतो भवतु । vसूर्यः अपि vमधुमान् संतापराहित्यलक्षणमाधुर्यरसोपेतः अस्तु । तथा vगावः vनः अस्मदर्थं vमाध्वीः मधुरक्षीरोपेता vभवन्तु ॥३॥

आ– ' मधुमान्नो वनस्पतिः ' । vनःअस्माकं vवनस्पतिः यज्ञसाधनभूतः vमधुमान् अस्तु । वनस्पतिशब्देन सोमोऽप्युपलक्ष्यते । अतः सोमोऽपि मधुमानस्तु । ' मधुमानस्तु सूर्यः ' । vसूर्यः vमधुमान् vअस्तु यज्ञसाधनभूतः सूर्यः रसवानस्तु । vमाध्वीः vगावः vभवन्तु vनः । गावः मधुमत्यो रसवत्यः भवन्तु । गावः यज्ञसाधनभूताः धेनवः रश्मयो भवन्तु । " रसो वै मधु " (शब्रा ७.५.१.४) इति श्रुतेः ॥

अपां गम्भंन्त्सीद मा त्वा सूर्योऽभि ताप्सीन् माऽग्निर्वैश्वानरः ।
अच्छिन्नपत्राः प्रजा अंनुवीक्षस्वानु त्वा दिव्या वृष्टिः सचताम् ॥४॥

अपाम् । गम्भंन् । सीद । मा । त्वा । सूर्यः । अभि । ताप्सीत् । मा । अग्निः । वैश्वानरः । अच्छिन्नपत्रा इत्यच्छिन्नऽपत्राः । प्रजा इति प्रऽजाः । अनुवीक्षस्वेत्यनुऽवीक्षस्व । अनु । त्वा । दिव्या । वृष्टिः । सचताम् ॥ टूयौं ॥४॥

सा– कात्यायनः – " अपां गम्भन्निति तिसृभिर्धटयति " (काश्रौ ७.५.१.२) । [तत्र प्रथममन्त्रपाठः –] ' अपां गम्भन्त्सीद मा त्वा सूर्योऽभि ताप्सीन् माऽग्निर्वैश्वानरः । अच्छिन्नपत्राः प्रजा अनुवीक्षस्वानु त्वा दिव्या वृष्टिः सचताम् ' इति । हे कूर्म, vअपां vगम्भन् गम्भीरे स्थाने vसीद । एवमुपविष्टं त्वां vसूर्यः vमा vअभिताप्सीत् अभितो मा संतापयेत् । vवैश्वानरः सर्वेषां नराणामुदरस्थः vअग्निः त्वामपि vमा संतापयेत् । त्वम् vअच्छिन्नपत्राः अनवखण्डितपक्षा प्रजारूपा इष्टका vअनुवीक्षस्व । vदिव्या दिवि भवा vवृष्टिः च त्वाम् vअनु vसचतां सेवताम् ॥४॥

आ– उपदधाति– ' अपां गम्भन् ' इति, 'त्रीन् समुद्रान् ' इति च द्वे कूर्मदेवत्ये । आद्या पङ्क्तिः, द्वितीया त्रिष्टुप् । कूर्मश्च प्रजापतिरादित्यो वा । [तृतीया] इष्टकादेवत्या । द्यावापृथिवी [या] वा । ' अपां गम्भन् ' इति । गम्भिष्ठे गम्भीरे देशे त्वं vसीद । " एतद्वापां गम्भिष्ठं यत्रैष

6. H2-3 after अतः add तत्

7. H2-3 यज्ञस्य for यज्ञ°; H2-3 मधुमान् for रसवान्

8. B1 om. रसवत्यो

22. B1 ° देवता for देवत्या

23. H2-3 om. इति; H3 भरिगान्निष्ठे for गम्भिष्ठे

एतत् तपति " (शब्रा ७.५.१.८) इति श्रुतेः । तत्र चोपविष्टं सन्तं [V]मा [V]त्वा [V]सूर्यः [V]अभिताप्सीत् माऽभिसंतापयेत् । [V]मा [V]अग्निः [V]वैश्वानरः सर्वेषामुदरस्थः सर्वात्मा च सर्वज्ञोऽग्निर्माऽभिसंतापयेत् । ' अच्छिन्नपत्राः प्रजाः अनुवीक्षस्व ' । [V]प्रजाः इति इष्टका उच्यन्ते । [V]अच्छिन्नपत्राः " अरिष्टा अनार्ता " (शब्रा ७.५.१.८) इति श्रुत्या व्याख्याताः । अनवखण्डिपक्षाः प्रजाः त्वं च [V]अनुवीक्षस्व । ' अनु त्वा दिव्या वृष्टिः सचताम् ' । [V]दिव्या दिवि भवा [V]वृष्टिः इति प्रियवचनं प्रजानुरागयुक्तं वचनम् । त्वाम् [V]अनु [V]सचताम् सेवताम् ॥४॥

त्रीन्त्समुद्रान्त्समसृपत् स्वर्गानपां पतिर्वृषभ इष्टकानाम् ।
पुरीषं वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ।।५।।

त्रीन् । समुद्रान् । सम् । असृपत् । स्वर्गानिति स्वःऽगान् ।
अपाम् । पतिः । वृषभः । इष्टकानाम् ।
पुरीषम् । वसानः । सुकृतस्येति सुऽकृतस्य । लोके ।
तत्र । गच्छ । यत्र । पूर्वे । परेता इति पराऽइताः ॥ ण्वों ॥५॥

सा– अथ द्वितीयः – ' त्रीन्त्समुद्रान्त्समसृपत् स्वर्गानपां पतिर्वृषभ इष्टकानाम् । पुरीषं वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ' इति । हे कूर्म, [V]इष्टकानां [V]वृषभः वर्षिता [V]अपां [V]पतिः भव । [V]स्वर्गान् स्वर्गसाधनभूतान् [V]त्रीन् [V]समुद्रान् । समुद्रवन्ति स्वकारणात् समुद्गच्छन्ति इति समुद्राः लोकास्तान् [V]समसृपत् सम्यक् प्राप्तो भवसि । पुरुषव्यत्ययः । [V]यत्र यस्मिन् स्थाने [V]पूर्वे पुरातना ये कूर्मा अन्येष्वग्निषु उपहिताः सन्तः [V]परेताः पारंगताः [V]सुकृतस्य शोभनकृतस्याग्नेः [V]तत्र तस्मिन् [V]लोके स्थाने [V]पुरीषं शुष्कपांसुरूपां मृदं [V]वसानः आच्छादयन् [V]गच्छ ॥५॥

आ– ' त्रीन् समुद्रान् समसृपत् ' । यस्त्वं [V]त्रीन् [V]समुद्रान् । स्वकारणात् समुद्रवन्ति उद्गच्छन्तीति लोकाः समुद्राः, तान् त्रीन् लोकान् [V]समसृपत् समसृपः । अत्र व्यत्ययः । संसृप्तोऽसि । [V]तत्र लोकेष्वपि [V]स्वर्गान् भोगस्थानविशेषान् समसृपः । यश्च त्वम् ' अपां पतिः

---

1. B1 त्वा त्वां सूयोनाभि for मा त्वा सूर्योऽभि° (L 2)
3. B1 यज्ञो° for सर्वज्ञो°
4. H2–3 श्रुतेः भूत्वा व्याख्यातः for श्रुत्या व्याख्याताः
14. S2 om. हे कूर्म; S2 मेघः for भव
16. S2 om. पुरुषव्यत्ययः
21. H2–3 भौम° for भोग°

वृषभः इष्टकानाम् ’। Vवृषभः वर्षिता च। अतस्तं त्वां ब्रवीमि। पुरीषं Vवसानः पुरीषं पशून् आच्छादयन् Vसुकृतस्य शोभनकृतस्याग्नेः Vलोके स्थाने स्थित्वा च Vतत्र Vगच्छ। ‘ यत्र पूर्वे परेताः ’। ये Vपूर्वे कूर्माः अन्येष्वग्निषु उपहिताः सन्तः Vपरेताः परागताः ॥५॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्।
पिपृतां नो भरीमभिः ॥६॥

मही द्यौः ॥ म ॥६॥

सा– अथ तृतीयः – ‘ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। नो भरीमभिः ’ इति। अयं मन्त्रो नवमेऽध्याये व्याख्यातः ॥६॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा ॥७॥

विष्णोः कर्माणि ॥ व ॥७॥

सा– कात्यायनः– “ मुसलं दक्षिणमुलूखलाद्विष्णोः कर्माणीति ” (काश्रौ १७.५.३) इति। अत्र चयने उलूखलमुसले उपधातव्ये। तत्रोलूखलस्य दक्षिणभागे मुसलम् उपदध्यात्। पाठस्तु – ‘ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ’ इति। अयं मन्त्रः षष्ठेऽध्याये व्याख्यातः ॥७॥

आ– ‘ मही द्यौः ’, ‘ विष्णोः कर्माणि ’ इति द्वौ मन्त्रौ व्याख्यातौ ॥६–७॥

ध्रुवाऽसि धरुणेतो जज्ञे प्रथममेभ्यो योनिभ्यो अधि जातवेदाः।
स गायत्र्या त्रिष्टुभाऽनुष्टुभा च देवेभ्यो हव्यं वहतु प्रजानन् ॥८॥

ध्रुवा। असि। धरुणा। इतः। जज्ञे। प्रथमम्।
एभ्यः। योनिभ्य इति योनिऽभ्यः। अधि। जातवेदा इति जातऽवेदाः।
सः। गायत्र्या। त्रिष्टुभा। त्रिस्तुभेति त्रिऽस्तुभा। अनुष्टुभा। अनुस्तुभेत्यनुऽस्तुभा। च।
देवेभ्यः। हव्यम्। वहतु। प्रजानन्निति प्रऽजानन् ॥ ध्र्यौ ॥८॥

1. H2–3 om. तं; B1 पुरीषाः पुरु पशूनां सदन, H2–3 पुरीषं पशुपजनाच्छादयन् for पुरीषं पशून् आच्छादयन् (L 2)
3. H2–3 सर्वे कूर्माः for पूर्वे कूर्माः; B1 परंगताः, H2–3 पराहताः for परागताः
13. S2 om. मुसलम्

कूर्माभ्यञ्जनमन्त्राः]

सा- कात्यायनः – "ध्रुवाऽसीत्युखाम्" (काश्रौ १७.५.४) इति। 'ध्रुवाऽसि' इति मन्त्रद्वयेनोखाम् उपदध्यात् । तत्र प्रथममन्त्रपाठस्तु– 'ध्रुवाऽसि धरुणेतो जज्ञे प्रथममेभ्यो योनिभ्यो अधि जातवेदाः । स गायत्र्या त्रिष्टुभाऽनुष्टुभा च देवेभ्यो हव्यं वहतु प्रजानन्' इति। हे उखे, धरुणा धारयित्री त्वं ध्रुवा स्थिरा असि। इदानीमुखा स्तूयते– इतः अस्या उखायाः सकाशात् प्रथमम् आदौ जातवेदाः अग्निः जज्ञे प्रादुर्भूतो भवति। ततः एभ्यः योनिभ्यः स्वकारणेभ्यः अधि जज्ञे। ततः सः च गायत्र्यादिच्छन्दस्त्रयेण देवान् हविश्च प्रकर्षेण जानन् अस्मदीयं हव्यं हविः देवेभ्यः देवानां प्रीणनाय वहतु ॥८॥

आ– उखामुपदधाति– 'ध्रुवाऽसि' इति, 'इषे राय' इति द्वे उषादेवत्ये । आद्या त्रिष्टुप्, द्वितीया बृहती। ध्रुवा असि स्थिराऽसि । धरुणा असि धारिणी चासि। इदानीम् अग्न्यपत्यद्वारेणोखा स्तूयते– 'इतो जज्ञे प्रथममेभ्यो योनिभ्यः'। प्रथमम् आदौ इतः स्वकारणात् जज्ञे जाताऽसि। ततोऽनन्तरम् एभ्यः योनिभ्यः लोकेभ्यः अधि जज्ञे जातः। जातवेदाः त्वं जातप्रज्ञानः। सः इदानीं गायत्र्या त्रिष्टुभा अनुष्टुभा च। चतुर्विंशत्यक्षरात्मिकया च गायत्र्या, चतुश्चत्वारिंशदक्षरात्मिकया त्रिष्टुभा द्वात्रिंशदक्षरात्मिकया अनुष्टुभा सहितः देवेभ्यः अर्थाय प्रजानन् स्वाधिकारं विजानन् हव्यं हविः वहतु वह ॥८॥

इषे राये रमस्व सहसे द्युम्न ऊर्जे अपत्याय ।
सम्राळसि स्वराळसि सारस्वतौ त्वोत्सौ प्रावताम् ॥९॥

इषे । राये । रमस्व । सहसे । द्युम्ने । ऊर्जे । अपत्याय ।
सम्राळिति सम्ऽराट् । असि । स्वराळिति स्वऽराट् । असि ।
सारस्वतौ । त्वा । उत्सौ । प्र । अवताम् ॥ रैं ॥९॥

सा- अथ द्वितीयः– 'इषे राये रमस्व सहसे द्युम्न ऊर्जे अपत्याय। सम्राळसि स्वराळसि सारस्वतौ त्वोत्सौ प्रावताम्' इति। हे अग्ने, इषे अन्नार्थं राये धनार्थं सहसे बलार्थं द्युम्ने यशोनिमित्तम् ऊर्जे क्षीरादिरसार्थम् अपत्याय पुत्रार्थं रमस्व त्वमत्र क्रीडां कुरु। किं च– सम्यग्राजत इति सम्राट् असि। स्वयमेव राजत इति स्वराट् असि। एवंभूतं त्वाम् उत्सौ उत्सुकौ सारस्वतौ सरस्वतीसंबन्धिनावृग्वेद-सामवेदौ प्रावतां प्रकर्षेण रक्षताम्। तथा तैत्तिरीये श्रूयते– "ऋक्सामे वै सारस्वतावुत्सौ" (तैब्रा १.४.४.४) इति ॥९॥

9. H2-3 स्थिरासि
14. B1 om. स्वाधिकारं विजानम्
21. P1 om. राये धनार्थं
24. P1 after उत्साविति adds सारस्वतौ मनोवाचौ त्वामवताम् । मनो वै सरस्वान् वाक् सरस्वत्येतौ सारस्वताविति श्रुतेरिति भाष्यान्तरम्।

आ– इषे राये [इति] उखोच्यते । vइषे अन्नाय vरमस्व । रमु क्रीडायाम् । vराये धनाय रमस्व । vसहसे बलाय रमस्व । vद्युम्ने द्योतयते । यशो वा अन्नं वा द्युम्नम् । vऊर्जे पयोदध्याद्युपसेचनाय रमस्व । vअपत्याय पुत्रार्थम् । किं च– vसम्राट् vअसि स[र्व] जगत[:] राजा भवसि । vस्वराट् vअसि स्वराज्ययुक्तासि । vसारस्वतौ सरस्वतीसंबन्धिनौ vउत्सौ । उत्स इति कूपनाम । उत्स्यन्दनौ कूपौ । मनश्च वाक् च मनोवाचौ कूपाविव । मनस्तावत् सर्वशास्त्रार्थपरिज्ञानरसकूप इवोत्स्यन्दति । वागपि तत्प्रतिपादनं कुर्वन्ती कूप इवोत्स्यन्दति । ततः " मनो वै सरस्वान् वाक्सरस्वत्येतौ सारस्वता उत्सौ " (शब्रा ७·५·१·३१ । vत्वा उखां त्वां vप्रावताम् पालयताम् ॥९॥

अग्ने॑ युक्ष्वा हि ये तवाश्वा॑सो देव साधवः॑ ।
अरं॑ वह॑न्ति मन्यवे॑ ॥१०॥

अग्ने॑ । युक्ष्व । हि । ये । तव॑ । अश्वा॑सः । दे॒व । सा॒धव॑ः ।
अर॑म् । वह॑न्ति । म॒न्यवे॑ ॥ षां ॥१०॥

सा– कात्यायनः – " अग्ने युक्ष्वा हीति प्रत्यृचं स्रुवाहुती जुहोति " (काश्रौ १७·५·५) इति । ' अग्ने युक्ष्वा हि ' इति मन्त्रद्वयेन स्रुवेण द्वे आहुती जुहुयात् । तत्र प्रथममन्त्रपाठस्तु– ' अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्ति मन्यवे ' इति । हे vअग्ने, vदेव vतव संबन्धिनः vये केचित् vअश्वासः अश्वाः vसाधवः दान्ताः सन्तः vमन्यवे यज्ञार्थम् vअरं vवहन्ति सुष्ठु वहन्तीत्यर्थः । तानश्वान् vयुक्ष्व इह योजय ॥१७॥

आ– जुहोति– ' अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः ' । हे भगवन् vअग्ने, vदेव देवनादिगुणयुक्त vतव त्वत्संबन्धिनः vये vअश्वासः । अश्वा एव अश्वासः । vसाधवः जातिगुणसमन्विताः प्रशस्ताः ये अश्वाः तान् vयुक्ष्व । ' अरं वहन्ति मन्यवे ' । vमन्यवे यज्ञाय यज्ञार्थम् vअरम् अलं vवहन्ति vहि ॥१०॥

---

3. H2–3 om. किं च; B1 संजगत, H2–3 सगत for सर्वजगतः

5. B1 H2–3 उत्सदन्तौ for उत्स्यन्दनौ; B1 कूपाविकूपौ, H2–3 कूपापिप्पकूपौ for कूपाविव

6. B1 °वस्त्वर्थपरिज्ञाने, H2 शब्दार्थपरिज्ञान° for शास्त्रार्थपरिज्ञाम°

18. H2 om. जुहोति

20. H3 एव for ये

सुवर्णशकलस्थापनमन्त्राः]

युक्ष्वा हि देवहूतमाँ३ अश्वाँ३ अग्ने रथीरिव ।
नि होता पूर्व्यः सदः ॥११॥(३)॥

युक्ष्व । हि । देवहूतमानिति देवऽहूतमान् । अश्वान् । अग्ने । रथीरिवेति रथीःऽइव ।
नि । होता । पूर्व्यः । सदः ॥ ऌं ॥११॥

सा– अथ द्वितीयः – ' युक्ष्वा हि देवहूतमाँ३ अश्वाँ३ अग्ने रथीरिव । नि होता पूर्व्यः सदः ' इति । हे vअग्ने, vदेवहूतमान् देवानामतिशयेनाह्वातॄन् vअश्वान् vयुक्ष्व योजय । हिशब्दः प्रसिद्धवाची । प्रसिद्धेऽस्मिन् कर्मणीत्यर्थः । योजने दृष्टान्तः – vरथीरिव रथीरश्वानिवेति । रथस्वामी यथाश्वान् योजयति तद्वत् । किं च– त्वं vपूर्व्यः पुरातनः vहोता होमोत्पादको भूत्वा vनिषदः अस्मिन् यागस्थाने निषीद ॥११॥

[इति चतुर्दशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

आ– जुहोति– ' युक्ष्वा हि ' इति । अग्निदेवत्या गायत्री । ऋषिर्विरूपः । हे भगवन् vअग्ने देव । देवानाह्वयन्तीति देवहः । तेष्वतिशयेनाह्वयन्तीति देवहूतमाः, तान् vदेवहूतमान् । छान्दसो दीर्घः । vअश्वान् vयुक्ष्व । क इवेति । तदाह– vरथीरिव । छान्दसो दीर्घः । ईशब्दो मत्वर्थीयः । रथवानिव । कस्मात् पुनरेवमुच्यते ? ' नि होता पूर्व्यः सदः ' । सदसि होतृषदने vपूर्व्यः अग्र्यः प्रथमः vहोता निषीदेति शेषः ॥११॥

[इति चतुर्दशेऽध्याये तृतीयोऽनुवाकः ।]

[चतुर्थोऽनुवाकः]

तृतीयेऽनुवाके जुह्वाभ्यञ्जनादिमन्त्रा उक्ताः । चतुर्थेऽनुवाके तु हिरण्यपुरुषमुखादिच्छिद्रेषु सुवर्णशकले स्थापनादिमन्त्रा उच्यन्ते ॥

सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्ये अग्नेः ॥१॥

---

10. H2–3 om. जुहोति

11. B1 आह्वयतीति देवहूः for आह्वयन्तीति देवहः; B1 आह्वयतीति देवहूतमः for आह्वयन्तीति देवहूतमाः

12. H2–3 इवशब्दो for ईशब्दो

16. S2 °पुरुषाश्वादि° for °पुरुषमुखादि°

[सुवर्णशकलस्थापनमन्त्राः

सम्यक् । स्रवन्ति । सरितः । न । धेनाः । अन्तः । हृदा । मनसा । पूयमानाः ।
घृतस्य । धाराः । अभि । चाकशीमि । हिरण्ययः । वेतसः । मध्ये । अग्नेः ॥ स्त्रैं ॥१॥

सा– कात्यायनः – "प्रतिशिरः सप्त सप्त हिरण्यशकलानि मुखे करोति सम्यक् स्रवन्तीति" (काश्रौ १७.५.७) इति । वक्ष्यमाणहिरण्यपुरुषाश्वादीनां मध्ये एकैकस्य शिरःस्थितेषु सप्तसु सप्तच्छिद्रेष्वपि सप्त सप्त सुवर्णशकलानि क्षिपेत् । तत्र 'सम्यक् स्रवन्ति' इत्यनेन मन्त्रेण प्रथममास्ये स्थापयेत् । पाठस्तु– 'सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः । घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्ये अग्नेः' इति । अन्तः शरीरस्याभ्यन्तरे हृदा मनसा हृदयपुण्डरीकमध्यवर्तिना मनसा निरीक्षणयुक्तेनान्तःकरणेन पूयमानाः पवित्रीक्रियमाणाः धेनाः अन्नलक्षणाः । "अन्नं वै धेनाः" (शब्रा ७.५.२.११) इति श्रुतेः । घृतस्य दीप्तियुक्तस्य सुवर्णस्य धाराः सम्यक् स्रवन्ति सुष्ठु प्रवहन्ति । तत्र दृष्टान्तः – सरितः न इति । यथा नद्यः प्रवहन्ति तद्वत् । अपि च उख्याग्नेः मध्ये हिरण्ययः सुवर्णमयः वेतसः पुरुषोऽवभासते । तं पुरुषमभिलक्ष्य स्रवन्तीस्ता धाराः अभिचाकशीमि अहमभिपश्यामि ॥१॥

आ– मुखप्रभृतिषु सप्तसु प्राणायतनेषु सप्त हिरण्यशकलान् प्रास्यति– 'सम्यक् स्रवन्ति सरितः' इति । लिङ्गोक्तदेवत्या त्रिष्टुप् । हिरण्मयपुरुषाध्यासेनायं मन्त्रो व्याख्यायते । सम्यक् संगता धेनाः । धेना इत्यन्ननाम, अन्नानि । 'सम्यक् स्रवन्ति सरितो न धेनाः' इति । "अन्नं वै धेनाः" (शब्रा ७.५.२.११) इति श्रुतेः । धेनाः स्रवन्ति क्षरन्ति । कथमिति ? सरितः न सरित इव । यथा नद्यः समुद्रमभिस्रवन्ति । यथा– 'अन्तर्हृदा मनसा पूयमानाः' । यजमानसंबन्धिना अन्तः व्यवस्थितेन हृदा मनसा हृदयप्रतिष्ठेन मनसा पूयमानाः अन्तस्तत्त्वनिरीक्षणयुक्तेन मनसा पवित्रीक्रियमाणाः धेनाः सनातनं पुत्रवद्वत्सलं यजमानं प्रतिस्रवन्तीति संबन्धः । अपि च घृतस्य धाराः अपि अभिस्रवन्ति । 'हिरण्ययो वेतसो मध्ये अग्नेः' । अग्नेः संबन्धितया मध्ये हृदयमध्ये विहितो योऽयं हिरण्ययः वेतसः पुरुषः तं प्रतिस्रवन्ति । घृतस्य धाराः अहम् अभिचाकशीमि पश्यामीति संबन्धः ॥१॥

---

4. P1 पुरुषमुखादीनां for पुरुषाश्वादीनां
7. S2 तन्वो for मनसा
9. P1 with insertions above घृतस्य writes on the margin घृत क्षरणदीप्त्योः
11. S2 हिरण्मयः for हिरण्ययः
13. B1 प्रत्यस्यति for प्रास्यति
15. B1 संगवाः for संगताः
18. B1 om. यजमान ... पूयमानाः; H3 अन्तस्तन्वन्निरीक्षमाणा युक्ते for अन्तस्तत्त्व– युक्तेन (L 19)
19. B1 वसन्तं for वत्सलं
22. B1 H2–3 अपि चाकशीमि for अभिचाकशीमि; B1 om. पश्यामि

सुवर्णशकलस्थापनमन्त्राः]

ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा ।
अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ॥२॥
अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान् ।
सहस्रदा असि सहस्राय त्वा ॥३॥

ऋचे । त्वा । रुचे । भासे । ज्योतिषे । त्वा ।
अभूत् । इदम् । विश्वस्य । भुवनस्य । वाजिनम् ।
अग्नेः । वैश्वानरस्य । च ॥ शुं ॥२॥
अग्निः । ज्योतिषा । ज्योतिष्मान् । रुक्मः । वर्चसा । वर्चस्वान् ।
सहस्रदा इति सहस्रऽदाः । असि । सहस्राय । त्वा ॥ ग्लं ॥

सा– कात्यायनः – “उत्तरां द्वौ द्वौ नासिकयोर्ऋचे त्वेत्यक्ष्णोर्भासे त्वेति श्रोत्रयोरभूदिदमिति” (काश्रौ १७.५.९) इति । अवशिष्टानामितरेषां खानां सुवर्णशकलानां मध्ये द्वौ शकलौ ‘ऋचे त्वा’ इति मन्त्रद्वयेन नासिकाछिद्रयोः स्थापयेत् । द्वौ ‘भासे त्वा’ इति मन्त्रद्वयेन नेत्रयोः स्थापयेत् । ‘अभूत्’ इति मन्त्रद्वयेन द्वौ श्रोत्रयोः प्रक्षिपेत् । तेषां पाठस्तु– ‘ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा । अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ॥ अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान्’ इति । हे हिरण्यशकल, येयमृक् श्रुतिरूपा तदर्थं त्वां दक्षिणनासिकाछिद्रे प्रास्यामि । तथा हे हिरण्यशकल, या रुक् दीप्तिस्तदर्थं त्वां वामनासिकाछिद्रे प्रक्षिपामि । तथा भासे प्रकाशाय त्वां दक्षिणाक्षिगोले प्रक्षिपामि । तथा ज्योतिषे दीप्त्यै वामाक्षिगोले प्रक्षिपामि । इदं दक्षिणश्रोत्रे प्रक्षिप्यमाणं सुवर्णं विश्वस्य भुवनस्य सर्वस्य भूतजातस्य वाजिनम् अन्नं वीर्यरूपम् । “इन्द्रियं वै वीर्यं वाजिनम्” (ऐब्रा १.१३) इति श्रुत्यन्तरात् । तथा वैश्वानरस्य विश्वेषां नराणां स्वामिनः अग्नेः च वीर्यरूपम् अभूत् । अयम् अग्निः वामश्रोत्रगोलकस्थितेन हिरण्येन ज्योतिषा स्वयं ज्योतिष्मानभूत् । तथा रुक्मः रोचमानोऽग्निः वर्चसा हिरण्येन कान्त्या वर्चस्वान् च । कान्तिर्वर्चः इति भेदः ॥

कात्यायनः – “सहस्रदा इति पुरुषशिर उद्गृह्य” (काश्रौ १७.५.१४) पाठस्तु– ‘सहस्रदा असि सहस्राय त्वा’ इति । हे हिरण्यपुरुष, त्वं सहस्रदाः सहस्रस्य धनस्य दाता असि । ततः त्वा त्वां सहस्राय सहस्रधनलाभाय उद्गृह्णामीति शेषः ॥२–३॥

---

15. S2 श्रोत्र° for श्रुति°
16. S2 °छिद्रेण for °छिद्रे; S2 °गोलके for °गोले
19. P1 after अग्निः ins. चित्याख्यः
20. S2 हिरण्य° for हिरण्येन

आ– नासिकयोः प्रास्यति– ‘ ऋचे त्वा ’ इति । लिङ्गोक्तदेवत्या बृहती । ^{V}ऋचे ऋग्वेदाय ^{V}त्वा त्वां प्रास्यामीति शेषः । अथ ^{V}रुचे दीप्त्यै त्वां प्रास्यामीति शेषः । ^{V}भासे चक्षुषोर्भासे प्रकाशाय ^{V}त्वा त्वां प्रास्यामीति । ^{V}ज्योतिषे श्रोत्रयोर्ज्योतिषे दीप्त्यै प्रास्यामि । ^{V}अभूत् ^{V}इदं ^{V}विश्वस्य ^{V}भुवनस्य सर्वस्य भूतजातस्य इदं श्रोत्रं शब्दाद्यभिव्यक्त्यर्थम् अभूत् । ^{V}वाजिनम् ^{V}अग्नेः ^{V}वैश्वानरस्य च संबन्धि वाजिनं वाङ्मात्रस्याभिव्यञ्जनं वागिन्द्रियम् आग्नेयम् । तदर्थं त्वां प्रास्यामि । वैश्वानरस्य इति सर्वेन्द्रियाणामीश्वरसंबन्धितया ईश्वराधिष्ठितत्वम् ईश्वरात्मकत्वं च दर्शयति । चशब्दो दृगादेश्च । द्वितीयं(ये ?) श्रोत्रं(त्रे ?) प्रास्यामि ॥२॥

‘ अग्निर्ज्योतिषा ’ इति । लिङ्गोक्तदेवत्या बृहती । ^{V}अग्निः इव ^{V}ज्योतिषा ^{V}ज्योतिष्मान् । अतिशयेन ज्योतिःसंपन्नः । ^{V}रुक्मः इव ^{V}वर्चसा ^{V}वर्चस्वान् । श्रोत्रं पुरुषशिरः उद्गृह्णाति– ‘ सहस्रदा असि ’ इति । सहस्रस्य दाता ^{V}असि । ^{V}सहस्राय सहस्रमित्यपरिमितनाम । सहस्रलाभाय त्वामुद्गृह्णामि ॥३॥

आदित्यं गर्भं पयसा समङ्धि सहस्रस्य प्रतिमां विश्वरूपम् ।
परिवृङ्धि हरसा माऽभिमंस्थाः शतायुषं कृणुहि चीयमानः ॥४॥

आदित्यम् । गर्भम् । पयसा । सम् । अङ्धि ।
सहस्रस्य । प्रतिमामिति प्रतिऽमाम् । विश्वरूपमिति विश्वऽरूपम् ।
परि । वृङ्धि । हरसा । मा । अभि । मंस्थाः ।
शतायुषमिति शतऽआयुषम् । कृणुहि । चीयमानः ॥ ठौं ॥४॥

---

2. B1 पश्यामि, H2–3 प्राप्स्यामि for प्रास्यामि
3. B1 पश्यामि; H2–3 प्रास्यामि for प्रास्यामि; B1 om. second ज्योतिषे
4. H3 after इदं adds नः
6. B1 H2–3 प्राप्स्यामि for प्रास्यामि; B1 om. सर्वेन्द्रियाणाम् .. प्रास्यामि (L 8)
10. B1 after वर्चस्वान् adds वर्चस्वत्
11. H3 सहस्र° for सहस्रस्य
12. H3 °लिङ्गाय for °लाभाय

सुवर्णशकलस्थापनमन्त्राः]

स्रा– कात्यायनः – “ मध्येऽश्वान्योरुत्तरतः पूर्वापरे गोऽजयोश्च दक्षिणत आदित्यं गर्भमिति प्रतिमन्त्रम् ” (काश्रौ १७.५.१७) इति । अश्वादीनां मध्ये हिरण्यपुरुषमुपदध्यात् । तस्योत्तरतः प्राचीनदेशेऽश्वं स्थापयेत् । अविं पश्चिमे । तथास्या दक्षिणतः प्राचीनदेशे गां स्थापयेत् । अजं पश्चिमे स्थापयेत् । अत्र पुरुषादीनामेकैकस्य स्थापने ‘ आदित्यं गर्भम् ’ इत्याद्याः पञ्च मन्त्राः क्रमेण प्रयोक्तव्याः । तत्र पुरुषोपधानमन्त्रपाठस्तु– ‘ आदित्यं गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम् । परिवृङ्ग्धि हरसा माऽभिमꣳस्थाः शतायुषं कृणुहि चीयमानः ’ इति । हे अग्ने, त्वं चीयमानः सन् आदित्यम् अदितिदेवतायाः संबन्धि तत्कार्यं[रूपं] गर्भं गर्भसदृशमिमं पुरुषं पयसा क्षीरेण समङ्ग्धि सम्यगार्द्रीकुरु । सहस्रस्य प्रतिमां बहुधनस्य प्रतिमानभूतं विश्वरूपं परिवृङ्ग्धि परित्यज । हरसा त्वदीयज्वालारूपेण तेजसा मा अभिमंस्थाः । अभिपूर्वो मनिर्हिंसार्थः । यजमानं मा हिंसीः । किंतु शतायुषं शतसंवत्सरपरिमितकालजीवनं कृणुहि कुरु ॥४॥

आ– पुरुषशिर उपदधाति– ‘ आदित्यं गर्भम् ’ इति । ‘ आदित्यं गर्भम् ’ इत्यादि पञ्चर्चम् आग्नेयं त्रैष्टुभम् । आदत्ते पशूनित्यादित्यः । अदितेरपत्यमादित्य इति वा । पशून् गृह्णातीति गर्भः नित्योऽग्निरुच्यते । गर्भम् आदित्यं पयसा दुग्धेन समङ्ग्धि सम्यगञ्जय । पयसि पुरुषमुपदधातीत्येषोऽभिप्रायः । सहस्रस्य प्रतिमां बहुधनस्य प्रतिमानभूतां(तं ?) विश्वरूपं सर्वरूपम् । सर्वाणि रूपाणि आदित्यस्यैवेत्यादित्यः स्तूयते । परिवृङ्ग्धि हरसा । एनं परित्यज । अग्नेर्वीर्यापह [°पहारकं] ज्योतिः हर इत्युच्यते । तेन हरसा मा अभिमंस्थाः । अभिपूर्वो मनिर्हिंसार्थः । मा हिंसीः । सर्वथा शतायुषं चीयमानः अग्निस्तं यजमानं शतायुषं शतसंवत्सरपरिमितकालजीवनं कृणुहि कुरु ॥४॥

वातस्य जूतिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य मध्ये ।
शिशुं नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे व्योमन् ॥५॥

वातस्य । जूतिम् । वरुणस्य । नाभिम् । अश्वम् । जज्ञानम् । सरिरस्य । मध्ये ।
शिशुम् । नदीनाम् । हरिम् । अद्रिबुध्नमित्यद्रिऽबुध्नम् ।
अग्ने । मा । हिꣳसीः । परमे । व्योमन्निति विऽओमन् ॥ च्यैं ॥५॥

---

3. S2 om. अश्वं

4. S2 स्थापनं for स्थापने

8. P1 with insertions above हरसा writes in the margin– वीर्यापहारकेण तेजसा परिवृङ्ग्धीति संबन्धः । ज्वालया मा दहेत्यर्थः ।

12. H3 आददे for आदत्ते

सा– अथाश्वोपधानमन्त्रपाठः – 'वातस्य जूतिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य मध्ये। शिशुं नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे व्योमन्' इति। हे अग्ने, त्वम् अश्वं मा हिंसीः ज्वालया मा दह। विविधमोम रक्षणं व्योम। संततिसहस्रमश्वानां रोगाः। तेभ्यः सर्वेभ्यः पालनमित्यर्थः। तत्र (च्च ?) परमम् उत्कृष्टम्। रक्षितस्याश्वस्य पुनरुपद्रवः कदाचिदपि न जायते। तथाकरणं रक्षणस्य परमत्वम्। तादृशे परमे व्योमन् एतम् अश्वं स्थापयेति शेषः। कीदृशमश्वम्? वातस्य जूतिम्। वायोर्गतिस्वरूप[म्। वायु]वच्छीघ्रगतिमित्यर्थः। वरुणस्य नाभिम् अपामधिपतेर्वरुणस्य नाभिस्थानीयम्। यथा स्वोदरमध्यवर्तिनी नाभिर्वस्त्रप्रावरणादिना पाल्यते तद्वदत्यन्तप्रियत्वाद्वरुणेन पालनीयमित्यर्थः। अत एव प्रियत्वमभिप्रेत्य "प्रजापतिर्वरुणायाश्वमानयत्" (तैसं २·३·१२) इति तैत्तिरीये समाम्नातम्। सरिरस्य मध्ये जज्ञानं समुद्रजलस्य मध्ये वडवानलरूपेणोत्पन्नम्। "अप्सुयोनिर्वा अश्वः" (शब्रा १३·२·२·१९) इति श्रुत्यन्तरात्। नदीनां शिशुम्। यदा नदीनां पतिः समुद्रः पूर्वोक्तन्यायेन पिता तदा नदीनां मातृत्वादयं तच्छिशुः। पुनः कीदृशम्? हरिम् उपर्यारूढस्य पुरुषस्य हर्तारं नेतारम्। पुनः कीदृशम्? अद्रिबुध्नम् अद्रिभिर्बुध्यतेऽसौ तथा। नकार उपजनश्छान्दसः। मार्गमध्ये खुरैश्चूर्णीकृता येऽद्रयः क्षुद्रपाषाणास्तैर्बुद्धम्। तादृशान् पाषाणान् दृष्ट्वा मार्गेऽस्मिन्नश्वो गत इति बोद्धुं शक्यते ॥५॥

आ– अश्वमुपदधाति– 'वातस्य जूतिम्' इति। जूतिर्गतिः प्रीतिर्वा। वातस्य वायोः गतिरिव गतिर्यस्य प्रीतिरिव वा सः वातस्य जूतिः, तं प्रीतिजनकं वायुवेगम् अश्वम्। वरुणस्य नाभिं वरुणस्य नाभिमिवान्तरम्। 'अश्वं जज्ञानं सरिरस्य मध्ये'। उदकस्य मध्ये अश्वयोनौ जज्ञानं जायमानमश्वम्। 'शिशुं नदीनाम्'। अत एव नदीनां शिशुं पुत्रभूतं हरिं हरितवर्णम् अद्रिबुध्नम्। अद्रिः पर्वतः, बुध्नः तस्य मूलं, तत्र भवा आपः अद्रिबुध्नाः। इह तु अद्भ्यो जातोऽश्वो लक्ष्यते। प्रत्ययलोपश्छान्दसः। अतोऽत्र प्रकरणात् श्रुतितश्चाश्व एवोच्यते। परमे व्योमन् परमात्माकाशे निषीदन्तम् अद्रिबुध्नमश्वं हे चित्य अग्ने, मा हिꣳसीः मा वधीः ॥५॥

---

3. P1 विविधव्योमरक्षणं व्योमसंततिसहस्रम् for विविधम् ओम रक्षणं व्योम। संततिसहस्रम्

11. S2 om. पुनः कीदृशम्

12. S2 om. पुनः कीदृशम्; S2 om. अद्रिभिर् ... तथा; P1 आधिकः for उपजनः

13. P1 बुध्यते for बुद्धम्; S2 om. पाषाणान् ... पूर्वचित्तिं [Next page, line 8]

15. H2–3 स्यतिः for गतिः

17. H2–3 om. उदकस्य मध्ये

18. B1 om. अत एव

19. H2–3 om. अद्रिः पर्वतः; B1 अहिर्बुध्न्याः, H2–3 अद्रिबुध्न्याः for अद्रिबुध्नाः

20. H2–3 इति for इह तु; B1 अश्वैर् for अद्भ्यो; B1 श्रुतेः for श्रुतितः

21. H2–3 before परमे add ततः; B1 परमात्मकाये निषीदतम् for परमात्माकाशे निषीदन्तम्

सुवर्णशकलस्थापनमन्त्राः]

अजस्रमिन्दुमरुषं भुरण्युमग्निमीळे पूर्वचित्तिं नमोभिः ।

स पर्वभिर्ऋतुशः कल्पमानो गां मा हिंसीरदितिं विराजम् ।।६।।

अजस्रम् । इन्दुम् । अरुषम् । भुरण्युम् ।

अग्निम् । ईळे । पूर्वचित्तिमिति पूर्वऽचित्तिम् । नमोभिरिति नमःऽभिः ।

सः । पर्वभिरिति पर्वऽभिः । ऋतुश इत्यृतुऽशः । कल्पमानः ।

गाम् । मा । हिंसीः । अदितिम् । विराजमिति विऽराजम् ॥ फ्रैं ॥६॥

सा- अथ गोः स्थापनम् । 'अजस्रमिन्दुमरुषं भुरण्युमग्निमीळे पूर्वचित्तिं नमोभिः । स पर्वभिर्ऋतुशः कल्पमानो गां मा हिंसीरदितिं विराजम्' इति । पूर्वचित्तिं पूर्वैर्महर्षिभिर्ध्येयमेतमग्निं नमोभिः नमस्कारैर्युक्तोऽहम् ईळे स्तौमि । कीदृशमग्निम् ? अजस्रम् इन्दुं निरन्तरं परमैश्वर्योपेतम् । अरुःशब्दो मर्मवाची । अरुषं मर्मसंघातं भुरण्युं भरन्तं पोषयन्तम् । यथा यजमानस्य मर्माणि वैरिणो नोद्घाटयन्ति तथा कुर्वन्तमित्यर्थः । सः अग्निरादित्यरूपेण स्थित्वा पर्वभिः अमावास्यादिभिस्तिथिभिः ऋतुशः तस्मिंस्तस्मिन् ऋतौ कल्पमानः कर्माणि संपादयन् वर्तते । तादृश हे अग्ने, गां मा हिंसीः । कीदृशीं गाम् ? अदितिम् अखण्डनीयां विराजं विशेषेण राजमानाम् ॥६॥

आ- गामुपदधाति- 'अजस्रमिन्दुम्' इति । यस्य तव संस्कारार्थम् अजस्रं निरन्तरमनुपक्षीणम् इन्दुं सोमं चन्द्रमसं स्वरूपतः अरोचनं भुरण्युं दोहनादिभिर्भर्तारम् अग्निम् आग्नेयीम् । तद्धितलोपश्छान्दसः । एवंविधां गाम् ईळे उपधानाय स्तौमि याचे वा । एवंविधां गाम् अग्न्याध्यासेन स्तौति - 'पूर्वचित्तिं नमोभिः' इति । पूर्वचित्तिं प्राञ्चं प्राक्चयनम् । "प्राञ्चमग्निमुद्धरन्ति" इति श्रुतेः । एवं गोरूपेण स्थितमग्निं नमोभिः अन्नैः अभ्युद्यतैः निमित्तभूतैः ईळे इति संबन्धः । 'स पर्वभिः' । सः त्वमग्निः पर्वभिः पश्चिष्टकाभिः पूर्वोपलक्षिताभिः ऋतुशः ऋतावृतौ कल्पमानः अग्निः त्वं गां मा हिंसीः मा वधीः । 'अदितिं विराजम्' । अदितिम् अदीनां विराजं, "तस्यै शृतं तस्यै सरः" इत्यादि श्रुतेः [दशवीर्याभिप्रायम्] ॥६॥

12. S2 मां for गां
16. H2-3 आग्नेयम् for आग्नेयीम्; H2-3 °विधं for °विधां, H2-3 °विधं for °विधां
19. B1 om. स पर्वभिः
20. H2-3 om. मा वधीः (L 21)
21. B1 om. अदितिं ... श्रुतेः (L 22)

[सुवर्णशकलस्थापनमन्त्राः

वरूत्रीं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् ।
महीꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन् ॥७॥

वरूत्रीम् । त्वष्टुः । वरुणस्य । नाभिम् । अविम् । जज्ञानाम् । रजसः । परस्मात् ।
महीम् । साहस्रीम् । असुरस्य । मायाम् ।
अग्ने । मा । हिꣳसीः । परमे । व्योमन्निति विऽओमन् ॥ ग्यैं ॥७॥

सा– अथाविः स्थापनमन्त्रः – 'वरूत्रीं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् । महीꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन्' इति । हे ᵛअग्ने, ᵛपरमे ᵛव्योमन् उत्कृष्टे विविधरक्षणे स्थिताम् ᵛअविं ᵛमा ᵛहिꣳसीः मा वधीः । कीदृशीमविम् ? ᵛत्वष्टुः ᵛवरूत्रीम् । रूपाणां निर्माता यस्त्वष्टा तस्य अनुग्रहात् वरणीयरूपयुक्ताम् । ᵛवरुणस्य ᵛनाभिम् अनिष्टनिवारकस्याग्नेर्नाभिस्थानीयाम् । ᵛपरस्मात् ᵛरजसः ᵛजज्ञानाम् उत्कृष्टात् जगद्रञ्जनात् प्रजापत्युरस उत्पन्नाम् । तथा तैत्तिरीये 'उरसो बाहुभ्याम्' इत्यादि वाक्ये "अविः पशूनाम्" (तैसं ७.१.१) इति श्रुतम् । ᵛमहीं महतीं ᵛसाहस्रीं सहस्रमूल्यार्हाम् ᵛअसुरस्य ᵛमायां स्वर्भानोरसुरस्य संबन्धित्वेन निर्मिताम् । अत एव तैत्तिरीये 'सुवर्भानुः' इत्यादिवाक्ये "सा कृष्णाविरभवत्" (तैसं २.१.२) इति श्रुतम् ॥७॥

आ– अविमुपदधाति– 'वरूत्रीम्' इति । स्तृञ् आच्छादने । वरुं शरीरं स्तृणाति ऊर्णकम्बलादिना आच्छादयतीति वरूत्री, ताम् । ᵛअविं ᵛत्वष्टुः संबन्धिनीं ᵛवरुणस्य ᵛनाभिं नहनम् । "वारुणी च हि त्वाष्ट्री चाविः" (शब्रा ७.५.२.२०) इति श्रुतेः । 'अविं जज्ञानां रजसः परस्मात्' । ᵛपरस्मात् ᵛरजसः दिग्भ्यः ᵛजज्ञानां जायमानाम् । "श्रोत्रं वै परं रजो दिशो वै श्रोत्रं दिशः परं रजः" (शब्रा ७.५.२.२०) इति श्रुतेः । [ᵛमहीं महतीं ᵛसाहस्रीं] सहस्रोपकारक्षमाम् । ['असुरस्य मायाम्' । ᵛअसुरस्य] असुवतः प्राणवतः प्रज्ञावतो वा वरुणस्य ᵛमायां प्रज्ञारूपाम् । ᵛपरमे ᵛव्योमन् व्योमनि परमात्माकाशे निषीदतीम् अविं हे श्रीभगवन् ᵛअग्ने, ᵛमा ᵛहिꣳसीः इति संबन्धः ॥७॥

यो अग्निरग्नेरध्यजायत शोकात् पृथिव्या उत वा दिवस्परि ।
येन प्रजा विश्वकर्मा जजान तमग्ने हेळः परि ते वृणक्तु ॥८॥

10. P1 om. जगद्रञ्जनात्; P1 प्राजापत्यरजसः for प्रजापत्युरसः
12. P1 aftere निर्मिताम् ins. मीयते निर्मीयत इति माया ।
14. H2-3 om. अविमुपदधाति ... संबन्धः (L 21)
17. B1 before second रजसः adds जायमानानां
19. B1 प्रजावतो ... प्रजारूपाम् for प्रज्ञावतो ... प्रज्ञारूपाम् । (L 20)

सुवर्णशकलस्थापनमन्त्राः]

यः । अग्निः । अग्नेः । अधि । अजायत ।
शोकात् । पृथिव्याः । उत । वा । दिवः । परि ।
येन । प्रजा इति प्रऽजाः । विश्वकर्मेति विश्वऽकर्मा । जजान ।
तम् । अग्ने । हेळः । परि । ते । वृणक्तु ॥ छ्रः ॥८॥

सा– अथाजस्थापनमन्त्रः – ' यो अग्निरग्नेरध्यजायत शोकात् पृथिव्या उत वा दिवस्परि । येन प्रजा विश्वकर्मा जजान तमग्ने हेळः परि ते वृणक्तु ' इति । vपृथिव्याः भूमेः उपरि स्थितात् vउत vवा अथवा vदिवः vपरि द्युलोकस्योपरि स्थितात् vशोकात् दीप्तियुक्तात् vअग्नेः प्रजापतिरूपात् सकाशात् vयः vअग्निः अजरूपः vअध्यजायत उत्पन्नोऽभूत् । vयेन अजरूपेण vविश्वकर्मा जगत्स्रष्टा प्रजापतिः vप्रजाः पशून् vजजान उत्पादितवान् । अजस्य प्रजापशुसृष्टिसाधनत्वं तैत्तिरीये समाम्नातम्– " ततोऽजस्तूपरः समभवत् तꣳ स्वायै देवताया आलभत । ततो वै स प्रजाः पशूनसृजत " (तैसं २·१·१·४) इति । हे vअग्ने, vते त्वदीयः vहेळः कोपः vतं तादृशमजं vपरिवृणक्तु परिवर्जितं करोतु मा विनाशयत्वित्यर्थः ॥८॥

आ– अजमुपदधाति– ' यो अग्निः ' इति । vअग्नेः सकाशात् vयः vअग्निः यः अजः vअध्यजायत उत्पन्नः । vशोकात् vपृथिव्याः शोकात् अध्यजायत । शुच दीप्तौ । vउत vवा vदिवः vपरि । अपि च– " यद्वै प्रजापतेः शोकादजायत तद्दिवश्च पृथिव्यै च शोकादजायत " (शब्रा ७·५·२·२१) इति श्रुतेः । येन अजेन vविश्वकर्मा प्रजापतिः vप्रजाः vजजान अजनयत् । " वाग्वा अजो वाचो वै प्रजा विश्वकर्मा जजान " (शब्रा ७·५·२·२१) इति श्रुतेः । vतम् अजं हे vअग्ने, vहेळः vपरिवृणक्तु । vते तव संबन्धी हेळः परिवर्जयतु ॥८॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥९॥(४)॥

चित्रं देवानां ॥ चं ॥९॥

सा– कात्यायनः – " चित्रं देवानामित्यर्धर्चशः स्रुवाहुती " (काश्रौ १७·५·१८) इति । जुहुयादिति शेषः । पाठस्तु– ' चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ' इति । अयं मन्त्रः पूर्वमष्टमाध्याये व्याख्यातः ॥९॥

[इति चतुर्दशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

7. P1 after शोकात् ins. शुच दीप्तौ
8. P1 ये वाज° for vयेन अज°
12. H2–3 om. अजमुप ... °वर्जयतु (L 17)
14. B1 दिवः for यद्वै
15. B1 प्रजजान for जजान
23. S2 om. °अष्टम°

[सुवर्णशकलोपस्थानमन्त्राः

आ– ' चित्रं देवानाम् ' इति होमः । व्याख्यातो मन्त्रः ॥९॥

[इति चतुर्दशेऽध्याये चतुर्थोऽनुवाकः]

[अथ पञ्चमोऽनुवाकः ।]

सा– चतुर्थेऽनुवाके हिरण्यपुरुषादीनां शिरश्छिद्रेषु सुवर्णशकलस्थापनादिमन्त्राः उक्ताः । पञ्चमे तेषामुपस्थानमन्त्रा उच्यन्ते–

इमं मा हिंꣳसीर्द्विपादं पशुꣳ सहस्राक्ष मेधाय चीयमानः ।
मयुं पशुं मेधमग्ने जुषस्व तेन चिन्वानस्तन्वो नि षीद ।
मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥१॥

इमम् । मा । हिꣳसीः । द्विपादमिति द्विऽपादम् । पशुम् ।
सहस्राक्षेति सहस्रऽअक्ष । मेधाय । चीयमानः ।
मयुम् । पशुम् । मेधम् । अग्ने । जुषस्व । तेन । चिन्वानः । तन्वः । नि । सीद ।
मयुम् । ते । शुक् । ऋच्छतु । यम् । द्विष्मः । तम् । ते । शुक् । ऋच्छतु ॥ ओः ॥१॥

कात्यायनः – "उदङ् तिष्ठन्नुपतिष्ठत उत्सर्गैरिमं मा हिꣳसीरिति प्रतिमन्त्रम्" (काश्रौ १७.५.१९) इति । अध्वर्युरुदङ्मुखो भूत्वा 'इमं मा हिंसीः' इत्यादिभिः शोकपरित्यागलक्षणैर्मन्त्रैः क्रमेण पुरुषाश्वादीनामुपस्थानं कुर्यात् । पुरुषोपस्थानमन्त्रपाठस्तु– ' इमं मा हिꣳसीर्द्विपादं पशुꣳ सहस्राक्ष मेधाय चीयमानः । मयुं पशुं मेधमग्ने जुषस्व तेन चिन्वानस्तन्वो नि षीद । मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ' इति । हे ^{V}सहस्राक्ष सहस्रसंख्याकज्वालारूपचक्षुर्युक्त ^{V}अग्ने, ^{V}मेधाय यज्ञाय ^{V}चीयमानः चयनेन संस्क्रियमाणस्त्वम् ^{V}इमं ^{V}द्विपादं पादद्वयोपेतं पुरुषरूपं ग्राम्यं ^{V}पशुं ^{V}मा ^{V}हिꣳसीः दाहरूपां हिंसां मा कार्षीः । यदि तव भक्ष्यापेक्षा तर्हि तव भक्षणाय ^{V}मेधं शुद्धं ^{V}मयुं कृष्णमृगरूपं ^{V}पशुं ^{V}जुषस्व सेवस्व भक्षयेत्यर्थः । ^{V}तेन मयुभक्षणेन ज्वालारूपाः ^{V}तन्वः त्वदीयतनूः ^{V}चिन्वानः पोषयन्निह ^{V}निषीद । ^{V}ते तव ^{V}शुक् शोकः संतापः ^{V}मयुं कृष्णमृगम् ^{V}ऋच्छतु प्राप्नोतु । किं च– वयं ^{V}यं पुरुषं प्रति ^{V}द्विष्मः द्वेषं कुर्मः ^{V}तं पुरुषं ^{V}ते त्वदीयः ^{V}शुक् संतापः ^{V}ऋच्छतु प्राप्नोतु ॥१॥

आ– अथ पञ्चपशूनां शुचोत्सर्गः – ' इमं मा हिंसीः ' इति । ' इमं मा हिंसीः ' इत्यादि-पञ्चर्चमाग्नेयं त्रैष्टुभमेव द्व्यवसानं उत्तराणि [त्रीणि] यजूंषि । पुरुषस्योत्सृजति । हे भगवन् अग्ने ^{V}सहस्राक्ष सहस्रधा दर्शनसंपन्न सहस्रनिवास अपरिमितनिवास । हिरण्यशकलैर्वा एष सहस्राक्षः

---

1. H2-3 om. चित्रं ... मन्त्रः ॥
18. S2 सहक्रिय° for संस्क्रिय°
20. S2 भक्षयत for भक्षय

सुवर्णशकलोपस्थानमन्त्राः]

Vइमं Vद्विपादं Vपशुं पुरुषं पशुम् । Vमेधाय यज्ञाय अन्नाय वा Vचीयमानः चयनेन संस्क्रियमाणः पुरुषपशुं Vमा Vहिंसीः इति संबन्धः । 'मयुं पशुं मेधमग्ने जुषस्व'। Vमेधं शुद्धं Vपशुं पुरुषं पशुम् । "पुरुषो पशुः" (द्र. शब्रा ३·३·८·२) इति श्रुतेः । हे श्रीभगवन् Vअग्ने, पशुं Vजुषस्व । किंच– Vतेन पुरुषेण Vचिन्वानः Vतन्वः Vनिषीद। तन्वः तनुमात्मानं संस्कुरुष्व । 'मयुं ते शुगृच्छतु'। Vते तवः Vशुक् शोकः संतापः पापरूपः, Vमयुम्। इत उत्तरं यजुः । Vऋच्छतु । 'यं द्विष्मस्तं ते शुगृच्छतु' । वयं Vयं पुरुषं [Vद्विष्मः Vतं] Vते तव Vशुक् संतापः पाप्मा Vऋच्छतु ॥१॥

इ॒मं मा हिं॑सी॒रेक॑शफं प॒शुं क॑निक्र॒दं वा॒जिनं॒ वाजि॑नेषु ।
गौ॒रमा॑र॒ण्यमनु॑ ते दिशा॒मि तेन॑ चिन्व॒ानस्त॒न्वो॑ नि षी॑द ।
गौ॒रं ते॒ शुगृ॑च्छतु यं द्वि॒ष्मस्तं ते॒ शुगृ॑च्छतु ॥२॥

एक॑शफ॒मित्येक॑ऽशफम् । प॒शुम् । क॒नि॒क्र॒दम् । वा॒जिन॑म् । वाजि॑नेषु ।
गौ॒रम् । आ॒र॒ण्यम् । अनु॑ । ते॒ । दि॒शा॒मि ॥ यं ॥२॥

सा– अथाश्वोपस्थानमन्त्रपाठस्तु– 'इमं मा हिंसीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु । गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद । गौरं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु' इति ॥ हे अग्ने, Vइमम् एकशफयुक्तमश्वरूपं Vपशुं Vमा Vहिंसीः दाहरूपां हिंसां मा कार्षीः । कीदृशमश्वम् ? Vकनिक्रदं हेषाशब्देनात्यन्तक्रन्दनोपेतम् । Vवाजिनेषु शीघ्रगतियुक्तेषु [Vवाजिनं] अत्यन्तशीघ्रगतियुक्तम् । यदि तव भक्ष्यापेक्षा तर्हि Vते तव भक्षणायेमम् Vआरण्यं Vगौरं सिंहम् Vअनु Vदिशामि पुरुषशीर्षमनु त्वद्भक्ष्यत्वेनातिसृजामि । Vतेन गौरभक्षणेन त्वदीया ज्वालारूपाः तनूः पोषयन्निह Vनिषीद । शिष्टं पूर्ववत् ॥२॥

आ– अथाश्वस्य । हे श्रीभगवन्नग्ने, Vइमम् Vएकशफम् अश्वम् । "एकशफो वा एष पशुर्यदश्वः" (शब्रा ७·५·२·३३) इति श्रुतेः । Vकनिक्रदम् अत्यर्थं क्रन्दितारम् । क्रन्दिर्गतिशोषणयोः । Vवाजिनं विशेषतः अश्वम् । यद्वा– Vवाजिनेषु वेगवत्सु मध्ये वाजिनं वेगवन्तम् इमं वाजिनम् एकशफम् अश्वं Vमा Vहिंसीः । किंच– 'गौरमारण्यमनु ते दिशामि'। Vआरण्यं Vगौरं मृगं Vते तव Vअनु Vदिशामि । दिश अतिसर्जने । ददामि । Vतेन गौरेण पशुना Vचिन्वानः Vतन्वः तन्वं [नुं ?] Vनिषीद आत्मानं संस्कुरुष्व । इत उत्तरं यजुः । 'गौरं ते शुगृच्छतु'। Vयं गौरं वयंV द्विष्मः Vतं गौरं Vशुक् पाप्मा Vऋच्छतु ॥२॥

---

20. H2–3 om. अथाश्वस्य ... इति श्रुतेः (L 21)

25. B1 इतरयज्ञ, H3 इरत यज्ञोतरं for इत उत्तरं यजुः (L 26)

[सुवर्णशकलोपस्थानमन्त्राः

इमꣳ साहस्रꣳ शतधारमुत्सं व्यच्यमानꣳ सरिरस्य मध्ये ।
घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन् ।
गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद ।
गवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥३॥

साहस्रम् । शतधारमिति शतऽधारम् । उत्सम् ।
व्यच्यमानमिति विऽअच्यमानम् । सरिरस्य । मध्ये ।
घृतम् । दुहानाम् । अदितिम् । जनाय ।
गवयम् ॥ रां ॥३॥

सा– अथ गोरुपस्थानमन्त्रः – 'इमꣳ साहस्रꣳ शतधारमुत्सं व्यच्यमानꣳ सरिरस्य मध्ये । घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन् । गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद । गवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ' इति । हे अग्ने, इमं गां मा हिꣳसीः । किं-भूतम् ? साहस्रं सहस्रार्हं शतधारम् उत्सं कूपम् । बहुस्रोतस्कं कूपमिव बहूपकारकं वाहदोहादिभिः सरिरस्य मध्ये व्यच्यमानं विविधमुपजीव्यमानम् । "इमे वै लोकाः सरिरम् " (शब्रा ७.५.२.३४) इति श्रुतेः । जनाय जनेभ्योऽर्थाय घृतं दुहानां घृतपूरर्णां वा घृतस्य कारणभूतक्षीरदोग्ध्रीम् अदितिम् अखण्डनीयाम् । गवयः गोसदृश आरण्यो मृगविशेषः । शिष्टं स्पष्टम् ॥३॥

आ– अथ गोः – 'इमं साहस्रम्' इति । इमं गाम् । कथंभूतमिति ? साहस्रं सहस्रार्हम् । शतधारं बहुधारं पृथुधारम् उत्सम् । उत्सः कूपः । कूपवत् कूपः उद्गच्छतु । क्षीरधारासंपन्नत्वात् सरिरस्य मध्ये लोकस्य मध्ये । "इमे वै लोकाः सरिरम्" (शब्रा ७.५.२.३४) इत्यादि श्रुतेः । व्यच्यमानं विविधम् उपजीव्यमानम् । अत्र पुंलिङ्गमविवक्षितम् । 'घृतं दुहाना-मदितिं जनाय' । जनेभ्यो भोगार्थं घृतं घृतवत् क्षीरं दुहानां दोग्ध्रीम् अदितिम् अदीनां परमे व्योमन् व्योमनि निषीदन्तीम् इमां गां हे श्रीभगवन् अग्ने, मा हिꣳसीः । 'गवयमारण्यम्' । आरण्यं गवयं ते तव अनुदिशामि । तेन गवयेन चिन्वानः तन्वः निषीद आत्मानं संस्कुरुष्व । अन्यत्र स्थितं गवयं ते शुग् ऋच्छतु । यं गवयं वयं द्विष्मः तं गवयं शुग् ऋच्छतु ॥३॥

---

12. S2 °भूताम् for °भूतम्
14. S2 °भूतां for °भूत°
16. H2–3 °भूताम् for भूतम्; H2–3 om. सहस्रार्हम्
19. B1 after विविधं adds जन्यमानं

सुवर्णशकलोपस्थानमन्त्राः]

इममूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम् ।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन् ।
उष्ट्रमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद ।
उष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४॥

ऊर्णायुम् । वरुणस्य । नाभिम् । त्वचम् । पशूनाम् ।
द्विपदामिति द्विऽपदाम् । चतुष्पदाम् । चतुःपदामिति चतुःऽपदाम् ।
त्वष्टुः । प्रजानामिति प्रऽजानाम् । प्रथमम् । जनित्रम् ।
उष्ट्रम् ॥ ढीं ॥४॥

सा– अथाविरुपस्थानमन्त्रः– 'इममूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम् । त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन् । उष्ट्रमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद । उष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु' इति । हे ᵛअग्ने, ᵛइमम् ᵛऊर्णायुम् अविं ᵛमा ᵛहिंसीः । कीदृशम् इमम् [ऊर्णायुम् ?] । ᵛवरुणस्य अरिष्टनिवारकस्य अग्नेर्नाभिस्थानीयं, ᵛद्विपदां मनुष्याणां ᵛचतुष्पदां गवादीनाम् उभयरूपाणां पशूनां [ᵛत्वचं] त्वक्सदृशम् । यथा त्वचा शरीरमावृतं [तथा] द्विपदो मनुष्याः शीतनिवारणार्थमविजन्येन कम्बलेन आच्छादिताङ्गा भवन्ति । चतुष्पदोऽप्यश्वा बलीवर्दाश्च भारवहने मार्दवार्थं पृष्ठे कम्बलेनाच्छादिता भवन्ति । तथा ᵛत्वष्टुः प्रजापतेः सकाशादुत्पद्यमानानां ᵛप्रजानां मध्ये ᵛप्रथमं ᵛजनित्रं प्रधानत्वेनोत्पन्नम् । प्राधान्यं च वीर्यवत्त्वात् । वीर्यवत्त्वं च बाहुजन्यानां सर्वेषां तैत्तिरीये त्वाम्नातम्– "तस्मात् ते वीर्यवन्तो वीर्याद्ध्यसृज्यन्त" (तैसं ७.१.१.५) इति । उष्ट्रः प्रसिद्धः । शेषं पूर्ववत् ॥४॥

आ– अथाविः – 'इममूर्णायुम्' इति । ᵛऊर्णायुम् ऊर्णावन्तम् । ᵛवरुणस्य ᵛनाभिं । तन्तुमपत्यम् । 'त्वचं पशूनां द्विपदां चतुष्पदाम्' । ᵛद्विपदां मनुष्याणाम् उभयरूपाणां च ᵛपशूनां त्वग्रक्षां कम्बलादिना करोतीति द्विपदां ᵛचतुष्पदां ᵛत्वचम् इत्युक्तम् । किं च– 'त्वष्टुः प्रजानां प्रथमं जनित्रम्' । श्रीभगवतः ᵛप्रजानाम् उत्पत्तौ ᵛजनित्रं

---

11. P1 before अविम् adds ऊर्णावन्तम्
13. P1 after आवृतं adds भवति
14. S2 आच्छादिताः for आच्छादिताङ्गाः
15. S2 °वहनेन for °वहने; P1 after भवन्ति adds यद्वा चतुष्पदोऽप्यश्वा बलीवर्दाश्च पुष्ट्यर्थं पृष्ठे कम्बलेनाच्छादिता भवन्ति ।
16. S2 om. प्रजानां
21. H2–3 om. च; B1 करोतीत्यपकारता; H2–3 करोति । द्वपाकारतः for करोतीति द्विपदां
22. B1 H2–3 भगवन्तः for भगवतः ; B1 उत्पत्त्यैव कक्षाकरं; H2–3 उत्पन्ने पक्षाकरं for उत्पत्तौ

vपरमे vव्योमन् इममूर्णायुमविं श्रीभगवन् vअग्ने, vमा vहिꣳसीः इति संबन्धः । 'उष्ट्रमारण्यमनु ते दिशामि'। vआरण्यम् vउष्ट्रं vते तव vदिशामि। vतेन उष्ट्रेण vतन्वः vनिषीद आत्मानं संस्कुरुष्व । अन्यत्र स्थितम् vउष्ट्रम् vते vशुक् तपः vऋच्छतु । वयं vयं vद्विष्मः vतं vते vशुग् vऋच्छतु इति संबन्धः ॥४॥

अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्रमायꣳस्तेन रोहमायन्नुप मेध्यासः ।
शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद ।
शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५॥

अजः । हि । अग्नेः । अजनिष्ट । शोकात् । सः । अपश्यत् । जनितारम् । अग्रे । तेन । देवाः । देवताम् । अग्रम् । आयन् । तेन । रोहम् । आयन् । उप । मेध्यासः । शरभम् ॥ ळ्ळः ॥५॥

सा- अथ अजोपस्थानमन्त्रः - "अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्रे । तेन देवा देवतामग्रमायꣳस्तेन रोहमायन्नुप मेध्यासः । शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद । शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु' इति । vहि यस्मात् अयम् vअजः vशोकात् दीप्तियुक्तात् vअग्नेः सकाशात् vअजनिष्ट । अत एव तैत्तिरीये आम्नातम्- "स आत्मनो वपामुदक्खिदत् । तामग्नौ प्रागृह्णात् । ततोऽजस्तूपरः समभवत्" (तैसं २.१.१.४) इति । काण्वब्राह्मणे तु- "यद्वै प्रजापतेः शोकादजायत तदग्नेः शोकादजायत" (शब्रा ७.५.२.३६) इत्युक्तम् । अङ्गनशीलात् प्रजापतेः संतापादजोऽजनिष्टेत्यर्थः । vसः एव अग्नेः प्रजापतिरूपात् उत्पन्नोऽजः vजनितारं स्वोत्पादकं प्रजापतिरूपमग्निम् vअग्रे vअपश्यत् उत्पत्त्यन्तरमेव दृष्टवान् । यस्मादेवमजः प्रशस्तस्तस्मादिदानीं वर्तमानादेव vअग्रे पूर्वस्मिन् जन्मनि vतेन एव अजेन कर्माण्यनुष्ठाय vदेवताम् vआयन् देवत्वं प्राप्ताः । किं च- इदानीं vमेध्यासः यागयोग्या यजमाना अपि vतेन अजेन रोहणीयं स्वर्गम् vउपायन् सामीप्येनैव प्राप्ताः । विलम्बमन्तरेण प्राप्ता इत्यर्थः । शरभः सिंहघाती क्रूरमृगः । शेषं पूर्ववत् ॥५॥

आ- अथाजस्य- 'अजो ह्यग्नेः' इति । vअग्नेः vशोकात्, प्रजापतेः शोकाद्वा, संतापात् vअजः पशुः vअजनिष्ट vहि जातः । हिशब्दः प्रसिद्धौ । vसः जातोऽजः । 'अपश्यज्ज-

---

16. S2 om. काण्व° ... अजनिष्टेत्यर्थः (L 18)
19. S2 अग्रे for अग्रं
20. P1 after प्राप्ताः adds नायं देवशब्दात् स्वार्थिकस्तलपि तु भावार्थिकः;
21. S2 om. अपि तेन अजेन
24. H2-3 om. हि; H2-3 अभिजातः for जातः

सुवर्णशकलोपस्थानमन्त्राः]

नितारमग्रे [१]। प्रथमं जनितारं प्रजापतिम् अपश्यत् दृष्टवान्। तेन अजेन देवाः इन्द्रादयः देवताम् अग्रम्। षष्ठ्यर्थे द्वितीया। देवत्वस्याग्रम् । अनेनैव देवत्वं भवतीति सम्यक्कारणम् । आयन् । अय वय पय गतौ । अवगतवन्तः । तेन अजेन मेध्यासः मेध्याः मेधार्हाः शुद्धाः सन्तु । रोहं स्वजा (र्गा ?) रोहं उपायन् आरोहणं कृतवन्त इति वा । धर्माध्यासेनाजः स्तूयते— "अजो ह्यग्नेरजनिष्ट शोकादिति । यद्वै प्रजापतेः शोकादजायत तदग्नेः शोकादजायत । सो अपश्यज्जनितारमग्र इति । प्रजापतिर्वै जनिता सोऽपश्यत् । प्रजापतिमग्र इत्येतत्तेन देवा देवतामग्रमायन्निति वाग्वा अजो वा चैतेन देवा देवतामग्रमायंस्तेन रोहमायन्नुप मेध्यास इति । स्वर्गो वै लोको रोहस्तेन स्वर्गं लोकमायन्नुप मेध्यासः" (शब्रा ७.५.२-३६) इति श्रुतेः । 'शरभमारण्यम्' इत्यादिर्व्याख्यातः समानार्थः ॥५॥

त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः ।
रक्षा तोकमुत त्मना ॥६।।(५)।।

त्वम् । यविष्ठ । दाशुषः । नॄन् । पाहि । शृणुधि । गिरः ।
रक्ष । तोकम् । उत । त्मना ॥ ष्यां ॥६॥(५)॥

सा– कात्यायनः – "त्वं यविष्ठेति चित्योपस्थानम्" (काश्रौ १७.६.१) इति । चित्याग्नेरुपस्थानं कुर्यात् । पाठस्तु– 'त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना' इति । हे यविष्ठ युवतमाग्ने, त्वं दाशुषः हविर्दत्तवतो यजमानस्य नॄन् भृत्यादीन् मनुष्यान् पाहि इति ऋत्विजां गिरः आशिषः शृणुधि शृणुहि । उत अपि च त्मना आत्मना त्वदीयेन तोकम् अपत्यं रक्ष ॥६॥

[इति चतुर्दशेऽध्याये पञ्चमोऽनुवाकः॥५॥]

आ– अथ चित्योपस्थानम्– 'त्वं यविष्ठ' इति । आग्नेय्यनिरुक्ता गायत्री । उशनाः काव्य ऋषिः । हे श्रीभगवन्नग्ने हे यविष्ठ युक्ततम । यद्वा– यु मिश्रणे, अतिशयेन मिश्रयितृतम । त्वं दाशुषः नॄन् हवींषि दत्तवतो यजमानस्य संबन्धिनः नॄन् मनुष्यान् पाहि पालय ।

---

1. H2–3 जेतारम् for देवताम्
2. H2–3 देवस्य for देवत्वस्य; H2–3 करणम् for कारणम्
4. H2–3 इति पार्श्वमध्यासेन, B1 इति व घ (ध ?) र्माध्यासेम for इति वा धर्माध्यासेन
8. H2–3 स्वजो for स्वर्गो

ᵛशृणुधी ᵛगिरः श्रुतिलक्षणा वाचः शृणु । ᵛउत अपि च ᵛरक्ष ᵛतोकम् अपत्यं पालय । ᵛत्मना रक्ष आत्मना अत्र व्यत्ययः । आत्मानं च रक्ष ॥६॥

[इति चतुर्दशेऽध्याये पञ्चमोऽनुवाकः]

[अथ षष्ठोऽनुवाकः।]

सा– पञ्चमेऽनुवाके हिरण्यपुरुषाश्वादीनामुपस्थानमन्त्रा उक्ताः। षष्ठेऽपस्याख्येष्टकोपधानमन्त्रा उच्यन्ते ।

अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्सादयाम्यपां त्वा भस्मन्त्सादयामि ।
अपां त्वा ज्योतिषि सादयाम्यपां त्वाऽयने सादयामि ।
अर्णवे त्वा सदने सादयामि समुद्रे त्वा सदने सादयामि
सरिरे त्वा सदने सादयामि ।
अपां त्वा क्षये सादयाम्यपां त्वा सधिषि सादयामि ।
अपां त्वा सदने सादयाम्यपां त्वा सधस्थे
सादयाम्यपां त्वा योनौ सादयामि ।
अपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि ।
गायत्रेण त्वा छन्दसा सादयामि त्रैष्टुभेन त्वा छन्दसा सादयामि
जागतेन त्वा छन्दसा सादयामि ।
आनुष्टुभेन त्वा छन्दसा सादयामि
पाङ्क्तेन त्वा छन्दसा सादयामि ॥१॥(६)॥

अपाम् । त्वा । एमन् । सादयामि । ओद्मन् । भस्मन् ।
ज्योतिषि । अयने । अर्णवे । समुद्रे । सरिरे । क्षये । सधिषि ।
सदने । सधस्थ इति सधऽस्थे । योनौ । पुरीषे । पाथसि ।
गायत्रेण । त्रैष्टुभेन । त्रैस्तुभेनेति त्रैस्तुभेन । जागतेन ।
आनुष्टुभेन । आनुस्तुभेनेत्यानुऽस्तुभेन । पाङ्क्तेन ।
त्वा । छन्दसा । सादयामि ॥ त्वोः ॥१॥(६)॥

अपस्याख्येष्टकोपधानमन्त्राः]

कात्यायनः – "अपस्याः पञ्च पञ्चानूकान्तेष्वपां त्वेमन्निति प्रतिमन्त्रम्" (काश्रौ १७.६-२) इति । अब्लिङ्गैर्मन्त्रैरुपधेया इष्टका अपस्या एतत्संज्ञकाः पञ्च पञ्चेष्टकाः 'अपां त्वेमन्' इत्यादिभिर्मन्त्रैः क्रमेणानूकान्तेषूपदध्यादिति शेषः । तत्र प्रथमपञ्चकमन्त्रपाठस्तु– 'अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्साद-याम्यपां त्वा भस्मन्त्सादयामि । अपां त्वा ज्योतिषि सादयाम्यपां त्वाऽयने सादयामि' इति। हे इष्टके, त्वाम् ˇअपाम् ˇएमन् एमनि जलसंबन्धिप्रवाहादिगमनप्रकारे ˇसादयामि स्थापयामि । एवमुत्तरत्रापि योज्यम् । ˇओद्मन् वीचीतरङ्गादिरूपे उन्दने, ˇभस्मन् भासके शुक्लरूपे, ˇज्योतिषि प्रकाशे नैर्मल्य इत्यर्थः । ˇअयने नदीकूपाद्याधारे ॥

अथ द्वितीयपञ्चकमन्त्रपाठस्तु– 'अर्णवे त्वा सदने सादयामि समुद्रे त्वा सदने सादयामि सरिरे त्वा सदने सादयामि । अपां त्वा क्षये सादयाम्यपां त्वा सधिषि सादयामि' इति । अर्णवशब्देन सादृश्यात् प्रौढं तटाकाद्युपलक्ष्यते । अपां सदनं स्थानम् । तस्मिन् स्थाने हे अपस्याख्ये इष्टके, ˇत्वा त्वां ˇसादयामि स्थापयामि । समुद्रः प्रसिद्धः । सरिरशब्देन अनिर्द्धारितविशेषो जलमात्राधार उपलक्षितः । क्षीयन्ते शुष्यन्त्यापोऽत्रेति शुष्कतटाकादिः क्षयः । जलेन सह धीयतेऽवस्थाप्यते इति सधिर्वर्षोपलादिः ॥

अथ तृतीयपञ्चकमन्त्रपाठस्तु– 'अपां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा योनौ सादयामि । अपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि' इति । हे इष्टके, ˇअपां ˇसदने स्थाने नद्यादौ त्वां ˇसादयामि स्थापयामि । अद्भिः सह विद्युदादयो यत्र मेघे तिष्ठन्ति सोऽयं मेघः सधस्थः। योनिशब्देन जलकारणभूतोऽग्निरुच्यते । "अग्नेरापः" (तैउ २.१) इति श्रुतेः । पुरीषशब्देन नद्यादिगताः सिकता उच्यन्ते । पीयते जलं जीमूतैरत्रेति पाथः समुद्रः, अन्नं वा । "अन्नं वा अपां पाथोऽन्ने ताः सादयति" (शब्रा ७.५.२.६०) इति श्रुतेः ।

अथ चतुर्थपञ्चकमन्त्रपाठस्तु– 'गायत्रेण त्वा छन्दसा सादयामि त्रैष्टुभेन त्वा छन्दसा सादयामि जागतेन त्वा छन्दसा सादयामि । आनुष्टुभेन त्वा छन्दसा सादयामि पाङ्क्तेन त्वा छन्दसा सादयामि' इति । हे इष्टके, त्वां गायत्रीसंबन्धिना ˇछन्दसा ˇसादयामि स्थापयामि । एवमुत्तरत्रापि योज्यम् ॥१॥

[इति चतुर्दशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

आ– पञ्चदशापस्याः पञ्चदशभिर्यजुर्भिरुपदधाति– 'अपां त्वा' इति । विंशतिरिष्टका-देवत्यानि यजूंषि सामान्येन श्रुत्युक्तान्येतान्यभिधेयानि । अत्रापि पञ्चदशापस्याः पञ्च छन्दस्याः इष्टका इत्यवान्तरविभागः । 'अपां त्वा एमन्'। इण् गतावित्यस्य रूपम्। "वायुर्वा अपामेम"

---

5. P1 with markings above एमन् ins. in the margin इण् गताविति धातोर्मनिन्प्रत्ययान्तस्य लुप्तसप्तमीविभक्तिकस्य एतद्रूपम् । अपामेमनि वायौ सादयामि त्वाम् । वायुर्वा अपामेम वायौ त्वां सा°

6. P1 after भस्मन् ins. भस भर्सनदीप्त्योः

10. S2 om. स्थानम्

23. H2–3 पञ्चपञ्चा [प] स्याः for पञ्चदशापस्याः, H2–3 after °दशाभिः add पञ्चभिः

24. H3 श्रुत्यर्थानि for श्रुत्युक्तानि

(शब्रा ७.५.२.४६) इति । vअपां संबन्धिनि गमनशीले एमनि वायौ vत्वा हे [इष्टके,] अपस्य [।] नामधेयामिष्टकां त्वां vसादयामि । तथा 'अपां त्वोद्मन्'। उन्दी क्लेदने। vअपाम् vओद्मन् ओद्मनि । "ओषधयो वा अपामोद्म" (शब्रा ७.५.२.४७) [इति।] ओषधिषु त्वां vसादयामि । 'अपां भस्मन्'। भसु भर्त्सनदीप्त्योः । "अभ्रं वा अपां भस्म" (शब्रा ७.५.२.४८)। vअपां vभस्मन् भस्मनि मेघे त्वां vसादयामि । 'अपां ज्योतिषि'। "विद्युद्वा अपां ज्योतिः" (शब्रा ७.५.२.४९) इति । vअपां संबन्धिन्यां विद्युति त्वां vसादयामि । 'अपामयने'। "इयं वा अपामयनम्" (शब्रा ७.५.२.५०) इति । vअपां vअयने पृथिव्यां vत्वा त्वाम् अपस्यां vसादयामि । तथा 'अर्णवे त्वा सदने सादयामि'। "प्राणो वा अर्णवः" (शब्रा ७.५.२.५१)। vअर्णवे प्राणे प्राणाख्ये vसदने vसादयामि । vसमुद्रे । "मनो वै समुद्रः" (शब्रा ७.५.२.५२)। समुद्रे मनसि मनोरूपसदने त्वां vसादयामि । vसरिरे । "वाग्वै सरिरम्" (शब्रा ७.५.२.५३)। वाग्रूपसदने त्वां vसादयामि । vअपां संबन्धिनि vक्षये । "चक्षुर्वा अपां क्षयः" (शब्रा ७.५.२.५४)। क्षयो निवासः । चक्षूरूपे सदने त्वां vसादयामि । 'अपां त्वा सधिषि'। "श्रोत्रं वा अपां सधिः" (शब्रा ७.५.२.५५)। श्रोत्ररूपे [vसधिषि] त्वां vसादयामि । 'अपां त्वा सदने'। "द्यौर्वा अपां सदनम्" (शब्रा ७.५.२.५६)। द्युलोकात्मके vसदने त्वां vसादयामि । 'अपां त्वा सधस्थे'। "अन्तरिक्षं वा अपां सधस्थम्" (शब्रा ७.५.२.५७)। अन्तरिक्षात्मके सदने त्वां vसादयामि। 'अपां त्वा योनौ'। "समुद्रो वा अपां योनिः" (शब्रा ७.५.२.५८)। समुद्रात्मके सदने त्वां vसादयामि । 'अपां त्वा पुरीषे'। "सिकता वा अपां पुरीषम्" (शब्रा ७.५.२.५९)। सिकतात्मके सदने त्वां vसादयामि । 'अपां त्वा पाथसि'। "अन्नं वा अपां पाथः" (शब्रा ७.५.२.६०)। अन्नात्मके सदने त्वां vसादयामि ॥

पञ्च छन्दस्याः पञ्चभिर्यजुर्भिरुपदधाति । vगायत्रेण vछन्दसा vत्वा छन्दस्या नामेष्टकां त्वां vसादयामि । vत्रैष्टुभेन vछन्दसा त्वां vसादयामि । vजागतेन vछन्दसा त्वां vसादयामि । vआनुष्टुभेन vछन्दसा त्वां vसादयामि । vपाङ्क्तेन vछन्दसा त्वां vसादयामि इति संबन्धः ॥१॥

[इति चतुर्दशेऽध्याये षष्ठोनुवाकः ।]

---

1. B1 after इति adds अपामेमन्निति
2. B1 अपस्ये निधेयाम् for अपस्य [।] नामधेयाम्
7. B1 om. अपामयने ... सादयामि (L 8)
8. H2-3 after अपस्यां add अन्नुवाम् अद्भ्यो वा उत्क्रान्ताम् अपस्यां त्वा
13. B1 om. अपां ... सदने त्वां सादयामि (L 15)
21. B1 om. पञ्च छन्दस्याः ... संबन्धः । (L 23)

[अथ सप्तमोऽनुवाकः ।]

सा– षष्ठेऽनुवाकेऽपस्येष्टकोपधानमन्त्रा उक्ताः । सप्तमे प्राणभृत्संज्ञकानामिष्टकानामुपधानमन्त्रा उच्यन्ते--

---

अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनः ।
गायत्री वासन्ती ॥१॥
गायत्र्यै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत् त्रिवृतो रथन्तरम् ।
वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः ॥२॥

अयम् । पुरः । भुवः । तस्य । प्राणः । भौवायन इति भौवऽआयनः ।
वसन्तः । प्राणायन इति प्राणऽआयनः ।
गायत्री । वासन्ती ॥ त्रं ॥१॥
गायत्र्यै । गायत्रम् । गायत्रात् । उपाꣳशुरित्युपऽअꣳशुः । उपाꣳशोरित्युपऽअꣳशोः ।
त्रिवृदिति त्रिऽवृत् । त्रिवृत इति त्रिऽवृतः । रथन्तरमिति रथम्ऽतरम् ।
वसिष्ठः । ऋषिः । प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया ।
त्वया । प्राणम् । गृह्णामि । प्रजाभ्य इति प्रऽजाभ्यः ॥ च्रूं ॥२॥

कात्यायनः – " प्राणभृतः कर्णसहिता दशदशायं पुर इति प्रतिमन्त्रम् " (काश्रौ १७.६.३) इति । यासां प्राणभृत्संज्ञकानां पञ्चाशदिष्टकानां कर्णाभिधं चिह्नमस्ति तद्युक्तास्तादशेष्टका उपदध्यादिति शेषः। तत्र पूर्वस्यां दिश्युपधेयानां दशेष्टकानां मन्त्रपाठस्तु– ' अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनः । गायत्री वासन्ती ॥ गायत्र्यै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत् त्रिवृतो रथन्तरम् । वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः ' इति । भवत्यस्माज्जगदिति भुवःशब्दः प्रजापतिमाचष्टे । पुरः पूर्वस्यां दिशि अयं भुवः वर्तत इति शेषः। हे इष्टके, त्वं तद्रूपासीत्यभिप्रायः । एवमुत्तरेष्वपि वाक्येषु योज्यम् । तथा तस्य भुवःशब्दाभिधेयस्य प्रजापतेः संबन्धी प्राणः, अत एव अपत्यत्वमुपचर्य भौवायनः इत्युच्यते । तस्य च प्राणस्य श्वासवृत्तिरूपस्य अपत्यत्वेनोपचरितः प्राणायनः वसन्तः ऋतुः । तस्य च वसन्तस्य संबन्धिनी गायत्री । तस्याश्छन्दोरूपाया गायत्र्याः संबन्धि गायत्रं साम । तस्माच्च गायत्रसाम्न उत्पन्न इवोपांशुग्रहः। तस्माच्चोपांशुग्रहादुत्पन्न इव त्रिवृत्स्तोमः । तस्मात्

---

20. S2 om. त्वं

21. S2 om. अपि वाक्येषु

22. P1 अपश्यत्वमुपर्यते for अपत्यत्वमुपचर्य; P1 अपश्यत्वेन for अपत्यत्वेन

त्रिवृत्स्तोमादुत्पन्नमिव [v]रथन्तरं साम । यो वसिष्ठाख्यः [v]ऋषिः तद्रूपा वाऽसि । हे इष्टके, यथोक्तप्रकारेण प्रजापतिप्राणवसन्तादिरूपोपचारेण [v]प्रजापतिगृहीतया [v]त्वया [v]प्रजाभ्यः सर्वासां प्रजानां [v]प्राणं [v]गृह्णामि प्रजानां प्राणसिद्धये त्वामुपदधामीत्यर्थः । यद्यप्ययमेकवाक्यत्वादेक एव मन्त्रस्तथापि प्रतीष्टकमावृत्त्या दश मन्त्राः संपद्यन्ते ॥१-२॥

आ– प्राणभृतः पञ्चाशदिष्टकाः पञ्चाशद्भिर्यजुर्भिरुपदधाति– 'अयं पुरः' इति। पञ्चाशत्प्राणभृद्देवत्यानि यजूंषि भवन्ति। 'अयं पुरो भुवः' इति। [v]अयं [v]पुरः पुरस्तात् प्रागिति च पुरः प्रसिद्धोऽयमग्निः पुर इत्युच्यते। "अग्निर्वै पुरस्तद्यत्तमाह पुर इति प्राञ्चᳬ ह्यग्निमुद्धरन्ति" (शब्रा ८·१·१·४) इति श्रुतेः। [v]भुवः इति तस्याग्नेरेव विशेषणम्। भुवः। भवतीति भूः। भुव इति छान्दसः [शब्दः]। "अग्नेर्हीदं सर्वं भवति प्राणो ह्याग्निर्भूत्वा पुरस्तात्" (शब्रा ८·१·१·४)इत्यादिश्रुतेः। भुवश्चायमग्निस्तस्याग्नेरपत्यं [v]भौवायनः [v]प्राणः, [v]तस्य प्राणस्यापत्यं [v]प्राणायनः [v]वसन्तः। तस्य वसन्तस्यापत्यं [v]वासन्ती [v]गायत्री चतुर्विंशत्यक्षरात्मिका ॥१॥

[v]गायत्र्यै तस्या गायत्र्याः सकाशात् [v]गायत्रं साम निरमिमीत निर्मितम्। तस्मात् [v]गायत्रात् साम्नः [v]उपांशुः उपांशुर्नाम ग्रहो निर्मितः। तस्मात् [v]उपांशोः ग्रहात् [v]त्रिवृत् स्तोमः निरमिमीत त्रिवृत् स्तोमो निर्मितः। त्रिधा आवर्तत इति त्रिवृत्। स्तोमः स्तुतिः। [v]त्रिवृतः स्तोमात् [v]रथन्तरं साम निरमिमीत निर्मितम्। [v]वसिष्ठः [v]ऋषिः। वागादिषु श्रेष्ठतमत्वात् प्राणो वसिष्ठः। दर्शनसाध्यत्वात् ऋषिश्च। एवं [v]प्रजापतिगृहीतया प्रजापतिसृष्टया [v]त्वया [v]प्रजाभ्यः प्रजार्थं [v]प्राणं [v]गृह्णामि इति संबन्धः। 'अयं पुरः' इत्यादिभिर्दशभिर्भेदैः प्राणमेवैकं विशेषणावस्थितं प्रजाभ्यो गृह्णामीति ॥२॥

अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणम्।
ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी ॥३॥
त्रिष्टुभः स्वारᳬ स्वारादन्तर्यामोऽन्तर्यामात् पञ्चदशः पञ्चदशाद् बृहत्।
भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥४॥

---

6. B1 om. यजूंषि भवन्ति
7. B1 प्राच्यामग्निमुपदधाति for प्राञ्चᳬ ह्यग्निमुद्धरन्ति
10. B1 before भुवः adds पुरो; B1 om. प्राणः
12. H3 अस्मात् for तस्मात्
16. H2–3 °साधनत्वात् for °साध्यत्वात्
18. H3 एवं for एकं; B1 om. इति

प्राणभृदिष्टकोपधानमन्त्राः]

अयम् । दक्षिणा । विश्वकर्मेति विश्वऽकर्मा ।
तस्य । मनः । वैश्वकर्मणमिति वैश्वऽकर्मणम् ।
ग्रीष्मः । मानसः । त्रिष्टुप् । त्रिस्तुबिति त्रिऽस्तुप् । ग्रैष्मी ॥ डां ॥३॥
त्रिष्टुभः । त्रिस्तुभ इति त्रिऽस्तुभः । स्वारम् ।
स्वारात् । अन्तर्याम इत्यन्तःऽयामः । अन्तर्यामादित्यन्तःऽयामात् ।
पञ्चदश इति पञ्चऽदशः । पञ्चदशादिति पञ्चऽदशात् । बृहत् ।
भरद्वाज इति भरत्ऽवाजः । ऋषिः । प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया । त्वया ।
मनः । गृह्णामि । प्रजाभ्य इति प्रऽजाभ्यः ॥ णूं ॥४॥

सा– अथ दक्षिणस्यां दिश्युपधेयानां दशेष्टकानां मन्त्रपाठस्तु– 'अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणम् । ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी ॥ त्रिष्टुभः स्वारꣳ स्वारादन्तर्यामोऽन्तर्यामात् पञ्चदशः पञ्चदशात् बृहत् । भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः' इति । विश्वानि कर्माणि जगद्व्यापारादीनि यस्यासौ ᵛविश्वकर्मा । हे इष्टके, तद्रूपा त्वमसि । प्राणवसन्तादिपरंपरेव मनोग्रीष्मादिपरंपरा व्याख्येया । ᵛस्वारम् इति वासविशेषः ॥

आ– अथ दक्षिणतः – 'अयं दक्षिणा' इति । ᵛअयं वायुः ᵛदक्षिणा । दक्ष वृद्धौ शीघ्रार्थे च । दक्षते दक्षयतीति वा दक्षिणा । ᵛविश्वकर्मा च । "अयं वै वायुर्विश्वकर्मा योऽयं पवत एष हीदꣳ सर्वं करोति" (शब्रा ८·१·१·७) इति वायुर्विश्वकर्मा सर्वस्य कर्ता । ᵛतस्य विश्वकर्मणो वायोरपत्यं ᵛमनः ᵛवैश्वकर्मणम् । तस्य मनस अपत्यं ᵛग्रीष्मः ᵛमानसः । तस्य ग्रीष्मर्तोरपत्यं ᵛग्रैष्मी ᵛत्रिष्टुप् ॥३॥

ᵛत्रिष्टुभः छन्दसः अपत्यं त्रैष्टुभं ᵛस्वारं साम निर्मितम् । ᵛस्वारात् साम्न अपत्यम् ᵛअन्तर्यामः नाम ग्रहो निर्मितः । ᵛअन्तर्यामात् ग्रहात् ᵛपञ्चदशः स्तोमः निर्मितः । ᵛपञ्चदशात् ᵛबृहत् साम निर्मितम् । ᵛभरद्वाजः ᵛऋषिः । मनो वै भरद्वाज ऋषिः । ["अन्नं वाजो यो वै मनो बिभर्ति सोऽन्नं वाजं भरति तस्मान्मनो भरद्वाज ऋषिः" (शब्रा ८·१·१·९) इति श्रुतेः ।] ᵛप्रजापतिगृहीतया इष्टकया तु ᵛमनः ᵛगृह्णामि ᵛप्रजाभ्यः अर्थायेति संबन्धः ॥४॥

---

15. H2–3 om. अयं वै आयुर्विश्वकर्मा; B1 तु for वै
17. B1 om. ग्रीष्मो ... त्रिष्टुप् (L 18)
19. B1 om. त्रिष्टुभः ... अपत्यं; B1 om. साम ... इष्टकया तु मनः (L 23)
23. H2–3 प्रजाभोगार्थाय for प्रजाभ्यः अर्थाय

अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसम् ।
वर्षाश्चाक्षुष्यो जगती वार्षी ।।५।।
जगत्या ऋक्समम्ऋक्समाच्छुक्रः शुक्रात् सप्तदशः सप्तदशाद्वैरूपम् ।
जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ।।६।।

अयम् । पश्चात् । विश्वव्यचा इति विश्वऽव्यचाः ।
तस्य । चक्षुः । वैश्वव्यचसमिति वैश्वऽव्यचसम् ।
वर्षाः । चाक्षुष्यः । जगती । वार्षी ॥ झं ॥५॥
जगत्याः । ऋक्सममित्यृक्ऽसमम् । ऋक्समादित्यृक्ऽसमात् । शुक्रः । शुक्रात् ।
सप्तदश इति सप्तऽदशः । सप्तदशादिति सप्तऽदशात् । वैरूपम् ।
जमदग्निरिति जमत्ऽअग्निः । ऋषिः । प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया । त्वया ।
चक्षुः । गृह्णामि । प्रजाभ्य इति प्रऽजाभ्यः ॥ छूं ॥६॥

सा– अथ पश्चिमायां दिश्युपधेयानामिष्टकानां मन्त्रपाठस्तु– 'अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसम् । वर्षाश्चाक्षुष्यो जगती वार्षी ॥ जगत्या ऋक्सममृक्समाच्छुक्रः शुक्रात् सप्तदशः सप्तदशाद्वैरूपम् । जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ' इति । विश्वं सर्वं जगद् व्यचति व्याप्नोतीति vविश्वव्यचाः प्रजापतिः । शेषं पूर्ववत् योजनीयम् । vवर्षाः वर्षर्तुः । vऋक्समम् इति सामविशेषः ॥५–६॥

आ– अथ पश्चात् । ' अयं पश्चाद्विश्वव्यचाः ' । " असौ वा आदित्यो विश्वव्यचा यदा ह्येवैष उदेत्यथेदꣳ सर्वं व्यचो भवति तद्यत्तमाह पश्चादिति तस्मादेतं प्रत्यञ्चमेव यन्तं पश्यन्ति चक्षुर्हादित्यो " (शब्रा ८·१·२·१) इति श्रुतेः । vतस्य आदित्यस्य विश्वव्यचसोऽपत्यं vवैश्वव्यचसं vचक्षुः निर्मितम् । तस्य चक्षुषः अपत्यं vवर्षाः ऋतुर्निर्मितः । तस्य वर्षाऋतोरपत्यं vवार्षी । जगती छन्दः ॥५॥

तस्याः vजगत्याः अपत्यम् vऋक्समं नाम साम निर्मितम् । तस्मात् vऋक्समात् साम्नः अपत्यं vशुक्रः नाम ग्रहो निर्मितः । तस्मात् vशुक्रात् vसप्तदशः स्तोमोऽपत्यरूपो निर्मितः । तस्मात् vसप्तदशात् स्तोमात् अपत्यरूपं vवैरूपं पृष्ठं नाम साम निर्मितम् । vजमदग्निः vऋषिः । " चक्षुर्वै जमदग्निः " । vप्रजापतिगृहीतया प्रजापतिना गृहीतया इष्टकया vचक्षुः vगृह्णामि vप्रजाभ्यः अर्थायेति संबन्धः ॥६॥

---

19. H3 इत्यादि for इति
22. B1 ऋक्सामनाम्नः for ऋक्समात् साम्नः

प्राणभृदिष्टकोपधानमन्त्राः]

इदमुत्तरात् स्वस्तस्य श्रोत्रꣳ सौवम् ।

शरच्छ्रौत्र्यनुष्टुप्छारदी ॥७॥

अनुष्टुभ ऐळमैळान्मन्थी मन्थिन एकविꣳश एकविꣳशाद्वैराजम् ।

विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥८॥

इदम् । उत्तरात् । स्वरिति स्वः । तस्य । श्रोत्रम् । सौवम् ।

शरत् । श्रौत्री । अनुष्टुप् । अनुस्तुबित्यनुऽस्तुप् । शारदी ॥ चां ॥७॥

अनुष्टुभः । अनुस्तुभ इत्यनुऽस्तुभः । ऐळम् । ऐळात् । मन्थी । मन्थिनः ।

एकविꣳश इत्येकऽविꣳशः । एकविꣳशादित्येकऽविꣳशात् । वैराजम् ।

विश्वामित्रः । ऋषिः । प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया । त्वया ।

श्रोत्रम् । गृह्णामि । प्रजाभ्य इति प्रऽजाभ्यः ॥ फें ॥८॥

सा– अथोत्तरस्यां दिशि उपधेयानामिष्टकानां मन्त्रपाठस्तु– 'इदमुत्तरात् स्वस्तस्य श्रोत्रꣳ सौवम् । शरच्छ्रौत्र्यनुष्टुप्छारदी ॥ अनुष्टुभ ऐळमैळान्मन्थी मन्थिन एकविꣳश एकविꣳशाद्वैराजम् । विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः' इति । सौति सर्वं जगत् प्रेरयतीति स्वःशब्दः प्रजापतिवाची । उत्तरस्यां दिशि यदिदं [v]स्वः प्रजापतिशरीरं हे इष्टके, त्वं तद्रूपा असीति योज्यम् । [v]ऐळम् इति सामविशेषः । शेषं पूर्ववत् योज्यम् ॥७–८॥

आ– अथोत्तरतः – 'इदमुत्तरात् स्वः' इति । दिशो वा [v]उत्तरात् [v]स्वः स्वर्गो लोकः । [v]तस्य लोकस्य स्वः इत्यस्यापत्यं [v]सौवं [v]श्रोत्रम् । तस्य श्रोत्रस्य अपत्यं [v]श्रौत्री [v]शरत् शरद्तुः । तस्य शरद्तोः अपत्यं [v]शारदी [v]अनुष्टुप् ॥७॥

तया (स्याः ?) अनुष्टुभा (भः ?) [v]ऐळं साम निर्मितम् । [v]ऐळात् साम्नः अपत्यरूपः [v]मन्थी नाम ग्रहः । [v]मन्थिनः ग्रहात् [v]एकविंशः स्तोमो निर्मितः । तस्मात् एकविंशस्तोमात् [v]वैराजं पृष्ठं साम निर्मितम् । 'विश्वामित्र ऋषिः' । [v]विश्वामित्रः श्रोत्रम् ।

---

13. P1 after सौति ins. षू प्रसवे

16. H2–3 उतरः for उत्तरतः; B1 om. वा

17. B1 स्वर्लोकस्य for लोकस्य

21. B1 निरमिमीत for निर्मितम्

“ अथो यदस्मै सर्वतो मित्रं भवति तस्माच्छ्रोत्रं विश्वामित्र ऋषिः ” (शब्रा. ८·१·२·६) इति । ᵛप्रजापतिगृहीतया प्रजापतिसृष्टया इष्टकया ᵛत्वया ᵛश्रोत्रं ᵛप्रजाभ्यः अर्थाय ᵛगृह्णामि ॥८॥

इयमुपरि मतिस्तस्यै वाङ्मात्या । हेमन्तो वाच्यः पङ्क्तिर्हैमन्ती ॥९॥
पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात् त्रिणवत्रयस्त्रिंशौ
त्रिणवत्रयस्त्रिंशाभ्याꣳ शाक्वररैवते ।
विश्वकर्म ऋषिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ।
लोकं पृण ता अस्येन्द्रं विश्वाः ॥१०॥(७)॥

इयम् । उपरि । मतिः । तस्यै । वाक् । मात्या ।
हेमन्तः । वाच्यः । पङ्क्तिः । हैमन्ती ॥ हं ॥९॥
पङ्क्त्यै । निधनवदिति निधनऽवत् । निधनवत इति निधनऽवतः ।
आग्रयणः । आग्रयणात् । त्रिणवत्रयस्त्रिंशौ । त्रिनवत्रयस्त्रिंशा इति त्रिनवत्रयस्त्रिंशौ ।
त्रिणवत्रयस्त्रिंशाभ्याम् । त्रिनवत्रयस्त्रिंशाभ्यामिति त्रिनवत्रयस्त्रिंशाभ्याम् ।
शाक्वररैवते इति शाक्वररैवते ।
विश्वकर्मेति विश्वऽकर्मा । ऋषिः । प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया ।
त्वया । वाचम् । गृह्णामि । प्रजाभ्य इति प्रऽजाभ्यः ।
लोकम् । पृण । ताः । अस्य । इन्द्रम् । विश्वाः ॥ ट्रीं ॥१०॥(७)॥

[मयि गृह्णामि पञ्चदश ॥१५॥ ध्रुवाऽसि त्रयोदश ॥१३॥ मधुवाता एकादश ॥११॥ सम्यक् स्रवन्ति नव ॥९॥ इमं मा षट् ॥६॥ अपां त्वैक ॥१॥ अयं पुरो दश ॥१०॥ सप्तानुवाकेषु पञ्चषष्ठि ॥६५॥]

[मयुं गौरं गवयम् ॥ उष्ट्रं शरभम् ॥ छ ॥]

[इति शुक्लयजुःकाण्वपदसंहितायां चतुर्दशोऽध्यायः ॥१४॥]

---

1. B1 श्रौत्रं for श्रोत्रं

प्राणभृदिष्टकोपधानमन्त्राः]

सा– अथ मध्यमदेश उपधेयानामिष्टकानां मन्त्रपाठस्तु– ‘ इयमुपरि मतिस्तस्यै वाङ्मात्या । हेमन्तो वाच्यः पङ्क्तिर्हैमन्ती ॥ पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात् त्रिणवत्रयस्त्रिꣳशौ त्रिणवत्रयस्त्रिꣳशाभ्याꣳ शाक्वररैवते । विश्वकर्म ऋषिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ’ इति । मन्यते कृत्स्नं जगज्जानातीति ᵛमतिः प्रजापतिः । ऊर्ध्वायां दिशि योऽयं प्रजापतिः हे इष्टके, तद्रूपा त्वमसि । मतिनाम्नः प्रजापतेः स्त्र्यपत्यरूपा या ᵛइयं ᵛवाक् सा ᵛमात्या । वाचोऽपत्यं ᵛवाच्यः । ᵛनिधनवत् इति सामविशेषः । अत्रैकैकस्मिन् मन्त्रे प्रजापतिरिन्द्रियमृतुश्छन्दः सामविशेषो ग्रहः स्तोमः पृष्ठं स्तोत्रं साम ऋषिरिति नवानामेतेषां पदार्थानां यद्यपि लोकप्रसिद्धो जन्यजनकभावो नास्ति, तथापि मन्त्रार्थत्वेन मनसा भावयितुमिदमुक्तमित्यविरोधः ॥

कात्यायनः– “ लोकंपृणा दक्षिणाꣳसादध्या मध्यात् ” (काश्रौ १७.६.५) इति । लोकंपृणा-संज्ञकाः इष्टकाः । दक्षिणां समारभ्य मध्यदेशपर्यन्ताः । ‘ लोकं पृण ’ इत्यादिभिस्त्रिभिर्मन्त्रैरुपदध्यादिति शेषः । तेषां मन्त्राणां प्रतीकान्याह– ‘ लोकं पृण ता अस्येन्द्रं विश्वाः ’ इति । ‘ लोकं पृण ’ इति इदं प्रथममन्त्रप्रतीकम् । ‘ ता अस्य ’ इति द्वितीयमन्त्रस्य प्रतीकमिदम् । ‘ इन्द्रं विश्वा ’ इति तृतीयमन्त्रस्य प्रतीकम् । ते च मन्त्रास्त्रयोदशेऽध्याये व्याख्याताः ॥९–१०॥

[इति चतुर्दशेऽध्याये सप्तमोऽनुवाकः ॥७॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमार्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये चतुर्दशोऽध्यायः ॥१४॥

———

आ– “ अथ मध्ये । इयमुपरि मतिरिति ” (शब्रा ८.१.२.७) । वाक् चन्द्रमाः । ᵛउपरि या ᵛइयं ᵛमतिः वा इति वाक् । “ चन्द्रमा वा उपरि तद्यत्तमाहोपरीत्युपरि हि चन्द्रमा अथ यन्मतिरित्याह वाग्वै मतिर्वाचा हीदꣳ सर्वं मनुते ” (शब्रा ८.१.२.७) इति श्रुतेः । तस्य चन्द्रमस अपत्यभूता मतिः । ᵛतस्यै तस्याः अपत्यं ᵛमात्या ᵛवाक् । वाचः अपत्यं ᵛवाच्यः ᵛहेमन्तः ऋतुः । हेमन्तस्यापत्यं ᵛहैमन्ती ᵛपङ्क्तिः छन्दो निर्मितम् ॥८॥

ᵛपङ्क्त्यै पङ्क्त्याश्छन्दसः सकाशात् ᵛनिधनवत्, निधनवदिति साम निर्मितम् । ᵛनिधनवतः साम्नः सकाशात् ᵛआग्रयणः नाम ग्रहो निर्मितः । ᵛआग्रयणात् ग्रहात् ᵛत्रिणवत्रयस्त्रिंशौ स्तोमौ निर्मितौ । ᵛत्रिणवत्रयास्त्रिꣳशाभ्यां स्तोमाभ्यां ᵛशाक्वररैवते पृष्ठे सामनी

7. P1 प्रनाडीनाम्, S2 नाडीनाम् for नवानाम्

22. H2–3 om. तस्यै; H2–3 चन्द्रस्य for वाचः

26. H3 पृष्ठसामनी for पृष्ठे सामनी

निर्मिते । ^{v}विश्वकर्मा ^{v}ऋषिः । विश्वकर्मेति वागुच्यते । " वाग्वै विश्वकर्मर्षिः " (शब्रा ८·१·२·९) इति । सर्वदर्शनहेतुत्वात्वादृषिः । एवं ^{v}प्रजापतिगृहीतया प्रजापतिना सृष्टया इष्टकया ^{v}प्रजाभ्यः अर्थाय ^{v}वाचं ^{v}गृह्णामि इति ॥

'लोकं पृण ता अस्येन्द्रं विश्वाः' इति व्याख्यातामिति ॥१०॥

[इति चतुर्दशोऽध्याये सप्तमोऽनुवाकः ॥७॥]

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपरिपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्ति-साम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे चतुर्दशोऽध्यायः ॥१४॥

---

7. H2–3 om. सूनुना and °भट्टोपाध्यायेन

8. H3 after अध्यायः adds श्रीरामाय नमः

पञ्चदशोऽध्यायः

[अथ प्रथमोऽनुवाकः ।]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

चतुर्दशेऽध्याये यजमानपुष्करपर्णास्तरणादिप्रथमचितिमन्त्रा उक्ताः । एतावता प्रथमा चितिः समाप्ता । अथ पञ्चदशेऽध्याये द्वितीयतृतीयचित्यादिमन्त्रा उच्यन्ते । तत्र प्रथमेऽनुवाके द्वितीयचितावश्विन्याख्या इष्टका अभिधीयन्ते ॥

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि ध्रुवं योनिमा सीद साधुया ।
उख्यस्य केतुं प्रथमं जुषाणाऽश्विनाऽध्वर्यू सादयतामिह त्वा ॥१॥

ध्रुवक्षितिरिति ध्रुवऽक्षितिः । ध्रुवयोनिरिति ध्रुवऽयोनिः । ध्रुवा । असि ।
ध्रुवम् । योनिम् । आ । सीद । साधुयेति साधुऽया ।
उख्यस्य । केतुम् । प्रथमम् । जुषाणा ।
अश्विना । अध्वर्यू इत्यध्वर्यू । सादयताम् । इह । त्वा ॥ थो ॥१॥

सा– कात्यायनः – “ आश्विनी ध्रुवक्षितिरिति प्रतिमन्त्रम् ” (काश्रौ १७.८.१५) इति । अश्विदेवयुक्तैः मन्त्रैरुपधेया इष्टका आश्विन्यस्ताः ‘ ध्रुवक्षितिः ’ इत्यादिभिः पञ्चभिर्मन्त्रैः क्रमेणोपदध्यादिति शेषः । तत्र प्रथममन्त्रपाठस्तु– ‘ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि ध्रुवं योनिमा सीद साधुया । उख्यस्य केतुं प्रथमं जुषाणाऽश्विनाऽध्वर्यू सादयतामिह त्वा ’ इति । ध्रुवा स्थिरा क्षितिर्निवासभूमिर्यस्या इष्टकायाः सा 'ध्रुवक्षितिः । यस्यां भूमौ इष्टका निवसन्ति तस्या भूमेश्चाञ्चल्याभावात् स्थैर्यं द्रष्टव्यम् । ध्रुवा विनाशरहिता योनिरुत्पत्तिहेतुर्मृद्रूपा यस्या इष्टकायाः सा 'ध्रुवयोनिः । हे इष्टके, तादृशी त्वं स्वरूपतः 'ध्रुवा 'असि आमकपालादिभिः संयोज्य निर्मितत्वाद् ध्रुवत्वम् । 'साधुया अस्माभिः साधनीया उपधातव्या त्वं 'ध्रुवं 'योनिं स्थिरमग्निक्षेत्ररूपं स्थानम् 'आसीद आगत्योपविश । किं च– 'उख्यस्य उखायां स्थितस्याग्नेः 'केतुं प्रज्ञापकं प्रथमद्वितीयायां चितौ मुख्यं स्थानं जुषाणौ सेवमानौ देवानाम् 'अध्वर्यू उभौ 'अश्विना 'इह अस्मिन्नग्निक्षेत्रे हे इष्टके, 'त्वा त्वां 'सादयतां स्थापयताम् ॥१॥

आ– अश्विनीरिष्टका उपदधाति– द्वितीयां चितिं देवा अपश्यन् । अतो द्वितीयचितिविषयमन्त्राणां देवानामार्षम् । सामान्येन अत्र ‘ ध्रुवक्षितिः ’ इति पञ्चाश्विन्यः । तत्र प्रथमा विराट्,

---

6. P1 om. समाप्ता

द्वितीयादयश्चतस्रस्त्रिष्टुभो यजुरन्ताः । अश्विनीदेवत्याः इष्टकाः अत्र विशेष्याः । ^{v}ध्रुवक्षितिः स्थिरनिवासा ^{v}ध्रुवयोनिः च अनश्वरस्थानाश्चाश्विन्य इष्टकाः । स्वभावत एव त्वं ^{v}ध्रुवा स्थिरा ^{v}असि । अतस्त्वां ब्रवीमि– ‘ ध्रुवं योनिमा सीद ’ । ध्रुवां स्थिरां ^{v}योनिं स्थानम् ^{v}आसीद अधितिष्ठस्व । कथंभूतं स्थानमिति ? ^{v}साधुया साधुम् । द्वितीयैकवचनस्य स्थाने या भवति । ^{v}उख्यस्य उखायां स्थितस्याग्नेः ^{v}केतुं प्रज्ञानं प्रथमां चितिम् । ^{v}प्रथमं पृथु प्रज्ञानं ^{v}जुषाणा जुषाणौ । अथ यजुः । ^{v}अश्विना अश्विनौ ^{v}अध्वर्यू । ^{v}इह द्वितीयस्यां चितौ स्थाने ^{v}त्वा प्रथमां चितिं त्वां ^{v}सादयताम् उपाधत्ताम् । अथवा “ अग्निरुख्यस्तस्यैष प्रथमः केतुर्यत्प्रथमा चितिः ’ (शब्रा ८·२·१·४) इत्यादिश्रुतेः ॥१॥

कु॒ला॒यिनी॑ घृ॒तव॑ती॒ पुरं॑न्धिः स्यो॒ने सी॑द॒ सद॑ने पृ॒थि॒व्याः ।
अ॒भि त्वा॑ रु॒द्रा वस॑वो गृणन्त्वि॒मा ब्रह्म॑ पीपिहि॒
सौभ॑गाया॒श्विना॑ऽध्व॒र्यू सा॑दयता॒मि॒ह त्वा॑ ॥२॥

कु॒ला॒यिनी॑ । घृ॒तव॒तीति॑ घृ॒तऽव॑ती । पुरं॑न्धि॒रिति॒ पुर॑म्ऽधिः ।
स्यो॒ने । सी॒द॒ । सद॑ने । पृ॒थि॒व्याः ।
अ॒भि । त्वा॒ । रु॒द्राः । वस॑वः । गृ॒ण॒न्तु॒ ।
इ॒मा । ब्रह्म॑ । पी॒पि॒हि॒ । सौभ॑गाय ॥। इ॒यें ॥२॥

सा– अथ द्वितीयः – ‘ कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः । अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाऽध्वर्यू सादयतामिह त्वा ’ इति । हे इष्टके, त्वं ^{v}कुलायिनी निवासस्थानवती । ^{v}घृतवती होष्यमाणेनाज्येन संयुता सती ^{v}पुरन्धिः । पुरु बहुधा धीयते सम्यगवस्थाप्यत इति पुरन्धिः । तादृशी सती ^{v}पृथिव्याः प्रथमचितिरूपायाः भूमेः संबन्धिनी ^{v}स्योने सुखरूपे ^{v}सदने स्थाने ^{v}सीद उपविश । किं च– ^{v}रुद्राः ^{v}वसवः सर्वे देवाः ^{v}त्वा त्वाम् ^{v}अभिगृणन्तु । ^{v}इमा इमानि ^{v}ब्रह्म ब्राह्मणानि मन्त्रात्मकानि ^{v}पीपिहि आप्यायस्व । किमर्थम् ? ^{v}सौभगाय महदैश्वर्यार्थम् । शेषं पूर्ववत् ॥२॥

---

1. B1 आश्विन° for आश्विनी°
2. B1 °निवासः, H3 °निवासाः for °निवासा; B1 H2–3 अश्वरथानां for अनश्वरस्थानाः; B1 वाश्विन्येष्विष्टकाः, H2–3 वाविश्वन्येष्टका for चाश्विन्य इष्टकाः
5. B1 उषायां for उखायां
6. B1 इदम् for इह
18. P1 after कुलायिनी ins. कुलायो नीडं विद्यते यस्यां
22. S2 om. शेषं

आ – ' कुलायिनी घृतवती ' इति। कुलायं गृहं, तदाकारा तद्वा अस्या अस्तीति vकुलायिनी। सा हि रेतःसिग्भिरिष्टकाभिः खेटायामिव सूपहिता गृहाकारा भवतीति कुलायिनी। vघृतवती भविष्यद्योगेन। इह हि वसोर्धाराद्याख्याहुतयो होष्यन्त इति घृतवती। पुरं पुरु बहु इष्टकाचयनं धारयतीति vपुरन्धिः द्वितीया चितिः। एवंभूतां त्वां ब्रवीमि। ' स्योने सीद सदने पृथिव्याः '। vपृथिव्याः प्रथमचितिसंबन्धिनि vस्योने सुखरूपे vसदने स्थाने vसीद उपविश। किं च– ' अभि त्वा रुद्रा वसवो गृणन्तु '। vरुद्राः vवसवः च स्वर्देवताः त्वां द्वितीयां चितिम् vअभिगृणन्तु स्तुवन्तु। किं च– ' इमा ब्रह्म '। इमानि vब्रह्म ब्रह्माणि मन्त्रात्मकानि vपीपिहि आप्यायस्व। vसौभगाय महते ऐश्वर्याय पीपिहीति संबन्धः। vअश्विना vअध्वर्यू इत्यादि पूर्ववत् ॥२॥

स्वैर्दक्षैर्दक्षपितेह सीद देवानां सुम्ने बृहते रणाय।
पितेवैधि सूनव आ सुशेवा स्वावेशा तन्वा संविशस्वा-
श्विनाऽध्वर्यू सादयतामिह त्वा ॥३॥

स्वैः। दक्षैः। दक्षपितेति दक्षऽपिता। इह। सीद।
देवानाम्। सुम्ने। बृहते। रणाय।
पितेवेति पिताऽइव। एधि। सूनवे। आ। सुशेवेति सुऽशेवा।
स्वावेशेति सुऽआवेशा। तन्वा। सम्। विशस्व ॥ थों ॥३॥

सा– अथ तृतीयः – स्वैर्दक्षैर्दक्षपितेह सीद देवानां सुम्ने बृहते रणाय। पितेवैधि सूनव आ सुशेवा स्वावेशा तन्वा संविशस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ' इति। vस्वैः vदक्षैः स्वकीयैर्बलैः vदक्षपिता बलस्य पालयित्री हे इष्टके, त्वम् एवंविधा सती vइह अस्यां द्वितीयायां चितौ vसीद उपविश। किमर्थम्? vबृहते महते vरणाय रमणीयाय vदेवानां संबन्धिनि vसुम्ने सुम्नाय सुखाय सुखार्थम्। तत्र vआ सर्वतः vसुशेवा सुखेन सेवितुं शक्या vएधि भव। क इव? vसूनवे vपितेव यथा पुत्रार्थः पिता सुखेन सेव्यो भवति। किं च – vतन्वा स्वकीयेन शरीरेण vस्वावेशा सुखेन प्रवेशवती सती vसंविशस्व अवस्थानं कुरु। vअश्विना इत्यादि पूर्ववत् ॥३॥

1. B1 om. घृतवती; H3 om. इति
2. B1 राडायाम् for खेटायाम्
4. H3 द्वितीय° for द्वितीया
5. H2–3 om. second पृथिव्याः; H2–3 °कूपे for °रूपे
6. B1 सवन° for स्वर्°
7. B1 om. पीपिहि ... ऐश्वर्याय (L 8)
19. P1 स्वां for अस्यां

आ– ' स्वैर्दक्षैः ' इति । ᵛस्वैः स्वकीयैः ᵛदक्षैः वीर्यैः ᵛदक्षपिता । व्यत्ययः । वीर्यस्य पालयित्री । दक्षशब्दोऽत्र वीर्यवचनः । ᵛसुम्ने । सुम्नशब्दः सुखवचनः । सुम्नाय सुखाय ᵛदेवानां संबन्धिने सुखाय सुखप्राप्त्यर्थम् । ᵛबृहते महते ᵛरणाय रमणीयाय यज्ञक्रतवे यज्ञक्रतुकरणार्थम् ᵛइह द्वितीयस्यां चितौ ᵛसीद । ᵛपितेव ᵛएधि ᵛसूनवे पुत्राय पिता इव त्वम् एधि भव । आङ् मर्यादायाम् । ᵛसुशेवा सुखयित्री । किं च– ᵛस्वावेशा । अत्र विभक्तिव्यत्ययः । स्वावेशैः स्वप्रवेशैः ᵛतन्वा आत्मना ᵛसंविशस्व अवस्थानं कुरु । एवंविधां त्वाम् इह द्वितीयायां चित्याम् ᵛअश्विना ᵛअध्वर्यू ᵛसादयताम् ॥३॥

पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽ यजस्वा-
श्विनाऽध्वर्यू सादयतामिह त्वा ॥४॥

पृथिव्याः । पुरीषम् । असि । अप्सः । नाम ।
ताम् । त्वा । विश्वे । अभि । गृणन्तु । देवाः ।
स्तोमपृष्ठेति स्तोमऽपृष्ठा । घृतवतीति घृतऽवती । इह । सीद ।
प्रजावदिति प्रजाऽवत् । अस्मे इत्यस्मे । द्रविणा । आ । यजस्व । ॥ दः ॥४॥

सा– अथ चतुर्थः – ' पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः । स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा यजस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ' इति । हे इष्टके, त्वं ᵛपृथिव्याः प्रथमचितिभूतायाः भूमेः ᵛपुरीषं पूरकम् ᵛअसि ᵛअप्सः ᵛनाम । अपः सनोतीति अप्सः रसः । " तस्य वा एतस्य यजुषः । रस एवोपनिषत् " (शब्रा १०.३.५.१२) इति शतपथश्रुतेः । या स्व[य]मेव रसगुणभूता प्रसिद्धा । ᵛतां ᵛत्वा तादृशीं त्वां ᵛविश्वे ᵛदेवाः सर्वेऽपि देवाः ᵛअभिगृणन्तु सर्वतः कीर्तयन्तु । ᵛस्तोमपृष्ठा सप्तदशादिस्तोमयुक्तानि पृष्ठस्तोत्राणि यस्याः सा स्तोमपृष्ठा । ᵛघृतवती होष्यमाणेनाज्येन संयुता सती ᵛइह अस्मिन् क्षेत्रे ᵛसीद तिष्ठ । ᵛअस्मे अस्मभ्यं ᵛप्रजावत् पुत्रपौत्रादियुक्तानि [ᵛद्रविणा] द्रविणानि धनानि ᵛआ ᵛयजस्व सर्वतः देहि । ᵛअश्विना इत्यादि पूर्ववत् ॥४॥

---

6. H3 om. विभक्ति°

18. S2 om. एवोप° ... श्रुतेः

22. P1 after यजस्व ins. यज देवतापूजासंगतिकरणदानेषु

आश्विनेष्टकामन्त्राः]

आ– ' पृथिव्याः पुरीषम् ' इति । या त्वं [V]पृथिव्याः प्रथमायाश्चितेः [V]पुरीषम् इव [V]असि । " पृथिवी वै प्रथमा चितिस्तस्या एतत् पुरीषमिव यद्द्वितीया ' (शब्रा ८.२.१.७) इति श्रुतेः । पुरीष इव तद्रस इव । [V]अप्सः [V]नाम इति रसः । अपः सनोतीति अप्सः । अपां हि रसो गुणः । [V]तां द्वितीयां चितिं [V]त्वा त्वां [V]विश्वे [V]देवाः [V]अभिगृणन्तु स्तुवन्तु गायन्तु । त्वमपि च [V]स्तोमपृष्ठा [V]घृतवती इति च । [V]इह द्वितीयस्यां चितौ [V]सीद प्रविश । यान् स्तोमान् अस्यां चितौ शंसन्ति तैरेषा स्तोमपृष्ठा घृतवतीह सीद । ' प्रजावदस्मे द्रविणा यजस्व ' इति । तैः स्तोमैरेषा स्तोमपृष्ठा घृतवती च वसोर्धारादिभिर्होमैः [V]यजस्व । [V]प्रजावत् प्रजासंयुक्तानि [V]द्रविणा द्रविणानि [V]अस्मे अस्मभ्यं देहि । [V]अश्विना [V]अध्वर्यू [V]सादयताम् [V]इह [V]त्वा इति समानार्थः ॥४॥

अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं
विष्टम्भनीं दिशामधिपत्नीं भुवनानाम् ।
ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषि-
रश्विनाऽध्वर्यू सादयतामिह त्वा ।
शुक्रश्च शुचिश्च ग्रैष्मावृतू अग्नेरन्तःश्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः
कल्पन्तामग्नयः पृथङ्ङ मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
ग्रैष्मावृतू अभि कल्पमाना इन्द्रमिव देवा अभि संविशन्तु
तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ॥५॥(१)॥

आदित्याः । त्वा । पृष्ठे । सादयामि ।
अन्तरिक्षस्य । धर्त्रीम् । विष्टम्भनीम् । दिशाम् । अधिपत्नीमित्यधिऽपत्नीम् । भुवनानाम् ।
ऊर्मिः । द्रप्सः । अपाम् । असि । विश्वकर्मेति विश्वऽकर्मा । ते । ऋषिः ।
शुक्रः । शुचिः । ग्रैष्मौ । ऋतू इत्यृतू ॥ ट्राः ॥५॥(१)॥

---

6. B1 H2-3 after स्तोमान् add यान् स्तोमान्
7. H2-3 om. च
8. B1 om. द्रविणा

सा– अथ पञ्चमः – ' अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशामधिपत्नीं भुवनानाम्। ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाऽध्वर्यू सादयतामिह त्वा ' इति। हे इष्टके, त्वा त्वाम् अदित्याः पृष्ठे प्रथमचितिभूतायाः भूमेरुपरि सादयामि स्थापयामि। कीदृशीं त्वाम्? अन्तरिक्षस्य लोकस्य धर्त्रीं धारयित्रीं, तथा प्राच्यादीनां दिशां विष्टम्भनीं विविधसांकर्येण स्तम्भयन्तीं व्यवस्थापयन्तीं, भुवनानां सर्वेषाम् अधिपत्नीम् आधिक्येन पालयित्रीम्। यस्याः ते तव विश्वकर्मा प्रजापतिः ऋषिः द्रष्टा, सा त्वम् अपां यः ऊर्मिः यश्च द्रप्सः तदुभयरूपा असि। शिष्टं पूर्ववत् ॥

कात्यायनः – " शुक्रश्च शुचिश्चेत्यृतव्ये " (काश्रौ १७·८·१६) इति। ऋतव्यसंज्ञके द्वे इष्टके उपदध्यादिति शेषः। पाठस्तु– ' शुक्रश्च शुचिश्च ग्रैष्मा ऋतू अग्नेरन्तःश्लेषोऽसि। कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः। ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे। ग्रैष्मा ऋतू अभि कल्पमाना इन्द्रमिव देवा अभि संविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ' इति। शुक्रः ज्येष्ठमासः, शुचिः आषाढः। तावुभौ ग्रीष्मसंबन्धिनावृत्ववयवौ। हे ग्रीष्माख्य ऋतो, त्वं चीयमानस्य अग्नेः अन्तःश्लेषः असि। यथा कुड्यस्यान्तर्दार्ढ्यार्थं काष्ठपाषाणादयः श्लेष्यन्ते तद्वत्। मम अग्निं चिन्वतो यजमानस्य ज्यैष्ठ्याय उत्कर्षार्थम् इमे द्यावापृथिव्यौ स्वोचितमुपकारं कल्पेतां संपादयेताम्। आपः च ओषधयः च कल्पन्तां स्वोचितमुपकारं संपादयन्तु। समानं व्रतं कर्म येषां ते सव्रताः। एकस्मिन् कर्मणि अवस्थिता आहवनीयाद्यग्नयः अपि पृथक् कल्पन्ताम्। प्रत्येकं स्वस्वोचितव्यापारं संपादयन्तु। किं च– इमे द्यावापृथिवी अन्तरा अनयोर्द्यावापृथिव्योर्मध्ये वर्तमानाः समनसः एकमनस्काः ये अग्नयः ते सर्वेऽपि ग्रीष्मसंबन्धिनावेतावृत्ववयवौ अभिकल्पमानाः सर्वतः संपादयन्तः एतत् कर्म अभिसंविशन्तु। तत्र दृष्टान्तः – इन्द्रम् इव देवाः यथान्ये सर्वे देवाः इन्द्रमभितः सेवन्ते तद्वत्। हे ऋतव्ये इष्टके, युवां तया देवतया अङ्गिरस्वत् अङ्गिरसां कर्मणीव ध्रुवे स्थिरे सत्यौ सीदतम् उपविशतम् ॥५॥

[इति पञ्चदशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

आ– ' अदित्यास्त्वा ' इति। अदित्याः प्रथमायाश्चितेः पृष्ठे उपरि स्थाने आ सादयामि। कथंभूतामिति? अन्तरिक्षस्य लोकस्य धर्त्रीं धारयित्रीं विष्टम्भनीं विशेषतः स्तम्भनकर्त्रीं, दिशां भुवनानाम् अधिपत्नीम् ईशानीं, या ऊर्मिः कल्लोलराशिः द्रप्सः अपां रसः असि। ते यस्याः तव विश्वकर्मा ऋषिः। यस्यास्ते अश्विनौ [अध्वर्यू] तां त्वाम् इह द्वितीयस्यां चितौ आ सादयतां प्रवेशनं कारयताम् ॥

ऋतव्ये इष्टके उपदधाति– ' शुक्रश्च ' इति। व्याख्यातसमानार्थोऽयं मन्त्रः। शुक्रश्चेति मरुद्देवत्यं यजुः। शुक्रः ज्येष्ठः, शुचिः आषाढः। एतौ मिलितौ ग्रीष्मः। ग्रैष्मौ ऋतू ग्रीष्मऋतुरिति व्यत्ययः। स्वार्थे तद्धितः। ग्रीष्म ऋतुः। अग्नेः अन्तः मध्ये व्यवस्थितः श्लेषः असि। ज्यैष्ठ्याय ज्येष्ठभावाय। द्यावापृथिवी द्यावापृथिव्यौ कल्पेताम्।

---

6. S2 om. first यः

25. H2–3 om. यस्यास्ते ... सीदतमिति (P. 289, L 5)

वैश्वदेवीष्टकाद्युपधानमन्त्राः]

[V]आपः ज्यैष्ठ्याय [V]कल्पन्ताम् । [V]ओषधयः च ज्यैष्ठ्याय कल्पन्ताम् । [V]अग्नयः च [V]मम [V]पृथक् सर्वे पृथक् पृथक् ज्यैष्ठ्याय [V]कल्पन्ताम् । [V]सव्रताः समानकर्माणः अग्निचयनाख्यस्य समानकर्मणः [V]समनसः समानमनस्काः [V]अन्तरा [V]द्यावापृथिवी [V]इमे अनयोर्द्यावापृथिव्योर्मध्यवर्तमानः [V]ग्रैष्मौ [V]ऋतू ग्रैष्म ऋतुः [V]अभिकल्पमानाः [V]देवाः [V]इन्द्रम् [V]इव वैताः इष्टकाः ऋतुं [V]संविशन्तु । [V]तया [V]देवतया [V]अङ्गिरस्वत् [V]ध्रुवे [V]सीदतम् इति ॥५॥

[इति पञ्चदशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

[अथ द्वितीयोऽनुवाकः ।]

प्रथमेऽनुवाके आश्विन्यादीष्टकोपधानमन्त्रा उक्ताः । द्वितीये वैश्वदेवीष्टकाद्युपधानमन्त्रा उच्यन्ते–

सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजू रुद्रैः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा ॥१॥

सजूरिति सऽजूः । ऋतुभिरित्यृतुऽभिः ।
विधाभिरिति विऽधाभिः । देवैः । देवैः । वयोनाधैरिति वयःऽनाधैः ।
अग्नये । त्वा । वैश्वानराय ।
वसुभिरिति वसुऽभिः ।
रुद्रैः ।
आदित्यैः ।
विश्वैः । देवैः । फुं ॥१॥

सा– कात्यायनः – "वैश्वदेवीः सजूर्ऋतुभिरिति प्रतिमन्त्रम्" (काश्रौ १७·८·१७) इति । नानाविधदेवतायुक्तैर्मन्त्रैरुपधेया इष्टका वैश्वदेव्यः । ताः 'सजूर्ऋतुभिः' इत्यादिभिः पञ्चभिर्मन्त्रैः क्रमेणोपदध्यादिति शेषः । तत्र प्रथममन्त्रपाठस्तु– 'सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैः । अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा' इति । हे इष्टके, ऋतुभिः वसन्तादिभिर्ऋतुभिः सजूः समानप्रीतिरसि । वसन्तादीनां यादृशी प्रीतिस्तादृशी तवेत्यर्थः । एवमुत्तरत्रापि सजूःशब्दो योज्यः । विविधं जगद्दधति पोषयन्तीति ब्रह्मादयो विधाः, तैः समानप्रीतिरसि । यद्वा– विधाशब्देनाप उच्यन्ते । "आपो वै विधा अद्भिर्हीद॑ꣳ सर्वं विहितम्" (शब्रा ८·२·२·८) इति श्रुतेः । तादृशीभिः समानप्रीतिरसि । देवैः सामान्यैः सजूः समानजोषणा हे इष्टके, त्वमसि । वयोनाधैः पदैः छन्दोरूपैः प्राणरूपैर्वा देवैः समानप्रीतिरसि । तथा च श्रूयते– "प्राणा वै देवा वयोनाधाः प्राणैर्हीद॑ꣳ सर्वं वयुनं नद्धमथो छन्दा॑ꣳसि वै देवा वयोनाधाश्छन्दोभिर्हीद॑ꣳ सर्वं वयुनं नद्धं प्राणैर्वै सयुग्भूत्वा प्राजनयत्" (शब्रा ८·२·२·८) इत्यादि । सजूर्देवैरिति पुनर्वचनमादरार्थम् । एवं तादृशैर्देवैः समानप्रीतियुक्तां त्वां वैश्वानराय अग्नये सर्वपुरुषाणां हितकारिवह्न्यर्थमहमुदपधामीति शेषः । एवमुपहितां त्वा देवानाम् अध्वर्यू अश्विनौ इह अस्मिन् क्षेत्रे सादयतां स्थापयताम् । एवमुत्तरेष्वपि मन्त्रेषु योजनीयम् ॥

तेषां पाठस्तु– 'सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूर्देवैर्वयोनाधैः । अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा । सजूर्ऋतुभिः सजूर्विधाभिः सजू रुद्रैः सजूर्देवैर्वयोनाधैः । अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा । सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्देवैर्वयोनाधैः । अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा । सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः सजूर्देवैर्वयोनाधैः । अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा' इति ॥१॥

आ– वैश्वदेवीरिष्टका उपदधाति – 'सजूर्ऋतुभिः' इति । एतानि पञ्च यजूंषि विश्वेषां देवानामार्षम् । विश्वेदेवा एव देवताः । 'सजूः ऋतुभिः' । जुषी प्रीतिसेवनयोः । समानजोषणः प्रजापतिः ऋतुभिः सयुक् समानजोषणो भूत्वा इष्टका उपदधाति । इष्टकोपधानं कृतवान् । 'सजूः विधाभिः' । "आपो वै विधा अद्भिर्हीद॑ꣳ सर्वं विहितमद्भिर्वै सयुग्भूत्वा प्राजनयत्" (शब्रा ८·२·२·८) इति श्रुतेः । 'सजूर्देवैः सजूर्देवैः' इति । देवैः समानजोषणः प्रजापतिः । पुनर्वचनमादरार्थम् । कथं भूतैर्देवैरिति । वयोनाधैः । "प्राणा वै देवा वयोनाधाः प्राणैर्हीदं सर्वं वयुनं नद्धमथो छन्दांसि वै देवा वयोनाधाश्छन्दोभिर्हीदं सर्वं वयुनं नद्धं प्राणैर्वै सयुग्भूत्वा प्राजनयत्" (शब्रा ८·२·२·८) इत्यादिश्रुतेः । वयुनं नद्धम् । एवमेवाभिर्देवताभिः समानप्रीतिर्भूत्वा उपदधामि । 'अग्नये वैश्वानराय' । "संवत्सरो वा अग्निर्वैश्वानरः" (शब्रा ८·२·२·८) अस्मै । अग्नये अश्विनौ अध्वर्यू त्वा वैश्वदेवीम् इष्टकां त्वाम् इह द्वितीयस्यां चितौ सादयताम् आसादनं कुरुताम् । एवमुत्तरेष्वपि मन्त्रेषु [योजनीयम्] ।

---

7. S2 om. अद्भिर्हीदं ... विहित

8. S2 om. देवैः ... त्वमसि

19. H2–3 om. वैश्वदेवीरिष्टका ... संबन्धः (p 291 L 3)

वश्वदेवीष्टकाद्युपधानमन्त्राः]

vवसुभिः vदेवैः, vरुद्रैः vदेवैः, vआदित्यैः vदेवैः vसजूः समानजोषणो भूत्वा प्रजापतिः vइह [इष्टका]मुपदधाति । vअग्नये vवैश्वानराय इष्टकां त्वाम् vअश्विनौ vअध्वर्यू vइह द्वितीयायां चितौ सादयामि इति संबन्धः ॥६॥

प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि ।
चक्षुर्म उर्व्या वि भाहि श्रोत्रं मे श्लोकय ॥२॥

प्राणम् । मे । पाहि । अपानमित्यपऽआनम् । व्यानमिति विऽआनम् ।
चक्षुः । मे । उर्व्या । वि । भाहि । श्रोत्रम् । मे । श्लोकय ॥ चीं ॥२॥

स्या– कात्यायनः – "प्राणभृतः प्राणं म इति" (काश्रौ १७·८·२०) इति । प्राणभृत्संज्ञका इष्टका उपदध्यात् । पाठस्तु– 'प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि । चक्षुर्मे उर्व्या वि भाहि श्रोत्रं मे श्लोकय' इति । हे इष्टके, त्वं vमे मदीयं vप्राणं vपाहि पालय । एवमुत्तरत्रापि । vउर्व्या विशालया दृष्ट्या मदीयं vचक्षुः vविभाहि विशेषेण प्रकाशय दर्शनसमर्थं कुर्वित्यर्थः । [vमे] मदीयं vश्रोत्रं [vश्लोकय] वाचां संघाते शक्तं कुरु, बहुविधशास्त्रश्रवणसमर्थं कुर्वित्यर्थः ॥२॥

आ– प्राणभृत उपदधाति 'प्राणं मे पाहि' इति । पञ्च वायव्याः वायुदेवत्याः इष्टकाः प्राणभृतः पञ्चभिर्वायुदेवत्यैर्यजुर्भिरुपदधाति । vप्राणं vमे मम प्राणं त्वं हे इष्टके, vपाहि । मे vअपानं च पाहि मम vव्यानं च vपाहि । vमे vचक्षुः vउर्व्या विस्तीर्णया दीप्त्या त्वं vविभाहि दीपय । vमे मम vश्रोत्रं vश्लोकय श्लाघय ॥२॥

अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात् पाहि ।
दिवो वृष्टिमेरय ॥३॥(२)॥

अपः । पिन्व । ओषधीः । जिन्व ।
द्विपादिति द्विऽपात् । अव । चतुष्पात् । चतुःपादिति चतुःऽपात् । पाहि ।
दिवः । वृष्टिम् । आ । ईरय ॥ झीं ॥३॥(२)॥

11. P1 before दर्शन° ins. यद्; S2 मदीयश्रोत्रसंघाते for मदीयं ... संघाते (L 12)

13. H2-3 om. प्राणभृतः श्लाघय ॥ (L 16)

सा– कात्यायनः – "अपः पिन्वेत्यपस्याः" (का॰श्रौ १७·८·२१) इति। अपस्यानामका इष्टका उपदध्यात्। पाठस्तु– 'अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात् पाहि। दिवो वृष्टिमेरय' इति। हे इष्टके, त्वम् vअपः जलानि vपिन्व प्रीणय। vओषधीः अपि vजिन्व प्रीणय। vद्विपात् मनुष्यशरीरम् vअव रक्ष। vचतुष्पात् पशुशरीरं vपाहि पालय। vदिवः सकाशात् vवृष्टिम् vएरय आसमन्तात् प्रवर्तय ॥३॥

[इति पञ्चदशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

आ– अपस्या उपदधाति– 'अपः पिन्व' इति। लिङ्गोक्तदेवत्यानि यजूंषि। vअपः vपिन्व। [पिन्वतिः] सेचने। अपः सिञ्च। vओषधीः vजिन्व। हिविदिविधिविजिवि प्रीणनार्थाः। जिन्व प्रीणिहि। vद्विपात् द्विपादं मनुष्यम् vअव रक्ष। vचतुष्पात् चतुष्पादं vपाहि। vदिवः द्युलोकात् vवृष्टिम् vएरय प्रेरय आगमय ॥३॥

[इति पञ्चदशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

[अथ तृतीयोऽनुवाकः।]

सा– द्वितीयेऽनुवाके वैश्वदेव्येष्टकोपधानमन्त्रा उक्ताः। तृतीये वयस्याख्येष्टकोपधानमन्त्रा उच्यन्ते ॥

मूर्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मयन्दं छन्दः।
विष्टम्भो वयोऽधिपतिश्छन्दो विश्वकर्मा वयः परमेष्ठी छन्दः ॥१॥
बस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः।
पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः ॥२॥

---

2. P1 om. इष्टकाः
3. P1 with insertions above पिन्व writes on the margin : सेचय। पिन्वतिः सेचनार्थं इति भाष्यान्तरम् ; P1 after जिन्व ins. जिन्वतिः प्रीणनार्थः; P1 with insertions above द्विपात् and चतुष्पात् (L 4) writes on the upper margin: द्विपादं चतुष्पादमिति द्वितीयार्थे सुपामिति सूत्रेण प्रथमा विभक्तिः।
4. P1 रक्षय for रक्ष
7. H2–3 om. अपस्याः .. प्रीणनार्थाः। (L 8)
13. P1 ऋतव्य° for वैश्वदेव्य°

सिꣳहो वयश्छदिश्छन्दः पष्ठवाड्वयो बृहती छन्दः ।
उक्षा वयः ककुप् छन्द ऋषभो वयः सतोबृहती छन्दः ॥३॥
अनड्वान् वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दः ।
त्र्यविर्वयस्त्रिष्टुप् छन्दो दित्यवाड्वयो विराट् छन्दः ॥४॥
पञ्चाविर्वयो गायत्री छन्दस्त्रिवत्सो वय उष्णिक् छन्दः ।
तुर्यवाड्वयोऽनुष्टुप् छन्दो लोकं पृण ता अस्येन्द्रं विश्वाः ॥५॥(३)॥

~~~~~~~~~~~~~~~~~~~~~~

मूर्धा । वयः । प्रजापतिरिति प्रजाऽपतिः । छन्दः । क्षत्रम् । मयन्दम् ।
विष्टम्भः । अधिपतिरित्यधिऽपतिः ।
विश्वकर्मेति विश्वऽकर्मा । परमेष्ठी । परमेस्थीति परमेऽस्थी ॥नां॥१॥
बस्तः । विवलमिति विऽवलम् । वृष्णिः । विशालमिति विऽशालम् ।
पुरुषः । तन्द्रम् । व्याघ्रः । अनाधृष्टम् ॥ ञो ॥२॥
सिꣳहः । छदिः । पष्ठवाळिति पष्ठऽवाट् । बृहती ।
उक्षा । ककुप् । ऋषभः । सतोबृहतीति सतःऽबृहती ॥ प्तो ॥३॥
अनड्वान् । पाङ्क्तिः । धेनुः । जगती ।
त्र्यविरिति त्रिऽअविः । त्रिष्टुप् । त्रिस्तुबिति त्रिऽस्तुप् ।
दित्यवाळिति दित्यऽवाट् । विराळिति विऽराट् ॥ द्यौ ॥४॥
पञ्चाविरिति पञ्चऽअविः । गायत्री । त्रिवत्स इति त्रिऽवत्सः । उष्णिक् ।
तुर्यवाळिति तुर्यऽवाट् । अनुष्टुप् । अनुस्तुबित्यनुऽस्तुप् । छन्दः । ॥ दों ॥५॥ (३) ॥

~~~~~~~~~~~~~~~~~~~~~~

कात्यायनः – "वयस्याः पञ्चपञ्चानूकान्तेषु मूर्धा वय इति प्रतिमन्त्रम्" (काश्रौ १७.८.२२) इति । वयःशब्दोपेतैर्मन्त्रैरुपधेया इष्टका वयस्याः। ता अनूकान्तेषु पञ्चपञ्चोपदध्यात्। पाठस्तु– 'मूर्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मयन्दं छन्दः। विष्टम्भो वयोऽधिपतिश्छन्दो विश्वकर्मा वयः परमेष्ठी छन्दः ॥ बस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः। पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः ॥ सिꣳहो वयश्छदिश्छन्दः पष्ठवाड्वयो बृहती छन्दः। उक्षा वयः ककुप् छन्दः ऋषभो वयः सतोबृहती छन्दः ॥ अनड्वान् वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दः। त्र्यविर्वयस्त्रिष्टुप् छन्दो दित्यवाड्वयो विराट् छन्दः ॥ पञ्चाविर्वयो गायत्री छन्दस्त्रिवत्सो वय उष्णिक् छन्दः। तुर्यवाड्वयोऽनुष्टुप्

छन्दः ' इति । पुरा खलु सृष्टवत प्रजापतेर्विस्रस्तात् सकाशात् सृष्टाः पशवः छन्दोरूपमास्थाय निरगच्छन्। ततः स प्रजापतिः स्वयमपि गायत्र्यादिछन्दोरूपं स्वीकृत्य पशुसंबन्धिन्या तत्तवदस्थया तान्यापत् । तत्र तावदादितश्चतुर्भिर्मन्त्रैः प्रजापतेरष्टावयवात्मकं गायत्रीरूपं परिकल्पते । एवं गायत्री-छन्दोरूपेण परिकल्पितोऽसौ प्रजापतिः स्वयमेव मूर्धा पशुसंबन्धि शिरः वयः शरीरावस्था प्रजापतिरेव मूर्धलक्षणं वयोऽभवत् । अत एव मूर्ध्नि इतरावयवेभ्यः प्राधान्यं दृश्यते । तथा प्रजापतिः स्वयमेव छन्दः अभवत् । अस्मिन् मन्त्रे उत्तरमन्त्रेष्विव छन्दसो विशेषस्याकथनात् छन्दःसामान्यं विवक्षितम् । अनेन मन्त्रेण प्रजापतेर्द्वाववयवौ परिकल्पितौ । क्षतात् त्रायत इति क्षत्रम् । तादृशं वयः शरीरावस्था प्रजापतिरभवत् । मयं सुखं ददातीति मयन्दम् । तादृशं छन्दः चाभवत् । कृत्स्नं शरीरं विष्टभ्नोति स्थिरीकरोतीति विष्टम्भः प्रजापतिः स्वयं विष्टम्भात्मकं वयः अभवत् । अधिष्ठापयतीति अधिपतिः एतदात्मकं छन्दः अभवत् । विश्वं कर्म कर्तव्यं यस्यासौ विश्वकर्मा प्रजापतिः ईदृग्रूपं वयः अभवत् । परमे उत्कृष्टे स्थाने तिष्ठतीति परमेष्ठी एतदात्मकं छन्दः अभवत् ॥१॥

एवं प्रतिमन्त्रं द्वौ द्वाववयवाविति अष्टावयवः प्रजापतिः परिकल्पितः। तथा च अष्टसंख्योपेतत्वात् सर्वच्छन्दः प्रकृतिभूतं गायत्रीरूपमस्य संपन्नम् । एवं गायत्रीरूपः प्रजापतिः किमकरोदिति तदाह– ' बस्तो वयः ' इत्यादिना । " एकपदा वै विवलं छन्दः " (शब्रा ८·२·४·१) इति श्रुतेः । प्रजापतिः स्वयमेकपदा गायत्रीच्छन्दो भूत्वा वयः वयसा । " सुपां सुलुक्° " (पा ७·१·३९) इति तृतीयायाः लुक् । बस्तः छन्दः । अत्रापि द्वितीयैकवचनस्य सु-आदेशः । वयसा शरीरावस्थया निर्गतं बस्ताख्यं पशुं पर्यगृह्णात् । एवमुत्तरेष्वपि मन्त्रेषु विभक्तिपरिणामं कृत्वा तत्तच्छन्दोरूपमास्थाय प्रजापतिः तत्तद्वयसा तं पशुं परिगृहीतवानिति योज्यम् । विशेषस्तु कथ्यते– वृष्णिः सेचनसमर्थो मेषः । द्विपदा गायत्री विशालाख्यं छन्दः । " द्विपदा वै विशालं छन्दः " (शब्रा ८·२·४·२) इति श्रुतेः । पुरुषः प्रसिद्धः । तन्द्रम् । पङ्क्तिरिति तन्द्राख्यम् । " पङ्क्तिर्वै तन्द्रं छन्दः " (शब्रा ८·२·४·३) इति श्रुतेः । विराट् छन्दः अनाधृष्टम् । " विराड्वा अनाधृष्टम् " (शब्रा ८·२·४·४) इति श्रुतेः । अनाधृष्टाख्यं विराट् छन्दः । सर्वाणि छन्दांसि छादयतीति छदिः अतिच्छन्दः । " अतिच्छन्दा वै छदिः " (शब्रा ८·२·४·५) इति श्रुतेः। पष्ठे पृष्ठभागे वहतीति पष्ठवाट् पञ्चवर्षः पशुः। उक्षा सेचनसमर्थः पशुः। अन्तिमौ द्वावष्टाक्षरौ पादौ मध्यमपादो द्वादशाक्षरश्चेति सा ककुप् । ऋषभः सेचनसमर्थोऽनड्वान् । प्रथमतृतीयपादौ द्वादशाक्षरौ शिष्टावष्टाक्षरौ सा सतोबृहती । अनो वहतीति अनड्वान् बलीवर्दः । धेनुः नवप्रसूता सवत्सा गौः ।

---

1. S2 विश्वस्मात् for विस्रस्तात्

4. P1 with insertions above प्रजापतिः writes on the margin: प्रजापतेर्विस्रस्तात् पशव उदक्रामंश्छन्दांसि भूत्वा तान् गायत्रीच्छन्दो भूत्वा वयसाऽऽप्नोत् इत्यादि श्रुतिमूलम् ।

9. P1 after अभवत् ins. प्रजापतिर्विष्टम्भः स हीदं सर्वं विष्टभ्नोतीति श्रुतेः ।

18. P1 after योज्यम् adds बस्तः पशुर्विवलं छन्दोरूपमाश्रित्योदक्रमीत्तं प्रजापति-र्गायत्रीरूपो वयसाऽऽप्नोदित्यादि भाष्यान्तरम् ।

23. P1 पृष्ठे for पष्ठे

24. P1 after इति adds यस्याः

25. S2 om. शिष्टावष्टाक्षरौ

वयस्याख्येष्टकोपधानमन्त्राः]

त्रिधा भवतीति [v]त्र्यविः । यद्वा– अविशब्देन क्षीरादिकमन्नं लक्षयित्वा तत् प्राशनाय विहितषण्मासात्मकः कालो लक्ष्यते । तथा च तिस्रोऽवयोऽस्य संजाता इति त्र्यविरष्टादशमासः पशुरिति । दित्यहं खण्डनाहं वहतीति [v]दित्यवाट् । यद्वा– द्विवर्षः पशुः दित्यवालित्युच्यते । पञ्चधा भवतीति [v]पञ्चाविः । यद्वा– पञ्चावयोऽस्य संजाता इति सार्द्धद्विवर्षः पशुः पञ्चाविः । त्रयो वत्सा यस्यासौ [v]त्रिवत्सः । यद्वा– त्रिसंवत्सरः पशुः त्रिवत्सः । तुर्यं चतुर्थं च वहतीति [v]तुर्यवाट् । 'मूर्धा वयः' इत्यादीनां मन्त्राणां श्रुत्यनुसारेणैव व्याख्यानं कृतम् । अतस्तत्सर्वं शतपथादवगन्तव्यम् ॥

कात्यायनः – "लोकं पृण पूर्ववत्" (काश्रौ १७·८·२४) इति । लोकंपृणसंज्ञका इष्टका यथापूर्वमुपदध्यादिति शेषः । तेषां मन्त्राणां प्रतीकान्याह– 'लोकं पृण', 'ता अस्य', 'इन्द्रं विश्वाः'। पूर्ववत् व्याख्येयम् ॥२–५॥

[इति पञ्चदशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

आ– वयस्या उपदधाति– 'मूर्धा वयः' इति । लिङ्गोक्तदेवत्या पङ्क्तिः । अत्रोक्तं श्रुत्या निदानम्– "प्रजापतेर्विस्रस्तात् पशव उदक्रामंश्छन्दाꣳसि भूत्वा तान् गायत्री छन्दो भूत्वा वयसाऽऽप्नोत् तद्यद् गायत्र्याऽऽप्नोदेतद्धि छन्द आशिष्ठꣳ सा तद् भूत्वा प्रजापतिरेतान् पशून् वयसाऽऽप्नोत्" (शब्रा ८·२·३·९) । 'मूर्धा वयः' इति चतुर्भिर्मन्त्रैर्गायत्रीरूपः प्रजापतिः कल्पते । पशोः [v]मूर्धा [v]प्रजापतिः । प्राधान्यात् [v]वयः शरीरावस्था । प्रजापतिः स्वयमेव [v]छन्दः । आपो वै प्रजापतिः । "प्रजापतिर्वै मूर्धा स वयोऽभवत् प्रजापतिश्छन्द इति प्रजापतिरेव छन्दोऽभवत्" (शब्रा ८·२·३·१०) [इति श्रुतेः] । 'क्षत्रं वयो मयन्दं छन्दः' । क्षतात् त्रायत इति [v]क्षत्रम् । मयं सुखम् । छादयतीति [v]छन्दः । [v]वयः प्रजापतेः शरीरावस्था । प्रजापतिरेव क्षत्रं वयोऽभवत् । स एव प्रजापतिः [v]मयन्दं छन्दोऽभवत् । 'विष्टम्भो वयोऽधिपतिश्छन्दः'। प्रजापतिरेव [v]विष्टम्भः [v]वयः अभवत् । स एव [v]अधिपतिः [v]छन्दः अभवत् । प्रजापतिरेव [v]विश्वकर्मा अभवत् । विश्वकर्मा [v]वयः अभवत् । प्रजापतिरेव [v]परमेष्ठी । परमे स्थाने तिष्ठतीति परमेष्ठी । [v]छन्दः अभवत् । अयमष्टावयवो गायत्रीरूपः प्रजापतिः ॥१॥

पञ्चदश वक्ष्यमाणान् पशून् गृह्णाति– 'बस्तो वयः' इति । लिङ्गोक्तदेवत्या बृहती । [v]बस्तः पशुः । [v]वयः [v]विवलं [v]छन्दः इति । प्रजापतिर्बस्तं वयसाऽऽप्नोत् विवलं छन्दः । "एक-

---

11. B1 before पङ्क्तिः adds बृहती
16. H2–3 भवति for अभवत्
18. H2–3 om- क्षतात् ... छन्दोऽभवत् (L 19); B1 मयदं for मयं
21. B1 कर्मैव बयो for °कर्मा वयः
23. H2–3 °विधलक्षणान् for वक्ष्यमाणान्

पदा वै विवलं छन्दः " (शब्रा ८·२·४·१) । एकपदा गायत्री भूत्वा उदक्रामत् प्रजापतेरवयवात् । ततस्तद्रूपमेव छन्दो भूत्वा तदाहृतवान् । सर्वत्रैवमेवाभिप्रायः ॥

" वृष्णिर्वयो विशालं छन्दः " इति (शब्रा ८.२.४.२) । vवृष्णिः वयसाऽऽप्नोत् vविशालं vछन्दः । सेचनसमर्थः वृष्णिः मेषः । " द्विपदा वै विशालं छन्दः " (शब्रा ८·२·४·२) । ' पुरुषो वयस्तन्द्रं छन्दः ' । vपुरुषः पशुः । पुरुषो वयसा vतन्द्रं vछन्दः पङ्क्तिः छन्दः पङ्क्तिर्भूत्वा पुरुष उच्चक्राम । अतः पङ्क्त्या तमाप्नोत् । ' व्याघ्रो वयः ' । vव्याघ्रः शार्दूलः । व्याघ्रः वयसा vअनाधृष्टं vछन्दः । " विराड् वा अनाधृष्टं छन्दः " (शब्रा ८.२.४.४) । दशाक्षरपदा विराट् ॥२॥

' सिंहो वयः ' इति । लिङ्गोक्तदेवत्या पङ्क्तिः । vसिंहः वयसा vछदिः vछन्दः आप्नोत् । सर्वाणि छन्दांसि आच्छादयतीति [छदिः,] " अतिच्छन्दा वै छदिश्छन्दः " (शब्रा ८.२.४.५) । [अथ] अतो निरुक्तानेव पशून् निरुक्तानि छन्दांस्युपदधाति vपष्ठवाट् vवयः इति । पष्ठवाहं [पशुं] वयसाऽऽप्नोत् । vबृहती vछन्दः इति । नवाक्षरपदा बृहती । vउक्षा वयसा ककुभमाप्नोत् । सेचनसमर्थो वृषभ उक्षा । प्रथमतृतीयौ पादावष्टाक्षरौ, मध्यमो द्वादशाक्षरश्चेत् vककुप् vछन्दः । vऋषभः वयसा सतोबृहतीमाप्नोत् । आद्यतृतीयौ पादौ द्वादशाक्षरौ, द्वितीयचतुर्थावष्टाक्षरौ चेत् vसतोबृहती नाम पङ्क्तिः vछन्दः ॥३॥

' अनड्वान् वयः ' [इति ।] लिङ्गोक्तदेवत्या बृहती । vअनड्वान् वयसा vपङ्क्तिः vछन्दः आप्नोत् । दशाक्षरैः पादैश्चतुर्भिः पङ्क्तिः । vधेनुः वयसा जगतीमाप्नोत् । द्वादशाक्षरपादैश्चतुर्भिः vजगती । ' त्र्यविर्वयस्त्रिष्टुप् छन्दः ' । त्रिधा अवतीति vत्र्यविः । vवयः वयसा त्रिष्टुभमाप्नोत् । एकादशाक्षरैः vत्रिष्टुप् । ' दित्यवाड्वयो विराट् छन्दः ' । दित्यं खण्डनार्हं वहतीति vदित्यवाट् पशुः । दित्यवाड् वयसा विराजं vछन्दः आप्नोत् । दशाक्षरा विराट् । पूर्वं प्रजापतेरवयवेभ्यः सकाशात् बस्तादयः पशवो विवलादिच्छन्दोरूपमास्थाय निर्मिताः । इदानीं तु प्रजापतिः स्वयं यज्ञनिष्पत्त्यर्थं तत्तच्छन्दोरूपोभूत्वा तांस्तान् पशूनाप्तवानिति सर्वेषां वाक्यानां तात्पर्यार्थः । एतद्वाक्यार्थानुसारेण वचनविभक्तिव्यत्ययः कार्यो विरोधप्रतीताविति भावः ॥४॥

---

2. H2–3 आहूतवान् for आहृतवान्
5. H2–3 प्रजापतिः for second पङ्क्तिः
6. H2–3 after आप्नोत् add सर्वाणि छन्दांसि
8. H3 om. विराट्; B1 after विराट् adds पष्ठवाहं पशुं
13. B1 after उक्षा adds आद्या बृहती; H2–3 आद्य° for प्रथम°
14. H2–3 after आप्नोत् add बृहती छन्द इति ।
18. H2–3 om. त्रिधा अवतीति त्र्यविः; B1 अविः for second त्र्यविः
23. H2–3 वाक्यानु° for वाक्यार्थानु°

स्वयमातृण्णाद्युपधानमन्त्राः]

'पश्चाविर्वयो गायत्री छन्दः' इति । लिङ्गोक्तदेवत्या पङ्क्तिः । [V]वयः वयसा पश्चाविं प्राप्तवान् । 'त्रिवत्सो वयः उष्णिक् छन्दः' । अष्टाविंशत्यक्षरात्मकम् [V]उष्णिक् [V]छन्दः । वयसा त्रिवत्समाप्तवान् । 'तुर्यवाड्वयोऽनुष्टुप् छन्दः' । [V]अनुष्टुप् [V]छन्दः वयसा तुर्यवाहं पशुं प्राप्तवान् ॥

'लोकं पृण ताः' उपदधाति । 'लोकं पृण ता अस्येन्द्रं विश्वाः' । [V]अस्य यज्ञस्य [V]इन्द्रं यजमानः [V]विश्वाः इष्टकाः [V]पृण [V]ताः । पृण प्रीणयत । लोकं पृण ताः ॥५॥

[इति पञ्चदशेऽध्याये तृतीयोऽनुवाकः]

[अथ चतुर्थोऽनुवाकः ।]

तृतीयेऽनुवाके वयस्याख्यलोकंपृणसंज्ञका इष्टका उक्ताः । एतावता द्वितीया चितिः समाप्ता । अथ चतुर्थे तृतीयस्यां चितौ स्वयमातृण्णाद्या उच्यन्ते ॥

इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतं युवम् ।
पृष्ठेन द्यावापृथिवी अन्तरिक्षं च वि बाधसे ॥१॥
विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीम् ।
अन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीः ।
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
वायुष्ट्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन
तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥२॥

6. H3 लोका for लोकं; B1 पृणत for पृणताः The commentary on लोकं पृण ता अस्येन्द्रं विश्वाः is based on the wrong assumption that पृणताः is a single word. The commentator seems to have not realised that this pāda cites the pratīkas of the three verses viz. लोकं पृण (KS 13.4.10), ता अस्य (KS 13.4.11), इन्द्रं विश्वाः (KS 13.4.12) which are recited at the time of laying the लोकंपृण briks. This portion in the commentary might have been added later by the scribes to fill up the gaps, without understanding the context.

इन्द्राग्नी इतीन्द्राग्नी । अव्यथमानाम् । इष्टकाम् । दृꣳहतम् । युवम् ।
पृष्ठेन । द्यावापृथिवी इति द्यावापृथिवी । अन्तरिक्षम् । च । वि । बाधसे ॥ रां ॥१॥
विश्वकर्मेति विश्वऽकर्मा । त्वा । सादयतु । अन्तरिक्षस्य ।
अन्तरिक्षम् । वायुः ॥ के ॥२॥

सा– कात्यायनः – " तृतीयायां स्वयमातृण्णामिन्द्राग्नी इति " (काश्रौ १७·९·१) इति । तत्पाठस्तु– ' इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतं युवम् । पृष्ठेन द्यावापृथिवी अन्तरिक्षं च वि बाधसे ॥ विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीम् । अन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीः । विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय । वायुष्ट्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ' इति । येयमिष्टका [v]पृष्ठेन स्वकीयेनोपरिभागेन [v]द्यावापृथिवी [v]अन्तरिक्षं [v]च लोकत्रयं [v]विबाधसे । पुरुषव्यत्ययः । विबाधते अभिभवति । हे [v]इन्द्राग्नी, [v]युवं युवाम् [v]अव्यथमानां भङ्गरहितां स्वयमातृण्णाख्यां ताम् [v]इष्टकां [v]दृꣳहतं दृढीकुरुतम् । किं च– विश्वानि कर्माणि यस्यासौ [[v]विश्वकर्मा] प्रजापतिः । हे स्वयमातृण्णे, स प्रजापतिः त्वाम् [v]अन्तरिक्षस्य [v]पृष्ठे उपरि [v]सादयतु कीदृशीम् ? [v]व्यचस्वतीम् अभिव्यक्तियुक्तां [v]प्रथस्वतीं विस्तारोपेताम् । येयं स्वयमातृण्णा सा त्वम् [v]अन्तरिक्षं [v]यच्छ गन्धर्वाप्सरोगणादिधारकतया नियमय । तथा [v]अन्तरिक्षं [v]दृꣳह । परोपद्रवराहित्येन दृढीकुरु । त्वमपि तत् [v]अन्तरिक्षं [v]मा [v]हिंसीः । [v]विश्वस्मै सर्वस्मै प्राणापानव्यानोदानाख्यवायुवृत्तिलाभाय [v]प्रतिष्ठायै स्वगृहे स्थितिलाभाय [v]चरित्राय शास्त्रीयाचरणाय प्राणिनामतः (एतस्य ?) सर्वस्य सिद्ध्यर्थम् अयं [v]वायुः त्वाम् अभितः [v]पातु । केन रक्षणमिति तदुच्यते– [v]मह्या [v]स्वस्त्या महत्या योगक्षेमसंपत्त्या । [v]शंतमेन [v]छर्दिषा अत्यन्तशुभकारिणा दीप्तिविशेषेण । तव स्वामिभूता या देवता [v]तया [v]देवतया अनुगृहीता [v]ध्रुवा स्थिरा सती [v]सीद इहोपविश । [v]अङ्गिरस्वत् अङ्गिरसां चयनानुष्ठाने यथा त्वं ध्रुवा स्थिरा तद्वत् ॥१२॥

आ– स्वयमातृण्णामुपदधाति । तृतीयां चितिम् इन्द्राग्नी च विश्वकर्मा चापश्यन् । अतस्तृतीयचितिविषयमन्त्राणाम् ' इन्द्राग्नी अव्यथमानाम् ', ' विश्वकर्मा ' इत्यादीनाम् इन्द्राग्नी विश्वकर्मा च ऋषिः (षी ?) । पूर्वोर्धर्चः इन्द्राग्निदेवत्यः । उत्तरश्च स्वयमातृण्णदेवत्यः । अनुष्टुप् छन्दः । अत्रोत्तरर्धर्चः प्रथमं व्याख्येयः । येयमिष्टका [v]द्यावापृथिवी [v]अन्तरिक्षं [v]च [v]पृष्ठेन उपरिभागेन [v]विबाधसे । अत्र पुरुषव्यत्ययः । विबाधते अभिभवति । ताम् [v]अव्यथमानाम् अचलन्तीम् [v]इष्टकां हे [v]इन्द्राग्नी, युवां [v]दृꣳहतं दृढीकुरुतम् ॥१॥

8. S2 before येयम् adds:– अत्रोत्तरर्धर्चः प्रथमं व्याख्येयः ।
9. S2 om. द्यावापृथिवी अन्तरिक्षं च
16. S2 अतस्त्वं for अतः
17. P1 om. °क्षेम°
22. H2-3 om. च
24. B1 before विबाधते adds अन्तरिक्षं च

'विश्वकर्मा त्वा' इति। वायव्यम्। Vविश्वकर्मा प्रजापतिः Vत्वा Vसादयतु इत्यादि। पूर्ववद् व्याख्येयम्। Vअन्तरिक्षस्य Vपृष्ठे वायुपृष्ठे इति शेषः ॥२॥

राज्ञ्यसि प्राची दिग्विराळसि दक्षिणा दिक् सम्राळसि प्रतीची दिक्
स्वराळस्युदीची दिगाधिपत्न्यसि बृहती दिक्।
विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम्।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ।
वायुष्टेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद।
नभश्च नभस्यश्च वार्षिका ऋतू अग्नेरन्तःश्लेषोऽसि।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः
कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे।
वार्षिका ऋतू अभि कल्पमाना इन्द्रमिव देवा अभि संविशन्तु
तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम्।
इषश्चोर्जश्च शारदा ऋतू अग्नेरन्तःश्लेषोऽसि।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः
कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे।
शारदा ऋतू अभि कल्पमाना इन्द्रमिव देवा अभि संविशन्तु
तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ॥३॥(४)॥

राज्ञी। असि। प्राची। दिक्। विराळिति विऽराट्। दक्षिणा।
सम्राळिति सम्ऽराट्। प्रतीची। स्वराळिति स्वऽराट्। उदीची।
अधिपत्नीत्यधिऽपत्नी। असि। बृहती। दिक्।
नभः। नभस्यः। वार्षिकौ।
इषः। ऊर्जः। शारदौ। ऋतू इत्यृतू ॥ भाः ॥३॥(४)॥

---

2. B1 वायुष्ट्वा for वायुपृष्ठे

[स्वयमातृण्णाद्युपधानमन्त्राः

सा- कात्यायनः- " पञ्च दिश्या वैश्वदेवीवत् राज्ञ्यसीति प्रतिमन्त्रम् " (काश्रौ १७·९·२) इति । दिक्शब्दपञ्चकोपेतैर्मन्त्रैरुपधेया इष्टकाः पञ्च दिश्याः ' राज्ञ्यसि ' इति मन्त्रपञ्चकेनोपदध्यात् इति शेषः । पाठस्तु- ' राज्ञ्यसि प्राची दिग्विराळसि दक्षिणा दिक् सम्राळसि प्रतीची दिक् स्वराळस्युदीची दिगधिपत्न्यसि बृहती दिक् ' इति । हे इष्टके, त्वं [v]राज्ञी राजमाना दीप्यमाना सती [v]प्राची [v]दिक् [v]असि पूर्वदिग्भवति । [v]विराट् विविधं राजमाना [v]दक्षिणा [v]दिक् [v]असि । [v]सम्राट् सम्यग्राजमाना [v]प्रतीची [v]दिक् [v]असि । [v]स्वराट् परनिरपेक्षतया स्वयमेव राजमाना [v]उदीची [v]दिक् [v]असि । अधिकं पातीति [v]अधिपत्नी । तादृशी त्वं [v]बृहती प्रौढा ऊर्ध्वा [v]दिक् [v]असि ॥

कात्यायनः- " विश्वकर्मेति विश्वज्योतिषम् " (काश्रौ १७·९·३) इति । पाठस्तु- ' विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम् । विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ । वायुष्टेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ' इति । हे इष्टके, [v]ज्योतिष्मतीं त्वां [v]विश्वकर्मा [v]अन्तरिक्षस्य [v]पृष्ठे उपरि [v]सादयतु आसादयतु । किं च- सर्वप्राणादिवृत्तिलाभार्थं हे इष्टके, त्वं [[v]विश्वं] सर्वं [v]ज्योतिः [v]यच्छ प्रयच्छ । [v]वायुः [v]ते तव [v]अधिपतिः अधिदेवता । [v]तया [v]देवतया [v]ध्रुवा स्थिरा सती [v]सीद उपविश । [v]अङ्गिरस्वत् अङ्गिरसां चितौ सर्वं ध्रुवा सती यथा प्रविष्टा तद्वदत्रापीत्यर्थः ॥

कात्यायनः - " ऋतव्ये नभश्च नभस्यश्चेति " (काश्रौ १७·९·४) इति । पाठस्तु- ' नभश्च नभस्यश्च वार्षिका ऋतू अग्नेरन्तःश्लेषोऽसि । कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे । वार्षिका ऋतू अभि कल्पमाना इन्द्रमिव देवा अभि संविशन्तु । तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ' इति । स्पष्टार्थः ॥

कात्यायनः - " इषश्चोर्जश्चेत्यपरे " (काश्रौ १७·९·५) इति । इतरे द्वे ऋतव्ये इष्टके उपदध्यादिति शेषः । पाठस्तु - ' इषश्चोर्जश्च शारदा ऋतू अग्नेरन्तःश्लेषोऽसि । कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः । ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे । शारदा ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ' इति । व्याख्यातसमानार्थः ॥३॥

[इति पञ्चदशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

आ- पञ्च दिश्या उपदधाति- ' राज्ञ्यसि ' इति प्रतिमन्त्रं पञ्च दिश्या इष्टका उपदधाति । एतानि पञ्चदिग्देवत्यानि यजूंषि । ' पञ्च दिश्या वायुरपश्यत् ' इति वायोरार्षम् । ' राज्ञ्यसि ' इति । [V]प्राची [V]दिक् छन्दसां [V]राज्ञी गायत्री । " गायत्री छन्दसामहम् " (भगवद्गीता १०·३५) इति श्रीभगवद्वचनात् । अतः प्राच्यां गायत्र्यात्मिकामिष्टकाम् उपदधाति । एवं ' विराट् असि दक्षिणा दिक् ' । दशाक्षरात्मिका विराड्रूपा [V]दक्षिणा [V]दिक् । ' सम्राट् असि

---

21. S2 वार्षिका for शारदा

28. B1 om. second दक्षिणा दिक्

प्राणभृदिष्टकोपधानमन्त्राः]

प्रतीची दिक् स्वराळसि उदीची दिगधिपत्न्यसि बृहती दिक्' इति। एवंनाम्न्यः पञ्च दिश्या इष्टकाः इति। "नामान्यासामेतानि" (शब्रा ८·३·१·१४) इति श्रुतेः॥

विश्वज्योतिषमुपदधाति– 'विश्वकर्मा त्वा' इति। 'विश्वकर्मा त्वा सादयतु' इति। "विश्वकर्मा ह्येतां तृतीयां चितिमपश्यत्" (शब्रा ८·३·२·३) इति श्रुतेः। अतोऽस्य विश्वकर्मणः आर्षं वायव्यं यजुः। ^{v}विश्वकर्मा वायुः ^{v}त्वा ^{v}अन्तरिक्षस्य ^{v}पृष्ठे उपरि ^{v}ज्योतिष्मतीं तेजोविशेषवतीं विश्वज्योतिषनामेष्टकां त्वां ज्योतिष्मान् वायुः ^{v}सादयतु। कस्मै इति। 'विश्वस्मै प्राणायापानाय व्यानाय' इति। एषामर्थं (र्थः ?) [स्पष्टः]। ^{v}विश्वं ^{v}ज्योतिः ^{v}यच्छ प्रयच्छ। ^{v}वायुः ^{v}ते तव विश्वज्योतिष इष्टकायाः ^{v}अधिपतिः अधिदेवता [^{v}तया ^{v}देवतया] ^{v}अङ्गिरस्वत् अङ्गिरसा तुल्या सती ^{v}ध्रुवा स्थिरा ^{v}सीद प्रविश॥

ऋतव्ये उपदधाति– 'नभश्च नभस्यश्च' इति। ऋतुदेवत्यं यजुः। ^{v}नभः श्रावणो मासः। ^{v}नभस्यः भाद्रपदः। एतौ ^{v}वार्षिकौ। स्वार्थे तद्धितः। द्विवचनमविवक्षितम्। वार्षिका वार्षिकौ मासौ वा। वर्षा ^{v}ऋतू ऋतुः। एवं "नामनी एतयोरिष्टकयोः" (द्र. शब्रा ८·३·२·५) इति श्रुतेः। व्याख्यातसमानमेतत्। 'तया देवतयाऽङ्गिरस्वत् ध्रुवे सीदतम्'। 'इषश्चोर्जश्च शारदा ऋतू'। ^{v}इषः आश्वयुक्। ^{v}ऊर्जः कार्तिकः। एतौ मासौ ^{v}शारदा शारदौ मासौ। एतौ शरद् ^{v}ऋतू ऋतुः। 'अग्नेः अन्तः॰' इत्यादि व्याख्यातसमानार्थः॥१६॥

[इति पञ्चदशेऽध्याये चतुर्थोऽनुवाकः॥४॥]

[अथ पञ्चमोऽनुवाकः।]

चतुर्थेऽनुवाके स्वयमातृण्णादीष्टकोपधानमन्त्रा उक्ताः। पञ्चमे प्राणभृत्संज्ञकेष्टकोपधानमन्त्रा उच्यन्ते॥

आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि।
चक्षुर्मे पाहि श्रोत्रं मे पाहि वाचं मे पिन्व
मनो मे जिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ॥१॥

---

2. B1 after इति adds नाम
4. H3 ततो for अतो॰
8. B1 om. प्रयच्छ; B1 om. अधिपतिः ... ... तुल्याः ... ... प्रविश (L 9)
11. B1 ॰पदमासः for ॰पदः
12. H2–3 नामानि for नामनी; H2–3 om. एतयोः; B1 om. इष्टकयोः
18. P1 om. प्राणभृत् ... ... प्रतिमन्त्रमिति। [page 302 L 4]

आयुः । मे । पाहि । प्राणम् । अपानमित्यपऽआनम् । व्यानमिति विऽआनम् ।
चक्षुः । श्रोत्रम् । वाचम् । पिन्व ।
मनः । जिन्व । आत्मानम् । पाहि । ज्योतिः । मे । यछ ॥ झौं ॥१॥

सां– कात्यायनः – प्राणभृतो दशायुर्म इति प्रतिमन्त्रम् " (काश्रौ १७.९.६) इति । प्राणभृत्संज्ञका दशसंख्याका इष्टका एकैकेन मन्त्रेणोपदध्यात् । तेषां पाठस्तु– 'आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि । चक्षुर्मे पाहि श्रोत्रं मे पाहि वाचं मे पिन्व मनो मे जिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ ' इति । हे इष्टके, vमे मदीयम् vआयुः vपाहि रक्ष । एवमुत्तरत्रापि योज्यम् । vपिन्व प्रीणय । vजिन्व प्रीणय । vआत्मानं जीवस्वरूपम् । vज्योतिः कान्तिं vयच्छ देहि ॥१॥

आ– दश प्राणभृत उपदधाति । 'आयुर्मे' इति । दश लिङ्गोक्तदेवत्यानि यजूंषि । vआयुः vमे मम । आयुः दशप्राणभृदात्मकः । हे प्राण, मम आयुः vपाहि गोपाय । 'प्राणं मे' । vप्राणं पञ्चवृत्तिकं देहधारकं vपाहि । vअपानं vपाहि अवाक्वृत्तिकम् । vव्यानं vमे अपानोदानयोरनुसंधिव्यापारवन्तम् । 'चक्षुः मे पाहि श्रोत्रं मे पाहि' । vवाचं vमे त्रयीलक्षणां वाचं मे vपिन्व सिञ्च कामैः पूरय । 'मनो मे जिन्व' । जिन्वतिः प्रीतिकर्मा । vज्योतिः vयच्छ प्रयच्छ देहि ॥१॥

मा छन्दः प्रमा छन्दः प्रतिमा छन्दो अस्रीवयश्छन्दः ।
पङ्क्तिश्छन्द उष्णिक् छन्दः ॥२॥
बृहती छन्दोऽनुष्टुप् छन्दो विराट् छन्दो गायत्री छन्दः ।
त्रिष्टुप् छन्दो जगती छन्दः ॥३॥
पृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दः ।
नक्षत्राणि छन्दो वाक् छन्दः ॥४॥
मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दः ।
अजा छन्दोऽश्वश्छन्दः ॥५॥

---

8. S2 जिन्व स्वरूपं for जीवस्वरूपं

अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता ।
वसवो देवता रुद्रा देवता ।
आदित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवता ।
इन्द्रो देवता वरुणो देवता ॥६॥(५)॥

मा । छन्दः । प्रमेति प्रऽमा । प्रतिमेति प्रतिऽमा । अस्रीवयः ।
पङ्क्तिः । उष्णिक् ॥ जै ॥२॥
बृहती । अनुष्टुप् । अनुस्तुबित्यनुऽस्तुप् । विराळिति विऽराट् । गायत्री ।
त्रिष्टुप् । त्रिस्तुबिति त्रिऽस्तुप् । जगती । ॥ लो ॥३॥
पृथिवी । अन्तरिक्षम् । द्यौः । समाः ।
नक्षत्राणि । वाक् ॥ षे ॥४॥
मनः । कृषिः । हिरण्यम् । गौः ।
अजा । अश्वः । छन्दः ॥ ळै ॥५॥
अग्निः । देवता । वातः । सूर्यः । चन्द्रमाः ।
वसवः । रुद्राः ।
आदित्याः । मरुतः । विश्वे । देवाः । बृहस्पतिः ।
इन्द्रः । वरुणः । देवता ॥ षू ॥६॥(५)॥

सा– कात्यायनः – "छन्दस्या द्वादश द्वादशाप्ययेषु मा छन्द इति प्रतिमन्त्रम् ॥ वालखिल्यालोकं पश्चाच्छिष्ट्वा" (काश्रौ १७.९.८-१०) इति । छन्दःशब्दोपेतैर्मन्त्रैरुपधेया इष्टकाश्छन्दस्याः । ताः षट्त्रिंशत्संख्योपेताः । वालखिल्येष्टकोपधानार्थं पश्चिमभागे स्थानं त्यक्त्वा इतरदिक्त्रयावस्थितेषु संधिविशेषेषु द्वादश द्वादश एकैकेन मन्त्रेणोपदध्यात् । पाठस्तु– 'मा छन्दः प्रमा छन्दः प्रतिमा छन्दो अस्रीवयश्छन्दः । पङ्क्तिश्छन्द उष्णिक् छन्दः ॥ बृहती छन्दोऽनुष्टुप् छन्दो विराट् छन्दो गायत्री छन्दः । त्रिष्टुप् छन्दो जगती छन्दः ॥ पृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दः । नक्षत्राणि छन्दो वाक् छन्दः ॥ मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दः । अजा छन्दोऽश्वश्छन्दः । अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता । वसवो देवता रुद्रा देवता । आदित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवता । इन्द्रो देवता वरुणो देवता' इति । अत्र 'मा प्रमा प्रतिमा' आदिशब्दाभिधेयाश्छन्दोविशेषाः । केचिद्वेदेष्वेव प्रसिद्धाः । केचिल्लोकेष्वपि प्रसिद्धाः ।

---

20. P1 इतरे for इतर°

हे इष्टके, त्वं [v]मा नाम छन्दोरूपासि। [v]प्रमा नाम छन्दोरूपासि। इत्येवं सर्वत्र योज्यम्। अग्न्यादीनां तु देवतात्वम् प्रसिद्धम्। हे इष्टके, त्वम् अग्निरूपासीत्येवं तत्रापि योज्यम् ॥२–५॥

[इति पञ्चदशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

आ– षट्त्रिंशच्छन्दस्या इष्टका उपदधाति 'मा छन्दः' इति। षट्त्रिंशल्लिङ्गोक्तदेवत्यानि यजूंषि। माङ् माने। अयं लोकः मित इव परिमित इव भवतीति [v]मा इत्युच्यते। छादयतीति [v]छन्दः। [v]प्रमा [v]छन्दः। "अन्तरिक्षलोको वै प्रमा" (शब्रा ८.३.३.५)। अस्माल्लोकात् अन्तरिक्षलोकः प्रमित इव दृश्यत इति। [v]प्रतिमा [v]छन्दः इति। द्यौः प्रतिमा लोकद्वयं प्रतिमितेति। [v]अस्रीवयः [v]छन्दः इति। अन्नमस्रीवयः। "यदेभ्यो लोकेभ्योऽन्न९ स्रवति तदस्रीवयः" (शब्रा ८.३.३.५) इति श्रुतेः॥

अथातो निरुक्तान्येव छन्दांसि उपदधाति – 'पङ्क्तिश्छन्दः' इति। दशाक्षरपादैः चतुर्भिः पङ्क्तिः। यस्य [।] अष्टाक्षराः पञ्च पादाः सा पङ्क्तिरिति वा। अष्टाविंशत्यक्षरोष्णिक्। सा त्रिपदा। आद्यौ पादावष्टाक्षरौ तृतीयो द्वादशाक्षरो यस्याः सा उष्णिक्। [1]लिङ्गोक्तदेवत्योष्णिक् ॥१॥

'बृहती छन्दः' इति। नवाक्षरैश्चतुर्भिः पादैर्बृहती छन्दः। अष्टाक्षरैश्चतुर्भिः पादैरनुष्टुप् छन्दः। दशाक्षरैश्चतुर्भिर्पादैर्युक्ता विराट्। चतुर्विंशत्यक्षरा गायत्री। एकादशाक्षरैश्चतुर्भिः पादैस्त्रिष्टुप्। द्वादशाक्षरैः चतुर्भिर्पादैर्जगती छन्दः। एतानि निरुक्तानि विराडष्टमानि छन्दांसीति ॥२॥

पृथिव्यादिदेवत्यानि यानि छन्दांसि तान्युपदधाति-- 'पृथिवी छन्दः' इति। लिङ्गोक्तदेवत्योष्णिक्। "पृथिवी छन्दोऽन्तरिक्षं छन्द इति यान्येतद्देवत्यानि छन्दा९सि" (शब्रा ८.३.३.६) इति श्रुतेः। [v]पृथिवी पृथिवीदेवत्यं [v]छन्दः पृथिवी छन्दः। अन्तरिक्ष-देवत्यम् [v]अन्तरिक्षं [v]छन्दः। द्युदेवत्यं [v]द्यौः [v]छन्दः। समादेवत्यं [v]समाः [v]छन्दः। नक्षत्रदेवत्यं [v]नक्षत्राणि [v]छन्दः। वाग्देवत्यं [v]वाक् [v]छन्दः ॥३॥

---

1. P1 om. एवं; P1 with insertions above योज्यम्। adds on the upper margin : अयं वै लोको माय९ हि लोको मित इवेति। अन्तरिक्षलोको वै प्रमान्तरिक्षलोको ह्यस्माल्लोकात् प्रमित इवेति। द्यौः प्रतिमा सा ह्यन्तरिक्षलोकप्रतिमितेति। अस्रीवय इति। यदेभ्यो लोकेभ्य आहुतिपरिणामभूतमन्न९ स्रवति। परतो निरुक्तानीत्यादिशतपथमत्रानुसंधेयम्।

7. B1 om. first इति

8. H2–3 after अन्नमस्रीवयः adds:– यदेभ्यो लोकेभ्य आहुतिपरिणामभूतमन्नमप्यर्थन्न स्रवतीति तदस्रीवयः।

वालखिल्यादीष्टकोपधानमन्त्राः]

' मनश्छन्दः ' इति । लिङ्गोक्तदेवत्या गायत्री । मनोदेवत्यं ^{v}मनः ^{v}छन्दः । कृषिदेवत्यं ^{v}कृषिः ^{v}छन्दः । हिरण्यदेवत्यं ^{v}हिरण्यं ^{v}छन्दः । गोदेवत्यं ^{v}गौः ^{v}छन्दः । अजादेवत्यम् ^{v}अजा ^{v}छन्दः । अश्वदेवत्यम् ^{v}अश्वः ^{v}छन्दः ॥४॥

' अग्निर्देवता वातो देवता ' इति । " एता वै देवताश्छन्दांꣳसि " (शब्रा ८·३·३·६) इति श्रुतेः । अग्न्यादिदेवतात्मकानि छन्दांसि । एवं षट्त्रिंशच्छन्दस्या इष्टका उपदधाति ॥५॥

[इति पञ्चदशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

———

[अथ षष्ठोऽनुवाकः ।]

सा– पञ्चमेऽनुवाके प्राणभृदिष्टकादिमन्त्रा उक्ताः । षष्ठे वालखिल्यादीष्टकोपधानमन्त्रा उच्यन्ते–

मूर्धाऽसि राड्ध्रुवाऽसि धरुणा धर्त्र्यसि धरणी ।
आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ॥१॥
यन्त्री राड्यन्त्र्यसि यमनी ध्रुवाऽसि धरित्री ।
इषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वा ।
लोकं पृण ता अस्येन्द्रं विश्वाः ॥२॥(६)॥

मूर्धा । असि । राट् । ध्रुवा । धरुणा । धर्त्री । धरणी ।
आयुषे । वर्चसे । कृष्यै । क्षेमाय ॥ आं ॥१॥
यन्त्री । राट् । यन्त्री । यमनी । ध्रुवा । धरित्री ।
इषे । ऊर्जे । रय्यै । पोषाय । त्वा । ॥ आं ॥२॥(६)॥

सा– कात्यायनः – " वालखिल्याः सप्त पुरस्तात् ॥ द्वादशभ्यो परास्तु मूर्धाऽसि राडिति प्रतिमन्त्रम् " (काश्रौ १७·९·११-१४) इति । वालखिल्येष्टकाः सप्त पूर्वभागे ' मूर्धाऽसि राट् ' इति सप्तभिर्मन्त्रैरुपधेयाः । इतराः सप्त पश्चिमभागे ' यन्त्री राट् ' इति सप्तभिर्मन्त्रैरुपदध्यात् । पाठस्तु– ' मूर्धाऽसि राड्ध्रुवाऽसि धरुणा धर्त्र्यसि धरणी । आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ॥ यन्त्री राड्यन्त्र्यसि यमनी ध्रुवाऽसि धरित्री । इषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वा ' इति । हे इष्टके, त्वं ^{v}मूर्धा

2. H2–3 गोऽधिपत्यं for गोदेवत्यं

5. B1 षड्विंश° for षट्त्रिंश°; H2–3 °धातव्याः for °दधाति

मूर्धवदुत्तमा राट् राजमाना च असि। हे इष्टके, त्वं ध्रुवा स्थिरा धरुणा धारणहेतुश्च असि। हे इष्टके, त्वं धर्त्री धारणं कुर्वतीति धरणी भूमिरूपा च असि। आयुषे आयुर्वृद्ध्यर्थं त्वामुपदधामि। वर्चसे कान्त्यर्थं त्वामुपदधामि। कृष्यै सस्यनिष्पत्तये त्वामुपदधामि। क्षेमाय संपादितस्य धनस्य रक्षणाय त्वामुपदधामि। हे इष्टके, त्वं यन्त्री नियमोपेता राट् राजमाना च असि। तथा यन्त्री स्वयमपि नियन्त्री। यमनी सर्वेषां नियमनकारिणी चासि। तथा ध्रुवा स्थिरा सती धरित्री भूमिरूपा च असि। हे इष्टके, इषे अन्नाय त्वामुपदधामि। ऊर्जे बलाय त्वामुपदधामि। रय्यै धनार्थं त्वामुपदधामि। पोषाय तद्धनपुष्ट्यर्थं त्वामुपदधामि॥

कात्यायनः – " लोकंपृणा पूर्ववत् " (काश्रौ १७.९.१६) इति। तन्मन्त्रप्रतीकपाठस्तु– ' लोकं पृण ता अस्येन्द्रं विश्वाः ' इति। पूर्ववद् व्याख्येयम् ॥१–२॥

[इति पञ्चदशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

आ– चतुर्दश वालखिल्या उपदधाति– ' मूर्धाऽसि राट् ' इति। ' मूर्धाऽसि राट् ' इति अनुष्टुप्। ' यन्त्री ' पुरउष्णिक् चतुर्दशवालखिल्येष्टकादेवत्या। " प्राणा वै वालखिल्याः " (शब्रा ८.३.४.१) इति। मूर्धा असि शिरोभूतासि। राट्। राजृ दीप्तौ। दीप्ताऽसि। ध्रुवा स्थिरा च असि। धरुणा। धृञ् धारणे। धारयित्री च असि। धर्त्री धारयित्री, धरणी। इत्येवं त्रिलोकात्मना स्तुतिस्तिसृणामिष्टकानाम्। " मूर्धाऽसि राडितीमं लोकमरोहन्। ध्रुवाऽसि धरुणेत्यन्तरिक्षलोकं धर्त्र्यसि धरणीति [अमुं लोकम्] " (शब्रा ८.३.४.८) इति श्रुतेः। आयुषे पशवे त्वा वर्चसे पशवे त्वा कृष्यै पशवे त्वा क्षेमाय त्वा चतुष्पादपशवे वालखिल्येष्टकां त्वां सादयामीति शेषः। " आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वेति चत्वारश्चतुष्पादाः पशवोऽन्नं पशवः " (शब्रा ८.३.४.८) इति श्रुतेः ॥१॥

तिसृणामिष्टकानां द्युलोकाद्यात्मना स्तवः। यन्त्री राट् दीप्ताऽसि। यन्त्री यमनी नियम्यमाना अन्तरिक्षलोकात्मिका च असि। ध्रुवा धरित्री च असि। इषे त्वा ऊर्जे त्वा रय्यै धनाय त्वा पोषाय पुष्ट्यै। चतुष्पाद्भ्यः चतुर्भ्यः तामिष्टकां त्वां सादयामीति शेषः। एवं पूर्ववत् पशुसंस्तवः। उभयथा सप्तदशविधप्राणात्मवालखिल्यस्तवः॥

अथ लोकंपृण ता उपदधाति– " लोकं पृण ताः अस्येन्द्रं विश्वाः " इति ॥२॥

[इति पञ्चदशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

---

13. H2-3 om. दीप्ताऽसि

17. B1 om. कृष्यै ... वर्चसे त्वा (L. 18)

20. H2-3 द्विलोकात्मना, B1 द्युलोकानां द्युलोकाद्यात्मना for द्युलोकाद्यात्मना

21. B1 om. नियम्यमाना

22. H2-3 om. पुष्ट्यै; B1 om. चतुष्पाद्भ्यः; H2-3 त्वाम् for ताम्

24. लोकं पृण माः; see footnote on Line 6, page 297

अक्ष्णयास्तोमीयेष्टकोपधानमन्त्राः]

[अथ सप्तमोऽनुवाकः ।]

षष्ठेऽनुवाके वालखिल्यादीष्टकोपधानमन्त्रा उक्ताः । एतावता तृतीया चितिः समाप्ता। अथ सप्तमेऽनुवाके चतुर्थ्यां चितावक्ष्णयास्तोमीयाख्या या इष्टकास्तासामुपधाने केचिन्मन्त्रा उच्यन्ते–

आशुस्त्रिवृद्भान्तः पञ्चदशो व्योमा सप्तदशो
धरुणं एकविंशः प्रतूर्तिरष्टादशः ।
तपो नवदशोऽभीवर्तः सविंशो
वर्चो द्वाविंशः संभरणस्त्रयोविंशो योनिश्चतुर्विंशः ॥१॥
गर्भाः पञ्चविंश ओजस्त्रिणवः क्रतुरेकत्रिंशः
प्रतिष्ठा त्रयस्त्रिंशो ब्रध्नस्य विष्टपं चतुस्त्रिंशः ।
नाकः षट्त्रिंशो विवर्तोऽष्टाचत्वारिंशो धर्त्रं चतुष्टोमः ॥२॥(७)॥

आशुः । त्रिवृदिति त्रिऽवृत् । भान्तः । पञ्चदश इति पञ्चऽदशः ।
व्योमेति विऽओमा । सप्तदश इति सप्तऽदशः ।
धरुणः । एकविंश इत्येकऽविंशः । प्रतूर्तिरिति प्रऽतूर्तिः । अष्टादश इत्यष्टाऽदशः ।
तपः । नवदश इति नवऽदशः ।
अभीवर्तः । अभिवर्त इत्यभिऽवर्तः । सविंश इति सऽविंशः ।
वर्चः । द्वाविंशः । संभरण इति संऽभरणः । त्रयोविंश इति त्रयःऽविंशः ।
योनिः । चतुर्विंश इति चतुःऽविंशः ॥ प्र ॥१॥
गर्भाः । पञ्चविंश इति पञ्चऽविंशः । ओजः । त्रिणवः । त्रिनव इति त्रिऽनवः ।
क्रतुः । एकत्रिंश इत्येकऽत्रिंशः ।
प्रतिष्ठा । प्रतिस्थेति प्रतिऽस्था । त्रयस्त्रिंश इति त्रयःऽत्रिंशः ।
ब्रध्नस्य । विष्टपम् । चतुस्त्रिंश इति चतुःऽत्रिंशः ।
नाकः । षट्त्रिंश इति षट्ऽत्रिंशः ।
विवर्त इति विऽवर्तः । अष्टाचत्वारिंश इत्यष्टाऽचत्वारिंशः ।
धर्त्रम् । चतुष्टोमः । चतुस्तोम इति चतुःऽस्तोमः ॥ ब्रे ॥२॥(७)॥

2. P1 om. समाप्ता
3. S2 वक्ष्यमाणायां B1 वक्ष्यमाणा for अक्ष्णया°

सा– सूत्रं तु चतुर्थ्यामनुवाकान्तेपु ' दक्षिणोत्तरे द्वे द्वे ' इत्यारभ्य ' प्रतूर्तिरष्टादशः ' इत्यन्तं कात्यायनेनोदाहृतम् । तेषां पाठस्तु– ' आशुस्त्रिवृद्भान्तः पञ्चदशो व्योमा सप्तदशो धरुण एकविꣳशः प्रतूर्तिरष्टादशः । तपो नवदशोऽभीवर्तः सविꣳशो वर्चो द्वाविꣳशः संभरणस्त्रयोविꣳशो योनिश्चतुर्विंशः ॥ गर्भाः पञ्चविꣳश ओजस्त्रिणवः क्रतुरेकत्रिꣳशः प्रतिष्ठा त्रयस्त्रिꣳशो ब्रध्नस्य विष्टपं चतुस्त्रिꣳशः । नाकः षट्त्रिꣳशो विवर्तोऽष्टाचत्वारिꣳशो धर्त्रं चतुष्टोमः ' इति । अत्र त्रिवृत्पञ्चदशसप्तदशादिशब्दाः स्तोमविशेषवाचिनः स्तोमाश्च तृचनिष्ठस्य साम्न आवृत्तिभेदान्निष्पाद्यन्ते । आवृत्तिप्रकारस्तु त्रिवृत्पञ्चदशसप्तदशानां राजसूयाभिधायके एकादशाध्याये सामब्राह्मणोदाहरणेनास्माभिर्व्याख्यातः । एकविꣳशत्रिणवत्रयस्त्रिꣳशाख्या अपि स्तोमाः सामब्राह्मणे पठिताः । अष्टादशनवदशादयस्तु न्यायेनोन्नेयाः स्तोमाः । न तु ब्राह्मणाम्नाताः । तदुन्नयनार्थस्त्वावृत्तिप्रकारः साससूत्रादवगन्तव्यः । अत्र त्रिवृदादयश्चतुष्टोमान्ताः स्तोमविशेषाः अष्टादशसंख्याका आम्नाताः । ' आशुर्भान्तः ' इत्यादीनि स्तोमविशेषणानि कानिचिद्गुणवाचीनि कानिचिद्द्रव्यवाचीनि । तथा सति गुणसंबन्धं द्रव्यतादात्म्यं वा स्तोमेषूपचर्य तत्तत्स्तोमरूपत्वं तत्तदिष्टकायाः प्रशंसार्थमुपन्यस्यते । तत्रैवमक्षरयोजना– आशुः शैघ्र्यगुणोपेतो यस्त्रिवृत्स्तोमः हे इष्टके, त्वं तद्रूपा असि । एवमुत्तरत्रापि योज्यम् । भान्तः भासमानः । व्योम इति प्रसिद्धं द्रव्यम् । व्यत्ययेन पुंलिङ्गता । धरुणः धारकः । प्रकृष्टा तूर्तिस्त्वरा यस्यासौ प्रतूर्तिः शीघ्रकारीत्यर्थः । तपः प्रसिद्धम् । अभीवर्तः सामविशेषः । छान्दसो दीर्घः । सह विंशत्या संख्यया वर्तत इति सविंशः स्तोमविशेषः । वर्चः बलविशेषः । संभरणः सम्यक् पोषकः । योनिः प्रजोत्पादकः । गर्भाः प्रसिद्धाः । ओजः अष्टमो धातुः । क्रतुः ज्योतिष्टोमादिः । प्रतिष्ठा स्थितिहेतुः । ब्रध्नस्य आदित्यस्य विष्टपं निवासस्थानम् । " असौ वा आदित्यो ब्रध्नः " (तैब्रा ३·८·४·१) इति श्रुत्यन्तरात् । नाकः स्वर्गाख्यो भोगभूमिः । विपरीतत्वेन वर्तनं यस्यासौ विवर्तः । त्रिवृत्पञ्चदशसप्तदशैकविꣳशत्रिणवत्रयस्त्रिꣳशा अनेनैवाम्नातक्रमेण क्वचिदनुष्ठीयन्ते । क्वचित्तु विपरीतक्रमेण । अत एवापस्तम्बाचार्येण क्वचिदुक्तम्– " त्रयस्त्रिंशारम्भरणास्त्रिवृदुत्तमाः " (आपश्रौ २३·१०·८) इति । धर्त्रं धारकः चतुष्टोमः त्रिवृत्पञ्चदशसप्तदशैकविꣳशानां समूहः । एतैः स्तोमवाचिभिरष्टादशभिर्मन्त्रैः स्तोमरूपत्वमापादिता अष्टादशेष्टका उपदध्यादिति शेषः ॥१-२॥

[इति पञ्चदशेऽध्याये सप्तमोऽनुवाकः ॥७॥]

---

6. P1 त्रिवृत्रिष्ठस्य, S2 त्रिवृत्रिष्त्रस्य for तृचनिष्ठस्य

11. P1 गुणवाचिकानि for गुणवाचीनि; P1 उपचर्यते for उपचर्य

12. P1 अत्र स्तोम° for तत्तत्स्तोम°

13. P1 with insertion above योज्यम् adds in the upper margin – अयो वायुर्वा आशुरिति । वज्रो वै भान्तः पञ्चदश इति । व्योमेति प्राजपतिर्वै व्योमा प्रजापतिः सप्तदश इत्यादिशतपथमत्रानुसंधेयम्

15. P1 संवर्तमानः वर्तत इति

22. P1 आपादितम् for आपादिता

23. S2 अर्थः for शेषः

अक्ष्णयास्तोमीयेष्टकोपधानमन्त्राः]

आ– अथ चतुर्थीं चितिमृषयोऽपश्यन् । अत ऋषीणामार्षम् । 'आशुस्त्रिवृत्' इति । अष्टादशेष्टकाः प्रतिमन्त्रमुपदधाति । स्तोमसंख्योपलक्षितैर्मन्त्रैः स्तोमानुपदधाति । लिङ्गोक्तदेवत्यान्यष्टादश यजूँषि । श्रुत्या प्रकटीकृतार्था मन्त्राः । 'आशुस्त्रिवृत्'। य एव आशुस्त्रिवृत् स्तोमः तेन स्तोमेनोपदधाति । Vआशुः शीघ्रः आशिष्टो वायुः । 'त्रिवृत्'। त्रिषु लोकेषु वर्तत इति Vत्रिवृत् त्रिलोकसंचारी । 'भान्तः पञ्चदशः'। भा दीप्तौ । भामन्ततीति Vभान्तः चन्द्रमाः । स हि पञ्चदशाहानि आपूर्यते अपक्षीयते चेति Vपञ्चदशः चन्द्रः । स्तोमसंख्या चात्र विवक्ष्यते । 'व्योमा सप्तदशः' इति । Vव्योमा संवत्सरः । विविधान् प्राणिनोऽवतीति स व्योमा संवत्सरः Vसप्तदशः । सप्तदशस्तोमात्मकः द्वादश मासाः पञ्चर्तवः इति सप्तदशावयववान् संवत्सरः। 'धरुण एकविंशः' इति । वृष्टयादिरूपेण जगद्धारयतीति Vधरुणः आदित्यः । "द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्यो धरुण एकविंशः" इति । एकविंशस्तोमात्मकश्च । "य एवाष्टादशस्तोमस्तं तदुपदधाति"। 'प्रतूर्तिरष्टादशः' इति । अष्टादशस्तोमः Vप्रतूर्तिः संवत्सरः । प्रतरति प्रतारयति वा सर्वाणि भूतानीति प्रतूर्तिः । "संवत्सरो वाव प्रतूर्तिः" (शब्रा ८.४.१.१३) इति श्रुतेः। "द्वादश मासाः पञ्चर्तवः संवत्सर एव प्रतूर्तिरष्टादशः"। 'तपो नवदशः' इति । Vतपः इति संवत्सरः । तपति शीतोष्णादिभिः सर्वाणि भूतानीति वा तपः । "संवत्सरो वाव तपो नवदशस्तस्य द्वादश मासाः षड्तवः संवत्सर एव तपो नवदशः" इति । "संवत्सरो हि सर्वाणि भूतानि अभिवर्तत" इति । Vअभीवर्तः । अनेन ऋतुलिङ्गान्यभिवर्तन्ते इति वा । छान्दसो दीर्घः । सविंशः । "य एव सविंशस्तोमस्तं तदुपदधाति"। "तस्य द्वादश मासाः सप्तर्तवः संवत्सर एवाभीवर्तः सविंशः"। विंशेन सहितः । वर्च दीप्तौ । ऋतुगुणान् वर्चयति दीपयतीति Vवर्चः संवत्सरः Vद्वाविंशः । "य एव द्वाविंशस्तोमस्तं तदुपदधाति"। द्वादश मासाः सप्तर्तवः ।

2. B1 °संलक्षितः H2–3 °संख्यालक्षितैः for संख्योपलक्षितैः
3. B1 H2–3 प्रकृति° for प्रकटी°; °कृतार्थोक्ताः for °कृतार्था मन्त्राः; H3 मन्त्रान् for मन्त्राः
5. B1 वै for हि
7. B1 त्रिविधान् for विविधान्
11. H2–3 तम् for तद्; B1 च for °अष्टा° H3 प्रतूर्तः for प्रतूर्तिः
12. B1 after इति adds वा
14. B1 संवत्सरे for संवत्सर; B1 वा for वाव
15. B1 om. °तस्य द्वादश
16. B1 निर्वतते for अभिवर्तन्ते
17. B1 om. य एव ... सविंशः (L. 18)
18. H2 om. विंशेन ... द्वाविंशः (L. 19); B1 तापयति for दीपयति
19. H2–3 om. तम्; B1 तम् for तद्; H2–3 after °दधाति ins. इति

अधिमासाभिप्रायेण सप्तर्तवो भवन्ति। "अथ त्रीण्यहान्युपातियन्ति" इत्यादिश्रुतेः। "तस्य द्वादश मासाः सप्तर्तवः द्वे अहोरात्रे संवत्सर एव वर्चः"। वर्चस्वितमः ^{v}द्वाविंशः। सर्वाणि भूतानि संभरति उत्पादयति इति वा ^{v}संभरणः संवत्सरः ^{v}त्रयोविंशः। "य एव त्रयोविंशस्तोमः तं तदुपदधाति"। "तस्य त्रयोदश मासाः सप्तर्तवः द्वे अहोरात्रे संवत्सर एव संभरणस्त्रयोविंशः"। यू मिश्रणे। शुक्रं मिश्रीकृत्य पुत्रादिभावं नयतीति ^{v}योनिः। संवत्सर एव चतुर्विंशस्तोमस्तं तदुपदधाति। "संवत्सरो वाव योनिश्चतुर्विंशस्तस्य चतुर्विंशतिरर्धमासाः"। एवं चतुर्विंशो योनिः सर्वेषाम्। "संवत्सरो हि सर्वेषां भूतानां योनिः" इति ॥१॥

'गर्भाः पञ्चविंशः'। सर्वं जगद् गृह्णातीति गर्भः संवत्सरः। "य एव पञ्चविंशस्तोमस्तं तदुपदधाति"। ^{v}ऋतुः संवत्सरावयवः। "त्रयोदशो मासो गर्भो भूत्वा ऋतून् प्रविशति"। चतुर्विंशतिरर्धमासास्त्रयोदशमासश्चेत्येवं पञ्चविंशस्तोमो गर्भः। ^{v}ओजः। मतुब्लोपश्छान्दसः। ओजस्वी संवत्सरः त्रिणवस्तोमः। "चतुर्विंशतिरर्धमासाः द्वे अहोरात्रे संवत्सर एवौजास्त्रिणवः"। क्रतुः। सर्वाणि भूतानि करोतीति ^{v}क्रतुः संवत्सरः। "य एवैकत्रिंशस्तोमस्तं तदुपदधाति"। "तस्य चतुर्विंशतिरर्धमासाः षड्तव . . ." इत्येवम् एकत्रिंशस्तोमः क्रतुः। प्रतिष्ठा। प्रतिष्ठत्यनया सर्वं जगदिति लिङ्गमविवक्षितम्। ^{v}प्रतिष्ठा संवत्सरः। योऽयं त्रयस्त्रिंशस्तोमः, "तस्य चतुर्विंशतिरर्धमासाः षड्तवो द्वे अहोरात्रे संवत्सर एव [प्रतिष्ठा त्रयस्त्रिंशः"] "ब्रध्नस्य विष्टपं चतुस्त्रिंशः"। कमु कान्तौ। काम्यत इति कं सुखम्। तद्विपरीतमकं दुःखम्, नास्ति अकमस्मिन्निति ^{v}नाकः। "संवत्सरो वाव नाकः"। "य एव षट्त्रिंशः स्तोमः तं तदुपदधाति"। "तस्य चतुर्विंशतिरर्धमासाः द्वादश मासाः . . ." संवत्सर एव नाकः ^{v}षट्त्रिंशः। विविधं भूतानि वर्तन्ते [यत्र] इति ^{v}विवर्तः पितृयाणात्मकः संवत्सरः। यः अष्टाचत्वारिंशस्तोमः। "तस्य षड्विंशतिरर्धमासाः त्रयोदश मासाः सप्तर्तवो द्वे अहोरात्रे" इति संवत्सरो विवर्तोऽष्टाचत्वारिंशस्तोमः। धारयतीति

---

3. H2–3 after उत्पादयति add रक्षति संभरति; H3 सः for यः
8. B1 om. यः
9. B1 तम् for तद्
10. B1 H2 मासाश्च for °मासश्च B1 मतुपो for मतुब्°
12. B1 तम् for तद्
13. B1 यस्य for तस्य
16. H3 तद्विपरीतात्मकं for तद्विपरीतमकं
17. H3 om. अकमस्मिन् om. संवत्सरो वा नाकः; B1 °विंशः for °त्रिंशः B1 तम् for तद्
19. B1 om. यः

अवशेष-इष्टकोपधानमन्त्राः]

धर्त्रं प्रतिष्ठा । " प्रतिष्ठा वै धर्त्रं वायुर्हीदं सर्वेषां भूतानां प्रतिष्ठा " । यश्चतुष्टोमः आभिश्चत-सृभिर्दिग्भिश्चतुष्टोमो वा । वायुर्धर्त्रं चतुष्टोमस्तोमो भवतीति ॥२॥

[इति पञ्चदशेऽध्याये सप्तमोऽनुवाकः ॥७॥]

[अथ अष्टमोऽनुवाकः ।]

सप्तमेऽनुवाके केचिदक्ष्णयास्तोमीयाख्येष्टकोपधानमन्त्राः उक्ताः । अष्टमे तदवशेषेष्टकोपधान-मन्त्रा उच्यन्ते ॥

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत् स्तोमः ।
इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रꣳ स्पृतं पञ्चदश स्तोमः ॥१॥
नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रꣳ स्पृतꣳ सप्तदश स्तोमः ।
मित्रस्य भागोऽसि वरुणस्याधिपत्यं
दिवो वृष्टिर्वात स्पृत एकविꣳश स्तोमः ॥२॥
वसूनां भागोऽसि रुद्राणामाधिपत्यं चतुष्पात् स्पृतं चतुर्विꣳश स्तोमः ।
आदित्यानां भागोऽसि मरुतामाधिपत्यं
गर्भा स्पृताः पञ्चविꣳश स्तोमः ॥३॥
अदित्यै भागोऽसि पूष्ण आधिपत्यमोज स्पृतं त्रिणव स्तोमः ।
देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यꣳ
समीचीर्दिश स्पृताश्चतुष्टोम स्तोमः ॥४॥
यवानां भागोऽस्ययवानामाधिपत्यं प्रजा स्पृताश्चतुश्चत्वारिꣳश स्तोमः ।
ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतꣳ स्पृतं त्रयस्त्रिꣳश स्तोमः ।
सहश्च सहस्यश्च हैमन्तिकावृतू अग्नेरन्तःश्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः

1. H2–3 चतुष्टोमस्तोमः for चतुष्टोमः
2. B1 om. वा
5. P1 अह्नतया, S? अह्नया for अक्ष्णया°

कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
हैमन्तिका ऋतू अभि कल्पमाना इन्द्रमिव देवा अभि संविशन्तु
तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ।।५।।८।।

अग्नेः । भागः । असि । दीक्षायाः । आधिपत्यमित्याधिऽपत्यम् । ब्रह्म । स्पृतम् । त्रिवृदिति त्रिऽवृत् । स्तोमः । इन्द्रस्य । भागः । असि । विष्णोः । आधिपत्यमित्याधिऽपत्यम् । क्षत्रम् । स्पृतम् । पञ्चदश इति पञ्चऽदशः स्तोमः ॥ द्रो ॥१॥

नृचक्षसामिति नृऽचक्षसाम् । भागः । असि । धातुः । आधिपत्यमित्याधिऽपत्यम् । जनित्रम् । स्पृतम् । सप्तदश इति सप्तऽदशः । स्तोमः । मित्रस्य । भागः । असि । वरुणस्य । आधिपत्यमित्याधिऽपत्यम् । दिवः । वृष्टिः । वातः । स्पृतः । एकविंश इत्येकऽविंशः । स्तोमः ॥ पः ॥२॥

वसूनाम् । भागः । असि । रुद्राणाम् । आधिपत्यमित्याधिऽपत्यम् । चतुष्पात् । चतुःपादिति चतुःऽपात् । स्पृतम् । चतुर्विंश इति चतुःऽविंशः । स्तोमः । आदित्यानाम् । भागः । असि । मरुताम् । आधिपत्यमित्याधिऽपत्यम् । गर्भाः । स्पृताः । पञ्चविंश इति पञ्चऽविंशः । स्तोमः ॥ पौं ॥३॥

अदितेः । भागः । असि । पूष्णः । आधिपत्यमित्याधिऽपत्यम् । ओजः । स्पृतम् । त्रिणवः । त्रिनव इति त्रिऽनवः । स्तोमः । देवस्य । सवितुः । भागः । असि । बृहस्पतेः । आधिपत्यमित्याधिऽपत्यम् । समीचीः । दिशः । स्पृताः । चतुष्टोमः । चतुस्तोम इति चतुःऽस्तोमः । स्तोमः ॥ थिः ॥४॥

यवानाम् । भागः । असि । अयवानाम् । आधिपत्यमित्याधिऽपत्यम् । प्रजा इति प्रऽजाः । स्पृताः । चतुश्चत्वारिंश इति चतुःऽचत्वारिंशः । स्तोमः । ऋभूणाम् । भागः । असि । विश्वेषाम् । देवानाम् । आधिपत्यमित्याधिऽपत्यम् । भूतम् । स्पृतम् । त्रयस्त्रिंश इति त्रयःऽत्रिंशः । स्तोमः । सहः । सहस्यः । हैमन्तिकौ । ऋतू इत्यृतू ॥ खीः ॥५॥

अवशेष-इष्टकोपधानमन्त्राः]

स्ला– ' अग्नेर्भागः ' इत्यारभ्य ' वसूनां भागः ' इत्यन्तं कात्यायनेन सूत्रितम्। तेषां पाठस्तु– ' अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत् स्तोमः। इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रꣳ स्पृतं पञ्चदश स्तोमः ॥ नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रꣳ स्पृतꣳ सप्तदश स्तोमः । मित्रस्य भागोऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वात स्पृत एकविꣳश स्तोमः ॥ वसूनां भागोऽसि रुद्राणामाधिपत्यं चतुष्पात् स्पृतं चतुर्विꣳश स्तोमः । आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्भा स्पृताः पञ्चविꣳश स्तोमः ॥ अदितेर्भागोऽसि पूष्ण आधिपत्यमोज स्पृतं त्रिणव स्तोमः । देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यꣳ समीचीर्दिश स्पृताश्चतुष्टोम स्तोमः ॥ यवानां भागोऽस्ययवानामाधिपत्यं प्रजा स्पृताश्चतुश्चत्वारिꣳश स्तोमः । ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतꣳ स्पृतं त्रयस्त्रिꣳश स्तोमः ' इति । हे इष्टके, योऽयम् अग्नेः भागः हविर्लक्षणः स्वं दीक्षादेवतायाः आधिपत्यं स्वामित्वं स्पृतं देवानां प्रीतिकरं ब्रह्म मन्त्रजातं ब्राह्मणजातिर्वा । योऽपि त्रिवृदाख्यः स्तोमविशेषस्तत् सर्वं त्वम् असि । हे इष्टके, योऽयम् इन्द्रस्य भागः हविर्विशेषः यश्च विष्णोः परमेश्वरस्य आधिपत्यं यदपि स्पृतं प्रीतिकरं क्षत्रं क्षतत्राणं बलं क्षत्रियजातिर्वा । योऽपि पञ्चदशाख्यः स्तोमः तत् सर्वं त्वम् असि । ये मनुष्याः सन्तश्चक्षते वेदं व्यक्तमुच्चारयन्ति ते नृचक्षसः ऋत्विगादयस्तेषां भागः दक्षिणारूपो गवादिः । धातुः प्रजापतेर्यत् आधिपत्यं यच्च स्पृतं प्रीतिकरणं जनित्रं जननशीलमन्नं [योऽपि सप्तदशाख्यः स्तोमः] तत् सर्वं त्वम् असि । स्पृतः प्रीतिहेतुः वातः वायुः दिवः सकाशात् आगता वृष्टिः । चतुष्पात् गवाश्वादिः । गर्भाः द्विपदां चतुष्पदां चोदरगताः स्पृताः प्रीतिहेतवः । ओजः बलम् अष्टमधातुर्वा । यासु दिक्षु अवस्थिताः प्राणिनामनुकूलाः ताः दिशः समीच्यः । युतो मिश्रीभवतः शुक्लकृष्णपक्षावत्रेति यवा मासाः । अतथाविधत्वात् अयवाः अर्धमासाः । ऋभुशब्दो देवसामान्यवाची । गणविशेषा विश्वेदेवाः । भूतं निष्पन्नम् । स्पृतं प्रीतिकरं स्थानम्। हे इष्टके, त्वं तत् सर्वम् असि।

कात्यायनः – " ऋतव्ये सहश्च सहस्यश्चेति " (काश्रौ १७.१०.१६) इति । पाठस्तु– ' सहश्च सहस्यश्च हैमन्तिका ऋतू अग्नेरन्तःश्लेषोऽसि । कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे । हमन्तिका ऋतू अभि कल्पमाना इन्द्रमिव देवा अभि संविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ' इति । व्याख्यातसमानार्थः ॥१–५॥

[इति पञ्चदशेऽध्यायेऽष्टमोऽनुवाकः ॥८॥]

---

9. P1 after स्पृतं ins. पाप्मनो मृत्योरपनीतामिति भाष्यान्तरम्
10. S2 trans. ब्रह्म after स्पृतं (L 9)
12. S2 om. क्षतत्राणं बलं; S2 trans. बलं before क्षत्रं
13. S2 व्यक्ताव्यक्तं for वेदं व्यक्तं
19. S2 om. स्पृतं

[अवशेष-इष्टकोपधानमन्त्राः

आ– ‘ अग्नेर्भागोऽसि ’ इत्यादिभिर्मन्त्रैर्दशेष्टका उपदधाति– ‘ अग्नेर्भागोऽसि ’ इति । लिङ्गोक्तदेवत्यानि यजूंषि । अत्र श्रुतावितिहासः – प्रजापतिर्भागमेकेभ्यो देवेभ्यः आधिपत्यमेकेभ्यः कल्पयित्वा ब्रह्मप्रभृतिभूतानि पाप्मनः सकाशात् [अ]यापयत् । त्रिवृदादिभिः स्तोमैः इष्टकोच्यते । या त्वमिष्टका ^{v}अग्नेः ^{v}भागः ^{v}असि । यस्यां च त्वयि ^{v}दीक्षायाः ^{v}आधिपत्यम् । ‘ ब्रह्म स्पृतम् ’ । यया च त्वया ^{v}ब्रह्म ^{v}स्पृतम् अपनीतम् । ‘ त्रिवृत् स्तोमः ’ । अत्र व्यत्ययः । त्रिवृत्स्तोमेन मृत्योः सकाशात् स्पृतमपनीतम् । तां त्वामुपदधामीति शेषः । यद्वा– या त्वमग्नेर्भागोऽसि, यस्यास्तव त्रिवृत् स्तोमः, यस्यां त्वयि दीक्षाया आधिपत्यं, यया च त्वया ब्रह्म ब्राह्मणजातिः स्पृतं मृत्योर्मोचितं, तां त्वामुपदधामि । या त्वम् ^{v}इन्द्रस्य ^{v}भागः ^{v}असि, यस्यां च त्वयि ^{v}विष्णोः ^{v}आधिपत्यम्, यया च त्वया ^{v}क्षत्रं क्षत्रजातिः ^{v}स्पृतं पाप्मनो मृत्योः स्पृतमपनीतम् । ^{v}पञ्चदशः ^{v}स्तोमः, पञ्चदशेन स्तोमेन क्षत्रं स्पृतमिति संबन्धः । अयं मन्त्रः श्रुत्या त्वित्थं व्याख्यातः – “ अग्नेर्भागोऽसि । दीक्षाया आधिपत्यमिति वाग्वै दीक्षाऽग्नये भागं कृत्वा वाच आधिपत्यमकरोत् ब्रह्म स्पृतं त्रिवृत् स्तोम इति ब्रह्म प्रजानां त्रिवृता स्तोमेन पाप्मना मृत्योरस्पृणोत् । इन्द्रस्य भागोऽसि । विष्णोराधिपत्यमितीन्द्राय भागं कृत्वा विष्णव आधिपत्यमकरोत् क्षत्रं स्पृतं पञ्चदश स्तोम इति क्षत्रं प्रजानां पञ्चदशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ” (शब्रा ८·४·२·३-४) इति ॥१॥

“ नृचक्षसां भागोऽसि । धातुराधिपत्यमिति देवा वै नृचक्षसः ” । नॄन् चक्षत इति नृचक्षसः, अधिकारिणो मनुष्यान् साक्षात् पश्यन्तस्तेषां ^{v}नृचक्षसां ^{v}भागः भजनीयो भागः । देवादिभ्यो भागं कृत्वा ^{v}धातुः ^{v}आधिपत्यम् अकरोत् । “ जनित्रं स्पृतं सप्तदश स्तोम इति विड्वै जनित्रम् ” । प्राचुर्येण जायत इति । “ विशं । सप्तदशेन स्तोमेन . . . ^{v}जनित्रं ^{v}स्पृतम् । स्पृ अपनयने । अपनीतम् । जनित्रं जनानां सप्तदशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् । जनानामिति कर्मणि षष्ठी । जनान् अस्पृणोत् मृत्योरपनयति । ‘ मित्रस्य भागोऽसि वरुणस्याधिपत्यम् ’ इति । मित्राय देवाय भागं कृत्वा वरुणस्याधिपत्यमकरोत् । ‘ दिवो वृष्टिर्वात स्पृत एकविंश स्तोमः ’

---

3. B1 वापयेत्, H3 धापयेत्, H2 यापयेत् for अयापयत्
5. H2–3 om. त्वया
6. B1 तं, H3 तत् for तां
8. B1 H2–3 तं for तां
11. B1 om. त्वित्थं; H2–3 after असि ins. इति; B1 H2–3 om. दीक्षा
12. B1 भागं for आधिपत्यं; H3 वाचा for वाचः
19. B1 कार्यते for जायते; B1 °दशस्तोमः । स्तोमेन for °दशेन स्तोमेन

[इति] । [v]दिवः द्युलोकादागम्यमानाया वृष्टेस्तदनुकूलवातस्य एकविंशस्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥२॥

" वसूनां भागोऽसि । रुद्राणामाधिपत्यमिति वसुभ्यो भागं कृत्वा रुद्रेभ्य आधिपत्यमकरोच्चतुष्पात् स्पृतं चतुर्विंश स्तोम इति चतुष्पात् प्रजानां चतुर्विंशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् "। अपनीतवान् । " आदित्यानां भागोऽसि । मरुतामाधिपत्यमित्यादित्येभ्यो भागं कृत्वा मरुद्भ्य आधिपत्यमकरोद् गर्भा स्पृताः पञ्चविंश स्तोम इति गर्भान् प्रजानां पञ्चविंशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् " (शब्रा ८.४.२.७-८) ॥३॥

" अदितेर्भागोऽसि । पूष्ण आधिपत्यमितीयं वा अदितिरस्यै भागं कृत्वा पूष्ण आधिपत्यमकरोदोजः स्पृतं त्रिणव स्तोम इत्योजः प्रजानां त्रिणवेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् । देवस्य सवितुर्भागोऽसि । बृहस्पतेराधिपत्यमिति देवाय सवित्रे भागं कृत्वा बृहस्पतय आधिपत्यमकरोत् समीचीर्दिश स्पृताश्चतुष्टोम स्तोम इति सर्वा दिशः प्रजानां चतुष्टोमेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् " (शब्रा ८.४.२.९-१०) ॥४॥

" यवानां भागोऽसि । अयवनामाधिपत्यमिति पूर्वपक्षा वै यवा अपरपक्षा अयवास्ते हीदꣳ सर्वं युवते चायुवते च पूर्वपक्षेभ्यो भागं कृत्वाऽपरपक्षेभ्य आधिपत्यमकरोत् प्रजा स्पृताश्चतुश्चत्वारिꣳश स्तोम इति सर्वाः प्रजाश्चतुश्चत्वारिंशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् । ऋभूणां भागोऽसि । विश्वेषां देवानामाधिपत्यमित्यृभुभ्यो भागं कृत्वा विश्वेभ्यो देवेभ्य आधिपत्यम् अकरोद् भूतꣳ स्पृतं त्रयस्त्रिꣳश स्तोमः [इति] सर्वाणि भूतानि त्रयस्त्रिंशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् " (शब्रा ८.४.२.११-१२) । एवमेव यजमानोऽयं सर्वस्मात् पाप्मनो मृत्योरपगत इति ॥

अत्र विभक्त्यादिव्यत्ययेन मन्त्रपदानां मुख्यलक्षणादिवृत्त्या ब्राह्मणमेव स्वयं व्याचष्टे इति । ' सहश्च सहस्यश्च ' इति । ऋतुदेवत्यं यजुः । [v]सहः मार्गशीर्षो मासः । [v]सहस्यः पुष्यः ।

---

4. B1 चतुर्विंश° for चतुर्विंशेन
12. H2–3 om. सर्वा दिशः
15. B1 om. चतुश्चत्वा° ... प्रजाः
16. H2–3 om. ऋभूणां ... अस्पृणोत् (L 18)
19. B1 °गमत् for °गतः
20. H2–3 ब्राह्मणे for ब्राह्मणम्; B1 om. इति
21. B1 °शिरो for °शीर्षो

एतौ मासौ हैमन्तिका हैमन्तिकौ ऋतू । स्वार्थे तद्धितः । द्विवचनमविवक्षितम् । अयं मन्त्रो व्याख्यातसमनार्थः ॥५॥

[इति पञ्चदशेऽध्यायेऽष्टमोऽनुवाकः ॥८॥]

[अथ नवमोऽनुवाकः ।]

अष्टमेऽनुवाके अवशिष्टानामक्षणयास्तोमीयानामिष्टकानामुपधानमन्त्रा उक्ताः । नवमे तु सृष्टिशब्दाभिधेयेष्टकोपधानमन्त्रा उच्यन्ते—

एकयाऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्
तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत् ।
पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत्
सप्तभिरस्तुवत सप्त ऋषयोऽसृज्यन्त धाताऽधिपतिरासीत् ॥१॥
नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीदे-
कादशभिरस्तुवत ऋतवोऽसृज्यन्तार्तवा अधिपतय आसन् ।
त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरोऽधिपतिरासीत्
पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत् ॥२॥
सप्तदशभिरस्तुवत ग्राम्याः पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासी-
न्नवदशभिरस्तुवत शूद्रार्या असृज्येतामहोरात्रे अधिपत्नी आस्ताम् ।
एकविंशत्याऽस्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्
त्रयोविंशत्याऽस्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाऽधिपतिरासीत् ॥३॥

---

2. H2-3 व्याख्यातः for व्याख्यात°

5. P1 °शिष्यनामक्षुपा°, S2 °शिष्टानमक्षुपा° for °शिष्टानामक्षणया°

पञ्चविंशत्याऽस्तुवतारण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत्
सप्तविंशत्याऽस्तुवत द्यावापृथिवी व्यैतां
वसवो रुद्रा आदित्या अनुव्यायंस्त एवाधिपतय आसन् ।
नवविंशत्याऽस्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीदे-
कत्रिंशताऽस्तुवत प्रजा असृज्यन्त यवाश्चायवाश्चाधिपतय आसन् ।
त्रयस्त्रिंशताऽस्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीत् ।
लोकं पृण ता अस्येन्द्रं विश्वाः ॥४॥(९)॥

एकया । अस्तुवत । प्रजा इति प्रऽजाः । अधीयन्त ।
प्रजापतिरिति प्रजाऽपतिः । अधिपतिरित्यधिऽपतिः । आसीत् ।
तिसृभिरिति तिसृऽभिः । अस्तुवत । ब्रह्म । असृज्यत ।
ब्रह्मणः । पतिः । अधिपतिरित्यधिऽपतिः । आसीत् ।
पञ्चभिरिति पञ्चऽभिः । अस्तुवत । भूतानि । असृज्यन्त ।
भूतानाम् । पतिः । अधिपतिरित्यधिऽपतिः । आसीत् ।
सप्तभिरिति सप्तऽभिः । अस्तुवत । सप्तऋषय इति सप्तऽऋषयः । असृज्यन्त ।
धाता । अधिपतिरित्यधिऽपतिः । आसीत् ॥ बं ॥१॥
नवभिरिति नवऽभिः । अस्तुवत । पितरः । असृज्यन्त ।
अदितिः । अधिपत्नीत्यधिऽपत्नी । आसीत् ।
एकादशभिरित्येकादशऽभिः । अस्तुवत । ऋतवः । असृज्यन्त ।
आर्तवाः । अधिपतय इत्यधिऽपतयः । आसन् ।
त्रयोदशभिरिति त्रयोदशऽभिः । अस्तुवत । मासाः । असृज्यन्त ।
संवत्सरः । अधिपतिरित्यधिऽपतिः । आसीत् ।
पञ्चदशभिरिति पञ्चदशऽभिः । अस्तुवत । क्षत्रम् । असृज्यत ।
इन्द्रः । अधिपतिरित्यधिऽपतिः । आसीत् ॥ ढर्यो ॥२॥
सप्तदशभिरिति सप्तदशऽभिः । अस्तुवत । ग्राम्याः । पशवः । असृज्यन्त ।
बृहस्पतिः । अधिपतिरित्यधिऽपतिः । आसीत् ।

नवदशभिरिति नवदशऽभिः । अस्तुवत । शूद्रार्यौ । असृज्येताम् ।
अहोरात्रे इत्यहोरात्रे । अधिँपत्नी इत्यधिँऽपत्नी । आस्ताम् ।
एकविंशत्येत्येकँऽविंशत्या । अस्तुवत । एकशफा इत्येकँऽशफाः । पशवः । असृज्यन्त ।
वरुणः । अधिँपतिरित्यधिँऽपतिः । आसीत् ।
त्रयोविंशत्येति त्रयःऽविंशत्या । अस्तुवत । क्षुद्राः । पशवः । असृज्यन्त ।
पूषा । अधिँपतिरित्यधिँऽपतिः । आसीत् ॥ र्भा ॥३॥
पञ्चविंशत्येति पञ्चऽविंशत्या । अस्तुवत । आरण्याः । पशवः । असृज्यन्त ।
वायुः । अधिँपतिरित्यधिँऽपतिः । आसीत् ।
सप्तविंशत्येति सप्तऽविंशत्या । अस्तुवत ।
द्यावापृथिवी इति द्यावापृथिवी । वि । ऐताम् ।
वसवः । रुद्राः । आदित्याः । अनुव्यायन्नित्यनुऽव्यायन् ।
ते । एव । अधिँपतय इत्यधिँऽपतयः । आसन् ।
नवविंशत्येति नवऽविंशत्या । अस्तुवत । वनस्पतयः । असृज्यन्त ।
सोमः । अधिँपतिरित्यधिँऽपतिः । आसीत् ।
एकत्रिंशतेत्येकँऽत्रिंशता । अस्तुवत । प्रजा इति प्रऽजाः । असृज्यन्त ।
यवाः । च । अयवाः । च । अधिँपतय इत्यधिँऽपतयः । आसन् ।
त्रयस्त्रिंशतेति त्रयःऽत्रिंशता । अस्तुवत । भूतानि । अशाम्यन् ।
प्रजापतिरिति प्रजाऽपतिः । परमेष्ठी । परमेस्थीति परमेऽस्थी ।
अधिँपतिरित्यधिँऽपतिः । आसीत् । त्रें ॥४॥(९)॥

ध्रुवक्षितिः पञ्च ॥५॥ सजूरृतुभिस्तिस्रः ॥३॥ मूर्धा वयः पञ्च ॥५॥ इन्द्राग्नी तिस्रः ॥३॥ आयुर्मे षट् ॥६॥ मूर्धाऽसि द्वे ॥२॥ आशुर्द्वे ॥२॥ अग्नेर्भागः पञ्च ॥५॥ एकया चतस्रः ॥४॥ नवानुवाकेषु पञ्चत्रिंशत् ॥३५॥

[इति शुक्लयजुर्वेदकाण्वसंहितायां पञ्चदशोऽध्यायः ॥१५॥]

सा– कात्यायनः – "सप्तदश सृष्टीरेकयाऽस्तुवतेति प्रतिमन्त्रम्" (काश्रौ १७.१०.१७) इति । सृजिधातुयुक्तैर्मन्त्रैरुपधेया इष्टकाः सृष्टयः । ता 'एकयाऽस्तुवत' इत्यादिभिः सप्तदशभिर्मन्त्रैः क्रमेणोपदध्यादिति शेषः । तेषां पाठस्तु– 'एकयाऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्

तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत् । पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत् सप्तभिरस्तुवत सप्त ऋषयोऽसृज्यन्त धाताऽधिपतिरासीत् ॥ नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीदेकादशभिरस्तुवत ऋतवोऽसृज्यन्तार्तवा अधिपतय आसन् । त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरोऽधिपतिरासीत् पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत् ॥ सप्तदशभिरस्तुवत ग्राम्याः पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीन्नवदशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्ताम् ॥ एकविंशत्याऽस्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत् त्रयोविंशत्याऽस्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाऽधिपतिरासीत् ॥ पञ्चविंशत्याऽस्तुवतारण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत् सप्तविंशत्याऽस्तुवत द्यावापृथिवी व्यैतां वसवो रुद्रा आदित्या अनुव्यायंस्त एवाधिपतय आसन् । नवविंशत्याऽस्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीदेकत्रिंशताऽस्तुवत प्रजा असृज्यन्त यवाश्चायवाश्चाधिपतय आसन् । त्रयस्त्रिंशताऽस्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीत् ' इति । अत्र निदानम्– पुरा प्रजापतिरिन्द्रियाधिष्ठातॄन् देवान् मां स्तुवध्वमित्यब्रवीत् । ते च देवाः केन स्तोष्यामह इत्यवोचन् । एवमुक्तः प्रजापतिर्मया च युष्माभिश्च स्तुतिः करिष्यत इत्यादिकं सर्वम् " एतद्वै प्रजापतिः " (शब्रा ८.४.३.१) इत्यादिके शतपथब्राह्मणेऽनुसंधेयम्। ˇएकया वाचा तं देवाः प्रथमम् ˇअस्तुवत स्तुतिमकुर्वन् । ततः प्रजापतिना ˇप्रजाः ˇअधीयन्त उदपाद्यन्त । तदानीं तासां सृष्टानां प्रजानां ˇप्रजापतिः एव ˇअधिपतिः ˇआसीत् स्वाम्यभूत् । तथा ˇतिसृभिः त्रिभिः प्राण उदानो व्यान इत्येतैः ˇअस्तुवत । तेन तत्सामर्थ्यात् ˇब्रह्म ब्राह्मणजातिः ˇअसृज्यत सृष्टाभूत् । ˇब्रह्मणस्पतिः इति यो देवः सोऽयं ब्राह्मणजातेः ˇअधिपतिः ˇआसीत् । ततः ˇपञ्चभिः प्राणादिभिः ˇअस्तुवत । तदानीं पञ्च ˇभूतानि सृष्टान्यभूवन् । ˇभूतानां ˇपतिः इति कश्चिद्देवविशेषः । अत्र स एव ˇअधिपतिः ˇआसीत् । श्रोत्रे चक्षुषी नासिके वागिति ये सप्त शीर्षण्यास्तैः ˇसप्तभिः ˇअस्तुवत । ततः ˇसप्त ˇऋषयः सृष्टा अभूवन् । ˇधाता जगत्स्रष्टा यो देवः स एव ˇअधिपतिः ˇआसीत् । ˇनवभिः ˇअस्तुवत । सप्तशीर्षण्याः द्वाववाञ्चाविति ये नव प्राणास्तैः स्तुतिमकुर्वन् । ततः ˇपितरः अग्निष्वात्तादयः सृष्टाः । ˇअदितिः एवंविधस्य प्रजापतेरनवखण्डिता या शक्तिः सैव तेषां सृष्टानां पितॄणाम् ˇअधिपत्नी स्वामित्वेनाधिकं पालयित्री ˇआसीत् । दश प्राणा आत्मैकादश इति एकादशसंख्याकाः । तैः कृत्वा इन्द्रियाधिष्ठातारो देवाः प्रजापतेः स्तु तिम् अकुर्वन् । ततः ˇऋतवः वसन्ताद्याः सृष्टाः । तेषाम् ˇआर्तवाः ऋतुपालकाः केचिद्देवविशेषाः । त एव स्वामिनोऽभूवन् । दश प्राणाः द्वौ प्रतिष्ठाख्यौ पादौ एक आत्मेति ये त्रयोदशसंख्याकास्तैः ˇअस्तुवत । ततः ˇमासाः चैत्रादयः सृष्टाः । मासाभिमानी यः ˇसंवत्सरः तेषां स एव ˇअधिपतिः ˇआसीत् । दश हस्त्या अङ्गुलयश्चत्वारो दोर्बाहवः नाभेरूर्ध्वं यच्छरीरम् एतैः ˇपञ्चदशभिः ˇअस्तुवत । ततः ˇक्षत्रं क्षत्रियजातिः सृष्टा । ˇइन्द्रः तदभिमानी देवः स्वाम्यभूत् । दश पादाङ्गुलयः ऊरुद्वयमष्ठीवद्द्वयं पादद्वयं च नाभेरर्वाग् यच्छरीरम् एतैः ˇसप्तदशभिः ˇअस्तुवत । तदा ˇग्राम्याः ˇपशवः सृष्टाः । तेषां ˇबृहस्पतिः तदभिमानी [देवः] स्वाम्यभूत् । दश हस्त्याङ्गुलयो नव प्राणास्तैः ˇनवदशभिः [ˇअस्तुवत । तदा] ˇशूद्रार्यौ वैश्यशूद्रौ सृष्टौ । तयोः ˇअहोरात्रे स्वामित्वेनाभूताम् । हस्तगता दशाङ्गुलयः दश पादगता आत्मैकविंश इति या एकविंशतिः संख्या तया ˇअस्तुवत । ततः ˇएकशफाः अश्वादयः ˇपशवः सृष्टाः । तेषां ˇवरुणः ˇअधिपतिः ˇआसीत् । दश हस्त्या अङ्गुलयो दश पाद्या द्वे प्रतिष्ठे आत्मा त्रयोविंश इति या त्रयोविंशतिः संख्या तया ˇअस्तुवत । ततः

14. P1 after वाचा adds केवलरसनया; P1 after अस्तुवत ins. वचनव्यत्ययः

25. P1 before दश adds सनाभिका

31. P1 after ˚शूद्रौ ins. अर्यः स्वामिवैश्ययोरिति पाणिनिः

[सृष्टीष्टकोपधानमन्त्राः

क्षुद्राः स्वजादयः पशवः सृष्टाः । तेषां पूषा स्वाम्यासीत् । दश हस्त्या अङ्गुलयो दश पाद्याश्चत्वारः करचरणा आत्मा पञ्चविंश इति या पञ्चविंशतिः संख्या तया स्तुतिमकुर्वन् । तदा हि आरण्याः कृष्णमृगादयः सृष्टाः । तेषां वायुः एव अधिपतिः आसीत् । दश हस्त्या अङ्गुलयो दश पाद्याः सप्त शीर्षण्याः प्राणा इति या सप्तविंशतिस्तया अस्तुवत । तत्र द्यावापृथिव्यौ व्यैतां विशेषेणागच्छताम् । वसवः रुद्राः आदित्याः इति ये देवाः अनुव्यायन् अन्वागच्छन् ते एव स्वामिनोऽभूवन् । दश हस्त्या अङ्गुलयो दश पाद्या नव प्राणा इति या नवविंशतिस्तया अस्तुवत । ततः वनस्पतयः [सृष्टाः] । तत्र सोमः अधिपतिः आसीत् । दश हस्त्या अङ्गुलयो दश पाद्या दश प्राणा आत्मैक इत्येकत्रिंशत् । तया अस्तुवत । ततः प्रजाः सृष्टाः । तासां प्रजानां यवाः पूर्वपक्षाः अयवाः अपरपक्षाश्च अधिपतयः आसन् । दश हस्त्या अङ्गुलयो दश पाद्या दश प्राणा द्वे प्रतिष्ठे आत्मा त्रयस्त्रिंश इत्येतेन अस्तुवत । ततः सर्वाणि भूतानि अशाम्यन् सर्वे प्राणिनः शान्ता अभूवन् । परमे सत्यलोके तिष्ठतीति परमेष्ठी । प्रजापतिः सर्वेषां भूतानां स एव अधिपतिः आसीत् । अत्र या येष्टका येन येन मन्त्रेणोपाधेया तत्तदिष्टका तत्तन्मन्त्रप्रतिपादकदेवतारूपत्वेन ध्यातव्येत्यर्थः ॥

कात्यायनः – " लोकंपृणाः पूर्ववत् " (काश्रौ १७·१७·१९) इति । लोकंपृणसंज्ञका इष्टकाः पूर्ववदुपदध्यात् । तत्र मन्त्रप्रतीकपाठस्तु– ' लोकं पृण ता अस्येन्द्रं विश्वाः ' इति । पूर्ववद् व्याख्येयम् ॥१–४॥

[इति पञ्चदशेऽध्याये नवमोऽनुवाकः ॥९॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये काण्वसंहिताभाष्ये वेदार्थप्रकाशे पञ्चविंशोऽध्यायः ॥१५॥

आ– सृष्टीरुपदधाति। सप्तदशेष्टकाः सप्तदशभिर्मन्त्रैः ' एकयाऽस्तुवत ' इत्यादिभिः । तत्र निदानभूता स्तुतिः – " एतद्वै प्रजापतिः " (शब्रा ८·४·३·१) इत्युपक्रमते । " ते वै केन स्तोष्यामह इति मया चैव युष्माभिश्चेति तथेति ते प्राणैश्चैव प्रजापतिना चास्तुवत यदु ह किं च देवाः कुर्वते स्तोमेनैव तत् कुर्वते यज्ञो वै स्तोमो यज्ञेनैव तत् कुर्वते तस्मादु सर्वास्वेवास्तुवत " (शब्रा ८·४·३·२) । ' अस्तुवत ' इत्यनुवर्तते । ' एकयाऽस्तुवत ' इति । लिङ्गोक्तदेवत्यानि तानि यजूंषि । एकया वाचा प्रजापतिः अस्तुवत देवतास्तुतिमकरोत् । " वाग्वा एका " (शब्रा ८·४·३·३) इत्यादिश्रुतेः । प्रजाः अभीयन्त इति । प्रजापतेर्या गर्भीभूताः प्रजाः

---

6. S2 om. नवविंशतिः
7. S2 आत्मैकत्रिंशत् for आत्मैक इत्येकत्रिंशत्
8. S2 तया ता इति यत्तेनैवास्तुवत for तया अस्तुवत
9. P1 om. दश प्राणाः
23. B1 H2–3 प्रजापतीनां for प्रजापतिना

आसन् प्रजापत्यर्थं स्वयमधीयन्त (प्रजापत्यर्थमस्थाप्यन्त ?)। तासां [v]प्रजापतिः [v]अधिपतिः [v]आसीत्। [v]तिसृभिः [v]अस्तुवत। ब्रह्मा [सृज्यत]। "त्रयो वै प्राणाः। प्राण उदानो व्यानः" (शब्रा. ८.४.३.४) इति । तैस्तैरेवैतमस्तुवत । [v]ब्रह्म यान् प्राणादीन् [v]असृज्यत सृष्टवान् । [v]ब्रह्मणस्पतिः प्राणादिजात्यधिपतिः । अत्र यज्ञे [v]अधिपतिः [v]आसीत् । [v]पञ्चभिः [v]अस्तुवत। प्राणापानव्यानोदानसमाना इत्येतैः पञ्चभिः एतं देवमस्तुवत। स्तुतिफलमाह-- [v]भूतानि [v]असृज्यन्त । भूतानि ब्रह्मणा सृष्टानि । अतः स्वसृष्टानां पञ्चानां महाभूतानां [v]पतिः स्वयम् अत्र यज्ञे [v]अधिपतिः [v]आसीत्। [v]सप्तभिः [v]अस्तुवत इति। "य एवेमे सप्त शीर्षन् प्राणाः" (शब्रा ८.४.३.६)। सप्त शीर्षण्याः प्राणाः श्रोत्रे चक्षुषी नासिके एका वागिति। तैरेवैतदस्तुवत। ततस्तद्बलेन ब्रह्मणा [v]सप्तर्षयः [v]असृज्यन्त सृष्टाः । ततः [v]धाता अत्र [v]अधिपतिः [v]आसीत् ॥१॥

"नवभिरस्तुवतेति। नव वै प्राणाः सप्त शीर्षण्याः द्वाववाञ्चौ गुह्यापानौ (?)" (द्र. शब्रा ८.४.३.७) । तैस्तैरेव तदस्तुवत प्रजापतिः, पितरः नवभिः अस्तुवत इति। 'पितरः असृज्यन्त' इति। एतद्वीर्यवता ब्रह्मणा [v]पितरः [v]असृज्यन्त अग्निष्वात्तादयः पितरः सृष्टाः। 'अदितिरधिपत्न्यासीत्'। एवंविधस्य प्रजापतेः [v]अदितिः अनवखण्डितशक्तिः पत्नी पाणिगृहीती पत्युरधीना वशवर्तिनी [v]अधिपत्नी [v]आसीत्। एवंगुणानामिष्टकानां प्रजापतिरधिपतिरासीदित्यर्थः । "एकादशभिरस्तुवतेति। दश प्राणा आत्मैकादशः" (द्र. शब्रा ८.४.३.८)। एकादशं मनः। तेनैव तत् [v]अस्तुवत प्रजापतिस्तुतिमकरोत्। 'ऋतवोऽसृज्यन्त'। एतद्वीर्यवता प्रजापतिना [v]ऋतवः सृष्टाः। 'आर्तवा अधिपतय आसन्'। ऋतुदेवत्या इष्टकाः अत्र यज्ञे [v]अधिपतयः [v]आसन् । "त्रयोदशभिरस्तुवतेति। दश प्राणा द्वे प्रतिष्ठे पादौ आत्माऽत्र त्रयोदशः" (द्र. शब्रा ८.४.३.९)। आत्मा अहंकारः। तैस्तैरेव [v]अस्तुवत।

1. B1 °पत्यर्थस्य यमप्यधीयन्त, H2-3 °पत्यं स्वयमसि धीयते for °पत्यर्थं स्वयमधीयन्त
3. B1 एतत् for एतम्; B1 व्यापान् for यान्
4. H2-3 °जगत्यधि° for °जात्यधि°; B1 यत्र for यज्ञे
5. H2-3 एतद् for एतं; B1 H2-3 देवतम् for देवम्
6. B1 om. स्व°
7. H2-3 त्वम् for स्वयम्
9. B1 एनद् for एतद्; B1 तत्तद्° for तद्°
12. B1 एतद् for एव तद्
17. B1 एषः for एव
19. H2-3 om. अत्र

एतद्वीर्यवता प्रजापतिना vमासाः vअसृज्यन्त मासाः सृष्टाः । ‘ संवत्सरोऽधिपतिरासीत् ’ । vसंवत्सरः अत्र vअधिपतिः । अत्रेष्टकासु संवत्सरश्चं कालात्मकेश्वरः अधिपतिः vआसीत् । “ पञ्चदशभिरस्तुवतेति । दश हस्त्याऽङ्गुलयश्चत्वारि दोर्बाहवः यदूर्ध्वं नाभेस्तत् पञ्चदशम् ” (द्र. शब्रा ८.४.३.१०) तैरेतैः vपञ्चदशभिः प्रजापतिः vअस्तुवत । एतद्वीर्यवता प्रजापतिना vक्षत्रम् vअसृज्यत । क्षत्रं सृष्टम् । ‘ इन्द्रोऽधिपतिरासीत् ’ । vइन्द्रः vअधिपतिः इष्टकासु यज्ञे च परमैश्वर्ययुक्तः इन्द्रः अधिपतिः vआसीत् ॥२॥

‘ सप्तदशभिरस्तुवत ’ । दश पाद्याः अङ्गुलय ऊरुद्वयमष्ठीवद्द्वयं च द्वे प्रतिष्ठे पादौ यदधो नाभेस्तत् सप्तदशम् । तेनैवैतत् सप्तदशेनात्मना प्रजापतिरेतद् vअस्तुवत । ‘ ग्राम्याः पशवोऽसृज्यन्त ’ इति । तेन vग्राम्याः vपशवः सृष्टाः । vबृहस्पतिः vअधिपतिः अत्राधिपतिः vआसीत् । “ नवदशभिरस्तुवतेति । दश हस्त्या अङ्गुलयो नव प्राणाः ” (द्र. शब्रा ८.४.३.१२) । तैः vअस्तुवत । vशूद्रार्यौ vअसृज्येताम् । विट्शूद्रौ सृष्टौ । vअहोरात्रे vअधिपत्नी vआस्ताम् इष्टकाधिपती भवताम् । “ एकविंशत्याऽस्तुवतेति दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविंशः ” (द्र. शब्रा ८.४.३.१३) । एवम् vएकविंशत्या स्तुतिमकरोत् । एवं स्तुतिं कुर्वता vएकशफाः अश्वादयः vअसृज्यन्त सृष्टाः । अत्र vवरुणः vअधिपतिः vआसीत् । “ त्रयोविंशत्या अस्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या द्वे प्रतिष्ठे आत्मा त्रयोविंशस्तेनैव तदस्तुवत ” (शब्रा ८.४.३.१४) । तेन प्रजापतिना vक्षुद्राः अजादयः vपशवः सृष्टाः । vपूषा vअधिपतिः vआसीत् ॥३॥

“ पञ्चविंशत्याऽस्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्याश्चत्वार्यङ्गान्यात्मा पञ्चविंशस्तेनैव तदस्तुवतारण्याः पशवोऽसृज्यन्त ” (शब्रा ८.४.३.१५) । तेन vआरण्याः कृष्णमृगादयः सृष्टाः । अत्र vवायुः vअधिपतिः vआसीत् । vसप्तविंशत्या vअस्तुवत । दश हस्त्या अङ्गुलयो दश पाद्याः सप्त वै शीर्षण्याः । तैरेवैतदस्तुवत । vद्यावापृथिवी अत्र vव्यैताम् । इण् गतौ । विशेषेणावगच्छेताम् आगच्छतश्च । vवसवः vरुद्राः vआदित्याः vअनुव्यायन् । अय पय वय गतौ । अनुव्यायन् अन्वागच्छन्तु । vते vएव अत्र vअधिपतयः

2. B1 om. च

7. H2-3 हस्ताः (स्त्याः ?) for पाद्याः; B1 after अङ्गुलयः adds चत्वार्यूवष्ठीयानि, H2-3 चत्वार्युर्वारिमपात्

10. B1 हस्त° for हस्त्याः

15. H2-3 om. दश पाद्या ... अङ्गुलयो (L 18)

21. B1 तेन, H2-3 तैरतैः for तैः

23. B1 अनुगच्छन्तु for अन्वागच्छन्तु ।

सृष्टीष्टकोपधानमन्त्राः]

[v]आसन् । " नवविंशत्याऽस्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्याः नव प्राणाः तैरेव तदस्तुवत वनस्पतयोऽसृज्यन्तेति " (शब्रा ८·४·३·१७) । [v]वनस्पतयः । सृष्टाः । अत्र [v]सोमः [v]अधिपतिः [v]आसीत् । " एकत्रिंशता अस्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्याः दश प्राणा आत्मैकत्रिंशः " (शब्रा ८·४·३·१८) । तैरेवैतत् [v]अस्तुवत । [v]प्रजाः [v]असृज्यन्त प्रजाः सृष्टाः । ' यवाश्चायवाश्चाधिपतय आसन् ' । अत्र [v]यवाः पूर्वपक्षाः । [v]अयवाः अपरपक्षाः चात्र [v]अधिपतयः [v]आसन् । " त्रयस्त्रिंशताऽस्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या दश प्राणा द्वे प्रतिष्ठे आत्मा त्रयस्त्रिंशः " (द्र. शब्रा ८·४·३·१९) । इत्येवं स्तोमेन तत् [v]अस्तुवत । ' भूतान्यशाम्यन् ' इति । सर्वाणि [v]भूतानि अत्र [v]अशाम्यन् । अत्र [v]परमेष्ठी [v]अधिपतिः [v]आसीत् ॥

' लोकंपृण ' इति व्याख्यातसमानार्थः । एवं प्रथमद्वितीयतृतीयचतुर्थचितिविषयेष्टकमन्त्रा व्याख्याताः ॥४॥

[इति पञ्चदशेऽध्याये नवमोऽनुवाकः॥९॥]

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपुरीपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे पञ्चदशोऽध्यायः ॥१५॥

———

1. H2–3 पद्याः for पाद्याः

4. H2–3 पद्याः for पाद्याः; B1 तेन for तैः

8. B1 om. इति । सर्वाणि ... अशाम्यन्

10. H2–3 व्याख्यातः for व्याख्यात°

13. H2–3 om. श्रीमत् ... विरचिते (L 15)

ॐ

षोडशोऽध्यायः

[अथ प्रथमोऽनुवाकः ।]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

पञ्चदशेऽध्याये द्वितीयतृतीयचतुर्थचितिविषयेष्टका मन्त्रा उक्ताः । षोडशे तु पञ्चमचितिविषयेष्टका मन्त्रा उच्यन्ते ॥

अग्ने जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमना अहेळँस्तवं स्याम शर्मँस्त्रिवरूथ उद्भौ ॥१॥

अग्ने । जातान् । प्र । नुद । नः । सपत्नानिति सऽपत्नान् ।
प्रति । अजातान् । जातवेद इति जातऽवेदः । नुदस्व ।
अधि । नः । ब्रूहि । सुमना इति सुऽमनाः । अहेळन् ।
तव । स्याम । शर्मन् । त्रिवरूथ इति त्रिऽवरूथे । उद्भा इत्युत्ऽभौ ॥ भः ॥१॥

सा– कात्यायनः – तत्र प्रथमेऽनुवाके असपत्नाख्येष्टकादीनामुपधानमन्त्रा उच्यन्ते । " पञ्चम्याम् [अन्तेष्वश्विनीवद्] असपत्नाः ... अग्ने जातानिति प्रतिमन्त्रम् " (काश्रौ १७.११.१–३) इति । पञ्चम्यां चितौ प्रथमम् असपत्नाख्या इष्टकाः ' अग्ने जातान् ' इति पञ्चभिर्मन्त्रैः क्रमेणोपदध्यात् । तत्र प्रथममन्त्रपाठस्तु– ' अग्ने जातान् प्र णुदा नः सपत्नान् प्रत्यजातान् जातवेदो नुदस्व । अधि नो ब्रूहि सुमना अहेळँ स्तव स्याम शर्मँस्त्रिवरूथ उद्भौ ' इति । हे ˅अग्ने, ˅नः अस्माकं ˅जातान् ˅सपत्नान् ये पूर्वमुत्पन्नाः शत्रवस्तान् ˅प्रणुद प्रकर्षेण नाशय । किंच– हे ˅जातवेदः जातप्रज्ञाग्ने, ये पूर्वमनुत्पन्ना इतः परमुत्पत्तिप्रसक्तियुक्तास्तान् ˅अजातान् शत्रून् ˅प्रतिनुदस्व । उत्पतिप्रतिबन्धेन निराकुरु । ˅सुमनाः सानुग्रहचित्तस्त्वम् ˅अहेळन् उद्बुध्यन् ˅नः अस्माकम् ˅अधिब्रूहि अत्र यज्ञे इतिकर्तव्यतामुपदिश । ˅उद्भौ पशुधनधान्यादिभिरुद्भियते संयुज्यत इत्युद्भिः, तस्मिन् । ˅शर्मन् शर्मणि सुखाश्रयभूते ˅त्रिवरूथे प्राग्वंशसदोहविर्धानरूपे यज्ञगृहे ˅तव प्रसादात् वयं ˅स्याम सुखिनो भवेम ॥१॥

---

14. S2 om. तत्र ... उच्यन्ते ।
15. P1 असपत्न्याः for असपत्नाः
16. P1 असपत्न्याख्याः for असपत्नाख्याः
21. P1 after उद्बुध्यन् ins. अक्रुध्यन्निति भाष्यान्तरम्
22. P1 after उद्भौ adds भा दीप्तौ; S2 om. पशुधन ... संयुज्यते

पञ्चमचितिविषयेष्टकामन्त्राः ।

आ– पञ्चमीं चितिं परमेष्ठ्यपश्यत् । अतः पञ्चमीचितिविषयमन्त्राणां परमेष्ठिनः आर्षम् । तत्रादौ पञ्चासपत्ना उपधीयन्ते– ' अग्ने जातान् ' इति । तत्रादौ द्वे त्रिष्टुभौ द्वे चाग्नेय्यौ । हे श्रीभगवन् vअग्ने, vनः अस्माकं vजातान् उत्पन्नान् स्थितान् vसपत्नान् समानपति(?)वासिनः शत्रून् vप्रणुद । नुद प्रेरणे । यथा पुनर्नागच्छन्ति तथा विनाशयेत्यर्थः । हे vजातवेदः सर्वभूताभिज्ञ, vप्रत्यजातान् प्रत्यनुत्पन्नान् जनिष्यमाणान् vनुदस्व प्रणुद । किंच– ' अधि नो ब्रूहि सुमना अहेळन् ' । हे श्रीभगवन्नग्ने, vअहेळन् अक्रुध्यन् । हेळतिः क्रोधनार्थः । vसुमनाः शोभनमनस्कः स्नेहानुबद्धमनाः भूत्वा vनः अस्माकम् vअधिब्रूहि । अत्र यज्ञे इतिकर्तव्यता-मुपदिश (? शे) ति । ' तव स्याम शर्मंस्त्रिवरूथ उद्भौ ' । भा दीप्तौ । पशुधनधान्यादिः उद्भ (द्भू ?) यत (? उद्भेदयति) इत्युद्भिः, तस्मिन् vउद्भौ । vत्रिवरूथे । वरूथमिति गृहनाम । त्रिविधगृहे । vतव vशर्मन् शर्मणि शरणे आश्रये वयं vस्याम भवेम । यद्वा– त्रिवरूथे यज्ञगृहास्त्रिविधाः सदोहविर्धानाग्नीध्रा इति । एवं त्रिविधे यज्ञगृहे वयं स्यामेति संबन्धः ॥१॥

सहसा जातान् प्र णुदा नः सपत्नान् प्रत्यजातान्नुद जातवेदः ।
अधि नो ब्रूहि सुमनस्यमानो वयꣳ स्याम प्र णुदा नः सपत्नान् ।
षोळशी स्तोम ओजो द्रविणं चतुश्चत्वारिꣳश स्तोमो वर्चो द्रविणम् ॥२॥

सहसा । जातान् । प्र । नुद । नः । सपत्नानिति सऽपत्नान् ।
प्रति । अजातान् । नुद । जातवेद इति जातऽवेदः ।
अधि । नः । ब्रूहि । सुमनस्यमान इति सुऽमनस्यमानः ।
वयम् । स्याम । प्र । नुद । नः । सपत्नानिति सऽपत्नान् ।
षोळशी । स्तोमः । ओजः । द्रविणम् ।
चतुश्चत्वारिꣳश इति चतुःऽचत्वारिꣳशः । स्तोमः । वर्चः । द्रविणम् ॥ त्योः ॥२॥

सा– अथ द्वितीयः – ' सहसा जातान् प्र णुदा नः सपत्नान् प्रत्यजातान्नुद जातवेदः । अधि नो ब्रूहि सुमनस्यमानो वयꣳ स्याम प्र णुदा नः सपत्नान् ' इति । vसहसा बलेन vजातान् स्वशक्त्या उत्पन्नान् vनः शत्रून् vप्रणुद । हे vजातवेदः, vअजातान् च vप्रतिनुद । किंच– vसुमनस्यमानः अस्मासु

3. B1 तान् for स्थितान्
7. H3 °बन्ध° for °बद्ध°; B1 before भूत्वा adds श्रुत्वा
9. H3 उद्धीयते, B1 उद्भयते for उद्भूयते (उद्भेदयति ?) for उद्भ ... यति
11. B1 त्रिविध° for त्रिविधे

सौमनस्यं प्राप्तः सन् ^{v}नः अस्मान् ^{v}अधिब्रूहि शत्रुभ्योऽधिकान् वद । ^{v}वयम् अपि त्वदनुग्रहादधिकाः ^{v}स्याम । ^{v}नः अस्मदीयान् ^{v}सपत्नान् शत्रून् ^{v}प्रणुद भूयोभूयः प्रणुदेत्यर्थः ॥

अथ तृतीयः – ' षोळशी स्तोम ओजो द्रविणम् ' इति । षोडशिभिरावृत्तिभिरुपेतः ^{v}षोळशी । यस्तादृशः ^{v}स्तोमः यच्च ^{v}ओजः ^{v}द्रविणं बलरूपं धनं हे इष्टके, तदुभयरूपा त्वमसि ॥

अथ चतुर्थः – ' चतुश्चत्वारिंशः स्तोमो वर्चो द्रविणम् ' इति । योऽयं ^{v}स्तोमः चतुश्चत्वारिंशदावृत्त्या संपन्नः, यच्च बलरूपं धनं, हे इष्टके, तदुभयरूपा त्वमसि ॥२॥

आ– ' सहसा जातान् ' इति । हे ^{v}जातवेदः, ^{v}सहसा ^{v}जातान् वेगेनोद्भूतशक्तीन् ^{v}नः ^{v}सपत्नान् शत्रून् । यद्वा– सहसा जातान् प्रत्युपस्थितान् बलेन वा सह प्रत्युपस्थितान् नः सपत्नान् ^{v}प्रणुद । ' प्रत्यजातान्नुद जातवेदः ' । ^{v}अजातान् अनुत्पन्नसमान् प्रतिनुदस्व । ^{v}नः ^{v}अधिब्रूहि ^{v}सुमनस्यमानः शोभनास्यचित्तिः सन् ^{v}नः ^{v}सपत्नान् ^{v}प्रणुद । एवं चेत् ^{v}वयं निःसपत्नाः ^{v}स्याम भवेम । भूयोभूयः नः सपत्नान् प्रणुद । " दक्षिणतः । षोळशी स्तोमः " (शब्रा ८.५.१.१०) इति । लिङ्गोक्तदेवत्ये त्रिष्टुभौ । यस्या इष्टकायाः स्तवः ^{v}षोळशी आदित्यस्तोमः । त्रिष्टुभ एकादशाक्षराणि चतस्रो दिशश्चेत्येवं षोडशकलात्वानयं पञ्चदशकलस्य वज्रस्य भर्ता स्तोमभूतः । ^{v}ओजः बलं ^{v}द्रविणं धनम् । तां त्वामुपदधामि । ^{v}चतुश्चत्वारिंशः ^{v}स्तोमः त्रिष्टुभोऽक्षरैः संमितः स्तोमः । ^{v}वर्चः तेजः ^{v}द्रविणं धनम् । तां त्वामुपदधामि ॥२॥

अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽ यजस्व ॥३॥

अग्नेः । पुरीषम् । असि । अप्सः । नाम । ताम् । त्वा । विश्वे । अभि । गृणन्तु । देवाः ।
स्तोमपृष्ठेति स्तोमऽपृष्ठा । घृतवतीति घृतऽवती । इह । सीद ।
प्रजावदिति प्रजाऽवत् । अस्मे इत्यस्मे । द्रविणा । आ । यजस्व । दः ॥३॥

सा– अथ पञ्चमः – ' अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः । स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽ यजस्व ' इति । हे इष्टके, त्वम् ^{v}अग्नेः ^{v}पुरीषम् ^{v}असि

---

6. P1 after बलरूपं adds कान्तिरूपं
9. H2–3 om. नः; B1 अनुत्पत्ति for अनुत्पन्न°
10. B1 वयं for एवं
11. B1 after प्रणुद adds तामिति
13. H2–3 om. अयं; H3 वस्त्रस्य for वज्रस्य
14. B1 गर्भो for भर्ता

पूरयित्री भवसि । ^V^अप्सः इति । प्सा भक्षणे । [प्साति] भक्षयति विनाशयतीति प्सः । न प्सातीत्यप्सः । योऽग्निस्तादृशनामास्ति तस्याग्नेरित्यर्थः । इतरो व्याख्यातसमानार्थः ॥३॥

आ— पञ्चमी । ' अग्नेः पुरीषम् ' इति । लिङ्गोक्तदेवत्या त्रिष्टुप् । या त्वम् ^V^अग्नेः ^V^पुरीषम् अग्नेः स्थूलाक्षरस्य अग्नेः पुरीषं पूरयित्री । हे इष्टके, त्वं पूरयित्री ^V^असि । ^V^नाम प्रसिद्धौ । ^V^अप्सः । अपः सनोतीति अप्सः योऽग्निस्तस्याग्नेरिति । व्याख्यातसमानार्थः ॥३॥

एवश्छन्दो वरिवश्छन्दः शंभूश्छन्दः परिभूश्छन्दः ।
आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः ॥४॥
सिन्धुश्छन्दः समुद्रश्छन्दः सरिरं छन्दः ।
ककुप् छन्दस्त्रिककुप् छन्दः काव्यं छन्दो अङ्कुपं छन्दः ॥५॥
अक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो
विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रजश्छन्दः ।
आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वियच्छन्दः ॥६॥
बृहच्छन्दो रथन्तरं छन्दो निकायश्छन्दो विवधश्छन्दः ।
गिरश्छन्दो भ्रजश्छन्दः संस्तुप् छन्दोऽनुष्टुप् छन्दः ॥७॥
एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दः ।
विष्पर्धाश्छन्दो विशालं छन्दश्छदिश्छन्दो दूरोहणं छन्दः ।
तन्द्रं छन्दो अङ्काङ्कं छन्दः ॥८॥(१)॥

एवः । छन्दः । वरिवः । शंभूरिति शम्ऽभूः । परिभूरिति परिऽभूः ।
आछदित्याऽछत् । मनः । व्यचः ॥ क्रो ॥४॥
सिन्धुः । समुद्रः । सरिरम् ।
ककुप् । त्रिककुबिति त्रिऽककुप् । काव्यम् । अङ्कुपम् ॥ खै ॥५॥
अक्षरपङ्क्तिरित्यक्षरऽपङ्क्तिः । पदपङ्क्तिरिति पदऽपङ्क्तिः ।
विष्टारपङ्क्तिः । विस्तारपङ्क्तिरिति विस्तारऽपङ्क्तिः । क्षुरः । भ्रजः ॥
आछदित्याऽछत् । प्रछदिति प्रऽछत् । संयदिति सम्ऽयत् । वियदिति विऽयत् । सें ॥६॥

1. S2 om. प्सा भक्षणे

बृहत् । रथन्तरमिति रथम्ऽतरम् । निकाय इति निऽकायः । विवध इति विऽवधः ।
गिरः । भ्रजः । सꣳस्तुबिति सम्ऽस्तुप् ।
अनुष्टुप् । अनुस्तुबित्यनुऽस्तुप् ॥ भौ ॥७॥
एवः । वरिवः । वयः । वयस्कृत् । वयःकृदिति वयःऽकृत् ।
विष्पर्धाः । विस्पर्धा इति विऽस्पर्धाः । विशालमिति विऽशालम् ।
छदिः । दूरोहणमिति दुःऽरोहणम् । तन्द्रम् ।
अङ्काङ्कमित्यङ्कऽअङ्कम् । छन्दः ॥ भ्रीं ॥८॥

सा– कात्यायनः – "विराजो दश दशैवश्छन्द इति प्रतिमन्त्रम्" (काश्रौ १७·११·५) इति । विराट्संज्ञाश्चत्वारिंशदिष्टकास्ताः प्राच्यादिदिक्षु क्रमेण दशदशोपदध्यात् । तेषां पाठस्तु– 'एवश्छन्दो वरिवश्छन्दो शंभूश्छन्दः परिभूश्छन्दः । आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः । सिन्धुश्छन्दः समुद्रश्छन्दः सरिरं छन्दः । ककुप् छन्दस्त्रिककुप् छन्दः काव्यं छन्दो अङ्कुपं छन्दः ॥ अक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रजश्छन्दः । आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वियच्छन्दः ॥ बृहच्छन्दो रथन्तरं छन्दो निकायश्छन्दो विवधश्छन्दः । गिरश्छन्दो भ्रजश्छन्दः सꣳस्तुप् छन्दोऽनुष्टुप् छन्दः ॥ एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दः । विष्पर्धाश्छन्दो विशालं छन्दश्छदिश्छन्दो दूरोहणं छन्दः । तन्द्रं छन्दो अङ्काङ्कं छन्दः' इति । एति गच्छत्यस्मिन् सर्वप्राणिनिकाय इति [v]एवः पृथिवीलोकः । स एव छन्दोरूपेण स्थितत्वाच्छन्दस्कत्वाद्वा [v]छन्दः । हे इष्टके, त्वं तद्रूपासीति शेषः । एवमुत्तरेष्वपि योजना । [v]वरिवः प्रभामण्डलेनाव्रियत इति वरिवोऽन्तरिक्षम् । तदेव [v]छन्दः । [v]शंभूः निरतिशयं सुखमस्माद् भवतीति शंभूर्द्युलोकः । परितो भवति व्याप्य वर्तत इति व्युत्पत्त्या परिभूशब्दो दिग्वचनः । आच्छादयति आत्मा येन रसेन सर्वं शरीरमिति [v]आच्छत् अन्नम् । प्रथमसृष्टं प्राजापत्यात्मकं यत् [v]मनः तदेव [v]छन्दः । विचितिर्व्याप्तिकर्मा । विचति व्याप्नोति सर्वं जगदिति [v]व्यचः असावादित्यः । स्यन्दति नाडीभिः शरीरं व्याप्नोतीति [v]सिन्धुः प्राणवायुः । समुद्रवत्यस्माद्विकल्पजातमिति [v]समुद्रः मनः । यद्वा– यथा सर्वाभिर्नदीभिः पूरितोऽपि पर्याप्तिं न प्राप्नोति तथा शब्दस्पर्शादिविषयैरनुभूयमानैस्तृप्तिं न प्राप्नोतीति समुद्रसाम्यात् समुद्र एव मनः । शरीरवदनगह्वरान्निर्गच्छतीति [v]सरिरं वाक् । कं सुखं स्कुभ्नाति शरीरे धारयतीति [v]ककुप् प्राणः । त्रेधा कं पीतमुदकं स्कुभ्नाति पिबतीति [v]त्रिककुप् उदानः । त्रय्यात्मकः शब्दः [v]काव्यम् । [v]अङ्कुपम् । अक अग कुटिलायां गतौ । कुटिलगत्या आप्नोतीति अङ्कुपमुदकम् । अक्षरा नाशरहिता नक्षत्राणां पङ्क्तिरावलिर्यस्यां सा द्यौः [v]अक्षरपङ्क्तिः । पदानां

---

16. P1 after °लोकः ins. अयं वै लोक एवश्छन्दोऽन्तरिक्षं वरिव इत्यादिशतपथमत्रानुसंधेयम्; S2 om. वा

18. P1 अस्मिन् for अस्माद्

19. P1 परिभूः° परिभू°

25. P1 पक्षिः दानः for उदानः; P1 after उदानः ins. उदानवायुः । उदानो वै त्रिककुबिति श्रुतेरिति भाष्यान्तरम् ।

26. P1 पादानां for पदानां

पञ्चमचितिविषयेष्टकामन्त्राः]

पङ्क्तयो यस्मिन् सोऽयं भूलोकः [1]पदपङ्क्तिः । विस्तारिता आपणे प्रसारिता वस्तूनां पङ्क्तयो यस्याः सा वैश्यजातिः [2]विष्टारपङ्क्तिः । एवं क्षुरभ्रजप्रभृतीनामुत्तरेषां छन्दसां यौगिकया वृत्याप्यर्थान्तरेषु वृत्तिः शतपथब्राह्मणादवगन्तव्या । यद्वा– गायत्र्यादिवदक्षरसंख्यानिष्पाद्यानि छन्दोन्तराण्यत्र 'एवो वरिवः' इत्यादिभिर्नामभिः प्रतिपाद्यन्ते । "यानि वै छन्दांसि सुवर्गाण्यासंस्तैर्देवाः सुवर्गं लोकमायन्" (तैसं ५.३.५) इति तैत्तिरीयश्रुत्या तेषामेवःप्रभृतीनां छन्दसां स्वर्गसाधनताज्ञानात् अत्रेष्टकासु तद्रूपेण स्तुतिः ॥४-८॥

[इति षोडशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

———

आ– चत्वारिंशद्विराजइष्टकाश्चत्वारिंशद्भिर्यजुर्भिरुपदधाति– 'एवः छन्दः' इति । एतेर्वन्नन्तस्य रूपम् [9]एवः इति । "अयं वै लोक एवश्छन्दो वरिवश्छन्द इत्यन्तरिक्षं वै वरिवश्छन्दः" (शब्रा ८.५.२.३) इति । 'शंभूः छन्दः' इति । "द्यौर्वै शंभूश्छन्दः" (शब्रा ८.५.२.३) इति । 'परिभूः छन्दः' इति । "दिशो वै परिभूश्छन्दः" (शब्रा ८.५.२.३) इति । 'आच्छत् छन्दः' इति । "अन्नं वा आच्छच्छन्दः" (शब्रा ८.५.२.३) इति । 'मनः छन्दः' इति । "प्रजापतिर्वै मनश्छन्दः" (शब्रा ८.५.२.३) । 'व्यचः छन्दः' इति । "असौ वा आदित्यो व्यचश्छन्दः" (शब्रा ८.५.२.३) ॥४॥

1. P1 before विस्तारिता adds विष्टारपङ्क्तिः ।
2. P1 with insertions above एवं writes on the margin :– विष्टारपङ्क्तिर्दिक् । दिशो वै विष्टारपङ्क्तिरिति श्रुतेः । क्षुरो भ्रज इत्यसौ वा आदित्यः । क्षुरोभ्रजस्तीक्ष्णत्वात् भासमानत्वात् [च] । आच्छच्छन्दः प्रच्छच्छन्द इत्यन्नम् । तस्य सर्वप्रकारेण शरीरच्छादकत्वात् । अन्नं वा आच्छच्छन्दः प्रच्छच्छन्द इति श्रुतेश्च । संयत् । रात्रिर्वै संयच्छन्द इति । वियत् द्युलोकः । असौ वै द्युलोको वियच्छन्द इति श्रुतेः । बृहत् । अयं वै लोको बृहच्छन्द इति । रथन्तरम् । अन्तरिक्षं वै रथन्तरं छन्द इति । निकायः वायुः । वायुर्वै निकाय इति । विवधः । अन्तरिक्षं वै विवध इति । गिरः अन्नम् । अन्नं वै गिरश्छन्द इति । भ्रजः । अग्निर्वै भ्रजश्छन्द इति । वागेव सश्स्तुप् छन्दो वागनुष्टुप् छन्द इति । एवो वारिवः पूर्ववत् । अन्नं वै वयः छन्द इति । अग्निर्वै वयस्कृच्छन्द इति । असौ वै लोको विष्पर्द्धाश्छन्द इति । अयं वै लोको विशालं छन्द इति । अन्तरिक्षं वै छदिश्छन्द इति । असौ वा आदित्यो दूरोहणं छन्द इति । पङ्क्तिर्वै तन्द्रं छन्द इति । आपो वा अङ्काङ्कं छन्द इति भाष्यान्तरम्; S2 व्यावृत्यापि for वृत्यापि
9. B1 हन्तैवसंतस्य रूपमेवेति, H2-3 इतेर्वसन्तस्य रूपमेव इति for एतेर्वन्नन्तस्य रूपमेव इति
11. B1 om. परिभूः छन्द इति
14. H3 after व्यचश्छन्दः adds इति

'सिन्धुः छन्दः' इति । "प्राणो वै सिन्धुः" (शब्रा ८.५.२.४) इति । 'समुद्रः छन्दः' इति । "मनो वै समुद्रः" (शब्रा ८.५.२.४) । 'सरिरं छन्दः' इति । "वाग्वै सरिरं छन्दः" (शब्रा ८.५.२.४) । 'ककुप् छन्दः' इति । "प्राणो वै ककुप् छन्दः" (शब्रा ८.५.२.४) । 'त्रिककुप् छन्दः' इति । "उदानो वै त्रिककुप् छन्दः" (शब्रा ८.५.२.४) 'काव्यं छन्दः' इति । "त्रयी वै विद्या काव्यं छन्दः" (शब्रा ८.५.२.४) । 'अङ्कुपं छन्दः' इति । "आपो वा अङ्कुपं छन्दः" (शब्रा ८.५.२.४) ॥५॥

'अक्षरपङ्क्तिः छन्दः' इति । "असौ वै लोकोऽक्षरपङ्क्तिश्छन्दः" (शब्रा ८.५.२.४) । 'पदपङ्क्तिः छन्दः' इति । "अयं वै लोकः पदपङ्क्तिश्छन्दः (शब्रा ८.५.२.४) । 'विष्टारपङ्क्तिः छन्दः' इति । "दिशो वै विष्टारपङ्क्तिश्छन्दः" (शब्रा ८.५.२.४) । 'क्षुरो भ्रजश्छन्दः' इति । "असौ वा आदित्यः क्षुरो भ्रजश्छन्दः" (शब्रा ८.५.२.४) । 'आच्छत् छन्दः' इति । "अन्नं वा आच्छच्छन्दः" (शब्रा ८.५.२.४) । 'प्रच्छत् छन्दः' इति । "अन्नं प्रच्छच्छन्दः" (शब्रा ८.५.२.४) । 'संयत् छन्दः' इति । "रात्रिर्वै संयच्छन्दः" (शब्रा ८.५.२.५) । 'वियत् छन्दः' इति । "अहर्वै वियच्छन्दः" (शब्रा ८.५.२.५) ॥६॥

'बृहत् छन्दः' इति । "असौ वै लोको बृहच्छन्दः" (शब्रा ८.५.२.५) 'रथन्तरं छन्दः' इति । "अयं वै लोको रथन्तरं छन्दः" (शब्रा ८.५.२.५) । 'निकायः छन्दः' इति । "वायुर्वै निकायश्छन्दः" (शब्रा ८.५.२.५) । 'विवधः छन्दः' इति । "अन्तरिक्षं वै विवधश्छन्दः (शब्रा ८.५.२.५) । 'गिरः छन्दः' इति । "अन्नं वै गिरश्छन्दः" (शब्रा ८.५.२.५) । 'भ्रजः छन्दः' इति । "अग्निर्वै भ्रजश्छन्दः" (शब्रा ८.५.२.५) । 'सꣳस्तुप् छन्दः' इति । "वाग्वै सꣳस्तुप्छन्दः" (शब्रा ८.५.२.५) । 'अनुष्टुप् छन्दः' इति । "वागनुष्टुप् छन्दः" (शब्रा ८.५.२.५) ॥७॥

'एवः छन्दः वरिवः छन्दः' इत्युक्तार्थे । 'वयः छन्दः' इति । "अन्नं वै वयश्छन्दः" (शब्रा ८.५.२.६) । 'वयस्कृत् छन्दः' इति । "अग्निर्वै वयस्कृच्छन्दः" (शब्रा ८.५.२.६) । 'विष्पर्धाः छन्दः' इति । "असौ वै लोको विष्पर्धाश्छन्दः" (शब्रा

---

3. B1 om. प्राणो वै ककुप् छन्दः ।

5. B1 om. वै; H2 वद्य: for विद्या

6. B1 अपा ककुप्, H2–3 अपांकुरं for आपो वै अङ्कुपं

20. B1 om. इति । वाग्वै सꣳस्तुप् छन्दः ।

24. B1 om. असौ वै ... अङ्काङ्कं छन्द इति । (P. 331, L 4)

८.५.२.६)। 'त्रिशालं छन्दः' इति । "अयं वै लोको विशालं छन्दः" (शब्रा ८.५.२.६)। 'छदिः छन्दः' इति । "अन्तरिक्षं वै छदिश्छन्दः" (शब्रा ८.५.२.६)। 'दूरोहणं छन्दः' इति । "असौ वा आदित्यो दूरोहणं छन्दः" (शब्रा ८.५.२.६)। 'तन्द्रं छन्दः' इति । "पङ्क्तिर्वै तन्द्रं छन्दः" (शब्रा ८.५.२.६)। 'अङ्काङ्कं छन्दः' इति । "आपो वा अङ्काङ्कं छन्दः" (शब्रा ८.५.२.६) ॥८॥

[इति षोडशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

[अथ द्वितीयोऽनुवाकः ।]

सा– प्रथमेऽनुवाके असपत्नादीष्टकोपधानमन्त्रा उक्ताः । द्वितीये लोक(स्तोम ?)-भागेष्टकोपधानमन्त्रा उच्यन्ते –

रश्मिना सत्याय सत्यं जिन्व प्रेतिना धर्मणा धर्मं जिन्व ।
अन्वित्या दिवा दिवं जिन्व संधिनाऽन्तरिक्षेणान्तरिक्षं जिन्व ॥१॥
प्रतिधिना पृथिव्या पृथिवीं जिन्व विष्टम्भेन वृष्ट्या वृष्टिं जिन्व ।
प्रवयाऽह्नाऽहर्जिन्वानुया रात्र्या रात्रीं जिन्व ॥२॥
उशिजा वसुभ्यो वसूञ्जिन्व प्रकेतेनादित्येभ्य आदित्याञ्जिन्व ।
तन्तुना रायस्पोषेण रायस्पोषं जिन्व सꣳसर्पेण श्रुताय श्रुतं जिन्व। ।३॥
ऐडेनौषधीभिरोषधीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्व ।
वयोधसाऽधीतेनाधीतं जिन्वाभिजिता तेजसा तेजो जिन्व ॥४॥
प्रतिपदसि प्रतिपदे त्वाऽनुपदस्यनुपदे त्वा ।
संपदसि संपदे त्वा तेजोऽसि तेजसे त्वा ॥५॥
त्रिवृदसि त्रिवृते त्वा प्रवृदसि प्रवृते त्वा ।
विवृदसि विवृते त्वा सवृदसि सवृते त्वा ॥६॥
आक्रमोऽस्याक्रमाय त्वा संक्रमोऽसि संक्रमाय त्वा ।
उत्क्रमोऽस्युत्क्रमाय त्वोत्क्रान्तिरस्युत्क्रान्त्यै त्वा ।
अधिपतिनोर्जोर्जं जिन्व वेषश्रीः क्षत्राय क्षत्रं जिन्व ॥७॥(२)॥

---

5. H3 असौ for आपो

रश्मिना । सत्याय । सत्यम् । जिन्व । प्रेतिनेति प्रऽइतिना । धर्मणा । धर्मम् ।
अन्वित्येत्यनुऽइत्या । दिवा । दिवम् ।
संधिनेति सम्ऽधिना । अन्तरिक्षेण । अन्तरिक्षम् ॥ लीं ॥१॥

प्रतिधिनेति प्रतिऽधिना । पृथिव्या । पृथिवीम् । विष्टम्भेन । वृष्ट्या । वृष्टिम् ।
प्रवयेति प्रऽवया । अह्ना । अहः । अनुयेत्यनुऽया । रात्र्या । रात्रीम् ॥ ढिं ॥२॥

उशिजा । वसुभ्य इति वसुऽभ्यः । वसून् ।
प्रकेतेनेति प्रऽकेतेन । आदित्येभ्यः । आदित्यान् ।
तन्तुना । रायः । पोषेण । रायः । पोषम् ।
संसर्पेणेति सम्ऽसर्पेण । श्रुताय । श्रुतम् ॥ ढुंष् ॥३॥

ऐळेन । ओषधीभिः । ओषधीः । उत्तमेनेत्युत्ऽतमेन । तनूभिः । तनूः ।
वयोधसेति वयःऽधसा । आधीतेनेत्याऽधीतेन । आधीतमित्याऽधीतम् ।
अभिजितेत्यभिऽजिता । तेजसा । तेजः । जिन्व ॥ प्रीं ॥४॥

प्रतिपदिति प्रतिऽपत् । असि । प्रतिपद इति प्रतिऽपदे । त्वा ।
अनुपदित्यनुऽपत् । अनुपद इत्यनुऽपदे ।
संपदिति सम्ऽपत् । संपद इति सम्ऽपदे । तेजः । तेजसे ॥ कं ॥५॥

त्रिवृदिति त्रिवृत् । त्रिवृत इति त्रिऽवृते । प्रवृदिति प्रऽवृत् । प्रवृत इति प्रऽवृते ।
विवृदिति विऽवृत् । विवृत इति विऽवृते ।
सवृदिति सऽवृत् । सवृत इति सऽवृते ॥ लौं ॥६॥

आक्रम इत्याऽक्रमः । आक्रमायेत्याऽक्रमाय ।
संक्रम इति संऽक्रमः । संक्रमायेति सम्ऽक्रमाय ।
उत्क्रम इत्युत्ऽक्रमः । उत्क्रमायेत्युत्ऽक्रमाय ।
उत्क्रान्तिरित्युत्ऽक्रान्तिः । उत्क्रान्त्या इत्युत्ऽक्रान्त्यै । त्वा ।
अधिपतिनेत्यधिऽपतिना । ऊर्जा । ऊर्जम् ।
वेषश्रीरिति वेषऽश्रीः । क्षत्राय । क्षत्रम् । जिन्व ॥ मैं ॥७॥(२)॥

लोकभागेष्टकोपधानमन्त्राः]

कात्यायनः – "स्तोमभागा रश्मिना सत्याय इति प्रतिमन्त्रम्" (काश्रौ १७·११·९) इति। अस्यानुवाकस्य स्तोत्राभ्यनुज्ञापने विनियोगात् त्रिवृदादिस्तोमसंबन्धात् स्तोमा इति वा (?) मन्या स्तोमभागा एतदनुवाकसंबन्धिनो मन्त्राः। तदुपधेया इष्टकाश्च तथैव व्यपदिश्यन्ते। ततस्त्रिंशदिष्टका अनेनानुवाकेन प्रतिमन्त्रमुपदध्यादित्यर्थः॥

तत्पाठस्तु– 'रश्मिना सत्याय सत्यं जिन्व प्रेतिना धर्मणा धर्मं जिन्व। अन्वित्या दिवा दिवं जिन्व संधिनाऽन्तरिक्षेणान्तरिक्षं जिन्व॥ प्रतिधिना पृथिव्या पृथिवीं जिन्व विष्टम्भेन वृष्ट्या वृष्टिं जिन्व। प्रवयाऽह्नाऽहर्जिन्वानुया रात्र्या रात्रीं जिन्व॥ उशिजा वसुभ्यो वसून् जिन्व प्रकेतेनादित्येभ्य आदित्यान् जिन्व। तन्तुना रायस्पोषेण रायस्पोषं जिन्व सꣳसर्पेण श्रुताय श्रुतिं जिन्व॥ ऐळेनौषधीभिरोषधीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्व। वयोधसाऽऽधीतेनाधीतं जिन्वाभिजिता तेजसा तेजो जिन्व॥ प्रतिपदसि प्रतिपदे त्वाऽनुपदस्यनुपदे त्वा। संपदसि संपदे त्वा तेजोऽसि तेजसे त्वा॥ त्रिवृदसि त्रिवृते त्वा प्रवृदसि प्रवृते त्वा। विवृदसि विवृते त्वा सवृदसि सवृते त्वा॥ आक्रमोऽस्याक्रमाय त्वा संक्रमोऽसि संक्रमाय त्वा। उत्क्रमोऽस्युत्क्रमाय त्वोत्क्रान्तिरस्युत्क्रान्त्यै त्वा। अधिपतिनोर्जोर्जं जिन्व वेषश्रीः क्षत्राय क्षत्रं जिन्व' इति। हे इष्टके, त्वं ˇरशिना तेजोरूपेणान्नेन (ˇसत्याय) सत्याभिमानिदेवतार्थं ˇसत्यं ˇजिन्व प्रीणय। "रश्मिरन्नम्" (शब्रा ८·५·३·३) इति श्रुतेः। ˇप्रेतिना। प्रकर्षेण देहमेति गच्छतीति प्रेतिरन्नम्। तेन ˇधर्मं ˇजिन्व प्रीणय। "प्रेतिरन्नम्" (शब्रा ८·५·३·३) इति श्रुतेः। किमर्थम्? ˇधर्मणा। अत्र विभक्तेर्व्यत्ययः। धर्माय धर्मार्थम्। ˇअन्वित्या अन्नेन। "अन्वितिरन्नम्" (शब्रा ८·५·३·३) इति श्रुतेः। ˇदिवं द्युलोकं ˇजिन्व तर्पय। ˇदिवा द्युलोकार्थम्। ˇसंधिना सम्यग् बलादिकं धीयतेऽस्मिन्निति संधिरन्नम्। तेन ˇअन्तरिक्षं ˇजिन्व ˇअन्तरिक्षेण अन्तरिक्षार्थम्। ˇप्रतिधिना। प्रतिधीयतेऽस्मिन्निति प्रतिधिरन्नम्। तेन ˇपृथिव्या पृथिव्यै ˇपृथिवीं ˇजिन्व। छिन्नदेहादिविष्टम्भननिमित्तत्वात् विष्टम्भोऽन्नम्। तेन ˇवृष्ट्या वृष्ट्यर्थं ˇवृष्टिं ˇजिन्व। ˇप्रवया प्रवाप्यत इति प्रवा अन्नम्। तेन ˇअह्ना अह्ने ˇअहः ˇजिन्व। देहान्तर्गतद्वासप्ततिसहस्राणि नाडीरन्वीयतेऽनुगच्छतीति अन्वी अन्नम्। तया अन्व्या इति वक्तव्ये ˇअनुया इति छान्दसं रूपम्। ˇरात्र्या रात्र्यभिमानिदेवतार्थं ˇरात्रीं ˇजिन्व। ˇउशिजा सर्वैः काम्यमानत्वादुशिगन्नम्। तेन ˇवसुभ्यः अर्थाय ˇवसून् ˇजिन्व। ˇप्रकेतेन, प्रकर्षेण कं सुखम् ईयतेऽनेनेति प्रकेतमन्नं, तेन ˇआदित्येभ्यः अर्थाय आदित्यादीन् ˇजिन्व। ˇतन्तुना। तन्यते विस्तार्यते इति तन्तुरन्नं, तेन। ˇरायस्पोषेण धनपुष्ट्यर्थमुपहिता सती ˇरायस्पोषं ˇजिन्व। सम्यक् सृप्यते गम्यते इतस्ततो यदर्थं संसर्पोऽन्नं तेन। श्रूयते इति श्रुतम्। तदर्थं ˇश्रुतं ˇजिन्व। ˇऐळेन। इळाऽन्नम्ः तद्रसः ऐळः, तेन। ˇओषधीभिः ओषधीभ्यः ˇओषधीः ˇजिन्व। ˇउत्तमेन उत्कृष्टेन अन्नेन ˇतनूभिः तनूभ्य,

1. P1 लोक° for स्तोम°

? S2 °ज्ञायते for °ज्ञापने

13. P1 after °देवतार्थं adds उपहिता सती

19 S2 om. जिन्व; S2 अन्न° for छिन्न°; P1 with markings above छिन्न° writes on the margin– क्षीण

21. S2 om. °सहस्राणि°

24. S2 अन्नेन for अनेन

25. S2 संसृप्यते for सम्यक् सृप्यते

26. S2 पदार्थं for यदर्थं

27. P1 om. ओषधीभिरोषधीभ्यः; S2 om. तनूभ्यः

तनूः जिन्व । वयोधसा । वयः शरीरावस्थानं धत्ते पोषयतीति वयोधोऽन्नं, तेन । आधीतेन अधीनर्थम् आधीतं जिन्व । अभिजिता । सर्वजयहेतुरन्नमभिजित् । तेजसा तेजसे तेजः जिन्व । येन जीवनं प्रतिपद्यत इति प्रतिपद् अन्नम् । हे इष्टके, यतस्त्वं तादृग्रूपा असि, तदर्थं त्वामुपदधामीति शेषः । 'संपदसि' । हे इष्टके, त्वं संपद्रूपा असि, तदर्थं त्वामुपदधामि । "अन्नं वै संपत्" इति श्रुतेः । तेजसः कारणत्वात् तेजः अन्नम् । त्रिधा वर्तत इति त्रिवृत् अन्नम् । प्रकर्षेण प्रवर्तत इति प्रवृत् अन्नम् । विशेषेण वर्तत इति विवृत् अन्नम् । समेन वर्तत इति सवृत् अन्नम् । क्षुधमाक्रमतीति आक्रमः अन्नम् । देहस्य सर्वावयवत्वात् संक्रमत इति संक्रमः अन्नम् । अपत्योत्पत्त्यर्थं रेतोरूपेणोत्क्रामतीति उत्क्रामः अन्नम् । उत्क्रान्तिः उत्कृष्टं गमनं यस्यान्नस्य । अधिपतिना अधिकं पालकेन ऊर्जा अन्नरसेन ऊर्जं जिन्व । वेषश्रीः वेषस्य शोभा अ(य ?)स्य तदन्नम् । क्षतात् त्रायत इति क्षत्रम् अन्नम् । तदर्थं क्षत्रं जिन्व ॥३–७॥

[इति षोडशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

आ– एकोनत्रिंशत् स्तोमभागा उपदधाति 'रश्मिना सत्याय' इति । एतानि स्तोमभागदेवत्यानि एकोनत्रिंशद्यजूंषि । "तस्मा एतस्मै स्तोमायैतं भागं प्रायच्छत्" (शब्रा ८·५·३·२) इति श्रुतेः । 'रश्मिना सत्याय सत्यं जिन्व' । रश्मिरन्नम् । तेन रश्मिना अन्नेन अन्नरसेन च । आदित्यादिस्तोमभागम् इष्टिविशिष्टेष्टकां सत्यं जिन्व तर्पय । सत्याय सत्योहितदेवतार्थम् । "रश्मिरन्नम्" (शब्रा ८·५·३·३) इत्यादिश्रुतेः । ब्राह्मणवाक्यैरेव मन्त्रपदानां व्याख्या क्रियते । क्वचिन्मुख्यवृत्त्या क्वचिल्लक्षणया च न्यायोपबृंहितया । 'प्रेतिना धर्मणा धर्मं जिन्व' । प्रेतिरन्नरसः । तेन प्रेतिना । येन देहः प्रयच्छति जीवतीति प्रेतिः, तेन प्रेतिना । धार्यते येन स (धर्मः), तेन धर्मणा । अत्र विभक्तिव्यत्ययः । धर्मं जगद्धारकं जिन्व प्रीणय । "प्रेतिरन्नम्" (शब्रा ८·५·३·३) इति श्रुतेः । [अन्वेति अनुगच्छतीति अन्वितिरन्नं, तया] अन्वित्या अन्नेन । "अन्वितिरन्नम्" (शब्रा ८·५·३·३) इति श्रुतेः । दिवं जिन्व तर्पय । दिवा दिवे । 'संधिना अन्तरिक्षेण अन्तरिक्षं जिन्व' । सम्यक् बलादिकं धीयतेऽस्मिन्निति संधिरन्नरसः । तेन संधिना अन्तरिक्षं जिन्व । अन्तरिक्षेण अन्तरिक्षाय ॥१॥

'प्रतिधिना पृथिव्या पृथिवीं जिन्व' । प्रतिधीयते अस्मिन्निति प्रतिधिरन्नम् । तेन प्रतिधिना पृथिवीं जिन्व । पृथिव्या पृथिव्यै । 'विष्टम्भेन वृष्ट्या वृष्टिं जिन्व' । देहादिविष्टम्भननिमित्तत्वात् विष्टम्भमन्नम् । तेन विष्टम्भेन वृष्टिं जिन्व तर्पय । वृष्ट्या

---

15. B1 before आदित्यादि° adds सत्यां; H2–3 इष्टि° for इष्टि°; B1 om. सत्याय

25. B1 after प्रतिधिरन्नम् adds अनुगच्छन्तीति अन्वी [तिः] अन्नम् । तया

26. B1 om. विष्टम्भेन ... जिन्व

लोकभागेष्टकोपधानमन्त्राः]

वृष्ट्यै । ' प्रवयाऽह्नाऽहर्जिन्व ' । (प्रवाप्यत ?) इति प्रवा अन्नम् । तया प्रवया अन्नेन अहः जिन्व । अह्ना अन्नेन । अनुया । अन्वीयत इति अन्वी । देहान्तःस्थद्वासप्तति-सहस्रनाडीरनुपगच्छतीति अन्वी अन्नं, तया अन्व्या । अनुयेति छान्दसः । अन्नेन रात्रिं जिन्व । रात्र्या रात्र्यै ॥२॥

' उशिजा वसुभ्यो वसून् जिन्व ' । वश कान्तौ । सर्वैः काम्यमानम् उशिक् अन्नम् । तेन उशिजा वसून् देवान् जिन्व । वसुभ्यः अर्थाय । ' प्रकेतेनादित्येभ्य आदित्यान् जिन्व ' । प्रकेतेन प्रकर्षेण कं सुखम् ईयते अनेनेति प्रकेतमन्नम् । तेन आदित्यान् जिन्व । आदित्येभ्यः अर्थाय । ' तन्तुना रायस्पोषेण रायस्पोषं जिन्व ' । अन्नसंतत्या रायस्पोषं जिन्व, रायस्पोषेण रायस्पोषाय । ' संसर्पेण श्रुताय श्रुतं जिन्व ' । संसृप्यत इति संसर्प अन्नम् । तेन संसर्पेण श्रुतं जिन्व । श्रुताय । श्रु श्रवणे ॥३॥

' ऐळेनौषधीभिरोषधीं जिन्व ' । सर्वत्र जिन्वतिविषयभूताः स्तुत्यनुगुणान्विता इष्टका एवेति ज्ञातव्यम् । ओषधीभिः ओषधीभ्यः । ' उत्तमेन तनूभिस्तनूर्जिन्व ' । उत्तमेन उत्कृष्टेन अन्नेन तनूः जिन्व । तनूभिः तनूभ्यः । ' वयोधसाऽऽधीतेनाधीतं जिन्व ' । वयो देहावस्था । तद्वत्ते पोषयतीति अन्नं वयोधः । तेन वयोधसा आधीतं जिन्व । आधीतेन आधीताय । ' अभिजिता तेजसा तेजो जिन्व ' । सर्वजयहेतुरन्नमभिजित् । तेन अभिजिता तेजः जिन्व, तेजसा तेजसे ॥४॥

' प्रतिपदसि प्रतिपदे त्वा ' । प्रतिपद्यते जीवनं येन अन्नेन तत् प्रतिपत् । यतस्त्वं स्वभावतः प्रतिपद् असि अन्नगुणविशिष्टाऽसि, अतस्त्वामिष्टकां सादयामीति शेषः । प्रतिपदे अर्थाय । ' अनुपदस्यनुपदे त्वा ' । अन्वनु प्रतिदिवं (नं ?) संपद्यत इत्यन्नम् । अनुपत् असि स्वभावतोऽतस्त्वामिष्टकां सादयामीति शेषः । अनुपदे फलाय । ' संपदसि संपदे त्वा ' । " अन्नं वै संपत् " । असि स्वभावतः, अतस्त्वां सादयामि । संपदे संपदर्थम् ।

1. H2–3 प्रणव्यते, B1 प्रता (वा ?) यते for प्रवाप्यते (?); H3 अन्नैः for अन्नेन
2. B1 देहस्थ for देहान्तःस्थ°
3. H3 अह्नेऽह्नो for अन्नेन ।
6. B1 om. प्रकेतेन ... जिन्व । प्रकेतेन (L 7)
11. H2–3 after इष्टकाः add ओषधयः
17. H2–3 °पद्यतीति for °पद्यते
18. B1 om. प्रतिपदे ... शेषः (L. 20)
21. H3 transfers सादयामि after संपदर्थम्; B1 om. संपदे संपदर्थम्

[लोकभागेष्टकोपधानमन्त्राः

' तेजोऽसि तेजसे त्वा ' । तेजसो हेतुत्वादन्नं ^{v}तेजः ^{v}असि । अतः ^{v}तेजसे अर्थायेष्टकां त्वामासादयामि ॥५॥

' त्रिवृदसि त्रिवृते त्वा ' । त्रिरावर्तत इति ^{v}त्रिवृत् अन्नम् । अतः ^{v}त्रिवृते अन्नाय इष्टकां त्वामुपदधामि । ' प्रवृदसि प्रवृते त्वा ' । प्रवृणोति भूतानीति ^{v}प्रवृत् अन्नम् । यतस्त्वं प्रवृत् ^{v}असि, अतस्त्वां ^{v}प्रवृते अन्नाय सादयामि । [' विवृदसि विवृते त्वा ' । विशेषेण वर्तते भूतेषु इति ^{v}विवृत् अन्नम् । यतस्त्वं विवृत् ^{v}असि,] अतस्त्वां ^{v}विवृते अन्नाय उपदधामि । ' सवृदसि सवृते त्वा ' । समेन उपसंमितत्वेन वर्तत इति ^{v}सवृत् अन्नम् । यतस्त्वं सवृत् ^{v}असि, अतः ^{v}सवृते त्वाम् इष्टकामुपदधामि ॥६॥

' आक्रमोऽस्याक्रमाय त्वा ' । क्षुधमाक्रमतीत्यन्नम् ^{v}आक्रमः ^{v}असि, यतोऽतस्त्वाम् ^{v}आक्रमाय अन्नाय उपदधामि । ' संक्रमोऽसि संक्रमाय त्वा ' । देहस्य सर्वावयवत्वात् संक्रमत इति ^{v}संक्रमः अन्नरसः । यतस्त्वं संक्रमः ^{v}असि, अतः ^{v}संक्रमाय त्वामुपदधामि । ' उत्क्रमोऽस्युत्क्रमाय त्वा ' । अपत्योत्पत्त्यर्थं वीर्यरूपेण उत्क्रामतीति ^{v}उत्क्रमः अन्नम् । यतस्त्वम् उत्क्रमः ^{v}असि, अतस्त्वामुपदधामि । ^{v}उत्क्रान्तिः उत्कृष्टगमनम् । देहादेरुत्क्रान्तिर्येनान्नेन सा उत्क्रान्तिः । यतस्त्वमुत्क्रान्तिः ^{v}असि । उत ^{v}उत्क्रान्त्यै त्वामुपदधामि । ' अधिपतिनोर्जोर्जं जिन्व ' । ^{v}अधिपतिना ईश्वरेण ^{v}ऊर्जा रसेन ^{v}ऊर्जम् अन्नं ^{v}जिन्व तर्पय । ^{v}वेषश्रीः वेषस्य [श्रीः] शोभा यस्य सः, त्वम् । क्षतात् त्रायत इति ^{v}क्षत्रम् अन्नम् । ^{v}क्षत्राय अन्नाय ^{v}जिन्व तर्पय ॥७॥

[इति षोडशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

---

1. H3 om. तेजोऽसि
3. B1 om. त्रिरावर्तते .. दधामि° (L 4)
4. B1 om. °वृदसि ... भूतानी°
5. B1 om. अतस्त्वां ... सादयामि । ... ... सवृदसि (L 7)
7. H2–3 समेतपुरुष° for समेन उप°
8. H–23 after °दधामि ins. इति
9. B1 om. यतोऽतस्त्वां ... अन्न° (L 10)
11. B1 om. संक्रमाय ... °मुत्क्रान्तिरसि (L 14)
15. B1 om. अधि°

[अथ तृतीयोऽनुवाकः ।]

सा– द्वितीयेऽनुवाके लोकभागा इष्टका उक्ताः । तृतीये नाकसदाख्या इष्टका उच्यन्ते–

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयः ।
अग्निर्हेतीनां प्रतिधर्ता ॥१॥
त्रिवृत् त्वा स्तोमः पृथिव्याꣳ श्रयत्वाज्यमुक्थमव्यथायै स्तभ्नातु ।
रथन्तरꣳ साम प्रतिष्ठित्या अन्तरिक्षे ॥२॥
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना
नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥३॥

राज्ञी । असि । प्राची । दिक् । वसवः । ते । देवाः । अधिपतय इत्यधिऽपतयः ।
अग्निः । हेतीनाम् । प्रतिधर्तेति प्रतिऽधर्ता ॥ ज्ञां ॥१॥
त्रिवृदिति त्रिऽवृत् । त्वा । स्तोमः । पृथिव्याम् । श्रयतु ।
आज्यम् । उक्थम् । अव्यथायै । स्तभ्नातु ।
रथन्तरमिति रथम्ऽतरम् । साम ।
प्रतिष्ठित्यै । प्रतिस्थित्या इति प्रतिऽस्थित्यै । अन्तरिक्षे ॥ ठुं ॥२॥
ऋषयः । त्वा । प्रथमजा इति प्रथमऽजाः । देवेषु । दिवः । मात्रया । वरिम्णा । प्रथन्तु ।
विधर्तेति विऽधर्ता । च । अयम् । अधिपतिरित्यधिऽपतिः । च ।
ते । त्वा । सर्वे । संविदाना इति सम्ऽविदानाः ।
नाकस्य । पृष्ठे । स्वर्ग इति स्वःऽगे । लोके । यजमानम् । च । सादयन्तु ॥ प्रुः ॥३॥

कात्यायनः – " नाकसदो राज्ञ्यसीति प्रतिमन्त्रम् " (काश्रौ १७·१२·१) इति । नाकः स्वर्गः संपद्यते यैर्मन्त्रैस्ते नाकसदः । तथा च मन्त्रलिङ्गम्– ' नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ' इति । तैर्मन्त्रैरुपधेया इष्टका अपि नाकसद इत्युच्यन्ते । तत्र च प्रथममन्त्रपाठस्तु– ' राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयः । अग्निर्हेतीनां प्रतिधर्ता ॥ त्रिवृत् त्वा स्तोमः पृथिव्याꣳ

2?. S? तथा for तत्र; P1 om. प्रथम°

श्रयत्वाज्यमुक्थमव्यथायै स्तभ्नातु । रथन्तरꣳ साम प्रतिष्ठित्या अन्तरिक्षे ॥ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु । विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ' इति । हे इष्टके, राज्ञी राजमाना या प्राची दिक् त्वं तद्रूपासि । ते तव वसवः अष्टसंख्याकाः देवाः अधिपतयः अधिकं पालयितारः । अग्निः तवोपद्रवकारिणीनां हेतीनां परकीयायुधानां प्रतिधर्ता निराकर्ता ॥१॥

योऽयं त्रिवृदाख्यः स्तोमः स त्वां पृथिव्यां श्रयतु स्थापयतु । यत् आज्यम् उक्थम् आज्यनामकं " प्र वो देवायाग्नये " (ऋ ३·१३·१–६) इत्यादिकं शस्त्रमस्मिन् स्थाने त्वाम् अव्यथायै चलनराहित्याय स्तभ्नातु दृढीकरोतु । अन्तरिक्षे लोके प्रतिष्ठित्यै प्रतिष्ठापनाय रथन्तरं साम त्वां स्तभ्नातु । देवेषु मध्ये प्रथमजाः प्रथमभाविनः ऋषयः प्राणाः । " प्राणा वै ऋषयः " (द्र. शब्रा ८·४·१·५) इति श्रुतेः । यद्वा– ऋषयः नारदाद्याः । अत एव स्मर्यते " देवर्षिर्नारदस्तथा " (भगी १०·१३) इति । एवंभूता ऋषयः त्वा त्वां दिवः मात्रया आकाशस्य यत् परिमाणं तेन परिमाणेन प्रथन्तु प्रथयन्तु विस्तारयन्तु । कीदृश्या मात्रया ? वरिम्णा श्रेष्ठया । उरुत्वेन चेति वा । न केवलम् ऋषयः प्रथन्तु, किंतु विधर्ता च अयम् अधिपतिः च योऽयमिष्टकानां निषादयिता, यश्च पालकस्तावपि प्रथयतम् । यद्वा– अयं विधर्ता विशेषेण धारयिता तव पोषयिता वागभिमानी देवः अधिपतिः प्रधानभूतो मनोऽभिमानी देवश्च प्रथयतामिति । यावन्तः ते सर्वे दिगग्निवस्वादयः संविदानाः परस्परमैकमत्यं प्राप्ताः नाकस्य पृष्ठे स्वर्गसदृशस्य क्षेत्रस्योपरि त्वा त्वां सादयन्तु । एतत्फलभोगार्थं यजमानं च स्वर्गे लोके सादयन्तु । एवमुत्तरेष्वपि मन्त्रेषु योज्यम् ॥२–३॥

आ– पञ्च नाकसद उपदधाति– ' राज्ञ्यसि ' इति । लिङ्गोक्तदेवत्या गायत्री । या प्राची दिक् सा राज्ञी । राजृ दीप्तौ । ईश्वरी असि । तस्याः ते तव वसवः देवाः अधिपतयः अधिष्ठातारः । यस्याश्च हेतीनाम् अस्त्राणां वधहेतुभूतानाम् अग्निः प्रतिधर्ता प्रतिधारयिता, तां त्वां ब्रवीमि ॥१॥

' त्रिवृत् त्वा स्तोमः पृथिव्यां श्रयतु ' । अस्यां पृथिव्यां स्थाने स्थितां त्वा त्रिवृत् स्तोमः श्रयतु आश्रयतु । आज्यम् उक्थम् । आज्यलक्षणमुक्थम् आज्येनोक्थेन अव्यथायै अचलनाय स्तभ्नातु स्थिरीकरोतु । ' रथन्तरं साम प्रतिष्ठित्या अन्तरिक्षे ' । अन्तरिक्षे लोके प्रतिष्ठित्यै प्रतिष्ठानाय रथन्तरं साम त्वा स्तभ्नातु स्थिरीकरोतु ॥२॥

---

7. S2 om. स्थाने

12. S2 om. प्रथयन्तु; S2 om. उरुत्वेन चेति वा

15. S2 यावत् for यावन्तः

20 B1 H2–3 बन्ध° for वध°

21. B1 धारयिता for प्रतिधारयिता; B1 om. तां

22. H3 तस्याः पृथिव्याः for अस्यां पृथिव्यां; B1 after second त्वा adds स्य

23. B1 om. आश्रयतु

नाकसदाख्येष्टकामन्त्राः]

'ऋषयस्त्वा' इति। लिङ्गोक्तदेवत्या त्रिष्टुप् यजुरन्ता। 'ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु'। vदेवेषु मध्ये vप्रथमजाः vऋषयः। प्राणाः प्रथमजाः, ते ऋषयः। "प्राणा वा ऋषयः" (द्र. शब्रा ८.४.१.५) इत्यादिश्रुतेः। vदिवः द्युलोकस्य vमात्रया परिमाणेन। कथंभूतया? vवरिम्णा श्रेष्ठया गुरुत्वेन vत्वा त्वां vप्रथन्तु प्रथयन्तु पृथुभावमापादयन्तु। vअयं vविधर्ता वाक् धारयित्री पोषयित्री vअधिपतिः मनः, मनसः प्राधान्यात्। 'ते त्वा सर्वे संविदानाः'। ये दिगग्निवस्वादयः vसंविदानाः ऐकमत्येन परस्परं संवादं कुर्वाणाः vनाकस्य vपृष्ठे उत्सङ्गे उपरि vत्वा vसादयन्तु आसादयन्तु। एतत्फलभोगाय यजमानं चासादयन्तु॥

इत उत्तरासु खण्डिकासु देवाः हेतीनां प्रतिधर्तारः स्तोमः उक्थानि सामानि चान्यानि भविष्यन्ति। समानमन्यत्॥३॥

विराळसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतयः।
इन्द्रो हेतीनां प्रतिधर्ता॥४॥
पञ्चदशस्त्वा स्तोमः पृथिव्याᳫं श्रयतु प्रउगमुक्थमव्यथायै स्तभ्नातु।
बृहत् साम प्रतिष्ठित्या अन्तरिक्षे॥५॥
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना
नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु॥६॥

विराळिति विऽराट्। असि। दक्षिणा। दिक्।
रुद्राः। ते। देवाः। अधिपतय इत्यधिऽपतयः।
इन्द्रः। हेतीनाम्। प्रतिधर्तेति प्रतिऽधर्ता॥ ढां॥४॥
पञ्चदश इति पञ्चऽदशः। त्वा। स्तोमः। पृथिव्याम्। श्रयतु।
प्रउगम्। उक्थम्। अव्यथायै। स्तभ्नातु।
बृहत्। साम। प्रतिष्ठित्यै। प्रतिस्थित्या इति प्रतिऽस्थित्यै। अन्तरिक्षे॥ छुं॥५॥
ऋषयस्त्वा॥ ऋ॥६॥

---

4. B1 उत्वेन (उरुत्वेन ?) for गुरुत्वेन; S2 om. प्रथयन्तु
5. H2–3 after वाक् adds त्वां वाक्
6. B1 यदिवाग्निर्, H3 ये दिवग्नि for ये दिगग्नि°
8. B1 om. चान्यानि
9. H2–3 भवन्ति for भविष्यन्ति

सा– अथ द्वितीयः – स्तोमाः सामानि राजसूयप्रकरणे व्याख्यातानि । " वायुरग्रेगा " (आश्वश्रौ ५.१०.४) इत्यादिकं शस्त्रं vप्रउगम् । शिष्टं समानम् ॥४–६॥

आ– अथ दक्षिणतः– ' विराळसि दक्षिणा दिक् ' इति । गायत्री । दक्षिणा [या] दिशः vविराट् इति नाम । विशेषतो राजत इति इष्टका विराड्रूपा vअसि । एतस्या दिशो vरुद्राः vअधिपतयः । vहेतीनाम् vइन्द्रः vप्रतिधर्ता धारयिता ॥४॥

vपृथिव्यां स्थाने vपञ्चदशः vस्तोमः vत्वा त्वां vश्रयतु आश्रयतु । पञ्चदशेन स्तोमेन पृथिव्यामेते त्वां श्रिताः भवन्तु । vप्रउगम् vउक्थम् । प्रउगेन नाम्ना उक्थेन vअव्यथायै अचलनाय vस्तभ्नातु स्थिरीकरोतु । vबृहत् vसाम । बृहन्नाम साम vअन्तरिक्षे vप्रतिष्ठित्यै प्रतिष्ठानाय त्वा स्तभ्नातु ॥५॥

' ऋषयस्त्वा ' इति । समानार्थः ॥६॥

सम्राळसि प्रतीची दिगादित्यास्ते देवा अधिपतयः ।
वरुणो हेतीनां प्रतिधर्ता ॥७॥
सप्तदशस्त्वा स्तोमः पृथिव्याᳬ श्रयतु मरुत्वतीयमुक्थमव्यथायै स्तभ्नातु ।
वैरूपᳬ साम प्रतिष्ठित्या अन्तरिक्षे ॥८॥
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना
नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥९॥

सम्राळिति सम्ऽराट् । असि । प्रतीची । दिक् ।
आदित्याः । ते । देवाः । अधिपतय इत्यधिऽपतयः ।
वरुणः । हेतीनाम् । प्रतिधर्तेति प्रतिऽधर्ता ॥ ढां ॥७॥
सप्तदश इति सप्तऽदशः । त्वा । स्तोमः । पृथिव्याम् । श्रयतु ।
मरुत्वतीयम् । उक्थम् । अव्यथायै । स्तभ्नातु ।
वैरूपम् । साम । प्रतिष्ठित्यै । प्रतिस्थित्या इति प्रतिऽस्थित्यै । अन्तरिक्षे ॥ छुं ॥८॥
ऋषयस्त्वा ॥ ऋ ॥९॥

---

2. P1 स्पष्टम् for समानम्
8. B1 अबलतायै for अचलनाय

नाकसदाख्येष्टकामन्त्राः]

सा– अथ तृतीयः – ‘ सम्राळसि प्रतीची दिगादित्यास्ते देवा अधिपतयः । वरुणो हेतीनां प्रतिधर्ता ॥ सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु मरुत्वतीयमुक्थमव्यथायै स्तभ्नातु । वैरूपꣳ साम प्रतिष्ठित्या अन्तरिक्षे ॥ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु । विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ’ इति । “ इदं वसो सुतमन्धः ” (ऋ. ८·२·१-३) इति [v]मरुत्वतीयं शस्त्रम् ॥७–९॥

आ– अथ पश्चात् । ‘ सम्राळसि प्रतीची दिक् ’ इति । एषा [v]प्रतीची [v]दिक् सम्राण्णाम या वर्तते । [v]आदित्याः नाम ये [v]देवाः [v]ते तत्र [v]अधिपतयः । तत्र तव [v]हेतीनाम् अस्त्राणां बन्ध (वध ?) हेतुभूतानां [v]वरुणः वा [v]प्रतिधर्ता प्रतिधारयिता ॥७॥

[v]पृथिव्यां [v]सप्तदशः [v]स्तोमः । सप्तदशेन स्तोमेन पृथिव्यां श्रिताः । [v]मरुत्वतीयम् [v]उक्थम् [v]अव्यथायै [v]स्तभ्नातु । मरुत्वतीयेनोक्थेन [v]वैरूपं [v]साम [v]अन्तरिक्षे [v]प्रतिष्ठित्यै स्तम्नातु ॥८॥

‘ ऋषयस्त्वा ’ इति समानार्थः ॥९॥

स्वराळस्युदीची दिङ्मरुतस्ते देवा अधिपतयः ।

सोमो हेतीनां प्रतिधर्ता ।।१०।।

एकविꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु ।

वैराजꣳ साम प्रतिष्ठित्या अन्तरिक्षे ।।११।।

ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।

विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना

नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ।।१२।।

स्वराळिति स्वऽराट् । असि । उदीची । दिक् ।

मरुतः । ते । देवाः । अधिपतय इत्यधिऽपतयः ।

सोमः । हेतीनाम् । प्रतिधर्तेति प्रतिऽधर्ता ॥ ढां ॥१०॥

एकविꣳश इत्येकऽविꣳशः । त्वा । स्तोमः । पृथिव्याम् । श्रयतु ।

निष्केवल्यम् । निःकैवल्यमिति निःऽकैवल्यम् । उक्थम् । अव्यथायै । स्तम्नातु ।

वैराजम् । साम । प्रतिष्ठित्यै । प्रतिस्थित्या इति प्रतिऽस्थित्यै । अन्तरिक्षे ॥ ठूं ॥११॥

ऋषयस्त्वा ॥ ऋ ॥१२॥

---

7. B1 आवर्तते, H2–3 य च तते for या वर्तते; B1 om. नाम; H3 आदित्यानां for आदित्याः नाम

सा– अथ चतुर्थः– ' स्वराळस्युदीची दिङ्मरुतस्ते देवा अधिपतयः । सोमो हेतीनां प्रतिधर्ता ॥ एकविंशशस्त्वा स्तोमः पृथिव्यां श्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु । वैराजं साम प्रतिष्ठित्या अन्तरिक्षे ॥ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु । विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ' इति । " अभि त्वा शूर नोनुमः " (ऋ ७.३२.२२) इत्यादिकं शस्त्रं [v]निष्केवल्यम् ॥१०–१२॥

आ– अथोत्तरतः – ' स्वराळस्युदीची दिक् ' इति । उदीच्याः दिशः [v]स्वराट् इति नाम । अस्याः [v]ते तत्र [v]मरुत. [v]देवाः [v]अधिपतयः । [v]हेतीनां [v]सोमः [v]प्रतिधर्ता ॥१०॥

[v]एकविंशः [v]स्तोमः [v]पृथिव्यां [v]त्वा त्वां [v]श्रयतु । [v]निष्केवल्यं नाम [v]उक्थम् [v]अव्यथायै अचलनाय [v]स्तभ्नातु । [v]वैराजं नाम [v]साम [v]अन्तरिक्षे [v]प्रतिष्ठित्यै स्तभ्नातु ॥११॥

' ऋषयस्त्वा ' इति । समानार्थः । लिङ्गोक्तदेवत्या त्रिष्टुप् यजुरन्ता ॥१२॥

अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयः ।
बृहस्पतिर्हेतीनां प्रतिधर्ता ॥१३॥
त्रिणवत्रयस्त्रिंशौ त्वा स्तोमौ पृथिव्यां श्रयतां
वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभ्नीताम् ।
शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षे ॥१४॥
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना
नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥१५॥(३)॥

अधिपत्नीत्यधिऽपत्नी । असि । बृहती । दिक् ।
विश्वे । ते । देवाः । अधिपतय इत्यधिऽपतयः ।
बृहस्पतिः । हेतीनाम् । प्रतिधर्तेति प्रतिऽधर्ता ॥ डां ॥१३॥
त्रिणवत्रयस्त्रिंशौ । त्रिनवत्रयस्त्रिंशा इति त्रिनवत्रयस्त्रिंशौ ।
त्वा । स्तोमौ । पृथिव्याम् । श्रयताम् ।

---

9. B1 om. अचलनाय; H2 अचल [त]यै for अचलनाय; H2–3 om. साम

नाकसदाख्येष्टकामन्त्राः]

वैश्वदेवाग्निमारुते इति वैश्वदेवाग्निमारुते । उक्थे इत्युक्थे । अव्यथायै । स्तभ्नीताम् ।

शाक्वररैवते इति शाक्वररैवते । सामनी इति सामनी ।

प्रतिष्ठित्यै । प्रतिस्थित्या इति प्रतिऽस्थित्यै । अन्तरिक्षे ॥ यूं ॥१४॥

ऋषयस्त्वा ॥ ऋ ॥१५॥(३)॥

सा– अथ पञ्चमः – ‘ अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयः । बृहस्पतिर्हेतीनां प्रतिधर्ता ॥ त्रिणवत्रयस्त्रिंशौ त्वा स्तोमौ पृथिव्याᳪश्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभ्नीताम् । शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षे ॥ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु । विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ’ इति । अधिपत्नी अधिकं पालयित्री अधिपत्नी बृहती दिक् प्रौढोर्ध्वा दिक् । “ तत्सवितुर्वृणीमहे ” (ऋ ५·८२·१) इत्यादिकं शस्त्रं वैश्वदेव्यम् । “ वैश्वानराय पृथुपाजसे ” (ऋ ३·३·१) इत्यादिकं शस्त्रमग्निमारुतम् । शिष्टं व्याख्याताभिप्रायमेतत् । अतो (त्र ?) यान्युदाहृतानि आज्यादिशस्त्राणि तान्याश्वलायनो दर्शयति– “ प्र वो देवाय इत्याज्यमुपसंनुयात् ” (आश्वश्रौ ५·९·१५) इति, “ वायुरग्रेगा यज्ञप्रीरिति सप्तानां पुरोरुचां तस्यास्तस्या उपरिष्टात्तृचं तृचं शंसेत् ” (आश्वश्रौ ५·१०·४), “ वायवायाहि दर्शतेति सप्त तृचाः द्वितीयां प्रउगे त्रिः ” (आश्वश्रौ ५·१०-४) इति, “ मरुत्वतीयं शस्त्रं शंसेदध्वर्यो शोंसावोमिति माध्यंदिने शस्त्रादिष्वाहावः । आ त्वा रथं यथोतय इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ ” (आश्वश्रौ ५·१४·२-४) इति । “ निष्केवल्यस्य अभि त्वा शूर नोनुमोऽभि त्वा पूर्वपीतय इति प्रगाथौ स्तोत्रियानुरूपौ यदि रथन्तरं पृष्ठम् ” (आश्वश्रौ ५·१६·१-२) इति । “ तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ ” (आश्वश्रौ ५·१८·४) इति । “ स्वभ्यग्रमाग्निमारुतम् । तस्याऽऽद्यां पच्छ ऋगावानं पच्छः शस्या चेदर्धर्चश इतराम् । संतानमुत्तमेन वचनेन वैश्वानराय पृथुपाजसे ... ” (आश्वश्रौ ५·२०·२-४) इति ॥१३–१५॥

[इति षोडशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

आ– अथ मध्ये ‘ अधिपत्न्यसि बृहती दिक् ’ इति । एषा दिक् । अस्या ऊर्ध्वाया दिशः अधिपत्नी इति नाम । ये विश्वे देवाः ते अस्याः अधिपतयः । अस्याः हेतीनां बृहस्पतिः प्रतिधर्ता ॥१३॥

त्रिणवत्रयस्त्रिंशौ त्वा स्तोमौ पृथिव्यां त्वां श्रयताम् । वैश्वदेवाग्निमारुते द्वे उक्थे अव्यथायै स्तभ्नीतां स्थिरीकुरुताम् । शाक्वररैवते द्वे सामनी अन्तरिक्षे प्रतिष्ठित्यै स्तभ्नीत ॥१४॥

‘ ऋषयस्त्वा ’ इति व्याख्यातः ॥१५॥

[इति षोडशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

———

9. P1 om. अधिपत्नी; S2 om. अधिकं

27. H2–3 °कुरुतः for °कुरुताम्

[अथ चतुर्थोऽनुवाकः ।]

सा– तृतीये नाकसदाख्या इष्टका उक्ताः । चतुर्थे पञ्चचूडाख्या इष्टका उच्यन्ते—

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ ।
पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ
दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिः ।।१।।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।।२।।

अयम् । पुरः । हरिकेश इति हरिऽकेशः । सूर्यरश्मिरिति सूर्यऽरश्मिः ।
तस्य । रथगृत्स इति रथऽगृत्सः । च । रथौजा इति रथऽओजाः । च ।
सेनानीग्रामण्यौ । सेनानीग्रामन्याऽइति सेनानीग्रामन्यौ ।
पुञ्जिकस्थलेति पुञ्जिकऽस्थला । च । क्रतुस्थलेति क्रतुऽस्थला । च ।
अप्सरसौ । दङ्क्ष्णवः । पशवः । हेतिः । पौरुषेयः । वधः ।
प्रहेतिरिति प्रऽहेतिः ॥ ठौं ॥१॥
तेभ्यः । नमः । अस्तु । ते । नः । मृळयन्तु । ते । नः । अवन्तु ।
ते । यम् । द्विष्मः । यः । च । नः । द्वेष्टि । तम् । एषाम् । जंभे ॥ दध्मः ॥ स्नः ॥२।

कात्यायनः – "अयं पुर इति पञ्चचूडाः प्रतिमन्त्रम्" (काश्रौ १७·१२·२) इति । याः सर्वासामिष्टकानां शिखास्थानीयास्ताः पञ्च पञ्च मन्त्रैरुपदध्यादित्यर्थः । तत्र प्रथममन्त्रपाठस्तु– 'अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ । पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिः ।। तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः' इति । हरिकेशः हिरण्यवर्णा केशसमाना ज्वाला यस्यासौ हरिकेशः । सूर्यरश्मय इव रश्मयो यस्यासौ सूर्यरश्मिः । एवंभूतः यः अयम् इष्टकारूपोऽग्निः पुरः पूर्वस्यां दिशि अवस्थापितः । तस्य अग्नेः रथगृत्सः । गृत्सो मेधावी । रथयुद्धकुशल इत्यर्थः । रथे ओजो बलं यस्य स रथौजाः । चकारौ समुच्चयार्थौ । एतन्नामकौ सेनां नयतीति सेनानीः । ग्रामं नयतीति ग्रामणीः । तौ सेनानीग्रामण्यौ वासन्तिकौ मासौ परिचारकौ । तथा पुञ्जीकृतरूपलावण्यसौभाग्यगुणस्थला पुञ्जिकस्थला । क्रतूनां संकल्पनां स्थलमिव स्थिता क्रतुस्थला । एतदाख्ये दिगुपदिग्रूपे द्वे अप्सरसौ परिचारिके । दङ्क्ष्णवः पशवः दंशनशीला व्याघ्रादयः पशुवर्गाः, पौरुषेयः पुरुषसंबन्धी हेतिः आयुधं, वधः हननशीलः प्रहेतिः प्रकृष्टमायुधम् । एवंभूतौ हेतिप्रहेती अप्यायुधविशेषौ । यस्याग्नेरिदं सर्वमस्ति हे इष्टके, त्वं तदग्निस्वरूपासीत्यर्थः ॥१॥

17. S2 om. पञ्च पञ्च मन्त्रैः
26. S2 om. पशुवर्गाः

योऽयमग्निर्यौ च सेनानीग्रामण्यौ ये चाप्सरसौ ये च हेतिप्रहेती vतेभ्यः सर्वेभ्यः vनमः vअस्तु। vते सर्वे vनः अस्मान् vमृळयन्तु सुखयन्तु। vते vनः अस्मान् vअवन्तु रक्षन्तु। vयं वैरिणं vते वयं vद्विष्मः द्वेषं कुर्मः, vयः vच वैरी vनः अस्मान् vद्वेष्टि vतं वैरिणम्v एषां हेतिप्रहेत्यादीनां vजम्भे दंष्ट्राकराले vदध्मः स्थापयामः ॥२॥

आ— पञ्चचूडा उपदधाति 'अयं पुरः' इति। लिङ्गोक्तदेवत्या अतिशक्वरी। यः vअयम् अग्निः vपुरः। "अग्निर्वै पुरः" (शब्रा ८.१.१.४) इति श्रुतेः। यः पुरस्तादुद्धार्योपचरति स पुर इत्युच्यते। vहरिकेशः च हरितज्वालः। सुवर्णवर्णार्चिरित्यर्थः। vसूर्यरश्मिः च सूर्यस्य रश्मय इव रश्मयो यस्य स सूर्यरश्मिरग्निः। vतस्य अग्नेः। vरथगृत्सः। रथे अवस्थितो गृत्सः मेधावी। गृत्स इति मेधावी नाम। गृणतेः स्तुतिकर्मणो रूपम्। रथयुद्धकुशल इत्यर्थः। vरथौजाः। रथे ओजो बलं यस्य सः। समुच्चयार्थौ चकारौ। vसेनानीग्रामण्यौ। सेनां नयतीति सेनानीः। ग्रामं नयतीति ग्रामणीः। तौ सेनानीग्रामण्याविति वासन्तिकौ मासौ। ऋतुश्च। "वासन्तिकौ तावृतू" (शब्रा. ८.६.१.१६) इति श्रुतेः। 'पुञ्जिकस्थला च ऋतुस्थला चाप्सरसौ' इति। पुञ्जीकृतरूपलावण्यसौभाग्यगुणस्थला vपुञ्जिकस्थला। ऋतूनां संकल्पानां स्थलमिव स्थला vऋतुस्थला vच vअप्सरसौ दिशश्चोपदिशश्चेति। 'दङ्क्ष्णवः पशवः'। दंश दंशने। दंशनशीलाः vदङ्क्ष्णवः vपशवः vहेतिः वज्रः आयुधम्। vपौरुषेयः पुरुषसंबन्धी पुरुषजनितो vवधः पौरुषेयः विनाशः vप्रहेतिः उत्कृष्टमायुधं, यदन्योन्यं हन्ति सः। "पौरुषेयो वधः प्रहेतिः" (शब्रा ८.६.१.१६) इति श्रुतेः ॥१॥

एवं ये अग्न्यादयो ये पञ्च चूळाः चूडाः। चूडा नाम सर्वासां चितीनां शिरःस्थानीयाः इष्टकाश्च। vतेभ्यः vनमः vअस्तु। तेभ्य एव नमस्करोति। vते च vनः अस्मान् vमृळयन्तु सुखयन्तु। vते च vनः अस्मान् vअवन्तु रक्षन्तु। vयं शत्रुं वयं vद्विष्मः vयः vच शत्रुः vनः

2. P1 रक्षयन्तु for रक्षन्तु
3. P1 after °कराले adds त्वन्मुखे
5. P1 °तूला for °चूडा
7. B1 °पचते for °चरति
12. B1 ऋतुः for ऋतुश्च; B1 om. तौ
13. B1 om. पुञ्जिक ... गुणस्थला
19. B1 तूलः for चूळाः; B1 चूडानं चूडाः; H2-3 चूडाः पञ्चचूडाः for चूडाः। चूडा नाम
20. B1 om. नः
21. H2-3 यः शत्रुस्तं for यं शत्रुं

ᵛद्वेष्टि ᵛतं शत्रुम् ᵛएषां हेतिप्रहेत्यादीनं ᵛजम्भे दंष्ट्राकराले ᵛदध्मः प्रक्षिपामः । यत्र लैङ्गादिपुराणेषु प्रसिद्धप्रक्रियया अग्न्यात्मकसूर्यरश्मिरथादिकल्पनादिदृष्टिविशिष्टेष्टकाश्चिन्तनीया इति [तत्र] तत्परत्वे वा मन्त्राणां योजनाः ॥२॥

अ॒यं द॑क्षि॒णा वि॒श्वक॑र्मा॒ तस्य॑ रथस्व॒नश्च॒ रथे॑चित्रश्च सेनानीग्राम॒ण्यौ॑ ।
मे॒न॒का च॑ सहज॒न्या चा॑प्स॒रसौ॑ यातु॒धाना॑ हे॒ती रक्षा॑ꣳसि॒ प्रहे॑तिः ॥३॥
तेभ्यो॒ नमो॑ अस्तु॒ ते नो॑ मृळयन्तु॒ ते नो॑ऽवन्तु ।
ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तमे॑षां॒ जम्भे॑ दध्मः ॥४॥

अ॒यम् । द॒क्षि॒णा । वि॒श्वक॒र्मेति॑ वि॒श्वऽक॑र्मा ।
तस्य॑ । र॒थ॒स्व॒न इति॑ र॒थ॒ऽस्व॒नः । रथे॑चित्र॒ इति॒ रथे॑ऽचित्रः ।
मे॒न॒का । स॒ह॒ज॒न्येति॑ स॒ह॒ऽज॒न्या । अ॒प्स॒रसौ॑ । या॒तु॒धा॒ना इति॑ या॒तु॒ऽधाना॑ः ।
हे॒तिः । रक्षा॑ꣳसि । प्रहे॑ति॒रिति॒ प्रऽहे॑तिः ॥ ड्रीं ॥३॥
तेभ्यो॒ नमः॑ ॥ अ ॥४॥

सा– अथ द्वितीयः – ' अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ । मेनका च सहजन्या चाप्सरसौ यातुधाना हेती रक्षाꣳसि प्रहेतिः ॥ तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ' इति । विश्वानि कर्माण्यग्निहोत्रादीनि यस्य सः ᵛअयम् अग्निः ᵛविश्वकर्मा । ᵛदक्षिणा दक्षिणस्यां दिशि स्थितः ᵛतस्य ᵛरथस्वनः सेनानी ᵛरथेचित्रः ग्रामणीः । मानयन्त्येनां जना इति मेना । सैव ᵛमेनका । समना जनानां ᵛसहजन्या । मेनकेति सहजन्येति ᵛच अप्सरसो नामधेयम् । ᵛयातुधानाः ᵛरक्षांसि चेत्यवान्तरजातिभेदोऽवगन्तव्यः । हेतिप्रहेती अप्यायुधविशेषौ । तत्र यातुधानाः क्रूरास्तीक्ष्णहेतिस्वरूपाः । रक्षांसि अतिक्रूराणि अतितीक्ष्णप्रहेति-स्वरूपाणि यस्याग्नेरिदं सर्वं हे इष्टके, त्वं तदग्निस्वरूपा असीत्यभिप्रायः । शिष्टं व्याख्यातम् ॥३-४॥

आ– अथ दक्षिणतः– ' अयं दक्षिणा विश्वकर्मा ' इति । लिङ्गोक्तदेवत्यातिजगती । दक्षिणतः ᵛविश्वकर्मा सर्वस्य कर्ता वायुः । ᵛतस्य वायोः ᵛरथस्वनः रथेऽवस्थितो महास्वनः ।

2. H2-3 लैङ्ग्य, B1 लेङ्गय for लैङ्ग°; B1 प्रसिद्धि, H2-3, प्रसिद्धं for प्रसिद्ध°; B1 °वृष्टि° for °दृष्टि°; B1 विशिष्टेष्वेकाग्नि तनीयाः for विशिष्टेष्टकाश्चिन्तनीयाः
3. B1 योजनात् for योजनाः
16. S2 रथ° for रथे°
19. P1 om. अतिक्रूराणि
21. H2-3 °देवत्यं जगती for °देवत्यातिजगती

स्वनः शब्दः । [v]रथेचित्रः [v]च रथेऽवस्थितो [वि]चित्रयोधी रथेचित्रः । [v]सेनानीग्रामण्यौ । ‘ मेनका च सहजन्या च ’ । मा लक्ष्मीः । तस्याः कला इन इवोद्गता [v]मेनका । मानयन्त्येता एनामिति वा मेनका । समानजन्मा [v]सहजन्या [v]अप्सरसौ हि देशश्चोपदिशश्चेति । [v]यातुधानाः हैवात्र [v]हेतिः, [v]रक्षांसि [v]प्रहेतिः ॥३॥

एवमभिहिता ये [v]तेभ्यः [v]नमः [v]अस्तु इति । व्याख्यातो मन्त्रः ॥४॥

अयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ ।
प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ
व्याघ्रा हेतिः सर्पाः प्रहेतिः ॥५॥
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६॥

अयम् । पश्चात् । विश्वव्यचा इति विश्वऽव्यचाः ।
तस्य । रथप्रोत इति रथऽप्रोतः । असमरथ इत्यसमऽरथः ।
प्रम्लोचन्तीति प्रऽम्लोचन्ती । अनुम्लोचन्तीत्यनुऽम्लोचन्ती ।
अप्सरसौ । व्याघ्राः । हेतिः । सर्पाः । प्रहेतिरिति प्रऽहेतिः ॥ खीं ॥५॥
तेभ्यो नमः ॥ अ ॥६॥

सा– अथ तृतीयः – ‘ अयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ । प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ व्याघ्रा हेतिः सर्पाः प्रहेतिः ॥ तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ’ इति । विश्वं व्यचति व्याप्नोतीति [v]विश्वव्यचाः । सः [v]अयम् अग्निः [v]पश्चात् प्रतीच्यां दिशि वर्तते । [v]तस्य [v]रथप्रोतः रथेऽवस्थितः प्रोत इव [v]असमरथः अन्यैः रथिभिरतुल्यः [v]प्रम्लोचन्ती पुमांसं प्रत्यात्मानं दर्शयन्ती । स हि तस्याः स्वभावः । [v]अनुम्लोचन्ती । स एवार्थः । सर्वमन्यत् पूर्ववद् व्याख्येयम् ॥५–६॥

---

1. B1 रथेचित्राद्याश्चाचित्रः for रथेचित्रः ...... °चित्रः ।
3. B1 om. उपादिशः
4. B1 om. रक्षांसि प्रहेतिः
19. S2 om. रथप्रोतः; S2 स्वोतश्च for प्रोत इव
20. S2 अनभितुल्यः for अतुल्यः

आ-- अथ पश्चात् – ' अयं पश्चाद् विश्वव्यचाः ' इति । लिङ्गोक्तदेवत्यातिजगती। [V]अयं [V]पश्चात् परिदृश्यमानः आदित्यः [V]विश्वव्यचाः । सर्वतः विशेषतः व्यश्नुते गच्छति विश्वतो व्यञ्जयतीति वा । [V]तस्य आदित्यस्य [V]रथप्रोतः [V]च [V]असमरथः [V]च । रथे प्रोत इव अनुस्यूत इव अवस्थितः रथप्रोतः । समरथशून्यः अन्यैः रथिभिश्चातुल्यरथः असमरथः । [V]सेनानीग्रामण्यौ च वार्षिकावृतू च । [V]प्रम्लोचन्ती [V]च । तं तं पुमांसं प्रति आत्मानं प्रम्लोचयन्ती दर्शयन्ती च । अयं तस्या स्वभाव इति । तथैव [V]अनुम्लोचन्ती [V]च [V]अप्सरसौ । [V]व्याघ्राः शार्दूलाः इवोग्राः । [V]हेतिः । [V]सर्पाः इव [V]प्रहेतिः ॥५॥

एवमुक्ता ये [V]तेभ्यः [V]नमः [V]अस्तु इति । व्याख्यातः ॥६॥

अयमुत्तरात् संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ ।
विश्वाची च घृताची चाप्सरसा आपो हेतिर्वातः प्रहेतिः ॥७॥
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥८॥

अयम् । उत्तरात् । संयद्वसुरिति संयत्ऽवसुः ।
तस्य । तार्क्ष्यः । अरिष्टनेमिरित्यरिष्टऽनेमिः ।
विश्वाची । घृताची । अप्सरसौ ।
आपः । हेतिः । वातः । प्रहेतिरिति प्रऽहेतिः ॥ ठ्रीं ॥७॥
तेभ्यो नमः ॥ अ ॥८॥

सा - अथ चतुर्थः – ' अयमुत्तरात् संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ । विश्वाची च घृताची चाप्सरसा आपो हेतिर्वातः प्रहेतिः ॥ तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ' इति । सम्यक् प्राप्तं वसु धनं यस्याग्नेः सः [V]अयं [V]संयद्वसुः । सोऽग्निः [V]उत्तरात् उत्तरस्यां दिशि वर्तते । [V]तार्क्ष्यः तीर्णोऽन्तरिक्षे क्षिपति निवसतीति तार्क्ष्यः । [V]अरिष्टनेमिः अनुपहिंसितायुधः । [V]विश्वाची इति । विश्वं प्रत्यञ्चनशीला । [V]घृताची घृताञ्चना ।

---

1. H2–3 जगती for अतिजगती
5. B1 om. तं तं
7. B1 om. सर्पा इव प्रहेतिः ।
20. P1 after सम्यक् add यत्
22. S2 om. विश्वं

" घृतं वै अप्सरसामन्नम् " । तथा चोर्वशीवाक्यम्– " घृतस्य स्तोकं सकृदह्न आश्नाम् ' (ऋ १०.९५.१६; शब्रा ११.५.१.१०) इति । ' आपो हेतिर्वातः प्रहेतिः ' । शेषं पूर्ववत् ॥७–८॥

आ– अथोत्तरतः – ' अयमुत्तरात् ' इति । लिङ्गोक्तदेवत्या त्रिष्टुप् । ᵛउत्तरात् उत्तरतः । ᵛअयं यज्ञः ᵛसंयद्वसुः । संयन्ति संगीकृतं वसु धनमिति । यद्वा– धनलिप्सवो जनाः यं प्रति संयन्तीति यज्ञः संयद्वसुः । तस्य यज्ञस्य विस्तीर्णे अन्तरिक्षे तृक्षतीति ᵛतार्क्ष्यः । अनुपहिंसितायुधः ᵛअरिष्टनेमिः । विश्वान् सर्वान् प्रत्यञ्चनशीला ᵛविश्वाची । साधारणा हि सा । घृताञ्चना ᵛघृताची । घृतं ह्यप्सरसामन्नम् ।" घृतस्य स्तोकं सकृदह्न आश्नाम् " (ऋ १०.९५.१६; शब्रा ११.५.१.१०) इति श्रुतेः । " दिक् चोपदिशा च " (शब्रा ८.६ १.१६) इति श्रुतेः । ' आपो हेतिर्वातः प्रहेतिः ' ॥७॥

एवमभिहितेभ्यः ' तेभ्यो नमः ' इति । व्याख्यातः ॥८॥

अयमुपर्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ ।
उर्वशी च पूर्वचित्तिश्चाप्सरसा अवस्फूर्जन् हेतिर्विद्युत् प्रहेतिः ॥९॥
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥१०॥(४)॥

अयम् । उपरि । अर्वाग्वसुरित्यर्वाक्ऽवसुः ।
तस्य । सेनजिदिति सेनऽजित् । सुषेणः । सुसेन इति सुऽसेनः ।
उर्वशी । पूर्वचित्तिरिति पूर्वऽचित्तिः । अप्सरसौ ।
अवस्फूर्जन्नित्यवऽस्फूर्जन् । हेतिः । विद्युदिति विऽद्युत् ।
प्रहेतिरिति प्रऽहेतिः ॥ ञ्व्युं ॥॥९॥
तेभ्यो नमः ॥ त ॥१०॥(४)॥

सा– अथ पञ्चमः – ' अयमर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ । उर्वशी च पूर्वचित्तिश्चाप्सरसा अवस्फूर्जन् हेतिर्विद्युत् प्रहेतिः ॥ तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।

1. om. घृतं वै ... इति । (L 2)
4. B1 संगीतं for सङ्गीकृतं
6. B1 after सा add घृतवेनाः
7. H2-3 after घृताञ्चना add घृतेनो

ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ' इति ॥ vअर्वाग्वसुः अधोमुखत्वेन वसुनो मेघाद् भूमौ पतनाद् वैद्युतोऽग्निस्तथोच्यते । स च vउपरि ऊर्ध्वायां दिशि वर्तते । vतस्य अग्नेः सेनां जयतीति vसेनजित् सेनानीः । शोभना सेना यस्यासौ vसुषेणः ग्रामणीः । उरुः पृथुः कामो वशे यस्याः अस्तीति vउर्वशी । रूपलावण्यातिशयात् पूर्वमेव पुरुषाणां चित्तमभ्युपैतीति vपूर्वचित्तिः । एते vअप्सरसौ । भयहेतुः शब्दविशेषः vअवस्फूर्जन् । स्फूर्जतिर्वज्रनिर्घोषः । भयहेतुप्रकाशा vविद्युत् प्रसिद्धा । एतावपि हेतिप्रहेतिरूपावायुधविशेषौ । शिष्टं स्पष्टम् ॥९-१०॥

[इति षोडशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

आ– अथ मध्ये– ' अयमुपरि ' इति लिङ्गोक्तदेवत्या जगती । vउपरि, vअयं पर्जन्यः उपरीत्युच्यते । अर्वागिति प्रजाः । तेभ्यः अर्वाक् अञ्चति ददाति वसु इति । वसुर्वृष्टिरन्नमिति । vअर्वाग्वसुः । प्रजाभ्यो वृष्टिं ददातीति अर्वाग्वसुः पर्जन्यः । vतस्य vसेनजित् vच । सेनां जयतीति सेनजित् । vसुषेणः । शोभना सेना यस्य सः सुषेणः । vसेनानीग्रामण्यौ । vउर्वशी । उरुः पृथुः कामोऽस्यामित्युर्वशी सौभाग्यातिशयात् । पूर्वमेव पुंसां चित्तमभ्युपैतीति vपूर्वचित्तिः । vअप्सरसौ । अवस्फूर्जतिर्निष्पेषार्थः । vअवस्फूर्जन् निःष्पेषं कुर्वन् । v हेतिः आयुधम् । vविद्युत् । विशेषेण द्युति अवखण्डतीति विद्युत् । vप्रहेतिः ॥९॥

एवमभिहितेभ्यः ' तेभ्यो नमः अस्तु ' इति । व्याख्यातो मन्त्रः ॥१०॥

[इति षोडशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

[अथ पञ्चमोऽनुवाकः ।]

सा– चतुर्थेऽनुवाके चूडाख्या इष्टका उक्ताः । पञ्चमे छन्दस्या इष्टका उच्यन्ते–

अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत् पतिः॑ पृथि॒व्या अ॒यम् ।
अ॒पाꣳ रेताꣳसि जिन्वति ॥१॥

अ॒ग्निर्मू॒र्धा ॥ अ ॥१॥

1.　P1 अर्वाङ् for अधो°; P1 S2 वसनात् for वसुनो
5.　S2 उभयहेतुः for भयहेतुः; P1 S2 °हेतुः प्रकाशो for हेतुप्रकाशा
9.　H2-3 अर्द्धेदिप्रजाः, B1 सर्वे ते प्रजाः for अर्वागिति प्रजाः
11.　B1 om. सुषेणः शोभना सेना यस्य सः

कात्यायनः – " छन्दस्यास्तिस्रस्तिस्रोऽनूकान्तेषु पुरस्ताद्गायत्रीरग्निर्मूर्धेति प्रत्यृचम् " (काश्रौ १७·१२·५) इति । गायत्र्यादिछन्दस्काभिः ऋग्भिरुपधेया इष्टकाः छन्दस्याः । ता अनूकादिप्रदेशेषु तिस्रस्तिस्र उपदध्यात् । तत्र पूर्वभागे गायत्रीछन्दस्काभिर्ऋग्भिरुपधेया इष्टकाः ' अग्निर्मूर्धा ' इति । त्र्यृचेन क्रमेणोपदध्यात् । तत्र प्रथमा– ' अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ' इति । अयम् अग्निः आदित्यरूपेण दिवः द्युलोकस्य ककुत् इव स्थितः मूर्धा शिरःस्थानीयः । तथा पृथिव्याः पतिः दाहपाकादिकारित्वेन पालकोऽप्ययम् । किं च – अपां रेताꣳसि उदककार्याणि स्थावरजंगमशरीराणि जठराग्निरूपेण जिन्वति प्रीणयति ॥१॥

आ– छन्दस्या उपदधाति– ' अग्निर्मूर्धा ' इति । अग्निदेवत्योऽयमनुवाकः । प्रथमास्तिस्र ऋचो गायत्र्यः । ' अग्निर्मूर्धा ' इति विरूपः । ऋषिविशेषोक्तिर्यत्र नास्ति तत्र सामान्येन अध्यायादावुक्त एव ऋषिर्ज्ञातव्यः । यद्वा– ऋषिविशेषोक्तिपर्यन्तम् उक्त एवानुगन्तव्य ऋषिः । परापररूपेणात्राग्निः स्तूयते । अयम् अग्निः दिवः द्युलोकस्य मूर्धा भवति । ककुत् इति महन्नाम । अयमेव महानात्मा जगतः कारणमित्यर्थः । अयम् एवाग्निः पृथिव्याः पतिः । तापप्रकाशादिभिरयमग्निः सर्वाः प्रजाः पाति रक्षति अनुगृह्णातीति पतिः । किं च– अयमेव अपां रेतांसि जिन्वति । याः एताः द्युलोकात् निपतन्ति तासामपां रेतांसीति कारणमुच्यते । अयमग्निरेव अपां मूलकारणं जिन्वति तर्पयतीत्यर्थः ॥१॥

अ॒यम॒ग्निः स॑ह॒स्रिणो॒ वाज॑स्य श॒तिन॒स्पतिः॑ ।
मू॒र्धा क॒वी र॑यी॒णाम् ॥२॥

अ॒यम् । अ॒ग्निः । स॒ह॒स्रिणः॑ । वाज॑स्य । श॒तिनः॑ । पतिः॑ ।
मू॒र्धा । क॒विः । र॒यी॒णाम् ॥ ळौ ॥२॥

सा– अथ द्वितीयः – ' अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ' इति । अयम् समिध्यमानः अग्निः सहस्रिणः सहस्रसंख्यावतः शतिनः शतसंख्यावतः वाजस्य अन्नस्य पतिः । अत एव मूर्धा शिरोवदुत्तमः । कविः विद्वान्, तादृशः रयीणां धनानां दाता भवतु ॥२॥

2. P1 छन्दस्काभिः for °छन्दस्याभिः
3. S2 om. तत्र ... क्रमेणोपदध्यात् (L 4)
4. P1 त्रि ऋचेन for त्र्यृचेन
8. B1 तृचो for तिस्र ऋचो (L 9)
11. H3 देवो for दिवः
14. B1 om. रेतांसि ... तासामपां
21. P1 च for एव

आ– [v]अयं प्रसिद्धः [v]अग्निः [v]सहस्रिणः [v]वाजस्य [v]शतिनः [v]पतिः । सहस्राणि बहूनि पश्वादिफलानि विद्यन्ते यस्य सः सहस्री, तस्य । वाजस्य अन्नस्य शतानि विद्यन्ते यस्य सः श [ती], तस्य शतिनः पतिः अधिपतिः । 'मूर्धा कवी रयीणाम्' । [v]रयीणां धनानां [v]मूर्धा प्रधानभूतोऽसि सर्वपुरुषार्थसाधनभूतोऽसि । [v]कविः क्रान्तदर्शनश्च । अतस्त्वां स्तुम इति शेषः ॥२॥

त्वाम॑ग्ने पुष्क॑राद॒ध्यथ॑र्वा॒ निर॑मन्थत ।
मू॒र्ध्नो विश्व॑स्य वा॒घतः॑ ॥३॥

त्वाम॑ग्ने ॥ त्व ॥३॥

सा– अथ तृतीयः – 'त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः' इति । हे [v]अग्ने, अथर्वाख्य ऋषिः [v]पुष्करात् [v]अधि पद्मपत्रस्योपरि त्वां [v]निरमन्थत निःशेषेण मथितवान् । अत एव तैत्तिरीये पञ्चमकाण्डे ब्राह्मणमाम्नातम्– "पुष्करपर्णे ह्येनमुपश्रितमविन्दत्" (तैसं ५.१.४) इति । कीदृशात् पुष्करात् ? [v]मूर्ध्नः उत्तमाङ्गवत् प्रशस्तात् । [v]विश्वस्य [v]वाघतः सर्वस्य जगतः वाहकात् । इदं हि पुष्करपर्णमग्निममन्थत् । यज्ञनिष्पादनादिद्वारा सर्वं जगन्निर्वहति ॥३॥

आ– 'त्वामग्ने पुष्करात्' इति । आग्नेयी । गायत्री । मन्त्रोऽयं व्याख्यातः ॥३॥

भुवो॑ य॒ज्ञस्य॒ रज॑सश्च ने॒ता यत्रा॑ नि॒युद्भिः॒ सच॑से शि॒वाभिः॑ ।
दि॒वि मू॒र्धानं॑ दधिषे स्व॒र्षां जि॒ह्वाम॑ग्ने चकृषे हव्य॒वाह॑म् ॥४॥

भुवो॑ य॒ज्ञस्य॑ ॥ अ ॥४॥

सा– कात्यायनः – "उत्तराश्च ॥ पुरस्तात् त्रिष्टुभो रेतःसिग्वेलायां भुवो यज्ञस्येति" (काश्रौ १७.१२.६-७) । त्रिष्टुप्छन्दस्काभिर्ऋग्भिरुपधेया इष्टकास्त्रिष्टुभस्तास्तिस्रो गायत्रीष्टकानां पूर्वभागे उपदध्यादिति शेषः । तत्र प्रथमा– 'भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम्' इति । अयमग्निर्भूलोकस्य तत्रानुष्ठेयस्य

3. H2–3 om. शती; H2–3 यस्य for तस्य
4. B1 om. सर्व°; H2–3 om. च
11. S2 अनिन्दत् for अविन्दत्
19. S2 om. पुरस्तात्

छन्दस्येष्टकामन्त्राः]

ˇयज्ञस्य तस्मिन् यज्ञे प्रवर्तकस्य ˇरजसः रजोगुणस्य ˇच ˇनेता निर्वाहकः । तादृश हे ˇअग्ने, ˇयत्र यस्यां दिवि सूर्यरूपो भूत्वा ˇनियुद्भिः रथे नितरां योज्यमानाभिः ˇशिवाभिः उत्तमाभिरश्वजातिभिः ˇसचसे समवैषि तस्यां ˇदिवि ˇमूर्धानं शिरोवदुन्नतिं ˇदधिषे धारयसि । कीदृशं मूर्धानम् ? ˇस्वर्षाम् । स्वः स्वर्गो स्यति सर्वदा तिष्ठतीति स्वर्षास्तं स्वर्षाम् । सोमपाशब्दवत् पुंलिङ्गोऽयम् । हे अग्ने, त्वमस्मिन् यज्ञे ˇहव्यवाहं हविषः प्रापिकां ˇजिह्वां ज्वालां ˇचकृषे करोषि ॥४॥

आ– ‘ भुत्रो यज्ञस्य ’ इति । त्रिष्टुबाग्नेयी । व्याख्यातो मन्त्रः ॥४॥

अबो॑ध्यग्निः स॒मिधा॒ जना॑नां॒ प्रति॑ धे॒नुमि॑वाय॒तीमु॒षास॑म् ।
य॒ह्वाइ॑व॒ प्र व॒यामु॒ज्जिहा॑ना॒ः प्र भा॒नव॑ः सिस्रते॒ नाक॒मच्छ॑ ॥५॥

अबो॑धि । अ॒ग्निः । स॒मिधेति॑ स॒म्ऽइधा॑ । जना॑नाम् ।
प्रति॑ । धे॒नुमि॒वेति॑ धे॒नुम्ऽइ॑व । आ॒य॒तीमित्या॑ऽय॒तीम् । उ॒षास॑म् । उ॒ष॒समित्यु॑षऽस॑म् ।
य॒ह्वाइ॒वेति॑ य॒ह्वाःऽइ॑व । प्र । व॒याम् । उ॒ज्जिहा॑ना॒ इत्यु॑त्ऽजिहा॑नाः ।
प्र । भा॒नव॑ः । सि॒स्र॒ते॒ । नाक॑म् । अच्छ॑ ॥ धैं ॥५॥

सा– अथ द्वितीया– ‘ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् । यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ’ इति । ˇजनानाम् ऋत्विजां संबन्धिन्या ˇसमिधा अयम् ˇअग्निः ˇअबोधि प्रबोधितः प्रज्वलितोऽभूत् । तत्र दृष्टान्तः – ˇआयतीम् ˇउषासं ˇप्रति ˇधेनुम् ˇइव । उषःकाले समागते सति दोहनाय शयानां धेनुं यथोत्थापयन्ति तद्वत् । किं च– आहुतिभिर्दीप्तस्य बुध्यमानस्य अग्नेः ˇभानवः रश्मयः ˇप्रोज्जिहानाः प्रकर्षेणोद्गच्छन्तः ˇनाकम् ˇअच्छ स्वर्गमभिप्राप्तुं ˇप्रसिस्रते अतिशयेन प्रसरन्ति । तत्र दृष्टान्तः – ˇयह्वाइव । ˇवयां वीनां पक्षिणां मध्ये यह्वाः महान्तः पक्षिणो यथा प्रकर्षेण उत्पतन्ति तद्वत् । यद्वा– यथा महान्तो जातपक्षाः पक्षिणः प्रवयां गतवयस्कां वृक्षशाखाम् उज्जिहाना ऊर्ध्वं गच्छेयुस्तद्वत् ॥५॥

आ– ‘ अबोध्यग्निः ’ इति । आग्नेयी त्रिष्टुप् । ऋषिर्बुधः । ‘ अबोध्यग्निः समिधा जनानाम् ’ । ˇजनानां सत्यातिथिज्ञानश्रद्धासंपन्नानामग्निहोत्रिणां ˇसमिधा सम्यग्दीप्तिसाधनभूतया

1. P1 om. यज्ञे
2. P1 दिशि for दिवि; P1 निरन्तरं for नितरां; P1 om. उत्तमाभिः
14. P1 after जनानाम् ins. अग्निहोत्रिणाम्
16. S2 om. तद्वत् । ... दीप्तस्य
17. S2 उद्बुध्यमानस्य for बुध्यमानस्य; P1 after रश्मयः adds अर्चींषि
18. P1 after प्रसरन्ति ins. अच्छाभेराप्तुमिति शाकपूणिः; P1 after second यह्वाः ins. यह्व इति महन्नामसु पठितम्
22. H2–3 om. जनानां; B1 सत्यातिनोजन, H2–3 सत्यातिथिः भोजन° for सत्यातिथिज्ञान°

[छन्दस्येष्टकामन्त्राः

vअबोधि बोधितोऽसि प्रतिबुध्यते । कथमिव ? ' प्रति धेनुमिवायतीमुषासम् ' । यथा आगच्छन्तीं vधेनुं वत्सः प्रतिबुध्यते प्रतिबोधयति । यथा च vआयतीम् vउषासं मनुष्याः प्रतिबुध्यन्ते । यह्वा इति महतो नामधेयम् । यथा vयह्वाः महान्तो जातपक्षाः पक्षिणः vप्रवयां गतवयस्कां वृक्षशाखाम् vउज्जिहानाः परित्यजन्तः ऊर्ध्वं गच्छेयुः, एवम् । ' प्र भानवः सिस्रते नाकमच्छ ' । एवं vप्रभानवः प्रकृष्टदीप्तयः vनाकं स्वर्गं vसिस्रते । vअच्छ आप्तुम् । नाकमाप्तुमार्चिषं प्रसर्पन्ति ॥५॥

अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥६॥

अवोचाम । कवये । मेध्याय । वचः । वन्दारु । वृषभाय । वृष्णे ।
गविष्ठिरः । नमसा । स्तोमम् । अग्नौ ।
दिवीवेति दिविऽइव । रुक्मम् । उरुव्यञ्चमित्युरुऽव्यञ्चम् । अश्रेत् ॥ छूं ॥६॥

सा- अथ तृतीया - ' अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे । गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ' इति । अयं vकवये क्रान्तदर्शिने वह्नये vवचः वाक्यम् vअवोचाम । कीदृशाय कवये ? vमेध्याय यज्ञयोग्याय [vवृषभाय] श्रेष्ठाय vवृष्णे कामानां वर्षयित्रे । vगविष्ठिरः गविष्ठिराय भूमौ स्थिरत्वेनावस्थिताय । कीदृशं वचः ? vअग्नौ vनमसा vस्तोमम् अग्निविषये नमस्कारेण युक्तं स्तोत्ररूपम् । अत एव vवन्दारु वन्दनशीलम् । तत्र दृष्टान्तः - vदिवि द्युलोके vरुक्मं रोचमानम् vउरुव्यञ्चं विस्तीर्णगतिमादित्यं संध्यावन्दनादिषु ब्राह्मणैः प्रयुक्तं स्तुतिरूपं वाक्यम् vअश्रेत् आश्रयति । तद्वदस्मद्वचोऽपि वह्निमाश्रयतु ॥६॥

आ- ' अवोचाम कवये ' इति । आग्नेयी त्रिष्टुप् । vमेध्याय यज्ञियाय क्रियाशुद्धाय । वृष सेचने । vवृष्णे सेचनकर्त्रे यूने vवृषभाय श्रेष्ठाय vकवये क्रान्तदर्शनाय अग्नये vवन्दारु वन्दनशीलं vवचः स्तुतिलक्षणं वाक्यम् vअवोचाम उक्तवन्तो वयम् । अथ vगविष्ठिरः होता ।

---

1. B1 om. बोधितोऽसि ... प्रतिबोधयति (L 2)
2. H2-3 after °बुध्यते add प्रतिबोधय; H2-3 B1 after च add उषासं; B1 आयन्तीम् for आयतीम्
4. H3 प्लक्ष° for वृक्ष°
6. B1 प्रसरन्ति for प्रसर्पन्ति
14. S2 om. श्रेष्ठाय
19. H2-3 om. क्रिया°

गत्रि वचि स्थिरः अप्रचाल्यः । तस्य हि अग्निरधिष्ठात्री देवता । नमसा । नम इत्यन्ननाम । अन्नेन संयुक्तं स्तोमं स्तुतिम् अग्नौ श्रीभगवति अश्रेत् अग्निस्तुतिमकरोत् । कथमिव ? ' दिवीव रुक्मम् ' । यथा द्युमण्डले रुक्मं रोचमानम् उरुव्यञ्चं बहुविधविशिष्टगमनसंपन्नम् आदित्यं स्वरसौष्ठवादिभिर्युक्तस्तोमैराश्रयति ॥६॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥७॥

अयमिह ॥ अ ॥७॥

सा– कात्यायनः – " जगतीश्च पश्चादयमिहेति " (काश्रौ १७·१२·८) इति । जगतीच्छन्दस्काभिरुपधेया इष्टका जगत्यः । ताः पश्चिमभागे ' अयमिह ' इत्यादिभिस्तिसृभिर्ऋग्भिरुपधेया इति । तत्र प्रथमा– ' अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ' इति । सेयमृक् तृतीयेऽध्याये ' उप प्रयन्तः ' इत्यनुवाके व्याख्याता ॥७॥

आ– ' अयमिह ' इत्यादि तृचं जागतम् । प्रथमा व्याख्याता ॥७॥

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥८॥

जनस्य । गोपाः । अजनिष्ट । जागृविः ।
अग्निः । सुदक्ष इति सुऽदक्षः । सुवितार्य । नव्यसे ।
घृतप्रतीक इति घृतऽप्रतीकः । बृहता । दिविस्पृशेति दिविऽस्पृशा ।
द्युमदिति द्युऽमत् । वि । भाति । भरतेभ्यः । शुचिः ॥ थें ॥८॥

सा– अथ द्वितीया – ' जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे । घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ' इति । अयम् अग्निः अजनिष्ट उत्पन्नः । किमर्थम् ? सुविताय नव्यसे सुष्ठु प्राप्ताय स्तुतियुक्ताय कर्मणे । एतत्कर्मसिद्ध्यर्थमित्यर्थः । कीदृशोऽग्निः ? जनस्य गोपाः प्राणिनो रक्षकः सुदक्षः अत्यन्तकुशलः जागृविः कर्मणि सावधानः ।

2. B1 संभक्तं for संयुक्तं
3. B1 om. °विध° and °गमन°
21. P1 after नव्यसे ins. नवायेत्यर्थः ।

घृतं प्रतीके मुखे यस्यासौ vघृतप्रतीकः। तादृशोऽयमग्निः vबृहता प्रौढेन vदिविस्पृशा द्युलोकस्पर्शिना ज्वालासमूहेन vद्युमद् दीप्यमानः vशुचिः शुद्धः सन् vभरतेभ्यः यज्ञभरणकुशलयजमानाद्यर्थं vविभाति विशेषेण भासते ॥८॥

आ– ' जनस्य गोपाः ' इति । ऋषिः सुतंभरः । vजनस्य vगोपाः गोप्ता गोपयिता vअजनिष्ट जातः । vजागृविः जागरणशीलः अक्लिष्टज्ञानः vसुदक्षः शोभनोत्साहः सुवृद्धश्च सर्वज्ञो भगवान् vअग्निः vसुवितायः सुप्रसृताय कर्मणे vनव्यसे नवीनाय श्रौतत्वेनाभिनवकर्मार्थतया अजनिष्टेति संबन्धः । vघृतप्रतीकः घृतमुख्यः । vबृहता महता vदिविस्पृशा द्युलोकव्यापिना भानुना vद्युमत् द्युमान् vभरतेभ्यः ऋत्विग्यजमानेभ्यो वा vशुचिः शुद्धः अग्निर्यो vविभाति सः अजनिष्टेति संबन्धः ॥८॥

त्वाम॑ग्ने अङ्गि॑रसो॒ गुहा॑ हि॒तमन्व॑विन्दञ्छिश्रिया॒णं वने॑वने ।
स जा॑यसे म॒थ्यमा॑नः॒ सहो॑ म॒हत् त्वामा॑हुः॒ सह॑सस्पु॒त्रम॑ङ्गिरः ॥९॥

त्वाम् । अ॒ग्ने॒ । अङ्गि॑रसः । गुहा॑ । हि॒तम् ।
अनु॑ । अ॒वि॒न्द॒न् । शि॒श्रि॒या॒णम् । वने॑वन॒ इति॒ वने॑ऽवने ।
सः । जा॒य॒से॒ । म॒थ्यमा॑नः । सहः॑ । म॒हत् ।
त्वाम् । आ॒हु॒ः । सह॑सः । पु॒त्रम् । अ॒ङ्गि॒रः॒ ॥ र्ग्व्यैं ॥९॥

सा– अथ तृतीयः – ' त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने । स जायसे मथ्यमानः सहो महत् त्वामाहुः सहसस्पुत्रमङ्गिरः' इति । हे vअग्ने, vअङ्गिरसः महर्षयः vत्वाम् vअन्वविन्दन् अन्विष्यालभन्त । कीदृशं त्वाम्? vगुहा vहितम् अरणिप्रभृतिषु गोप्यस्थानेष्ववस्थितम् । vवनेवने vशिश्रियाणं तस्मिंस्तस्मिन्नरण्ये दावाग्निरूपेणाश्रितम् । vसः त्वं vसहः प्रौढं बलमवलम्ब्य vमथ्यमानः vजायसे । हे vअङ्गिरः अङ्गसौष्ठवयुक्ताग्ने, vत्वां vसहसः vपुत्रं बलस्य पुत्रम् vआहुः । महता बलेन मथने सति जायमानत्वात् ॥९॥

1. P1 after °प्रतीकः adds मुखं प्रतीकं मुखेनेत्येतदिति श्रुतेः ।
2. S2 °यजमानार्थं for यजमानाद्यर्थं
6. B1 सुप्रभृताय, H2 सुपुत्राय for सुप्रसृताय; P1 श्रोत्र° for श्रौत°
9. B1 भाति for विभाति
18. P1 after अलभन्त । ins. अग्निर्देवेभ्य उदकामन्तसोऽपः प्राविशदित्यादि शतपथाख्यायिकात्र निदानमित्यवधेयम्
19. S2 आश्रितः for आश्रितम्

छन्दस्येष्टकामन्त्राः]

आ– ‘ त्वामग्ने अङ्गिरसः ’ इति । हे श्रीभगवन् vअग्ने, vआङ्गिरसः ऋषयः vगुहा गुहायाम् अतिगूढस्थाने vहितं निहितम् अवस्थितं स्वकार्यभूतास्वप्स्ववस्थितम् । “ अग्निर्देवेभ्य उदक्रामत् सोऽपः प्राविशत् ” (शब्रा ७.३.२.१४) इति श्रुतेः । एवमवस्थितमग्निम् vअन्वविन्दन् लब्धवन्तः । पुनरपि सर्वप्राणिनां जठरे तिरोहितं सन्तं vशिश्रियाणं vवनेवने ओषधिवनस्पतीन् संश्रयमाणं पुनराङ्गिरसः अन्वविन्दन् । ‘ स जायसे मथ्यमानः सहो महत् ’ । महता बलेन अरणिकाष्ठेषु vमथ्यमानः अरणेः vजायसे । यतोऽतः हे vअङ्गिरः, vत्वां vसहसः vपुत्रम् vआहुः ॥९॥

सखा॑यः सं वः॑ स॒म्यञ्च॒मिष॒ꣳ स्तोमं॑ चा॒ग्नये॑ ।
वर्षि॑ष्ठाय क्षिती॒नामू॒र्जो नप्त्रे॒ सह॑स्वते ॥१०॥

सखा॑यः । सम् । व॒ः । स॒म्यञ्च॑म् । इष॑म् । स्तोम॑म् । च॒ । अ॒ग्नये॑ ।
वर्षि॑ष्ठाय । क्षि॒ती॒नाम् । ऊ॒र्जः । नप्त्रे॑ । सह॑स्वते ॥ सीं ॥१०॥

सा– कात्यायनः – “ अपरस्ताभ्योऽनुष्टुभः सखायः सं व इति ” (काश्रौ १७.१२.९) इति । अनुष्टुप्छन्दस्काभिर्ऋग्भिरुपधेया इष्टका अनुष्टुभः । ता जगतीष्टकानां पश्चिमभागे ‘ सखायः सं वः ’ इति तिसृभिर्ऋग्भिरुपदध्यात् । तत्र प्रथमा– ‘ सखायः सं वः सम्यञ्चमिषꣳ स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ’ इति । हे vसखायः परस्परसख्ययुक्ता ऋत्विग्यजमानाः, vवः युष्माकं समीचीनमभीष्टार्थं (न्नं ?) संपादयत । समित्यस्योपसर्गस्यापेक्षितः शेषोऽध्याहृतः । यूयं vच vअग्नये vस्तोमं स्तोत्रं संपादयत । कीदृशायाग्नये ? vक्षितीनां निवासहेतूनां मध्ये vवर्षिष्ठाय बृहत्तमाय vऊर्जः vनप्त्रे बलस्य अपातयित्रे विनाशमकुर्वते । यद्वा– ऊर्जो नप्त्रे अपां पौत्राय । “ अद्भ्य ओषधिवनस्पतयो जायन्ते । ताभ्योऽग्निर्जायते ” इति श्रुतेः । पुनः कीदृशाय ? vसहस्वते स्वयमतिशयेन बलवते ॥१०॥

आ– ‘ सखायः सं वः ’ इति । आनुष्टुभस्तृचः । आग्नेयः । आद्ये इषो नाम ऋषिः । यजमानो ऋत्विजः संबोधयति– हे vसखायः, सह संगत्य शृणुत । vवः युष्मान् ब्रवीमि । vसम्यञ्चं संहितमेकीभूतम् vइषं हविर्लक्षणमन्नं vस्तोमं च त्रिवृत्पञ्चदशादिकम् vअग्नये प्रतनु [त] विस्तारयतेति शेषः । कथंभूताय अग्नये इति । ‘ वर्षिष्ठाय क्षितीनाम् ’ । क्षियन्ति निवसन्तीति

---

4. B1 जारतिरो° for जठरे तिरो°

18. S2 om. उर्जो ... पुनः कीदृशाय । (L 19)

क्षितयो मनुष्याः । मनुष्याणां संबन्धित्वेन स्थिताय [v]वर्षिष्ठाय श्रेष्ठाय । [v]ऊर्जः [v]नप्त्रे अपां पौत्राय । " अद्भ्य ओषधिवनस्पतयो जायन्ते । तेभ्यो अग्निः " इति श्रुतेः । [v]सहस्वते बलवते अग्नये प्रतनुत इति संबन्धः ॥१०॥

सꣳसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।
इळस्पदे समिध्यसे स नो वसून्याभर ॥११॥

सꣳसमिति सम्ऽसम् । इत् । युवसे । वृषन् । अग्ने । विश्वानि । अर्यः । आ ।
इळः । पदे । सम् । इध्यसे । सः । नः । वसूनि । आ । भर ॥ ध्यैं ॥११॥

सा– अथ द्वितीया– ' सꣳसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इळस्पदे समिध्यसे स नो वसून्याभर ' इति । हे [v]वृषन् कामानां वर्षक [v]अग्ने, [v]विश्वानि सर्वाणि फलानि [v]संसम् [v]इत् संपाद्य संपाद्यैव [v]युवसे यजमानेन मिश्रयसि । [v]अर्यः [[v]आ] ईश्वरस्त्वमागत्य [v]इळः [v]पदे पृथिवीरूपायाः वेद्याः स्थाने [v]समिध्यसे सम्यग् ज्वाल्यसे । [v]सः तादृशो महानुभावस्त्वं [v]नः अस्मभ्यं [v]वसूनि धनानि सम् [v]आभर सम्यगाहृत्य प्रयच्छ ॥११॥

आ– ' सꣳसमित् ' इति । संवदन ऋषिः । संसम् । इच्छब्द उपमार्थीयः । 'युवसे' इत्यत्र विकरणव्यत्ययः । [v]युवसे । यू मिश्रणे । यौषि संगमयासि । हे [v]वृषन् हे वर्षितः श्रीभगवन् [v]अग्ने, [v]विश्वानि [v]वसूनि सर्वाणि धनानि [v]नः अस्माभिः सह संयौषि संगमयासि । [v]अर्यः स्वामी ईश्वरः [v]आ यजमानानां सर्वाणि कार्याणि पर्यालोच्य संगमयति तथा त्वमपि यौषीत्यर्थः । [v]इळः [v]पदे इळायाः गोः पृथिव्याः पदे कर्मार्थं [v]समिध्यसे । इळायाः पृथिव्याः पदे उत्तरवेदौ त्वं संदीप्यसे । [v]सः त्वं [v]नः अस्मभ्यं [v]वसूनि [v]आभर आहर देहीति संबन्धः ॥११॥

त्वामग्ने हविष्मन्तो देवं मर्तास ईळते ।
मन्ये त्वा जातवेदसꣳ स हव्या वक्ष्यानुषक् ॥१२॥

1. B1 स्थिराय for स्थिताय
8. S2 द्वितीयः for द्वितीया
9. P1 after फलानि adds आ आलोच्य
16. B1 यच्छमानानां for यजमानानां; H2–3 after त्वमपि add इत् इव तथा त्वमपि
17. B1 om. कर्मार्थं ... पदे
18. H2–3 उत्तरादौ, B1 उत्तरवैदैः for उत्तरवेदौ

छन्दस्येष्टकामन्त्राः]

त्वाम् । अग्ने । हविष्मन्तः । देवम् । मर्तासः । ईळते ।
मन्ये । त्वा । जातवेदसमिति जातऽवेदसम् ।
सः । हव्या । वक्षि । आनुषक् ॥ गीं ॥१२॥

सा– अथ तृतीया– ' त्वामग्ने हविष्मन्तो देवं मर्तास ईळते । मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ' इति । हे अग्ने, मर्तासः मरणशीला मनुष्याः हविष्मन्तः पाणौ गृहीतहविषो यजमानाः देवं देवनादिगुणयुक्तं त्वाम् ईळते स्तुवन्ति । अहमपि त्वां जातवेदसं सर्वज्ञं मन्ये जानामि । सः त्वम् आनुषक् अनुषक्तः सन् हव्या हवींषि वक्षि वहसि ॥१२॥

आ– ' त्वामग्ने ' इति । आग्नेय्यनुष्टुप् प्रस्कण्वः । हे श्रीभगवन् अग्ने, मर्तासः मर्ताः मनुष्याः हविष्मन्तः पाणौ गृहीतहविषो यजमानाः देवं देवनादिगुणयुक्तं त्वाम् ईळते स्तुवन्ति । अहमपि त्वां जातवेदसं सर्वज्ञं मन्ये जानामि । सः अभिहितगुणविशिष्टः त्वं हव्या वक्षि आनुषक् । षच समवाये । हव्या हव्यैः समवेतस्त्वं वक्षि । वच परिभाषणे । वदसि । हविषा संतुष्टोऽसीति वदसीति संबन्धः ॥१२॥

त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः ।
शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥१३॥

त्वाम् । चित्रश्रवस्तमेति चित्रश्रवःऽतम । हवन्ते । विक्षु । जन्तवः ।
शोचिष्केशम् । शोचिः केशमिति शोचिःऽकेशम् । पुरुप्रियेति पुरुऽप्रिय ।
अग्ने । हव्याय । वोळ्हवे ॥ ढां ॥१३॥

सा– अथ वैकल्पिकी तृतीया– ' त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळहवे ' इति । चित्रं श्रवो विचित्रा कीर्तिर्यस्यासौ चित्रश्रवाः। अतिशयेन चित्रश्रवा इति चित्रश्रवस्तम । पुरूणां बहूनां यजमानानां प्रिय पुरुप्रिय। तथाविध हे अग्ने, विक्षु प्रजासु मध्ये जन्तवः ऋत्विग्रूपा जनाः त्वां हवन्ते आह्वयन्ति । किमर्थम् ? हव्याय वोळ्हवे हविर्वोढुम् । कीदृशं त्वाम् ? शोचिष्केशम् । शोचींषि ज्वाला एव केशस्थानीया यस्यासौ शोचिष्केशस्तम् ॥१३॥

आ– ' त्वां चित्रश्रवस्तम ' इति । अनुष्टुप् प्रस्कण्वः । चित्रं विचित्रं नानारूपं श्रवः धनं यशश्च अतिशयेन यस्यास्ति सः चित्रश्रवस्तमः, तत्संबोधनं हे चित्रश्रवस्तम । हे

5. B1 om. हविष्मन्तः
6. H2–3 after ईळते add ईळ स्तुतौ । ईळन्ते
18. S2 चतुर्थी for तृतीया

श्रीभगवन् अग्ने, विक्षु मनुष्येषु अवस्थितं त्वां जन्तवः मनुष्याः हवन्ते त्वामाह्वयन्ति। कथंभूतं त्वामिति। शोचिष्केशम्। शोचन्ति दीप्यन्ते इति शोचींषि ज्वालाः केशस्थानीयाः यस्य सः शोचिष्केशः, तं शोचिष्केशम्। पुरवो बहवो यजमानाः प्रियाः यस्य सः। बहूनां यजमानानां यस्तु प्रियः। तत्संबोधनं हे पुरुप्रिय हे श्रीभगवन्नग्ने। किमर्थमाह्वयन्तीति— हव्याय वोळ्हवे हव्यं वोढुमिति विपरिणामः। त्वामाह्वयन्तीति संबन्धः ॥१३॥

एना वो अग्निं नमसोर्जो नपातमा हुवे।
प्रियं चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम् ॥१४॥

एना। वः। अग्निम्। नमसा। ऊर्जः। नपातम्। आ। हुवे।
प्रियम्। चेतिष्ठम्। अरतिम्। स्वध्वरमिति सुऽअध्वरम्।
विश्वस्य। दूतम्। अमृतम् ॥ खूं ॥१४॥

सा— "अषाढावेलायाः पुरस्ताद्बृहतीरेना व इति" (काश्रौ १७·१२·१०) इति। बृहतीछन्दस्काभिर्ऋग्भिरुपधेया इष्टकाः बृहत्यः। ता अषाढेष्टकायाः पूर्वभागे 'एना वः' इति तिसृभिर्ऋग्भिरुपदध्यात्। तत्र प्रथमा— 'एना वो अग्निं नमसोर्जो नपातमाहुवे। प्रियं चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम्' इति। हे ऋत्विग्यजमानाः, वः युष्माकं संबन्धिनम् अग्निम् एना नमसा एतेन नमस्कारेण युक्तोऽहम् आहुवे आह्वयामि। कीदृशमग्निम्? ऊर्जः अन्नस्य नपातम् अविनाशयितारं प्रियं यजमानानां प्रीतिहेतुम्। चेतिष्ठम् अतिशयेन चेतयितारम् अरतिं रतिरुपरमस्तद्रहितं सर्वदोद्युक्तमित्यर्थः। स्वध्वरं शोभनस्य क्रतोर्निष्पादकं विश्वस्य दूतं सर्वस्य जगतो दूतवत्कार्यकारिणम्। सर्वस्य हि गृहे दाहपाकादिकार्यं करोति। अमृतं मरणरहितम्। मनुष्यवद्देवानां सहसा मरणं नास्ति ॥१४॥

आ— 'एना वः' इति। यस्याद्यावष्टाक्षरौ पादौ अन्त्यश्च तृतीयो द्वादशाक्षरश्चेत् सा बृहती छन्दः। वसिष्ठः। वः युष्माकमिष्टकानां संबन्धी यो अग्निः तम् अग्निम् एना एतेन नमसा अन्नेन ऊर्जः नपातम् अपां पौत्रमग्निं त्वाम् आहुवे आह्वयामि। प्रियं यजमानानां प्रियं चेतिष्ठम् अतिशयेन चेतनायुक्तम्। रतिरस्मादन्यत्र न विद्यत इत्यरतिः। तम् अरतिम्। शोभनाः अध्वराः यस्य विद्यन्त इत्ययं स्वध्वरः, तं स्वध्वरम्। विश्वस्य सर्वस्य यजमानस्य दूतं कार्यसाधकम् अमृतं प्रपन्नानां मरणविरोधिनम् अग्निं त्वामाहुव इति संबन्धः ॥१४॥

---

2. B1 om. कथंभूतं त्वामिति; B1 दीप्यन्ति, H2-3 दीव्यन्ति for दीप्यन्ते

12. S2 अखिलेष्टकायाः for अषाढेष्टकायाः

16. S2 यजमानं for यजमानानां

छन्दस्येष्टकामन्त्राः]

विश्वस्य दूतममृतं विश्वस्य दूतममृतम् ।
स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः ॥१५॥

विश्वस्य । दूतम् । अमृतम् ।
सः । योजते । अरुषा । विश्वभोजसेति विश्वऽभोजसा ।
सः । दुद्रवत् । स्वाहुत इति सुऽआहुतः ॥ जं ॥१५॥

सा– अथ द्वितीया– ' विश्वस्य दूतममृतं विश्वस्य दूतममृतम् । स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः ' इति । विश्वस्य दूतं सर्वस्य जगतो दूतवत् कार्यकारिणम् अमृतम् अमरणशीलमग्निम् आह्वयामि । पुनर्वचनमादरार्थम् । यमग्निमाहुवे सः अग्निः विश्वभोजसा विश्वस्य भोक्तारौ अरुषा अरोचमानावश्वौ योजते रथे युनक्ति । ततः सः एवाग्निः स्वाहुतः सुष्ठु आहुतः सन् दुद्रवत् गच्छति ॥१५॥

आ– ' विश्वस्य दूतममृतम् ' इति । विश्वस्य दूतं यम् आह्वयामि सः एवाग्निः । अरुषा विश्वभोजसा इत्यत्र द्वितीयाद्विवचनयोश्छान्दसस्त्वाकारः, अतः अरुषौ । अरुष इत्यश्वनामसु पठितम् । तौ अरोचनौ अहिंस्यमानौ विश्वभोजसौ सर्वस्य भोक्तारौ । अग्निः योजते युनक्ति अश्वौ । सः एव स्वाहुतः शोभनप्रकारेण आहुतः सन् । द्रु गतौ । दुद्रवत् गच्छति ॥१५॥

स दुद्रवत् स्वाहुतः स दुद्रवत् स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥१६॥

सः । दुद्रवत् । स्वाहुत इति सुऽआहुतः ।
सुब्रह्मेति सुऽब्रह्मा । यज्ञः । सुशमीति सुऽशमी । वसूनाम् ।
देवम् । राधः । जनानाम् ॥ ढं ॥१६॥

9. P1 after अरुषा ins. अक्रोधनौ
11. B1 om. विश्वस्य ... इति । H2–3 after इति add बृहत्या [भ्रे]यी । यस्याः प्रथमद्वितीयपादावष्टाक्षरौ तृतीयो द्वादशाक्षरः चतुर्थस्त्वष्टाक्षरश्चेत् सा बृहती; B1 om. यम्
12. B1 H2–3 अर्षा for अरुषा; B1 H2–3 अर्षौ, अर्ष इति for अरुषौ । अरुष इति । (L 13)
13. H3 द्वौ for तौ, H2–3 अयं; B1 अग्नौ for अग्निः
14. B1 om. द्रु गतौ
15. B1 om. गच्छति

कासं ... ४६

सा– अथ तृतीया– ' स दुद्रवत् स्वाहुतः स दुद्रवत् स्वाहुतः । सुब्रह्मा यज्ञः सुशमी वसूनां देवꣳ राधो जनानाम् ' इति । स्वाहुतः ऋत्विग्भिः सुष्ठु कर्मण्याहुतः सः अग्निः वसूनां जनानां निवासार्थिनां प्राणिनां संबन्धि । देवं दीप्यमानं राधः हविर्लक्षणं धनं प्रति दुद्रवत् । अभ्यास आदरार्थः । आगच्छतु । ईदृशोऽग्निः सुब्रह्मा शोभनऋत्विग्रूपो ब्रह्मा यस्यासौ तादृशः । शोभनमन्त्रयुक्तो वा । यज्ञः यजनीयः पूजनीयः । सुशमी शोभनकर्मवान् ॥१६॥

आ– ' स दुद्रवत् स्वाहुतः ' इति । सः एवाग्निः स्वाहुतः शोभनप्रकारेणाहुतः सन् दुद्रवत् । आदरार्था वीप्सा । गच्छतीति । सुब्रह्मा यज्ञः सुशोभनो ब्रह्मा यस्मिन् यज्ञे सः सुब्रह्मा । ब्रह्मग्रहणं सर्वेषाम् ऋत्विगादीनामुपलक्षणार्थम् । सुब्रह्मा यज्ञो यत्र । ' सुशमी वसूनाम् ' । शमीति कर्मनाम । शोभनानि कर्माणि यस्मिन् यज्ञे सः सुशमी । वसूनां रुद्राणाम् आदित्यानां च संबन्धी यज्ञो यत्र । देवं राधः जनानां संबन्धि यत्र राधो धनम् । यत्र क्लृप्तं तत्र स एव योजते इति संबन्धः ॥१६॥

अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
अस्मे धेहि जातवेदो महि श्रवः ॥१७॥

अग्ने । वाजस्य । गोमत इति गोऽमतः । ईशानः । सहसः । यहो इति यहो ।
अस्मे इत्यस्मे । धेहि । जातवेद इति जातऽवेदः । महि । श्रवः ॥ नां ॥१७॥

सा– कात्यायनः – " अपरा गायत्रीभ्य उष्णिहोऽग्ने वाजस्येति " (काश्रौ १७.१२.१३) इति । उष्णिक्छन्दस्काभिस्तिसृभिर्ऋग्भिरुपधेया इष्टका उष्णिहस्ता गायत्रीष्टकाभ्यः पश्चिमभाविनीरुपदध्यात् । तत्र प्रथमा– ' अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः ' इति । सहसः बलस्य यहो हे सूनो जातवेदः उत्पन्नजगदभिज्ञ अग्ने, गोमतः गोभिर्युक्तस्य वाजस्य अन्नस्य ईशानः त्वम् अस्मे अस्मासु महि श्रवः महतीं कीर्तिं महदन्नं वा धेहि संपादय ॥१७॥

3. S2 om. अभ्यास आदरार्थः
5. P1 after °कर्मवान् । ins. शमीति कर्मनाम
6. B1 om. स दुद्रवत् स्वाहुत इति; B1 om. अग्निः, H2–3 शोभनहुतः for शोभनप्रकारेणाहुतः
7. B1 द्युगच्छतीति; H2–3 त्वगच्छतीति for गच्छतीति
8. B1 यज्ञग्रहणं for ब्रह्मग्रहणं
10. B1 यज्ञे for यज्ञो; H2–3 क्लृप्तौ for क्लृप्तं
16. S2 अपरणे for अपरा
17. S2 om. तिसृभिः
19. P1 after सूनो ins. यहुरिति पुत्रनामसु पठितम्

छन्दस्येष्टकामन्त्राः]

आ– ' अग्ने वाजस्य ' इति । औष्णिहं तृचमाग्नेयम् । गौतमः । हे श्रीभगवन् Vअग्ने, Vवाजस्य अन्नस्य Vगोमतः गोभिः संयुक्तस्य Vईशानः ईश्वरः त्वं Vसहसः Vयहो बलस्य पुत्र । सह इति बलनाम । यहुरिति पुत्रनाम । बलेन महता जन्यत्वात् । हे Vजातवेदः, Vमहि माहात्म्ययुक्तं Vश्रवः धनं यशश्च Vअस्मे अस्मासु Vधेहि स्थापय ॥१७॥

स इ॑धा॒नो वसु॑ष्क॒विर॒ग्निरी॒ळेन्यो॑ गि॒रा ।
रे॒वद॒स्मभ्यं॑ पुर्वणीक दीदिहि ॥१८॥

सः । इ॒धा॒नः । वसु॑ः । क॒विः । अ॒ग्निः । ई॒ळेन्य॑ः । गि॒रा ।
रे॒वत् । अ॒स्मभ्य॑म् । पु॒र्व॒णी॒क॒ । पु॒र्व॒नी॒केति॑ पुरुऽअनीक । दी॒दि॒हि॒ ॥ क्रि ॥१८॥

सा– अथ द्वितीया– ' स इधानो वसुष्कविरग्निरीळेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ' इति । पुरु बलम् अनीकं मुखं सैन्यं वा यस्यासौ पुर्वणीकः । तादृश हे अग्ने, 'सः त्वम् 'अस्मभ्यं 'रेवत् रयिमत् धनयुक्तं गृहक्षेत्रादिकं 'दीदिहि दीप्यस्व । कीदृशस्त्वम् ? 'इधानः दीप्यमानः 'वसुः निवासहेतुः 'कविः क्रान्तदर्शी 'अग्निः अग्रणीः प्रथमं यज्ञप्रवर्तक इत्यर्थः । 'गिरा मन्त्ररूपया वाचा 'ईळेन्यः स्तुत्यः ॥१८॥

आ– **' स इधानः '** इति । उष्णिक् । उक्तलक्षणो यः Vअग्निः Vसः Vइधानः दीप्यमानः Vवसुः धनात्मकः वासयिता वा । Vकविः क्रान्तदर्शनः । Vगिरा स्तुतिलक्षणया वाचा Vईळेन्यः ईड्यः स्तुत्यस्त्वं हे Vपुर्वणीक । पुरु बहु अनीकं मुखं यस्य सः, तत्संबोधनं हे पुर्वणीक । V रेवत् रयिमान् Vअस्मभ्यम् अस्मदर्थं Vदीदिहि दीप्यस्व ॥१८॥

क्षपो॑ राजन्नु॒त त्मनाऽग्ने॒ वस्तो॑रु॒तोषस॑ः ।
स ति॑ग्मजम्भ र॒क्षसो॑ दह॒ प्रति॑ ॥१९॥

क्ष॒पः । रा॒ज॒न् । उ॒त । त्मना॑ । अग्ने॑ । वस्तो॑ः । उ॒त । उ॒षस॑ः ।
सः । ति॒ग्म॒ज॒म्भेति॑ तिग्मऽजम्भ । र॒क्षस॑ः । द॒ह॒ । प्रति॑ ॥ ङ्यी ॥१९॥

3. B1 om. यहुरिति पुत्रनाम ।
11. S2 धनवत् for धनयुक्तं
16. H3 om. पुरु ... पुर्वणिक (L 17)
17. H2-3 after रेवत् add रयिमत्

सा- अथ तृतीया- ' क्षपो राजन्नुत त्मनाऽग्ने वस्तोरुतोषसः। स तिग्मजम्भ रक्षसो दह प्रति ' इति । हे ^{v}अग्ने, ^{v}वस्तोः अहनि ^{v}रक्षसः राक्षसान् ^{v}क्षपः क्षपय । ^{v}उत अपि च ^{v}उषसः उषःकालानपि क्षपय । द्वितीयाया अत्यन्तसंयोगवाचित्वात् सर्वेष्वहःसु सर्वेष्वपि उषःकालेषु राक्षसान् विनाशयेत्यर्थः । हे ^{v}राजन् दीप्यमानाग्ने, न केवलं स्वकीयसेनामुखेन रक्षसां क्षपणम् । उत ^{v}त्मना आत्मनापि स्वयमपि क्षपयेति । मुखविदारणवाचिना जम्भशब्देन ज्वाला उपलक्ष्यन्ते। तिग्मास्तीक्ष्णा जम्भा ज्वाला यस्यासौ तिग्मजम्भः । हे ^{v}तिग्मजम्भ वज्रदंष्ट्र, ^{v}सः त्वं ^{v}रक्षसः राक्षसान् ^{v}प्रति प्रत्येकं ^{v}दह भस्मीकुरु ॥१९॥

आ- ' क्षपो राजन् ' इति । उष्णिगाग्नेयी । हे श्रीभगवन् ^{v}अग्ने, हे ^{v}राजन्, हे दीप्तिरूप हे ^{v}तिग्मजम्भ । तिग्ममिति वज्रनाम, जम्भमिति दंष्ट्रानाम । हे वज्रदंष्ट्र, यस्त्वं ^{v}क्षपः ^{v}उत अपि च स्वभावतः दुष्टस्य क्षपः क्षपयिता । वस्तोरिति रात्रिनाम । ^{v}वस्तोः रात्र्याः संबन्धिनः ^{v}रक्षसः च क्षपः क्षपयिता । ^{v}त्मना आत्मना तव तेजोरूपेण ^{v}उषसः संबन्धिनः रक्षसः रक्षांसि राक्षसान् ^{v}प्रति प्रत्येकं ^{v}दह । दह भस्मीकरणे । भस्मसात् कुरु ॥१९॥

भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥२०॥

भद्रः । नः । अग्निः । आहुत इत्याऽहुतः ।
भद्रा । रातिः । सुभगेति सुऽभग । भद्रः । अध्वरः ।
भद्राः । उत । प्रशस्तय इति प्रऽशंस्तयः ॥ ढ्रिं ॥२०॥

सा- कात्यायनः - " भद्रो न इति ककुभः " (काश्रौ १७.१२.११) इति । ककुप्छन्दस्काभिर्ऋग्भिरुपधेया इष्टकाः ककुभस्ताः ' भद्रो नः ' इति तिसृभिर्ऋग्भिरुपदध्यात् । तत्र प्रथमा- 'भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ' इति । ^{v}आहुतः ऋत्विग्भिराहुतः ^{v}अग्निः ^{v}नः अस्माकं ^{v}भद्रः भन्दनीयः कल्याणो भवत्विति शेषः । किं च- हे अग्ने, ^{v}भद्रा कल्याणा ^{v}रातिः त्वदीयं दानमस्माकमस्तु । हे ^{v}सुभग सुष्ठु भजनीयाग्ने, त्वत्प्रसादात् ^{v}अध्वरः अस्मदीयो यज्ञः ^{v}भद्रः कल्याणो भवतु । ^{v}उत अपि च ^{v}प्रशस्तयः प्रशंसनानि ^{v}भद्राः सन्तु ॥२०॥

---

2. S2 om. राक्षसान्
6. S2 om. ज्वाला
11. H3 om. आत्मना
21. S2 om. हे अग्ने
22. P1 after सुष्ठु adds शोभनैश्वर्याग्ने

आ– ' भद्रो नः ' इति । आग्नेयी ककुप् । सौभरिः । आद्यतृतीयपादावष्टाक्षरौ मध्यमो द्वादशाक्षरश्चेत् ककुब्नामोष्णिक् । हे [v]सुभग । " ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना " (विष्णुपु ६.५.७४) इति स्मृतेः षड्गुणैश्वर्यसंपन्न । [v]आहुतः अभिहितः [v]अग्निः त्वं [v]नः अस्माकं [v]भद्रः भन्दनशीलः कल्याणः भवत्विति शेषः । किं च– हे भद्र हे कल्याण, [v]रातिः दानं नः अस्तु । नः अस्माकम् [v]अध्वरः यज्ञः [v]भद्रः अस्तु । [v]उत अपि च । ' भद्रा उत प्रशस्तयः ' । प्रशंसन [ानि] [v]भद्राः सन्तु ॥२०॥

भद्रा उत प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्ये ।
येना समत्सु सासहः ॥२१॥

भद्राः । उत । प्रशस्तय इति प्रऽशस्तयः ।
भद्रम् । मनः । कृणुष्व । वृत्रतूर्य इति वृत्रऽतूर्ये ।
येन । समत्स्विति समत्ऽसु । सासहः । ससह इति ससहः ॥ भां ॥२१॥

सा– अथ द्वितीया– " भद्रा उत प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्ये । येना समत्सु सासहः ' इति । [v]उत अपि च [v]प्रशस्तयः [v]भद्राः सन्तु । [v]समत्सु संग्रामेषु [v]येन मनसा [v]सासहः । षह मर्षणे । छन्दस्यभिभवे च । दीर्घश्छान्दसः । शत्रुजातमभिभवसीत्यर्थः । तत् [v]मनः [v]वृत्रतूर्ये । तूर्यतिर्हिंसार्थः । वृत्रवधाय । " पाप्मा वै वृत्रः " (शब्रा ११.१.५.७) इति श्रुतेः । तद्वधार्थमिति वा । [v]भद्रं कल्याणं [v]कृणुष्व ॥२१॥

आ– ' भद्रा उत प्रशस्तयः ' इति आग्नेयी ककुप् । अपि च [v]प्रशस्तयः च [v]भद्राः भवन्तु । नः अस्माकं [v]मनः कल्याणं [v]कृणुष्व । [v]वृत्रतूर्ये । तुर्वतिर्हिंसार्थः । वृत्रवधाय । " पाप्मा वै वृत्रः " (शब्रा ११.१.५.७) इति श्रुतेः । तद्वधार्थमिति वा । [v]समत्सु संग्रामेषु । [[v]सासहः] । षह मर्षणे । छन्दस्यभिभवे चेति । [v]येन मनसा शत्रुजातमभिभवसि । तत् मनः [v]भद्रं सुखं कृणुष्व इति संबन्धः ॥२१॥

4. H2–3 भजनीयः for भन्दनशीलः
5. H2–3 om. हे कल्याण ... सन्तु (L 7)
14. S2 om. षह ... छान्दसः (L 15)
15. S1 om. इत्यर्थः
21. B1 सुश्रुतामिति भवसि for शत्रुजातमभिभवसि

येना समत्सु सासहोऽव स्थिरा तनुहि भूरि शर्धताम् ।
वनेमा ते अभिष्टिभिः ।।२२।।

येन । समत्स्विति समत्ऽसु । सासहः । ससह इति ससहः ।
अव । स्थिरा । तनुहि । भूरि । शर्धताम् ।
वनेम । ते । अभिष्टिभिरित्यभिष्टिऽभिः ॥ डिं ॥२२॥

सा– अथ तृतीया– ' येना समत्सु सासहोऽव स्थिरा तनुहि भूरि शर्धताम् । वनेमा ते अभिष्टिभिः ' इति । हे अग्ने, त्वं ᵛयेन मनसा ᵛसमत्सु संग्रामेषु ᵛसासहः शत्रुजातमभिभवसि तेन मनसा ᵛभूरि ᵛशर्धताम् प्रभूतं बलं कुर्वताम् । शत्रूणां संबन्धीनि स्थिराणि दृढानि धनूंषीति शेषः । ᵛअव ᵛतनुहि अवतारय । वयं ᵛते तव ᵛअभिष्टिभिः अभ्येषणसाधनैर्यागैः ᵛवनेम संभजेमहि ॥२२॥

आ– ' येना समत्सु सासहः ' इति । ककुप् । ᵛयेन मनसा ᵛसमत्सु । समत्स्विति संग्रामनाम । संग्रामेषु । ᵛसासहः अभिभवसि । किं च– ' अव स्थिरा ' । स्थिराणि कठिनानि धनूंषि ᵛअव ᵛतनुहि अवतारय । ' भूरि शर्धताम् ' । शर्ध इति बलनाम । ᵛभूरि बहुप्रकारम् आत्मनि बलं कुर्वताम् । ' वनेमा ते अभिष्टिभिः ' । अतो वयं शत्रुभिरप्रातिबध्यमानाः ᵛअभिष्टिभिः । छान्दसं पदम् । अभिष्टिभिर्यागैः ᵛते त्वां ᵛवनेम संभजेमहि ॥२२॥

अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषꣳ स्तोतृभ्य आ भर ।।२३।।

अग्निम् । तम् । मन्ये । यः । वसुः । अस्तम् । यम् । यन्ति । धेनवः ।
अस्तम् । अर्वन्तः । आशवः । अस्तम् । नित्यासः ।
वाजिनः । इषम् । स्तोतृभ्य इति स्तोतृऽभ्यः । आ । भर ॥ ग्रौं ॥२३॥

सा– कात्यायनः – " अनूकान्ते दक्षिणे पङ्क्तीरग्निं तमिति " (काश्रौ १७·१२·१४) इति । पङ्क्तिच्छन्दस्काभिर्ऋग्भिरुपधेया इष्टका पङ्क्तयस्ता अनूकान्ते दक्षिणप्रदेशे ' अग्निं तम् ' इत्यादिभिस्तिसृभिर्ऋग्भिरुपदध्यादिति शेषः । तत्र प्रथमा– ' अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः । अस्तमर्वन्त

---

8. P1 after कुर्वताम् । ins. शर्द्ध इति बलनाम
9. S2 त्वां for तव
13. H2–3 अबुध्यमानाः for अप्रतिबुध्यमानाः
14. H3 छान्दसो दीर्घः for छान्दसं पदम्

आशवोऽस्तं नित्यासो वाजिन इष१ स्तोतृभ्य आ भर ' इति । वसुः निवासहेतुः धनरूपो वा यः अग्निरस्ति अहं तं तादृशम् अग्निं मन्ये जानामि । धेनवः सायंकाले यं दीप्यमानमग्निं दृष्ट्वा अयमस्मद्दोहनकाल इति ज्ञात्वा अस्तं स्वकीययजमानगृहं यन्ति । किं च– आशवः शीघ्रगामिनः अर्वन्तः अश्वाः यमग्निं दृष्ट्वा अस्तं गृहं यन्ति गच्छन्ति । पुनस्तदेवाह– नित्यासः नित्या शाश्वताः वाजिनः बलवन्तः अश्वा यमग्निं दृष्ट्वा अस्तं गृहं यन्ति गच्छन्ति । हे तादृशाग्ने, त्वं स्तोतृभ्यः अस्मभ्यम् इषम् अन्नम् आभर संपादयेत्यर्थः ॥२३॥

आ– ' अग्निं तम् ' इति । कुमारवृषा ऋषिः । यस्याः आद्यौ पादावष्टाक्षरौ तृतीय-चतुर्थौ द्वादशाक्षरौ चेत् सा आस्तारपङ्क्तिः । ' अग्निं तम् ' । अहं तम् अग्निं मन्ये जाने । यः वसुः धनरूपः तमिति संबन्धः । तापप्रकाशैः प्राणिनामुपकारं कुर्वन् धनमित्युच्यते । ' अस्तं यं यन्ति धेनवः ' । यम् अग्निं सायंकाले दीप्यमानं दृष्ट्वा अस्मद्दोहन-कालोऽयमिति ज्ञात्वा अस्तं गृहं यन्ति गृहमागच्छन्ति । अस्तमिति गृहनाम । अर्वन्तः अश्वाः आशवः शीघ्रगाः अस्तं गृहं गच्छन्ति । ' अस्तं नित्यासो वाजिनः ' । नित्यासः नित्याः शाश्वतिकाः वाजिनः अश्वाः सैन्धवाः । अभिप्रायोऽयम् । इषम् अन्नं स्तोतृभ्यः यजमानेभ्यः आभर देहि । यस्त्वेतत् सर्वं यजमानायोत्पादयति तमेवाग्निं मन्ये इति संबन्धः ॥२३॥

सो अ॒ग्निर्यो वसु॑र्गृ॒णे सं य॒माय॑न्ति धे॒नवः॑ ।
सम॑र्वन्तो रघु॒द्रुवः॒ सꣳ सु॑जा॒तासः॑ सू॒रय॒ इषꣳ॑ स्तो॒तृभ्य॒ आ भ॑र ॥२४॥

सः । अ॒ग्निः । यः । वसुः॑ । गृ॒णे । सम् । यम् । आ॒यन्ती॒त्या॒ऽयन्ति॑ । धे॒नवः॑ ।
सम् । अर्व॑न्तः । र॒घु॒द्रुव॒ इति॑ र॒घु॒ऽद्रुवः॑ । सम् । सु॒जा॒तास॒ इति॑ सु॒ऽजा॒तासः॑ ।
सू॒रयः॑ । इष॑म् । स्तो॒तृभ्य॒ इति॑ स्तो॒तृऽभ्यः॑ । आ । भ॒र ॥ त्रौं ॥२४॥

1. S2 om. धनरूपो वा
4. P1 after बलवन्तः adds देवानां
5. P1 om. यन्ति
6. P1 after इत्यर्थः । ins. गवादिपशूनां स्वाम्यग्निर्हि । यं जातः पशूनविन्दतेत्युपक्रम्य तस्मात् सर्वानृतून् पशवोऽग्निमभिसर्पन्तीति श्रुत्याभिप्रायमेतत् ।
8. B1 om. सा; H2–3 विस्तार° for आस्तार°
9. B1 धेनु° for धन°
13. H2–3 सैन्धवीयाभि° for सैन्धवाः । अभि°
14. H3 मन्यते for मन्ये

सा– अथ द्वितीया– ' सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः । समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषꣳ स्तोतृभ्य आ भर ' इति । यः निवासहेतुरग्निरस्ति सः तादृशः अग्निः गृणे अस्माभिः स्तूयते । धेनवः पशवः यम् अग्निं दृष्ट्वा समायन्ति सम्यगाभिमुख्येन गच्छन्ति । किं च– रघुद्रुवः लघुद्रुवः शीघ्रगामिनः अर्वन्तः अश्वाः प्रति सम् आयन्ति । सुजातासः शोभनजन्मानः सूरयः विद्वांसः ऋत्विगादयः यमग्निं प्रति सम् आयन्ति । हे अग्ने, तादृशस्त्वं स्तोतृभ्यः आभर । इषम् अन्नं संपादय ॥२४॥

आ– ' सो अग्निः ' इति । आस्तारपाङ्क्तिः । सः एव अग्निः यः स्तोतृभिः गृणे गीयते । यं धेनवः समायन्ति सः अग्निः । ' समर्वन्तः रघुद्रुवः ' । द्रु गतौ । लघुद्रुवः शीघ्रगामिनः अर्वन्तः अश्वाः यं सम् आयन्ति सोऽग्निः । सं सुजातासः कल्याणजन्मानः सूरयः पण्डिताः समायन्ति । सोऽग्निस्त्वं स्तोतृभ्यः ऋत्विगादिभ्यः इषं हविर्लक्षणमन्नम् आभर ॥२४॥

उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत् पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर ॥२५॥

उभे इत्युभे । सुश्चन्द्र । सुचन्द्रेति सुऽचन्द्र । सर्पिषः ।
दर्वी इति दर्वी । श्रीणीषे । आसनि ।
उतो इत्युतो । नः । उत् । पुपूर्याः । उक्थेषु । शवसः । पते ।
इषम् । स्तोतृभ्य इति स्तोतृऽभ्यः । आ । भर ॥ मों ॥२५॥

सा– अथ तृतीया– ' उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि । उतो न उत् पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर ' इति । हे सुश्चन्द्र सुष्ठु आह्लादनकर अग्ने, आसनि त्वदीयास्ये सर्पिषः आज्यस्य संबन्धिन्यौ उभे दर्वी दर्विसदृशौ हनू श्रीणीषे सेवसे । हनुप्रे [पू ?] रणपर्यन्तं सर्पिस्त्वया पीतमित्यर्थः । उतो अपि च हे शवसः पते बलस्याधिपते, उक्थेषु शस्त्रवत्सु यज्ञेषु नः अस्मान् उत्पुपूर्याः उत्कर्षेण पूरय प्रापयेत्यर्थः । स्तोतृभ्यः यजमानेभ्यः इषम् अन्नम् आभर संपादय ॥२५॥

---

3. P1 after स्तूयते ins. पुरुषादिव्यत्ययः ।

4. P1 after लघुद्रुवः ins. लस्थाने रेफः

8. H3 लघुद्रवः for लघुद्रुवः

18. P1 सुचन्द्र for सुश्चन्द्र

19. S2 om. दर्वी; S2 after हनू adds यद्वा सर्पिषः पानार्थं दर्विसदृशौ हस्तौ । अथवा सर्पिषः संबन्धिन्यौ जुहूपभृतौ ।

20. S2 om. शस्त्रवत्सु यज्ञेषु; P1 शंस° for शस्त्र°

छन्दस्येष्टकामन्त्राः]

आ– ' उभे सुश्चन्द्र ' इति । आस्तारपङ्क्ति । आद्यपादावष्टाक्षरौ [तृतीयचतुर्थपा]दौ द्वादशाक्षरौ चेदास्तारपङ्क्तिः । ' सुश्चन्द्र ' इति छान्दसं पदम् । हे [v]सुश्चन्द्र शोभनचन्द्र हे श्रीभगवन्नग्ने, ऐश्वर्यप्रदानेन जगदाह्लादक [v]सर्पिषः पानाय [v]उभे [v]दर्वी अन्नपरिवेषणपात्रे उभौ हस्तौ दर्व्याकारौ कृत्वा [v]आसनि आस्ये मुखे [v]श्रीणीषे आश्रयासि आश्लेषयसि । ' उतो न उत् पुपूर्याः ' । [v]उतो अपि च एवं ब्रूषे यदि नाम [v]उत्पुपूर्याः उद्धृत्य पूरणं कुर्याः । सर्पिर्भाण्डमुद्धृत्य अत्यर्थम् अञ्जलिं पूरयेः । अस्माकं साधुकृतं स्यात् । हे [v]शवसः [v]पते बलस्य पते, [v]उक्थेषु [v]स्तोतृभ्यः सकाशात् हविर्लक्षणम् [v]इषम् [v]आभर ॥२५॥

अग्ने॒ तम॒द्याश्वं॒ न स्तोमैः॒ क्रतुं॒ न भ॒द्रꣳ हृ॑दि॒स्पृश॑म् ।
ऋ॒ध्यामा॑ त॒ ओहैः॑ ॥२६॥

अग्ने॑ । तम् । अ॒द्य । अश्व॑म् । न । स्तोमैः॑ ।
क्रतु॑म् । न । भ॒द्रम् । हृ॒दि॒स्पृ॒श॒मिति॑ हृ॒दि॒ऽस्पृश॑म् ।
ऋ॒ध्याम॑ । ते॒ । ओहैः॑ ॥ खौं ॥२६॥

स्रा– कात्यायनः – " उत्तरे पदपङ्क्तीरग्ने तमिति " (काश्रौ १७·१२·१५) इति । पदपङ्क्तिच्छन्दस्काभिर्ऋग्भिरुपधेया इष्टकाः पदपङ्क्त्यः । ता अनूकस्योत्तरभागे उपदध्यात् । तत्र प्रथमा– ' अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् । ऋध्यामा त ओहैः ' इति । हे [v]अग्ने, [v]हृदिस्पृशं हृद्यमत्यन्तप्रियं [v]तं त्वाम् [v]अद्य अस्मिन् कर्मणि [v]ओहैः फलप्रापकैः [v]स्तोमैः [v]ऋध्याम समृद्धं करवाम । तत्रैको दृष्टान्तः – [v]अश्वं [v]न । यथा लोके अश्वं घासादिप्रदानेन समर्धयन्ति तद्वत् । अथापरो दृष्टान्तः – [v]क्रतुं [v]न [v]भद्रम् । यथा समीचीनं ज्योतिष्टोमादिक्रतुं सर्वाङ्गानुष्ठानेन समर्धयन्ति तद्वत् । भद्रं कल्याणमित्यग्निविशेषणं वास्तु ॥२६॥

आ– ' अग्ने तम् ' इति । वामदेवः । पञ्चाक्षरास्त्रयः पादाश्चतुर्थश्चतुरक्षरः षडक्षरः पञ्चमश्चेत् एषा पदपङ्क्तिर्नाम गायत्री । हे श्रीभगवन् [v]अग्ने, [v]तं यज्ञं भावयन्तो वयम् [v]अद्य अस्मिन् अहनि [v]ऋध्याम समर्धयेमहि । कथमिव ? ' अश्वं न स्तोमैः ' । [v]अश्वम् इव यथाश्वमेधिकमश्वं [v]स्तोमैः स्तुतिभिः समर्धयेयुः । [v]क्रतुं [v]न क्रतुमिव [v]भद्रं भन्दनीयं कल्याणं

---

2. B1 om. शोभनचन्द्र
3. H3 °आह्लादकर for °आह्लादक
6. H3 जलं for अञ्जलिं
16. P1 after ओहैः ins. वहेरजन्तस्य रूपमेतत्
22. H3 समृधयेमहि for समर्धयेमहि

vहृदिस्पृशं हृदयंगमम् । यथा बहुकालमभिध्यातं क्रतुम् vअद्य समर्धयेमहि । कैरिति ? vते तव संबन्धिभिः vओहैः । वह प्रापणे । प्रापणैः फलप्रापकैः दक्षिणादिभिः यथा क्रतुं समर्धयेमहि । तथेमं यज्ञं समर्धयेमहीति संबन्धः ॥२६॥

अधा ह्यंग्ने क्रतोर्भुद्रस्य दक्षस्य साधोः ।
रथीर्ऋतस्यं बृहतो बभूथ ॥२७॥

अधं । हि । अग्ने । क्रतोः । भद्रस्यं । दक्षंस्य । साधोः ।
रथीः । ऋतस्यं । बृहतः । बभूथं ॥ हां ॥२७॥

सा– अथ द्वितीया– ' अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीर्ऋतस्य बृहतो बभूथ ' इति । हे vअग्ने, vअध अस्मदीयस्तोत्रानन्तरं vक्रतोः अनुष्ठीयमानस्य कर्मणः vरथीः vबभूथ vहि । रथोऽस्यास्तीति रथीः सारथिः । । यथा [सारथिः] रथनिर्वाहकस्तथा त्वन्निर्वाहकः बभूथ खलु । कीदृशस्य क्रतोः ? vभद्रस्य कल्याणरूपस्य दक्षस्य स्वफलप्रदानसमर्थस्य । vसाधोः अस्माभिः साध्यस्य vऋतस्य सत्यस्य अमोघफलस्य vबृहतः प्रौढस्य ॥२७॥

आ– ' अधा ह्यग्ने ' इति । गायत्री । हे श्रीभगवन् vअग्ने, vअधा vहि समनन्तरमेव vक्रतोः संकल्पितस्य vभद्रस्य कल्याणस्य vदक्षस्य । दक्ष वृद्धौ । समृद्धस्य फलसाधकस्य vऋतस्य vबृहतः यज्ञस्य vरथीः इव vबभूथ । व्यत्ययः । बभूव ॥२७॥

एभिर्नो अर्कैर्भवा नो अर्वाङ् स्व॒र्ण ज्योतिः ।
अग्ने विश्वेभिः सुमना अनीकैः ॥२८॥

एभिः । नः । अर्कैः । भवं । नः । अर्वाङ् । स्वः । न । ज्योतिः ।
अग्ने । विश्वेभिः । सुमना इति सुऽमनाः । अनीकैः ॥ ग्रीं ॥२८॥

सा– अथ तृतीया– ' एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैः ' इति । हे vअग्ने, vविश्वेभिः vअनीकैः सर्वैस्त्वदीयसैन्यैः सहितः vसुमनाः सौमनस्यं प्राप्तः सन् vएभिः इदानीं क्रियमाणैः vनः अस्मत्संबन्धिभिः vअर्कैः अर्चनीयैः स्तोत्रैः vनः अस्मान् प्रति vअर्वाङ् vभव

1. H3 °धृतं for °ध्यातं

3. B1 यथेमं for तथेमं

15. H2-3 om. बभूव

छन्दस्येष्टकामन्त्राः]

समीपस्थो भव । अवरं समीपदेशमञ्चति गच्छतीत्यर्वाङ् । तत्र दृष्टान्तः – ᵛस्वः ᵛन ᵛज्योतिः स्वर्गलोके प्रकाशरूप आदित्यो यथा समीपवर्ती भवति तद्वत् ॥२८॥

आ– ' एभिर्नो अर्कैः ' इति । गायत्री । हे ᵛअग्ने, ᵛएभिः ᵛनः ᵛअर्कैः । नः अस्माकं संबन्धिभिः अर्कैः । रुच दीप्तौ । अर्च्यन्त इत्यर्का मन्त्राः । एभिः मन्त्रैः स्तूयमान इति शेषः । ᵛनः ᵛअर्वाङ् अस्मानभिमुखाञ्चनस्त्वं ᵛभव । ' स्वर्ण ज्योतिः ' । ᵛस्वः ᵛन ᵛज्योतिः आदित्यः । न इव । यथा स्वर्ज्योतिरादित्योऽभ्युदयमारभ्य अर्वागञ्चनोऽस्तमयपर्यन्तं सर्वप्राणिनोऽनुगृह्णाति । एवमर्वागञ्चनोऽनुग्रहपरतया हे श्रीभगवन्नग्ने, ᵛविश्वेभिः सर्वैः ᵛअनीकैः मुखैः ᵛसुमनाः ᵛभव शोभनमनस्को भव ॥२९॥

अ॒ग्निꣳ होता॑रं मन्ये॒ दास्व॑न्तं॒ वसु॑ꣳ सू॒नुꣳ सह॑सो जा॒तवे॑दसं॒

विप्रं॒ न जा॒तवे॑दसम् ।

य ऊ॒र्ध्वया॑ स्वध्व॒रो दे॒वो दे॒वाच्या॑ कृ॒पा ।

घृ॒तस्य॒ विभ्रा॑ष्टि॒मनु॑ वष्टि शो॒चिषा॒ऽऽजुह्वा॑नस्य स॒र्पिषः॑ ॥२९॥

अ॒ग्निम् । होता॑रम् । म॒न्ये॒ । दास्व॑न्तम् ।

वसु॑म् । सू॒नुम् । सह॑सः । जा॒तवे॑दस॒मिति॑ जा॒तऽवे॑दसम् ।

विप्र॑म् । न । जा॒तवे॑द॒समिति॑ जा॒तऽवे॑दसम् ।

यः । ऊ॒र्ध्वया॑ । स्व॒ध्व॒र इति॑ सु॒ऽअ॒ध्व॒रः । दे॒वः । दे॒वाच्या॑ । कृ॒पा ।

घृ॒तस्य॑ । विभ्रा॑ष्टि॒मिति॒ विऽभ्रा॑ष्टिम् । अनु॑ । व॒ष्टि॒ । शो॒चिषा॑ ।

आ॒जुह्वा॑न॒स्येत्या॒ऽजुह्वा॑नस्य । स॒र्पिषः॑ ॥ मुः ॥२९॥

सा– कात्यायनः – " पुरीषवत्याः पूर्वामतिच्छन्दसं प्राच्यौ पुरीषसहिते भद्रा रातिर्वृत्रतूर्येऽवस्थिराग्निꣳ होतारमिति " (काश्रौ १७·१२·१६) इति । अतिच्छन्दस्काभिर्ऋग्भिरुपधेया इष्टकास्तिस्रोऽतिच्छन्दसस्तासां मध्ये एकामतिच्छन्दसमिष्टकां पुरीषवतीष्टकायाः पूर्वभागे उपदध्यात् । तत्रैकस्याः पाठस्तु– ' अग्निꣳ होतारं मन्ये दास्वन्तं वसुꣳ सूनुꣳ सहसो जातवेदसं विप्रं न जातवेदसम् । य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा । घृतस्य विभ्राष्टिमनु वष्टि शोचिषाऽऽजुह्वानस्य सर्पिषः ' इति । इमम् ᵛअग्निं ᵛहोतारं देवानामाह्वातारमहं ᵛमन्ये । कीदृशमग्निम् ? ᵛवसुं धनं ᵛदास्वन्तं प्रयच्छन्तम् । ᵛसहसः ᵛसूनुं बलस्य पुत्रम् । ᵛजातवेदसम् उत्पन्नजगदभिज्ञम् । तत्र दृष्टान्तः – ᵛविप्रं ᵛन ᵛजातवेदसम् । यथा ब्राह्मणं

1. P1 समीपदेशवर्ती भूत्वा प्रकाशं कुरु for समीपस्थो भव ।

4. H3 अर्चन्ते for अर्च्यन्ते

5. H3 °मुञ्च । नः for °मुखाञ्चनः; B1 स्वर्ज्योतिरादित्यः for स्वर्णज्योतिरादित्यः

6. H3 अस्तमन° for अस्तमय°

कुटुम्बिनम् उत्पन्नपुत्राद्यभिज्ञं मन्यन्ते तद्वत् । vयः अग्निः vदेवः vऊर्ध्वया अत्युन्नतया vदेवाच्या देवान् प्रति गच्छन्त्या vकृपा क्लृप्तया ज्वालया vस्वध्वरः सुष्ठु यागनिष्पादको भवति, सोऽग्निः vघृतस्य vविभ्राष्टिं विशेषदीप्तिं vशोचिषा स्वकीयेन तेजसा vअनुवष्टि अनुकामयते । कीदृशस्य घृतस्य ? vआजुह्वानस्य सर्वतो हूयमानस्य vसर्पिषः सर्पणशीलस्य ॥२९॥

आ– ' अग्निं होतारम् ' इति । परुच्छेपः । अतिच्छन्दास्त्र्यवसाना त्रैष्टुभप्रगाथो वा । यत्र त्रिष्टुब्गायत्र्यौ मिलितौ (ते ?) । सोऽहं vमन्ये जानामि । " देवानामग्निर्होता " (द्र. ऐब्रा ३·१८) इति श्रुतेः । कथंभूतमिति ? vदास्वन्तं vवसुं वासयितारं vसूनुं vसहसः बलस्य पुत्रम् । vजातवेदसं जातप्रज्ञं vविप्रं vन विप्रमिव vजातवेदसं जातप्रज्ञानं मन्ये इति संबन्धः । vऊर्ध्वया ज्वालया vदेवाच्या देवान् प्रति अञ्चन्त्या गच्छन्त्या यस्य ज्वालया । vकृपा । छान्दसः । कृपया च । देवा भागिनः कल्पिता इति शेषः । ' घृतस्य विभ्राष्टिमनु वष्टि शोचिषाऽऽजुह्वानस्य सर्पिषः ' । vघृतस्य । भ्राजृ दीप्तौ । vविभ्राष्टिं संदीप्तिं vयः vस्वध्वरः साधुयज्ञो vदेवः vअनुवष्टि अन्वनुकामयते । यश्च vआजुह्वानस्य हूयमानस्य vसर्पिषः घृतस्य vशोचिषा शोचिः अनुकामयते तम् ' अग्निं होतारम् ' इति । मन्ये इति संबन्धः ॥२९॥

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥३०॥(५)॥

अग्ने त्वम् ॥ अ ॥३०॥ (५) ॥

सा- कात्यायनः – " अग्ने त्वमित्यनूकान्तेऽपरे " (काश्रौ १७·१२·१७) इति । अनूकस्य अन्ते पश्चिमभागे द्विपदाछन्दस्कास्तिस्र इष्टका उपदध्यात् । तत्र प्रथमा– ' अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ' इति । हे vअग्ने, vत्वं vनः अस्माकम् vअन्तमः अन्तिकतमो भव । vउत अपि च vत्राता रक्षकः vशिवः मङ्गलरूपी त्वं vवरूथ्यः वरूथे गृहे नित्यं संनिहितः vभव ॥

---

1. P1 after मन्यन्ते adds श्रेष्ठा ग्रामीणाः
3. P1 after °वष्टि adds वश कान्तौ । कान्तिरिच्छा ।
5. B1 अवसाना for त्र्यवसाना
8. B1 मन्येत for मन्ये
9. H2–3 before ऊर्ध्वया add ये देवाः
11. B1 H2–3 °यज्ञे for °यज्ञो
13. B1 मन्येत for मन्ये
19. S2 om. अन्ते

पुनश्चितिमन्त्राः]

अथ द्वितीया– ' वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ' इति । वसुः वसुमानयम् अग्निः वसुभिरिन्द्रादिदैवतैरादरेण श्रूयत इति वसुश्रवाः । हे तादृशाग्ने, अच्छा अस्मदभिमुखः नक्षि प्राप्नुहि । कीदृशस्त्वम् ? द्युमत्तमम् अतिशयेन दीप्तियुक्तं रयिं धनं दाः प्रयच्छन् ॥

अथ तृतीया– ' तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ' इति । हे शोचिष्ठ दीदिवः शुद्धतम दीप्यमान, सखिभ्यः सखीनामस्माकं सुम्नाय सुखाय तं पूर्वोक्तगुणयुक्तं त्वा ईमहे प्राप्नुमः ॥

[इति षोडशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

आ– ' अग्ने त्वम् ' इति व्याख्यातो मन्त्रः ॥३०॥

[अथ षोडशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

[अथ षष्ठोऽनुवाकः ।]

सा– पञ्चमेऽनुवाके छन्दस्या इष्टका उक्ताः । अथ षष्ठे गार्हपत्यस्य पुनश्चितिमन्त्रा उच्यन्ते–

येन ऋषयस्तपसा सत्रमायन्निन्धाना अग्निꣳ स्वराभरन्तः ।
तस्मिन्नहं नि दधे नाके अग्निं यमाहुर्मनवस्तीर्णबर्हिषम् ॥१॥

येन । ऋषयः । तपसा । सत्रम् । आयन् ।
इन्धानाः । अग्निम् । स्वः । आभरन्त इत्याऽभरन्तः ।
तस्मिन् । अहम् । नि । दधे । नाके । अग्निम् ।
यम् । आहुः । मनवः । स्तीर्णबर्हिषमिति स्तीर्णऽबर्हिषम् ॥ त्रीणि ॥१॥

कात्यायनः – " मध्येऽष्टेष्टकं गार्हपत्यं ॥ पुनश्चितिं चोपरि तद्वद्येन ऋषय इति प्रत्यृचम् " (१७·१२·१८-१९) इति । पूर्वमुपहितायां गार्हपत्यस्य चितेर्मध्ये पुनरष्टाविष्टका ' येन ऋषयः ' इत्यष्टभिर्मन्त्रैरुपदध्यात् । तत्र प्रथममन्त्रपाठस्तु– ' येन ऋषयस्तपसा सत्रमायन्निन्धाना अग्निꣳ स्वराभरन्तः । तस्मिन्नहं नि दधे नाके अग्निं यमाहुर्मनव स्तीर्णबर्हिषम् ' इति । येन स्वर्गेण निमित्तेन पूर्वं महर्षयः तपसा संतापयुक्तेनाग्निना सत्रम् आयन् अनुष्ठितवन्तः । कीदृशा महर्षयः ? अग्निम् इन्धानाः प्रज्वालयन्तः स्वः आभरन्तः स्वर्गमाहर्तुं समुद्यताः । अहम् अपि तस्मिन् नाके निमित्तभूते सति अग्निं निदधे स्थापयामि । यम् अग्निं मनवः पूर्वे मनुष्याः स्तीर्णबर्हिषम् प्रसारितयज्ञम् आहुः तमग्निं निदध इत्यन्वयः ॥१॥

आ-- ' येन ऋषयः ' इत्यादिभिरष्टाभिर्ऋग्भिः गार्हपत्यं पुनश्चितिं चोपदधाति । ' येन ऋषयः ' इति । अष्टावाग्नेय्यः । षट् त्रिष्टुभः । बुध ऋषिः । द्वावनुष्टुभौ ? । ^{v}येन ^{v}ऋषयः येन ^{v}तपसा ब्रह्मणा वेदेन । " तपो ब्रह्म " (तैउ ३.३) इति श्रुतेः । ऋषयः वसिष्ठप्रभृतयः । ^{v}सत्रं यागम् ^{v}आयन् आगतवन्तः अनुष्ठितवन्तः इत्यर्थः । किं कुर्वन्त इति । ' इन्धाना अग्निम् ' । उद्ध्यम् ^{v}अग्निम् ^{v}इन्धानाः दीपयन्तः । ' स्वराभरन्तः ' । ^{v}स्वः स्वर्गं स्वकीयम् ^{v}आभरन्तः स्वीकुर्वाणाः ऋषय इति संबन्धः । ' तस्मिन्नहं नि दधे नाके ' । ^{v}तस्मिन् ^{v}नाके दुःखादिरहितस्थाने ^{v}अहम् अग्निं ^{v}निदधे स्थापयामि । ' यमाहुर्मनव स्तीर्णबर्हिषम् ' । ^{v}मनवः मननप्रधानाः ^{v}स्तीर्णबर्हिषम् आस्तृतबर्हिरादिकं स्थानं सर्वैर्यज्ञसाधनैः संपादितसुखं ^{v}यम् ^{v}आहुः तस्मिन् इति संबन्धः ॥१॥

तं पत्नी॑भि॒रनु॑ गच्छेम देवाः पु॒त्रैर्भ्रा॒तृभि॑रु॒त वा॒ हिर॑ण्यैः ।
नाकं॑ गृभ्णा॒नाः सु॑कृ॒तस्य॑ लो॒के तृ॒तीये॑ पृ॒ष्ठे अधि॑ रोच॒ने दि॒वः ॥२॥

तम् । पत्नी॑भिः । अनु॑ । ग॒च्छे॒म॒ । दे॒वाः ।
पु॒त्रैः । भ्रा॒तृभि॒रिति॒ भ्रा॒तृऽभिः । उ॒त । वा॒ । हिर॑ण्यैः ।
नाक॑म् । गृ॒भ्णा॒नाः । सु॒कृ॒तस्येति॒ सु॒ऽकृ॒तस्य॑ । लो॒के ।
तृ॒तीये॑ । पृ॒ष्ठे । अधि॑ । रो॒च॒ने । दि॒वः । ॥ छ्रौं ॥२॥

सा- अथ द्वितीयः – ' तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः । नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ' इति । हे ^{v}देवाः ऋत्विजः, सर्वे वयं पत्न्यादिभिः सर्वैर्मनुष्यैः । ^{v}उत ^{v}वा ^{v}हिरण्यैः हिरण्यादिभिः सर्वैः साधनद्रव्यैश्च सहितास्तमग्निम् ^{v}अनुगच्छेम अनुगताः सन्तः फलं प्राप्स्याम इत्याशयः । स एव स्पष्टीक्रियते– ^{v}दिवः ^{v}पृष्ठे स्वर्गस्योपरि ^{v}नाकं दुःखरहितं स्थानं ^{v}गृभ्णानाः गृहीतुकामा वयमित्यर्थः । कीदृशे दिवः पृष्ठे । ^{v}सुकृतस्य ^{v}लोके सम्यगनुष्ठितस्य कर्मणः फलभूते ^{v}तृतीये पृथिवीमारभ्य गणनायां त्रिसंख्यापूरके ^{v}अधि ^{v}रोचने अधिकत्वेन दीप्यमाने ॥२॥

आ– ' तं पत्नीभिः ' इति । यं ^{v}नाकं ^{v}गृभ्णानाः स्वीकुर्वन्तः ऋषयः ^{v}सुकृतस्य ^{v}लोके साद्गुण्येनानुष्ठितस्य पुण्यस्य लोके फलभूते साधने ^{v}तृतीये पृथिव्यपेक्षया तृतीये ^{v}पृष्ठे

5. B1 om. स्वः स्वर्गं स्वकीयम्

6. B1 अग्निमन्नाके for तस्मिन्नाके

7. B1 om. मनवः

8. H2-3 om. मनन°

23. B1 °मितस्य for °ष्ठितस्य; B1 स्थाने for साधने

पुनश्चितिमन्त्राः]

vअधि vरोचने vदिवः । दिवः पृष्ठे आधिक्येन दीप्यमाने दिवः एकदेशीभूते, यत्रावस्थित आदित्यस्तपतीति, vतं vपत्नीभिः vपुत्रैः vभ्रातृभिः vउत अपि [च] vहिरण्यैः यज्ञसाधनभूतैः सुवर्णादिभिर्भासन्तं vअनुगच्छेम इति संबन्धः ॥२॥

आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः ।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः ॥३॥

आ । वाचः । मध्यम् । अरुहत् । भुरण्युः ।
अयम् । अग्निः । सत्पतिरिति सत्ऽपतिः । चेकितानः ।
पृष्ठे । पृथिव्याः । निहित इति निऽहितः । दविद्युतत् ।
अधस्पदम् । अधःपदमित्यधःऽपदम् । कृणुताम् । ये । पृतन्यवः ॥ शौं ॥३॥

सा– अथ तृतीयः – 'आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः । पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः' इति । vअयम् vअग्निः vवाचः vमध्यम् vआऽरुहत स्तोत्ररूपायाः vवाचः मध्यं प्रतिपाद्यमर्थमारूढः स्तोत्रगतसर्वगुणयुक्त इत्यर्थः । कीदृशोऽग्निः ? vभुरण्युः जगद्भरणशीलः vसत्पतिः सत्पालकः vचेकितानः अभिज्ञानवान् । स च vपृथिव्याः vपृष्ठे भूमेरुपरि vनिहितः स्थापितः vदविद्युतत् अतिशयेन द्योतते । vये तु शत्रवः vपृतन्यवः अस्माभिः सह कलहं कर्तुमिच्छन्ति तान् vअधस्पदं vकृणुताम् अस्माकं पादयोरधस्तादवस्थितान् कुरुताम ॥३॥

आ– 'आ वाचः' इति । 'आ वाचो मध्यम्' । वाङ्मयस्य मन्त्रमयस्य vमध्यम् । यत्रैष एतच्चीयते यत् vवाचः मध्यम् । vभुरण्युः सर्वस्य भर्ता । vसत्पतिः सतां सत्रिणां पतिः । vचेकितानः चेतयमानः vअयम् vअग्निः वाचो मध्यम् vआरुहत् आरूढः । किं च– 'पृष्ठे पृथिव्याः निहितः' । vपृथिव्याः vपृष्ठे उपरि vनिहितः स्थापितोऽग्निः vदविद्युतत् देदीप्यमानः । vअधस्पदं पादयोरधः । vये vपृतन्यवः, ये आत्मनः पृतनामिच्छन्ति ते पृतन्यवः, ये पाप्मानः तान् अधस्पदं vकृणुतां पादयोरधः कृणुतां कुरुताम् ॥३॥

1. B1 एकदेशमुख्ये भूते; H2–3 एकदेशभूते for एकदेशीभूते
2. H2–3 om. पुत्रैर्भ्रातृभिः ... भासन्तम् (L 3)
3. H2–3 om. इति संबन्धः
16. H2–3 om. आ वाच इति
17. H2–3 तत् for एतत्

अयमग्निर्वीरतमो वयोधाः सहस्रियो द्योततामप्रयुच्छन् ।
विभ्राजमानः सरिरस्य मध्य उप प्र याहि दिव्यानि धाम ॥४॥

अयम् । अग्निः । वीरतम इति वीरऽतमः । वयोधा इति वयःऽधाः ।
सहस्रियः । द्योतताम् । अप्रयुच्छन्नित्यप्रऽयुच्छन् ।
विभ्राजमान इति विऽभ्राजमानः । सरिरस्य । मध्ये ।
उप । प्र । याहि । दिव्यानि । धाम ॥ त्र्यूं ॥४॥

सा– अथ चतुर्थः – ' अयमग्निर्वीरतमो वयोधाः सहस्रियो द्योततामप्रयुच्छन् । विभ्राजमानः सरिरस्य मध्य उप प्र याहि दिव्यानि धाम ' इति । ᵛअयम् ᵛअग्निः ᵛद्योतताम् अस्मिन् कर्मणि प्रकाशताम् । कीदृशः ? ᵛवीरतमः अतिशयेन शूरः । ᵛवयोधाः वयस आयुषः अन्नस्य वा स्थापयिता ᵛसहस्रियः इष्टकासहस्रेण संमितः । ᵛअप्रयुच्छन् अस्मिन् कर्मणि प्रमादरहितः । ᵛसरिरस्य जलस्य ᵛमध्ये ᵛविभ्राजमानः प्राकृतवैकृतादिरूपेण विशेषतः प्रकाशमानः । हे अग्ने, एवंभूतस्त्वं ᵛदिव्यानि ᵛधाम स्थानानि ᵛउप ᵛप्रयाहि प्राप्नुहि ॥४॥

आ– ' अयमग्निर्वीरतमः ' इति । प्रकृतः ᵛअयम् ᵛअग्निः ᵛवीरतमः अतिशयेनोत्साहवर्धनः । वयः अन्नं हविर्लक्षणं यस्मिन् धीयत इति सः ᵛवयोधाः । सहस्राईः ᵛसहस्रियः । ᵛअप्रयुच्छन् अप्रमाद्यन् प्रमादमकुर्वाणः ᵛद्योततां संदीप्यताम् । किं च – ' विभ्राजमानः सरिरस्य मध्ये ' । ᵛसरिरस्य ᵛमध्ये एषां लोकानां मध्ये । " इमे वै लोकाः सरिरम् " (शब्रा ८·६·३·२१) इत्यादि श्रुतेः । एषु लोकेषु दीप्यमानः । ' दिव्यानि धाम ' । ᵛदिव्यानि तेजोमयानि ᵛधाम धामानि । व्यत्ययः । एवं स्तुवन्नग्निं प्रत्यक्षीकृत्याह – ᵛउप ᵛप्रयाहि । हे श्रीभगवन्नग्ने, दिव्यानि स्थानानि नामानि जन्मानि च याहि ॥४॥

संप्रच्यवध्वमुप संप्रयाताग्ने पथो देवयानान् कृणुध्वम् ।
पुनः कृण्वाना पितरा युवानाऽन्वाताꣳसीत् त्वयि तन्तुमेतम् ॥५॥

संप्रच्यवध्वमिति समऽप्रच्यवध्वम् । उप । संप्रयातेति समऽप्रयात । अग्ने ।
पथः । देवयानानिति देवऽयानान् । कृणुध्वम् ।
पुनरिति पुनः । कृण्वाना । पितरा । युवाना ।
अन्वाताꣳसीदित्यनुऽआताꣳसीत् । त्वयि । तन्तुम् । एतम् ॥ फ्यूं ॥५॥

9. S2 om. अन्नस्य वा
10. S2 सर्वशरीरस्य for सरिरस्य
13. H3 प्रकृते for प्रकृतः; B1 om. प्रकृतोयम् ... इति सः (L 14)

पुनश्चितिमन्त्राः]

सा– अथ पञ्चमः – ' संप्रच्यवध्वमुप संप्रयाताग्ने पथो देवयानान् कृणुध्वम् । पुनः कृण्वाना पितरा युवानाऽन्वाताꣳसीत् त्वयि तन्तुमेतम् ' इति । हे vअग्ने, त्वं vसंप्रच्यवध्वं स्वकीयात् स्थानात् संप्रच्यवध्वं सम्यग् निर्गच्छ । ततः अस्मदीयदेवयजनम् vउप उपेत्य vसंप्रयात सम्यक् प्रयाहि । ततः vदेवयानान् देवलोकप्राप्तिहेतून् vपथः मार्गान् vकृणुध्वं कुरु । सर्वत्र पूजार्थं बहुवचनम् । किं कुर्वन् ? vपितरा मातापितरौ vयुवाना युवानौ तरुणौ vपुनः भूयोभूयः vकृण्वाना कुर्वन् । एवंभूतः सोऽग्निः हे यजमान, vत्वयि निमित्तभूते सति vएतं vतन्तुं यज्ञप्रवाहम् vअन्वातांसीत् अनुक्रमेण ततोऽनुसंपादयन्तु ॥५॥

आ– ' संप्रच्यवध्वम् ' इति । मन्त्रदृक् ऋषीनाह – मार्गाभासात् vसंप्रच्यवध्वं संप्रच्यवतं हे ऋषयः, अपसरणं कुरुध्वम् । अपगम्य च श्रीभगवन्तमग्निम् vउप [vसंप्र] यात उपगच्छ । अथाग्निमाह– हे श्रीभगवन् vअग्ने, vपथः देवयानान् vकृणुध्वम् । ऋषीणामेतेषां देवयानान् पथः मार्गान् कृणुध्वं कुरुध्वम् । vपुनः अपि vकृण्वाना कुर्वाणाः हे ऋषयः, युष्माकं vपितरा पितरौ vयुवाना युवानौ । छान्दसं पदम् । युवानौ तरुणौ । vअन्वातांसीत् । छान्दसं पदम् । अन्वा [तनु] तां vत्वयि यजमाने vएतं vतन्तुम् अपत्यं यज्ञसंततिं वा अन्वा [तनु] ताम् । यज्ञापत्यसंततिसंबन्धं संपादयतामिति संबन्धः ॥६॥

उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरास्मिन् विश्वे देवा यजमानश्च सीदत ॥६॥

उत् । बुध्यस्व । अग्ने । प्रति । जागृहि । त्वम् ।
इष्टापूर्ते इतीष्टाऽपूर्ते । सम् । सृजेथाम् । अयम् । च ।
अस्मिन् । सधस्थ इति सधऽस्थे । अधि । उत्तरास्मिन्नित्युत्ऽतरस्मिन् ।
विश्वे । देवाः । यजमानः । च । सीदत ॥ ठः ॥६॥

सा– अथ षष्ठः – ' उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च । अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ' इति । हे vअग्ने, त्वम् vउद्बुध्यस्व अस्मद्विषये सावधानो

---

3. P1 after निर्गच्छ ins. वचनव्यत्ययेन बहुलम्
5. S2 मातरौ for मातापितरौ; S2 om. युवाना
9. H2 om. हे ऋषयः
11. B1 om. कुरुध्वम्
14. B1 om. वा; B1 यज्ञापत्यं for यज्ञापत्य°; H3 समुपादयामि for संपादयताम्

भव । एवंभूतः Vत्वम् एनं यजमानं Vप्रति Vजागृहि प्रतिदिनं जागरूकं सावधानं कुरु । Vअयं Vच त्वं च मिलित्वा Vइष्टापूर्ते श्रौतस्मार्ते कर्मणी Vसंसृजेथां संपादयतम् । किं च – Vविश्वे Vदेवाः Vयजमानः Vच सर्वे यूयं Vसधस्थे सहस्थितियोग्येऽस्मिन् कर्मणि Vसीदत । उत्तरस्मिन् स्वर्लोके अधिकत्वेन सीदत ॥६॥

आ– ' उद्बुध्यस्व ' इति । हे श्रीभगवन् Vअग्ने, त्वं स्वरूपतः Vउद्बुध्यस्व निर्मायो निरविघ्नो भव । ' प्रति [जागृहि त्वम् ' ।] Vत्वं हि प्रपन्नान् Vप्रतिजागृहि । जागृ निद्राक्षये । विनिद्रो भव, सर्वदा पश्येत्यर्थः । Vइष्टापूर्ते । इष्टं यागादिकं पूर्तं तटाकारामादिकम्, ते इष्टापूर्ते । Vसꣳसृजेथाम् । त्वत्प्रसादादिष्टापूर्ते यजमानेन सꣳसृजेथां संसर्गं प्राप्नुताम् । Vअयं Vच यजमानः इष्टापूर्ताभ्यामपगतकल्मषः सन् अस्मिन् Vसधस्थे सहस्थाने देवैः सह अवस्थातव्ये Vअधि Vउत्तरस्मिन् सर्वोत्कृष्टे आदित्यलोके Vविश्वे Vदेवाः सर्वे देवाः Vयजमानः Vच Vसीदत । अत्र विश्वैर्देवैः सह यजमानस्य समानलोकता प्रार्थ्यते ॥६॥

येन॒ वह॑सि स॒हस्र॒ं येना॑ग्ने सर्ववेद॒सम् ।
तेने॒मं य॒ज्ञं नो॑ नय॒ स्व॑र्दे॒वेषु॒ गन्त॑वे ॥७॥

येन॑ । वह॑सि । स॒हस्र॑म् । येन॑ । अ॒ग्ने॒ । स॒र्व॒वे॒द॒समिति॑ स॒र्व॒ऽवे॒द॒सम् ।
तेन॑ । इ॒मम् । य॒ज्ञम् । न॒ः । न॒य॒ । स्व॑ः । दे॒वेषु॑ । गन्त॑वे ॥ खु॒ ॥७॥

सा– अथ सप्तमः – ' येन वहसि सहस्रं येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ' इति । हे Vअग्ने, Vयेन व्यापारेण Vसहस्रं Vवहसि सहस्रदक्षिणाकं यज्ञं निर्वहसि, तथा Vयेन व्यापारेण Vसर्ववेदसं सर्वदक्षिणाकं यज्ञं वहसि, Vतेन व्यापारेण Vनः अस्मदीयम् Vइमं Vयज्ञं Vस्वः स्वर्गलोके Vदेवेषु देवान् प्रति Vगन्तवे गन्तुं Vनय प्रापय ॥७॥

आ– ' येन वहसि ' इति । श्रीभगवत् Vअग्ने, Vयेन हेतुना सामर्थ्येन वा Vसहस्रं क्रतूनां सहस्रं सहस्राधिकफलं च अपरिमितं च Vवहसि प्रापयसि । Vयेन सामर्थ्येन Vसर्ववेदसं सर्वधननिवेदनं वा वहसि । Vतेन त्वत्सामर्थ्यादिना Vनः अस्माकम् Vइमं वर्तमानं Vयज्ञं Vनय प्रापय । ' स्वः देवेषु ' । [Vस्वः] स्वर्गं लोकं Vदेवेषु देवान् प्रति Vगन्तवे गमनाय । इमं यज्ञं नयेति संबन्धः ॥७॥

1. S2 om. एवंभूतस्त्वम्; B1 om. एनं
6. B1 तडाग° for तटाक°
17. S2 सर्वलोकं for स्वः स्वर्गलोके (L 18)

शेषभूत-इष्टकोपधानमन्त्राः]

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आ रोहाथा नो वर्धया रयिम् ॥८॥(६)॥

अयं ते ॥ अ ॥८॥

सा- अथाष्टमः – ' अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आ रोहाथा नो वर्धया रयिम् ' इति । अयं मन्त्रः पूर्वं व्याख्यातः ॥८॥

[इति षोडशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

आ– ' अयं ते ' इति मन्त्रो व्याख्यातः ॥८॥

[इति षोडशेऽध्याये षष्ठोनुवाकः ॥६॥]

———

[अथ सप्तमोऽनुवाकः ।]

सा– षष्ठेऽनुवाके गार्हपत्येष्टकोपधानमन्त्रा उक्ताः । अथ सप्तमे पुनराहवनीयस्य पञ्चमचिति-शेषभूतेष्टकोपधानमन्त्रा उच्यन्ते–

तपश्च तपस्यश्च शैशिरा ऋतू अग्नेरन्तःश्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः
कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
शैशिरा ऋतू अभि कल्पमाना इन्द्रमिव देवा अभि संविशन्तु
तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ।
परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम् ।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ।
सूर्यस्तेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥१॥

5. S2 after मन्त्रः adds द्वितीयाध्यायस्य षष्ठेऽनुवाके

7. B1 trans. अयं ... व्याख्यातः after ऋतव्ये (P 380, L 4)

तपः । तपस्यः । शैशिरौ ।

परमेष्ठी । परमेस्थीति परमेऽस्थी । दिवः ।

सूर्यः ॥ घे ॥१॥

कात्यायनः – " ऋतव्ये तपश्च तपस्यश्चेति " (काश्रौ १७·१२·२३) इति । द्वे ऋतव्येष्टके उपदध्यादिति शेषः । पाठस्तु– ' तपश्च तपस्यश्च शिशिरा ऋतू अग्नेरन्तःश्लेषोऽसि । कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे । शैशिरा ऋतू अभि कल्पमाना इन्द्रमिव देवा अभि संविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ' इति । व्याख्यातसमानार्थः ॥

कात्यायनः – " विश्वज्योतिषं परमेष्ठी त्वेति " (काश्रौ १७·१२·२४) इति । पाठस्तु– ' परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम् । विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ । सूर्यस्तेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ' इति । अयमपि व्याख्यातसमानार्थः ॥१॥

आ– ऋतव्ये उपदधाति– ' तपश्च तपस्यश्च ' इति । ऋतुदेवत्यं यजुः । व्याख्यातमेतत् ।

विश्वज्योतिषमुपदधाति– ' परमेष्ठी त्वा सादयतु ' इति । सूर्यदेवत्यं यजुः । एतदपि व्याख्यातम् ॥१॥

लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् ।

इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योना असीषदन् ॥२॥

ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः ।

जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः ॥३॥

इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।

रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥४॥

लोकं पृण ॥ त ॥२॥

ता अस्य ॥ त ॥३॥

इन्द्रं विश्वाः ॥४॥

---

11. S2 व्याख्यातः for व्याख्यातसमानार्थः

12. H2–3 om. व्याख्यातमेतत्

13. H3 °ज्योतिषा for °ज्योतिषम्

शेषभूत-इष्टकोपधानमन्त्राः]

सा– "लोकं पृणाः पूर्ववत्" (काश्रौ १७·१२·२५) इति । 'लोकं पृण छिद्रं पृण' इत्यादयस्त्रयो लोकंपृणेष्टकोपधानमन्त्रा व्याख्याताः ॥२–३॥

आ– लोकंपृणा उपदधाति– 'लोकं पृण' इति । "असौ वा आदित्यो लोकंपृणाः" । लोकान् पृणाति पूरयतीति लोकंपृणाः । 'लोकं पृण' इत्यादयस्त्रयो मन्त्रा व्याख्याताः ॥ २–४ ॥

प्रोथदश्वो न यवसेऽविष्यन् यदा महः संवरणाद्व्यस्थात् ।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ।।५।।

प्रोथत् । अश्वः । न । यवसे । अविष्यन् ।
यदा । महः । संवरणादिति सम्ऽवरणात् । वि । अस्थात् ।
आत् । अस्य । वातः । अनु । वाति । शोचिः ।
अध । स्म । ते । व्रजनम् । कृष्णम् । अस्ति ॥ त्रिष्टुप् ॥५॥

सा– कात्यायनः – "प्रोथदश्व इत्युत्तरां विकर्णीम्" (काश्रौ १७·१२·२६) इति । उपदध्यादिति शेषः । पाठस्तु– 'प्रोथदश्वो न यवसेऽविष्यन् यदा महः संवरणाद्व्यस्थात् । आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति' इति । अयमग्निः अश्वः न अश्व इव प्रोथत् प्रोथति जाज्वल्यमानः शब्दं करोति । दृष्टान्तभूतोऽश्वः कदा शब्दं करोतीति तदुच्यते– यदा महः महतः संवरणात् अश्वशालारूपात् संवृतस्थानात् व्यस्थात् विनिर्गच्छति तदानीमरण्ये यवसे अविष्यन् घासार्थं गमिष्यन् शब्दं करोति । तद्वदग्निरपि ज्वलनशब्दं करोति । आत् अतोऽनन्तरम् अस्य शब्दं कुर्वतोऽग्नेः शोचिः अनु दीप्तिमनु वातः वाति वायुः प्रवर्तते । अग्निज्वालाशब्दसमनन्तरमेव वायोरवश्यं प्रवृत्तेरयमग्निर्वायुसख इति लोकेऽभिधीयते । अधशब्दो वर्गचतुर्थयुक्तोऽप्यानन्तर्यमेवाचष्टे । हे अग्ने, ते तव ज्वालाया वायुसंयोगानन्तरं व्रजनम् अरण्ये गमनस्थानं कृष्णम् अस्ति । तस्य दाहेन कृष्णवर्णमेव भासते । अतः कृष्णवर्त्माग्निरिति लोकप्रसिद्धिः ॥५॥

आ– विकर्णीमुपदधाति– 'प्रोथदश्वः' इति । वसिष्ठः । त्रिष्टुबाग्नेयी । प्रोथ पर्याप्तौ । अत्र प्रोथतिः ष्ठीव्य[ति] शब्दार्थः । ष्ठीवनकरणानुकारी शब्दायतेऽग्निः । अत्र मथ्यमानोऽग्निरुच्यते । यवसे घासे विषयभूते प्रोथत् ष्ठीवनं कुर्वन् अश्वः न अश्व इव अविष्यन् ।

---

14. P1 after प्रोथति adds ज्वालाभिः
16. S2 om. संवृतस्थानात् ; S2 om. व्यस्यात् वि°

स्यतिरुपसृष्टौ। व्याप्तिमकुर्वन्। [[v]यदा] [v]महः महत्। अत्र व्यत्ययः। महतः। [v]संवरणात्। संव्रियतेऽग्निरस्मिन्निति संवरणोऽरणिस्तम्भः, तस्मात् संवरणात्। अग्निः [v]व्यस्थात् व्यतिष्ठत प्रकटो भवति। [v]आत् अथ अनन्तरमेव [v]अस्य अग्नेः सखा [v]वातः [v]वाति अनुपवते। तदानीमेव [v]शोचिः भवति। शुच दीप्तौ। दीप्यमानो भवति। [v]अध अनन्तरं [v]स्म [v]ते तव अग्नेः व्रजनम्। व्रजति आव्रजत्यस्मात् इति [v]व्रजनम्। [v]कृष्णं कृष्णवर्णम् [v]अस्ति भवति स्म। प्रसिद्धमेतत् ॥५॥

आयोष्ट्वा सदने सादयाम्यवतश्छायायाᳪं समुद्रस्य हृदये।
रश्मीवतीं भास्वतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षम्।
परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीम्।
दिवं यच्छ दिवं दृᳪंह दिवं मा हिᳪंसीः।
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय।
सूर्यस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन
तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ॥६॥

आयोः। त्वा। सदने। सादयामि। अवतः। छायायाम्। समुद्रस्य। हृदये। रश्मीवतीम्। रश्मीवतीमिति रश्मिऽवतीम्। भास्वतीम्। आ। या। द्याम्। भासि। आ। पृथिवीम्। आ। उरु। अन्तरिक्षम्।
दिवम् ॥ त्वा ॥६॥

सा– कात्यायनः – "आयोष्ट्वेति स्वयमातृण्णाम्" (काश्रौ १७.१२.२६) इति। पाठस्तु– 'आयोष्ट्वा सदने सादयाम्यवतश्छायायाᳪं समुद्रस्य हृदये। रश्मीवतीं भास्वतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षम्। परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीम्। दिवं यच्छ दिवं दृᳪंह दिवं मा हिᳪंसीः। विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय। सूर्यस्त्वाऽभि पातु

1. H2–3 om. महः ... ... महतः; B1 trans. महः .... व्यत्ययः। महतः after त्रिष्टुबाग्नेयी। [Page 381, L 22]
2. B1 संवृणते for संव्रियते
3. B1 यस्य for अस्य
4. H3 after तव adds तस्य
5. B1 after अस्मात् adds स्थानात्; B1 अभि° for आस्ति
6. B1 प्रसिद्धोऽभवत् for प्रसिद्धमेतत्

शेषभूत-इष्टकोपधानमन्त्राः]

मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ' इति । एति निरन्तरं गच्छतीत्यायुरादित्यः । स च सर्वं जगदवति तस्य vअवतः vसमुद्रस्य समुद्रसमानस्य आदित्यस्य vहृदये प्रधानभूते vछायायाम् आश्रयभूते vसदने अस्मिन् स्थाने vसादयामि । कीदृशीं त्वाम् ? vरश्मीवतीं रश्मिसंयुक्तां vभास्वतीं दीप्तिमतीं हे इष्टके, vया त्वं vद्यां द्युलोकम् vआभासि प्रकाशयसि, तथा vपृथिवीं भूलोकम् vउरु विस्तीर्णम् vअन्तरिक्षं चाभासि, तादृशीं त्वां सादयामीति संबन्धः । शिष्टं व्याख्यातम् ॥६॥

आ– स्वयमातृण्णा उपदधाति– ' आयोष्ट्वा ' इति । स्वयमातृण्णादेवत्ये द्वे यजुषी । vया स्वयमातृण्णा vद्यां द्युलोकम् vआभासि प्रकाशयसि । vपृथिवीम् अपि या त्वमाभासि । vउरु विस्तीर्णम् vअन्तरिक्षं या त्वम् आभासि तां स्वयमातृण्णां त्वां vरश्मीवतीं रश्मिसंयुक्तां vभास्वतीं दीप्तिमतीं vत्वा त्वाम् vआयोः अवनस्य आदित्यस्य vसदने स्थाने vसादयामि । vअवतः अवनकर्तुः पालयितुः vछायायाम् आश्रये त्वां सादयामि । vसमुद्रस्य समुन्दनस्य आदित्यस्य vहृदये प्रधानप्रदेशे स्वयमातृण्णां त्वां सादयामीति संबन्धः ॥

' परमेष्ठी त्वा ' इति व्याख्यातम् । 'ध्रुवे सीदतम्' इति मन्त्रद्वयप्रतीते द्वे स्वयमातृण्णे vध्रुवे स्थिरे vसीदतम् इति, आसादिते इत्यर्थः ॥६॥

सहस्रस्य प्रमाऽसि सहस्रस्य प्रतिमाऽसि सहस्रस्योन्माऽसि ।
साहस्रोऽसि सहस्राय त्वा ॥७॥(७)॥

सहस्रस्य । प्रमेति प्रऽमा । प्रतिमेति प्रतिऽमा । उन्मेत्युत्ऽमा ।
साहस्रः । असि । सहस्राय । त्वा ॥ टो ॥७॥(७)॥

[अग्ने जातानष्ट ॥८॥ रश्मिना सत्याय सप्त ॥७॥ राड्यसि पञ्चदश ॥१५॥ अयं पुरो दश ॥१०॥ अग्निर्मूर्धा त्रिंशत् ॥३०॥ येन ऋषयोऽष्ट ॥८॥ तपश्च सप्त ॥७॥]

---

1. P1 before एति adds आ
7. H2–3 after आतृण्णा add असि आभासि, B1 after आतृण्णा adds आभासि
8. B1 त्वां, H2–3 तत् for तां
9. B1 om. त्वा
11. B1 °प्रदेश°, H2–3 °देशे for °प्रदेशे
13. B1 आदित्येत्यर्थः for आसादिते इत्यर्थः

सप्तानुवाकेषु पञ्चाशीतिः ॥८५॥ युञ्जानोऽग्ने जातान् पञ्चाशीतिः ॥८५॥

[इति शुक्लयजुर्वेदकाण्वसंहितायां षोडशोऽध्यायः ॥१६॥]

सा- कात्यायनः – "अग्निं प्रोक्षति हिरण्यशकलसहस्रेण शते द्वे द्वे प्रकिरति सहस्रस्येति प्रतिमन्त्रम्" (काश्रौ १७·१२·२८) इति। हिरण्यसंबन्धिनां शकलानां सहस्रेण अग्नेः प्रोक्षणं कुर्यात्। तत्र प्रथमशकलसहस्रस्य मध्ये द्वे द्वे शते 'सहस्रस्य' इत्येकैकेन मन्त्रेण प्रकिरेत्। तेषां पाठस्तु– 'सहस्रस्य प्रमाऽसि सहस्रस्य प्रतिमाऽसि सहस्रस्योन्माऽसि। साहस्रोऽसि सहस्राय त्वा' इति। हे चिते, इष्टकानां ^{v}सहस्रस्य पूर्वभागावस्थितस्य ^{v}प्रमा तुल्या ^{v}असि। तथा दक्षिणावस्थितस्येष्टकासहस्रस्य ^{v}प्रतिमा तुल्या ^{v}असि। एवं पश्चिमदिग्भागावस्थितस्येष्टकासहस्रस्य ^{v}उन्मा तुल्या ^{v}असि। हे चित्यग्ने, त्वमुत्तरस्यां दिशि ^{v}साहस्रः सहस्रसंबन्धी ^{v}असि। तथा ऊर्ध्वायां दिशि सहस्रसंख्याकफलसिद्ध्यर्थं त्वां प्रोक्षामि ॥७॥

[इति षोडशेऽध्याये सप्तमोऽनुवाकः ॥७॥]

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥१॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक- श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये षोडशोऽध्यायः ॥१६॥

आ– हिरण्यशकलसहस्रेणाग्निं प्रोक्षति– 'सहस्रस्य' इति। पञ्चाग्नेयानि यजूंषि। तत्र द्वे द्वे शते प्रकिरति प्रतिमन्त्रम्। ^{v}सहस्रस्य ^{v}प्रमा प्रमाणं भवसि। ^{v}सहस्रस्य ^{v}प्रतिमा प्रतिमानं भवसि। ^{v}सहस्रस्य ^{v}उन्मा ^{v}असि उन्मानं तुलामानं भवसि। यतः सहस्रार्हः ^{v}साहस्रः। अतः ^{v}सहस्राय सहस्रलाभार्थम् अपरिमितफलसिद्ध्यर्थं ^{v}त्वा प्रोक्षामीति संबन्धः ॥७॥

---

1. D after पञ्चाशीतिः ॥८५॥ adds अग्निर्हेतीनाम्। इन्द्रो हेतीनाम्। वरुणो हेतीनाम्। सोमो हेतीनाम्। बृहस्पतिर्हेतीनाम्। आज्यप्रौगं मरुत्वतीयं त्रिणवेल्यम्। रथन्तरꣳ साम बृहत्साम वैरूपꣳ साम वैराजꣳ साम शाक्वररैवते साम[नी]। युञ्जिकदङ्के मेनकधाने। प्रम्लोचन्ती च व्याघ्रो। विश्वची। आपः। उर्वस्यः। वस्फूर्जम् ॥

2. A °संहितापाठे for °संहितायां

15. P1 सायणाचार्य° for सायणाचार्येण

16. H2–3 प्रोक्षयति for प्रोक्षति

18. H2–3 वहसि for भवसि; B1 सहस्रस्यार्हः° for सहस्रार्हः°:

शेषभूत-इष्टकोपधानमन्त्राः]

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपुरीपूज्यपादपरमकारुण्यासादितश्रीकृष्ण-भक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोध-भट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे षोडशोऽध्यायः ॥१६॥

---

1. H3 °परि° for °पुरी°
2. H2-3 त्यागराज° for जातवेद°; H2-3 वेङ्कटेश्वरोपाध्येन for आनन्दबोध-भट्टोपाध्यायेन (L 3)

ॐ

सप्तदशोऽध्यायः

[अथ प्रथमोऽनुवाकः ।]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

षोडशेऽध्याये पञ्चमचितिविषया मन्त्रा उक्ताः । एतावता सर्वे चयनमन्त्राः समापिताः । अथ सप्तदशेऽध्याये चित्याग्नौ शतरुद्रियहोममन्त्रा उच्यन्ते--

नमस्ते रुद्र मन्यव उतो त इषवे नमः ।
बाहुभ्यामुत ते नमः ॥१॥

नमः । ते । रुद्र । मन्यवे । उतो इत्युतो । ते । इषवे । नमः ।
बाहुभ्यामिति बाहुऽभ्याम् । उत । ते । नमः ॥ जिं ॥१॥

सा- कर्मप्रकरणे पाठात् कर्माङ्गत्वमपीष्यते ।
ज्ञानहेतुत्वमप्यस्य तथोपनिषदीरितम् ॥१॥
किं जप्येनामृतत्वं नो ब्रूहीत्युक्तो मुनिर्जगौ ।
शतरुद्रियकेणेति जाबाला आमनन्ति हि ॥२॥
स्मृत्यागमपुराणेषु रुद्राध्यायप्रशंसनम् ।
बह्वस्ति तद्विस्तरेण रुद्रकल्पेऽभिधास्यते ॥३॥
इह कर्माङ्गता यादृग्वर्णिता ब्राह्मणेन ताम् ।
बोद्धुं शब्दार्थमात्रस्य विवृतिः क्रियते स्फुटा ॥४॥

कात्यायनः– "शतरुद्रियहोम उत्तरपक्षस्यापरस्यां स्रक्त्यां परिश्रित्स्वर्कपर्णेनार्ककाष्ठेन शातयन् सन्ततं जर्तिलमिश्रान् गवेधुकासक्तूनजाक्षीरमेके तिष्ठन्नुदङ् नमस्त इत्यध्यायेन । त्र्यनुवाकान्ते

4. K. °तीर्थं for °तीर्थ°
5. S2 om. पञ्चम° .. सर्वे; S2 °मन्त्रान् समाप्य for °मन्त्राः समापिताः
6. S2 om. अथ; P1 om. अध्याये; S2 om. चित्याग्नौ
11. S2 om. कर्मप्रकरणे ... स्फुटा (L 18)
20. K. बर्तिजल° for जर्तिल°

स्वाहाकारो जानुमात्रे। पश्चान्ते च नाभिमात्रे। प्राक् च प्रत्यवरोहेभ्यो मुखमात्रे। प्रतिलोमं प्रत्यवरोहाञ्जुहोति प्रमाणेषु नमोऽस्त्विति प्रतिमन्त्रम् " (काश्रौ १८·१·१-५) इति। पक्षाकारस्य चित्यस्याग्नेरुत्तरापरकोणे जर्तिलमिश्रैः गवेधुकासक्तुभिरजाक्षीरेण वार्कपर्णवता अर्ककाष्ठमयेन पात्रेण अविच्छिन्नया धारया अनेनाध्यायेन शतरुद्रियहोमः कर्तव्यः। तत्र 'नमस्ते रुद्र' इत्याद्यनुवाकत्रयमुक्त्वा स्रुचं जानुदघ्ने धारयमाणः स्वाहाकारं कुर्यात्। ततश्चतुर्थपञ्चमावनुवाकावुक्त्वा नाभिदघ्ने धारयमाणः स्वाहेत्युच्चारयेत्। ततः षष्ठानुवाकादि 'नमोऽस्तु रुद्रेभ्यो ये दिवि' इत्यतः प्राक्तनं सर्वमुक्त्वा स्रुचमास्यदघ्ने धारयमाणः स्वाहाकारं कुर्यात्। तत्र प्रथमेऽनुवाके प्रथममन्त्रपाठस्तु – [रुद्राध्यायस्य परमेष्ठिन आर्षम्। देवानां

---

1. K P1 om. प्रतिलोमं ... प्रतिमन्त्रम् (L 2)

2. S2 in place of पक्षाकारस्य ... इत्यभिप्रायः (P 388, L 11) reads अस्यार्थः। हिरण्यशकलैरग्निप्रोक्षणानन्तरं शतरुद्रियसंज्ञो होमः। तस्याहवनीये प्राप्तावपवादमाह – उत्तरपक्षपश्चिमकोणे याः परिश्रितो जङ्घामात्र्यादयः पूर्वं निखातास्तासु होमः। तत्र विधिः। जर्तिलैररण्यतिलैरारण्यतिलैर्मिश्रान् गवेधुकासक्तून् कशाकसक्तून् (Mh. om. कशाकसक्तून्) अर्कपत्रेण जुहोति। किं कुर्वन् – अर्ककाष्ठेन सततं क्षारयन् परिश्रित्सु पातयन् अर्कपत्रं दक्षिणकरेण (Mh. दक्ष° for दक्षिण°) आदाय अर्ककाष्ठं वामेनादाय तेन पातनीयम्। सक्तुस्थाने अजादुग्धमिति केचित्। उदङ्मुखो 'नमस्ते' इत्यध्याये (Mh. अध्यायेन।) तत्रानुवाकान्ते 'अर्भकेभ्यश्च वो नमः' इत्यत्र जानुमात्रे (S2 °मात्र°) परिश्रिति स्वाहाकारो विधेयः। पञ्चानुवाकान्ते 'सुधन्वने च' इत्यत्र नाभिमात्रे परिश्रिति स्वाहाकारः।

   ॐ॥ 'नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः' इति। रुत् दुःखं द्रावयतीति रुद्रः। यद्वा– रु गतौ। गत्यर्थास्ते ज्ञानार्थाः। रवणं रुत् ज्ञानम्। भावे क्विप्। तुगागमः। रुत् ज्ञानं राति ददातीति रुद्रः ज्ञानप्रदः। यद्वा– पापिनो नरान् दुःखभोगेन रोदयतीति रुद्रः। हे रुद्र, ते तव मन्यवे क्रोधाय नमो नमस्कारोऽस्तु। उतो अपि च ते तव इषवे बाणाय नमः। उत अपि च ते तव बाहुभ्यां नमः। तव क्रोधबाणहस्ता अस्मद्वैरिष्वेव प्रसरन्तु नास्मास्वित्यर्थः॥

   M2 beginning is missing. It commences : °मात्रे परिश्रिति स्वाहाकारः। 'नमोऽस्तु रुद्रेभ्यः' इति प्रत्यवरोहमन्त्राः। तेभ्यः प्राङ्मुखमात्रपरिश्रिति स्वाहाकारः। 'नमोऽस्तु' इति [तिसृभिः] ऋग्भिः प्रतिलोमं होमः। 'ये देवी' इति मुखमात्रे। 'येऽन्तरिक्षे' इति नाभिमात्रे। 'ये पृथिव्यां' इति जानुमात्रे। इति सूत्रार्थः। पाठस्तु– ॐ 'नमस्ते रुद्र मन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः'। Then follows S2. The Mss. M2 and S2 closely follow the commentary of Mahīdhara on Mādhyandina Śākhā of Śukla Yajurveda.

3. P1 after जर्तिल° ins. अरण्यतिला इत्यर्थः

5. K °पञ्चमानुवाकौ for पञ्चमावनुवाकौ

6. K प्राग्वर्तमानं for प्राक्तनं; K अज्य° for आस्य°

प्रजापतेर्वा । अघोरस्यार्षमित्यन्ये । एकरुद्रदेवत्यः । तत्राद्यानुवाके षोडशर्चे एका गायत्री तिस्रोऽनुष्टुभस्तिस्रः पङ्क्तयः सप्तानुष्टुभः द्वे जगत्यौ ।] ' नमस्ते रुद्र मन्यव उतो त इषवे नमः । बाहुभ्यामुत ते नमः ' इति । रुत् दुःखम् । तत् द्रावयति नाशयति [इति] रुद्रः । रुदिर् अश्रुविमोचने । यद्वा– रु गतौ । रुत् ज्ञानम् । तद्दाति ददातीति रुद्रः । यद्वा– पापिनो दुःखभोगकाले रोदयतीति रुद्रः । यद्वा – सतो रोरूयमाणान् द्रवति रक्षार्थमिति रुद्रः । तथा च यास्कः – " रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा यदरुदत्तद्रुद्रस्य रुद्रत्वम् इति काठकम् । यदरोदीत्तद्रुद्रस्य रुद्रत्वम् इति हारिद्रविकम् । तस्यैषा भवति रुद्राय " (नि १०·५-६) इति । एवंभूत हे ᵛरुद्र, ᵛते त्वदीयो यो मन्युः कोपस्तस्मै ᵛनमः अस्तु । स मन्युरस्मद्वैरिष्वेव प्रसरतु, न त्वस्मासु । यद्वा– मन्युर्यज्ञो यज्ञात्मने ते तुभ्यं नमः । ᵛउतो अपि च ᵛते त्वदीयाय ᵛइषवे बाणाय नमोऽस्तु । उत अपि च ᵛते ᵛबाहुभ्यां त्वदीयाभ्यां धनुर्बाणोपेताभ्यां ᵛनमः अस्तु । एतत् सर्वं वैरिण्येव प्रवर्तताम् । न तु मयीत्यभिप्रायः ॥१॥

आ– हरिः ॐ । ' नमस्ते रुद्र मन्यवे ' इति । अथ शतरुद्रियहोमः । " अथातः शतरुद्रियं जुहोति " (शब्रा ९·१·१·१) इत्युपक्रम्य " स एषः अत्राग्निश्चितो बुभुक्षमाणो रुद्ररूपेणावतिष्ठते । तस्य तर्पणम् । देवैर्द्वितीयं दर्शनम् " (?) । " यद्वै तच्छतरुद्रियं जुहोति " इत्युपक्रम्य " प्रजापतिं विस्रस्तात् " इत्यभिधाय मन्त्रार्थानुगुण्येन श्रुतिर्भवति– " स एव शतशीर्षा रुद्रः समभवत् " इति । ' नमस्ते रुद्र मन्यवे ' इति रुद्राध्यायः । अत्र परमेष्ठिन आर्षम् । देवानां वा प्रजापतेर्वा । अघोरस्यार्षमिति केचित् । एकरुद्रदेवत्यः । तत्राद्यनुवाके षोळशर्चः । एका गायत्री । तिस्रोऽनुष्टुभः । तिस्रः पङ्क्तयः । सप्तानुष्टुभः । द्वे जगत्यौ । ब्रह्मचारिकल्पादि-कल्पानुसारेण श्रीरुद्रनामकीर्त्या शुद्धस्य वैदिकस्य शिवभक्तिपरायणस्य श्रीरुद्रसमाराधनार्थं जपहोमादिफलसिद्धयर्थं च श्रीरुद्रन्यासः । प्रथमानुवाकं शिरसि द्वितीयानुवाकं बाह्वोः तृतीयं पादयोः चतुर्थं पृष्ठे पञ्चममुदरे षष्ठं गुह्ये सप्तमं हृदये अष्टमं पार्श्वयोः । तथा प्रथमानुवाकं पञ्चबुद्धीन्द्रियेषु द्वितीयं कर्मेन्द्रियेषु तृतीयमन्तःकरणचतुष्टये चतुर्थं प्राणादिपञ्चके पञ्चमं महाभूतेषु षष्ठं सप्तधातुषु

---

3. K अघ° for अश्रु°; K after °मोचने adds रुद्रः
12. B1 om· हरिः; H2–3 after अथ ins. अतः
14. B1 om· दर्शनम्; B1 यद्देवैतच्° for यद्वै तच्°
15. B1 विस्रस्तादिभिर्विधाय for विस्रस्तात् इत्यभिधाय; H2–3 भवेत् for भवति; B1 om. सः
17. B1 प्रथम° for आद्य°
19. H2 °नामर्थं, H3 °समानार्थं for °समाराधनार्थं
20. B1 °कल्प° for °फल°; B1 °व्याख्या for न्यासः
21. H2–3 गुल्फयोः for गुह्य; B1 om· पञ्च°; H3 बुद्ध्यादि° for बुद्धि°
22. B1 °चतुष्टयेषु for चतुष्टये; B1 पञ्चकेषु for °पञ्चके; H3 om. षष्ठं सप्तधातुषु

सप्तमं हृदये अष्टममात्मनि विन्यसेत् । मन्त्रांस्त्वर्थरूपांश्च रुद्रान् अशीतित्रयपरिमाणपरिमितान् उभयतोनमस्कारान् घोररूपान् एकतोनमस्कारान् शान्तान् रुद्रान् ध्यायन् न्यसेत् । तत्रापि विशेषः । शान्तान् देहान्तर्न्यसेत् । घोरान् बहिरिति ।

अथ प्रतिमन्त्रन्यासः – "या ते रुद्र इति शिखायाम् । अस्मिन् महत्यर्णव इति शिरसि । सहस्राणीति ललाटे । हꣳसः शुचिषदिति भ्रूमध्ये । त्र्यम्बकमिति दृशोः । नमः स्रुत्याय इति कर्णयोः । मा नस्तोक इति नासिकायाम् । अवतन्य इति मुखे । नीलग्रीवा इति कण्ठे । नमस्ते आयुधायेति बाह्वोः । ये तीर्थानीति हस्तयोः । नमो वः किरिकेभ्य इति हृदये । नमो गणेभ्य इति पृष्ठे । नमो हिरण्यबाहव इति पार्श्वयोः । हिरण्यगर्भ इति नाभौ । मीळ्हुष्टम इति कट्याम् । ये भूतानामिति गुह्ये । ये वृक्षेष्विति अपाने । मा नो महान्तमिति ऊर्वोः । एष त इति जान्वोः । ये पथामिति पादयोः । अध्यवोचदिति कवचे । नमो बिल्मिन इत्युपकवचे । नमोऽस्तु नीलग्रीवाय इति तृतीयनेत्रे । प्र मुञ्च धन्वन इत्यस्त्रम् । य एतावन्तश्च इति दिग्बन्धः" । अवशिष्टमन्त्रैः रक्षा कर्तव्या ॥

'नमस्ते रुद्र मन्यवे' इत्यष्टाक्षरोऽयं महामन्त्रः । श्रीरुद्रशब्देन सूचितः श्रीरुद्रद्वादशाक्षरमन्त्रः 'ॐ नमो भगवते रुद्राय' इति । स्वयमेव ब्रह्मचारी श्रीसदाशिवोऽब्रवीत् –

ओंकारं मूर्ध्नि विन्यस्य नकारं नासिकाग्रतः ।
मोकारं तु ललाटे वै भकारं मुखमध्यतः ॥१॥

गकारं कण्ठदेशे तु वकारं हृदये न्यसेत् ।
तेकारं दक्षिणे हस्ते रुकारं वामतोऽन्यसेत् ॥२॥

द्राकारं नाभिदेशे तु यकारं पादयोर्न्यसेत् ।
एवं न्यासविधिं कृत्वा ततः संपुटमाचरेत् ॥३॥

---

1. H3 मन्त्रार्थ° for मन्त्रांस्त्वर्थ°
2. H2–3 रुद्राध्यायान्, B1 रुद्रान् ध्यायान् for रुद्रान् ध्यायन्
3. B1 विशेषणान्तान् for विशेषः । शान्तान् ; H3 देहान् for देहान्तः
4. H2–3 om. महति
6. B1 om. अव ... हस्तयोः (L 7)
7. H3 कर्णे for कण्ठे
9. B1 फले for अपाने
11. B1 om. नमो बिल्मिन इत्युपकवचे
13. B1 after इति ins. अत्र; H2 om. श्रीरुद्रशब्देन सूचित.
17. H3 कर्ण° for कण्ठ°

" त्रातारमिन्द्रम् " (कासं २२·५·४), " त्वं नो अग्ने " (कासं ३३·१·७), " सुगन्तु पन्थाम् " (?), " असुन्वन्तम् " (कासं १३·५·१) " तत् त्वा यामि " (कासं २०·२·१२), " आ नो नियुद्भिः " (कासं २९.३.९), " वयꣳ सोम " (कासं ३·७·६), " तमीशानम् " (कासं २७·११·५), " अस्मे रुद्राः " (कासं ३२·४·७), " स्योना पृथिवि " (कासं ३५·४·२०) इत्येतत् संपुटम् । एता दश कण्डिकाः श्रीरुद्राध्यायस्याद्यन्तयोर्जपेत् ॥

अथ आत्मानं रुद्ररूपं पञ्चमुखं ध्यायेत्– ' त्रिणेत्रं प्रतिमुखं दशभुजम् अभयवरदहस्तं शक्तित्रिशूलाक्षमालाधारकं दक्षिणतः अभि डमरुकखट्वाङ्गनीलोत्पलगण्डिजपूरकं वामतः वरदाक्षमालाहस्तं त्रिशूलाभयहस्तम् ' इति । चतुर्भुजम् एकमुखं वा–

चिद्घनानन्दरूपं तं सर्वाभरणभूषितम् ।
नीलग्रीवं शशाङ्काङ्कं परमात्मानमव्ययम् ॥१॥
शुद्धस्फटिकसंकाशं नागयज्ञोपवीतिनम् ।
वृषस्कन्धसमारूढमुमादेहार्धधारिणम् ॥२॥
प्रसन्नवदनं हृद्यं सर्वदेवनमस्कृतम् ।
एवं ध्यायन् जपेद्धीमान् होमादावपि यत्नतः ॥३॥

एत्येवं कुर्वन्– सर्वपापाविनिर्मुक्तो मन्त्रसिद्धिमवाप्नुयात् ॥

यक्षराक्षसभूतप्रेतपिशाचशाकिनीडाकिनीसर्वश्वापदशत्रुतस्कराद्युपद्रवा विनश्यन्तीति ईश्वरेणाभिहितम् ॥ ' नमस्ते रुद्र मन्यवे ' इत्यादिभिश्चतसृभिर्द्वादश कृच्छ्राणि कृत्वैकादशसहस्रं निरन्तरं जपेत् । स कृतपुरश्चरणः पश्चाद् विनियोगं कुर्यात् । ' नमस्ते रुद्र मन्यवे ' इत्यादि चतसृभिः कण्डिकाभिः जर्तिलगवेधुकानां दधिमधुघृताक्तानामयुतं जुहुयात् । भयेभ्यः प्रमुच्यते ।

---

2. H3 सगन्तु for सुगन्तु
6. H3 om. इति; H2–3 एकादश खण्डिकाः for एता दश कण्डिकाः; B1 अर्थ तयोर्जपः for आद्यन्तयोर्जपेत्
7. H2–3 यथा for अथ; B1 अभयहस्तं वरदहस्तं for अभयवरदहस्तं
8. B1 om. त्रिशूलाक्ष ... मालाहस्तं (L 9)
10. B1 चिदानन्द for चिद्घनानन्द°; H2–3 तत् for तं
15. H2–3 ध्यायेत् for ध्यायन्
19. B1 सकृत् for स कृत°
20. H2–3 खण्डिकाभिः for कण्डिकाभिः; B1 °गवेधुकातिलानां for °गवेधुकानां

‘ नमस्ते ’ इति । रुत् शोकः संसारस्तं तारयति । द्रु द्रवणे । द्रावयतीति रुद्रः । रु गतौ । रुत्या ज्ञानदीप्त्या संसारकारणमज्ञानान्धकारं द्रावयति निवर्तयति विनाशयतीति वा रुद्रः । यद्वा—रुत् ज्ञानम् । रा दाने । ज्ञानं राति ददातीति वा रुद्रः । यद्वा— पापिनो दुःखभोगकाले रोदयतीति वा रुद्रः । यद्वा—रुच दीप्तौ । रुचा स्वरुचा स्वरूपभूतप्रकाशेनैव । द्द गतौ । द्रियते आद्रियते प्रकाश्यत इति रुद्रः । स्वयंप्रकाशरूपः कोटिचन्द्राधिकतेजोराशिः । तत्संबोधनं हे [v]रुद्र, [v]ते तव, सर्वेषामात्मत्वेन सदा अपरोक्षतया पुरोवर्तीवावभासन् । तव संबन्धिने [v]मन्यवे क्रोधाय [v]नमः । वैदिकमार्गविरोधिनो दृष्ट्वा तत्संहरणाय संजातकोपस्य श्रीभगवतो रुद्रस्य क्रोधाय स्वपुरुषार्थप्रतिबन्धसंहरणार्थं क्रोधं प्रथमं नमस्करोति — ‘ नमस्ते रुद्र मन्यवे ’ इति । अथवा मन्युर्यज्ञः । यज्ञात्मने तुभ्यं नमः । [v]उतो उत अपि [v]ते तव संबन्धिने [v]इषवे इषुकाण्डाय [v]नमः । श्रीमद्भगवतोऽद्वितीयतया अप्रतिभटस्य सदाशिवस्य स्वलीलया बहुरूपस्य स्वपादमूलमाश्रितानां स्वभक्तानामेव रक्षणार्थमायुधधारणम् । [v]उत अपि हे श्रीभगवन् रुद्र, [v]ते तव [v]बाहुभ्यां भुजदण्डाभ्यां [v]नमः । अस्य पुरश्चरणं कृच्छ्रद्वादशरात्रं कृत्वा एकादशसहस्रं निरन्तरं जपेत् । स कृतपुरश्चरणो भवति । ततो दक्षिणामूर्तिमाश्रित्य एकादशसहस्रं जपेत् । सर्वं पापं प्रणश्यति । ततो लक्षं जपेत् । सप्तजन्मकृतं पापं प्रणश्यति । विनियोगान्तरं कल्पतस्त्ववगन्तव्यम् ॥२॥

1. B1 संसरस्तं रुद्रद्रववणो; H2 संसारं तरत्स द्रविणे; H3 संसरं तरत्यद्रविणे for संसारस्तं तारयति । द्रु द्रवणे
2. B1 रुत् for रुत्या
4. B1 om. वा; B1 रूप° for स्वरूप°; H3 °प्रकौरद्दुर्व आगतौ for °प्रकाशेनैव । द्द गतौ ।
5. H2–3 कोटिकचण्डाधिगत° for कोटिचन्द्राधिक°
6. B1 साक्षिपरोक्षतया for सदा अपरोक्षतया; B1 °वर्तीवावभासन् । पुष्कायतेति निर्देशः, H2 °वर्तीयोवभासताद्युदाते इत्यातिदेशम्; H3 °वर्तीयावभासताद्युदाते इत्यनिर्दे ... for पुरोवर्तीवावभासन् ... ।
7. B1 before वैदिक adds वेद°; H2–3 °विरोधिनं for विरोधिनो
8. H2–3 °बोध° for °बन्ध°; B1 नमस्करोमि for नमस्करोति
9. B1 संबन्धि, H3 संबन्धिन्यै for संबन्धिने
10. B1 सप्रति° for अप्रति°
11. H2–3 रक्षार्थं for रक्षणार्थं
12. B1 कृच्छ्रं for कृच्छ्र°
13. B1 सकृत् for स कृत°

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तन्वा शंतमया गिरिशन्ताभि चाकशीहि ॥२॥

या । ते । रुद्र । शिवा । तनूः । अघोरा । अपापकाशिनीत्यपापऽकाशिनी ।
तया । नः । तन्वा । शंतमयेति शम्ऽतमया ।
गिरिशन्तेति गिरिऽशन्त । अभि । चाकशीहि ॥ ठुं ॥२॥

सा– अथ द्वितीयः – ' या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तन्वा शंतमया गिरीशन्ताभि चाकशीहि ' इति । द्वे हि रुद्रस्य तनू । तथा च तैत्तिरीये श्रूयते– " रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोराऽन्या शिवाऽन्या " (तैसं ५.७.३) इति । हिंसिका घोरा अनुग्राहिका शिवा । हे ᵛरुद्र, ᵛते तव ᵛया ᵛतनूः ᵛशिवा अस्मास्वनुग्रहकरी । अत एव ᵛअघोरा हिंसिका न भवति । सैव स्पष्टीक्रियते– ᵛअपापकाशिनी पापं हिंसारूपमनिष्टं काशयतीति पापकाशिनी । तादृशी न भवतीत्यपापकाशिनी । गिरौ कैलासे स्थित्वा नित्यं प्राणिभ्यो यः सुखं तनोति स गिरिशन्तः । गिरि वाचि स्थित्वा शं तनोतीति वा । तथाविध हे रुद्र, ᵛशंतमया अतिशयेन सुखकारिण्या ᵛतया ᵛतन्वा ᵛनः अस्मानभिलक्ष्य ᵛचाकशीहि प्रकाशं कुरु । तादृशीं त्वदीयां तनुं प्रकाश्य अस्मान् सुखिनः कुर्वित्यर्थः ॥२॥

आ– श्रीभगवतो भक्तानुग्रहार्थं बहवस्तनवः सन्ति । तास्तु सुकृतीनां श्रीभगवदनुग्रहवशात् शान्तरूपा आभान्ति । दुष्कृतीनां तु ता एव घोरा भान्ति । ᵛते तव ᵛशिवा शान्ता ᵛया ᵛतनूः देहः । तनु विस्तारे । सर्वं जगत् यथा परितन्यते विस्तीर्यते इति तनूः । ᵛअघोरा अभयंकरा अविषमा । ᵛअपापकाशिनी अपापस्य पुण्यस्य फलदानार्थम् अपापं प्रकाशयितुं शीलं यस्याः सा अपापकाशिनी । ᵛतया ᵛशंतमया सुखतमया केवलं सुखरूपिण्या

---

6. M2 S2 या ते ... ... चाकशीहीति । हे रुद्र या ते तवेदृशी तनूः शरीरं हे गिरिशन्त तया तन्वा नोऽस्मानभिचाकशीहि । अभिपश्य । चाकशीतिः पश्यतिकर्मा । कीदृशी तनूः ! शिवा शान्ता मङ्गलरूपा । यतोऽघोरा अविषमा सौम्या । अत एवापापकाशिनी । पापमसुखं काशयति प्रकाशयति पापकाशिनी । न पापकाशिनी अपापकाशिनी । या पुण्यफलमेव ददाति न पापफलमित्यर्थः । गिरौ कैलासे स्थितः शं सुखं प्राणिनां तनोति विस्तारयति गिरिशन्तः । गिरि वाचि स्थितः शं तनोतीति वा । गिरौ मेघे स्थितो वृष्टिद्वारेण शं तनोतीति वा । गिरौ शेत इति गिरिशः । अमति गच्छति जानातीत्यन्तः सर्वज्ञः । अम गतौ भजने शब्दे कर्तरि क्तः । गिरिशश्चासावन्तश्च गिरिशन्तः । तत्संबुद्धिः । शकन्ध्वादित्वात् पररूपम् । कीदृश्या तन्वा ? शंतमया सुखयितृतमया ॥२॥ for अथ द्वितीयः ... कुर्वित्यर्थः [-L 14]

13 K प्रकाशय for प्रकाश्य

अतिशयेन सुखयित्र्या तन्वा । हे गिरिशन्त, गिरौ पर्वते कैलासाख्ये व्यवस्थितः सन् शं सुखं तनोतीति गिरिशन्तः । तत्संबोधनं हे गिरिशन्त । यद्वा– गिरौ मेघे स्थित्वा वृष्टिद्वारेण शं तनोतीति । यद्वा– गिरि श्रीपञ्चाक्षरादिगिरि वाचि अक्षरपदवाक्यदेवतारूपेण स्थित्वा प्रपन्नानां शं तनोतीति गिरिशन्तः । तत्संबोधनम् । तया तन्वा नः अस्माकम् अभिचाकशीहि । त्वत्प्रसादात् प्राप्तसुखानस्मान् अभिपश्य । चाकशीतिः पश्यतिकर्मा । अस्य पुरश्चरणं द्वादशदिनानि चरुभोजी जपित्वा कृतपुरश्चरणो भवति । ततस्तिलतण्डुलयवकमलकिञ्जल्काना-मेकादशसहस्रं जुहुयात् । अन्नवानभिजायते । विनियोगान्तरं कल्पतोऽवगन्तव्यम् ॥२॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥३॥

याम् । इषुम् । गिरिशन्तेति गिरिऽशन्त । हस्ते । बिभर्षि । अस्तवे ।
शिवाम् । गिरित्रेति गिरिऽत्र । ताम् । कुरु ।
मा । हिंसीः । पुरुषम् । जगत् ॥ चुं ॥३॥

सा– **अथ** तृतीयः – ' यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ' इति । हे गिरिशन्त परमसुखप्रापक, त्वं याम् इषुं बाणम् अस्तवे शत्रुषु प्रक्षेप्तुं हस्ते बिभर्षि धारयसि । गिरिं कैलासाख्यं त्रायते पालयतीति गिरित्रः । हे तादृश रुद्र, तां हस्ते धृतामिषुं शिवाम् अस्मासु शान्तां कुरु । पुरुषम् अस्मदीयं मनुष्यम् । जगत् इति मनुष्यव्यतिरिक्तमपि जङ्गमं गवादिकं मा हिंसीः ॥३॥

---

1. B1 कैलाश° for कैलास°; H2-3 before व्यवस्थितः add गिरौ
3. H2-3 वाचः for वाचि; H2-3 °वाक्येन for °वाक्यदेवतारूपेण; B1 प्रपन्नेन for प्रपन्नानां
6. H2–3 °भोजनं कृत्वा for °भोजी जपित्वा; H2–3 °यवाकं किञ्जल्कम् for °यवकमलकिञ्जल्कानाम्
13. M2 S2 यामिषुं ... जगदिति । हे गिरिशन्त त्वं यामिषुं बाणं हस्ते बिभर्षि धारयसि । किं कर्तुम् ? अस्तवे । असु क्षेपणे । तुमर्थे तवेप्रत्ययः । आसितुं शत्रून् क्षेप्तुमित्यर्थः । हे गिरित्र गिरौ कैलासे स्थितो भूतानि त्रायत इति गिरित्रः । तामिषुं शिवां कल्याणकारिणीं कुरु । किं च– पुरुषं पुत्रपौत्रादिकं जगत् जङ्गममन्यदपि गवाश्वादिकं मा हिंसीः मा वधीः ॥३॥ for यामिषुं ... मा हिंसीः (L 17)
15. K एतादृश for हे तादृश
16. K धृत्वा for धृताम्

आ– ' यामिषुम् ' इति । हे श्रीभगवन् गिरिशन्त परमसुखप्रापक, तव हस्ते याम् इषुं बाणं बिभर्षि । भृञ् भरणे । धारयसि । किमर्थमिति । अस्तवे । असु क्षेपणे । असितुं क्षेप्तुम् । शत्रुमर्मास्विति शेषः । गिरित्र । पूर्वोक्तगिरौ स्थित्वा जगत् त्रायत इति गिरित्रः । त्रैङ् पालने । तत्संबोधनं हे गिरित्र, ताम् इषुं शिवां शान्तां कुरु । मा हिꣳसीः पुरुषम् । पुरि शेषे (ते ?) इति पुरुषः । तं पुरुषाभिमानिनं मा वधीः । किं च– जगत् । सामान्येन जगच्च मा हिꣳसीः ॥३॥

शि॒वेन॒ वच॑सा त्वा॒ गिरि॒शाच्छा॑ वदामसि ।
यथा॑ न॒ः सर्व॒मिज्जग॑दय॒क्ष्मꣳ सु॒मना॒ अस॑त् ॥४॥

शि॒वेन॑ । वच॑सा । त्वा॒ । गि॒रि॒शे॒ति॒ गिरि॑ऽश । अच्छ॑ । व॒दा॒म॒सि॒ ।
यथा॑ । न॒ः । सर्व॑म् । इत् । जग॑त् । अ॒य॒क्ष्मम् । सु॒मना॒ इति॑ सु॒ऽमना॑ः । अस॑त् ॥ छं ॥४॥

सा– अथ चतुर्थी – ' शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ' इति । गिरौ कैलासे शेते तिष्ठतीति गिरिशः । हे गिरिश, त्वाम् अच्छ प्राप्तुं शिवेन मङ्गलेन स्तुतिरूपेण वचसा वदामसि वयं प्रार्थयामहे । यथा येन प्रकारेण नः अस्मदीयं सर्वम् इत् जगत् सर्वमपि मनुष्यपश्वादिकं जङ्गमजातम् अयक्ष्मं रोगरहितं सुमनाः असत् सौमनस्योपेतं भवति तथा कुरु ॥४॥

आ– ' शिवेन वचसा ' इति । अस्य पुरश्चरणम् । कृच्छ्रमेकं चरित्वा एकविंशद्दिनानि निरन्तरं जपेत् । स कृतपुरश्चरणो भवति । एवं कृतपुरश्चरणेन ब्राह्मणेन राजा कारयेत् ।

---

3. B1 गिरिः पूर्वोक्तः for गिरित्र । पूर्वोक्त°

6. B1 om. जगच्च

11. S2 M? शिवेन ... असदिति । गिरौ कैलासे शेते गिरिशः । हे गिरिश शिवेन वचसा मङ्गलेन स्तुतिरूपेण वचनेन त्वा अच्छ त्वां प्राप्तुं वयं वदामसि वदामः प्रार्थयामहे । " अच्छाभेराप्तुमिति शाकपूणिः " (नि ५·२८) इति यास्कोक्तेः । " संहितायां निपातस्य च " (पा ६·३·१३६) इति दीर्घः । " इदन्तो मसि " (पा ७·१·४६)। किं वदाम इत्यत आह– नोऽस्माकं सर्वमित् सर्वमेव जगत् जङ्गमं नरपश्वादि यथा येन प्रकारेण अयक्ष्मं निरोगं सुमनाः शोभनमनस्कम् असत् भवति तथा कुर्विति शेषः । सुमनः-शब्दे पुंस्त्वमार्षम् । जगद्विशेष[ण]त्वात् । असदित्यत्र " लेटोऽडाटो " (पा ३·४·९४) इत्यट् । इलोपः ॥४॥ for शिवेन ··· तथा कुरु (L 15)

17. B1 om. सः

अकालमरणेन नश्यमाने राष्ट्रे एतेषां तिलव्रीहिगोधूमानां दधिमधुघृताक्तानां लक्षं जुहुयात् एकविंशद्दिनानि । तस्मात् राष्ट्रे अकालमरणभयं न भवति । नवभिर्दिवसैरुपद्रवा नश्यन्ति । अष्टशतदिनैरखिलजगदकालमरणमुपशमयति । हे श्रीभगवन् गिरिश । गिरौ हिमवति वैवाहिकादिनेषु शेत इति गिरिश । तत्संबोधनं हे गिरिश । हे अच्छ, निरवद्यत्वात् स्वभावतो निर्मलः । अतिशुभ्रत्वात् अच्छ, त्वा त्वां शिवेन परमानन्दरूपाभिज्ञापकेन वचसा वाक्येन वदामसि ।

> वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
> धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ इति ।

छान्दसस्त्विकारः । " इदन्तो मसि " (पा ७.१.४६) इति वदामः । यथा येन प्रकारेण इदं सर्वं जगत् इत् अपि अयक्ष्मं व्याधिरहितं भवादिरोगरहितम् असत् स्यात् तथा त्वं संपादयेति शेषः । किंच – नः अस्माकं सुमनाः इदं जगत् शोभनमनस्कं च असत् भूयात् ॥४॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परा सुव ॥५॥

अधि । अवोचत् । अधिवक्तेत्यधिऽवक्ता । प्रथमः । दैव्यः । भिषक् ।
अहीन् । च । सर्वान् । जम्भयन् । सर्वाः । च । यातुधान्य इति यातुऽधान्यः ।
अधराचीः । परा । सुव ॥ व्र्कं ॥५॥

---

1. B1 नश्यमानेन for नश्यमाने
2. B1 एवं for एक°; B1 तस्मिन् for तस्मात्
3. B1 अखिलं for °अखिल°; B1 इति हि भवति for हिमवति
4. B1 om. शेते
8. H3 ततो for धातोः; H3 तम् for तद्

सा– अथ पञ्चमः –'अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहींश्च सर्वान् जम्भयन्त्सर्वांश्च यातुधान्योऽधराचीः परा सुव' इति। यो रुद्रः ᵛअधिवक्ता अधिकोऽयमित्येवं सर्वेषामग्रे मां प्रतिवक्तुं समः। तेनोक्ते सति मम सर्वाधिक्यं तदानीमेव सिध्यति। अतस्तादृशो रुद्रः ᵛअध्यवोचत् मां सर्वाधिकं वदतु। कीदृशोऽधिववता ? ᵛप्रथमः देवानां मध्ये मुख्यः। सर्वान् देवानर्हतीति ᵛदैव्यः। देवान् पालयितुं सम इत्यर्थः। ᵛभिषक्। एतस्य ध्यानमात्रेण सर्वरोगोपशमनादयं चिकित्सकः। किं च– ᵛअहीन् ᵛच ᵛसर्वान् सर्पव्याघ्रादीन् सर्वानपि ᵛजम्भयन् विनाशयन्। ᵛसर्वाः ᵛच ᵛयातुधान्यः सर्वानपि राक्षसान्। ᵛअधराचीः। अधोञ्चनाः अधो गमनान् कृत्वा ᵛपरासुव पराभूतान् प्रेरय ॥५॥

आ– 'अध्यवोचत्' इति। अस्य पुरश्चरणम्। अर्धकृच्छ्रं चरित्वा पञ्च दिनानि शाकमूलफलपयश्चरुभोजी दिवावश्यकाविरोधेन तिष्ठन्निरन्तरं जपेत्। ततः कृतपुरश्चरणो भवति। तेन राजा रक्षां कारयेत्। आत्मनः दीर्घायुष्यसिद्धिमिच्छन् सिद्धयर्थं शुद्धतण्डुलदूर्वाङ्कुर-यवैराज्यसक्तैर्नित्यवदष्टसहस्रहोमः। विशेषतस्त्वार्द्रायां दशसहस्रहोमः। तस्मिन्नेव तिलगुलपयो-मिश्रचरुणाऽष्टसहस्रहोमः। अनेन राजा दीर्घायुर्भवति। कल्पतोऽन्यदवगन्तव्यम्। ᵛअधि इत्युपरिभावमैश्वर्यं वा। ᵛअवोचत् ऐश्वर्यभावेन योऽवदत्। " अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा " (भगी ७·६) इत्येवं यो वक्ति स एव ᵛअधिवक्ता ब्रह्मादीनामाज्ञा-पयिता। योऽधिवक्ता स एव ᵛप्रथमः मुख्यः स्वतन्त्रः। ᵛदैव्यः। दिवि ब्रह्मतेजसि भवो दैव्यः। ᵛभिषक् संसारव्याधेश्चिकित्सकः श्रीमहादेवः। किंच– मम विज्ञापनं शृणु। ᵛअहीन्

1. S2 M2 अध्यवोचत् ... परासुवेति। रुद्रो मामध्यवोचत् अधिवक्तु मां सर्वाधिकं वदतु। तेनोक्ते मम सर्वाधिक्यं भवत्येवेत्यर्थः। कीदृशः ? अधिवक्ता अधिकवदनशीलः। प्रथमः सर्वेषां मुख्यः। पूज्यत्वात्। दैव्यः देवेभ्यो हितः। भिषक् रोगनाशकः। स्मरणेनैव रोगनाशाद्भिषक्त्वम्। एवं परोक्षमुक्त्वा प्रत्यक्षमाह– हे रुद्र सर्वा यातुधान्यः। यातुधानीः राक्षसीः त्वं परासुव पराक्षिप। अस्मत्तो दूरीकुरु। किं कुर्वन् ? सर्वानहीन् सर्पव्याघ्रादीन् जम्भयन् विनाशयन्। कीदृशीर्यातुधानीः। अधराचीः। अधरे अधो देशेऽञ्चन्ति ता अधराच्यः। ता अधोऽधोगमनशीलाः। चौ समुच्चये। सर्पनाशराक्षसीक्षेपौ सहैव कुर्वित्यर्थः ॥·॥ for अध्यवोचत् .. प्रेरय (L 7)

6. P1 K after यातुधान्यः ins. लिङ्गवचनव्यत्ययश्छान्दसः

7 K अधोचराः for अधोञ्चनाः

9. B1 °लक्ष° for °फलपय°; H2 °चरुणा होमी for °चरुभोजी; B1 [अ] रोधेन for [अ] विरोधेन

10. H2–3 सिद्धार्थं, B1 सिद्धार्थं° for सिद्ध्यर्थं

11. B1 नित्यमत्र दृष्ट° for नित्यवदष्ट°

12. B1 निरुजो for राजा

शतरुद्रियहोममन्त्राः]

ब्रह्मणः (?) शिरसो हीनत्वात् नागा अहयः । तान् ᵛजम्भयन् । जृभि गात्रविनामे । ᵛसर्वान् अहीन् प्राणिहिंसकान् जम्भयन् विनाशयन् । ᵛसर्वाः ᵛच ᵛयातुधान्यः । यातुधानीः राक्षसीः प्राणिहिंसकाः ᵛअधराचीः अधोऽञ्चना अधोगमनाः कृत्वा ᵛपरासुव पराक्षिप निक्षिप ॥५॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेळ ईमहे ॥६॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृळयाति नः ॥७॥

असौ । यः । ताम्रः । अरुणः । उत । बभ्रुः । सुमङ्गल इति सुऽमङ्गलः ।
ये । च । एनम् । रुद्राः । अभितः । दिक्षु । श्रिताः ।
सहस्रश इति सहस्रऽशः । अव । एषाम् । हेळः । ईमहे ॥ व्रौं ॥६॥
असौ । यः । अवसर्पतीत्यवऽसर्पति ।
नीलग्रीव इति नीलऽग्रीवः । विलोहित इति विऽलोहितः ।
उत । एनम् । गोपाः । अदृश्रन् । अदृश्रन् । उदहार्य इत्युदऽहार्यः ।
सः । दृष्टः । मृळयाति । नः ॥ द्रूं ॥७॥

सा– अथ षष्ठः – ' असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेळ ईमहे ' इति । ᵛयः रुद्रः ᵛअसौ मण्डलस्थादित्यरूपः स च ᵛताम्रः

---

1. H2–3 अब्रह्मः for ब्रह्मणः

2. B1 राक्षसस्त्रीः for राक्षसीः

3. B1 om. अधोगमनाः

15. S2 M2 असौ यस्ताम्रो ... ईमह इति । आदित्यरूपेणात्र रुद्रः स्तूयते । योऽसौ प्रत्यक्षो रुद्रो रविरूपः । च पुनर्ये रुद्राः एनमभितो दिक्षु प्राच्यादिषु श्रिताः किरणरूपेण सहस्रशोऽसंख्याकाः । एषां हेळ क्रोधमस्मदपराधजं वयम् अव ईमहे निवारयामः भक्त्या निराकुर्मः । हेळ इति क्रोधनाम । । अभि सर्वतसोः (पा २·३·२) इति द्वितीया । कीदृशोऽसौ । ताम्रः उदयेऽत्यन्तं रक्तः । अरुणो रक्तोऽस्तकाले । उत अपि च बभ्रुः पिङ्गलवर्णोऽन्यदा । सुमङ्गलः शोभनानि मङ्गलानि यस्य [स] मङ्गलरूपः । रव्युदये सर्वमङ्गलप्रवर्तनात् ॥६॥ for असौ यस्ताम्रौ ... निवारयामः (P 398, L 5)

16. P1 मण्डलस्थः for मण्डलस्थ°

उदयकालेऽत्यन्तरक्तः, ˇअरुणः उदयाद् ऊर्ध्वमीषद्रक्तः। ˇउत अपि च ˇबभ्रुः ततोऽप्यूर्ध्वं पिङ्गलः। एवमन्येऽपि वर्णास्तत्तत्कालगत्या उन्नेयाः। ˇसुमङ्गलः नानावर्णः सन् तदा तदान्धकारनिवर्तनादत्यन्तमङ्गलः। ˇये ˇरुद्राः स्वकृतसंतापेन प्राणिनो नोदयन्ति। रुद्राः रश्मयः ˇसहस्रशः सहस्रसंख्याकाः ˇदिक्षु प्राच्यादिषु ˇएनम् ˇअभितः सर्वतः ˇश्रिताः, ˇएषां रश्मिरूपाणां सर्वेषां रुद्राणां ˇहेळः क्रोधसदृशं तीक्ष्णत्वम् ˇअव ˇईमहे भक्तिनमस्कारादिना निवारयामः ॥६॥

अथ सप्तमः – ' असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृळयाति नः ' इति। ˇयः रुद्रः ˇनीलग्रीवः कालकूटधारणेन नीलवर्णा ग्रीवा यस्य ˇअसौ नीलग्रीवः। स एव ˇविलोहितः विशेषेण लोहितवर्णः सन् असौ मण्डलवर्ती भूत्वा ˇअवसर्पति उदयास्तमयावापादयितुं प्रवर्तते। तस्य च रुद्रस्य मण्डलवर्तिस्वरूपधारणप्रयोजनमुच्यते। ˇउत ˇगोपाः वेदशास्त्रसंस्काररहिता गोपाला अपि ˇएनं मण्डलवर्तिनमादित्यरूपं रुद्रम् ˇअदृश्रन् पश्यन्ति। ˇउदहार्यः उदकहारिण्यो योषितोऽप्येनम् ˇअदृश्रन् पश्यन्ति। एवं सर्वेषां दर्शनार्थमेव हि रुद्रस्यादित्यमूर्तिधारणम्। कैलासादिवर्तिरूपं तु वेदशास्त्राभिज्ञैरेव दृश्यते, नान्यैः। ˇसः तादृशः ˇदृष्टः सन् ˇनः अस्मान् ˇमृळयाति सुखिनः करोतु ॥७॥

आ– ' असौ यस्ताम्रः ' इति ' असौ योऽवसर्पति ' इति (च) द्वे। अनयोः पुरश्चरणम्। कृच्छ्रं चरित्वा षोडशदिनानि जपन् कृतपुरश्चरणो भवति। एताभ्यामनावृष्ट्यां सत्यां वृष्ट्यर्थं कार्यमार्द्रान्तम्। आर्द्रा[यां] दिवा कृतपुरश्चरणान् पञ्च ब्राह्मणानाहूय तैः

---

4. P1 after हेळः ins. हेळ इति क्रोधनाम।

6. S2 M2 असौ योऽवसर्पति … मृळयाति न इति। योऽसावादित्यरूपोऽवसर्पति उदयास्तमयौ कुर्वन्निरन्तरं गच्छति। गोपा उत गोपाला अपि वेदोक्तसंस्कारहीनाः अदृश्रन् पश्यन्ति। उदहार्यः उदकं हरन्ति ता उदहार्यः। " मन्थोदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च " (पा ६.३.६०) इत्युदकस्योदादेशः। जलहारिण्यो योषितोऽप्येनमदृश्रन् पश्यन्ति। आगोपालाङ्गनादि प्रसिद्ध इत्यर्थः। दृशेर्लुङि इरितो वा (पा ३.१.५७) इति च्लेरङ्। रुगागमश्छान्दसः। कीदृशः नीलग्रीवः विषधारणेन नीला ग्रीवा कण्ठो यस्य। अस्तमये नीलकण्ठ इव लक्ष्यः। विलोहितः विशेषेण रक्तः। स रुद्रो दृष्टः सन् नोऽस्मान् मृळयाति सुखयतु। असौ मण्डलवर्ती रुद्र एव तपतीति ज्ञातः सुखं करोत्वित्यर्थः ॥७॥ for असौ … करोतु (L 13)

7. P1 °धारेण for °धारणेन

10. P1 K after उदहार्यः ins. " मन्थौदनवज्रहारभारवीवधगवेषु " (पा ६.३.६०) इति सूत्रेणे उदकस्योदादेशः।

11. P1 K after अदृश्रन् ins. दृशेरुगागमश्छान्दसः। तिङ्परत्वादाद्युदात्तमिति भावः।

12. K om. नः अस्मान्

13. P1 with insertion above मृळयाति writes on the margin मृड सुखने

15. B1 जपित्वा for चरित्वा; H2–3 जपेत् for जपन्

16. B1 वृद्ध्यर्थं for वृष्ट्यर्थं; H2–3 °पुरश्चरणो भवति for °पुरश्चरणान्

कारयितव्यम् । तिलयवतण्डुलानां दधिमधुघृताक्तानां शतसहस्रं जुहुयात् । ततः कण्ठदघ्ने जले स्थित्वा ताभ्यामुभयकरपूर्णमञ्जलिमादित्यमभि जपन् प्रक्षिपेत् । प्रतिदिनमष्टसहस्रकृत्वो नव दिनानि । ततः सविता मनःकामान् संवत्सराद् ददाति । विनियोगानन्तरं कल्पतो ज्ञेयम् ॥

श्रीभगवन्तं रुद्रमादित्यरूपेण स्तुवन्नाह– ' असौ यः ' इति । [v]असौ आदित्यः [v]यः तु उदयास्तमयकालयोः क्वचित् [v]ताम्रः ताम्रवर्णः । [v]उत अपि क्वचित् [v]अरुणः अलक्तरागो भवति । उत अपि क्वचित् [v]बभ्रुः कपिलवर्णो भवति । उत [v]सुमङ्गलः । शोभनानि मङ्गलानि अलंकारपूजादीनि यस्य सः सुमङ्गलः कल्याणरूपः । एवंविधं तमेनं श्रीभगवन्तं रुद्ररूपमादित्यम् [v]अभितः परितः समन्ततः [v]ये [v]रुद्राः, स्वकृतसंतापेन प्राणिनो रोदयतीति रुद्रः, रश्मयः अधिश्रिताः [v]सहस्रशः अपरिमिताः [v]दिक्षु विदिक्षु च समाश्रिताः, तेषाम् । [v]एषां रुद्राणां [v]हेळः । हेळ इति क्रोधनामसु पठितः । क्रोधम् [v]अव [v]ईमहे अवनयामः । ' असौ यस्ताम्रः ' इति मन्त्रद्वयेन सार्धर्चेन अहरहरुदयास्तमनयोरादित्यमुपतिष्ठमानस्य अक्षय्यमन्नं भवति ॥

[v]यः [v]असौ आदित्यः अखण्डितशक्तिभूतः [v]अवसर्पति अवाचीनं सर्पति गच्छति अस्तमयकाले [v]नीलग्रीवः । विलोहितधनुर्मात्रे प्रतीयमानोऽस्तं यन् नीलग्रीव इव लक्ष्यत इति । ग्रीवायां नीलो वर्णः । नील [I] ग्रीवा यस्य सः नीलग्रीवः । [v]विलोहितः विलोहितश्च । विगतकल्मषस्वभावो वा । मण्डलाभिप्रायोऽयम् । ' उतैनम् ' इति । [v]उत अपि च [v]एनं श्रीरुद्ररूपमादित्यं [v]गोपाः गोपालाः गवां प्रवेशनकालोऽयमिति मन्यमानाः [v]अदृश्रन् । दृशेरुगागमश्छान्दसः । व्यत्ययश्च । पश्यन्तीत्यर्थः । [v]उदहार्यः च उदकहार्य उदकवाहिन्यो दास्यश्च [v]अदृश्रन् । एवमागोपालाङ्गनादि प्रसिद्धोऽयम् । एवं [v]दृष्टः अयं [v]नः अस्मान् [v]मृळयाति । मृळ सुखने । सुखयतु ॥६–७॥

---

2. H2–3 जलम् for °अञ्जलिम्° ; B1 °सहस्रं कृत्वा for °सहस्रकृत्वः
3. B1 नियतः for ततः
6. H2–3 °मन° for °मय°; H2–3 अव्यक्त° for अलक्त°
8. B1 रुद्रम् for रुद्ररूपम्
9. B1 om. समन्ततः ... आदित्यम् (L 12); H3 रुद्राः for रुद्रः
14. B1 om. विलोहित°; B1 भवत° for लक्ष्यत
15. B1 विरोहितः for second विलोहितः
16. H2–3 om. वा
18. B1 दृशेरनागमः, H3 दृशेन समागमः for दृशेरुगागमः
19. B1 after अदृश्रन् adds अपश्यन्

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीळ्हुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ।।८।।

नमः । अस्तु । नीलग्रीवायेति नीलऽग्रीवाय । सहस्राक्षायेति सहस्रऽअक्षाय । मीळ्हुषे । अथो इत्यथो । ये । अस्य । सत्वानः । अहम् । तेभ्यः । अकरम् । नमः ॥ ढीं ॥८॥

सा– अथाष्टमः – ' नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीळ्हुषे । अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ' इति । यः पूर्वोक्तरीत्या नीलग्रीवः स एवेन्द्रमूर्तिधारणेन सहस्राक्षः, पर्जन्यमूर्तिधारणेन मीळ्हान् सेचकः वृष्टिकर्तेत्यर्थः । तादृशाय रुद्राय नमः अस्तु । अथो अपि च ये केचिद् अस्य रुद्रस्य सत्वानः भृत्यरूपाः प्राणिनः तेभ्यः अहं नमः अकरं नमस्करोमि ॥८॥

आ– ' नमोऽस्तु नीलग्रीवाय ' इति मन्त्रस्य पुरश्चरणम् । पञ्च दिनानि निरन्तरं जपन् कृतपुरश्चरणो भवति । कृष्णाष्टमीमारभ्य अर्कप्रस्तरे अल्पप्रस्तरे वा सप्तरात्रं पायसबलिं हरेत् । धनवान् भवति । नमः अस्तु नीलग्रीवाय नीलकण्ठाय विषधारणात् कण्ठे नीलतां प्राप्ताय विषहारिणे सहस्राक्षाय सहस्रनेत्राय अनन्तदृष्टये मीळ्हुषे । मिह सेचने । वीर्यस्य सेक्त्रे यूने नमः अस्तु । ' अथो ये अस्य ' इति । अथो अथ विषापहारिश्रीनीलकण्ठस्य देवतानमस्कारानन्तरम् अस्य श्रीभगवतो रुद्रस्य ये सत्वानः सत्त्वभूताः स्वरूपभूताः ये श्रीरुद्राः तेभ्यः श्रीरुद्रेभ्यः नमः नमस्कारम् अकरं कृतवानस्मि करोमीत्यर्थः । विनियोगान्तरं कल्पतोऽवगन्तव्यम् ॥८॥

---

5. S2 M2 नमोऽस्तु … अकरं नम इति । नीलग्रीवाय नीलकण्ठाय नमोऽस्तु । भवतु । कीदृशाय ? सहस्राक्षाय । सहस्रमक्षीणि यस्य [तस्मै] इन्द्रस्वरूपिणे । मीळ्हुषे मिमेहेति मीळ्हान् तस्मै । मिह सेचने । " दाश्वान् साह्वान् मीढ्वांश्च " (पा ६.१.१२) इति क्वसन्तो निपातः । सेक्त्रे वृष्टिकर्त्रे पर्जन्यरूपायेत्यर्थः । तरुणाय वा । अथो अपि च अस्य रुद्रस्य ये सत्वानः प्राणिनो भृत्यास्तेभ्योऽहं नमो नमस्कारं करोमि । कृञ् कृतौ । शप् लङि [M2 लुङि] उत्तमैकवचनम् ॥८॥ for नमोऽस्तु … नमस्करोमि (L 8)

9. H2–3 जपेत् for जपन्

10. H3 पद्म॰ for अल्प॰

11. B1 प्राप्त॰ for प्राप्ताय

13. B1 ॰हारी for ॰हारि; B1 H2–3 नीलकण्ठोऽस्य for नीलकण्ठस्य

15. H2–3 वियोगान्तरं for विनियोगान्तरं

शतरुद्रियहोममन्त्राः]

प्र मुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ।।९।।

प्र । मुञ्च । धन्वनः । त्वम् । उभयोः । आर्त्न्योः । ज्याम् ।
याः । च । ते । हस्ते । इषवः । परा । ताः । भगव इति भगऽवः । वप ॥ खं ॥२॥

सा- अथ नवमः – ' प्र मुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप ' इति । हे ^v^भगवः भगवन् महैश्वर्यसंपन्न रुद्र, ^v^त्वं ^v^धन्वनः ^v^उभयोः ^v^आर्त्न्योः कोट्योरवस्थितां ^v^ज्यां मौर्वीं ^v^प्रमुञ्च अवरोपय । ^v^याः ^v^च ^v^ते ^v^हस्ते ^v^इषवः वर्तन्ते ^v^ताः अपि ^v^परावप परित्यज ॥९॥

आ– ' प्र मुञ्च धन्वनः ' इत्यादयः षट् । एषां पुरश्चरणं कृच्छ्रे (च्छ्रं ?) चरित्वा आत्मानं संशोध्य ' प्र मुञ्च ' इत्यादिमन्त्रत्रयं नवदिनानि निरन्तरं जपेत् । तथा ' या ते हेतिः ' इत्यादिमन्त्रत्रयं च नवदिनानि जपेत् । एवं कृतपुरश्चरणो ब्राह्मणो नृपतेर्युद्धकामिन आयुधमभिमन्त्र्य कुशकण्टकानां सहस्रं जुहुयात् । एवं कृते युद्धोपनीताः शत्रवः पलायन्ते, अभिमुखा न तिष्ठन्ति । विनियोगान्तरं कल्पतोऽवगन्तव्यम् ॥

5. S2 M2 प्रमुञ्च ... भगवो वपेति । हे भगवः । भगः (S2 M2 भगं) षड्विधमैश्वर्यमस्यास्तीति भगवान् । " मतुवसो रुः संबुद्धौ छन्दसि " (पा ८.३.१) इति रुत्वम् ।

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥

इत्युक्तेः । हे भगवन् रुद्र तव धन्वनः धनुषः उभयोरार्त्न्योः द्वयोः कोटयोः स्थितां ज्यां मौर्वीं त्वं प्रमुञ्च दूरीकुरु । यश्च ते तव हस्ते इषवः बाणास्ता इषूः परावप पराक्षिप ॥९॥ for प्रमुञ्च ... परित्यज (L 7)

6. P1 with markings above भगवः writes on the margin मतुवसोरुरिति रेफादेशः ।

7. P1 आरोपय for अवरोपय

8. B1 कृत्वा for चरित्वा

9. B1 °इत्यादिना for इत्यादि° and om. °मन्त्रत्रयं नवदिनानि; H2-3 om. निरन्तरं; B1 अथ for तथा

11. H2-3 कृतवतो for कृते; H2-3 पलायिता भवान्ति for पलायन्ते

12. H2-3 °योगानन्तरं for °योगान्तरं; H3 व्याख्यातः for अवगन्तव्यं

'प्र मुञ्च' इति। हे श्रीभगवन् महदैश्वर्यसंपन्न श्रीरुद्र, ते ᵛधन्वनः धनुषः ᵛउभयोः ᵛआर्त्न्योः धनुःकोट्योः स्थितां ᵛज्यां गुणं ᵛप्रमुञ्च प्रमोचय। ज्यामवतार्य च ᵛयाः ᵛच ᵛते ᵛहस्ते तत्र हस्ते ᵛइषवः स्थिताः ता इषवः ᵛपरावप। डुवप् बीजसन्ताने। परावप एकत्र निक्षिप ॥९॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ॒३ उत।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥१०॥

विज्यमिति विऽज्यम्। धनुः। कपर्दिनः।
विशल्य इति विऽशल्यः। बाणवानिति बाणऽवान्। उत।
अनेशन्। अस्य। याः। इषवः। आभुः। अस्य। निषङ्गधिरिति निषङ्गऽधिः॥ध्ल्ीं॥१०॥

सा- अथ दशमः – 'विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ३ उत। अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः' इति। कपर्दो जटाजूटः। सोऽस्यास्तीति कपर्दी रुद्रस्तस्य ᵛधनुः ᵛविज्यं विगतज्याकमस्तु। ᵛउत अपि च, बाणा अस्मिंस्तिष्ठन्तीति ᵛबाणवान् इषुधिः। स च ᵛविशल्यः अस्तु। इषुगतानां शल्यानां तदुदरगोपितत्वेन बहिराविर्भूतशररहितोऽस्तु। ᵛअस्य रुद्रस्य ᵛयाः ᵛइषवः बाणाः सन्ति ताः ᵛअनेशन् नष्टा भवन्तु। यद्वा- अनेशन् ईश्वराः समर्था मा भूवन्। अस्मान् बाधितुमिति भावः। किंच- ᵛअस्य ᵛनिषङ्गधिः। निषज्यत इति निषङ्गः खड्गः। स यत्र धीयते स कोशो निषङ्गधिः। स च ᵛआभुः। आङीषदर्थे। ईषत् प्रभुरस्त्विति शेषः। युद्धसमये यथा खड्गस्योद्गिरणेन अतिप्रभुर्भवति न तथेदानीमस्तु। किंतु धारणामात्रस्य प्रभुर्भवत्वित्यभिप्रायः॥१०॥

---

2. H2-3 अवतारय for प्रमोचय; B1 om. first च; B1 तयोश्च for याश्च

3. B1 om. ता; B1 बीजतन्तु° for बीज°; B1 निवप for निक्षिप

9. S2 M2 विज्यं धनुः .. निषङ्गधिरिति। कपर्दो जटाजूटोऽस्यास्तीति कपर्दी रुद्रस्तस्य धनुर्विज्यं मौर्वीरहितमस्तु। विगता ज्या यस्य तत्। उत अपि बाणवान्। बाणा अस्मिन् सन्तीति बाणवान्। विशल्यो विफलोऽस्तु। बाणाग्रतो लोहभागः शल्यम्। इषुधिर्निरग्रबाणोऽस्तु। अस्य रुद्रस्य या इषवस्ता अनेशन् नश्यन्तु। नशेरत एत्वम् अङि वेत्येत्वम्। पुषादित्वात् च्लेरङ्। अस्य रुद्रस्य निषङ्गधिः। निषज्यत इति निषङ्गधिः खड्गः। स धीयतेऽस्मिन्निति निषङ्गधिः कोशः। स आभुः। रिक्तः खड्गरहितोऽस्तु। रुद्रोऽस्मान् प्रति न्यस्तसर्वशस्त्रोऽस्त्वित्यर्थः॥१०॥ for विज्यं ... °त्यभिप्रायः (L 16)

12. P1 K after शल्यानां ins. बाणाग्रगो लोहभागः शल्यम्।

13. P1 K after first अनेशन् add णश अदर्शने; P1 K after भूवन् add अस्मान् बाधितुमिति भावः।

आ– ' विज्यं धनुः ' इति । हे श्रीभगवन् रुद्र । vकपर्दिनः । कपर्दो जटाबन्धः । सोऽस्यास्तीति कपर्दी । तस्य कपर्दिनस्तव vधनुः vविज्यम् अवतारितज्यागुणं जातम् । vविशल्यः शल्यरहितः । शल्यं फालं, तद्रहितः । vबाणवान् । बाणाः सन्ति अस्येति बाणवान् इषुधिः । vउत अपि च । vअनेशन् । णश अदर्शने । vअस्य श्रीभगवतो रुद्रस्य हस्तयोः vइषवः vआभुः । भा दीप्तौ । दीप्ता बभूवुः । ता इषवः अनेशन् प्रतिभटशून्यतया नष्टा इवासन् । निषङ्गः खड्ग उच्यते । खड्गो यस्मिन् धीयते चर्मकोशे स vनिषङ्गधिः असिबन्धकोशः । स्वपादमूलं प्रपन्नानां नराणां शत्रून् स्वदृष्टिपातमात्रेणैव निरस्य स्वयं निरस्तशत्रुः । शोभत इति भावः ॥१०॥

परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान् वृ॑णक्तु वि॒श्वतः॑ ।
अथो॒ य इ॑षु॒धिस्तवा॒रे अ॒स्मन्नि धे॑हि॒ तम् ॥११॥

परि॑ । ते॒ । धन्व॑नः । हे॒तिः । अ॒स्मान् । वृ॒ण॒क्तु॒ । वि॒श्वतः॑ ।
अथो॒ इत्यथो॑ । यः । इ॒षु॒धिरिती॑षु॒ऽधिः । तव॑ ।
आ॒रे । अ॒स्मत् । नि । धे॒हि॒ । तम् ॥ ज्यै॒ ॥११॥

सा– अथैकादशः – ' परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्नि धेहि तम् ' इति । हे रुद्र, vते त्वदीयस्य vधन्वनः vहेतिः बाणशल्यरूपा vअस्मान् vविश्वतः सर्वतः vपरि vवृणक्तु वर्जितान् करोतु । vअथो अपि vयः vतव vइषुधिः vतम् vअस्मत् vआरे अस्मत्तः दूरे vनि vधेहि स्थापय ॥११॥

---

4. B1 om. अनेशन्; B1 भूयो for हस्तयोः
5. B1 इष्टाः for नष्टाः
6. B1 षड्गः for खड्गः; B1 षड्गो for खड्गो; B1 आस्मिन्निधीयते चर्मकोशधिः for यस्मिन् ... °कोशे; B1 साखिबद्धु° for असिबन्ध°
14. S2 M2 परि ते ... नि धेहि तामिति । हे रुद्र ते तव धन्वनो हेतिर्धनुःसंबन्धि आयुधं विश्वतः सर्वतोऽस्मान् परि वृणक्तु त्यजतु मा हन्त्वित्यर्थः । वृजी वर्जने । रुधादित्वात् श्नम् । अथो अपि च यस्तव इषुधिस्तम् अस्मत्सकाशात् दूरे निधेहि अस्मत्तो दूरे स्थापय ॥११॥ for परि ते ... स्थापय (L 17)
15. P1 K after धन्वनः add वा संज्ञायामिति धनुषो धन्वन्नादेशः ।
16. P1 K after वृणक्तु add वृजी वर्जने । अस्माद्रुधादित्वात् श्नम् ।; P1 om. तम्

आ– 'परि ते धन्वनः' इति। हे श्रीभगवन् रुद्र, vते तव vधन्वनः धनुषः संबन्धिनी vहेतिः आयुधम् इषुकाण्डलक्षणं vविश्वतः सर्वतः सर्वप्रकारेण vअस्मान् श्रीभगवत्प्रपन्नान् vपरिवृणक्तु। वृणक्तिर्वर्जनकर्मा। स्वमुखान् परिवर्जयतु। vअथो अपि च vतव vइषुधिः बाणवान्। इषुधिस्तूणीरः। vतम् vअस्मत् अस्मत्तः vआरे दूरे vनि vधेहि स्थापय ॥११॥

या ते॑ हे॒तिर्मी॑ळ्हुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनुः॑।
त॒याऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ भुज ॥१२॥

या। ते॒। हे॒तिः। मी॒ळ्हु॒ष्ट॒म॒। मी॒ळ्हु॒स्त॒मेति॑ मीळ्हुःऽतम। हस्ते॑। ब॒भूव॑। ते॒। धनुः॑। तया॑। अ॒स्मान्। वि॒श्वत॑ः। त्वम्। अ॒य॒क्ष्मया॑। परि॑। भु॒ज॥ ध्युं ॥१२॥

सा– अथ द्वादशः – 'या ते हेतिर्मीळ्हुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परि भुज' इति। हे vमीळ्हुष्टम अतिशयेन कामाभिवर्षक, vया vते vहेतिः तव संबन्धि खड्गादिरूपं यदायुधम्, यदपि तव vहस्ते vधनुः vबभूव वर्तते, vअयक्ष्मया अनुपद्रवकारिण्या हेत्या तथाविधेन धनुषा च vत्वम् vअस्मान् vविश्वतः vपरि vभुज सर्वतः परिपालय॥१२॥

आ– 'या ते हेतिर्मीळ्हुष्टम' इति। हे vमीळ्हुष्टम। मिह सेचने। हे सेक्तृतम, सर्वासां गर्भाधानकर्तुः vते तव vहस्ते धनुलक्षणा vया vहेतिः vबभूव vतया हेत्या। कथंभूतया? [vअयक्ष्मया व्याधिरहितया vअस्मान् vविश्वतः vत्वं vपरि vभुज परिपालय।] ॥१२॥

अ॒व॒तत्य॒ धनु॒ष्ट्वꣳ सह॑स्राक्ष॒ शते॑षुधे।
नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो नः॑ सु॒मना॑ भव ॥१३॥

10. S2 M2 या ते हेतिर ... परि भुजेति। अतिशयेन मीढ्वान् मीळ्हुष्टमः। तसौ मत्वर्थे (पा १.४.१९) इति भसंज्ञायां वसोः संप्रसारणम्। षत्वष्टुत्वे। हे मीळ्हुष्टम सेक्तृतम कामवर्षुक ते तव हस्ते या धनुः हेतिः धनूरूपमायुधं बभूव अस्ति। एकं ते पदं पादपूरणाय। तया धनूरूपया हेत्वा विश्वतः सर्वतः नोऽस्मान् त्वं परिभुज परिपालय। भुजेर्विकरणव्यत्यये शप् प्रत्ययः। कीदृश्या तया। अयक्ष्मया। नास्ति यक्ष्मा रोगो यस्यास्तया। निरुपद्रवया दृढया। अनुपद्रवकारिण्या वा ॥१२॥ for या ते .. परिपालय (L 13)

13. P1 K after भुज add भुज पालनाभ्यवहारयोः

14. B1 om. या ते ... कथंभूतया ... [°पालय] (L 16)

शतरुद्रियहोममन्त्राः]

अवतत्येत्यवऽतत्यं । धनुः । त्वम् । सहस्राक्षेति सहस्रऽअक्ष । शतेषुध इति शतऽइषुधे ।
निशीर्येति निऽशीर्य । शल्यानाम् । मुखा ।
शिवः । नः । सुमना इति सुऽमनाः । भव ॥ भिं ॥१३॥

सा- अथ त्रयोदशः – ' अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमनाः भव ' इति । इन्द्ररूपेण सहस्रसंख्याकान्यक्षीणि यस्यासौ सहस्राक्षः । शतसंख्याका इषुधयो बाणस्थापनकोशा यस्यासौ शतेषुधिस्तत्संबोधनं हे [v]शतेषुधे रुद्र, [v]त्वं [v]धनुः पिनाकसंज्ञं शरासनम् [v]अवतत्य अवतार्य हस्तादुत्तार्य विज्यं वा कृत्वा [v]शल्यानां मुखानि [v]निशीर्य न्यग्भावेन शीर्णानि कृत्वा [v]नः अस्मान् प्रति [v]सुमनाः अनुग्रहयुक्तः [v]शिवः शान्तः [v]भव ॥१३॥

[v]आ– ' अवतत्य धनुः ' इति । हे श्रीभगवन् रुद्र, हे [v]सहस्राक्ष बहुनेत्र । शतसहस्रशब्दावपरिमितार्थौ । हे [v]शतेषुधे, [v]त्वं [v]धनुः [v]अवतत्य अवतार्य [v]निशीर्य [v]शल्यानां बाणानां फालानां वा [v]मुखा मुखानि निशीर्य शातयित्वा तीक्ष्णीकृत्य स्थितः । त्वं [v]नः अस्माकं [v]शिवः शान्तः [v]सुमनाः शोभनमनस्को भव ॥१३॥

नमस्त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥१४॥

नमः । ते । आयुधाय । अनातताय । धृष्णवे ।
उभाभ्याम् । उत । ते । नमः । बाहुभ्यामिति बाहुऽभ्याम् । तव । धन्वने ॥खिं॥१४॥

सा- अथ चतुर्दशः – ' नमस्त आयुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ' इति । हे रुद्र, [v]ते त्वदीयाय [v]आयुधाय बाणरूपाय [v]नमः नमस्करोत्विति शेषः । कीदृशायुधाय ?

4. S2 M2 अवतत्य ... सुमना भवेति । सहस्रमक्षीणि यस्य । शतमिषधयो यस्य । हे सहस्राक्ष हे शतेषुधे त्वं नोऽस्मान् प्रति शिवः शान्तः सुमनाः शोभनचित्तश्च भव । अनुगृहाणेत्यर्थः । किं कृत्वा धनुरवतत्य अपज्याकं कृत्वा शल्यानां मुखा मुखानि बाणफलाग्राणि निशीर्य शर्णानि कृत्वा । शृ हिंसायाम् । समासे नञ्पूर्वे क्त्वो ल्यप् । ऋत इद्धातो. (पा ७ १.१००) इति ॥१३॥ for अवतत्य...शान्तः भव (L 8); H2–3 om. अवतत्य ... भव । (L 8)

7. K न्यग्भागे तु for न्यग्भावने

17. M2 S2 हे रुद्र ते तव आयुधाय नमोऽस्तु बाणाय नतिरस्तु । कीदृशाय ? अनातताय धनुष्यनारोपिताय धृष्णवे धर्षणशीलाय । धृषेः क्नुप्रत्ययः । रीपून् हन्तुं प्रगल्भाय । उत अपि च ते तव उभाभ्यां बाहुभ्यां नमः । तव धन्वने धनुषेऽपि नमोऽस्तु । तस्यापि विशेषणम् अनातताय अवतारितमौर्वीकाय ॥१४॥ for नमस्त ... नमोऽस्तु (P 404, L 2)

18. K विशेषः for शेषः

^{v}अनातताय ^{v}धृष्णवे स्वरूपेण प्रहर्तुं प्रगल्भाय । किंच– ^{v}ते त्वदीयाभ्यां ^{v}बाहुभ्यां ^{v}नमः अस्तु । तथा ते त्वदीयाय ^{v}धन्वने नमोऽस्तु ॥१४॥

आ– ' नमस्ते आयुधाय ' इति । हे श्रीरुद्र, ^{v}ते तव ^{v}आयुधाय । सर्वायुधेभ्यो नमः । कथंभूता[या]युधायेति । ^{v}अनाततताय अवतारिताय । ^{v}धृष्णवे धर्षणशीलाय प्रगल्भाय ^{v}नमः । ' उभाभ्यामुत ते नमो बाहुभ्याम् ' । ^{v}उत अपि च ^{v}ते ^{v}उभाभ्यां [^{v}बाहुभ्यां] ^{v}नमः । ^{v}तव ^{v}धन्वने धनुषे च नमः । सर्वत्र शिवसंनिधावेव सर्वतोऽरत्निमात्रमग्निकुण्डं निधाय प्रतिमन्त्रोक्तद्रव्यं जुहुयादिति साधारणो विधिः । एवं श्रीभगवन्तं श्रीरुद्रं संस्तूय प्रार्थयते ॥१४॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥१५॥

मा । नः । महान्तम् । उत । मा । नः । अर्भकम् ।
मा । नः । उक्षन्तम् । उत । मा । नः । उक्षितम् ।
मा । नः । वधीः । पितरम् । मा । उत । मातरम् ।
मा । नः । प्रियाः । तन्वः । रुद्र । रीरिषः । रिरिष इति रिरिषः ॥ कोः ॥१५॥

सा– अथ पञ्चदशः – ' मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ' इति । हे रुद्र, ^{v}नः अस्मदीयं ^{v}महान्तं स्थविरं पुरुषं ^{v}मा ^{v}रीरिषः मा हिंसीः । ^{v}उत अपि च ^{v}नः अस्मदीयम् ^{v}अर्भकं बालं ^{v}मा रीरिषः । किंच– ^{v}नः ^{v}अस्मदीयम् ^{v}उक्षन्तं सेचनसमर्थं पुरुषं तरुणं, ' महान्तम् ' इत्यनेन सिद्धं, ^{v}मा रीरिषः । ^{v}उत

3. H2–3 om. नमस्ते ... कथंभूताय (L 4)
6. H2–3 सर्व° for सर्वत्र; B1 शिवसंधने for शिवसंनिधावेव
7. H2–3 om. श्रीरुद्रं
8. B1 संश्रय प्रार्थये for संस्तूय प्रार्थयते
15. S2 M2 मा नो महान्तम् ... रुद्र रीरिष इति । हे रुद्र नोऽस्माकं महान्तं वृद्धं गुरुपितृव्यादिकं मा वधीः । मा हिंसीः । उत अपि नोऽस्माकम् अर्भकं बालं मा वधीः । नोऽस्माकम् उक्षन्तं सिञ्चन्तं तरुणं मा वधीः । उत अपि नोऽस्माकमुक्षितं सिक्तं गर्भस्थं च मा वधीः । नः पितरं मा वधीः । उत अपि नो मातरं जननीं च मा वधीः । महान्तमित्यनेन सिद्धयोर्मातापित्रोः पुनरादानमादरार्थम् । नोऽस्माकं प्रिया वल्लभास्तन्वः तनूः शरीराणि पुत्रपौत्ररूपाणि त्वं मा रीरिषः मा हिंसीः । रिषतिर्हिंसाकर्मा ॥१५॥ for मा नो ... °हिंसाकर्मा (P 407, L 3)

अपि च नः अस्माकम् उक्षितं सिक्तं गर्भस्थं मा वधीः । नः पितरं मा वधीः । उत अपि च मातरं मा वधीः । तयोर्मातापित्रोः पृथग्ग्रहणमादरार्थम् । हे रुद्र, नः अस्मदीयाः प्रियाः तन्वः शरीराणि पुत्रपौत्रलक्षणानि मा रीरिषः मा हिंसीः । रिषतिर्हिंसाकर्मा ॥१५॥

आ– 'मा नो महान्तम्' इति । नः अस्माकं संबन्धिनं महान्तं वृद्धं पुत्रादिभिरभिवृद्धं त्वं मा बधीः। वध हिंसायाम् । मा हिंसीः। उत अपि च नः अस्माकम् अर्भकम् अल्पकं बालं मा वधीः । मा नः उक्षन्तम् अस्मत्संबधिनम् । उक्ष सेचने । रेतः सिञ्चन्तं तरुणं माः वधीः । उत अपि च मा नः उक्षितं सिक्तं गर्भस्थमित्यर्थः । मा वधीः । वध हिंसायाम् । मा हिंसीः । 'मा नो वधीः पितरम्'। नः अस्मत् पितरं मा वधीः । अस्मन्मातरं च मा वधीः । 'मा नः प्रियास्तन्वः' । तनूः शरीराणि । हे श्रीरुद्र, मा रीरिषः मा हिंसीः । रिषतिर्हिंसार्थः ॥१५॥

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे।।१६।। (१)॥

तोके । तनये । आयुषि । गोषु । अश्वेषु । रीरिषः । रिरिष इति रिरिषः ।
वीरान् । रुद्र । भामिनः । वधीः।
हविष्मन्तः । सदम् । इत् । त्वा । हवामहे ॥ ङ्यें ॥१६॥(१)॥

सा– अथ षोडशः – 'मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे' इति । हे रुद्र, नः अस्मदीये तोके अपत्यमात्रे मा रीरिषः हिंसां मा कुरु। तनये विशेषतः पुत्रे मा रीरिषः हिंसां मा कुरु। नः

---

5. H2–3 om. वध हिंसायाम्; B1 om. मा हिंसीः
6. H3 om. अल्पकं
8. H3 अस्माकं पितरं for अस्मत् पितरं
16. S2 M2 मा नस्तोके ... हवामह इति । हे रुद्र नोऽस्माकं तोके पुत्रे तनये पौत्रे मा रीरिषः। मा हिंसीः । नः आयुषि जीवने मा हिंसीः । नो गोषु धेनुषु मा रीरिषः । नो अश्वेषु तुरगेषु मा मा रीरिषः। विभक्तिव्यत्ययो वा । तोकं तनयमायुगा अश्वान् मा हिंसीः । भाम क्रोधे । भामिनः क्रोधयुक्तान् अपि नोऽस्माकं वीरान् भृत्यान् मा वधीः। क उपकार इति चेत्। हविष्मन्तो हविर्युक्ताः सदमित् सदैव त्वा त्वां वयं हवामहे । यागायाह्वयामः । त्वदेकशरणा वयमिति भावः ॥१६॥ for मा नस्तोके ... °माह्वयामः (P 408, L 3)
18. K om. first हिंसां मा कुरु

अस्मदीये ^{v}आयुषि ^{v}मा रीरिषः। ^{v}नः अस्मदीयेषु ^{v}गोषु ^{v}मा रीरिषः। ^{v}नः अस्मदीयेषु ^{v}अश्वेषु ^{v}मा रीरिषः। ^{v}भामिनः क्रोधयुक्तान् ^{v}नः अस्मदीयान् ^{v}वीरान् भृत्यान् ^{v}मा ^{v}वधीः। वयं ^{v}हविष्मन्तः हविर्युक्ताः ^{v}त्वा त्वामेव ^{v}सदमित् सर्वदैव ^{v}हवामहे यागार्थमाह्वयामः ॥१६

[इति सप्तदशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

आ– 'मा नस्तोके' इति। ^{v}नः अस्माकं ^{v}तोके पुत्रविषये ^{v}तनये पौत्रविषये ^{v}मा ^{v}रीरिषः। ^{v}नः अस्मत्संबन्धिनि ^{v}आयुषि विषय(भू)ते ^{v}मा रीरिषः। 'गोषु मा नः'। ^{v}गोषु विषयभूतासु ^{v}मा रीरिषः। ^{v}अश्वेषु च ^{v}मा रीरिषः। 'मा नः वीरान्'। हे ^{v}रुद्र, ^{v}भामिनः क्रोधसंयुक्तान्। भामेति क्रोधनाम। ^{v}वीरान् पुत्रान्। आदरार्थं पुनर्वचनम्। ^{v}मा ^{v}वधीः। 'हविष्मन्तः सदमित् त्वा हवामहे'। ^{v}सदं सदा सदाकालम्। ^{v}इत् एवार्थे। सदाकालं ^{v}त्वा श्रीरुद्रं त्वामेव ^{v}हवामहे आह्वयामहे। यागार्थं पूजार्थं च वयमनन्यशरणा इत्यभिप्रायः ॥१६॥

[इति सप्तदशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

[अथ द्वितीयोऽनुवाकः।]

नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमो॒
नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः पशू॒नां पत॑ये॒ नम॑: ।
नम॑: श॒ष्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नमो॒
नमो॒ हरि॑केशायोपवी॒तिने॑ पु॒ष्टानां॒ पत॑ये॒ नम॑: ॥१॥

हिर॑ण्यबाहव॒ इति॒ हिर॑ण्यऽबाहवे। से॒ना॒न्य॒ इति॒ से॒नाऽन्ये॑।
दि॒शाम्। च॒। पत॑ये। नम॑:।
नम॑:। वृ॒क्षेभ्य॑:। हरि॑केशेभ्य॒ इति॒ हरि॑ऽकेशेभ्यः। प॒शू॒नाम्।
श॒ष्पिञ्ज॑राय। त्विषी॑मते। त्विषि॑मत॒ इति॒ त्विषि॑ऽमते। प॒थी॒नाम्।
हरि॑केशा॒येति॒ हरि॑ऽकेशाय। उ॒प॒वी॒ति॒न॒ इत्यु॑प॒ऽवी॒तिने॑। पु॒ष्टाना॑म्। ॥ धें ॥१॥

---

2. K P1 after भामिनः add भाम क्रोधे
5. H2–3 om. °नः; H2–3 om. तनये पौत्रविषये
6. B1 om. नः अस्मत्° . . °भूतासु मा रीरिषः (L 7)
8. B1 क्रोधः for क्रोधनाम
9. H2–3 सदं ... हवामहे (L 10)

शतरुद्रियहोममन्त्राः]

सा- प्रथमेऽनुवाके भगवतो रुद्रस्य या प्रधानभूता तनुस्तां बहुधा प्रसाद्य ततस्तस्य ये लीलाविग्रहा जगन्निर्वाहहेतवस्ते षड्भिरनुवाकैः प्रसाद्यन्ते। तेषु चानुवाकेषु सर्वेऽपि मन्त्रा यजूरूपाः। ते च द्विविधाः, उभयतोनमस्कारा अन्यतरतोनमस्कारश्चेति। तत्र द्वितीयतृतीयानुवाकयोश्चतुर्थानुवाकप्रथमभाविनि मन्त्रपञ्चके च नमस्कारादिर्नमस्कारान्त एकैको मन्त्रः। इतरेषु चतुर्थानुवाकशेषपञ्चमषष्ठसप्तमेषु नमस्कारादिक एकैको मन्त्रः। तत्र द्वितीयेऽनुवाके प्रथममन्त्रपाठः। षट्स्वनुवाकेषु सर्वाणि यजूंषि। तेषां महागायत्री छन्दः। एकरुद्रो देवता। अघोर ऋषिः। 'नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः' इति। हिरण्यनिर्मितास्याभरणानि बाह्वोर्यस्यासौ हिरण्यबाहुः। स च संग्रामेषु सेनां नयतीति सेनानीः। तादृशमूर्तिधारी यो रुद्रस्तस्मै ॱनमः अस्तु। यश्च ॱदिशां पालको रुद्रस्तस्मै च ॱनमः अस्तु॥

अथ द्वितीयः – 'नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमः' इति। हरितवर्णा केशाः पर्णरूपाः येषां वृक्षाणां ते हरिकेशास्तादृशेभ्यो वृक्षाकाररुद्रमूर्तिभ्यः ॱनमः अस्तु। यो रुद्रः ॱपशूनां पालकस्तस्मै ॱनमः अस्तु॥

अथ तृतीयः – 'नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमः' इति। शष्पशब्दो बालतृणवाची। पीतरक्तः संकीर्णवर्णः पिञ्जरः। शष्पवत् पिञ्जरः शष्पिञ्जरः। वर्णलोपश्छान्दसः। स च त्विषिमान् दीप्तिमान्। दीर्घश्छान्दसः। तथाविधरुद्रमूर्तये ॱनमः अस्तु। ॱपथीनां शास्त्रोक्तदक्षिणोत्तरतृतीयमार्गाणां पतिः पालको यो रुद्रस्तस्मै ॱनमः अस्तु॥

अथ चतुर्थः – 'नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः' इति। नीलमूर्धजाय पलितरहिताय ॱउपवीतिने मङ्गलार्थं यज्ञोपवीतधारिणे रुद्राय ॱनमः अस्तु। ॱपुष्टानां परिपूर्णगुणानां पुरुषाणां ॱपतये स्वामिने ॱनमः अस्तु॥१॥

आ– 'नमो हिरण्यबाहवे' इत्यादिषु षट्स्वनुवाकेषु तिस्रोऽशीतयो रुद्राणाम्। अथ 'नमो हिरण्यबाहवे' इत्याद्यासु 'नमः श्वभ्यः श्वपतिभ्यश्च वो नमः' इत्यन्तासु

2. K °निवास° for °निर्वाह°

6. S2 M2 नमो हिरण्य° ... पुष्टानां पतये नम इति। हिरण्यम् आभरणरूपं बाह्वोर्यस्य स हिरण्यबाहुः। स च सेनां नयतीति सेनानीस्तस्मै रुद्राय नमः। दिशां पतये पालकाय रुद्राय नमः। हरयो हरितवर्णाः केशाः पर्णरूपा येषां ते हरिकेशास्तेभ्यो वृक्षेभ्यो वृक्षरूपरुद्रेभ्यो नमः। पशूनां जीवानां पतये पालकाय रुद्राय नमः। शष्पं बालतृणम्। तद्वत् पिञ्जराय पीतरक्तवर्णाय। टिलोपश्छान्दसः। त्विषिर्दीप्तिरस्यास्तीति त्विषिमान्। संहितायां त्विषिशब्दस्य दीर्घः। ईदृशाय रुद्राय नमः। पथीनां मार्गाणां पालकाय नमः। पथिशब्दो मार्गवाची। उत्तरदाक्षिणतृतीया मार्गाः श्रुतावुक्ताः। हरिकेशाय नीलवर्णकेशाय जराराहिताय उपवीतिने मङ्गलार्थयज्ञोपवीतधारिणे रुद्राय नमः। पुष्टानां गुणपूर्णानां नराणां पतये स्वामिने नमः॥१॥ for प्रथमेऽनुवाके ... नमः अस्तु (L 19)

7. P1 after नम इति ins. द्वयोर्द्वयोः रुद्रयोरत्र स्तुतिः। तिस्रोऽशीतयोऽध्याये रुद्रमूर्तयः। प्रतिकण्डिकमष्टावष्टाविति। ते चोभयतोनमस्कारा इत्यादीति भाष्यान्तरम्।

21. B1 om. अथ

साधिकासु एकादशसु कण्डिकासु उभयतोनमस्काराः । अत्रापि नवतिनामानि आद्यानुवाके । ‘ नमस्ते रुद्र मन्यवे ’ इत्यादीनि दशनामानि । एवं शतरुद्रनामानि । ‘ नमो भवाय ’ इत्यादिषु एकतोनमस्काराः । तत्र द्वयोश्च रुद्रयोः स्तुतिः । एकैकस्यां कण्डिकायामष्टावष्टौ रुद्राः । होमेऽपि तथा नमस्कारादिनमस्कारान्ता एव मन्त्राः कार्याः । “ अथ द्वन्द्विभ्यो जुहोति ” (शब्रा ९.१.१.१७) इति श्रुतेः । तत्राप्युभयतोनमस्काराः घोराः । एकतोनमस्कारास्तु शान्ताः ‘ नमो भवाय ’ इत्यादयः । ‘ नमो हिरण्यबाहवे सेनान्ये ’ इति द्वयोर्नाम्नोः ‘ दिशां च पतये ’ इति विशेषणम् । एवं ‘ पशूनां पतये ’ इत्यादीनि स्वसंनिहितनाम्नोर्विशेषणानीति ज्ञातव्यानि । “ अमुष्मै चामुष्मै च ” (शब्रा ९.१.१.१७) इति श्रुतेः ॥

अत्र ‘ नमो हिरण्यबाहवे ’ इतीयमतिधृतिः । प्रतिमन्त्रं महागायत्री वा रुद्रदेवत्या । अस्य पुरश्चरणम् । अर्धं कृच्छ्रं चरित्वा अष्टसहस्रं चरुभोजी जपेत् । यावज्जपति तावच्छंभोरायतने एकादशप्रदक्षिणानि प्रतिसंध्यं कुर्यात् । जपसमाप्तौ देवमाराध्य तत्संनिधौ ब्राह्मणानेकादश भोजयित्वा कृतपुरश्चरणो भवति । एवं कृतपुरश्चरणेन ब्राह्मणेन राजा स्वशत्रुनाशार्थं विनियोगं कारयेत् । एवं रक्तसर्षपाणां तैलाक्तानामयुतं जुहुयात् । तेन कर्मणा शत्रवो नश्यन्ति । सर्षपपिष्टमादाय देवमालिप्य शत्रुनामग्रहणपूर्वकं जपेदष्टसहस्रकम् । एवं चेद् राज्ञो यः शत्रुस्तस्य महाज्वरो जायते । स तेन विनश्यति । अथ वशीकर्तुकामः पलाशाश्वत्थापामार्गवैकङ्कतानां दधिक्षीरमधुघृताक्तानामयुतं जुहुयात् । क्रमशो वर्णचतुष्टयं वशमायाति । विनियोगान्तरं कल्पतोऽवगन्तव्यम् ॥

---

1. H2–3 एकादश for एकादशसु; H2–3 खण्डिकासु for कण्डिकासु
2. H3 इत्येवं for एवं
3. H2–3 खण्डिकायां for कण्डिकायां
4. B1 द्वन्द्विदेवत्यो for द्वन्द्विभ्यो
7. H2–3 स्वयंविहित° for स्वसंनिहित°
10. H2–3 अर्ध° for अर्धं
11. H2–3 आलयं for आयतने
12. B1 °श्चरणो for °श्चरणेन and om. ब्राह्मणेन
13. B1 तिल° for तैल°
14. H2–3 सर्षपविष्टम्, B1 सर्वे यविष्टया for सर्षपपिष्टम्; B1 आलिख्य for आलिप्य; H2–3 om अष्टसहस्रकम्
16. H2–3 °वैकङ्कतीनां for °वैकङ्कतानां; B1 om. °क्षीर°; H3 आनयति for आयाति
17. H2–3 °योगानन्तरं for °योगान्तरं

मुक्तालंकृतसर्वाङ्गमिन्दुगङ्गाधरं हरम् ।
ध्यायेत् कल्पतरोर्मूले समासीनं सहोमया ॥

‘ नमो हिरण्यबाहवे ’ इति । हिरण्यालंकारभूषितबाहवे रुद्राय vनमः । कथंभूताय ? vदिशां पूर्वदिशां च vपतये । पातीति पतिः । पालकाय श्रीरुद्राय vनमः । सेनां हस्त्यश्वरथपदातिलक्षणां देवादिसेनां नयतीति सेनानीः । तस्मै vसेनान्ये च । ‘ दिशां च पतये नमः ’ इत्येतद् द्वयोः द्वयोर्विशेषणम् । ‘ नमो वृक्षेभ्यः ’ । ओव्रश्चू छेदने । वृश्चन्ति छिन्दन्तीति वृक्षाः । वृक्ष वरणे इत्यस्य वा रूपम् । वृक्षा इति छेदकाः । सर्वोपसंहारकाः तेभ्यः vवृक्षेभ्यः वृक्षरूपेभ्यो रुद्रेभ्यः vनमः । vहरिकेशेभ्यः । हरितवर्णा येषां केशा इव लक्ष्यन्ते इति हरितकेशास्तेभ्यो हरिकेशेभ्यो रुद्रेभ्यः । vपशूनाम् । पशुवदज्ञाः जीवाः पशवः । तेषां पशूनां पतिः पालकस्तस्मै vनमः । ‘ नमः शष्पिञ्जराय ’ । नवप्ररूढानि तृणानि शष्पम् । तद्वर्णाय vशष्पिञ्जराय । वर्णलोपश्छान्दसः । vत्विषीमते । त्विषि दीप्तौ । दीप्तिमते अतितेजस्विने vनमः । vपथीनां पथाम् । छान्दसं पदम् । मार्गाणां vपतये vनमः । vहरिकेशाय अतिमनोहारिकेशाय हिरण्यकेशाय vनमः । vउपवीतिने ब्रह्मसूत्रधारिणे नमः । vपुष्टानां पोषणधर्मयुक्तानां vपतये पालकाय vनमः । अत्र दिशां च पतये पशूनां पतये पथीनां पतये इत्येवंरूपाणि अलुक्समासान्तपदान्वितानि पदानि संनिहितनाम्नो विशेषणानीति ज्ञातव्यानि ॥१॥

नमो बभ्लुशायाव्याधिनेऽन्नानां पतये नमो
नमो भवस्य हेत्यै जगतां पतये नमः ।
नमो रुद्रायाततायिने क्षेत्राणां पतये नमो
नमः सूतायाहन्त्यै वनानां पतये नमः ॥२॥

बभ्लुशाय । आव्याधिन् इत्याऽव्याधिने । अन्नानाम् ।
भवस्य । हेत्यै । जगताम् ।
रुद्राय । आततायिन् इत्याततऽअयिने । क्षेत्राणाम् ।
सूताय । अहन्त्यै । वनानाम् ॥ रिं ॥२॥

---

7. B1 रुद्ररूपेभ्यो for रुद्रेभ्यः
8. H2–3 om. नमः; H2–3 om. हरिकेशेभ्यः ... रुद्रेभ्यः । (L 9)
11. H2–3 om. पथाम्
15. H2–3 °पदानि for °पदान्वितानि

[शतरुद्रियहोममन्त्राः

सा– अथ पञ्चमः – ' नमो बभ्रुशायाव्याधिनेऽन्नानां पतये नमः ' इति । बिभर्ति रुद्रमिति बभ्रुर्वृषभस्तस्मिन् शेते तिष्ठतीति बभ्रुशः । स च आसमन्ताद् द्वेषिणो विध्यतीति आव्याधी । तथाविधाय vनमः अस्तु । यश्च vअन्नानां पालको रुद्रस्तस्मै vनमः अस्तु ॥

अथ षष्ठः – ' नमो भवस्य हेत्यै जगतां पतये नमः ' इति । भवः संसारः, तस्य हेतिरायुधम् । संसारक्षेत्रे vजगतां पालको यस्तस्मै vनमः अस्तु ॥

अथ सप्तमः – ' नमो रुद्रायाततायिने क्षेत्राणां पतये नमः ' इति । आततेन विस्तृतेन धनुषा सह अयति गच्छतीत्याततायी । तस्मै रुद्राय vनमः अस्तु । vक्षेत्राणां पालको यो रुद्रस्तस्मै vनमः अस्तु ॥

अथाष्टमः – ' नमः सूतायाहन्त्यै वनानां पतये नमः ' इति । सूतः सारथिः । अहन्तिरहननरूपः, तादृशाय रुद्राय vनमः अस्तु । यः vवनानां पालकस्तस्मै vनमः अस्तु ॥२॥

आ– ' नमो बभ्रुशाय ' इति । अष्टिच्छन्दः । अस्य पुरश्चरणम् । अर्धकृच्छ्रं चरित्वा अष्टसहस्रं चरुभोजी जपेत् । यावज्जपेत् तावत् शंभोरालय एकादश प्रदक्षिणाः प्रतिसंध्यं कुर्यात् । एवं कृतपुरश्चरणेन ब्राह्मणेन राज्यकामो राजा कुमुदसौगन्धिकोत्पलान्ययुतमेकैकं जुहुयात् । राज्यश्रीस्तमुपतिष्ठते । विनियोगान्तरं कल्पतोऽवगन्तव्यम् । बभ्रुः कपिलः । तत्र देवतात्वेन शेत इति बभ्रुशः । तस्मै vबभ्रुशाय कपिलवर्णाय वा vनमः । व्यध ताडने । आविध्यतीति आव्याधी । स्वभक्तानां शत्रूणामावेधनशीलः स्वभृत्यद्विट्संतापनशीलश्च । vभवस्य vहेत्यै । हीयते प्राणैर्यया सा हेतिरायुधम् । भवति संभवतीति भवः संसारः । तस्य हेत्यै स्वभृत्यसंसारनाशकाय । vजगतां जङ्गमानां vपतये vनमः । vनमः vरुद्राय दुरितनाशकाय नमः । श्रीरुद्रपञ्चाक्षरात्मने नमः । आततेन विस्तृतेन आकर्णपूरितेन धनुषा सह आयाति गच्छतीति आततायी । तस्मै vआततायिने उद्यतायुधाय । vक्षेत्राणां महाभूतानाम् । क्षेत्राणां प्रसिद्धक्षेत्राणां

1. S2 M2 नमो बभ्रुशाय ... वनानां पतये नम इति । बभ्रुशः कपिलवर्णः । यद्वा– बिभर्ति रुद्रमिति बभ्रुः वृषभस्तस्मिन् शेते स बभ्रुशः । विध्यति शत्रूनिति व्याधी । तस्मै रुद्राय नमः । अन्नानां पालकाय नमः । भवस्य संसारस्य हेत्यै आयुधाय संसारनिवर्तकाय रुद्राय नमः । जगतां पालकाय रुद्राय नमः । आततेन विस्तृतेन धनुषा सह एति गच्छतीति आततायी उद्यतायुधस्तस्मै रुद्राय नमः । क्षेत्राणां देहानां पालकाय नमः । न हन्तीत्यहन्तिः, तस्मै अहन्त्रे । सूताय सारथये तद्रूपाय रुद्राय नमः । सारथिर्न हन्ति । वनानां पालकाय नमः ॥२॥ for नमो बभ्रुशाय ... नमः अस्तु (L 9)

10. B1 अति° for अष्टि°; B1 अति° for अर्द्ध°

13. H2-3 °योगानन्तरं for °योगान्तरं

15. H3 शत्रूनास्वेधन°, H2 शत्रूनावेधन°, B1 शत्रूनावेशन° for शत्रूणामावेधन°; H2-3 स्वभक्त° for स्वभृत्य°

16. B1 या for यया; H2-3 om. संभवति

19. B1 H2-3 उद्गत° for उद्यत°

वा । [v]पतये [v]नमः । ' नमः सूताय ' । सूतो सारथिः । शरीरलक्षणरथस्य वा सारथिस्तस्मै [v]नमः । [v]अहन्त्यै प्रपन्नानां हननविरोधिने नमः ॥१८॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो
नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः ।
नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो
नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः ॥३॥

रोहिताय । स्थपतये । वृक्षाणाम् ।
भुवन्तये । वारिवस्कृताय । वारिवःकृतायेति वारिवःऽकृताय । ओषधीनाम् ।
मन्त्रिणे । वाणिजाय । कक्षाणाम् ।
उच्चैर्घोषायेत्युच्चैःऽघोषाय । आक्रन्दयत इत्याऽक्रन्दयते । पत्तीनाम् ॥ डिं ॥३॥

सा– अथ नवमः – ' नमो रोहिताय स्थपतये वृक्षाणां पतये नमः ' इति । विश्वकर्मरूपेण रोहितो लोहितवर्णः स्थपतिर्गृहादीनां कर्ता तस्मै रुद्राय [v]नमः अस्तु । यो [v]वृक्षाणां पालकस्तस्मै [v]नमः अस्तु ॥

अथ दशमः – ' नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः ' इति । भुवं तनोतीति भुवन्तिः । वरिवो धनं, तस्य कर्ता वरिवस्कृत् । स एव वारिवस्कृतस्तस्मै रुद्राय [v]नमः अस्तु । [v]ओषधीनां ग्राम्यारण्यानां पालकाय [v]नमः अस्तु ॥

---

11. S2 M2 नमो रोहिताय ... पत्तीनां पतये नम इति । रोहितो लोहितवर्णः । स्थपतिर्गृहादिकर्ता । विश्वकर्मरूपेण तस्मै नमः । वृक्षाणां पालकाय नमः । भुवं तनोतीति भुवन्तिर्भूमण्डलविस्तारकः । वरिवो धनं करोतीति वारिवस्कृत् । स एव वारिवस्कृतः । स्वार्थे अण् । स्थानभोग्यकाराय नमः । ओषधीनां ग्राम्यारण्यानां पालकाय नमः । आलोचनकुशलो मन्त्री । वणिगेव वाणिजः व्यापारकर्ता, तद्रूपाय नमः । वनगता गुल्मा वीरुधादयः कक्षाः । तेषां पालकाय नमः । उच्चैर्घोषो ध्वनिर्यस्य स उच्चैर्घोषः । आक्रन्दयति रोदयतीति आक्रन्दयत् । युद्धे महाशब्दाय रिपुरोदकाय नमः । पत्तीनां सेनाविशेषाणां पदातीनां वा पालकाय नमः ।

एको रथो गजश्चाश्वास्त्रयः पञ्च पदातयः ।
एष सेनाविशेषो यः पत्तिरित्यभिधीयते ॥ (द्र. महाभारत १.२.१५)

इति व्यासोक्तेः ॥३॥ for नमो रोहिताय...नमः अस्तु (P. 414, L 6); K om. °कर्म°

16. K ग्राम° for ग्राम्य°

अथैकादशः – ' नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमः ' इति । राजसभायां मन्त्री । आलोचनकुशलो मन्त्री । स च वणिक् । वणिजां स्वामित्वेन वाणिजस्तस्मै रुद्राय [v]नमः अस्तु । वनगता गुल्मादयः कक्षास्तेषां पालकाय [v]नमः अस्तु ॥

अथ द्वादशः – ' नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः ' इति । युद्धकाल उच्छ्रितो घोषो यस्यासावुच्चैर्घोषः । आक्रन्दयन् वैरिणां रोदयिता, तस्मै रुद्राय [v]नमः अस्तु । [v]पत्तीनां पादचराणाम् । पादचरा योधाः पत्तिशब्दवाच्याः । पालकाय [v]नमः अस्तु ॥३॥

आ– ' नमो रोहिताय ' इति । अतिधृतिश्छन्दः । अस्य पुरश्चरणम् । अर्धकृच्छ्रं चरित्वा अष्टसहस्रं चरुभोजी जपेत् । यावज्जपेत् तावच्छंभोरालय एकादश प्रदक्षिणान् प्रतिसंध्यं कुर्यात् । जपसमाप्तौ देवमाराध्य तत्संनिधौ ब्राह्मणानेकादश भोजयित्वा कृतपुरश्चरणो भवति । एवं कृतपुरश्चरणो मेधाकामः पलाशपुष्पं कपिलाज्येनाक्तमयुतं जुहुयात् । मेधावी भवति । विनियोगान्तरं कल्पतोऽवगन्तव्यम् ॥

' नमो रोहिताय ' इति वर्णतो निर्देशः । [v]रोहिताय लोहितवर्णाय [v]नमः । [v]स्थपतये । स्थपतिः गृहाणां कर्ता । [v]वृक्षाणां वनस्पतीनां [v]पतये नमः । [v]भुवन्तये । भुवं पृथिवीं तनोति विस्तारयतीति भुवन्तिः । तस्मै भुवन्तये । [v]वारिवस्कृताय । वरिवो धनं, तत् कृतं येन स वरिवस्कृत् । स्वार्थे तद्धितः । तस्मै वारिवस्कृताय । [v]ओषधीनाम् । ओषधयः फलपाकान्ताः व्रीहिकन्दमूलादयः । तासामोषधीनां [v]पतये [v]नमः । [v]नमः [v]मन्त्रिणे । स्ववाचकश्रीरुद्रपञ्चाक्षरादिमन्त्रवते [v]वाणिजाय वणिगेव वाणिजस्तस्मै । [v]कक्षाणाम् । नदीकक्षः पर्वतकक्षः पार्श्वः । तेषां कक्षाणां [v]पतये [v]नमः । [v]उच्चैः [v]घोषाय महाशब्दाय [v]नमः । [v]आक्रन्दयते । आक्रन्दनं कारयते वा । [v]पत्तीनाम् । हस्त्यश्वरथपदातिसंख्यविशिष्टा पत्तिः । " एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका " (अको २·८·८०) इत्यभिधानात् । एवंविधपत्तीनां [v]पतये [v]नमः ॥३॥

नमः कृत्स्नायताय धावते सत्वनां पतये नमो
नमः सहमानाय निव्याधिने आव्याधिनीनां पतये नमः ।
नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो
नमो निचेरवे परिचरायारण्यानां पतये नमः ॥४॥

6. K पादचारिणां, P1 पादचरणानां for पादचराणां
8. B1 H2–3 आलयम् for आलये
10. B1 °पुष्पकं for पुष्पं; B1 अक्तानि for अक्तम्
11. H2–3 °योगानन्तरं for °योगान्तरं
12. B1 om. वर्णतः
17. B1 पापश्च for पार्श्वः
19. B1 H2–3 त्र्यश्वः for त्र्यश्वा

शतरुद्रियहोममन्त्राः]

कृत्स्नायतायेति कृत्स्नऽआयताय । धावते । सत्वनाम् ।
सहमानाय । निव्याधिन इति निऽव्याधिने । आव्याधिनीनामित्याऽव्याधिनीनाम् ।
ककुभाय । निषङ्गिणे । स्तेनानाम् ।
निचेरव इति निऽचेरवे । परिचरायेति परिऽचराय । अरण्यानाम् ।। क्षि ॥४॥

सा- अथ त्रयोदशः – 'नमः कृत्स्नायताय धावते सत्त्वनां पतये नमः' इति । कृत्स्नं सैन्यमायतं विस्तृतं येनासौ कृत्स्नायतस्तस्मै ᵛकृत्स्नायताय । पलायमानानां परकीयसैन्यानां पृष्ठतो धावतीति धावन् । तस्मै रुद्राय ᵛनमः अस्तु । सत्त्वानः सात्त्विकाः शरणागतास्तेषां पालकाय ᵛनमः अस्तु ॥

अथ चतुर्दशः – 'नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमः' इति । सहमानो विरोधिनोऽभिभवन् । नितरां विरोधिनो विध्यतीति निव्याधी । तादृशाय रुद्राय ᵛनमः । आसमन्ताद् विध्यन्तीति आव्याधिन्यः शूरसेनाः । तासां पालकाय ᵛनमः ॥

अथ पञ्चदशः – 'ककुभाय निषङ्गिणे स्तेनानां पतये नमः' इति । ककुभ इति महन्नामसु पठितम् । ᵛककुभाय महते । निषङ्गः खड्गस्तद्वते तस्मै ᵛनमः अस्तु । स्तेनागुप्तचोरास्तेषां पालकाय ᵛनमः । रुद्रो हि लीलया तत्तद्वेषान् धत्ते । यद्वा– तस्य सर्वजगदात्मकत्वात् ये यत्र यथा वर्तन्ते तथा ते तद्रूपेण रुद्रा एव वर्तन्त इति रुद्रस्य तादात्म्यमनुसंधातुं मन्त्रैरेवमुच्यते । तादृशशरीरेषु रुद्रो द्विधा वर्तते । जीवरूपेण स्वरूपेण च । तत्र यज्जीवरूपं तत् स्तेनादिभिर्व्याप्यम् । स एव शास्त्रोक्तमत्या यदीश्व(र ?)रूपः । ततः स्तेनादिभिर्दैवरूपं लक्ष्यते । तदनुसंघातरूपलक्ष्यहेतुत्वेन परमपुरुषार्थ इति लक्ष्यार्थविवक्षया मन्त्रेषु मन्त्रेषु लौकिकाः शब्दाः प्रयुज्यन्त इति द्रष्टव्यम् । उपलक्षकवाच्यार्थद्वारेण लक्ष्यार्थो मुग्धैरपि सहसावबोद्धुं शक्यते । यथा शाखाग्रे चन्द्र इत्यत्र तस्म(?)लक्ष्यर्थस्यैव विवक्षायामपि सुखावबोधद्वारत्वेन मुख्यार्थवाचकाः शब्दाः प्रयोक्तव्याः ।

5. S2 M2 नमः कृत्स्नायताय ... अरण्यानां पतये नम इति । कृत्स्नं समग्रमायतं विस्तृतमर्थाद्धनुर्यस्य स कृत्स्नायतः आकर्णपूर्णधनुष्ट्वेन धावते युद्धे शीघ्रं गच्छते रुद्राय नमः । शीघ्रगतौ सरतेर्धावादेशः । तलोपश्छान्दसः । यद्वा–कृत्स्नः सर्व आयो लाभो यस्य स कृत्स्नाय [स्तस्य भावः कृत्स्नायता तया] धावते सर्वलाभप्रापकत्वेन धावते । यत्र गच्छति तत्र सर्वेषां लाभं प्राप्नोतीत्यर्थः । सत्त्वन्–शब्दः प्राणिवाची । सत्त्वनः सात्त्विकाः शरणागताः प्राणिनस्तेषां पालकाय नमः । सहतेऽरीनभिभवतीति सहमानः । नितरां विध्यति हन्ति शत्रूनिति निव्याधी । तस्मै नमः । आसमन्तात् विध्यन्तीत्याव्याधिन्यः शूरसेनास्तास पालकाय नमः । ककुभो महान् तस्मै रुद्राय नमः । ककुभ इति महन्नामसु पठितम् । निषङ्गः खड्गः सोऽस्यास्तीति निषङ्गी । स्तेना गुप्तचोरास्तेषां पालकाय नमः । अपहारबुद्धया निरन्तरं चरतीति निचेरुः । परित आपणवाटिकादौ हरणेच्छया परिचरतीति परिचरः । तस्मै नमः । अरण्यानां वनानां पतये नमः । रुद्रो लीलया चोरादिरूपं धत्ते । यद्वा– रुद्रस्य जगदात्मकत्वाच्चोरादयो रुद्रा एव ध्येयाः । यद्वा– स्तेनादिशरीरे जीवेश्वररूपण रुद्रो द्विधा तिष्ठति । तत्र जीवरूपं स्तेनादिशब्दवाच्यं । तदीश्व(र ?) रुद्ररूप लक्षयति ।यथा शाखाग्रे चन्द्रस्य लक्षकम् । किं बहुना लक्ष्यार्थविवक्षया मन्त्रेषु लौकिकाः शब्दाः प्रयुक्ताः ॥४॥ for नमः कृत्स्नायताय ... पालकाय नमः (P 416, L 4)

17. K °लक्ष्यक° for °लक्षक°

अथ षोडशः – 'नमो निचेरवे परिचरायारण्यानां पतये नमः' इति। स्वामिगृह एव कदापहरिष्यामीत्यनया बुद्ध्या सावधानो निरन्तरं चरणशीलो निचेरुः। परित आपणविप्रवाटिकादाव-पहारेच्छया चरणशीलः परिचरः। तदुभयरूपाय ॱनमः। मार्गे गन्तॄन् द्रव्यापहारेण बाधितुं निरन्तरमरण्ये वर्तमानाश्चोरा अरण्याः। तेषां पालकाय ॱनमः ॥४॥

आ– 'नमः कृत्स्नायताय' इति। अतिधृतिच्छन्दः। प्रतिमन्त्रं महागायत्री वा। अस्य पुरश्चरणम्। कृच्छ्रं चरित्वा पञ्चसहस्रजपात् कृतपुरश्चरणो भवति। एवं पुरश्चरणसिद्धै-र्ब्राह्मणैरेकादशभिरीश्वरावासे होमजपौ कार्यौ। तत्र पञ्चभिर्जपः पञ्चभिर्होमः कार्यः। एको ब्रह्मा होमद्रव्यं तिलोदनं शतसहस्रं प्रतिनमस्कारं जुहुयात्। शतसहस्रजपः। एवं कृते जनव्याधिर्नश्यति। वाहनानां रोगे सति तिलपिष्टमिश्रैरपूपैराहुतिमात्रैरेकादशसहस्रहोमः। वाहनसामान्यव्याधिर्नश्यति। अन्यव्याधौ वाहनानां वासे अपामार्गतण्डुलैराज्यमिश्रैरष्टसहस्रं जुहुयात्। तस्य व्याधिर्नश्यति। प्रधानस्य व्याधौ शुद्धतण्डुलैराज्यसिक्तैः शंभोरावासे शतसहस्रं जुहुयात्। तस्य रोगो विनश्यति। अमात्यानां रोगेऽपि दूर्वापामार्गैः प्रत्येकमष्टसहस्रं जुहुयात्। तेषां व्याधिर्नश्यति। राजव्याधौ उच्यते। तत्र पञ्चभिर्होमः कार्यः। शुद्धैर्ब्राह्मणै-रेकविंशतिभिः कार्यम्। तेषामेको ब्रह्मा। राजप्रमाणं सर्वतोऽग्निकुण्डं कृत्वा तत्राग्निमानीय द्वौ द्वौ भूत्वा जुहुयुः। तण्डुलतिलव्रीहिश्यामाकनीवारापामार्गदूर्वाकमलकिञ्जल्कशुद्धोदना-न्याज्यानि होमद्रव्याणि। तान्याज्यमिश्राणि भवन्ति। तस्मादग्निकुण्डाद्दक्षिणतः पश्चिमतो वा कलशं जलपूर्णं स्पृष्ट्वा ब्रह्मा जपेत्। आहुतिभिरपि सप्तनाडिकान्ताभिर्निरन्तरम्। एवममावास्या-

2. K सदा for कदा°
4. P1 K आरण्याः for अरण्याः, In P1 आरण्यः is corrected as अरण्याः
6. B1 सिद्धेः for सिद्धैः (शुद्धैः !)
7. B1 ईरावसे for ईश्वरावासे; B1 om. कार्यः
8. B1 कृतेन for कृते
9. H2-3 मिश्रापूपैः for मिश्रैरपूपैः; B1 after होमः adds विनियोगान्तरं कल्पतोऽवगन्तव्यम्, H2-3 विनियोगानन्तरं कल्पतोऽवगन्तव्यम्– This came here evidently due to scribal error and has been removed by us. B1 after this repeats नमः कृत्स्नायतायेति upto एकादशसहस्रहोमः [L 5 to 9]
13. H2-3 सिद्धैः for शुद्धैः; H2-3 after ब्राह्मणैः add एकादशभिरीश्वरावासे होमजपौ कार्यौ। तत्र पञ्चभिर्होमः कार्यः। एको ब्रह्मा
14. H3 सर्वेण for सर्वतः
15. H3 °ओदानाज्यानि for° ओदनान्याज्यानि (L 16)
17. H2-3 आहुतिः for आहुतिभिः; H2-3 °नासिकान्ताभिः for °नाडिकान्ताभिः

प्रभृति प्रत्यमावास्यं होमः । अथ राजरोग उदीर्णश्चेदुदयात् प्रभृत्याऽऽस्तमयाद्धोमः । नाडिकाहोमस्य दक्षिणा प्रतिदिनं प्रतिपुरुषनिष्कं विवा(?)होमस्य तद्द्विगुणम् । आचार्यस्य तद्द्विगुणम् । कलशजलेन राजप्रोक्षणं राजोपभोगद्रव्यं च कर्तव्यम् । एवं कृते राजरोगो विनश्यति । अथान्यदप्युच्यते । राजरोगविनाशार्थं नित्यवदनेनानुवाकेन शुद्धतण्डुलैराज्यतिल-मिश्रैरष्टसहस्रमाहुतीनां होतव्यम् । अनेन राजा नित्यमरोगो भवति । विनियोगान्तराणि कल्पतोऽवगन्तव्यानि ॥

अथ पदव्याख्यानम् । [v]कृत्स्नायताय । कृत्स्नभावेन साकल्यभावेन आयतो विस्तृतः । तस्मै कृत्स्नायताय [v]नमः। [v]धावते । धावु गतिशुद्ध्योः । धावनं कुर्वते नमः । ‘ सत्वनां पतये नमः ’ । सदिति ब्रह्म । तद्वन्तः सत्त्वानः ब्रह्मविदः । तेषां [v]सत्त्वनां [v]पतये [v]नमः । ‘ नमः सहमानाय ’ । षह मर्षणे । शत्रूणां बलं [v]सहमानाय मर्षणशीलाय । [v]निव्याधिने नितरां तापनशीलाय । अतस्तु [v]आव्याधिनीनां आव्यथनकारिणीनां सेनानां [v]पतये [v]नमः । आव्याधीन् सर्वतः व्यथाहेतुभूतान् रोगानानयन्ति नाशं प्रापयन्तीति वा आव्याधिन्यः । आव्याधिनीनां पतये नमः । ककुभ इति महन्नामसु पठितम् । महते [v]नमः । [v]निषङ्गिणे । निषङ्गः खड्गः । सोऽस्यास्तीति निषङ्गी । तस्मै [v]निषङ्गिणे [v]नमः । [v]स्तेनानां तस्कराणां [v]पतये [v]नमः । [v]निचेरवे । चर गतिभक्षणयोः । नितरां चरणशीलो निचेरुः । तस्मै निचेरवे । परितः सर्वतश्चरतीति परिचरः । तस्मै [v]परिचराय । अरण्यमाश्रयं पर्वतादिस्थानम् । तत्संबन्धिन आरण्याः, तेषां [v]पतये [v]नमः ॥४॥

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो
नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः ।
नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो
नमोऽसिमद्भ्यो नक्तं चरद्भ्यो विकृन्तानां पतये नमः ॥५॥(२)॥

1. B1 after होमः adds कर्तव्यः; B1 om. अथ ... कर्तव्यम् । (L 3)
5. H2–3 °योगानन्तराणि for °योगान्तराणि
9. H2–3 om. नमः
11. B1 ताडन° for तापन°; B1 H2–3 अव्यथन° for आव्यथन°
12. H2–3 om. नाशं

वञ्चते । परिवञ्चत इति परिऽवञ्चते । स्तायूनाम् ।
निषङ्गिणे । इषुधिमत इतीषुधिऽमते । तस्कराणाम् ।
सृकायिभ्य इति सृकायिऽभ्यः । जिघांसद्भ्य इति जिघांसत्ऽभ्यः । मुष्णताम् ।
असिमद्भ्य इत्यसिमत्ऽभ्यः । नक्तम् । चरद्भ्य इति चरत्ऽभ्यः ।
विकृन्तानामिति विऽकृन्तानाम् ॥ झीं ॥५॥(२)॥

सा- अथ सप्तदशः – ' नमो वञ्चते परिवञ्चते स्तायूनां पतये नमः ' इति । स्वामिन आप्ता भूत्वा तदीयक्रयावक्रयादिव्यवहारेषु यत्र क्वापि यत्किंचिद्द्रव्यापह्नवो वञ्चनम् । सर्वेष्वपि व्यवहारेषु अपह्नवः परिवञ्चनम् । तदुभयरूपाय ॅनमः । गुप्तचोरा द्विविधाः । दूरादागत्य रात्रावज्ञाताः सन्तः कपाटाद्युद्‌घाटनेन ये द्रव्यापहर्तारस्ते स्तेनाः । स्वकीया एव भूत्वा रात्रावहनि वा अन्यैरज्ञाताः सन्तोऽपहर्तारो ये ते स्तायवः । तेषां पालकाय ॅनमः ।

अथाष्टादशः – ' नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः ' इति । धनुषि संधातुं हस्ते धृतो बाणो निषङ्गः । खड्गो वा । पृष्ठे बद्धो बाणाधार इषुधिस्तदुभययुक्ताय ॅनमः । तस्कराः प्रकटचोरास्तेषां पालकाय ॅनमः ।

अथैकोनविंशः – ' नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमः ' इति । सृकशब्दो वज्रवाची । तेन सह अयन्ति गच्छन्ति सृकायिनः । प्राणिनो निगृहीतुमिच्छन्तश्चोरा जिघांसवः । तदुभयरूपाय ॅनमः । कर्षकाः सन्तः स्वामिधान्यापहर्तारो मुष्णन्तः । तेषां पालकाय ॅनमः ॥

अथ विंशः – ' नमोऽसिमद्भ्यो नक्तंचरद्भ्यो विकृन्तानां पतये नमः ' इति । असिमन्तः खड्गधारिणो ये रात्रौ चरन्तो वीथिनिर्गतान् प्राणिनो बाधमानाश्चोराः ॅनक्तं चरन्तस्तदुभयरूपाय ॅनमः । हत्वैवापहरन्तो विकृन्तास्तेषां पालकाय ॅनमः ॥५॥

[इति सप्तदशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

---

6. S2 M2 नमो वञ्चते ... विकृन्तानां पतये नम इति । वञ्चति प्रतारयति वञ्चनम् । परि सर्वतो वञ्चति परिवञ्चनम् । तस्मै नमः । स्वामिनश्चाप्तो भूत्वा व्यवहारे कुत्रचित्तदीयं धनमपह्नुते तद्वञ्चनम् । सर्वव्यवहारे धनापह्नवः परिवञ्चनम् । गुप्तचोरा द्विधा । रात्रौ गृहे खातादिना द्रव्यहर्तारः । स्वीया एवाहर्निशमज्ञाता हर्तारश्च । पूर्वे स्तेना उत्तरे स्तायवः । तेषां पतये नमः । निषङ्गः खड्गो बाणो वा । सोऽस्यास्तीति निषङ्गी । इषुधिर्बाणाधारोऽस्यास्तीतीषुधिमान् । तदुभयरूपाय नमः । तस्कराः प्रकटचोराः । तेषां पतये नमः । सृक इति वज्रनाम । सृकेण वज्रेण सह यान्ति गच्छन्तीत्येवंशीलाः सृकायिनः । अत एव शत्रून् हन्तुमिच्छन्ति जिघांसन्तीति जिघांसन्तः । हन्तेः सन्नन्ताच्छतृप्रत्ययः । तेभ्यो रुद्रेभ्यो नमः । क्षेत्रादिषु धान्यापहर्तारो मुष्णन्तस्तेषां पालकाय नमः । असयः खड्गाः सन्ति येषां ते असिमन्तः । नक्तं रात्रौ चरन्ति ते नक्तंचरन्तः । खड्गं धृत्वा रात्रौ वीथीनिर्गतप्राणिघातकास्तेभ्यो रुद्रेभ्यो नमः । विकृन्तन्ति छिन्दन्ति ते विकृन्ताः । छित्वापहरन्तस्तेषां पतये नमः ॥५॥ for नमो वञ्चते ... पालकाय नमः (L 10)

8. K om. सन्तः ... अन्यैरज्ञाताः (L 9)

शतरुद्रियहोममन्त्राः]

आ– ' नमो वञ्चते ' इति । अतिधृतिः । अस्य पुरश्चरणम् । कृच्छ्रं चरित्वा पञ्चसहस्रं जपान् कृत्वा कृतपुरश्चरणो भवति । विनियोगाः कल्पतोऽवगन्तव्याः । वञ्चु पञ्चु चञ्चु तञ्चु मुञ्चु म्लुञ्चु गत्यर्थाः । ^{v}वञ्चते गन्त्रे । ^{v}परिवञ्चते सर्वतो गन्त्रे । स्तायति ध्वनयतीति स्तायुः । ' स्तायूनां पतये ' । स्तायुः स्तेनश्चोरस्तेषां ^{v}स्तायूनां ^{v}पतये ^{v}नमः । ^{v}निषङ्गिणे खड्गिने ^{v}नमः । ^{v}इषुधिमते । इषुधिस्तूणिः, स अस्यास्तीति इषुधिमान्, तस्मै इषुधिमते ^{v}नमः । ^{v}तस्कराणां चोराणां ^{v}पतये ^{v}नमः । सृक इति वज्रनामसु पठितम् । सृकेन गृहीतेन वज्रेण सह यातुं गन्तुं शीलमेषामिति सृकायिनः, तेभ्यः ^{v}नमः । ^{v}जिघांसद्भ्यः हन्तुमिच्छद्भ्यः ^{v}नमः । मुष स्तेये । ^{v}मुष्णतां मोषणं कुर्वतां ^{v}पतये ^{v}नमः । ^{v}असिमद्भ्यः खड्गयुक्तेभ्यः ^{v}नमः । नक्तं रात्रौ चरन्तीति नक्तंचरन्तः रात्रौ गन्तारः, तेभ्यः ^{v}नक्तंचरद्भ्यः । ^{v}विकृन्तानाम् । कृति छेदने । विकर्तनशीलाः विकृन्ताः लावकास्तेषां विकृन्तानां ^{v}पतये ^{v}नमः ॥५॥

[इति सप्तदशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

[अथ तृतीयोऽनुवाकः ।]

द्वितीयेऽनुवाके उभयतोनमःशब्दयुक्ताः केचिद्यजूरूपा मन्त्राः उक्ताः । अथान्ये तथाविधा एव तृतीयेऽनुवाके केचिदुच्यन्ते ॥

नम॑ उष्णीषिणे॑ गिरिचराय॑ कुलुञ्चानां॒ पत॑ये॒ नमो॒
नम॑ इषुमद्भ्यो॑ धन्वायिभ्य॑श्च वो॒ नम॑ः ।
नम॑ आतन्वाने॑भ्य॑ः प्रतिदधा॑नेभ्यश्च वो॒ नमो॒
नम॑ आयच्छद्भ्योऽस्य॑द्भ्यश्च वो॒ नम॑ः ॥१॥

उष्णीषिणे॑ । गिरिचरायेति॑ गिरिऽचराय॑ । कुलुञ्चानाम् ।
इषुमद्भ्य इती॑षुमत्ऽभ्य॑ः । धन्वायिभ्य इति॑ धन्वायिऽभ्य॑ः । च । वः ।
आतन्वानेभ्य इत्या॑ऽतन्वाने॑भ्यः । प्रतिदधा॑नेभ्य इति॑ प्रतिऽदधा॑नेभ्यः ।
आयच्छ॑द्भ्य इत्याय॑च्छत्ऽभ्यः । अस्य॑द्भ्य इत्यस्य॑त्ऽभ्यः ॥ छ्रौं ॥१॥

1. H2–3 °सहस्रजपात् for °सहस्रं जपान् कृत्वा (L 2)
3. B1 धूनयति for ध्वनयति
5. B1 om. नमः
6. B1 om. सृक इति ... कुर्वतां पतये नमः (L 8); H2–3 यितुं for यातुं
8. B1 रात्रिः, H3 रात्रिं for रात्रौ

सा– तत्र प्रथमः – ‘ नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमः ’ इति । शिरोवेष्टनवानुष्णीषी । ग्रामजनवदुष्णीषेण शिरो वेष्टयित्वा तन्मध्ये प्रविश्य वर्तमानश्चौर उष्णीषी । गिरौ काष्ठादिसंपादकानां वस्त्रादिकमपहर्तुं चरतीति गिरिचरः । तदुभयरूपाय [v]नमः । कुं भूमिं गृहक्षेत्रादिरूपां लुञ्चन्त्यपहरन्तीति कुलुञ्चाः । तेषां पालकाय [v]नमः ॥

अथ द्वितीयः – ‘ नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमः ’ इति । भीषयितुं हस्ते बाणधारिण इषुमन्तः । तथा गृहीतेन धन्वना धनुषा सह आयन्ति गच्छन्तीति धन्वायिनः धनुर्धारिण इत्यर्थः । तदुभयरूपा हे रुद्राः, [v]वः युष्मभ्यं [v]नमः इति । विशेषणद्वयेन वाक्यं भेत्तुं द्विर्नमस्कारः ॥

अथ तृतीयः – ‘ नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमः ’ इति । धनुषि ज्यामारोपयन्त आतन्वानास्तद्रूपेभ्यो युष्मभ्यं रुद्रेभ्यः [v]नमः । धनुषि बाणं संदधानाः प्रतिदधानास्तद्रूपेभ्यो युष्मभ्यं [v]नमः ॥

अथ चतुर्थः – ‘ नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः ’ इति । ज्याकर्षणं कुर्वन्त आयच्छन्तः । शत्रून् प्रति बाणान् विक्षिपन्तोऽस्यन्तः । शेषं पूर्ववद् व्याख्येयम् ॥१॥

आ– ‘ नम उष्णीषिणे ’ इति । अष्टिश्छन्दः । अस्य पुरश्चरणम् । कृच्छ्रं चरित्वा पञ्चसहस्रजपात् कृतपुरश्चरणो भवति । विनियोगः कल्पतोऽवगन्तव्यः । परराष्ट्रजनैरुपयोग्यजलादिकं वस्तु स्पृष्ट्वा वीक्ष्य वा मत्वा वा शतसहस्रजपं कुर्यात् । यस्तद्वस्तूपयुङ्क्ते स संवत्सरान्नश्यतीत्यादिविनियोगाः कल्पतोऽवगन्तव्याः ॥

‘ नम उष्णीषिणे ’ इति । उष्णीषः शिरोवेष्टनम् । उष्णीषोऽस्यास्तीति उष्णीषी, तस्मै [v]उष्णीषिणे । गिरौ पर्वते चरतीति गिरिचरः, तस्मै [v]गिरिचराय । [v]कुलुञ्चानाम् । लुञ्च अपनयने । कुत्सितं लुञ्चन्ति परधनानि अपनयन्तीति कुलुञ्चाः । कुः पृथिवी । पृथिव्युत्थितं

---

1. S2 M2. नम उष्णीषिणे ... अस्यद्भ्यश्च नमो नम इति । उष्णीषं शिरोवेष्टनम् अस्यास्तीत्युष्णीषी । उष्णीषेण (M2 उष्णीषिणः) शिरः प्रावृत्य ग्रामेऽपहर्तुं प्रवृत्ताः । गिरौ चरतीति गिरिचरः । अध्वन्यानां वस्त्राद्यपहर्तुं पर्वतादिविषमस्थानचारी । तदुभयरूपाय रुद्राय नमः । कुं भूमिं क्षेत्रगृहरूपां लुञ्चन्ति हरन्ति कुलुञ्चाः । कुत्सितं लुञ्चन्ति वा । तेषां पालकाय नमः । इषवो विद्यन्ते येषां ते इषुमन्तः । जनान् भीषयितुं बाणधारिणः । तेभ्यो नमः । धन्वना धनुषा सह यन्ति गच्छन्ति धन्वायिनः । हे रुद्रा धनुर्धारिभ्यो युष्मभ्यं नमः । चकारो मन्त्रभेदज्ञापनार्थः । एवमग्रेऽपि । आतन्वन्ति आरोपयन्ति ज्यां धनुषीत्यातन्वानाः । तद्रूपेभ्यो नमः । प्रतिदधते संदधते बाणं धनुषीति संदधानाः । तेभ्यो वो युष्मभ्यं नमः । आयच्छन्त्याकर्षयन्ति धनूंषि ते आयच्छन्तः । तेभ्यो नमः । अस्यन्ति क्षिपन्ति बाणानिति अस्यन्तस्तेभ्यो नमः । असु क्षेपणे । दिव्यादिः ॥१॥ for नम उष्णीषिणे ... व्याख्येयम् (L 12)

9. P1 om. युष्मभ्यं; K om. प्रतिदधानाः

14. B1 °जपान् [कृत्वा] for जपात् कृत°; H2 °जन्यैः for °जनैः

15. B1 om. वीक्ष्य वा मत्वा; H2–3 om. शत°

18. H2–3 om. कुलुञ्चानाम्

लुञ्चन्तीति वा । चोरविशेषाः । तेषां [v]पतये [v]नमः । इषवो विद्यन्ते येषामिति इषुमन्तः । तेभ्यः [v]इषुमद्भ्यः [v]नमः । धन्वना धनुषा उपलक्षितमयनं गमनमेषामस्तीति धन्वायिनः । तेभ्यः [v]धन्वायिभ्यः [v]नमः । तनु विस्तारे । प्रक्षिप्तज्याकानि धनूंषि कुर्वाणेभ्यः [v]आतन्वानेभ्यः [v]नमः । धनुषि ज्यामाततां कुर्वाणेभ्यो नमः । [v]प्रतिदधानेभ्यः । धनुषो ज्यायां शरप्रतिसंधानं कुर्वाणेभ्यः [v]वः युष्मभ्यं [v]नमः । [v]आयच्छद्भ्यः। धनुषो ज्यामाददानेभ्यः धनूंष्याकर्षद्भ्यः [v]नमः । असु विक्षेपे । [v]अस्यद्भ्यः शत्रून् प्रति शरान् विनिक्षिपद्भ्यः [v]नमः। [v]वः युष्मभ्यं नमः ॥१॥

नमो॑ विसृ॒जद्भ्यो॑ विध्य॑द्भ्यश्च वो॒ नमो॒
नम॑: स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नम॑: ।
नम॒: शया॑नेभ्य॒ आसी॑नेभ्यश्च वो॒ नमो॒
नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नम॑: ॥२॥
नम॑: स॒भाभ्य॑: स॒भाप॑तिभ्यश्च वो॒ नमो॒
नमोऽश्वे॑भ्योऽश्व॑पतिभ्यश्च वो॒ नम॑: ।
नम॑ आव्या॒धिनी॑भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नमो॒
नम॒ उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नम॑: ॥३॥

वि॒सृ॒जद्भ्य॒ इति॑ वि॒सृ॒जत्ऽभ्य॑: । विध्य॑द्भ्य॒ इति॒ विध्य॑त्ऽभ्यः ।
स्व॒पद्भ्य॒ इति॑ स्व॒पत्ऽभ्य॑: । जाग्र॑द्भ्य॒ इति॒ जाग्र॑त्ऽभ्यः ।
शया॑नेभ्यः । आसी॑नेभ्यः ।
तिष्ठ॑द्भ्य॒ इति॒ तिष्ठ॑त्ऽभ्यः । धाव॑द्भ्य॒ इति॒ धाव॑त्ऽभ्यः ॥ ग्रौं ॥२॥
स॒भाभ्य॑: । स॒भाप॑तिभ्य॒ इति॑ स॒भाप॑तिऽभ्यः ।
अश्वे॑भ्यः । अश्व॑पतिभ्य॒ इत्यश्व॑पतिऽभ्यः ।
आ॒व्या॒धिनी॑भ्य॒ इत्या॑ऽव्याधिनी॑भ्यः । वि॒विध्य॑न्तीभ्य॒ इति॑ वि॒ऽविध्य॑न्तीभ्यः ।
उग॑णाभ्यः । तृ॒ꣳह॒तीभ्य॑: ॥ द्रो ॥३॥

1. H3 after इति adds ते
2. H3 om. नमः
3. B1 कुव्राणेभ्यः for कुर्वाणेभ्यः

सा– अथ पञ्चमः – ' नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमः ' इति । बाणं मुञ्चन्तो विसृजन्तः । मुक्तस्य बाणस्य लक्ष्ये प्रवेशो वेधस्तस्य कर्तारो विध्यन्तः ॥

अथ षष्ठः – ' नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः ' इति । ᵛस्वपद्भ्यः स्वापं कुर्वद्भ्यः ᵛनमः । तथा जागरणं कुर्वद्भ्यः ᵛनमः ॥

सप्तममारभ्य दशमपर्यन्ता मन्त्रा विस्पष्टार्थाः । तेषां पाठस्तु– ' नमः शयानेभ्य आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः । नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमः ' इति ।

अथैकादशः – ' नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमः ' इति । समन्ताद्वेद्धुं शक्ताः स्त्रीमूर्तय आव्याधिन्यः । विशेषेण वेद्धुं शक्ता विविध्यन्त्यः ॥

अथ द्वादशः – ' नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः ' इति । उत्कृष्टा गणरूपा सप्तमातृकाद्याः स्त्रियः । हिंसितुं समर्था दुर्गाद्या उग्रदेवतास्तृꣳहत्यः ॥२-३॥

आ– ' नमो विसृजद्भ्यः ' इति । अतिजगती छन्दः । अस्य पुरश्चरणम् । कृच्छ्रं चरित्वा पञ्चसहस्रजपात् कृतपुरश्चरणो भवति । विनियोगः कल्पतोऽवगन्तव्यः । ᵛविसृजद्भ्यः । शरान् विसृजद्भ्यो विक्षिपद्भ्यः ᵛनमः । विध्यन्ति ये शरैस्ताडयन्तीति विध्यन्तः । तेभ्यः ᵛविध्यद्भ्यः ᵛनमः । ᵛस्वपद्भ्यः । ञिष्वप् शये । स्वपद्भ्यः स्वापं कुर्वद्भ्यः ᵛनमः । जागृ

---

1. S2 M2 नमो विसृजद्भ्यो ... धावद्भ्यश्च वो नम इति । विसृजन्ति मुञ्चन्ति बाणानरिष्विति विसृजन्तः । तेभ्यो नमः । विध्यन्ति ताडयन्ति शत्रूनिति विध्यन्तः । तेभ्यो नमः । मुक्तस्य बाणस्य लक्ष्ये प्रवेशो वेधः । स्वपन्ति ते स्वपन्तः स्वप्नावस्थामनुभवन्तस्तेभ्यो नमः । जाग्रति ते जाग्रतः जाग्रदवस्थावन्तस्तेभ्यो नमः । शेरते ते शयानाः । सुषुप्त्यवस्थावन्तस्तेभ्यो नमः (M2 om. सुषुप्ति° ... नमः) । आसते त आसीना उपविशन्तस्तेभ्यो नमः । तिष्ठन्ति ते तिष्ठन्तो गतिनिवृत्तास्तेभ्यो नमः । धावन्ति ते धावन्तः वेगवद्गतयस्तेभ्यो नमः ॥२॥ for नमो विसृजद्भ्यो... धावद्भ्यश्च वो नमः । (L 6)

6. नमः सभाभ्यः... तृꣳहतीभ्यश्च वो नम इति । अथ जातसंज्ञा रुद्रा रुद्रलोके वसन्ति । ते कथ्यन्ते रुद्राद्वैतप्रतिपादनाय । " अथो एवं हैतानि रुद्राणां जातानि " (शब्रा ९·१·१·१९) इति श्रुतेः । सभारूपेभ्यो रुद्रेभ्यो नमः । सभादिषु रुद्रदृष्टिः कर्तव्येति तात्पर्यम् । सभायाः पतिभ्यो नमः । अश्वास्तुरगास्तेभ्यो नमः । अश्वानां पतिभ्यो नमः । आसमन्ताद् विध्यन्तीत्याव्याधिन्यो देव्यः । सेना वा । ताभ्यो नमः । विशेषं विध्यन्ति विविध्यन्त्यस्ताभ्यो नमः । उत्कृष्टा गणा भृत्यसमूहा यासां ता उगणाः । उपसर्गान्त्यलोपः पृषोदरादित्वात् । ब्राह्म्याद्या मातरस्ताभ्यो नमः । तृंहन्ति घ्नन्ति तृंहन्त्यः । तृंह हिंसायाम् । हन्तुं समर्था दुर्गादयस्ताभ्यो नमः ॥३॥ for नमः सभाभ्यः ... °देवतास्तृꣳहन्त्याः (L 11)

10. P1 उत्कृष्ट° for उत्कृष्टाः

11. P1 K after स्त्रियः add उपसर्गस्यान्तलोपः । उद्गूर्णा गणा उगणा यासां ता उगणा इति भाष्यान्तरम् । तृहि हिंसायाम् ।

15. B1 om. जागृ ... जाग्रद्भ्यो नमः (P 443, L 1)

शतरुद्रियहोममन्त्राः]

निद्राक्षये। ^{v}जाग्रद्भ्यः ^{v}नमः। ^{v}शयानेभ्यः। शीङ् स्वप्ने। शयनं कुर्वद्भ्यः ^{v}नमः। ^{v}आसीनेभ्यः। आस उपवेशने। आसनमुपवेशनं कुर्वद्भ्यः ^{v}नमः। ष्ठा गतिनिवृत्तौ। ^{v}तिष्ठद्भ्यः स्थितिं कुर्वद्भ्यः ^{v}नमः। धावु गतिशुद्ध्योः। ^{v}धावद्भ्यः धावनं कुर्वद्भ्यः ^{v}नमः। ^{v}वः युष्मभ्यं नमः ॥२॥

'नमः सभाभ्यः' इति। अतिशक्वरी छन्दः। अस्य पुरश्चरणम्। अर्द्धकृच्छ्रं चरित्वा नवसहस्रं जपेत्। ततः शंभोरालयमष्टसहस्रप्रदक्षिणं कुर्यात्। यावत् प्रदक्षिणपरिसमाप्तिस्तावन्निरन्तरं जपेत्। कृतपुरश्चरणो भवति। पूर्वमनेन राजयक्ष्मनिर्हरणमुच्यते। राजयक्ष्मणो घोरत्वात्। ब्राह्मणो विधानेन कर्ता गुरुर्भवेत्, अन्यथा विफला क्रिया भवति। तस्मादाचार्यः कार्यः। अत्र दिनादयोऽनपेक्षणीयाः। यतो यदा रुचिस्तदा कर्तव्यम्। कारयितुरात्माग्नौ सर्वं स्वगृहैकदेशे कुण्डं बाहुमात्रं विधाय तस्य पुरो वेदिमण्डपं तावत् कृत्वा नवं घटं जलपूर्णं तन्तुवेष्टितं निधाय देवमनेन मन्त्रेण आवाहयेत्। ततो गन्धादिकं कुर्यात्। गन्धकर्पूरपुष्पं तामरसं धूपं दीपं च सर्पिषा। एवमाराध्य आत्मानमपि तद्वदेवाराध्य एकादश दिनानि दीक्षित्वा कुर्यात्। प्रारम्भदिने समिदाधानं च कृत्वा चेमं मन्त्रं शतकृत्वः प्रतिनमस्कारमाज्येन हुत्वा तत्संनिधावेकविंशत्युत्तरशतं जपेत्। तदा प्रभृति यावदन्तम् अग्निं संरक्ष्य ततः परश्वो नित्यं कार्यं कृत्वा तिललाजादूर्वाव्रीहियवैराज्यमधुसिक्तैः शतकृत्वोऽनेन मन्त्रेण होमः कार्यः। एवं त्रीणि दिनानि। ततस्त्रीणि दिनानि प्रतिदिनं मधुसर्पिषा जुहुयात्। ततोऽर्धदिने अश्वत्थापामार्गैर्होमः पूर्ववत्। तत एकदिनमुदयात् प्रभृति अस्तमयं याव [दा] वश्यकनित्यानुरोधेन निरन्तरमिमं मन्त्रं जपेत्। ततः समाप्तिदिने अनेन मन्त्रेण अष्टसहस्रं कमलपुष्पैः प्रतिनमस्कारं देवमाराधयेत्। ततो गौरीमाराध्य ब्राह्मणैर्व्याधिनिर्मोचनं वाच्यम्। दानकाले अष्टसहस्रं तदर्धमष्टशतं वा राज्ञः। इतरेषामष्टशतं तदर्धं वा अष्टाविंशतिनिष्कमिति। एवमेकस्य पृथग्दानम्।

---

1. B1 om. शीङ् ... उपवेशनं कुर्वद्भ्यो नमः (L 2)
5. तदर्द्ध° for अर्द्ध°
6. B1 प्रदक्षिणां for °प्रदक्षिणं ; B1 °प्रदाक्षिणा° for प्रदक्षिण°
7. B1 before कृत° add सः
8. B1 भिषक् for कर्ता गुरुः
9. H3 आत्मानौ for आत्माग्नौ; H2 सर्वः, B1 सर्वं° for सर्वं
10. H2-3 °मण्डलं for °मण्डपं; H2-3 om. घटं ... एवमा° (L 12)
14. B1 अग्निः संरक्ष्यः for अग्निं संरक्ष्य
16. H3 ततास्त्रि° for ततस्त्रीणि
17. H2-3 अस्तमयावश्यक°; B1 अस्तमयमावश्यक° for अस्तमयं याव [दा] वश्यक°
19. B1 °निर्मोकं च न for °निर्मोचनं

ततः कर्मदक्षिणा दातव्या । प्रतिदिनमेकनिष्कम् । ततः सर्वदक्षिणेति धेनुर्देया । एवं समाप्य देवं विसर्जयेत् । एवं कर्तारं च । ततो घटजलेन तं स्नापयेत् प्रोक्षयेद्वा । एतेन राजयक्ष्मा नश्यति । श्रीशंभुप्रसादाद् दीर्घायुर्भवति । विनियोगान्तरं कल्पतोऽवगन्तव्यम् ॥

इत उत्तरं जातेभ्यो जुहोति । जाताः जातिविशेषाः । त इहोच्यन्ते रुद्राभेदप्रतिपादनाय । रुद्रलोकेऽपि च इत्थंभूताः रुद्राः सन्ति । " अथो एवैतानि रुद्राणां जातानि " (द्र. शब्रा ९·१·१·१९) इति । तत आह सभादिषु रुद्रदृष्टिः कर्तव्येति ॥

' नमः सभाभ्यः ' । भा दीप्तौ । भा दीप्तिस्तेजः । ब्रह्मादितेजसा सह भान्तीति सभाः, ताभ्यः [v]नमः । एवंविधानां सभानां पतयः सभापतयस्तेभ्यः [v]नमः । [v]अश्वेभ्यः अश्वरूपेभ्यः [v]नमः । अश्वानां पतिभ्यः [v]च [v]नमः । आविध्यतीत्याव्याधिन्यः सेनास्ताभ्यः [v]नमः । विविधं विध्यन्तीन्तीति विविध्यन्त्यः, ताभ्यः [v]विविध्यन्तीभ्यः सेनाभ्यः । [v]वः युष्मभ्यं [v]नमः । [v]उगणाभ्यः । उदित्युपसर्गस्यान्तस्य लोपश्छान्दसः । उद्गूर्णा गणा उत्कृष्टा वा गणाः समूहाः यासु सेनासु ता एव उगणा उच्यन्ते । ताभ्यः [v]नमः । तृंहतिर्हिंसाकर्मा । हिंसन्तीभ्यः [v]च [v]नमः ॥३॥

नमो गुणेभ्यो गुणपतिभ्यश्च वो नमो
नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः ।
नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो
नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥४॥

गुणेभ्यः । गुणपतिभ्य इति गुणपतिऽभ्यः ।
व्रातेभ्यः । व्रातपतिभ्य इति व्रातपतिऽभ्यः ।
गृत्सेभ्यः । गृत्सपतिभ्य इति गृत्सपतिऽभ्यः ।
विरूपेभ्य इति विऽरूपेभ्यः । विश्वरूपेभ्य इति विश्वऽरूपेभ्यः ॥ व्रो ॥४॥

1. H2–3 after ततः ins. अपि
2. H2–3 कर्तुरेव for कर्तारं च
3. H2–3 after प्रसादाद् add एव; B1 after भवति adds इत्येव; H2–3 योगानन्तरं for °योगान्तरं
4. H2–3 om. ते; B1 H3 रुद्रोद्भेद, H2 रोद्रोत्प्रेत for रुद्राभेद°
5. H2 प्रदपनादयः, H3 प्रतपनादयः for प्रतिपादनाय
8. B1 om. सभापतयः; H2–3 om. second नमः; B1 रुद्रेभ्यो for अश्वरूपेभ्यो
11. B1 om. इति

सा– अथ त्रयोदशः – ' नमो गणेभ्यो गणपतिभ्यश्च वो नमः ' इति। देवस्यानुचरा भूतविशेषा गणाः। तेषां पालका गणपतयः॥

अथ चतुर्दशः – ' नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः ' इति। नानाजातीयानां संघा व्राताः। तेषां पालका व्रातपतयः।

अथ पञ्चदशः – ' नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमः ' इति। गर्द्धनशीला गृत्सा विषयलम्पटा इत्यर्थः। तेषां पालका गृत्सपतयः॥

अथ षोडशः – ' नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ' इति। विरूपा विकृतरूपा नग्नमूढादयः। विश्वरूपाः तुरगवदनादिनानाविश्वरूपधारिणो भृत्याः॥

आ– ' नमो गणेभ्यः ' इति। शक्वरी छन्दः। अस्य पुरश्चरणम्। कृच्छ्रद्वादशरात्रं चरित्वा नवसहस्रं जपेत्। ततः शंभोरालयमष्टसहस्रप्रदक्षिणं कुर्यात्। यावत् प्रदक्षिणपरिसमाप्तिः तावन्निरन्तरं जपेत्। ततः कृतपुरश्चरणो भवति। अनेन मेहनशान्तिरुच्यते। मेहवान् स्वाग्नौ मधुसर्पिषी प्रतिनमस्कारं नवसहस्रमाहुतीर्जुहुयात्। मेहो नश्यति। विनियोगान्तरं कल्पतोऽवगन्तव्यम्।

भस्मोद्भासितसर्वाङ्गं जटामुकुटमण्डितम्।
ध्यायेत् त्र्यक्षं वृषारूढं गणेश्वरयुतं हरम्॥ इति।

---

1. S2 M2 नमो गणेभ्यो ... विश्वरूपेभ्यश्च वो नम इति। देवानुचरा भूतविशेषा गणास्तेभ्यो नमः। गणानां पालका गणपतयस्तेभ्यो नमः। व्राता नानाजातीयानां संघास्तेभ्यो नमः। व्रातपालका व्रातपतयस्तेभ्यो नमः। गृध्यन्ति वाञ्छन्ति गृत्साः विषयलम्पटाः। गृत्सा मेधाविनो वा। तेभ्यो नमः। गृत्सपतयस्तत्पालकास्तेभ्यो नमः। विकृतं रूपं येषां ते विरूपाः। नग्नमुण्डजटिलादयः। तेभ्यो नमः। विश्वं सर्वं नानाविधरूपं येषां ते विश्वरूपाः। तुरंगास्तुरंगवदनहयग्रीवादयस्तेभ्यो वो नमः॥४॥ for नमो गणेभ्यो ... भृत्याः (L 8)
5. P1 K after गृत्सा add गृत्सा मेधाविन इति भाष्यान्तरम्।
9. H2–3 om. पुरश्चरणम्; B1 कृच्छ्रं for कृच्छ्र°
10. H2 कृत्वा for चरित्वा; B1 after जपेत् adds शंभोरालयमष्टसहस्रं जपेत्; B1 H2–3 °सहस्रं for °सहस्र° ; B1 प्रदक्षिणां for °प्रदक्षिणं
11. H2–3 तावत् for ततः; H2–3 om. मेहन°
12. H2–3 °योगानन्तरं for °योगान्तरं
14. H2–3 °मण्डल° for °मुकुट°
15. B1 °युतापरम्, H2–3 °युतं परम् for °युतं हरम्

' नमो गणेभ्यः ' इति । गजरथहयपदातीनां विशिष्टाः समूहाः गणाः । तथाहि— सप्तविंशतिरिमा रथाश्चैव तथैकाशीतिरश्वाः पञ्चत्रिंशदधिकं शतं पदातय इत्येते मिलिता एको गण उच्यते । तथा च नैघण्टुकाः —

" एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ।
पत्त्यङ्गैस्त्रिगुणैः सम्यक् क्रमादाख्या यथोत्तरम् ॥
सेनामुख गुल्मगणौ " (अको २·८·८०–८१) इति ।

एवंविधेभ्यः [v]गणेभ्यः [v]नमः । एतेषां गणानां पतिभ्यः [v]च [v]वः युष्मभ्यं [v]नमः । गणानां संघाता व्राताः । व्रतन्तीति व्राताः । गणविशेषा एव । तेभ्यः [v]व्रातेभ्यः [v]नमः । व्रातानां पतयस्तेभ्यः [v]नमः । ' नमो गृत्सेभ्यः ' । गृत्स इति मेधाविनाम । [v]गृत्सेभ्यः मेधाविभ्यः [v]नमः । तेषां गृत्सानां पतयस्तेभ्यः [v]नमः । ' विरूपेभ्यो नमः ' । नग्नमुण्डादयो विरूपाः । तेभ्यः [v]विरूपेभ्यः [v]नमः । [v]विश्वरूपेभ्यः [v]नमः । विश्वे सर्वरूपाः, तेभ्यः नमः ॥४॥

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो
नमो रथिभ्यो अरथेभ्यश्च वो नमः ।
नमः क्षत्तृभ्यः संगृहीतृभ्यश्च वो नमो
नमो महद्भ्यो अर्भकेभ्यश्च वो नमः ॥५॥(३)॥

सेनाभ्यः । सेनानिभ्य इति सेनानिऽभ्यः ।
रथिभ्य इति रथिऽभ्यः । अरथेभ्यः ।
क्षत्तृभ्य इति क्षत्तृऽभ्यः । संग्रहीतृभ्य इति संग्रहीतृऽभ्यः ।
महद्भ्य इति महत्ऽभ्यः । अर्भकेभ्यः ॥ ब्रों ॥५॥(३)॥

---

1. H2–3 रथार्हाः for तथाहि
2. B1 om. रथाश्चैव, H2–3 रथैका° for तथैका°
5. B1 यत्संगैः for पत्त्यङ्गैः
7. B1 गुल्मगणेभ्यः for गणेभ्यः; H2–3 गण° for second गणानां
9. B1 पतिभ्यः for तेभ्यः
11. B1 after तेभ्यः adds रूपेभ्यः

सा– अथ सप्तदशमारभ्य विंशतिपर्यन्ता मन्त्राः स्पष्टार्थाः। तेषां पाठस्तु– ' नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो अरथेभ्यश्च वो नमः। नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो अर्भकेभ्यश्च वो नमः ' इति ॥५॥

[इति सप्तदशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

आ– ' नम सेनाभ्यः ' इति। अतिजगती छन्दः। अस्य पुरश्चरणम्। कृच्छ्रद्वादशरात्रं तदर्थं चरित्वा नवसहस्रं जपेत्। ततः शंभोरालये अष्टसहस्रं प्रदक्षिणं (णान् ?) कुर्यात्। यावत् प्रदक्षिणपरिसमाप्तिस्तावन्निरन्तरं जपेत्। ततः कृतपुरश्चरणो भवति। कुष्ठादीनां विनाशार्थं शतसहस्रं जपेत्। ततः कुष्ठादयो विनश्यन्ति। ज्वरेण संनिपतिते शक्तो ब्राह्मणो नाभिमात्रे जले स्रोतसि स्थित्वा रक्तकमलमष्टसहस्रं प्रतिनमस्कारं प्रक्षिपेत्। विशेषेण भृङ्गरीटपूजा कार्या। एवं कृते महाज्वरो विनश्यति।

भस्मोद्भासितसर्वाङ्गं जटामुकुटमण्डितम्।
ध्यायेत् त्र्यक्षं वृषारूढं गणेश्वरयुतं हरम्॥ इति।

विनियोगान्तरं कल्पतोऽवगन्तव्यम्॥

---

1. S2 M2 नमः सेनाभ्यः ... अर्भकेभ्यश्च वो नमः इति। सेनारूपेभ्यो नमः। सेना नयन्ति सेनान्यः सेनापतयस्तद्रूपेभ्यो वो नमः। ह्रस्वश्छान्दसः। रथाः सन्ति येषां ते रथिनः। तेभ्यो नमः। नास्ति रथो येषां ते अरथास्तेभ्यो वो नमः। क्षत्तृभ्यः। क्षि निवासगत्योः। तुदादिः। क्षियन्ति निवसन्ति रथेष्विति क्षत्तारः। यद्वा– क्षिप प्रेरणे। क्षिपन्ति प्रेरयन्ति सारथीनिति क्षत्तारो रथाधिष्ठातारः। नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृ – इत्यौणादिकसूत्रेण तृच्प्रत्ययान्तो निपातः। तेभ्यो नमः। संगृह्णन्ति अश्वानिति संग्रहीतारः सारथयः। "ण्वुल्तृचौ" (पा ३.१.१३३) इति तृच्। तेभ्यो नमः। महान्तो जातिविद्यादिभिरुत्कृष्टास्तेभ्यो नमः। अर्भकाः प्रमाणादिभिरल्पास्तेभ्यो नम इति ॥५॥ for अथ सप्तदश° ... वो नम इति (L 3)

2. P1 K after सेनानिभ्यश्च ins. इत्यत्र ह्रस्वश्छान्दसः; P1 with markings above क्षत्तृभ्यः ins. in the margin रथाधिष्ठिताः क्षत्तारः

3. P1 with markings above अर्भकेभ्यश्च ins. in the margin सूक्ष्मा प्रमाणादिभिः

5. B1 कृच्छ्रं for कृच्छ्र°

6. B1 तदर्ध for तदर्थं; B1 आलयम् for आलये

7. H2–3 om. निरन्तरं जपेत्। ततः

9. H2–3 जल° for जले

सेना चमूः । ताभ्यः ^{V}नमः । सेनां नयन्तीति सेनान्यः । तेभ्यः ^{V}वः युष्मभ्यं ^{V}नमः । रथा येषां सन्ति ते रथिनः, तेभ्यः ^{V}रथिभ्यः ^{V}नमः । रथरहिता अरथाः ये योद्धारस्तेभ्यः ^{V}अरथेऽभ्यः ^{V}वः युष्मभ्यं ^{V}नमः । 'क्षत्तृभ्यः' । रथानामधिष्ठातारः सूताः क्षत्तारस्तेभ्यः ^{V}क्षत्तृभ्यः ^{V}नमः । 'संग्रहीतृभ्यः' । रश्मीनां संग्रहीतारः सारथयस्तेभ्यः ^{V}नमः । महान्तः जातिविद्यादिभिरुत्कृष्टास्तेभ्यः ^{V}महद्भ्यः । अर्भकाः परिमाणादिभिस्तेभ्यः ^{V}नमः ॥५॥

[इति सप्तदशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

[अथ चतुर्थोऽनुवाकः ।]

तृतीयेऽनुवाके उभयतोनमस्काररूपा मन्त्रा उक्ताः । तेभ्योऽन्ये केचित्तथाविधा एव पञ्च मन्त्राः, तेभ्योऽन्येऽन्यतोनमस्काराश्च चतुर्थानुवाके उच्यन्ते–

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो
नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः ।
नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो
नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥१॥
नमः श्वभ्यः श्वपतिभ्यश्च वो नमो
नमो भवाय च रुद्राय च ।
नमः शर्वाय च पशुपतये च
नमो नीलग्रीवाय च शितिकण्ठाय च ॥२॥
नमः कपर्दिने च व्युप्तकेशाय च
नमः सहस्राक्षाय च शतधन्वने च ।
नमो गिरिशयाय च शिपिविष्टाय च
नमो मीढुष्टमाय चेषुमते च ॥३॥

---

8. K °नमस्कारमन्त्राः for °नमस्काररूपा मन्त्राः; K उभयतोनमस्काररूपाः for तथाविधा एव
9. K om. तेभ्योऽन्येऽन्यतो नमस्काराश्च; K om. अनुवाके; K विधीयन्ते for उच्यन्ते

नमो ह्रस्वाय च वामनाय च
नमो बृहते च वर्षीयसे च ।
नमो वृद्धाय च सवृधे च
नमोऽग्र्याय च प्रथमाय च ॥४॥
नम आशवे चाजिराय च
नमः शीघ्र्याय च शीभ्याय च ।
नम ऊर्म्याय चावस्वन्याय च
नमो नादेयाय च द्वीप्याय च ॥५॥(४)॥

तक्षभ्य इति तक्षऽभ्यः । रथकारेभ्य इति रथऽकारेभ्यः कुलालेभ्यः । कर्मारेभ्यः ।
निषादेभ्यः । निसादेभ्य इति निऽसादेभ्यः । पुञ्जिष्ठेभ्यः ।
श्वनिभ्य इति श्वनिऽभ्यः । मृगयुभ्य इति मृगयुऽभ्यः ॥ श्रौ ॥१॥
श्वभ्य इति श्वऽभ्यः । श्वपतिभ्य इति श्वपतिऽभ्यः । भवाय । रुद्राय ।
शर्वाय । पशुपतय इति पशुऽपतये ।
नीलग्रीवायेति नीलऽग्रीवाय । शितिकण्ठायेति शितिऽकण्ठाय ॥ फों ॥२॥
कपर्दिने । व्युप्तकेशायेति व्युप्तऽकेशाय ।
सहस्राक्षायेति सहस्रऽअक्षाय । शतधन्वन इति शतऽधन्वने ।
गिरिशायेति गिरिऽशयाय । शिपिविष्टायेति शिपिऽविष्टाय ।
मीळ्हुष्टमाय । मीळ्हुस्तमायेति मीळ्हुःऽतमाय । इषुमत इतीषुऽमते ॥ चौं ॥३॥
ह्रस्वाय । वामनाय । बृहते । वर्षीयसे ।
वृद्धाय । सवृध इति सऽवृधे । अग्र्याय । प्रथमाय ॥ यों ॥४॥
आशवे । अजिराय । शीघ्र्याय । शीभ्याय ।
ऊर्म्याय । अवस्वन्यायेत्यवऽस्वन्याय । नादेयाय । द्वीप्याय । ॥ यो ॥५॥(४)॥

सा- तत्राद्यमन्त्रपञ्चकपाठस्तु- ‘नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः । नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥

---

23. K तेषां for तत्राद्यमन्त्र°

नमः श्वभ्यः श्वपतिभ्यश्च वो नमः' इति । तक्षाणः शिल्पिनो जातिविशेषाः । रथं कुर्वन्तीति रथकारास्तक्षविशेषाः । कुलालाः कुम्भकाराः । कर्मारा लोहकाराः । निषादा गिरिवनचरा मांसाशिनः । पक्षिपुञ्जघातकाः पुञ्जिष्ठाः पुल्कसाः । शुनां गलेषु बद्धानां पाशानां धारकाः श्वनयः । शुनो नयन्ति ते श्वन्यः । ह्रस्वश्छान्दसः । मृगान् कामयन्त इति मृगयवः । "इदंयुरिदं कामयमानः" (नि ६·३१) इति यास्कोक्तेः । "सुप आत्मनः क्यच्" (पा ३·१·८) इति च क्यच् । "क्यचि च" (पा ७·४·३३) इति प्राप्तस्येत्वस्य "न च्छन्दस्यपुत्रस्य" (पा ७·४·३५) इति निषेधः । मृगयवो लुब्धकाः । श्वानः कुक्कुराः । शुनां पतयः श्वपतयः श्वपालकाः किरातवेषदेवस्यानुचराः ॥

अत्र द्वितीयोऽनुवाको लीलार्थदेवतामूर्तिप्राधान्येन प्रवृत्तः । तृतीयानुवाकस्य पूर्वभागश्चोर-मूर्तिप्राधान्येन । उत्तरभागस्तु नानाजातिरूपमूर्तिप्राधान्येन । चतुर्थानुवाके– 'नमस्तक्षभ्यः' इत्यादि पञ्च मन्त्रा नानाजातिविशेषभूताः प्रवृत्ता इति विभागो द्रष्टव्यः ।

एतावतोभयतोनमस्काररूपा मन्त्राः समापिताः । इत उत्तरं नमस्कारोपक्रमा मन्त्रा उच्यन्ते । तत्र चतुर्थानुवाके 'नमो भवाय च' इत्यारभ्य 'नमो नादेयाय च द्वीप्याय च' इत्यन्तानां पञ्चदशानां पाठः – 'नमो भवाय च रुद्राय च । नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च । नमो गिरिशाय च शिपिविष्टाय च नमो मीळ्हुष्टमाय चेषुमते च ॥ नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च । नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च ॥ नम आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च । नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च' इति । भवन्ति प्राणिनोऽस्मादिति भवः । रुद्रा रुदनहेतुभूतं दुःखं द्रावयतीति रुद्रः । शृणाति हिनस्ति पापमिति शर्वः । पशुसमानानज्ञानिनः पुरुषान् पालयतीति पशुपतिः । कालकूटधारणेन नीलवर्णो ग्रीवैकदेशो यस्यासौ नीलग्रीवः । शिति नीलं रूपं कण्ठे यस्य शितिकण्ठः श्वेतकण्ठः । "शितिर्धवलमेचकौ" (द्र. अमरकोश ३·५३) इत्यभिधानादिति केचिद्वदन्ति । स्तुतिवादे पुनरुक्तिर्न दोषमावहति, अपि त्वादरातिशयं कथयति । कपर्दो जटाजूटोऽस्यास्तीति कपर्दी । व्युप्ता मुण्डिताः केशा यस्य स व्युप्तकेशः । पाशुपतादिवेषेण कपर्दित्वं यत्यादिवेषेण मुण्डितकेशत्वम् इन्द्रवेषेण सहस्राक्षत्वम् । सहस्रभुजावतारेण शतसंख्याकै-र्धन्वभिरुपेतत्वम् । गिरौ कैलासे शेते तिष्ठतीति गिरिशयः । विष्णुमूर्तिधारी शिपिविष्टः । "विष्णुः शिपिविष्टः" (काशब्रा ३·२·३·३) इति श्रुतेः । पशुषु प्रविष्टः शिपिविष्टः । "पशवो शिपिविष्टाः" (जैब्रा २·१७२) इति श्रुतेः । अथवा "यज्ञो वै शिपिः", यज्ञाधिदेवतात्वेन तत्र प्रविष्टः । सर्वप्राणिष्व-न्तर्यामितया प्रविष्टो वा शिपिविष्टः । मेघरूपेणात्यन्तं वर्षयिता मीळ्हुष्टमः । बाणधारक इषुमान् । शरीरे लघुप्रमाणत्वं ह्रस्वत्वम् । अङ्गुल्याद्यवयवसंकोचो वामनत्वम् । आकारेण प्रौढो बृहत् । गुणैः समृद्धो वर्षीयान् । वयसाधिको वृद्धः । वृधः पण्डिताः । तैः सहितः सवृध् । वृध वृद्धौ । "अन्येभ्योऽपि दृश्यते" (पा ३·२·१७८) इति क्विप् । जगदुत्पत्तेरग्रे भवोऽग्र्यः । सभायां मुख्यः प्रथमः । आशुर्व्यापी । अशू व्याप्तौ । अजिरो गमनकुशलः । अज गतौ । शीघ्र्यः शीघ्रगमनशीलः । शीभशब्दः

1. K °विशेष: for °विशेषा:
4. P1 ह्रस्वत्वं छान्दसम् for ह्रस्वश्छान्दसः; K कामयन्ति for कामयन्ते
7. K before लुब्धकाः adds मृग°
8. P1 अथ for अत्र
10. K प्रभूताः for प्रवृत्ताः

उदकप्रवाहवाची, तत्रावस्थितः शीभ्यः । ऊर्मौ तरङ्गे स्थित ऊर्म्यः । अवस्वने ध्वनिरहिते स्थिरजलेऽवस्थितोऽवस्वन्यः । नद्याः प्रवाहरूपे भवो नादेयः । द्वीपे नदीवर्तिभूमौ स्थितो द्वीप्यः । अत्रैकस्मिन् यजुषि चतुर्थ्यन्ताभ्यां पदाभ्यां नमःशब्दं पृथगन्वेतुं समुच्चयार्थौ द्वौ चकारौ पठितौ ॥१-५॥

[इति सप्तदशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

आ– ' नमस्तक्षभ्यः ' इति । शक्वरी छन्दः । अस्य पुरश्चरणम् । द्वादशकृच्छ्रं चरित्वा नवसहस्रं जपेत् । ततः शंभोरालयमष्टसहस्रप्रदक्षिणं कुर्यान्निरन्तरं जपन् । अनेन कृतपुरश्चरणो भवति । विनियोगः कल्पतोऽवगन्तव्यः । तक्षा वर्धकिः । तक्षाणः शिल्पिनः जातिविशेषाः । तेभ्यः vनमः । vरथकारेभ्यः । रथं कुर्वन्तीति रथकाराः तक्षविशेषास्तेभ्यः vनमः । कुलालाः कुम्भकाराः, तेभ्यः vनमः । vकर्मारेभ्यः । कर्माराः लोहकाराः, तेभ्यः vनमः । निषादाः गिरिवनचराः मांसाशिनः, तेभ्यः vनमः । पुञ्जिष्ठाः पक्षिघातकाः पक्षिभक्षिणश्च पुल्कसाश्च पुञ्जिष्ठास्तेभ्यः vनमः । शुनो नयन्तीति शुन्यः । नयतेर्ह्रस्वत्वं छान्दसम् । तेभ्यः vश्वनिभ्यः vनमः । श्वगणिका वा उच्यन्ते श्वनिभ्य इति । vमृगयुभ्यः । " इदंयुरिदं कामयमानाः " (नि ६·३१) इति यास्कः । मृगान् कामयन्ते इति मृगयवः पापर्धिकास्तेभ्यो नमः । तेभ्यः मृगयुभ्यः vच vवः vनमः । मृगव्याधादयः किरातवेषा देवस्यानुचराः ॥१॥

' नमः श्वभ्यः ' इति । जगती छन्दः । ' नमः श्वभ्यः ' इत्यादीनामष्टानां कण्डिकानां

---

2. P1 K after नादेयः ins. स्त्रीभ्यो ढगिति ढक् प्रत्ययः ।

5. S2 M2 नमस्तक्षभ्यो ... मृगयुभ्यश्च वो नम इति । तक्षाणः शिल्पिजातयः । तेभ्यो नमः । रथं कुर्वन्ति रथकाराः । सूत्रधारविशेषास्तेभ्यो नमः । कुलालाः कुम्भकारास्तेभ्यो नमः । कर्मारा लोहकारास्तेभ्यो नमः । निषादा गिरिचरा मांसाशिनो भिल्लास्तेभ्यो नमः । पुंजिष्ठाः पक्षिपुञ्जघातकाः पुल्कसादयस्तेभ्यो नमः । शुनो नयन्ति ते श्वन्यः । श्वकण्ठबद्धरज्जुधारकाः श्वनिनः । नयतेर्ह्रस्व आर्षः । तेभ्यो नमः । मृगान् कामयन्ते मृगयवः । इदंयुरिदं कामयमानः (नि ६·३१) इति यास्कोक्तेः । " सुप आत्मनः क्यच् " इति क्यच् । क्याचि चेति प्राप्तस्येत्वस्य । " न छन्दस्यपुत्रस्य " (पा ७·४·३५) इति निषेधः । मृगयवो लुब्धकास्तेभ्यो नमः ॥१॥ for नमस्तक्षभ्यः ... देवस्यानुचराः (L 14)

15. नम श्वभ्यः ... शितिकण्ठाय चेति । श्वानः कुक्कुराः । तद्रूपेभ्यो नमः । शुनां पतयः श्वपतयः । श्वपालकास्तेभ्यो वो युष्मभ्यं नमः । श्वपतयः किरातवेषस्य रुद्रस्यानुचराः । नम इषुमद्भ्यो धन्वायिभ्य इत्यारभ्य ये वःशब्दास्ते पूजावाचकाः न युष्मदादेशाः । इत्युभयतोनमस्कारमन्त्राः समाप्ताः ॥

अथ नमस्कारोपक्रमा नाम मन्त्रा उच्यन्ते । भवन्त्युत्पद्यन्ते जन्तवोऽस्मादिति भवस्तस्मै नमः । रुत् दुःखं द्रावयति नाशयति रुद्रस्तस्मै नमः । शृणाति हिनस्ति पापमिति शर्वः । तस्मै नमः । पशूनज्ञान् पाति रक्षतीति पशुपतिस्तस्मै नमः । विषभक्षणेन नीला नीलवर्णा ग्रीवा कण्ठैकदेशो यस्य स नीलग्रीवस्तस्मै नमः । शितिः श्वेतः कण्ठो नीलातिरिक्तभागो यस्य [स] शितिकण्ठस्तस्मै नमः । शिती धवलमेचकौ ॥२॥ for नमः श्वभ्यः ... कथयति (P 432, L 14)

पुरश्चरणमाह– त्रिरात्रं चरुभोजी जपेत् । ततः एकादश दिनानि निरन्तरं जपेत् । ततः कृतपुरश्चरणो भवति । एतैर्मन्त्रैः श्वेतकमलैः प्रतिनमस्कारम् आर्षलिङ्गस्योपरि प्रक्षिपेदेकादशकृत्वः । राजश्रीर्वर्धते । एतैर्मन्त्रैः राज्ञः सर्वायुधानि स्पृष्ट्वा अभिमन्त्रयेत् । तेषां तेजो वर्धते । विनियोगान्तराणि कल्पतोऽवगन्तव्यानि ॥

' नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ' । स्वरूपधारिभ्यः ^{v}नमः । तत्पतिरूपेभ्यश्च ^{v}नमः इति । अत्रोभयतोनमस्कारा: समाप्ताः ॥

अथान्यतरतोनमस्काराः । ' इषुमद्भ्यो धन्वायिभ्यश्च वो नमः ' इत्यारभ्य वःशब्दाः अनुक्रान्ता ये पूजावचनाः । इत उत्तराणि श्रीरुद्रनामानि ' नमो भवाय ' इत्यादीनि । सर्वदा सर्वत्र भवतीति भवः सन्मात्ररूपः, तस्मै ^{v}भवाय ^{v}नमः । सर्वं जगदन्तकाले रोदयतीति रुद्रः, तस्मै ^{v}रुद्राय नमः । शॄ हिंसायाम् । अन्तकाले सर्वं शृणाति हिनस्तीति शर्वः, तस्मै ^{v}शर्वाय जगद्धिंसकाय ^{v}नमः । पशव इव पशवो जीवाः अज्ञानकर्मपाशबद्धास्तेषां पतिः पालकः पशुपतिस्तस्मै ^{v}पशुपतये नमः । ग्रीवायां कण्ठे नीलः श्यामो वर्णो यस्य स नीलग्रीवः, तस्मै ^{v}नीलग्रीवाय ^{v}नमः । शितिः नीलं रूपं कण्ठे यस्य स शितिकण्ठः । शितिकण्ठः श्वेतकण्ठ इति केचिद्वदन्ति । स्तुतिवादे पुनरुक्तिर्न दोषमावहति । अपि त्वादरातिशयं कथयति ॥२॥

' नमः कपर्दिने ' इति । अतिजगती छन्दः । अस्य पुरश्चरणम् । त्रिरात्रं चरुभोजी जपित्वा त्रिरात्रं निरन्तरं निराहारो जपेत् । ततः कृतपुरश्चरणो भवति । विनियोगः कल्पतोऽवगन्तव्यः ।

कपर्दो जटाजूटः । जटाबन्धोऽस्यास्तीति कपर्दी, तस्मै ^{v}कपर्दिने । व्युप्ताः मुण्डिताः केशाः यस्य सः, तस्मै ^{v}व्युप्तकेशाय ^{v}नमः । ^{v}नमः ^{v}सहस्राक्षाय सहस्रनेत्राय । ^{v}शतधन्वने

---

15. नमः कपर्दिने ... इषुमते चेति । कपर्दो जटाजूटोऽस्यास्तीति कपर्दी । तस्मै नमः । पाशुपतादिवेषेण । चकाराः सर्वे समुच्चयार्था ज्ञेयाः । व्युप्ता मुण्डिताः केशाः यस्य स व्युप्त-केशस्तस्मै नमः । यत्यादिरूपेण मुण्डितत्वम् । सहस्रमक्षीणि यस्य स सहस्राक्षस्तस्मै इन्द्ररूपाय नमः । शतं धनूंषि यस्य स शतधन्वा । धनुषश्चेत्यनङ् । तस्मै बहुधनुर्धारिणे नमः । गिरौ कैलासे शेतेऽसौ गिरिशयस्तस्मै नमः । शिपिविष्टाय विष्णुरूपाय । विष्णुः शिपिविष्ट इति श्रुतेः । यद्वा शिपिषु पशुषु विष्टः प्रविष्टः (S2 om. प्रविष्टः) शिपिविष्टः । पशवो वै शिपिः इति श्रुतेः । सर्वप्राणिषु अन्तर्यामितया स्थित इत्यर्थः । यद्वा यज्ञो वै शिपिः । यज्ञे अधिदेवतात्वेन प्रविष्टः शिपिः । आदित्यो वा मण्डलाधिष्ठातेत्यर्थः । शिपयोऽत्र रश्मय उच्यन्ते । तैराविष्टो भवतीति यास्कोक्तेः । अतिशयेन मीढ्वान् मेघरूपेण सेक्ता मीळ्हुष्टमः । तस्मै नमः । इषवो बाणाः सन्त्यस्येति इषुमान्, तस्मै नमः ॥३॥ for नमः कपर्दिने ... तस्मै च नमः (P 433, L 6)

Variants

Continued from Page No. 431

6. H2–3 जपेत् for जपन्
8. B1 om. रथकारेभ्यः ... कुम्भकाराः (L 9)
10. H2–3 वनवासिनः for मांसाशिनः; B1 भक्षिणः श्वा° for °भक्षिणश्च
11. B1 ह्रस्वः। छान्दसं पदम् for ह्रस्वत्वं छान्दसम्
13. H2–3 कामयन्ति for कामयन्ते
14. H2–3 वनस्य for देवस्य
15. H2–3 om. अष्टानां; H2–3 खण्डिकानां for कण्डिकानां

Page No. 432

1. B1 after त्रिरात्रं adds च
3. H2–3 वर्धयेत् for first वर्धते; H2–3 अभिवर्धयते for second वर्धते
4. H2–3 °योगानन्तराणि for °योगान्तराणि
7. H2–3 अन्यतो for अन्यतरतो
8. B1 ते for ये
12. B1 before नीलः adds यः सः
13. B1 शितिः नीलरूपकण्ठो for शितिः नीलं रूपं कण्ठे
14. H3 om. कथयति

बहुधनुष्मते । गिरौ शेत इति गिरिशयः, तस्मै [v]गिरिशयाय । दारुवनप्रवेशादौ निर्वेष्टितशेपः शिपिविष्टः । सूर्यरूपेण वा स्तुतिः । शिपयो बालरश्मयः उच्यन्ते । तैः सह प्रविष्टः । पशवो वै शिपयः । तत्र प्रविष्टः शिपिविष्टः । " यज्ञो वै विष्णुः । पशवः शिपिः " (तैब्रा १·३·८·५) इति श्रुतेः । यज्ञो वा शिपिः । यज्ञाधिदेवतात्वेन तत्र प्रविष्टः सर्वप्राणिष्वन्तर्यामितया प्रविष्टो वा शिपिविष्टः, तस्मै [v]शिपिविष्टाय [v]नमः । मिह सेचने । मीळ्हुष्टमः सेक्तृतमः सदा युवतमः, तस्मै [v]मीळ्हुष्टमाय [v]नमः । [v]च [v]इषुमते । इषवोऽस्य सन्तीति इषुमान्, तस्मै च नमः ॥३॥

' नमो ह्रस्वाय ' इति । त्रिष्टुप् । त्रिरात्रं चरुभोजी जपित्वा त्रिरात्रं निराहारो जपेत् । ततः कृतपुरश्चरणो भवति । विनियोगः कल्पतोऽवगन्तव्यः ॥

ह्रस्वाय । लघुप्रमाणो ह्रस्वः, तस्मै [v]ह्रस्वाय [v]नमः । संकुचितावयवो वामनः, तस्मै [v]वामनाय [v]नमः । आकारेण महान् बृहत्, तस्मै [v]बृहते [v]नमः । बृहत्तरो वर्षीयान्, तस्मै [v]वर्षीयसे [v]च नमः । आकारेण वृद्धः, तस्मै [v]नमः । वयसा सम्यग् वृद्धः । वृधु वृद्धौ । " अन्येभ्योऽपि दृश्यते " (पा ३·२·१७८) इति क्विप् । वर्धत इति वृध् वृद्धः । वृधा वृद्धेन सह वृद्धैः सम्यग्ज्ञानादिभिर्वृद्धैः सह वर्तत इति सवृध् । ज्ञानवृद्धैः परिवेष्टिताय [v]सवृधे नमः । जगदुत्पत्तेरग्रे भवः अग्र्यः, तस्मै [v]अग्र्याय [v]नमः । प्रथमो मुख्यः प्रधानस्तस्मै [v]प्रथमाय नमः ॥४॥

---

1. B1 °शेषः, H2–3 °वेपः for °शेपः
2. B1 om. शिपिविष्ट
3. H2–3 अत्र for तत्र and om. शिपिविष्टः
8. S2 M2 नमो ह्रस्वाय ... प्रथमाय चेति । रूपतो नमस्काराः । ह्रस्वोऽल्पशरीरः, तस्मै नमः । वामनः संकुचितावयवस्तस्मै नमः । बृहन् प्रौढाङ्गस्तस्मै नमः । वर्षीयानतिशयेन वृद्धः । " प्रियथिर° " (पा ६.४.१५७) इत्यादिना वर्ष्यादेशः, तस्मै नमः । वृद्धो वयसाधिकस्तस्मै नमः । वर्धन्ते विद्याविनयादिगुणैस्ते वृद्धाः पण्डिताः । क्विप् । तैः सह वर्तत इति सवृत्, तस्मै नमः । जगतामग्रे भवोऽग्र्यस्तस्मै नमः । अग्राद्यत् । सर्वत्र मुख्यः प्रथमस्तस्मै नमः ॥४॥ for ह्रस्वाय ... प्रथमाय नमः (L 16)
10. B1 H2–3 °अवयवाय नमः for °अवयवो वामनः
14. B1 वर्धयति for वर्तते

शतरुद्रियहोममन्त्राः]

' नम आशवे ' इति । त्रिष्टुप् । पुरश्चरणं पूर्ववत् । विनियोगः कल्पतोऽवगन्तव्यः । आशुः शीघ्रव्यापी शीघ्रगामी, तस्मै [v]आशवे [v]नमः । [v]अजिराय । अज गतिनिक्षेपणयोः । अजनशीलो ह्यजिरः, तस्मै नमः । शीघ्रं वहन्तीषु अप्सु भवः शीव्यः, तस्मै [v]शीव्याय [v]नमः । तत्र अपां प्रकरणात् शीभशब्देनापो लक्ष्यन्ते । शीघ्रशीभशब्दौ क्षिप्रवचनौ भवतः । शीभे भवः शीभ्यः । शीघ्रगमनाधिष्ठातृदेवतायै नमः । [v]च तस्मै [v]शीभ्याय नमः । ऊर्मिः जलकल्लोलः, तत्र भव ऊर्म्यः, तस्मै [v]ऊर्म्याय ऊर्म्यधिष्ठातृदेवतायै [v]नमः । [v]अवस्वन्याय । अवाचीनं गच्छत उदकस्य स्वानो ध्वनिः अवस्वनः, तत्र भवः अवस्वन्यः, तस्मै नमः । नद्यां भवो नादेयः, तस्मै [v]नमः । उदकमध्ये जलरहितः प्रदेशो द्वीपः, तत्र भवः, तस्मै [v]द्वीप्याय च नमः । अधिष्ठातृदेवताभिप्रायो येषु ज्ञातव्यः ॥५॥

[इति सप्तदशोऽध्याये चतुर्थोऽनुवाकः ॥४॥]

[अथ पञ्चमोऽनुवाकः ।]

चतुर्थेऽनुवाके अन्यतरतोनमस्काररूपाः पञ्चदश मन्त्रा उक्ताः । अथ पञ्चमे तथाविधा एव केचिन्मन्त्रा उच्यन्ते–

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च ।
नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ॥१॥

---

1. S2 M2 नम आशवे ... द्वीप्याय चेति । अश्नुते जगद्व्याप्नोतीत्याशुः । तस्मै नमः । अजति गच्छतीत्याजिरो गतिशीलस्तस्मै नमः । शीघ्रे वेगवद्वस्तुनि भवः शीघ्र्यः । तत्र भव इति यत् सर्वत्र । शीभृ कत्थने । शीभते कत्थ्यते इति शीभः । आत्मश्लाघी । पचाद्यच् । तत्र भवः शीभ्यः । शीभो जलप्रवाहो वा । शीभः क्षिप्रो वा । तत्र भवाय नमः । ऊर्मिषु कल्लोलेषु भव ऊर्म्यस्तस्मै नमः । अवगतः स्वनो यस्मात्तदवस्वनं स्थिरजलम् । यद्वा अव नीचैर्गर्तादौ स्वनोऽवस्वनस्तत्र भवाय । नद्यां भवो नादेयस्तस्मै नमः । स्त्रीभ्यो ढक् । द्वीपे जलान्तवर्तिनि जलभूमौ भवो द्वीप्यस्तस्मै नमः ॥५॥ for नम आशवे ... येषु ज्ञातव्यः (L 9)
5. B1 om. च तस्मै ... °देवतायै नमः (L 6)
9. H3 तेषु for येषु

नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च ।
नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च ॥२॥
नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च ।
नम आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ॥३॥
नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च ।
नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥४॥
नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च ।
नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥५॥(५)॥

ज्येष्ठाय । कनिष्ठाय । पूर्वजायेति पूर्वऽजाय । अपरजायेत्यपरऽजाय ।
मध्यमाय । अपगल्भायेत्यपऽगल्भाय । जघन्याय । बुध्न्याय ॥ लो ॥१॥
सोभ्याय । प्रतिसर्यायेति प्रतिऽसर्याय । याम्याय । क्षेम्याय ।
श्लोक्याय । अवसान्यायेत्यवऽसान्याय । उर्वर्याय । खल्याय ॥ रो ॥२॥
वन्याय । कक्ष्याय । श्रवाय । प्रतिश्रवायेति प्रतिऽश्रवाय ।
आशुषेणाय । आशुसेनायेत्याशुऽसेनाय । आशुरथायेत्याशुऽरथाय ।
शूराय । अवभेदिन इत्यवऽभेदिने ॥ वौ ॥३॥
बिल्मिने । कवचिने । वर्मिणे । वरूथिने ।
श्रुताय । श्रुतसेनायेति श्रुतऽसेनाय । दुन्दुभ्याय । आहनन्यायेत्याऽहनन्याय ॥ रो ॥४॥
धृष्णवे । प्रमृशायेति प्रऽमृशाय । निषङ्गिणे । इषुधिमत इतीषुधिऽमते ।
तीक्ष्णेषव इति तीक्ष्णऽइषवे । आयुधिने ।
स्वायुधायेति सुऽआयुधाय । सुधन्वन इति सुऽधन्वने ॥ क्षो ॥५॥(५)॥

शतरुद्रियहोममन्त्राः]

सा- तेषां पाठस्तु- ' नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च। नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ॥ नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च। नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च ॥ नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च। नम आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ॥ नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च। नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥ नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च। नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ' इति। विद्यैश्वर्यादिभिरधिको ज्येष्ठः। अल्पः कनिष्ठः। पूर्वं जगदादौ हिरण्यगर्भरूपेणोत्पन्नः पूर्वजः। अपरस्मिन् जगदवसानकाले संहर्तुं कालाग्न्यादिरूपेणोत्पन्नः

---

1. S2 M2 नमो ज्येष्ठाय ... बुध्न्याय (M2 बुध्नियाय) चेति । वयोऽवस्थाभिधायकाः षट् नमस्काराः। अत्यन्तं प्रशस्यो ज्येष्ठस्तस्मै नमः। " ज्य च " (पा ५.३.६१) इति प्रशस्य-शब्दस्येष्ठनि ज्यादेशः। अत्यन्तं युवा अल्पो वा कनिष्ठस्तस्मै नमः। " युवाल्पयोः कनन्यतरस्याम् " (पा ५.३.६४) इति कनादेशः। पूर्वं जगदादौ हिरण्यगर्भरूपेणोत्पन्नः पूर्वजस्तस्मै नमः। अपरस्मिन् काले प्रलये कालाग्निरूपेण जातोऽपरजस्तस्मै नमः। मध्ये सृष्टिसंहारान्तर्देव-तिर्यगादिरूपेण भवो मध्यमस्तस्मै नमः। मध्यान्मः। गल्भ धार्ष्ट्ये। गल्भनं गल्भो धार्ष्ट्यम्। अपगतो गल्भो यस्मात् सोऽपगल्भोऽप्रगल्भोऽव्युत्पन्नेन्द्रियस्तद्रूपाय नमः। एकगर्भान्तरितः अपगल्भो वा। जघनं गवादीनां पश्चाद्भागस्तत्र भवो जघन्यस्तस्मै नमः। बुध्ने वृक्षादिमूले भवो बुध्न्यस्तस्मै नमः ॥१॥

नमः सोभ्याय च ... खल्याय चेति। सोभं गन्धर्वनगरं, तत्र भवः सोभ्यः। यद्वा उभाभ्यां पुण्यपापाभ्यां सहितः सोभो मनुष्यलोकः। " पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यां मनुष्यलोकम् " (प्रश्नोपनिषद् ३.७) इत्यथर्वणश्रुतेः। तत्र भवः सोभ्यस्तस्मै नमः। प्रतिसरो विवाहोचितं हस्तसूत्रमभिचारो वा। तत्र भवः प्रतिसर्यस्तस्मै नमः।

आहुः प्रतिसरं हस्तसूत्रे माल्यस्य मण्डने।
व्रणशुद्धौ चमूपृष्ठे (S2 M2 च भू-) नियोज्यारक्षकङ्कणे ॥

मन्त्रभेदेऽपीति विश्वः। यमे भवो याम्यः पापिनां नरकार्तिदाता, तस्मै नमः। कुशले भवः क्षेम्यस्तस्मै नमः। श्लोका वैदिकमन्त्रा यशो वा। तत्र भवः श्लोक्यस्तस्मै नमः। अवसानं समाप्तिर्वेदान्तो वा। तत्र भवोऽवसान्यस्तस्मै नमः। उर्वरा सर्वसस्याढ्या भूस्तत्र धान्यरूपेण भव उर्वर्यस्तस्मै नमः। खलो धान्यविवेचनदेशस्तत्र भवः खल्यस्तस्मै नमः। खलः कल्के भुवि धने (S2 धाने) कल्ये कर्णे जपेऽधम इत्युक्तेः ॥२॥

(Continued to Page 438)

अपरजः। मध्ये काले देवतिर्यगादिरूपेण उत्पन्नो मध्यमः। अपगल्भोऽप्रगल्भोऽरूढेन्द्रियो बालः। जघने गवादीनां पश्चाद्भागे वत्सरूपेण भवो जघन्यः। बुध्ने वृक्षादीनां मूले शाखादिरूपेणोत्पन्नो बुध्न्यः। उभाभ्यां पुण्यपापाभ्यां सह वर्तते सोभो मनुष्यलोकः। अत एव आथर्वणिका आमनन्ति– "पुण्येन पुण्यलोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम्" (प्रश्नोपनिषद् ३.७) इति। तत्र भवः सोभ्यः। प्रतिसरो विवाहादौ हस्ते धार्यमाणो रक्षाबन्धस्तमर्हतीति प्रतिसर्यः। यमलोके पापिशिक्षकरूपेण भवो याम्यः। क्षेमो-मोक्षस्तमर्हतीति क्षेम्यः। श्लोका वैदिकमन्त्राः, तत्प्रतिपादकत्वेन तत्र भवः श्लोक्यः। अवसानं वेदान्तस्तत्र प्रतिपाद्यत्वेन भवोऽवसान्यः। उर्वरा सर्वसस्या भूमिः। तामर्हति धान्यविशेषेणेत्युर्वर्यः।

(Continued from last Page)

नमो वन्याय च ... चावभेदिने चेति। वने वृक्षादिरूपेण भवो वन्यस्तस्मै नमः। वनं वृक्षौघो जलं वा। वनं प्रस्रवणे गेहे प्रवासेऽम्भसि कानन इति। कक्षं तृणं वल्ली वा। तत्र भवः कक्ष्यस्तस्मै नमः। कक्षो वीरुधि दोर्मूले कच्छे शुष्कवने तृणे। श्रूयत इति श्रवः शब्दस्तद्रूपाय नमः। प्रतिश्रवः प्रतिशब्दस्तद्रूपाय नमः। आशुः शीघ्रा सेना यस्य सः आशुषेणस्तस्मै नमः। आशुः शीघ्रो रथो यस्यासावाशुरथस्तस्मै नमः। शूराय युद्धवीराय नमः। अवभिनत्ति रिपून्नीचैर्विदारयतीत्यवभेदी, तस्मै नमः ॥३॥

नमो बिल्मिने च ... चाहनन्याय चेति। बिल्मं शिरस्त्राणमस्यास्तीति बिल्मी, तस्मै नमः। पटस्यूतं कार्पासगर्भं देहरक्षकं कवचं तदस्यास्तीति कवची, तस्मै नमः। लोहमयं शरीररक्षकं वर्म, तदस्यास्तीति वर्मी, तस्मै नमः। गजोपरिस्थो गजाकारः कोष्ठो वरूथो रथगुप्तिर्वा। सोऽस्यास्तीति वरूथी, तस्मै नमः। वरूथं तु तनुत्राणे रथगोपनवेश्मनि। श्रुताय प्रसिद्धाय नमः। श्रुता प्रसिद्धा सेना यस्य स श्रुतसेनः, तस्मै नमः। दुन्दुभौ भेर्यां भवो दुन्दुभ्यस्तस्मै नमः। दुन्दुभिस्तु भेर्यां दितिसुते विषे। आहन्यते ताड्यतेऽनेनेत्याहननं वाद्यसाधनं दण्डादि। तत्र भव आहनन्यस्तस्मै नमः ॥४॥

नमो धृष्णवे ... सुधन्वने चेति। धृष्णोतीत्येवंशीलो धृष्णुः प्रगल्भस्तस्मै नमः। प्रमृशति विचारयति प्रमृशः पण्डितस्तस्मै नमः। इगुपधेति कः। निषङ्गिणे खड्गयुताय नमः। इषुधिमते तूणयुताय नमः। तीक्ष्णाः असह्याः इषवो बाणा यस्य स तीक्ष्णेषुस्तस्मै नमः। आयुधान्यपि सन्ति आयुधी, तस्मै नमः। शोभनमायुधं त्रिशूलं यस्य सः स्वायुधस्तस्मै नमः। शोभनं धनुः पिनाकं यस्य सः सुधन्वा, तस्मै नमः ॥५॥ for नमो ज्येष्ठाय (Page 437 Line 1) ... यस्यासौ सुधन्वा [P 439, L 11]

— × —

1. P1 after मध्यमः ins. मध्ये भवो मध्यमः; P1 after बालः ins. एकगर्भान्तरित इति भाष्यान्तरम्।

5. P1 K after सोभ्यः add यद्वा सोभं गन्धर्वनगरम्। तत्र भवः सोभो (?) वृद्ध्यभावश्छान्दसः।

शतरुद्रियहोममन्त्राः]

खलो धान्यविवेचनदेशः । तमर्हति सेव्यादिरूपेणेति खल्यः । वने वृक्षादिरूपेण भवो वन्यः । कक्षे तृणे नदीरूपेण भवः कक्ष्यः । श्रूयत इति श्रवः शब्दः । प्रतिशब्दः प्रतिध्वनिः । आशुः शीघ्रगामिनी सेना यस्यासावाशुषेणः । आशुः शीघ्रगामी रथो यस्यासावाशुरथः । शूरो युद्धे धैर्यवान् । शत्रूनवचीनं यथा भवति तथा भेत्तुं शीलमस्येति अवभेदी । छिद्रोपेतं शिरस्त्राणादिकं बिल्मं तदस्यास्तीति बिल्मी । पटे स्यूतं कार्पासादिगर्भं शरीररक्षकं कवचम् । तदस्यास्तीति कवची । लोहमयं वर्म । तद्वान् वर्मी । गजस्योपरि रक्षार्थं गृहाकारेण स्थितं वरूथम् । तदस्यास्तीति वरूथी । श्रुतो बन्दिषु प्रसिद्धः । श्रुता बन्दिषु प्रसिद्धा सेना यस्यासौ श्रुतसेनः । दुन्दुभौ भेर्यां भवः शब्दः दुन्दुभ्यः । आहन्यते ताड्यते अनेनेति आहननं दुन्दुभ्याघातार्थो दण्डः । तद्रूपेणोत्पन्न आहनन्यः । धृष्णुर्युद्धे पलायनरहितः । प्रमृशः परवृत्तान्तपरामर्शकः । निषङ्गी खड्गयुक्तः । इषुधिमान् बाणधारणयुक्तः । तीक्ष्णा निशिता इषवो बाणा यस्यासौ तीक्ष्णेषुः । बहून्यायुधान्यस्य सन्तीत्यायुधी । शोभनमायुधं त्रिशूलरूपं यस्यासौ स्वायुधः । शोभनं धन्व पिनाकरूपं यस्यासौ सुधन्वा ॥५॥

[इति सप्तदशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

आ– ' नमो ज्येष्ठाय ' इति । जगती छन्दः । पुरश्चरणादि पूर्ववत् । विनियोगः कल्पतोऽवगन्तव्यः । वयोऽवस्थाभिप्रायेण ज्येष्ठकनिष्ठौ प्रसिद्धौ । यद् देवस्य पूर्वकालावस्थानं तदपेक्ष्य ज्येष्ठत्वम् । यच्च पश्चादवस्थानं तदपेक्ष्य कनिष्ठत्वम् । पूर्वपुरुषो ज्येष्ठः । अपरः कनिष्ठः । तस्मै तस्मै [v]ज्येष्ठाय [v]च [v]कनिष्ठाय [v]च [v]नमः । पूर्वो जातः पूर्वजस्तस्मै [v]पूर्वजाय [v]नमः । अपरो जातः अपरजः, तस्मै [v]अपरजाय नमः । मध्ये भवो मध्यमः, तस्मै [v]मध्यमाय [v]नमः । ' अपगल्भाय ' । अपगतगल्भः अपगतगर्भो वा । रलयोरभेदात् । एकगर्भान्तरितः अपगल्भः, तस्मै [v]अपगल्भाय नमः । ' नमो जघन्याय च बुध्न्याय च ' । जघनं पश्चाद्भागः, बुध्न आदिः, तत्र भवः । [v]जघन्याय पश्चाद्भाविने [v]नमः । [v]बुध्न्याय आदिभूताय मूलभूताय नमः ॥१॥

' नमः सोभ्याय च ' इति । त्रिष्टुप् । पुरश्चरणं पूर्ववत् । विनियोगः कल्पतोऽवगन्तव्यः । सोभ इति गन्धर्वनाम । तत्र भवः सोभ्यः, तस्मै [v]सोभ्याय [v]नमः । प्रतिसर इति अभिचारकर्मा ।

1- P1 K after खलो ins. खलः कल्के भुवि धने क्रूरे कर्णे जपेऽधमे इत्यभिधानम्;
P1 K after कक्षे ins. कक्षे वीरुधि दोर्मूले कच्छे शुष्कवने तृणे ।

6, P1 after वरूथं ins. वरूथं तु तनुत्राणे रथगोपनवेश्मनोः

10. P1 त्रिशूलं for त्रिशूलरूपं

13. H2–3 पुरश्चरणं for पुरश्चरणादि; B1 om. विनियोगः ... °गन्तव्यः (L 14)

14. H3 यस्य for यद्; B1 °कालमव° for °कालाव°

15. B1 यत्र for यच्च

16. B1 om. च कनिष्ठाय च; H2–3 om. पूर्वो ... अपरजाय नमः (L 17);
B1 पूर्वः for पूर्वजाय नमः (L 17); B1 पूर्वजातः for पूर्वजः

17. B1 अपरतो for अपरो

21. B1 om. कल्पतोऽवगन्तव्यः

22. H2–3 om. सोभ्याय

तत्र भवः प्रतिसर्यः, तस्मै vप्रतिसर्याय नमः । यमयतीति यमः नियन्ता । तत्संबन्धी याम्यः, तस्मै vयाम्याय vनमः । स्थितस्य परिपालनं क्षेमः । क्षेमे भवः क्षेम्यः, तस्मै vक्षेम्याय नमः । श्लोक्यते उपश्लोक्यते स्तूयते इति श्लोकः । तत्र भवः श्लोक्यः, तस्मै vश्लोक्याय । अवसानं समाप्तिः । तत्र भवः अवसान्यः, तस्मै vअवसान्याय नमः । उर्वरा सर्वसस्या भूः । तत्र भवः उर्वर्यः, तस्मै vउर्वर्याय vनमः । खलः धान्यखलः व्रीहिकोशविमोचनस्थानम् । खले भवः खल्यस्तस्मै vखल्याय नमः ॥२॥

' नमो वन्याय ' इति । त्रिष्टुप् । अस्यापि पूर्ववदेव पुरश्चरणम् । वनमरण्यमुदकं वा । तत्र भवो वन्यः । तस्मै vवन्याय vनमः । कक्षः पार्श्वः पर्वतकक्षः नदीकक्षः । तत्र भवः कक्ष्यः, तस्मै vकक्ष्याय नमः । श्रूयत इति श्रवः शब्दः । तस्मै vश्रवाय शब्दरूपाय vनमः । प्रतिश्रवः प्रतिशब्दस्तस्मै नमः । आशुर्वेगवती सेना यस्य सः आशुषेणस्तस्मै vआशुषेणाय । आशुरथः शीघ्ररथस्तस्मै vआशुरथाय vनमः । शूरः । शत्रून् शृणाति हिनस्तीति शूरः, तस्मै vशूराय vनमः । शत्रूणामवसरं भेत्तुं शीलमस्येति अवभेदी, तस्मै vअवभेदिने नमः ॥३॥

' नमो बिल्मिने ' इति । त्रिष्टुप् । अस्य पुरश्चरणं पूर्ववत् । सच्छिद्रं शिरस्त्राणादिकं बिल्मं तदस्यास्तीति बिल्मी, तस्मै vबिल्मिने । पटे स्यूतं कार्पासादिगर्भं [देहरक्षकं] कवचम् । तद्वते vकवचिने vनमः । लोहमयं वर्म, तद्वते vवर्मिणे vनमः । हस्तिनः उपरि रक्षार्थं गृहाकारेण स्थितं वरूथम् । तद्वते vवरूथिने नमः । vश्रुताय विश्रुताय विचारिताय प्रख्याताय । vश्रुतसेनाय प्रख्यातसेनाय vनमः । दुन्दुभौ भवो दुन्दुभ्यः, तस्मै vदुन्दुभ्याय vनमः । भेर्यानकदुन्दुभिः । आहननं दुन्दुभ्याघातः । आहन्यते अनेनेति वा आहननो वादनदण्डः । तत्र भवः आहनन्यः, तस्मै च vआहनन्याय नमः ॥४॥

' नमो धृष्णवे ' इति । त्रिष्टुप् । अस्य पुरश्चरणम् । एकोपवासं कृत्वाष्टसहस्रं जपेत् । स कृतपुरश्चरणो भवति । अनेन चातुर्वर्ण्यवश्यकामो जुहुयात् । उदुम्बराश्वत्थप्लक्षाणां

---

1. B1 om. तत्संबन्धी याम्यः
2. H3 om. याम्याय; H2–3 om. क्षेम्याय
4. H3 after °सस्या adds सा; B1 H3 after भूः add उर्वरा
10. H2–3 om. आशुषेणाय
12. H2–3 om. first नमः; B1 om. शत्रूणाम् ... कवचिने नमः । (L 15)
16. B1 om. विश्रुताय
21. B1 °वेश्यपहोमो for °वश्यकामो

दधिमधुघृताक्तानाम् अयुतं जुहुयात् । विनियोगान्तरं कल्पतोऽवगन्तव्यम् । धर्षणशीलो धृष्णुस्तस्मै [v]धृष्णवे [v]नमः । सर्वं प्रमृशति परिमृशति विचारयतीति प्रमृशः पण्डितः, तस्मै [v]प्रमृशाय नमः । [v]निषङ्गिणे खड्गिने [v]नमः । इषुधिरस्यास्तीति इषुधिमान्, तस्मै [v]इषुधिमते नमः । तीक्ष्णा इषवो यस्य सः तीक्ष्णेषुः, तस्मै [v]तीक्ष्णेषवे [v]नमः । आयुधान्यस्य विद्यन्ते इत्यायुधी, तस्मै [v]आयुधिने [v]च [v]नमः । सुशोभनानि आयुधानि यस्य सः स्वायुधः, तस्मै [v]स्वायुधाय [v]च [v]नमः । [v]सुधन्वने शोभनधनुष्मते नमः ॥५॥

[इति सप्तदशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

[अथ षष्ठोऽनुवाकः ।]

सा– पञ्चमेऽनुवाके येऽन्यतरतोनमस्कारमन्त्रा उक्तास्तेभ्योऽन्ये केचित् षष्ठेऽभिधीयन्ते–

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च ।
नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ॥१॥
नमः कूप्याय चावट्याय च नम ईध्र्याय चातप्याय च ।
नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥२॥

---

1. B1 om. अयुतं; H2–3 °योगानन्तरं for °योगान्तरं
2. B1 निचाययति for विचारयति
3. H2–3 om. प्रमृशाय
4. B1 om. second नमः
6. H3 om. सुधन्वने ... नमः
9. S2 M2 नमः स्रुत्याय च ... वैशन्ताय चेति । स्रुतिः क्षुद्रः प्रवाहः । क्षुद्रमार्गो वा । तत्र भवः स्रुत्यस्तस्मै नमः । पन्थाः रथादियोग्यो मार्गः । तत्र भवः पथ्यस्तस्मै नमः । कुत्सितमटति जनो यत्रेति काटो विषममार्गः । तत्र भवः काट्यस्तस्मै नमः । काटः कुल्याप्रदेशो वा । नीचैः पतन्त्यापो यत्रेति नीपो गिर्यधोभागः । ऋक्पूरब्धूरित्यप्रत्ययः । द्व्यन्तरुपसर्गेभ्योऽप ईदिति अपूशब्दस्येकारः । तत्र भवो नीप्यस्तस्मै नमः । कुल्या कृत्रिमा सरित् । तत्र भवः कुल्यः । यद्वा– कुलेषु देहेषु वाऽन्तर्यामिरूपेण भवः कुल्यस्तस्मै नमः । कुलं देहेऽन्वये गणे । सरसि भवः सरस्यस्तस्मै नमः । नद्यां भवो नादेयस्तस्मै नदीजलरूपाय नमः । वेशन्तोऽल्पसरस्तत्र भवो वैशन्तस्तस्मै नमः ॥१॥

नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च ।
नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥३॥
नमः शंगवे च पशुपतये च नम उग्राय च भीमाय च ।
नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च ॥४॥
नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय । नमः शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥५॥(६)॥

Continued from last Page

नमः कूप्याय च ... चावर्ष्याय चेति । कूपे भवः कूप्यस्तस्मै नमः । अवटो गर्तस्तत्र भवोऽवट्यस्तस्मै नमः । इन्धी दीप्तौ । ईध्रं निर्मलं शरदभ्रम् । तत्र भव ईध्र्यः । यद्वा ईध्रो दीप्तिर्यस्मात् स ईध्रो धनागमस्तद्भवाय नमः । आतपे भव आतप्यस्तस्मै नमः । मेघे भवो मेघ्यस्तस्मै नमः । विद्युति भवो विद्युत्यस्तस्मै नमः । वर्षे वृष्ट्यां भवः वर्ष्यस्तस्मै नमः । अवर्षे वृष्टिप्रतिबन्धे भुवोऽवर्ष्यस्तस्मै नमः ॥२॥

नमो वात्याय च ... चारुणाय चेति । वाते भवो वात्यस्तस्मै नमः । रिष्यन्ति नश्यन्ति भूतान्यत्रेति रेष्मा प्रलयकालः । "अन्येभ्योऽपि दृश्यन्ते" (पा. ३.२.७५) इति मनिन् । तत्र भवो रेष्म्यस्तस्मै नमः । प्रलयेऽपि विद्यमानायेत्यर्थः । वास्तुनि गृहभुवि भवो वास्तव्यस्तस्मै नमः । वेश्मभूर्वास्तुरस्त्रियाम् (अको २·२·१९)। वास्तुं गृहभुवं पाति रक्षति वास्तुपस्तस्मै नमः । उमया सहितः सोमस्तस्मै नमः । रुत् दुःखं द्रावयति रुद्रः दुःखनाशकस्तस्मै नमः । ताम्रो रक्तवर्ण उदयद्रविरूपेण तस्मै नमः । अरुण ईषद्रक्त उदयोत्तरकालीनार्करूपेण ॥३॥

नमः शंगवे ... नमस्तारायेति । शं सुखं गमयति प्रापयति शंगुः । शं सुखरूपा गावो वाचो वेदरूपा यस्येति वा । तस्मै नमः । पशूनां प्राणिनां पतिः पालकस्तस्मै नमः । उग्र उद्गूर्णायुधः शत्रून् हन्तुं, तस्मै नमः । भीमः शत्रुभयोत्पादकः । अग्रे पुरो वर्तमानो हन्तीत्यग्रेवधस्तस्मै नमः । हन्तीति हन्ता । लोके यो हन्ति तद्रूपेण रुद्र एव हन्तीत्यर्थः। अतिशयेन हन्ता हनीयान् । तस्मै नमः । तुरिष्ठेमेयःसु (पा ६.५.१५४) इति तृचो लोपः । प्रलये सर्वहन्तेत्यर्थः । हरयो हरिताः केशाः पत्ररूपा येषां तेभ्यो वृक्षेभ्यः कल्पतरुरूपेभ्यो नमः । तारयति संसारमिति तारस्तस्मै नमः ॥४॥

नमः शंभवे ... शिवतराय चेति । शं सुखं भवतीति शंभुः । यद्वा शं सुखरूपं भवनमाविर्भवनं सुखरूपो भूस्तस्मै नमः । मयः सुखं भवत्यस्मान्मयोभूः सुखप्रदः । तस्मै नमः । शं लौकिकसुखं करोति शंकरस्तस्मै नमः । मयो मोक्षसुखं करोति मयस्करस्तस्मै नमः । स्रक्चन्दनादिरूपेण लौकिकसुखकारित्वम् । शास्त्राचार्यादिरूपेण ज्ञानप्रदत्वान्मोक्षसुखकारित्वमित्यर्थः । एताभ्यां पदाभ्यां साक्षात् सुखकारित्वं पूर्वपदाभ्यां तद्द्वारा कारयितृत्वमिति विवेकः । शिवः कल्याणरूपो निष्पापस्तस्मै नमः । शिवतरोऽत्यन्तं शिवो भक्तानपि निष्पापान् करोति । तस्मै नमः । अस्यां कण्डिकायां षड् यजूंषि । पूर्वस्यां दशोक्तेः ॥५॥

for पञ्चमेऽनुवाके (P 441 Line 9) ... करोतीत्यर्थः [P. 444 L 19]

स्रुत्याय । पथ्याय । काट्याय । नीप्याय ।
कुल्याय । सरस्याय । नादेयाय । वैशन्ताय ॥ ओं ॥१॥

कूप्याय । अवट्याय । ईध्र्याय । आतप्यायेत्याऽतप्याय ।
मेघ्याय । विद्युत्यायेति विऽद्युत्याय । वर्ष्याय । अवर्ष्याय ॥ रो ॥२॥

वात्याय । रेष्म्याय । वास्तव्याय । वास्तुपायेति वास्तुऽपाय ।
सोमाय । रुद्राय । ताम्राय । अरुणाय ॥ यो ॥३॥

शंगव इति शम्ऽगवे । पशुपतय इति पशुऽपतये । उग्राय । भीमाय ।
अग्रेवधायेत्यग्रेऽवधाय । दूरेवधायेति दूरेऽवधाय । हन्त्रे । हनीयसे ॥ वो ॥४॥

वृक्षेभ्यः । हरिकेशेभ्य इति हरिऽकेशेभ्यः । ताराय ।
शंभव इति शम्ऽभवे । मयोभव इति मयःऽभवे ।
शंकरायेति शम्ऽकराय । मयस्कराय । मयःकरायेति मयःऽकराय ।
शिवाय । शिवतरायेति शिवऽतराय ॥ घों ॥५॥(६)॥

पाठस्तु– ' नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च । नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ॥ नमः कूप्याय चावट्याय च नम ईध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥ नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च । नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥ नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च । नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च ॥ नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय । नमः शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ' इति । स्रुतिः पादसंचारमात्रयोग्यः क्षुद्रमार्गः । तमर्हतीति स्रुत्यः पदातिः । पन्था रथाश्वादिसंचारक्षमः प्रौढो मार्गः । तमर्हतीति पथ्यः सेनान्यादिः । कुत्सितमटति जलमत्रेति काटोऽल्पप्रवाहयोग्यः कुल्याप्रदेशः । तत्र जलरूपेण भवः काट्यः । यस्मिन् प्रदेशे पर्वताग्रादापो न्यग्भावेन पतन्ति स प्रदेशो नीपः । तमर्हतीति तत्र जलरूपेणावस्थितो [वा] नीप्यः । कुल्ये जलसमूहे भवः कुल्यः । सरः प्रसिद्धम् । तत्रत्यजलरूपः सरस्यः । नदीगतजलरूपो

---

21. K P1 कुत्सितानटयति for कुत्सितमटति
22. P1 K तत्रत्य° for तत्र
23. P1 after नीप्यः ins. ऋक्पूरित्यप्प्रत्ययः । द्व्यन्तरुपसर्गेभ्योऽप ईत् इत्यपूशब्दस्येकारः; P1 K after कुल्यः ins. कुल्या कृत्रिमा सरित्तत्र भवः कुल्यः । कुलेषु देहेष्वन्तर्यामिरूपेण भवः कुल्यो वा । कुलं देहेऽन्वये गणे इत्यभिधानात् ।

नादेयः। अल्पसरो वेशन्तः। तत्रत्यजलरूपो वैशन्तः। कूपस्थजलरूपः कूप्यः। अवटो गर्तस्तत्रत्यजलरूपोऽवट्यः। ईध्रं निर्मलत्वेन दीप्यमानं शरदभ्रम्। तत्र भव ईध्र्यः। आतपे भव आतप्यः। मेघेषु स्थितो मेघ्यः। विद्युता सह चरितो विद्युत्यः। वर्षजलरूपो वर्ष्यः। वर्षनिरपेक्षः समुद्रादिजलरूपोऽवर्ष्यः। वातेन सह वृष्टो वात्यः। रिष्यन्ति विनश्यन्ति भूतान्यत्रेति रेष्मा प्रलयकालः। तत्र भवः शर्करपाषाणादिसहितो वृष्टिजलविशेषो रेष्म्यः। वस्तु धनविशेषः गवाश्वादिपदार्थरूपः। तत्र तत्कार्यरूपेणावस्थितो वास्तव्यः। गृहनिर्माणभूमिर्वास्तु। तत्पालको वास्तुपः। उमया सह वर्तत इति सोमः। रुद्रः शोकसंहारकः। आदित्यरूपेणोदयकालेऽत्यन्तरक्तस्ताम्रः। उदयादूर्ध्वम् ईषद्रक्तरूपः अरुणः। शं सुखं गमयति प्रापयतीति शंगुः। पशूनां पालयिता पशुपतिः। विरोधिनो नाशयितुं क्रोधयुक्त उग्रः। दर्शनमात्रेण विरोधिनां भयहेतुर्भीमः। अग्रे पुरतो वधोऽस्येत्यग्रेवधः। एवं दूरेवधः। दूरतोऽदूरे वा वर्तमानं विरोधिनमनायासेनैव हन्तीत्यर्थः। लोकेऽपि यो यत्र विरोधिनं हन्ति तत्र तद्रूपेणायमेव हन्ता। अत एवेश्वरेणार्जुनं प्रत्युक्तम् –

"मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्" (भगी ११·३३) इति। संहारकालेऽतिशयेन सर्वेषां हन्ता हनीयान्। हरितवर्णानि केशसदृशानि पर्णानि येषां ते हरितकेशाः। तथाविधा ये वृक्षाः कल्पतरुप्रभृतयस्तद्रूपोऽयं रुद्र इत्यर्थः। तारः प्रणवप्रतिपाद्यः॥

शं सुखं भावयत्युत्पादयतीति शंभुः। मयः सुखं भावयतीति मयोभूः। एकं विषयसुखम्, अपरं मोक्षसुखमिति तयोर्विवेकः। पित्रादिरूपेण शं लौकिकसुखं करोतीति शंकरः। आचार्यशास्त्रादिरूपेण मयो मोक्षसुखं करोतीति मयस्करः। साक्षात् सुखकारित्वमेताभ्यां पदाभ्यामुक्तम्। एतत्सुखकारयितृत्वं पूर्वाभ्यां पदाभ्यामिति विवेकः। शिवः कल्याणरूपः। स्वयं निष्कल्मष इत्यर्थः। अतिशयेन शिवः शिवतरः। स्वभक्तानपि निष्कल्मषान् करोतीत्यर्थः॥१॥

[इति सप्तदशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

आ– 'नमः स्रुत्याय' इति। पङ्क्तिश्छन्दः। अस्य पुरश्चरणम्। एकोपवासं कृत्वा अष्टसहस्रं जपेत्। कृतपुरश्चरणो भवति। मेधाकामः कपिलाज्येन पञ्चसहस्रं जुहुयात्। मेधावी जायते। पुष्टिकामोऽपूपैराहुतिमात्रं नवसहस्रं जुहुयात्। पुष्टिमान् भवति। विनियोगान्तरं कल्पतोऽवगन्तव्यम्। नद्या एकदेशोदकवाहिनी स्रुतिः। तत्र भवः स्रुत्यः। तस्मै स्रुत्याय।

---

1. P1 K after नादेयः ins. नद्यां भवः। नद्यादिभ्यो ढक् इति ढस्येयादेशः, आदिवृद्धिः।
3. P1 K °रूपेण for °रूपो° ; P1 K after अवर्ष्यः add – यद्वा अवर्षो वृष्टिप्रतिबन्धस्तत्र भवोऽवर्ष्यः।
6. P1 K after वास्तव्यः add यद्वा वास्तुनि गृहभुवि भवो वास्तव्यस्तस्मै। वेश्मभूर्वास्तुरस्त्रियाम्।
8. P1 K after शंगुः add यद्वा सुखं प्रति गावः ऋग्वेदीयलक्षणा वाचो यस्य स शंगुः।
22. H3 पञ्चदश° for पञ्च°
23. B1 रूपैराहुतिमात्रै for °पूपैराहुतिमात्रं, B1 °योगः, H2–3 °योगानन्तरं (°योगान्तरं)
24. B1 °गन्तव्यः for °गन्तव्यम्

पथि मार्गे भवः पथ्यः। पथादनपेतो वा पथ्यः। तस्मै vपथ्याय vनमः। कव्याः संबन्धी काव्यः लिङ्गरूपः कूपो वा। तत्र भवः काव्यस्तस्मै vकाव्याय vनमः। नीचैः नीयन्ते यत्रापः स नीपः। तत्र भवो नीप्यः। तस्मै vनीप्याय। कुले जलसमूहे भवस्तस्मै vकुल्याय vनमः। सरः प्रसिद्धम्। सरसि भवः सरस्यस्तस्मै vसरस्याय नमः। नद्यां भवो नादेयः। तस्मै vनादेयाय vनमः। वेशन्तस्तटाकः। तत्र भवो वैशन्तस्तस्मै vवैशन्ताय नमः॥१॥

'नमः कूप्याय' इति। त्रिष्टुप्। पुरश्चरणं पूर्ववत्। आरोग्यकामः खदिराणां दधिमधुघृताक्तानां पञ्चसहस्रं जुहुयात्। विनियोगान्तरं कल्पतोऽवगन्तव्यम्। कूपे भवः कूप्यस्तस्मै vकूप्याय vनमः। अवटो गर्तः। तत्र भवः अवट्यः। तस्मै vअवट्याय नमः। इन्धी दीप्तौ। इन्धत इति इन्धनशील ईध्रः। तत्र भव ईध्रयस्तस्मै vईध्रयाय vनमः। आतपे भव आतप्यस्तस्मै vआतप्याय नमः। मेघे भवो मेघ्यस्तस्मै vमेघ्याय vनमः। विद्युति भवो विद्युत्यस्तस्मै vविद्युत्याय नमः। वर्षे भवो वर्ष्यस्तस्मै vवर्ष्याय vनमः। अवर्षे भवोऽवर्ष्यस्तस्मै vअवर्ष्याय च नमः॥२॥

'नमो वात्याय' इति। पङ्क्तिश्छन्दः। पुरश्चरणं पूर्ववत्। वाते भवो वात्यः। तस्मै vवात्याय vनमः। रिष्यतिर्हिंसार्थः। "अन्येभ्योऽपि दृश्यते" (पा ३.२.७५) इति मनिन्। रेष्मा हिंसकः। तत्र भवः रेष्म्यस्तस्मै vरेष्म्याय नमः। वास्तु गृहम्। तत्र भवो वास्तव्यः। तस्मै vवास्तव्याय vनमः। वास्तु पातीति वास्तुपस्तस्मै vवास्तुपाय नमः। उमया सहितः सोमः। तस्मै vसोमाय vनमः। चन्द्रायेति वा। vरुद्राय शोकसंहारकाय नमः। vताम्राय ताम्रवर्णाय सूर्यरूपाय नमः। vअरुणाय वर्णतोऽरुणाय नमः। उदयकाले सूर्यस्ताम्रवर्ण इति ततोऽरुणवर्णो भवतीति॥३॥

'नमः शंगवे' इति। त्रिष्टुप्। पादकृच्छ्रं चरित्वा पञ्चसहस्रं जपेत्। कृतपुरश्चरणो भवति। विनियोगः कल्पतोऽवगन्तव्यः। शं सुखं प्रति गावः ऋग्वेदादिलक्षणा वाचो यस्य सः शंगुः। शं ब्रह्मानन्दं गमयतीति वा शंगुः। तस्मै vशंगवे vनमः। पशूनां भूतानां जीवानां पतिः पशुपतिस्तस्मै vपशुपतये नमः। उद्गृह्णातीत्युग्रस्तस्मै vउग्राय vनमः। भयहेतुकत्वाद् भीमः।

2. B1 पीयन्ते for नीयन्ते
3. B1 om. सः नीपः
6. B1 खादिराणां for खदिराणां
7. H3 पञ्चदश° for पञ्च°, H2-3 °योगानन्तरं for °योगान्तरं
11. H3 om. अवर्षे ... तस्मै
20. H2-3 B1 जपान् for जपेत्।

तस्मै vभीमाय नमः । “ भीषास्माद्वातः पवते ” (तैआ ८·८·१) इत्यादिश्रुतेः । सर्वेषामग्रे स्थितो वध्यति हन्तीति अग्रेवधस्तस्मै vअग्रेवधाय vनमः । प्रतीत्या दूरे स्थितोऽपि हन्तीति दूरेवधः । रुद्ररूपेण हन्तीति हन्ता । तस्मै vहन्त्रे vनमः । सहायनिरपेक्षः सन् अतिशयेन हन्ता हनीयान् हन्तृतरः । तस्मै vहनीयसे नमः ॥४॥

‘ नमो वृक्षेभ्यो .... शिवतराय च ’ इति । अतिजगती छन्दोविशेषः । प्रथमं पञ्चाक्षरास्त्रयः पादाः । चतुर्थसप्तमाष्टमनवमाः षडक्षराः पादाः । पञ्चमः पञ्चाक्षरः, षष्ठः सप्ताक्षर इति वा । एवमेकपञ्चाशदक्षरात्मिका निवृत् विशेषेणातिजगतीति । पुरश्चरणं पूर्ववत् । विनियोगः कल्पतोऽवगन्तव्यः । पत्रपुष्पफलच्छायादिरूपेण सर्वप्राणिनामुपकारकवृक्षरूपेण स्थितेभ्यो रुद्रेभ्यो नमः । ‘ हरिकेशेभ्यः ’ । हरितवर्णानि पत्राणि येषां वृक्षाणां केशत्वेन निरूपितानि ते हरितकेशाः । तेभ्यः vहरिकेशेभ्यः vनमः । संसारात्तारयति प्रपन्नानुत्तारयतीति तारः प्रणवः । तस्मै प्रणवात्मने vताराय रुद्राय vनमः । शम् उपशमने । क्विबन्तरूपं शमिति । आरोपिता । तद्रूपोपशमेनोपलक्षितं शं सुखं भवत्यस्मादिति शंभुः । तस्मै vशंभवे vनमः । मयसा सुखेन भवतीति मयोभूः । मय इति सुखनाम । तस्मै vमयोभवे नमः । शं करोतीति शंकरः । ब्रह्मानन्दाविर्भावकरः । तस्मै vशंकराय vनमः । मयः सुखं करोतीति मयस्करः । तस्मै vमयस्कराय नमः । शिवः आरोपितप्रपञ्चोपशमेनोपलक्ष्यमाणं सच्चिदानन्दलक्षणं ब्रह्म शमित्यभिधीयते । शमेषामस्तीति शिनो जीवाः । अकाराद्यक्षराधिष्ठातारो देवाश्च शिन इत्युच्यन्ते । वा गतिगन्धनयोः । शिनः वापयति ज्ञापयतीति शिवः । शिनो वीयन्ते यत्रेति व शिवः । समस्तजगद्रूपेण समस्तजगदात्माधिदेवतारूपेण च प्रमीयमाणः श्रीभगवान् रुद्रः श्रीसदाशिवः इत्यभिधीयते । तस्मै vशिवाय vनमः । ताराय इत्यभिहितप्रणवसहितोऽयम् ओं नमः शिवायेति षडक्षरो मन्त्रः । अयं ब्रह्मविष्णुमहेश्वरपरब्रह्मात्मकस्त्रिमात्रार्धमात्रोपलक्षितो गायत्रः प्रणवः । इन्द्राघोरविष्णु-

---

1. B1 भीमस्माद्वेतो एवते for भीषा ... पवते
2. H2–3 om. अग्रेवधाय ... हन्तीति (L 3)
6. H2–3 B1 चतुर्थः for पञ्चमः
7. B1 एवम् for एक°, B1 पञ्चदशा°, H2–3 °पञ्चक्षरा° for पञ्चाशदक्षरा°
9. B1 रुद्ररूपेभ्यो for रुद्रेभ्यो, B1 om. हरि° ... °केशेभ्यो नमः [L 10]
11. B1 आरूपिता for आरोपिता
15. B1 °शमन° for °शमेन
19. H2–3 °प्रकर्षसहिताय नमः for °प्रणवसहितोऽयम् ओं नमः
20. B1 om. °पर°, B1 गायत्र° for गायत्रः

ब्रह्मस्कन्ददेवत्यः पञ्चाक्षरो मन्त्रः । पीतकृष्णधूम्रहेमलोहितवर्णो गायत्र्युष्णिक्त्रिष्टुब्बृहत्यनुष्टुब्छन्दः गौतमात्रिविश्वामित्राङ्गिरसभारद्वाजर्षिः पूर्वदक्षिणपश्चिमोत्तरोर्ध्वस्थानस्तत्पुरुषाघोरसद्योजातवामदेवेशानात्मकः सारस्वतप्रासाद्यः परब्रह्माख्यः श्रीसदाशिववाचकः श्रीवासुदेवरामादिभिरत्यादृतो वैदिकः सकलपुरुषार्थप्रदः चत्वारिंशदुत्तरद्विशतमन्त्रगणैः श्रीमदष्टाक्षरदशाक्षरादिश्रीरुद्रदेवत्यानेकमहामन्त्रगणैश्च परिवृतः श्रीपञ्चाक्षराख्योऽयं महामन्त्रः श्रीमच्छुक्लयजुषि अतितरां विराजते । शिवः शान्तः । ततोऽभ्यधिकः शिवतरः । तस्मै शिवतराय नमः । णमु प्रह्वत्वे शब्दे । अस्यासुन्नन्तस्य नम इति रूपम् । श्रीभगवदर्थं प्रह्वो जात इत्यर्थः ॥२॥

[अथ सप्तमोऽनुवाकः ।]

सा- षष्ठेऽन्यतरतोनमस्कारमन्त्रा उक्ताः । तेभ्योऽन्ये केचित् सप्तमे उच्यन्ते-

---

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च ।
नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥१॥

---

1. B1 after पीत ins. °श्वेत°; om. त्रिष्टुब्; H2-3 °ष्टुबाख्यः for °ष्टुब्छन्दः
2. H2-3 om. °दक्षिण°; H2-3 °स्थानं for °स्थानः
3. B1 °(आ) त्मकं for °(आ) त्मकः; B1 प्रत्यावृतः for अत्यादृतः
4. B1 °गतैः for °गणैः

9. S2 M2 नमः पार्याय .... फेन्याय चेति । पारे संसाराब्धेः परतीरे जीवन्मुक्तरूपेण भवः पार्यस्तस्मै नमः । अवारे अर्वाक्तीरे संसारमध्ये संसारित्वेन भवोऽवार्यस्तस्मै नमः । "पारावारे परार्वाची तेरे (तीरे ?) पात्रं यदन्तरम्" इति कोशः (M2 om. कोशः) । प्रकर्षेण मन्त्रजपादिना पापतरणहेतुः प्रतरणस्तस्मै नमः । उत्कृष्टेन तत्त्वज्ञानेन संसारोत्तरणहेतुरुत्तरणस्तस्मै नमः । तीर्थे प्रयागादौ भवस्तीर्थ्यस्तस्मै नमः । कूले तटे भवः कूल्यस्तस्मै नमः । शष्पं बालतृणं गङ्गातीरोत्पन्नं कुशाङ्कुरादि । तत्र भवः शष्प्यस्तस्मै नमः । फेने डिण्डिरे भवः फेन्यस्तस्मै नमः ॥१॥

नमः सिकत्याय ...... प्रपथ्याय चेति । सिकतासु भवः सिकत्यस्तस्मै नमः । प्रवाहे स्रोतसि भवः प्रवाह्यस्तस्मै नमः । कुत्सिताः क्षुद्राः शिलाः शर्कररूपा पाषाणा यत्र प्रदेशे स किंशिलस्तद्रूपाय नमः । क्षियन्ति वसन्त्यापो यत्र स क्षयणः स्थिरजलप्रदेशस्तस्मै नमः । कपर्दो जटास्यास्तीति कपर्दी तस्मै नमः । पुरोऽग्रे स्थानमस्यास्तीति पुरस्थी । थस्य तत्वं छान्दसम् । रस्य लत्वं च । यद्वा पूर्षु शरीरेषु [अस्ति] सत्तास्य अस्तीति पुलस्ती सर्वान्तर्यामी तस्मै नमः । इरिणमूषरं वितृणदेशस्तत्र भव इरिण्यस्तस्मै नमः । प्रकृष्टः पन्थाः प्रपथो बहुसेवितो मार्गस्तत्र भवः प्रपथ्यस्तस्मै नमः ॥२॥

(Continued from last Page)

नमो व्रज्याय ...... गह्वरेष्ठाय चेति। व्रजे गोसमूहे भवो व्रज्यस्तस्मै नमः। गोष्ठाश्वनिवहा व्रजाः। गावस्तिष्ठन्ति यत्रेति तद्गोष्ठम्। तत्र भवो गोष्ठ्यस्तस्मै नमः। तल्पं शय्या। तत्र भवस्तल्प्यस्तस्मै नमः। गेहे गृहे भवो गेह्यस्तस्मै नमः। ह्रदे भवो ह्रद्यो जलजन्तुरूपस्तस्मै नमः। निवेष्पः आवर्त्तो नीहारजलं वा। तत्र भवो निवेष्प्यस्तस्मै नमः। कुत्सितमटन्ति गच्छन्ति जना यत्र स काटो दुर्गारण्यदेशः कूपो वा। तत्र भवः काट्यस्तस्मै नमः। गह्वरे विषमे गिरिगुहादौ गम्भीरे जले वा तिष्ठतीति गह्वरेष्ठस्तस्मै नमः। गह्वरं बिलदम्भयोः ॥३॥

नमः शुष्क्याय ...... सूर्व्याय चेति। शुष्के काष्ठादौ भवः शुष्क्यस्तस्मै नमः। हरिते आर्द्रे काष्ठादौ भवो हरित्यस्तस्मै नमः। पांसुषु धूलिषु भवः पांसव्यस्तस्मै नमः। ओर्गुणः। रजसि गुणे परागे वा भवो रजस्यस्तस्मै नमः। "रजो रेणुपरागयोः। स्त्रीपुष्पे गुणभेदे च"। लुप्यते नश्यति गमनादि यत्रेति लोपोऽगम्यप्रदेशस्तत्र भवो लोप्यस्तस्मै नमः। लोपः संहारो वा। उलपा बल्वजादितृणविशेषास्तत्र भव उलप्यस्तस्मै नमः। "उलपस्तु गुल्मिनी तृणभेदयोः"। उर्व्यां भूमौ भव उर्व्यस्तस्मै नमः। दीर्घ आर्षः। ऊर्वो वडवानलो वा। शोभन ऊर्वः सूर्वः कल्पानलस्तत्र भवः सूर्व्यस्तस्मै नमः ॥४॥

नमः पर्णाय ...... वो नम इति। तरूणां पत्ररूपाय नमः। शद्लृ शादने। शादनं शदः शातनम्। यद्वा पर्णानि शीयन्ते पक्वानि पतन्ति यत्र स पर्णशदः। पतितपर्णस्थितिदेशस्तद्रूपाय नमः। गुरी उद्यमे। "तुदादिभ्यः शः" (पा ३.१.७७)। उद्गुरते उद्यमं करोति उद्गुरमाणः उद्यमी तस्मै नमः। अभिहन्ति शत्रूनिति अभिघ्नन् तस्मै नमः। आसमन्तात् खिद्यते दैन्यं करोति अभक्तानामित्याखिदन् तस्मै नमः। प्रकर्षेण खेदयति पापिन इति प्रखिदंस्तस्मै नमः। इषून् कुर्वन्ति ते इषुकृतस्तेभ्यो रुद्रेभ्यो नमः। धनूंषि चापानि कुर्वन्ति ते धनुष्कृतः। तेभ्यो वो युष्मभ्यं रुद्रेभ्यो नमः। युष्मदादेशयोगात् प्रत्यक्षा एते रुद्राः। तिस्रोऽशीतयो रुद्राणां समाप्ताः। एवं चत्वारिंशदधिकशतद्वयमन्त्रैः रुद्रस्य सर्वात्मकत्वमुक्तम्।

अथ रुद्रेषु प्रधानभूतानामग्निवायुसूर्याणां संबन्धीनि चत्वारि यजूंषि उच्यन्ते। चतुर्णामादौ नमः शब्दाच्चत्वार्येव यजूंषि। आद्यं चतुर्दशाक्षरम्। त्रीणि सप्ताक्षराणि। तानि व्याहृतिसंज्ञानि ॥

नमो वः ...... आनिर्हतेभ्य इति। देवानां हृदयेभ्यो रुद्राणां हृदयवत्प्रधानभूतेभ्योऽग्निवायुसूर्येभ्यो वो युष्मभ्यं नमः। "देवानां हृदयेभ्य इत्यग्निर्वायुरादित्य एतानि ह तानि देवानां हृदयानि" (शब्रा ९.१.१.२३) इति श्रुतेः। हृदयानीव हृदयानि। यथाङ्गानां हृदयं प्रधानमेवमेते रुद्राणां प्रधाना इत्यर्थः। कीदृशेभ्यस्तेभ्यः। किरिकेभ्यः वृष्ट्यादिद्वारा जगत्कुर्वन्ति किरिकास्तेभ्यः। "एते हीदं सर्वं कुर्वन्ति" (शब्रा ९.१.१.२३) इति श्रुतेः। विचिन्वन्ति पृथक् कुर्वन्ति धर्मिष्ठं पापिष्ठं चेति विचिन्वत्काः। तेभ्योऽग्न्यादिभ्यो नमः। विविधं क्षिण्वन्ति हिंसन्ति पापमिति विक्षिणत्कास्तेभ्योऽग्न्यादिभ्यो नमः। आसमन्तान्निर्हता निर्गता सर्गादौ लोकेभ्य इत्यानिर्हतास्तेभ्यो रुद्रावतारेभ्योऽग्निवायुसूर्येभ्यो नमः। हन्तिर्गत्यर्थः। "तेभ्यस्तप्तेभ्यस्त्रीणि ज्योतींष्यजायन्ताग्निर्योऽयं पवते सूर्यः" इति श्रुतेः ॥५॥ for षष्ठेऽन्यतरो [P 447, L 9] ... °भिधास्यते [P 451 L 4]

नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च ।
नमः कपर्दिने च पुलस्तिने च नम इरिण्याय च प्रपथ्याय च ॥२॥
नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च ।
नमो हृद्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च ॥३॥
नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च ।
नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्व्याय च ॥४॥
नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च ।
नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः ।
नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो
नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ॥५॥(७)॥

पार्याय । अवार्याय । प्रतरणायेति प्रऽतरणाय । उत्तरणायेत्युत्ऽतरणाय ।
तीर्थ्याय । कूल्याय । शष्प्याय । फेन्याय ॥ रो ॥१॥
सिकत्याय । प्रवाह्यायेति प्रऽवाह्याय । किꣳशिलाय । क्षयणाय ।
कपर्दिने । पुलस्तिने । इरिण्याय । प्रपथ्यायेति प्रऽपथ्याय ॥ रो ॥२॥
व्रज्याय । गोष्ठ्याय । गोस्थ्यायेति गोऽस्थ्याय । तल्प्याय । गेह्याय ।
हृद्याय । निवेष्प्यायेति निऽवेष्प्याय ।
काट्याय । गह्वरेष्ठाय । गह्वरेस्थायेति गह्वरेऽस्थाय ॥ सें ॥३॥
शुष्क्याय । हरित्याय । पाꣳसव्याय । रजस्याय ।
लोप्याय । उलप्याय । ऊर्व्याय । सूर्व्यायेति सुऽऊर्व्याय ॥ यो ॥४॥
पर्णाय । पर्णशदायेति पर्णऽशदाय ।
उद्गुरमाणायेत्युत्ऽगुरमाणाय । अभिघ्नत इत्यभिऽघ्नते ।
आखिदत इत्याऽखिदते । प्रखिदत इति प्रऽखिदते ।
इषुकृद्भ्य इतीषुकृत्ऽभ्यः । धनुष्कृद्भ्यः । धनुःकृद्भ्य इति धनुःकृत्ऽभ्यः । च । वः ।
किरिकेभ्यः । देवानाम् । हृदयेभ्यः । विचिन्वत्केभ्य इति विऽचिन्वत्केभ्यः ।
विक्षिणत्केभ्य इति विऽक्षिणत्केभ्यः । आनिर्हतेभ्य इत्यानिःऽहतेभ्यः ॥ ज्ञैं ॥५॥(७)॥

सा- तेषां पाठस्तु – 'नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च । नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥ नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च । नमः कपर्दिने च पुलस्तिने च नम इरिण्याय च प्रपथ्याय च ॥ नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च । नमो हृद्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च ॥ नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च । नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्व्याय च ॥ नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च । नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः । नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ' इति । पारे संसारस्योत्तरतीरे मुमुक्षुभिर्ध्येयत्वेनावस्थितः सः पार्यः । अवारे अर्वाक्तीरे संसारमध्ये काम्यफलप्रदत्वेनावस्थित इत्यवार्यः । प्रकृष्टेन मन्त्रजपादिरूपेण पापतरणहेतुः प्रतरणः । तत्त्वज्ञानेन संसारोत्तारहेतुरुत्तरणः । तीर्थे प्रयागादौ संनिहितस्तीर्थ्यः । कूले नदीतीरे प्रतिष्ठापितलिङ्गरूपेणावस्थित इति कूल्यः । शष्पं बालतृणं गङ्गातीरादावुत्पन्नं कुशाङ्कुरादि तदर्हतीति शष्प्यः । नदीमध्यगतं फेनमर्हतीति फेन्यः ॥१॥

सिकतामर्हतीति सिकत्यः । प्रवाहमर्हतीति प्रवाह्यः । यः पुरुषः श्रद्धालुः सन् स्नानादितत्परो निरन्तरं गङ्गातीरे वर्तते तद्रूप इति शष्पादिशब्दानां चतुर्णां तात्पर्यार्थः । कुत्सिताः क्षुद्राः शिला यत्र प्रदेशे तादृशः शर्करिलः प्रदेशः किंशिलः । क्षयणो निवासयोग्यो देशः । कपर्दी जटाबन्धनवान् । भक्तानां पुरतस्तिष्ठतीति पुलस्तिः । इन्नन्तत्वं थस्य तत्वं च छान्दसम् । इरिणमुषरम् । तत्र भव इरिण्यः । प्रपथो बहुभिः सेवितो मार्गः । तत्र भवः प्रपथ्यः ॥२॥ व्रजे गोव्रजे भवो व्रज्यः । गावस्तिष्ठन्त्यस्मिन्निति गोष्ठम् । तत्र भवो गोष्ठ्यः । तल्पः खट्वादिस्थानम् । तत्र शयानस्तल्प्यः । गेहे प्रासादे भवो गेह्यः । ह्रदेष्वगाधजलेषु भवो ह्रद्यः । निवेष्पं नीहारजलम् । तत्र भवो निवेष्प्यः । कुत्सितमटति कण्टकलतादिपूर्णतया दुःप्रवेशं प्राप्नोतीति दुर्गमोऽरण्यविशेषः काटः । तत्र भवः काट्यः । गह्वरे विषमे गिरिगुहादौ तिष्ठतीति गह्वरेष्ठः ॥३॥ शुष्केषु काष्ठेषु भवः शुष्क्यः । हरितमार्द्रं, तत्र भवो हरित्यः । पांसुषु परमाणुषु अवस्थितः पांसव्यः । रजसि विस्पष्टायां धूल्यामवस्थितो रजस्यः । लुप्यते तृणादिकमस्मिन्निति लोपः कठिनप्रदेशः । तत्र भवो लोप्यः । उलपा बल्वजास्तृणादयस्तत्र भव उलप्यः । ऊर्व्यां पृथिव्यां भव ऊर्व्यः । दीर्घ आर्षः । यद्वा- ऊर्वो वडवानलस्तत्र भव ऊर्व्यः । शोभन ऊर्वः सूर्वस्तत्र भवः सूर्व्यः ॥४॥

पर्णः पत्रात्मा । शुष्कानां पर्णानां संघातः पर्णशदः । उद्गुरमाण उद्यतायुधः उद्यमनशीलो वा । अभिघ्नन्प्रहरन् । आखिदन् ईषत् खेदयन् । प्रखिदन् अत्यन्तं खेदयन् । इषवो बाणास्तान् कुर्वन्तीति इषुकृतः । धनूंषि कुर्वन्तीति धनुष्कृतः । किरन्ति भक्तेभ्यो धनानीति किरिकाः उदारा रुद्रावताराः । ते च देवानां हृदयभूताः । विचिन्वन्त्यपेक्षितमर्थं संपादयन्तीति विचिन्वत्काः । विविधं क्षिण्वन्ति हिंसन्ति सर्वं पापमिति विक्षिणत्काः । आसमन्तान्निःशेषेण हतं दुरितं यैस्ते आनिर्हताः । तादृशेभ्यो रुद्रावतारेभ्यः 'वः युष्मभ्यं 'नमः इत्यर्थः ॥

---

11. K after **संनिहित:** adds **इति**

14. K **क्षुद्र**° for **क्षुद्रा:**

16. K om **थस्य तत्वं च**

शतरुद्रियहोममन्त्राः]

'नमो भवाय च' इत्यारभ्य 'नम आनिर्हतेभ्यः' इत्यन्ताः सर्वेऽन्यतरतोनमस्काराः बहवो यजुःस्वरूपा मन्त्रा अभिहिताः । तैः सर्वैः परमेश्वरस्य सार्वात्म्यं प्रतिपादयितुमेकैकेन यजुषा स्थावरं जङ्गमं चैकैकं रूपमभिहितम् । अतो बहिः प्रयोगे तु मन्त्रभेदस्तत्पुरश्चरणादिप्रकारश्च रुद्रकल्पेऽभिधास्यते ॥१–५॥

[इति सप्तदशेऽध्याये सप्तमोऽनुवाकः ॥७॥]

आ– 'नमः पार्याय' इति । पङ्क्तिश्छन्दः । अस्य पुरश्चरणम् । पादकृच्छ्रं चरित्वा ततः कृतपुरश्चरणो भवति । विनियोगः कल्पतोऽवगन्तव्यः । पारं तीरम् । पारे तीरे भवः पार्यः । तस्मै ^{v}पार्याय ^{v}नमः । अवारे अर्वाचीने तीरे भवः अवार्यः । तस्मै ^{v}अवार्याय नमः । प्रतरन्ति येन तत् प्रतरणं तरण्डकम् अलाबुप्रमुखम् । तस्मै ^{v}प्रतरणाय ^{v}नमः । उत्तरन्ति नद्यादिकं येन तदुत्तरणं नौरुच्यते । तस्मै ^{v}उत्तरणाय नमः ।

" तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्भसि पावने ।
पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोः " ॥

इति वचनात् तीर्थे गङ्गादिजले भवस्तीर्थ्यः । तस्मै ^{v}तीर्थ्याय ^{v}नमः । कूलं रोधः । नदीकूले भवः कूल्यः । तस्मै ^{v}कूल्याय नमः । प्ररूढानि तृणानि शष्पम् । तत्र भवः शष्प्यः । तस्मै ^{v}शष्प्याय ^{v}नमः । फेनमपां फेनम् । तत्र भवः फेन्यस्तस्मै ^{v}फेन्याय नमः ।।१॥

'नमः सिकत्याय' इति । जगती छन्दः । कृच्छ्रं चरित्वा पञ्चसहस्रजपात् कृतपुरश्चरणो भवति । विनियोगः कल्पतोऽवगन्तव्यः ।

" पिनाकपाणिं भूतेशमुद्यत्सूर्यायुतद्युतिम् ।
भूषितं भुजगैर्ध्यायेत् कण्ठेकालं कपर्दिनम् " ॥

इति । सिकताः शर्कराः । सिकतासु भवः सिकत्यः । तस्मै ^{v}सिकत्याय ^{v}नमः । प्रवाहेषु जलप्रवाहेषु भवः प्रवाह्यः । तस्मै ^{v}प्रवाह्याय नमः । ^{v}किंशिलाय । किमेतदुदकं हिमीभूतम्

---

10. H2–3 उत्तारयन्ति for उत्तरन्ति
14. H2–3 om. नमः
15. B1 तदुद्भवः for तत्र भवः
16. B1 °सहस्रं for °सहस्र°
17. B1 om. कल्पतोऽवगन्तव्यः
21. H3 उक्तं for उदकं

उत शिलेति यत्र मिथो विकल्पः सः किंशिलः । यद्वा— किंशब्दः कुत्सितवचनः । कुत्सिता शिला यत्र स किंशिलः प्रदेशः । तस्मै Vकिंशिलाय Vनमः । औपचारिकः प्रयोगः । क्षिति वासगत्योः । क्षियन्ति निवसन्त्यास्मिन्नापः इति क्षियणः । तस्मै Vक्षयणाय नमः । कपर्दी जटामुकुटधारी । तस्मै Vकपर्दिने । ‘ पुलस्तिने ’ । पुलः । रलयोरभेदः । पुरः । पूर्वस्यां दिशि आदित्यात्मना तिष्ठतीति पुलस्तिः । यद्वा— पुरः शुभाशुभदिदृक्षया सर्वेषां पुरोदेश एव तिष्ठतीति पुलस्तिः । पुलस्तिः छान्दसस्तिवगन्तः पुलस्तीति । तस्मै Vपुलस्तिने Vनमः । यद्वा— पुलस्तयः कुन्तलास्तद्वान् पुलस्ती । तस्मै पुलस्तिने नमः । निरुदकप्रदेश इरणम् । तत्र भवः इरिण्यः । तस्मै Vइरिण्याय Vनमः । प्र प्रकृष्टे पथि मार्गे भवः प्रपथ्यः । तस्मै Vप्रपथ्याय नमः ॥२॥

“ नमो व्रज्याय ” इति । त्रिष्टुप् । पुरश्चरणविनियोगौ पूर्ववत् । व्रजे गोव्रजे भवो व्रज्यः । तस्मै Vव्रज्याय Vनमः । गावस्तिष्ठन्त्यस्मिन्निति गोष्ठम् । तत्र भवो गोष्ठ्यः । तस्मै Vगोष्ठ्याय नमः । तल्पः मञ्चादिशयनस्थानम् । तत्र भवस्तल्प्याः । तस्मै Vतल्प्याय Vनमः । गेहं गृहम् । तत्र भवो गेह्यः । तस्मै Vगेह्याय नमः । हृदे अगाधे जले भवः हृद्यस्तस्मै Vहृद्याय Vनमः । “ विष्लृ व्याप्तौ । नितरां वेवेष्टि व्याप्नोतीति औणादिकः पप्रत्ययान्तो निवेष्प्य इति । निवेष्प्य आवर्तः । तत्र भवः । Vनिवेष्प्याय नमः । काटः कूपः । तत्र भवः काट्यः । तस्मै Vकाट्याय Vनमः । गह्वरं महदुदकम् । तत्र तिष्ठतीति गह्वरेष्ठः: । तस्मै Vगह्वरेष्ठाय नमः ॥४॥

“ नमः शुष्क्याय ” इति । त्रिष्टुप् । कृच्छ्रार्धं चरित्वा पञ्चसहस्रजपात् कृतपुरश्चरणो भवति । विनियोगः कल्पतोऽवगन्तव्यः । शुष्कं निर्गतद्रवं द्रव्यं काष्ठादि । तत्र भवः शुष्क्यः । तस्मै Vशुष्क्याय Vनमः । हरितः पलाश आर्द्रः । तत्र भवः हरित्यः । तस्मै Vहरित्याय नमः । पांसु रेणुः । तत्र भवः पांसव्यः । तस्मै Vपांसव्याय Vनमः । रजसि भवो रजस्यः । तस्मै

---

3. H3 कपर्दिने जटामण्डलधारिणे for कपर्दी जटामुकुटधारी
6. B1 H2–3 त्विगन्तता (त्विगन्तः)
7. The Saṁhitā text reads इरिण्याय but all three mss. have इरण्याय
9. B1 before भवो adds तत्र
10. H2–3 गोष्ठे for तत्र
13. औणादिकः – पानीविषिभ्यः पः
14. B1 H2–3 आवर्तनः for आवर्तः
16. H3 कृच्छ्रं for कृच्छ्रार्धं; H3 सहस्रं for °सहस्र°
17. B1 शुष्के निर्गतद्रावनि द्रव्यं काष्ठं, H2–3 शुष्के निर्गतद्रवे निवं काष्ठं for शुष्कं निर्गतद्रवं द्रव्यं काष्ठादि

vरजस्याय नमः । " लुप्लृ छेदने । लुप्यते छिद्यते इति लोपः । लोपे छिन्ने (? छेदे) भवो लोप्यः । तस्मै vलोप्याय vनमः । उलपः गुल्मः । उलपे भव उलप्यः । तस्मै vउलप्याय नमः । ऊर्वः वडवानलः । ऊर्वे भव ऊर्व्यः । तस्मै vऊर्व्याय vनमः । सु शोभनम् (? नः) ऊर्वः सूर्वः । तत्र भवः सूर्व्यः । तस्मै vसूर्व्याय नमः ॥ ४५ ॥

" नमः पर्णाय " इति । रुद्रदेवत्यं यजुः । अस्य पुरश्चरणम् । कृच्छ्रं चरित्वा । चत्वारिंशत्सहस्रं जपेत् । ततः कृतपुरश्चरणो भवति । मन्त्रशोधनार्थं गुरुसंनिधावष्टसहस्रं जपेत् । ततः कर्मयोग्यो भवति । अनेन मन्त्रेण साधनं किंचिदस्ति । मन्त्रप्रभावात् सर्वं संपद्यते । शमीसमिधां दधिमधुघृताक्तानामयुतं जुहुयात् । शिवभक्तं पुत्रं लभते । श्वेतवचार्धफलं चूर्णं कृत्वा राजतपात्रे निधाय कपिलेन सर्पिषाऽलोड्यायुतामन्त्रितं सिञ्चेत् । स्वयं कविर्भवति । उदुम्बरसमिधां दधिमधुघृताक्तानामयुतं जुहुयात् । महार्थसंपन्नो भवति । विनियोगः कल्पतोऽगन्तव्यः ॥

vनमः vपर्णाय पर्णात्मने vपर्णशदाय पर्णेषु शदः विशदः । तस्मै पर्णशदाय नमः । पतितपर्णाय वा नमः । गुरी उद्यमने । उद्यमनशीलः उद्गुरमाणः । तस्मै vउद्गुरमाणाय vनमः । vअभिघ्नते अभिहननं कुर्वते । अभिहन्यते अनेनेति अभिहननदण्डो वा । तस्मै नमः । vआखिदते । खिद दैन्ये । दैन्यभावं कुर्वते । अभक्तानां निषिद्धार्थसेविनां प्रकर्षेण दैन्यं कुर्वते vप्रखिदते vनमः । vइषुकृद्भ्यः । इषुं ये कुर्वन्ति ते इषुकृतः । तेभ्य इषुकृद्भ्यः vनमः । तथा धनूंषि ये कुर्वन्ति ते धनुष्कृतः । तेभ्यो नमः । vवः युष्मभ्यं नमः ।

एवं त्र्यशीतिरुद्रनामभिः संस्तुतो भगवान् श्रीरुद्रोऽपरोक्षो जातः इत्येतमर्थं दर्शयितुं युष्मदा वः इति निर्देशः कृतः । एवं समाप्तास्तिस्रोऽशीतयो रुद्राणाम् । अथेदानीमेषां रुद्राणां हृदयभूतानाम् अग्निवायुसूर्याणां संबन्धीनि यजूंषि उच्यन्ते । " नमो वः किंरिकेभ्यः " इति । अग्निर्वायुः सूर्यो हृदयभूताः पञ्च व्याहृतयः । vदेवानां देवनादिगुणयुक्तानां श्रीरुद्राणां vहृदयेभ्यः । श्रीभगवतो हृदि अयनम् अयः अवस्थानं येषाम् अग्निवायुसूर्याणां ते हृदयाः । तेभ्यो हृदयेभ्यो

1. B1 वित्ते for छिन्ने
2. B1 H2–3 उलपं for उलपः; B1 गुल्मम् for गुल्मः
8. B1 om. शिव° ... जुहुयात् । [L 10]
10. B1 before °संपन्नो adds सः, B1 महोपयोग्यो for महार्थ°
12. H2–3 पर्णेषा शदशः for पर्णेषु शदः
13. B1 om. पतित° ... नमः
18. B1 om. त्रि°; B1 संस्तुते, H3 संस्कृतः for संस्तुतः
19. B1 युष्मदो for युष्मदा

ᵛवः युष्मभ्यं ᵛनमः । ये यूयं किरिकाः वृष्ट्याद्युपकारद्वारेणेदं जगत् कुर्वन्ति किरन्तीति वा किरिकाः अग्निवायुसूर्याः । कमिति ब्रह्म । तदस्यास्तीति की सूर्यः । रमिति परं तेजः । तदस्यास्तीति री [अग्निः], क इति वायुः । की च री च कश्च किरिकाः सूर्याग्निवायवः । ते देवानां रुद्राणां हृदयभूताः । तेभ्यो नम इति । चिञ् चयने । विचिन्वन्ति धर्मकारणं पृथक् कुर्वन्तीति विचिन्वत्काः । तेभ्यः ᵛविचिन्वत्केभ्यः ᵛनमः । क्षिणु हिंसायाम् । विविधं क्षिण्वन्ति विहिंसन्ति विचिक्षिपन्तीति विक्षिणत्काः । तेभ्यः ᵛविक्षिणत्केभ्यः ᵛनमः । ᵛआनिर्हतेभ्यः । हन हन्तिर्गत्यर्थः । सर्गादावाभिमुख्येन निर्गम्यन्त इति सूर्याग्निवायवः आनिर्हताः । तेभ्यः आनिर्हतेभ्यो ᵛनमः ॥४७॥

[अथ अष्टमोऽनुवाकः ।]

सा– द्वितीयमारभ्य सप्तमान्तेष्वनुवाकेषु विविधानि यजूंषि उभयतोनमस्काराण्यन्यतरतोनमस्काराणि चोक्तानि । अथाष्टमेऽनुवाके सप्तदश ऋग्रूपा मन्त्रास्त्रयो यजूरूपा मन्त्राश्चोच्यन्ते ॥

द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒ नील॑लोहित ।
आ॒सां प्र॒जाना॑मे॒षां प॒शू॒नां मा भे॒र्मो रो॒ङ्मो च॑ न॒ः किं॒चनाम॑मत् ।।१।।

द्रापे॑ । अन्ध॑सः । प॒ते॒ । दरि॑द्र । नील॑लो॒हि॒ते॒ति नील॑ऽलोहित ।
आ॒साम् । प्र॒जाना॒मिति॑ प्र॒ऽजाना॑म् । ए॒षाम् । प॒शू॒नाम् । मा । मे॒ः । मो इ॒ति मो ।
रो॒क् । मो इ॒ति मो । च॒ । न॒ः । किम् । च॒न । आ॒म॒म॒त् ॥ दौं ॥१॥

---

1. B1 °कारेण for °कारद्वारेण
2. H2–3 ब्रह्मा for ब्रह्म
7. H2–3 अत्र विभक्तिव्यत्ययार्थः for हन हन्तिर्गत्यर्थः
10. S2 M2 द्रापे अन्धसस्पते ... किंचनाममदिति । हे द्रापे । द्रा कुत्सायाम् । द्रापयति कुत्सितां गतिं पापिनः प्रापयतीति द्रापिः । हे अन्धसः सोमस्य पते पालक । अन्धसस्पत इति सोमस्य पत इत्येतत् इति श्रुतेः । हे दरिद्र निःपरिग्रह । अद्वितीयत्वादिति भावः । हे नीललोहित कण्ठे नीलोऽन्यत्र लोहितः । हे शिव नोऽस्माकम् आसां प्रजानां पुत्रादीनामेषां पशूनां गवादीनां त्वं मा भेः भयं मा कुरु । " बहुलं छन्दसि " (पा. २.४.७३) इति शपो लुक् । मो रोक् । रुजो भङ्गे । प्रजानां पशूनां भङ्गम् । मो इति मा कार्षीः । कर्मणि षष्ठ्यौ च । पुनर्नोऽस्माकं किंचन किमपि द्विपदचतुष्पदादिकं मो मा आममत् । रुग्णं मो मा कार्षीत् । यद्वा रुग्णं मो मास्तु । अम् रोगे लङि धातोरमागम आर्षः ॥१॥ for दितीयमारभ्य ... मा कुर्वित्यर्थः (P 455 L 7)

शतरुद्रियहोममन्त्राः]

तत्र प्रथममन्त्र पाठस्तु – " द्रापे अन्धसस्पते दरिद्र नीललोहित आसां प्रजानामेषां पशूनां मा भेर्मो रोङ्मो च नः किंचनाममत् " इति । द्रापयति कुत्सितां गतिं प्रापयतीति द्रापिः । पापिनो नरकप्रदानेन पातयतीत्यर्थः । अन्धोऽन्नं तस्य पतिर्भक्तानामन्नपालकः । दरिद्रः पापैः । निष्परिग्रह इति वा । कण्ठे नीलोऽन्यत्र लोहित इति नीललोहितः । ईदृश हे रुद्र । एवं संबोध्य स्वाभीष्टं प्रार्थयते । ^{v}आसाम् अस्मदीयानां पुत्रादीनां ^{v}प्रजानाम् ^{v}एषाम् अस्मदीयानां गोमहिष्यादीनां ^{v}पशूनां च समूहं ^{v}मा ^{v}भेः मा भीषय । किं च । ^{v}मो ^{v}रोक् मैव भङ्गं कार्षीः । ^{v}नः । रुजो भङ्गे। अस्मदीयानामासामेषां ^{v}च मैव ^{v}अममत् रोगो मा भूयात् । अम रोगे । अस्मदीयानामपत्यादिकं रोगसंयुक्तं मा कुर्वित्यर्थः ॥१॥

आ– ' द्रापे अन्धसस्पते ' इति । उपरिष्टाद्बृहती छन्दः । अस्य पुरश्चरणम् । एकाहमुपवासं कृत्वा अयुतं जपेत् । कृतपुरश्चरणो भवति । कपिलाज्येनार्द्रायामयुतमाज्याहुतीर्जुहुयात् । कृतधनो भवति । ततो ज्वरे समुत्पतिते तस्य शिरस्तो दूर्वाणां पञ्चसहस्रं जुहुयात् । स तु ज्वरान्मुक्तो दीर्घायुर्भवति । अभिचारमोक्षकामो वैकङ्कतसमिधामयुताहुतीर्जुहुयात् । तस्याभिचारेभ्यो भयं न विद्यते । महाजनद्रोहे तु माषमाज्यसिक्तं जुहुयात् । ततो भयं न भवति । उदुम्बरतिलानामयुतं जुहुयात् । भूतेभ्यो भयं न भवति । विनियोगान्तरं कल्पतोऽवगन्तव्यम् ॥

द्रा कुत्सायां गतौ । द्रापयतीति द्रापिः अयथोक्तकारिणं कुत्सितां गतिं नयतीति तत्संबोधनं हे ^{v}द्रापे । ^{v}अन्धसस्पते । अन्ध इत्यन्ननाम । अन्नस्य पते । हे ^{v}दरिद्र अद्वितीयत्वेन अपरिग्रह । हे ^{v}नीललोहित मिश्रवर्ण । एवं संबोध्य श्रीरुद्रमभयं याचते । ^{v}आसां ^{v}प्रजानाम्

1. P1 K after तु add रुद्रदेवत्या आस्तारपङ्क्तिः; with correction in the margin बृहती
2. P1 K with marking above द्रापिः ins. in the margin द्रा कुत्सायां गतौ
8. The mss. B1 H2–3 read आस्तारपाङ्क्तिः छन्दः । यस्या[आ] द्यावष्टाक्षरौ तृतीयचतुर्थौ द्वादशाक्षरौ चेत् सास्तारपङ्क्तिः । But this definition does not apply to the present verse of which the first two *pādas* consist of 7 and 8 syllables and the second two *pādas* of 12 and 10 syllables. Therefore, it is only a variety of *Bṛhatī* metre. We have therefore corrected this as उपरिष्टाद्बृहती, that it is, assuming that the above lines were interpolations, unwillingly inserted by the scribes.
9. H3 अयुताहुतिं for अयुतमाज्याहुतीः [L 10]
10. B1 कृत° for कृत°; H2 om. कृतः … आहुतीर्जुहुयात् [L 12]; B1 संनिपाते for समुत्पतिते
11. B1 after मुक्तो adds भवति
13. H2–3 °योगः for °योगान्तरं
14. H2–3 °गन्तव्यः for °गन्तव्यम्

अस्मदीयानां प्रजानां स्त्रीपुत्रादीनाम् [v]एषां [v]पशूनां गोऽश्वमहिष्यादीनां [v]मा [v]भेः । भी भये । त्वं भयं मा कार्षीः । [v]मो [v]रोक् । रुजो भङ्गे । त्वं मा रुजः । आसामेषां च भङ्गं मा कार्षीः । [v]मो [v]च [v]नः । अस्माकं च [v]किंचन अपत्यादिकं प्रति । अम रोगे । [v]मा [v]आममत् । रोगो मा भूत् । अस्माकमपत्यादिकं रोगसंयुक्तं मा कुर्वित्यर्थः ॥४७॥

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥२॥

इमाः । रुद्राय । तवसे । कपर्दिने । क्षयद्वीरायेति क्षयत्ऽवीराय । प्र । भरामहे । मतीः ।
यथा । शम् । असत् । द्विपद इति द्विऽपदे । चतुष्पदे । चतुःपद इति चतुःपदे ।
विश्वम् । पुष्टम् । ग्रामे । अस्मिन् । अनातुरम् ॥ द्यौं ॥२॥

सा– अथ द्वितीयः – " इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः । यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् " इति । [v]यथा येन प्रकारेण अस्मदीयाय [v]द्विपदे पुत्रपौत्रादिरूपाय मनुष्याय । [v]चतुष्पदे गोमहिष्यादिरूपाय पशवे च [v]शम् [v]असत् सुखं स्यात् । किंच । [v]अस्मिन् [v]ग्रामे [v]विश्वं सर्वं प्राणिजातं [v]पुष्टं सुखपूर्णम् [v]अनातुरम् उपद्रवरहितं स्यात् । [v]तवसे बलयुक्ताय । अस्मदपेक्षितं कर्तुं समर्थायेत्यर्थः । [v]कपर्दिने जटाबन्धयुक्ताय । तापसवेषायेत्यर्थः । [v]क्षयद्वीराय क्षीयमाणप्रतिपक्षपुरुषाय । पापविनाशहेतव इत्यर्थः । ईदृशाय [v]रुद्राय भगवते । तथा [v]मतीः वाचः । याभिः रुद्रस्तूयते ताः [v]प्रभरामहे [v]प्रेरयामः समर्पयामः ॥२॥

---

3. H2–3 om. किंचन; H2–3 न for प्रति

10. P1 after द्वितीयः adds रुद्रदेवत्या जगती;

M2 S2 इमा रुद्राय ... अनातुरमिति । वयं इमाः अस्मदीयाः मतीः बुद्धीः रुद्राय शंकराय प्रभरामहे प्रहरामहे समर्पयामो रुद्रं स्मराम इत्यर्थः । हृग्रहोर्भः । कीदृशाय । तवसे महते बलवते वा । उभयत्र तव-शब्दः पठितः । कपर्दिने जटिलाय । क्षयद्वीराय क्षयन्तो निवसन्तो वीराः शूरा यत्र सः क्षयद्वीरस्तस्मै । शूरयुतायेत्यर्थः । क्षयन्तो नश्यन्तो वीरा रिपवो यस्मादिति वा । द्विपदे पुत्रादये चतुष्पदे गवादिपशवे । सप्तमी वा । द्विपदचतुष्पदविषये । यथा येन प्रकारेण शं सुखम् असत् भवति । अस्मिन् ग्रामे अस्मिन्निवासस्थाने विश्वं सर्वं प्राणिजातं पुष्टं समृद्धम् अनातुरं निरुपद्रवं स्वस्थं च यथा असत् स्यात् तथा मतिं हर समर्पयाम इत्यर्थः ॥२॥ for इमा रुद्राय ... ... समर्पयामः [L 16]

15. P1 K after मतीः ins. मन्यतेऽर्च्यते रुद्रो याभिरिति मत्यः

शतरुद्रियहोममन्त्राः]

आ– 'इमा रुद्राय' इति । श्रीरुद्रदेवत्या जगती । अस्य पुरश्चरणम् । कृच्छ्रं चरित्वा नवसहस्रं जपेत् । कृतपुरश्चरणो भवति । अमावास्यायां चतुष्पथेऽग्निमुपसमाधाय दधिसारमयुताहुतिमात्रं जुहुयात् । गवादीनां शान्तिर्भवति । विनियोगः कल्पतोऽवगन्तव्यः ॥

इमाः मतीः नः स्यादित्यादि मन्त्रलक्षणाः स्तुतिलक्षणाः मतीः रुद्राय प्रभरामहे इति । कथंभूताय रुद्रायेति । तव इति बलनाम । तवसे महते बलवते च । कपर्दिने जटाजूटधारिणे । क्षि निवासगत्योः । क्षयन्ति निवसन्तीति वीरा वीरभद्रादयो यस्मिन् सः क्षयद्वीरः । तस्मै क्षयद्वीराय श्रीरुद्राय । रुद्रपूजार्थम् इमाः मतीः प्रभरामहे प्रोच्चारयामः प्रेरयाम इति वा । यथा येन प्रकारेण शं सुखं द्विपदे मनुष्याय मनुष्यादिभ्यः । चतुष्पदे पश्वादिभ्यः । जात्यभिप्रायेण एकवचनम् । एतेभ्यः शम् असत् । आशंसायां भूतवच्चेति । स्यात् भूयात् । किंच– नैतावता अलम् । अस्मिन् ग्रामे द्विपदचतुष्पदसमूहे । यत्राहं वसामि तस्मिंस्तस्मिंश्च ग्रामे विश्वं द्विपदचतुष्पदादिकं पुष्टं सर्वभोगसाधनैः परिपुष्टम् असत् भूयात् । नैतावताप्यलम् । अपि तु विश्वम् अनातुरं त्वत्प्रसादाद् व्याधिरहितं च स्यात् ॥४८॥

या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ।
शिव ऋतस्य भेषजी तया नो मृळ जीवसे ॥३॥

या । ते । रुद्र । शिवा । तनूः । शिवा । विश्वाहा । भेषजी ।
शिवा । ऋतस्य । भेषजी । तया । नः । मृळ । जीवसे ॥ छं ॥३॥

---

1. H2–3 om. पूर्ववत् इमा for कृच्छ्रं ... अमावास्यायां (L 2)
2. H2–3 om. अग्निमुपसमाधाय
4. B1 om. इमाः ... °महे इति [L 5]
5. B1 महोन्मलीयः; H2–3 महाबलाय for महते
7. H2–3 °पूजाद्यर्थं for पूजार्थं
10. H2–3 after °समूहे add यद्वा
11. B1 om. च
12. B1 om. अपि
13. S2 M2 या ते रुद्र ... जीवसे इति । हे रुद्र या ते तवेदृशी तनूः-शरीरम् । तया तन्वा नोऽस्मान् जीवसे जीवितुं मृळ सुखय । कीदृशी ? शिवा शान्ता अघोरा । विश्वाहा । विश्वानि च तान्यहानि च विश्वाहा । कालाध्वनोरत्यन्तसंयोग इति द्वितीया । तस्या आकारः । सर्वेष्वहःसु सर्वदा शिवा कल्याणकारिणी । भेषजी औषधरूपा संसारस्याधिनिवर्तिका । ऋतस्य यज्ञस्य शिवा समीचीना भेषजी निवर्तिकौषधी ॥३॥
for या ते रुद्र ... शिवा [P 458 L 6]

सा– अथ तृतीयः – " या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी । शिव ऋतस्य भेषजी तया नो मृळ जीवसे " इति । हे ˚रुद्र, ˚ते त्वदीया ˚शिवा शान्ता ˚तनूः ˚या विद्यते ˚तया तन्वा ˚नः अस्मान् ˚जीवसे जीवयितुं ˚मृळ मृडय । कथं तया सुखमसि शिव त्वमिति तदुच्यते । यस्मादेवं ˚विश्वाहा ˚भेषजी सर्वेष्वहःसु रोगदारिद्र्यादेरौषधवर्गरूपा, तस्मात् ˚शिवा । किंच । यस्मात् ˚ऋतस्य सत्यभूतस्य रुद्रस्य तादात्म्यप्राप्तये ˚भेषजी औषधरूप [ा] ज्ञानप्रदानेन जन्ममरणादिकं दुःखं निवारयति, तस्मादप्येषा ˚शिवा ॥३॥

आ– ' या ते रुद्र ' इति । रुद्रदेवत्यानुष्टुप् । अस्य पुरश्चरणम् । अष्टशतप्राणायामं कृत्वा पञ्चसहस्रं जपेत् । कृतपुरश्चरणो भवति । अनेन केवलं गर्भरक्षाविधानम् । व्यक्ते गर्भे तृतीये मासि रक्षां कुर्यात् । रुद्रमन्त्रप्रसिद्धेन ब्राह्मणेन तमभि प्रार्थ्यैव स्वविभवानुसारमलंकृत्य शम्भुमिव तेन रक्षां कुर्यात् । मातुर्गर्भस्य व्याधयोऽनपेक्षितव्याः । यदा रुचिर्भवति तदा कर्तव्यम् । राज्ञो गृहान्तराले अर्वाग्गामिकलशद्वयं संस्कृत्य वस्त्राद्यलंकारैरलंकृत्य मन्त्रद्वयेन प्रस्थशुद्धतण्डुलान् विकीर्य तस्मिन्नग्निकुण्डे वेदिकां कृत्वा वेदिकायां साधारणघटस्योपरि महासेनमन्त्रेण सुवर्णपुष्पेण शंभुमावाह्य तस्मिन्नर्वाग्गामिद्वयकलशे बिन्दुसहितान् तन्तुवेष्टितान् अन्यान् समुद्रगामिनीनदीजलैः पूर्णान् नवघटान् नवपटाच्छन्नान् निधाय तन्मध्ये जलपूर्णघटमपि पूर्वमेव तस्मिन्नार्द्रादिवसगणेन सुपर्णेन अन्यं नवरत्नपूर्णं नीरगर्भं राजघटं प्रक्षिप्य महार्घवसनैः प्रच्छाद्य सुस्थिरान् कृत्वा देवस्याराधनम् । गन्धलेपनं श्रीखण्डतः तामरसपुष्पं, धूपः शीतारिः, दीपः सर्पिषा सर्वत्र कर्पूरादिमिश्रं(? श्रः) संनिधावुपस्थानं मन्त्रं जपित्वा होमं कुर्यात् । होमद्रव्यं तिलदूर्वाग्रराजतुलसीश्रीशारदान् दधिमधुघृताक्तान् हुत्वा बहिः पूजा पूर्ववत् ।

1. P1 after तृतीयः adds रुद्रदेवत्यानुष्टुप्
5. P1 सत्यस्य भूतस्य for सत्यभूतस्य; P1 ˚प्रदा । तेन for ˚प्रदानेन
7. H2–3 om. अस्य
8. B1 before कृत˚ adds ततः; H2–3 om. गर्भ˚
10. H2–3 om. रक्षां
11. H2 गृहं तु मङ्गले for गृहान्तराले; B1 सर्वागामि, H2 अर्वागादि; for अर्वाग्गामि B1 ध्वजाद्य˚ for वस्त्राद्य˚
12. H3 ˚तण्डुलैः for ˚तण्डुलान्, H3 साधारणं for साधारण˚;
13. B1 महासने for महासेन˚ B1 अर्वागामि; H3 अर्वागामि˚ for अर्वाग्गामि˚
14. B1 ˚जल˚ for जलैः, B1 ˚पल्लव˚ for ˚पट˚
15. H2–3 सुवर्णेन for सुपर्णेन; H2–3 अन्यान् ... ˚पूर्णान् for अन्यं ... ˚पूर्ण
16. H2–3 ˚लेपः श्रीखण्डः for ˚लेपनं श्रीखण्डतः, H2–3 धूपैः for धूपः; H2–3 om. शीतारिः
17. H2–3 ˚स्थान˚ for ˚स्थानं
18. B1 अर्वाक्प्रस्थ˚ for पूर्ववत्

शतरुद्रियहोममन्त्राः]

प्रस्थशुद्धतण्डुलपक्वं हविः । तेनैवाग्नौ होमं कुर्यात् । तेन मन्त्रेण होतव्यम् । ततः कलशजलमभिमन्त्र्य यजमानमभिषिञ्चेत् अनेनैव मन्त्रेण । एवं कृते राजा सर्वदोषैर्विमुच्यते । गर्भरक्षायामप्येवं विधिः । एवमेव जन्मनक्षत्रेऽभिषेकः कार्यः । विनियोगान्तरम् कल्पतोऽवगन्तव्यम् ॥

रुः दुःखम् । तद्धेतुर्वा । तद् द्रावयतीति रुद्रः । तत्संबोधनं हे ^{v}रुद्र । ^{v}ते तव ^{v}या ^{v}शिवा स्वभावतः शान्ता ^{v}तनूः शरीरम् । ^{v}विश्वाहा, दीर्घव्यत्ययच्छान्दसः । विश्वानि व्याध्यादिदुःखानि हन्तीति विश्वाहा । सर्वदुःखहन्त्री । ^{v}भेषजी संसारव्याधेर्भेषजरूपिणी । औषधात्मत्वेऽपि ^{v}शिवा शान्ता क्रूरत्वादिदोषरहिता । साधनात्मना च शिवा । शिवा फलात्मनापि अत्यन्तशिवा । किं च ^{v}ऋतस्य ब्रह्मप्राप्तिलक्षणस्य फलस्य ^{v}शिवा भूतद्रोहादिराहिततयात्यन्तसाधनभूता ^{v}भेषजी भेषजात्मिका । औषधं श्रीभगवान् रुद्रमूर्तिरेव स्वपादपङ्कजसेविनां जीवानां संसारकारणाविद्यादिदोषनिवर्तिकेत्यर्थः । एवंविधा या तव तनूः ^{v}तया तन्वा श्रीमूर्त्या ^{v}नः अस्मान् ^{v}मृळ मृड । सुखेनैव मृडय सुखय । ^{v}जीवसे श्रीभगवदर्थत्वेन जीवनाय मृळेति संबन्धः ॥४९॥

परि॑ णो हे॒ती रु॒द्रस्य॑ वृज्या॒त् परि॑ त्वे॒षस्य॑ दुर्म॒तिर्म॒ही गा॑त् ।
अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृळ ॥४॥

परि॑ । नः॒ । हे॒तिः । रु॒द्रस्य॑ । वृ॒ज्या॒त् ।
परि॑ । त्वे॒षस्य॑ । दु॒र्म॒तिरिति॑ दुः॒ऽम॒तिः । म॒ही । गा॒त् ।
अव॑ । स्थि॒रा । म॒घव॑द्भ्य॒ इति॑ म॒घव॑त्ऽभ्यः । त॒नु॒ष्व॒ ।
मीढ्वः॑ । तो॒काय॑ । तन॑याय । मृ॒ळ ॥ त्रीं ॥४॥

सा– अथ चतुर्थः – '' परि णो हेती रुद्रस्य वृज्यात् परि त्वेषस्य दुर्मतिर्मही गात् । अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ' इति । हन्यते अनेनेति हेतिरायुधम् । ^{v}रुद्रस्य ^{v}हेतिः ^{v}नः

---

2. H2–3 om. एव

3. H2–3 °योगानन्तरं for °योगान्तरं

8. H2–3 फलानाम् for फलात्मना; B1 om. अपि; B1 ततः for अत्यन्त°, B1 ब्रह्मणः प्राप्तिफलस्य for ब्रह्मप्राप्तिलक्षणस्य फलस्य, B1 रहिता । तया for °रहिततया

13. S2 M2 परि णो ... मृळेति । रुद्रस्य शिवस्य हेतिरायुधं नोऽस्मान् परि वृणक्तु परितो वर्जयतु । अस्मान् मा हन्त्वित्यर्थः । त्वेषस्य क्रुद्धस्य दुर्मतिर्दुष्टा मतिः द्रोहबुद्धिश्च

अस्मान् परि वृज्यात् परि वृणक्तु परितो वर्जितान् करोतु, कदाचिदपि मा विध्यत्वित्यर्थः । किं च त्वेषस्य क्रोधोज्ज्वलितस्य रुद्रस्य या दुर्मतिः उग्रबुद्धिः मही महती साऽपि परि गात् परिगच्छतु । सर्वतोऽस्मान् परिहृत्यैव गच्छतु । मघवद्भ्यः हविर्लक्षणान्नयुक्तेभ्यो यजमानेभ्योऽर्थाय स्थिरा स्थिराणि दृढानि धनूंषि अव तनुष्व तद्रक्षार्थं विस्तारय, सज्जानि कुरुष्वेत्यर्थः । हे मीढ्वः कामाभिवर्षक, तोकाय अस्मत्पुत्राय तनयाय तदीयपुत्राय च मृळ मृडय सुखं देहि ॥४॥

आ– 'परि णो हेतिः' इति । त्रिष्टुप् । अस्य पुरश्चरणम् । कृच्छ्रं चरित्वा नव दिनानि प्रतिदिनमष्टसहस्रं जपेत् । कृतपुरश्चरणो भवति । पुत्रकामः पलाशाश्वत्थखदिराणां दधिमधुघृताक्तानां पश्चिमद्वारालये अयुतं जुहुयात् । शिवं पुत्रं लभते । पुत्रकामानामिदमुच्यते । देवालये अश्वत्थच्छायायाम् आत्मगृहगोष्ठयोर्वा आर्द्रायाममावास्यायां वा कृष्णाष्टम्यां वा प्रारम्भः । पूर्वेद्युश्चरुभोजिनौ दम्पती भवतः । प्रतिमन्त्राक्षरं कलशान् जलतण्डुलपूर्णान् वेष्टितान् प्रतिष्ठाप्य तेषां मध्ये उच्चैस्तरां निधाय तत्र देवं सोममाह्वयेत् । 'आयातु भगवान् कैलासनिलय' इत्यावाह्य गन्धादिभिरभ्यर्च्य ततः पूर्वकलशमारभ्य प्रतिकलशं मन्त्रादित एकमेकमक्षरं न्यसेत् । ततो नवसहस्रं जपेत् । ततः श्यामाकयवलाजानां मधुघृताक्तानामष्टसहस्रं जुहुयात् । आज्येन च अष्टसहस्रं हुत्वा तत आदिकलशमादाय तत्तदक्षररूपिणं श्रीभगवन्तं स्मरन् स्थापयेत् । एकासनमेतौ प्रतिष्ठाप्य कुम्भजलेन स्नापयित्वा ब्राह्मणानामष्टसहस्रमष्टशतं वा एकादशान्तं वा

Continued from last page

अस्मान् परिवृणक्तु । मही गात् । मेहति सिञ्चतीति मीढ्वान् । हे मीढ्वः कामाभिवर्षुक । स्थिरा स्थिराणि दृढानि धनूँषि त्वम् अव तनुष्व अवतारय ज्यारहितानि कुरु । किमर्थम् ? मघवद्भ्यः । मघमिति धननाम । मघं हविर्लक्षणं धनं विद्यते येषां ते मघवन्तो यजमानास्तदर्थम् । यजमानानां भयनिवृत्तय इत्यर्थः । किं च तोकाय पुत्राय तनयाय पौत्राय मृळ पुत्रं पौत्रं च सुखय । कर्मणि चतुर्थ्यौ ॥४॥ for अथ चतुर्थः ... सुखं देहि [L 5]

3. P1 K after मघवद्भ्य ins. मघमिति धननाम
6. H2–3 om. अस्य, H2–3 om. कृच्छ्रं चरित्वा
8. B1 om. अयुतं जुहुयात्
10. H2–3 om. °तण्डुल°; H2–3 om. वेष्टितान्
11. H2-3 श्रीमन्तं for देवं
12. B1 पूर्वं मध्यम° for पूर्व°; H2–3 मन्त्रेण for मन्त्रादितः H2–3 before एकम् add हि
13. H2–3 om. जपेत् । ततः; H2–3 om. अष्ट°; B1 om. च
14. H3 om. अष्टसहस्रं हुत्वा; B1 स्नापयेत् for स्थापयेत्
15. H2–3 om. एकादशान्तं वा

भोजयेत् । ततः कलशादिकमाचार्याय दत्त्वा तं भोजयित्वा पञ्चनिष्कान् निष्कत्रयं वा दक्षिणां दद्यात् । ततो ब्राह्मणानुमतौ दम्पती भुञ्जीयाताम् । एवं तयोः पुत्रो दीर्घायुरुत्पद्यते । विनियोगान्तरं कल्पतोऽवगन्तव्यम् ॥

रुद्रस्य हेतिः आयुधं नः अस्मान् परिवृण्यात् परिवृणक्तु पुत्रकामिनः परिवर्जयतु । अस्मान् परिरक्षत्विति [अर्थः]। हेतिः छेदादिलक्षणं स्वकार्यमन्यत्र करोतु । अस्मासु मा करोत्वित्यर्थः । त्विष दीप्तौ । त्वेषस्य दीप्तस्य क्रुद्धस्य रुद्रस्य या मही महती दुर्मतिः पापिनां दुःखकारिणी निग्रहकारिणी [च] बुद्धिः, सा अपि परि गात् परिगच्छतु सर्वतोऽस्मान् परिहृत्यैव गच्छतु ॥

'अवस्थिरा मघवद्भ्यस्तनुष्व' । मघो धनं तद्वन्तो मघवन्तस्तेभ्यो धनसंपत्त्या यजनादिकारिभ्योऽर्थाय स्थिरा स्थिराणि दृढानि धनूंषि अवतनुष्व तद्रक्षार्थं विस्तारय । धनूंषि अविज्यानि कुरुष्व । अथवा मघवद्भ्यः धनं लब्ध्वाऽप्ययागशीलेभ्यः प्रतिषिद्धसेविभ्यः धनूंषि अवतनुष्व अवतारय शिथिलीकुरु । किं च यतस्त्वं मीढ्वः सेक्तृतमः अतिशयेन सेचनकर्ता अतस्त्वं तोकाय अस्माकं पुत्रार्थं मृळ सुखय । तनयाय पु(?पौ)त्रार्थं मृळ । पुत्रपौत्रादयः पूर्वं सिद्धाश्चेत् । द्वितीयार्थे चतुर्थी । तोकं मृड सुखय । तनयं मृडेति संबन्धः ॥५०॥

मीळ्हुंष्टम् शिवंतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर
पिनाकं बिभ्रदा गहि ॥५॥

मीळ्हुंष्टम । मीळ्हुस्तमेति मीळ्हुःऽतम । शिवंतमेति शिवंऽतम ।
शिवः । नः । सुमना इति सुऽमनाः । भव ।
परमे । वृक्षे । आयुधम् । निधायेति निऽधाय । कृत्तिम् । वसानः । आ । चर ।
पिनाकम् । बिभ्रत् । आ । गहि ॥ नौ ॥५॥

---

1. H2-3 om. दक्षिणां
2. B1 °गतौ for °मतौ, H2-3 उपपद्यते for उत्पद्यते
4. B1 अस्माकं for अस्मान्; B1 °रक्षयतु for °वर्जयतु
8. H2-3 om. एव
10. H2-3 om. तद्रक्षार्थं ... धनूंषि (L 12)

सा– अथ पञ्चमः – ' मीळ्हुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं बिभ्रदा गहि ' इति । हे मीळ्हुष्टम अतिशयेन सेवककामाभिवर्षक हे शिवतम अतिशयेन शान्तस्वरूप, नः अस्मान् प्रति शिवः शान्तस्वरूपः सुमनाः सौमनस्येन युक्तश्च भव । आयुधं त्रिशूलादिकं परमे अत्युच्चे वृक्षे वटाश्वत्थादिरूपे निधाय यथाऽस्माभिर्न दृश्यते तथाऽवस्थाप्य कृत्तिं वसानः व्याघ्रचर्ममात्रं परिदधानः आ चर अस्मदाभिमुख्येनागच्छ । आगच्छन्नपि पिनाकं बिभ्रत् भूषणार्थं धनुर्मात्रं हस्ते धारयन् ज्याबाणादिकं परित्यज्य आ गहि आगच्छ ॥५॥

आ– गजचर्मपरीधानं स्फुरत्प्रहरणोज्ज्वलम् ।
सर्वपापहरं ध्यायेद्देवं कुञ्जरघातिनम् ॥१॥
अर्धसोमजटापूर्णं गङ्गाधरमथाम्बकम् ।
अक्षमालाधरं देवं सर्वाभीष्टफलप्रदम् ॥२॥

' मीळ्हुष्टम ' इति । रुद्रदेवत्याऽनुष्टुप् । अस्य पुरश्चरणम् । एकरात्रमुपोष्य पञ्चसहस्रं जपेत् । ततः कृतपुरश्चरणो भवति । अर्थनाशभये चोरादिभये च पञ्चदशसहस्राहुतीर्जुहुयात् । तेभ्यो विमुच्यते ।

मङ्गलायतनं देवं युवानमतिशोभनम् ।
ध्यायेद्वनचराकारमागच्छन्तं पिनाकिनम् ॥

हे मीळ्हुष्टम सेक्तृतम हे शिवतम, यतस्त्वं शिवः मङ्गलात्मकोऽसि, ततः नः अस्माकं सुमनाः शोभनमनस्को भव । किंच परमे दूरस्थे वृक्षे कर्णिकारादिवृक्षे आयुधं त्रिशूलादिकं

---

1. P1 after पञ्चमः adds त्रिष्टुप्,
S2 M2 मीळ्हुष्टम ... आ गहीति । अतिशयेन मीढ्वान् मीळ्हुष्टमः । अत्यन्तं शिवः शिवतमः । हे मीळ्हुष्टम अतिशयेन कामसेक्तः हे शिवतम, अत्यन्तं कल्याणकर्तः नोऽस्मान् प्रति शिवः शान्तः सुमनाः हृष्टचित्तश्च भव । किं च परमे दूरस्थे उन्नते वा वृक्षे वटादौ आयुधं त्रिशूलादिकं निधाय संस्थाप्य कृत्तिं चर्म वसानः परिदधानः सन् आ चर आगच्छ । तपश्चरेति वा । आगच्छन्नपि पिनाकं धनुर्बिभ्रत् धारयन् सन् आ गहि आगच्छ । ज्याशरहीनं धनुर्मात्रं शोभार्थं धारयन्नागच्छेत्यर्थः ॥५॥ for अथ पञ्चमः ... आगच्छ (L 6)
7. H2–3 °चर्मावृततनुं for °परीधानं
9. B1 om. अर्ध° ... प्रदम् (L 10)
11. H2–3 जपित्वा for जपेत्
12. B1 चौर for °चोर°; H2–3 °सहस्रं for °सहस्राहुतीः
14. H2–3 °सुन्दरम् for °शोभनम्
16. H2–3 अतः for ततः

शतरुद्रियहोममन्त्राः]

^{v}निधाय [सं] स्थाप्य ^{v}कृत्तिं व्याघ्रचर्म ^{v}वसानः परिदधानः ^{v}पिनाकं धनुः ^{v}बिभ्रत् अस्मद्रक्षार्थं कोदण्डं धारयन् ^{v}आ ^{v}चर अस्मदभिमुखमाचर । पादन्यासविलासमाचरन् अस्मदभिमुखम् ^{v}आ ^{v}गहि आगच्छ । आदरार्थोऽयमर्थः पुनरुक्तः ॥५१॥

विकिरिद्र विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रं हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥६॥

विकिरिद्रेति विऽकिरिद्र । विलोहितेति विऽलोहित ।
नमः । ते । अस्तु । भगव इति भगऽवः ।
याः । ते । सहस्रम् । हेतयः । अन्यम् । अस्मत् । नि । वपन्तु । ताः । प्यूं ॥६॥

सा– अथ षष्ठः – ‘ विकिरिद्र विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रं हेतयोऽन्यमस्मन्निवपन्तु ताः ’ इति । किर हिंसायाम् । विशेषेण किरिं हिंसाद्यनिष्टं द्रावयतीति विकिरिद्रः । विलोहितो लौहित्यरहितः श्वेत इत्यर्थः । अत एव मान्त्रिकाः पञ्चाक्षरध्याने स्मरन्ति– “ ध्येयो मुक्तापरागामृतरसकलिताद्रिप्रभः ” इति । अथवा विशेषेण लोहितो विलोहितः । अत एवाष्टाक्षरध्याने स्मरन्ति – “ काञ्चनाननो ध्येयः पद्मासनस्थः ” [इति] । भगवान् षड्गुणसंपन्नः । भगशब्दस्य षड्गुणवाचित्वं स्मर्यते–

“ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ ” इति ।

प्रकारान्तरेणापि स्मर्यते–

“ उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥ ” [इति] ।

तथोक्तविशेषणद्वयविशिष्ट हे रुद्र, ^{v}ते तुभ्यं ^{v}नमः ^{v}अस्तु । ^{v}ते तव ^{v}सहस्रं सहस्रसंख्याकाः ^{v}याः ^{v}हेतयः यान्यायुधानि सन्ति ^{v}ताः सर्वाः ^{v}अस्मत् ^{v}अन्यं विरोधिनं ^{v}नि ^{v}वपन्तु विनाशयन्तु ॥६॥

1.　H3 °न्यासम् for °न्यासविलासम्

6.　S2 M2 विकिरिद्र ... नि वपन्तु ता इति । विविधं किरिं घाताद्युपद्रवं द्रावयति नाशयति विकिरिद्रः । यद्वा विकिरति विक्षिपति शरानिति विकिरिः । विकिरिः सन् बाणान् मुञ्चन् द्रावयति शत्रूनिति विकिरिद्रः । हे विकिरिद्र । हे विलोहित विगतं लोहितं कल्मषं यस्मात् स विलोहितः । हे शुद्धस्वरूप हे भगवः हे भगवन् ते तुभ्यं नमोऽस्तु । हे रुद्र ते तव याः सहस्रं हेतयोऽसंख्यातान्यायुधानि ता हेतयोऽस्मदन्यम् अस्मद्व्यतिरिक्तं निवपन्तु घ्नन्तु ॥६॥ for अथ षष्ठः ... विनाशयन्तु [L 21]

आ– ' विकिरिद्र विलोहित ' इति । अनुष्टुप् । रुद्रदेवत्या । अस्य पुरश्चरणम् । त्रिरात्रं चरुभोजी, तदन्ते दशसहस्रं जपेत्, कृतपुरश्चरणो भवति । महाजनविरोधे अनेन सकलधान्यानां दधिमधुघृताक्तानामयुतं जुहुयात् । महाजनभयं न भवति । सर्वान् जेतुकामोऽपामार्गसमिधां कपिलाज्यसिक्तानां शतसहस्रं जुहुयात् । एतेन च गजवराहादयो वश्या भवन्ति । अपो जेतुकामो जलमध्ये आत्माग्निमानीय कपिलेन पयसा शतसहस्रं जुहुयात् । तस्याद्भ्यो भयं न भवति । यद्यज्जेतुकामस्तन्नामग्रहणं कृत्वा कपिलाज्येन शतसहस्रमाहुतीर्जुहुयात् । ततः सर्वं जयति ।

" प्रसन्नवदनं सौम्यं रञ्जितोद्वाहमण्डलम् ।
अम्बया सहितं ध्यायेत् सुरसंघैरभिष्टुतम् " ॥

किरि हिंसायाम् । विकिरि हिंसाद्यनिष्टं द्रावयतीति विकिरिद्रः । तत्संबोधनं हे ^{V}विकिरिद्र । हे ^{V}विलोहित विगतकल्मषभाव हे भगवः ।

" ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥ " इति ।

सोऽस्यास्तीति भगवान् । तत्संबोधनं हे ^{V}भगवः । ^{V}ते तुभ्यं ^{V}नमः ^{V}अस्तु । हे श्रीभगवन्, तव ^{V}याः ^{V}सहस्रम् । सहस्रशब्दोऽनन्तवचनः । ^{V}हेतयः आयुधानि ^{V}ताः हेतयः ^{V}अस्मत् अस्मत्तः ^{V}अन्यं पुरुषं ^{V}निवपन्तु निघ्नन्तु । धातूनामनेकार्थत्वात् ॥५२॥

**सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ।।७।।**

1. H2–3 om. त्रिरात्रं चरुभोजी
2. B1 om. तदन्ते दश°
4. H2–3 °आज्येन for °आज्य°
5. H2–3 आत्मानम् for आत्माग्निम्; B1 om. शत° … कपिलाज्येन [L 6]
6. B1 तत् for ततः
8. H3 °मण्डनम् for °मण्डलम्
9. H2–3 अम्बिका° for अम्बया
11. B1 °कलुष° for °कल्मष°
15. H2-3 अपरिमित° for अनन्त°

शतरुद्रियहोममन्त्राः]

सहस्रा॑णि । सहस्रश इति॑ सहस्र॒ऽशः । बा॒ह्वोः । तव॑ । हे॒तय॑ः ।
ताासा॑म् । ईशा॑नः । भग॒व॒ इति॑ भगऽवः । परा॒चीना॑ । मुखा॑ । कृ॒धि ।। शां ।।७।।

सा– अथ सप्तमः – ' सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ' इति । हे रुद्र, ᵛतव ᵛबाह्वोः हस्तयोः याः ᵛहेतयः ᵛसहस्रशः सहस्रप्रकाराः ᵛसहस्राणि सहस्रसंख्याकाः विद्यन्ते । धनूंषि खड्गस्त्रिशूलमित्येवंजातिभेदेन सहस्रप्रकारत्वं यस्यां जातौ बहवः सहस्रसंख्याकाः, हे ᵛभगवः षड्गुणैश्वर्यसंपन्न, ᵛईशानः समर्थः सन् त्वं ᵛतासां हेतीनां ᵛमुखा मुखानि शल्यानि ᵛपराचीना ᵛकृधि अस्मत्तः पराङ्मुखानि कुरु ।।७।।

आ– ' सहस्राणि सहस्रशः ' इति । रुद्रदेवत्यानुष्टुप् । अस्य पुरश्चरणम् । कृच्छ्रार्धं चरित्वा पञ्चसहस्रं जपेत् । कृतपुरश्चरणो भवेत् । अनेन पुरुषाणां राजोपद्रवशान्तिं कुर्यात् । शाल्मलीवैकङ्कतसमिद्भिः व्रीहियवतिलान् सर्पिःसंयुक्तान् अयुतं जुहुयात् । उपद्रवा नश्यन्ति । श्रीदक्षिणामूर्तिसंनिधौ शतसहस्रं जपेत् । प्रधानपुरुषमरणे शङ्किते वाल्मीकमृत्तिकाभिर्लिङ्गं कृत्वा तेन मन्त्रेण पयसाऽभिषिञ्चेत् । ततस्तां मृदमादाय नद्यां प्रक्षिप्य तत्तीरे स्वाग्नौ शुद्धतण्डुलैर्घृतसिक्तैरयुतं जुहुयात् । तत्प्रधानपुरुषमरणमुपशमयति । महाकान्तारगामी भस्माष्टसहस्रमभिमन्त्र्य सर्वतः शरीरमुपलिप्य गच्छेत् । तस्य किमपि भयं न भवति ।

सर्वपापहरं देवं सर्वकल्पोपकल्पितम् ।
सर्वायुधधरं ध्यायेत् सर्वलोकमहेश्वरम् ।। इति ।

3. P1 after सप्तमः adds अनुष्टुप्

S2 M2 सहस्राणि ... मुखा कृधीति । हे भगवः भगवन् षड्गुणैश्वर्यसंपन्न तव बाह्वोर्हस्तयोर्याः सहस्राणि सहस्रशो हेतयः सन्ति तासां हेतीनां मुखा मुखानि शल्यानि पराचीनानि अस्मत्तः पराङ्मुखानि त्वं कृधि कुरु । करोतेः शपि लुप्ते " श्रुशृणुपॄकृवृभ्यश्छन्दसि " (पा ६·४·१०२) इति हेर्धिः । कीदृशस्त्वम् । ईशानः ईष्टे इतीशानः जगन्नाथः ।। सहस्राणि सहस्रसंख्याकानि । धनुः खड्गः शूलं चर्मेत्यादिजातिभेदेन सहस्रसंख्यात्वम् । सहस्रशः सहस्रं सहस्रमिति सहस्रशः । " संख्यैकवचनाच्च वीप्सायाम् " (पा ५.४.४३) इति शस्प्रत्ययः । धनुरादीनां प्रत्येकं सहस्रसंख्यात्वमित्यर्थः ।।७।।

for सहस्राणि ... कुरु [L 7]

6. K om. सन्

8. H2–3 after °चरणं add कृत्वा

9. B1 before कृत adds सः; B1 °द्रवे for °द्रव°

12. B1 पायसम् for पयसा; B1 स्वावनौ for स्वाग्नौ

13. B1 जपेत् for जुहुयात्

हे vभगवः भगवन् श्रीरुद्र । vसहस्राणि vसहस्रशः इति । संख्यैकवचनाच्च वीप्सायाम् (पा ५·४·४३) इति शस् । सहस्रं सहस्रमिति सहस्रश इति । vतव vबाह्वोः असंख्यानि सहस्राणि vहेतयः आयुधानि सन्ति । vतासां हेतीनां त्वम् vईशानः ईश्वरो नियन्ता । अतस्त्वं vतासां vमुखा आयुधानां मुखानि vपराचीना पराचीनानि पराञ्चनशीलानि vकृधि, अस्मान् प्रति पराङ्मुखानि कृधि कृणुष्व ॥५३॥

असँख्याता स॒हस्रा॑णि॒ ये रु॒द्रा अधि॒ भूम्या॑म् ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥८॥

असँख्या॒तेत्यसंम्ऽख्याता । स॒हस्रा॑णि । ये । रु॒द्राः । अधि॑ । भूम्या॑म् ।
तेषा॑म् । स॒ह॒स्र॒यो॒जन इति॑ स॒ह॒स्र॒ऽयो॒ज॒ने । अव॑ । धन्वा॑नि । त॒न्म॒सि॒ ॥ चां ॥८॥

सा– अथाष्टमः – ' असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ' इति । vअधि vभूम्यां भूमेरुपरि vये vअसंख्याता असंख्यातानि vसहस्राणि बहवः सहस्रसंख्याका vरुद्राः स्थिताः, vतेषां स्थितानां रुद्राणां संबन्धीनि धनूंषि vसहस्रयोजने अस्मत्तः सहस्रयोजनव्यवहिते मार्गे vअवतन्मसि अवतनुमः अवतारयामः अवतारितज्याकानि कुर्मः ॥८॥

आ– ' असंख्याता सहस्राणि ' इति । बहुरुद्रदेवत्या दशानुष्टुभः । अत्र चतुर्णां मन्त्राणां चान्द्रायणं चरित्वा कायशोधनार्थं पञ्चसहस्रं जपेत् । कृतपुरश्चरणो भवति । विनियोगान्तरं कल्पतोऽवगन्तव्यम् ॥

तत्र पृथिवीस्थानानां नमस्काराः । vअधि vभूम्यां भूम्यामुपरि vये vअसंख्याता असंख्यातानि vसहस्राणि vरुद्राः स्थिताः vतेषां सहस्रयोजनानि, योजनेऽध्वनि अवस्थितानां रुद्राणां vधन्वानि धनूंषि vअवतन्मसि अवतनुमः अवतारयामः अवतारितज्याकानि कुर्मः ॥५४॥

---

10. P1 after अष्टमः adds बहुरुद्रदेवत्या दशानुष्टुभः

S2 M2 भूमिस्था रुद्रा उच्यन्ते – असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसीति । असंख्यातानि अपरिमितानि सहस्राणि अमिता ये रुद्रा भूम्याम् अधि भूमेरुपरि स्थितास्तेषां रुद्राणां धन्वानि धनूंषि सहस्रयोजने सहस्रयोजनानि यस्मिंस्तादृशे पथि सहस्रयोजनव्यवहिते मार्गे वयमवतन्मसि अवतन्मः अवतारयामः । अपज्यानि कृत्वा अस्मत्तो दूरं क्षिपाम इत्यर्थः ॥८॥ for अथाष्टमः ... कुर्मः (L 13)

18. B1 om. असंख्यातानि

अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषा॑ सहस्रयोजनेऽव धन्वा॑नि तन्मसि ॥९॥

अस्मिन् । महति । अर्णवे । अन्तरिक्षे । भवाः । अधि ॥ श्ये ॥९॥

सा– अथ नवमः – ' अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि । तेषा सहस्रयोजनेऽव धन्वानि तन्मसि ' इति । अस्मिन् दृश्यमाने महति अर्णवे महासमुद्रसदृशे प्रौढे अन्तरिक्षे अधि अधिश्रित्य वर्तमानाः भवाः रुद्रमूर्तिविशेषाः ये सन्ति । तेषाम् इत्यादि पूर्ववत् योजनीयम् ॥९॥

आ– ' अस्मिन् महति ' इति ऋष्यादिकमुक्तम् । अर्ण इत्युदकनाम । मत्वर्थीयः प्रत्ययः । अर्णयतीत्यर्णवः । वृष्टयुदकेनोदकत्वमन्तरिक्षस्य । अस्मिन् महति अर्णवे अन्तरिक्षे अधि उपरि भवाः रुद्राः ये स्थिताः । तेषाम् इति व्याख्यातो मन्त्रः ॥५५॥

नील॑ग्रीवाः शितिकण्ठा दिव॑ रुद्रा उप॑श्रिताः ।
तेषा॑ सहस्रयोजनेऽव धन्वा॑नि तन्मसि ॥१०॥

नील॑ग्रीवा इति नील॑ऽग्रीवाः । शितिकण्ठा इति॑ शितिऽकण्ठा॑ः ।
दिव॑म् । रुद्राः । उप॑श्रिता इत्युप॑ऽश्रिताः ॥ ढू ॥१०॥

सा– अथ दशमः – ' नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः । तेषा सहस्रयोजनेऽव धन्वानि तन्मसि ' इति । ग्रीवायामेकस्मिन् प्रदेशे नीलवर्णाः नीलग्रीवाः, प्रदेशान्तरे श्वेतवर्णाः शितिकण्ठाः, तादृशा ये रुद्राः दिवं द्युलोकम् उपश्रिताः । शिष्टं पूर्ववत् ॥१०॥

4. S2 M2 अन्तरिक्षस्था रुद्रा उच्यन्ते – अस्मिन् ... तन्मसीति अस्मिन्नन्तरिक्षे अधि अधिश्रित्य ये भवा रुद्राः स्थितास्तेषां धन्वानि अवतन्मसीति पूर्ववत् । कीदृशेऽन्तरिक्षे ? महति विशाले । अर्णवे अर्णांसि जलानि विद्यन्ते यत्र तदर्णवम् । मेघाधारत्वात् । अर्णसो लोपश्चेति वप्रत्ययोऽन्तलोपश्च ॥९॥ for अथ नवमः ... योजनीयम् (L 6)

5. P1 K after अर्णवे add अर्णांसि जलानि विद्यन्ते यत्रेति

14. S2 M2 द्युस्थानरुद्रा उच्यन्ते – नीलग्रीवाः ... तन्मसीति । ये रुद्राः द्युलोकमुपाश्रिताः स्वर्गस्थाः । तेषामिति पूर्ववत् । कीदृशाः ? नीलग्रीवाः नीलाः श्यामाः ग्रीवाः येषां ते । शितिः श्वेतः कण्ठो येषां ते । विषग्रासात् कियान् कण्ठभागः कृष्णः कियान् श्वेत इत्यर्थः ॥१०॥ for अथ दशमः ... पूर्ववत् (L 16)

16. P1 K after शितिकण्ठाः ins. शितिशब्दः श्वेतवचनः

आ– [v]नीलग्रीवाः कृष्णग्रीवाः। शितिशब्दोऽत्र श्वेतवचनः। [v]शितिकण्ठाः श्वेतकण्ठाः। [v]दिवं द्युलोकं ये [v]रुद्राः अधिश्रिताः। तेषाम् इति ॥५६॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
तेषाᳪं सहस्रयोजनेऽव धन्वानि तन्मसि ॥११॥

शर्वाः । अधः । क्षमाचरा इति क्षमाऽचराः ॥ गी ॥११॥

सा– अथैकादशः – 'नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः। तेषाᳪं सहस्रयोजनेऽव धन्वानि तन्मसि' इति। [v]नीलग्रीवाः [v]शितिकण्ठाः [v]शर्वाः रुद्रमूर्तिविशेषाः। [v]अधः [v]क्षमाचराः भूमेरधस्तात् पाताले संचरन्ति। [v]तेषाम् इत्यादि पूर्ववत् ॥११॥

आ– [v]नीलग्रीवाः [v]शितिकण्ठाः। शॄ हिंसायामित्यस्य रूपं [v]शर्वाः इति। सर्वतः (!)। ये रुद्राः [v]अधः [v]क्षमाचराः, क्षमा पृथिवी, पृथिव्याः अधः पाताले चरन्तीति अधः क्षमाचराः। [v]तेषाम् इति ॥५७॥

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषाᳪं सहस्रयोजनेऽव धन्वानि तन्मसि ॥१२॥

वृक्षेषु । शष्पिञ्जराः ।
नीलग्रीवा इति नीलऽग्रीवाः । विलोहिता इति विऽलोहिताः ॥ जु ॥१२॥

सा– अथ द्वादशः – 'ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः। तेषाᳪं सहस्रयोजनेऽव धन्वानि तन्मसि' इति। यथा लोकेष्ववस्थिता रुद्रास्तथा [v]वृक्षेषु अवस्थिताः। तेषु केचित् [v]शष्पिञ्जराः। शष्पवत् बालतृणवत् पिञ्जरवर्णाः। [v]नीलग्रीवाः केचिद् ग्रीवादेशे नीलवर्णोपेताः। अपरे पुनः [v]विलोहिताः विशेषेण रक्तवर्णाः। ईदृशाः [v]ये रुद्राः सन्ति, [v]तेषाम् इत्यादि पूर्ववत् ॥१२॥

1. B1 before नील° adds नीलग्रीवा द्युस्थाना उच्यन्ते।

6. S2 M2 पातालस्था रुद्रा उच्यन्ते – नीलग्रीवा ... तन्मसीति। अधोभागे ये शर्वा रुद्रा क्षमाचराः क्षमायां भुवोऽधोभोग चरन्ति क्षमाचराः पातालवर्तमानाः। तेषामित्युक्तम्। नीलग्रीवाः शितिकण्ठा पूर्ववद्विशेषणे ॥११॥ for अथैकादशः ... पूर्ववत् [L 8]

10. B1 om. क्षमा पृथिवी ... ... °चराः

16. S2 M2 ये वृक्षेषु ... तन्मसीति। ये रुद्रा [वृक्षेषु अश्वत्थादिषु स्थिताः। कीदृशाः शष्पिञ्जराः। शष्पं बालतृणम्। तद्वत्पिञ्जरा हरितवर्णाः। नीलग्रीवाः नीला ग्रीवा येषां ते। कण्ठे नीलवर्णाः। तथा केचन विलोहिताः। यद्वा–विगतं लोहितं रुधिरं येषां ते। लोहितपदं मांसादीनामप्युपलक्षणम्। विगतलोहितादिधातवः। तेजोमयशरीरा इत्यर्थः। तेषामित्याद्युक्तम् ॥१२॥ for अथ द्वादशः ... पूर्ववत् (L 19)

आ– ' ये वृक्षेषु ' इति । पुरश्चरणं पूर्ववत् । ^V^शष्पिञ्जराः शष्पवत् नवप्ररूढतृणवत् पिञ्जराः । ^V^नीलग्रीवाः ^V^विलोहिताः विगतकल्मषाः । तेषाम् इति ॥५८॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१३॥

भूतानाम् । अधिपतय इत्यधिऽपतयः । विशिखास इति विऽशिखासः । कपर्दिनः ॥
जु ॥१३॥

सा– अथ त्रयोदशः – ' ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ' इति । भूतशब्देनान्तर्हितशरीराः सन्तो मनुष्योपद्रवकारिणो गणविशेषा उच्यन्ते । तेषाम् ^V^अधिपतयः ^V^ये रुद्रास्तेषु केचिद् ^V^विशिखासः मुण्डितमूर्धानः । अपरे ^V^कपर्दिनः जटाबन्धोपेताः । ^V^तेषाम् इत्यादि पूर्ववत् ॥१३॥

आ– ' ये भूतानाम् ' इति । पुरश्चरणं पूर्ववत् । विनियोगः कल्पतोऽवगन्तव्यः । ^V^ये ^V^भूतानां रुद्रभूतानाम् ^V^अधिपतयः ये ^V^विशिखासः शिखारहिताः ^V^कपर्दिनः जटामुकुटधारिणः । ^V^तेषां रुद्राणामिति ॥५९॥

ये पथां पथिरक्षिण ऐलबृदा आयुर्युधः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१४॥

पथाम् । पथिरक्षिण इति पथिऽरक्षिणः । ऐलबृदाः । आयुर्युध इत्यायुःऽयुधः ॥
सु ॥१४॥

---

1. B1 before पूर्ववत् adds विनियोगः ।

7. S2 M2 ये भूतानाम् ... तन्मसीति । ये ईदृशा रुद्रास्तेषां धन्वानीति पूर्ववत् । कीदृशाः ? भूतानां देवविशेषाणामधिपतयः । अन्तर्हितशरीराः सन्तो मनुष्योपद्रवकारभूतास्तेषां पालकाः। तत्र केचित् विशिखासः विगता शिखा येषां ते । शिखाशब्दः केशोपलक्षकः । मुण्डितमुण्डा इत्यर्थः । अन्ये कपर्दिनः जटाजूटयुताः ॥१३॥ for अथ त्रयोदशः ... पूर्ववत् (L 10)

11. B1 trans पूर्ववत् after विनियोगः and om. कल्पतोऽवगन्तव्यः ।

सा– अथ चतुर्दशः – ' ये पथां पथिरक्षिण ऐळबृदा आयुर्युधः । तेषा१ँ सहस्रयोजनेऽव धन्वानि तन्मसि ' इति । [v]ये रुद्राः [v]पथिरक्षिणः लौकिकवैदिकमार्गाणां रक्षकाः । नात्र केषांचिदेव मार्गाणाम् । किंतु सर्वेषां [v]पथां ते रक्षकाः । [v]ऐळबृदाः । इळा पृथिवी । तत्संबन्धि ऐळमन्नं बिभ्रतीत्यैळभृतः । ऐळभृत [एव] ऐळबृदाः अन्नप्रदानेन पोषका इत्यर्थः । [v]आयुर्युधः । आयुषा युध्यन्ति यावज्जीवं युद्धं कुर्वन्तीत्यायुर्युधः ये रुद्राः । [v]तेषाम् इत्यादि पूर्ववत् ॥१४॥

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषा१ँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१५॥

तीर्थानि । प्रचरन्तीति प्रऽचरन्ति । सृकाहस्ता इति सृकाऽहस्ताः । निषङ्गिणः ॥
घु ॥१५॥

सा- अथां पञ्चदशः – ' ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषा१ँ सहस्रयोजनेऽव धन्वानि तन्मसि ' इति । [v]ये रुद्राः [v]तीर्थानि काशीप्रयागादीनि रक्षितुं [v]प्रचरन्ति । कीदृशाः रुद्राः ? [v]सृकाहस्ताः, सृका क्षुरिका तीक्ष्णायुधविशेषः, तत्पाणयः केचित् । अपरे तु [v]निषङ्गिणः खड्गयुक्ताः । [v]तेषाम् इत्यादि पूर्ववत् ॥१५॥

आ– ' ये पथां ', ' ये तीर्थानि ' इति । अनयोः पुरश्चरणम् । कृच्छ्रं चरित्वा पञ्चसहस्रं जपेत् । ततः कृतपुरश्चरणो भवति । एताभ्याम् ऋतुगमनदिने स्वाग्नौ नवतिसहस्रं कापिलेन पयसा सर्पिर्मिश्रेण जुहुयात् । ततः ऋतुगामी भवेत् । तत्र विद्वान् वंशधरः पुत्रो जायते । ध्यानं पूर्ववत् ॥

1. S2 M2 ये पथां ... तन्मसीति । ये चेदृशा रुद्रास्तेषामित्युक्तम् । कीदृशाः ? पथां लौकिकवैदिकमार्गाणाम् अधिपतय इति पूर्वऋचोऽनुषङ्गः । तथा पथिरक्षिणः पथो मार्गास्तन्निवान्यानपि रक्षन्ति पालयन्ति ते पथिरक्षिणः । ऐळबृदाः इळानामन्नानां समूह ऐळम्, अन्नसमूहः । यद्वा इळा पृथिवी तस्या इदमैळमन्नं तद्बिभ्रति ते ऐळभृतः । त एव परोक्षवृत्त्या ऐळबृदा उच्यन्ते । अन्नैर्जन्तूनां पोषका इत्यर्थः । आयुर्युधः । आयुषा जीवनेन युद्धयन्ते यावज्जीवं युद्धकराः । यद्वा आयुर्जीवनं पणीकृत्य युध्यन्ते आयुर्युधः ॥१४॥ for अथ चतुर्दशः ... पूर्ववत् (L 5)
4. P1 K after ऐळबृदाः add वर्णव्यत्ययः
10. S2 M2 ये तीर्थानि ... तन्मसीति । ये रुद्रास्तीर्थानि प्रयागकाश्यादीनि प्रचरन्ति गच्छन्ति । कीदृशाः ? सृकाहस्ताः सृकेत्यायुधनाम । सृका आयुधानि हस्ते (S2 हस्तेषु) येषां ते । निषङ्गिणः निषङ्गाः खड्गा विद्यन्ते येषां ते । सृकाहस्तत्वेऽपि निषङ्गित्वोक्तिः खड्गप्राधान्याय ॥१५॥ for अथ पञ्चदशः ... पूर्ववत् (L 13)
15. B1 एवं for ततः, B1 अष्ट° for नवति°
16. B1 सर्पिषा for सर्पिर्

[V]पथां मार्गाणां [V]ये पतयः [V]पथिरक्षिणः रक्षितुंशीलाः रक्षकाः। सन्मार्गस्य रक्षकाः। इळायाः भूमेः संबन्धि ऐळमन्नं बृदन्ति बिभ्रति भक्तानां दातुमिति [V]ऐळबृदाः। ऐळं भक्तेभ्यो देयमन्नं ये बिभ्रति ते ऐळभृतः। ऐळभृतः सन्त ऐळबृदा इत्युच्यन्ते। [V]आयुर्युधः। आयुषा युध्यन्ति यावज्जीवं युध्यन्तीत्यायुर्युधः ये रुद्राः। [V]तेषाम् इति ॥६०॥

[V]ये रुद्राः [V]तीर्थानि गङ्गामिति तीर्थफलं दातुं [V]प्रचरन्ति [V]सृकाहस्ताः वज्रहस्ता [V]निषङ्गिणः खड्गधराः ये रुद्राः। [V]तेषाम् इति ॥६१॥

येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥१६॥

अन्नेषु। विविध्यन्तीति विऽविध्यन्ति। पात्रेषु। पिबतः। जनान्॥ श्रु ॥१६॥

सा– अथ षोडशः – 'येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्। तेषां सहस्रयोजनेऽव धन्वानि तन्मसि' इति। [V]ये रुद्राः [V]अन्नेषु भुज्यमानेषु गूढत्वेनावस्थिताः सन्तः [V]जनान् [V]विविध्यन्ति विशेषेण धातुवैषम्यदिना बाधन्ते, तथा [V]पात्रेषु पानेषु क्षीरोदकादिषु गूढत्वेनावस्थिताः [V]पिबतः [V]जनान् विविध्यन्ति। [V]तेषाम् इत्यादि पूर्ववत् ॥१६॥

आ– 'येऽन्नेषु विविध्यन्ति' [इति]। पुरश्चरणं पूर्ववत्। [V]ये रुद्राः [V]अन्नेषु अदनीयेषु प्रतिषिद्धेषु। तान् दृष्ट्वा ये [V]विविध्यन्ति। 'व्यध ताडने'। 'विध भोजने'। निषिद्धसेविनस्ताडयन्ति भोजयन्ति भक्षयन्तीति। ये च [V]पात्रेषु सुरादिप्रतिषिद्धपात्रेषु [V]पिबतः [V]जनान् अनुक्तकारिणो जनान् ये रुद्राः विविध्यन्ति। [V]तेषाम् इति ॥६३॥

---

1. H2–3 पतये नमः for ये पतयः
2. B1 बिभर्ति सिक्तानां, H2–3 बिभसभक्तानां for बिभ्रति भक्तानां
4. B1 om. यावज्जीवं ... तेषामिति ॥
5. B1 om. ये रुद्राः ... तेषामिति
10. S2 M2 येऽन्नेषु ... तन्मसीति। ये रुद्रा अन्नेषु भुज्यमानेषु स्थिताः सन्तो जनान् विविध्यन्ति विशेषेण ताडयन्ति धातुवैषम्यं कृत्वा रोगानुत्पादयन्तीत्यर्थः। तथा पात्रेषु पात्रस्थक्षीरोदकादिषु स्थिताः सन्तः पिबतः क्षीरादिपानं कुर्वतो जनान् विविध्यन्ति। अन्नोदकभोक्तारो व्याधिभिः पीडनीया इति तेषामधिकार इति भावः। तेषामिति पूर्ववत् ॥१६॥ for अथ षोडशः ... पूर्ववत् (L 13)
12. P1 पात्रस्थक्षीरोदकादिपानेषु for पानेषु
14. B1 om. येऽन्नेषु ... विविध्यन्ति (L 15)

य एतावन्तश्च भूयांऽसश्च दिशो रुद्रा वितस्थिरे ।
तेषांऽ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१७॥

एतावन्तः । च । भूयांसः । च । दिशः । रुद्राः । वितस्थिर इति विऽतस्थिरे ॥ धै ॥१७॥

सा– अथ सप्तदशः – 'य एतावन्तश्च भूयांऽसश्च दिशो रुद्रा वितस्थिरे । तेषांऽ सहस्रयोजनेऽव धन्वानि तन्मसि ' इति । ये रुद्राः एतावन्तः च अत्र यावन्त उक्तास्ते । भूयांसश्च बहुतराश्चोक्तेभ्योऽधिकाः । सर्वाः दिशः वितस्थिरे प्रविश्य स्थिताः । तेषाम् इत्यादि पूर्ववत् ॥१७॥

आ– उपसंहरति– ये एतावन्तः च रुद्राः भूयांसः अतिबहवः रुद्राः, उक्ताः अनुक्ताश्च, दिश विदिशश्च वितस्थिरे । सर्वा दिशः ये रुद्रा अवस्थिताः । तेषाम् इति ॥६४॥

नमोऽस्तु रुद्रेभ्यो ये दिवि येषांऽ वर्षमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।
नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।
नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥१८॥

5. S2 M2 य एतावन्तश्च ... तन्मसीति । ये रुद्राः एतावन्तः एतत्प्रमाणं येषां ते । अतिशयेन बहवः भूयांसः । उक्तेभ्योऽतिबहवश्च । ये रुद्रा दिशो दश वितस्थिरे आश्रिता दश दिशो व्याप्य स्थिताः । तेषां धनूंषि अवतन्मसीति पूर्ववत् ॥१७॥ for अथ सप्तदशः ... पूर्ववत् (L 7)

शतरुद्रियहोममन्त्राः]

नमः । अस्तु । रुद्रेभ्यः । ये । दिवि । येषाम् । वर्षम् । इषवः ।
तेभ्यः । दश । प्राचीः । दक्षिणा । प्रतीचीः । उदीचीः । ऊर्ध्वाः ।
अन्तरिक्षे । वातः । पृथिव्याम् । अन्नम् ॥ न्हौं ॥१८॥

[नमस्ते षोळश ॥१६॥ नमो हिरण्यबाहवे ॥५॥ नम उष्णीषिणे ॥५॥ नमस्तक्षभ्यः ॥५॥ नमो ज्येष्ठाय ॥५॥ नमः स्रुत्याय ॥५॥ नमः पार्यायेति पञ्च पञ्च ॥५॥ द्रापे अन्धस इत्यष्टादश ॥१८॥ अष्टानुवाकेषु चतुःषष्टिः ॥६४॥]

वृक्षोभूतः पयस्तीर्थं ह्यन्नं चैतावतोऽपि च ।
नमोऽस्तु रुद्रं पूर्वं वा उक्त्वा वाच्याः क्रमाद्दिवि ॥१॥
अन्तरिक्षे पृथिव्यां चाध्याये सप्तदशे तथा ।
एवं यः पठते रुद्रगणो भूत्वा वसेच्चिरम् ॥२॥

[इति शुक्लयजुर्वेदकाण्वसंहितायां सप्तदशोऽध्यायः ॥१७॥]

सा– इत्थं सप्तदशसंख्या ऋग्रूपा मन्त्रा उक्ताः । अथ त्रयो यजूरूपा मन्त्रा उच्यन्ते । कात्यायनः – " प्रतिलोमं प्रत्यवरोहान् जुहोति प्रमाणेषु नमोऽस्त्विति प्रतिमन्त्रम् " (काश्रौ १८.१.५) इति । ' नमोऽस्तु ' इति मन्त्रत्रयेण जानुमात्रं नाभिमात्रं मुखमात्रमित्येतेषु प्रमाणेषु प्रातिलोम्येन प्रत्यवरोहनामकं होमं कुर्यात् । प्रथमं मुखमात्रे पश्चान्नाभिमात्रे ततो जानुमात्र इति प्रतिलोमशब्दार्थः । तत्र

8. वृक्षो भूतपतिस्तीर्था अन्नमेता नमो नमः for वृक्षोभूतः ... वसेच्चिरम् ॥ [L 11]

13. S2 M2 नमोऽस्तु ... दध्म इति । त्रिलोकस्था रुद्रा उच्यन्ते । दिवि द्युलोके ये रुद्रा वर्तन्ते । येषां च रुद्राणां वर्षं वृष्टिरेव इषवो बाणाः । आयुधस्थानीया वृष्टिः । अतिवृष्ट्यादीतिभिः प्राणिनो घ्नन्ति तेभ्यो रुद्रेभ्यो नमो नमस्कारोऽस्तु । तेभ्यो रुद्रेभ्यो दश दशसंख्याकाः प्राचीः प्रागभिमुखा अङ्गुलीः कुर्वे इति शेषः । प्राङ्मुखाञ्जलिकरणे प्राच्यो दशाङ्गुलयो भवन्ति । दक्षिणा दक्षिणाभिमुखाः दशाङ्गुलीः कुर्वे । प्रतीचीः प्रत्यङ्मुखाः दशाङ्गुलीः कुर्वे । उदीचीः उदङ्मुखाः दशाङ्गुलीः कुर्वे । ऊर्ध्वाः उपरि दशाङ्गुलीः कुर्वे । अञ्जलिं बध्वा सर्वदिक्षु नमस्करोमीत्यर्थः । तेभ्यो रुद्रेभ्यो नमोऽस्तु । अञ्जलिपूर्वं नतिरस्तु । ते रुद्राः नोऽस्मान् मृळयन्तु सुखयन्तु अवन्तु रक्षन्तु । किं च । ते रुद्रा यं पुरुषं द्विषन्तीति शेषः । वयं च यं द्विष्मः यस्य द्वेषं कुर्मः । च पुनर्यो नरो नोऽस्मान् द्वेष्टि तं पुरुषम् एषां पूर्वोक्तानां रुद्राणां जम्भे दंष्ट्राकराले मुखे दध्मः स्थापयामः । अस्मद्द्विषम् अस्मद्द्वेष्यं च नरं रुद्राः पूर्वोक्ता भक्षयन्त्वित्यर्थः । अस्मांश्चावन्तु च ॥

प्रथममन्त्रपाठस्तु– ' नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ' इति । ये रुद्राः दिवि द्युलोके वर्तन्ते, तेष्वपि येषां रुद्रविशेषाणां वर्षं वृष्टिरेव इषवः अतिवृष्ट्यनावृष्टिभ्यां प्राणिनो हिंसन्ति तेभ्यः दिवि स्थितेभ्यो वर्षेषुभ्यश्च रुद्रेभ्यः नमः अस्तु । कीदृशो नमस्कार इति । स एव विशिष्यते– दश प्राचीः प्राङ्मुखत्वेनाञ्जलिकरणेन दशाङ्गुलयः प्रागग्रा भवन्ति । एवं दक्षिणाद्यूर्ध्वान्तेषु योज्यम् । ईदृशैरञ्जलिविशेषैः तेभ्यः रुद्रेभ्यः नमः अस्तु । ते च रुद्राः नः अस्मान् मृळयन्तु सुखयन्तु । किंच ते रुद्रा नः अस्मान् अवन्तु शत्रुसंघाद्रक्षन्तु । ते वयं नमस्कृतरुद्राः सन्तः यं वैरिणं प्रति द्विष्मः द्वेष कुर्मः, यः च वैरी नः अस्मान् द्वेष्टि, तम् उभयविधं वैरिणम् । तेषाम् एषां रुद्राणां जम्भे दंष्ट्राकराले विदारितमुखे दध्मः स्थापयामः ॥

अथ द्वितीयः – ' नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ' इति । ये रुद्राः अन्तरिक्षे वर्तन्ते, तेषामपि मध्ये येषां वातः इषवः तत्प्रेरणेन वायुना रोगमुत्पाद्य हिंसन्ति, तेभ्यः अन्तरिक्षवर्तिभ्यो रुद्रेभ्यो वातेषुभ्यश्च नमः अस्तु । ' दश प्राचीः ' इत्यादि पूर्ववत् ।

अथ तृतीयः – ' नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ' इति । ये रुद्राः पृथिव्यां वर्तन्ते तेष्वपि रुद्रेषु येषां रुद्रविशेषाणाम् अन्नम् एव इषवः बाणाः यथेष्टान्नभक्षणे कदन्नभक्षणे प्रवर्त्य वा अन्नार्थं चौर्यं कारयित्वा यान् हिंसन्ति तान् प्रति हिंसकानां रुद्राणामन्नमेवेषवः । तेभ्यः पृथिवीस्थितेभ्योऽन्नबाणकेभ्यश्च रुद्रेभ्यः नमः । ' दश प्राचीः ' इत्यादि पूर्ववद्योज्यम् ॥१८॥

इति सप्तदशेऽध्यायेऽष्टमोऽनुवाकः ॥८॥

(Continued from last Page)

नमोऽस्तु रुद्रेभ्यो ... जम्भे दध्म इति । ये अन्तरिक्षे रुद्रा वर्तन्ते तेभ्यो रुद्रेभ्यो नमोऽस्तु । येषां रुद्राणां वात इषवः वायुरायुधस्थानीयः । कुवातेनान्नं विनाश्य वातरोगं वोत्पाद्य जनान् घ्नन्ति तेभ्योऽन्तरिक्षस्थेभ्यो वातेषुभ्यो रुद्रेभ्यो नमोऽस्तु । शिष्टं व्याख्यातम् ॥ नमोऽस्तु ... दध्म इति । ये पृथिव्यां रुद्रा वर्तन्ते येषामन्नामिषवः अन्नमदनीयं वस्तु आयुधम् । अयथाभक्षणे कदन्नभक्षणे चौर्ये वा प्रवर्त्य रोगमुत्पाद्य जनान् घ्नन्ति तेभ्यः पृथिवीस्थेभ्योऽन्नायुधेभ्यो रुद्रेभ्यो नमोऽस्तु । ते अस्मान् मृळयान्त्वित्यादि पूर्ववत् । एते प्रत्यवरोहमन्त्राः । अथ प्रत्यवरोहान् जुहोतीति व्यवहाराय संज्ञाकरणम् ॥१८॥

इति सप्तदशेऽध्यायेऽष्टमोऽनुवाकः ॥ (M2 after this adds श्रीरुद्रभाष्यं समाप्तम्)
इति श्रीमद्राजा° ... सप्तदशोऽध्यायः ॥ M2 समाप्तः ॥ for इत्थं सप्तदश संख्या
[P 473 L 13] ... । सप्तदशोऽध्यायः [L 21]
[P 473 L 13] K om. second मन्त्राः

1. P1 K after °पाठस्तु add त्रीणि यजूंषि रुद्रदैवत्यानि
3. P वर्षमेघ, K वर्षवर्षमेघ for वर्षं वृष्टिरेव

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये काण्वसंहितायां वेदार्थप्रकाशे सप्तदशोऽध्यायः ॥१७॥

आ– ' नमोऽस्तु रुद्रेभ्यः ' इति । त्रीणि यजूंषि रुद्रदैवत्यानि ' तेभ्यो नमः ' इति मध्ये मध्ये तिस्रोऽनुष्टुभ एकप्रयोगनिबन्धाय । एषां पुरश्चरणम् । एकविंशतिदिनानि दीक्षित्वा पञ्च पञ्च दिनान्येकं वस्तु भुञ्जीत । आममेव सर्वं भवेत् । प्रथमं पञ्चकं पयः । द्वितीयं फलम् । तृतीयं दधि । चतुर्थं फलम् । एकमुपवासः । एवं चरित्वा तत एकविंशतिदिनानि हविषि (?) अधितिष्ठन् सदा जपेत् । पञ्चदिनानि गलप्रमाणजले स्थित्वा जपेत् । तत एकदिनमघमर्षण-विधानेन जपेत् । तत आचार्याय दशनिष्कदक्षिणां दद्यात् । आचार्यशुश्रूषां कृत्वा च कृतपुरश्चरणो भवति । विनियोगः कल्पतोऽवगन्तव्यः ॥

vदिवि द्युलोके vये रुद्राः स्थितास्तेभ्यः vरुद्रेभ्यः vनमः । कीदृशास्ते रुद्राः ? vयेषां रुद्राणां vवर्षं वृष्टिः, आयुधस्थानीयम् vइषवः सायकाः, तेभ्यो रुद्रेभ्यो नमः । इषुशब्देनात्राङ्गुलयो लक्ष्यन्ते । अत्र पञ्चवक्त्रो दशभुजो देवः । तेषां दशभुजानां पञ्चाशदङ्गुलयः । एताः विभज्य श्रुतिः कथयति– ' दश प्राचीः ' इत्यादि । अत्र विभक्तिव्यत्ययः । प्राच्यः प्राङ्मुखा vदश अङ्गुलयः । vदक्षिणा vदश दक्षिणाभिमुखाः । vदश vप्रतीचीः प्रतीच्यः प्रत्यङ्मुखाः । vदश vउदीचीः उदीच्यः उदङ्मुखा अङ्गुलयः । vदश vऊर्ध्वाः ऊर्ध्वमुखा अङ्गुलयः । एवं विभक्ता ये अङ्गुलयः vतेभ्यः इषुभ्यः अङ्गुलिभ्यः vनमः vअस्तु । छान्दसोऽत्र व्यत्ययः । vते इषुत्वेन कल्पिता अङ्गुलयः vनः vमृळयन्तु सुखयन्तु । vते vनः अस्मान् vअवन्तु रक्षन्तु । एवमस्माभिः संस्तुताः ये रुद्राः vयं पुरुषं प्रति वयं vद्विष्मः द्वेषं कुर्मः, vयः vच पुरुषः vनः अस्मान् vद्वेष्टि vतं च । तेषाम् vएषां रुद्राणां vजम्भे जम्भेषु दंष्ट्रेषु vदध्मः स्थापयामः ।

vअन्तरिक्षे लोके vये रुद्राः स्थितास्तेभ्यः vनमः । vयेषां रुद्राणां vवातः वायुः vइषवः इषुस्थानीयाः । समानमन्यत् । vपृथिव्यां लोके vये रुद्राः स्थिताः तेभ्यः vनमः । vयेषां

6. B1 °निषिद्धाय for °निबन्धाय
7. B1 आगमेन for आममेव; H2–3 om. पञ्चकं
10. H2–3 आचार्यस्य for आचार्याय
14. B1 एतान् , H3 एतानि for एताः
19. H2–3 om. रक्षन्तु
23. H2–3 om. इषुस्थानीयाः, B1 भूलोके for लोके

रुद्राणाम् [1]अन्नम् आत्मसंमितं चेत् शरीरं पुष्णाति। अधिकं न्यूनं वा व्याध्यादिजनकत्वेन हन्ति। अतस्त्विषुत्वेन निरूप्यते। समानमन्यत्। एवं 'नमोऽस्तु रुद्रेभ्यः' इति ॥६४॥

हरिः ॐ। अथ पूजाविधिः। सुगुप्ते पुण्यदेशे गोचर्ममात्रे स्थण्डिले गोमयेनोपलिप्ते पद्मे वाऽतिमनोहरे लिङ्गं प्रकल्प्य प्रोक्षयेत्। अर्चनादिकं 'नमः शंभवे' इति मन्त्रेण। 'मा नो महान्तम्' इति जपित्वा स्वललाटे ज्योतीरूपं ध्यात्वा प्लुतप्रणवप्रयोगेन स्थापयेत्। ओंकारादिनमस्कारान्तं मन्त्रविधिना प्रयोजयेत्। 'नमस्ताराय' इत्यासनम्। 'नमः स्तुत्याय' इति पाद्यम्। 'नमः शंभवे' इत्यर्घ्यम्। 'नमः शिवाय' इत्याचमनम्। 'आपो हि ष्ठाः' इति 'नमस्तीर्थ्याय' इति च स्नानम्। 'मा नस्तोके' इति वस्त्रम्। 'नमो धृष्णवे' इत्युपवीतम्। 'नमः सोमाय' इति गन्धम्। 'नमः पार्याय' इति पुष्पम्। 'नमः कपर्दिने' इति धूपम्। 'नम आशवे' इति दीपम्। 'नमो ज्येष्ठाय' इति नैवेद्यम्। 'चत्वारि शृङ्गाः' इति पुरश्चरणम्। 'एष ते' इति मुद्रा। 'सद्योजाताय नमः' इति सद्योजातं पूजयेत्। 'वामदेवाय नमः' इति वामदेवम्। 'अघोराय नमः' इत्यघोरम्। 'तत्पुरुषाय नमः' इति तत्पुरुषम्। 'ईशानाय नमः' इतीशानमर्चयेत्। 'नमो गणेभ्यः' इति उमासुताद्यान् गणान् उत्तरतः संपूज्य ऋषिच्छन्दोदेवताविनियोगपूर्वकं शिवसंकल्पं हृदयम्। पुरुषसूक्तं शिरः। उत्तरनारायणं शिखा। अप्रतिरथं कवचम्। शतरुद्रियमस्त्रम्। एवं पञ्चाङ्गं सकृत् जपित्वा अष्टाङ्गं प्रणमेत्। 'इमा रुद्राय' इति जपः। आज्यप्लुताभिस्तिलाक्षतपलाशसमिद्भिस्त्रिपञ्चषडष्टदशैकादश वाहुतीः 'नमः शंभवे' इति मन्त्रेण हुत्वा 'विकिरिद्र विलोहित' इति देवं विसर्जयेत्।

---

1. H3 °शममितं for °संमितं
2. H2–3 om. अतास्त्विषुत्वेन
3. B1 om. हरिः ॐ; H2–3 सुष्टुते for सुगुप्ते; H2–3 अनुलिप्ते for उपलिप्ते
4. H2–3 पदे for पद्मे
5. H2–3 °प्रयोगं for प्रयोगेन
6. H2–3 मन्त्रं विना for मन्त्रविधिना
7. H2–3 om. नमः शंभवे ... वस्त्रम् [L 8]
13. H2–3 पूजयेत् for अर्चयेत्
14. H2–3 om. उत्तरतः; H2–3 °दैवत° for °देवता°
16. B1 प्रणम्य for प्रणमेत्; H2–3 देवम् for जपम्; B1 after जपम् adds निवेद्यं

एकादशगुणान् वापि रुद्रानावर्त्य धर्मवित् ।
महापातकयुक्तोऽपि मुच्यते नात्र संशयः ॥

इति रुद्रविधानं संपूर्णम् ॥

[अथ रुद्रकल्पविधिः]

रुद्रकल्पविधिं वक्ष्ये सांप्रतं विधिचोदितम् ।
अध्येषमाणः कुर्वीत व्रतं द्वादशरात्रकम् ॥१॥
यावकाशी चतूरात्रं चतूरात्रं दधिप्रभुक् ।
चतूरात्रं पयोभक्षो गायत्रीं च जपेद् बुधः ॥२॥
तिष्ठन् दिवसमासीनो नक्तं त्रिषवणं जलम् ।
उपस्पृशेत् तथैवं च यावदध्ययनं शिवम् ॥३॥
सर्वौषधीभिः संस्नाप्य दत्त्वा गन्धादिशोभनम् ।
दर्भान् संस्तीर्य पूर्वाग्रान् तेषु तिष्ठन् पवित्रदोः ॥४॥
प्राङ्मुखश्चोर्ध्वबाहुश्च नमस्ते रुद्रमन्यवे ।
इत्येताननुवाकान् वै जपेत् तत् प्रथमेन तु ॥५॥
रूपेण रुद्रसेनाया भवत्यन्यतरो द्विजः ।
रूपकेण द्वितीयेन रुद्रे ज्ञाते भवेदसौ ॥६॥
रूपकेण तृतीयेन विद्यया हृदि वर्तते ।
देवदेवस्य रुद्रस्य विभोर्वै परमात्मनः ॥७॥
देवो गोपायतीत्येनं भगवान् ज्ञापयत्यपि ।
एष पुत्रश्च शिष्यश्च रक्ष्यो गोप्यश्च मे सदा ॥८॥
समस्तगणसामान्यो विज्ञातो भवति ध्रुवम् ।
सक्तुयावकपाकाशी षष्ठे काले प्रपत्स्यति ॥९॥

---

6. B1 अध्येषमाणाः कुर्वन्ति for अध्येषमाणः कुर्वीत
11. H2–3 संस्थाप्य for संस्नाप्य
12. B1 दर्भाग्रान्, H2–3 पूर्वांश्च for पूर्वाग्रान्
14. H2–3 जपेत्तु for जपेत् तत्
16. B1 रुद्रज्ञाने for रुद्रे ज्ञाते
19. H2–3 नापयति for गोपायति, H2–3 एवं for एनं
20. B1 तत् for मे
22. H2–3 स तु यावकशाकस्य for सक्तुयावकपाकाशी; H2–3 प्रणश्यति for प्रपत्स्यति

षण्मासैर्भगवन्तं प्रत्यक्षेण विचक्षणः ।
इत्याह भगवान् देवो ब्रह्मचारी सदाशिवः ॥१०॥
अथासौ सिद्धिकामः स्याच्छुद्धमूलफलाशनः ।
गोमूत्रयावकाहारो दधिसर्पिर्हविष्यभुक् ॥११॥
शाकाहारो जपेद्रुद्रमयुतं शिरसा सह ।
अभिषेकं तर्पणं च होमं ब्राह्मणभोजनम् ॥१२॥
दशांशसंख्यया विद्वान् कल्पयेद्भक्तिसंयुतः ।
भवन्ति सकला मन्त्राः सिद्धा वै जपिनो ध्रुवम् ॥१३॥
एकादशाहरेत् कुम्भान् स्वर्णरत्नविभूषितान् ।
फलपल्लवपुष्पादिसंयुक्तान् वस्त्रभूषितान् ॥१४॥
गन्धाम्भसाभिसंपूर्य रुद्रैकादशकेन तु ।
अभिमन्त्र्य स्वमन्यं वा स्नापयेत् सूपसृष्टकम् ॥१५॥
विनायकादिभिः काकपादाक्रान्तमथापि वा ।
मृतवत्सां ततो दोषैरेतैरन्यैर्विमुच्यते ॥१६॥
इति समस्तरुद्रस्य पुरश्चरणम् ॥ अथ पूजाविधिः—
अनध्याये तु रुद्राणामशुचिर्नैव कीर्तयेत् ।
शुचिश्च वेष्टयित्वाथ शिरः प्रावृत्य वस्त्रकैः ॥१॥
न जपेन्मुक्तकेशस्तु रक्तवासा विवस्त्रकः ।
जपेन्नभ्यक्तमात्रोऽपि श्वपाकानां च दर्शने ॥२॥
अस्नात्वा न जपेच्चैव जपन् पापं न कीर्तयेत् ।
अधोऽङ्गानि जपेन्नित्यमस्पृशन्नप्रमादतः ॥३॥

---

2. H2–3 अथवा for अथ
8. H2–3 हरन् for आहरेत्
11. B1 स्थापयेत् for स्नापयेत्
16. H2–3 अनध्यायासु for अनध्याये तु
17. B1 पथ्यनध्यायो वेष्टयित्वा तथा शिवः for वेष्टयित्वाथ ... वस्त्रकैः ।
18. B1 before न जपेन्मुक्त° adds उपावृत्तसुस्थानस्वस्तथाक्रमेति पादुकाः ।
19. B1 नात्युक्तमात्रोऽपि; H2 नाभ्यक्ताङ्गोऽपि for नाभ्यक्तमात्रोऽपि; श्वादिकानां for श्वपाकानां
20. B1 जपन्नायं for जपन् पापं
21. H2–3 अथो° for अधो°

शूद्रान्नं चैव यो भुङ्क्ते न च श्राद्धे च भोजनम् ।
त्रिरात्रोपोषितो भूत्वा रुद्रानेव स कीर्तयेत् ॥४॥
इत्याह भगवान् देवो ब्रह्मचारी सदाशिवः ।
त्रिसुपर्णं सुपर्णं च तथैवं मृत्युलाङ्गले ॥५॥
तथा सारस्वतं सूक्तं शुद्धवत्यस्तरत्समाः ।
कूष्माण्डपावमान्यश्च गायत्री च विशेषतः ॥६॥
रुद्रेष्वेव प्रविष्टानि सलिलं सागरे यथा ।
नानध्याये जपेद्रुद्रांस्तथैव नियमादृते ॥७॥
नानध्याये जपेद्वेदान् रुद्रांश्चैव विशेषतः ।
दशवर्जं जपन् रुद्रान् नित्यजापी निरामयः ॥८॥
तथा च सूत्रं स्वाध्यायोऽनध्याये न कर्मणि ।
एकादशगुणान् वाऽपि रुद्रानावर्त्य धर्मवित् ॥९॥
महापातकयुक्तोऽपि मुच्यते नात्र संशयः ।
रुद्रजापी शिवः पुण्यः पङ्क्तिपावन उत्तमः ॥१०॥
पितॄन् संतारयेद् विद्वान् दश पूर्वान् दशापरान् ।
एकतः सर्वपात्राणि रुद्रजापी तु चैकतः ॥११॥
श्रीरुद्रजापिने दत्तमनन्ताय प्रकल्पते ।
रुद्राध्यायी वसेद्यत्र ग्रामेऽथ नगरेऽपि वा ॥१२॥
न तत्र क्षुद्भयादीनि प्रभवन्ति कदापि च ।
य इमां पृथिवीं दद्यात् सुवर्णेनाप्यलंकृताम्
रुद्रैकादशकेनैव तुल्यं भवति वा न वा ॥१३॥

---

4. B1 त्रिसुपर्णः सुपर्णश्च पञ्चाग्निर् for त्रिसुपर्णं ... तथैवं
6. B1 कूष्माण्डा; H2 कूष्माण्डः for कूष्माण्ड°
8. B1 गृहीत° for तथैव
9. B1 शूद्रांश्चैव for रुद्रांश्चैव
10. B1 नित्यं जाप्यनिरा° for नित्यजापी निरा°
11. B1 स्वाध्यायेऽनध्याये न, H2–3 स्वाध्यायोऽनध्यायो न च for स्वाध्यायोऽनध्याये न
12. H2–3 आवृत्य for आवर्त्य
15. B1 रुद्रान् for विद्वान्
18. H2–3 वा for अथ
19. H2–3 भवन्ति क्व for प्रभवन्ति

एवं समस्तरुद्रमन्त्रस्य प्रतिमन्त्राणां च ऋषिच्छन्दोदेवताभिधानपूर्वकं समस्तव्यस्तमन्त्राणां न्यासध्यानपूर्वकं विनियोगाः कथिताः । श्रुत्यर्थनिरीक्षणव्याजेनापि मन्त्रार्थभूतः सदाशिवः प्रतीयते । तत्प्रतीतौ तत्प्रसादात् तदर्चनाभिरुचिः प्रजायते । ततः श्रीसदाशिवे भक्तिः । ततः श्रीसदाशिवतत्त्वज्ञानं श्रुत्याचार्येश्वरप्रसादाद् भवति । ततः समस्तपुरुषार्थसिद्धिरिति । एतत्प्रसङ्गेन छन्दः पुरुषाङ्गन्यासपूर्वकं श्रीवेदमूर्तिध्यानमभिधीयते । स्नात्वा सर्वोपद्रवनाशनं छन्दःपुरुषं शरीरे न्यसेत् । तिर्यग्बिलश्चमस ऊर्ध्वबुध्न्यश्छन्दः पुरुषस्य शिरोमुखे । गौतमभारद्वाजौ चक्षुषी । विश्वामित्रजमदग्नी श्रोत्रे । वसिष्ठकश्यपौ नासिके । गायत्रं शिरसि विन्यस्याग्निर्दैवतम् । एवमेवोष्णिक् सवितारं ग्रीवायाम् । अनूके बृहती बृहस्पतिः । पक्षौ बृहद्रथन्तरे । पार्श्वे द्यावापृथिवी । बाहुमध्ये मित्रः । ओमिन्द्रः त्रिष्टुप्मध्यं श्रोणीति । जगत्यादिभ्यः पार्श्वयोः सविता । नाभिरतिच्छन्दांसि । प्रजापतिर्मेढ्रे । यज्ञायज्ञीयमिति पायौ पुच्छे । वैश्वानरोऽपाने । ऊर्वोर्विश्वेदेवाः । अनुष्टुबष्ठीवन्ताविति । मरुतः पङ्क्तिः प्रतिष्ठा इति पादयोः । द्विपदा छन्दो विष्णुः । विच्छन्दांसि वायुः । प्राण ऊनातिरिक्तानीति । न्यूनाक्षरा(णि) छन्दांसि आपो देवता । ऊनातिरिक्तानीति इतराङ्गेषु । अत एवमेवाङ्गानि योजयित्वा ऋङ्मयो यजुर्मयः साममयो ब्रह्ममयोऽमृतमयः संभूय देवता अभ्येति । शापानुग्रहसमर्थो भवति । ब्राह्मं तेजश्च वर्धते । धर्मार्थकाममोक्षसाधनं दारिद्र्यदुःखशोकशमनमिति । विष्णुश्चाहेदं कात्यायनश्च—

1. H2-3 °रुद्रस्य for °रुद्रमन्त्रस्य; B1 °दैवतानि ध्यानपूर्वक° for देवताभिधानपूर्वकं
2. H2-3 साध्यासाध्यनमःपूर्वकं for न्यासध्यानपूर्वकं; B1 विनियोगः कथितः for विनियोगाः कथिताः
3. B1 om. तत्प्रतीतौ; H2-3 तद्वन्दन° for तदर्चन° and om. प्रजायते
4. H2-3 श्रोतुमाचार्येश्वर° for श्रुत्याचार्येश्वर°
5. H2-3 °पुरुषमङ्ग°, B1 °पुरुषमर्म° for °पुरुषाङ्ग°; H2-3 °वेदाध्ययनं, B1 देवमूर्तिध्यानम् for वेदमूर्तिध्यानम्
6. H2-3 ऊर्ध्वः for ऊर्ध्वबुध्न्यः
7. H2-3 चक्षुषि for चक्षुषी; H2-3 °काश्यपौ for कश्यपौ; H2-3 नासिकायां for नासिके, B1 गायत्रीं for गायत्रं
8. H2-3 °देवतं for दैवतं; B1 अनूकैः for अनूके; H2-3 बृहतीं for बृहती and om. बृहस्पतिः
9. B1 रथन्तरं for °रथन्तरे; H2-3 पार्श्वौ for पार्श्वे; H2-3 °मध्यस्थ for °मध्ये, B1 om. मित्रः; H2-3 om. ओमिन्द्रः
10. B1 नाभिमति°, H2-3 नाभि अति° for नाभिरति°; B1 पायूपस्थे for पायौ पुच्छे
11. B1 द्विपदी for द्विपदा
12. H2-3 °रिक्तादीनि for °रिक्तानीति; H2-3 छन्दः; B1 छन्दसा for छन्दांसि;
13. H2-3 om. ऊनाति .. देवता [L 14]
14. H2-3 अप्येति for अभ्येति
15. B1 after च ins. इति

वेदमूर्तिश्चतुर्वक्त्रो भुजैरष्टभिरावृतः ।
ऋग्वेदास्यो यजुःकुक्षिः सामचक्षुस्त्वथर्वहृत् ॥१॥
ऋचः पश्चिमवक्त्रं स्यात् यजुश्चोत्तरमुच्यते ।
साम पूर्वमुखं ज्ञेयमथर्वा दक्षिणं मुखम् ॥२॥
भवन्त्यवयवाश्चास्य शाखाभेदा महात्मनः ।
हिरण्मयं वपुस्तस्य श्मश्रुकेशौ हिरण्मयौ ॥३॥
पीतवस्त्रपरीधानं श्वेतवस्त्रोत्तरीयकम् ।
हारकेयूरमुकुटकुण्डलाद्यैर्विभूषितम् ॥४॥
आयुधानि चतुर्वेदा बाष्कलादिमयाः स्मृताः ।
ऋग्वेदादिमया ज्ञेयाः शङ्खचक्रगदाब्जकाः ॥५॥
मुसलादिधनुःपाशाः बाष्कलादिमया स्मृताः ।
शङ्खं गदां च मुसलं खड्गं दक्षोपरि स्मरेत् ॥६॥
चक्राब्जे शङ्खपाशौ च पार्श्वे चैवं तु संस्मरेत् ।
सर्वालंकारसंयुक्तं सर्वदेवनमस्कृतम् ॥७॥
मुनिभिः सिद्धगन्धर्वविद्याधरगणैर्वृतम् ।
पूजयेदीदृशं देवं कर्मबन्धविमोचनम् ॥८॥
वेदादिमन्त्रैर्वेदः स्याद्वेदमूर्त्यर्चनं बुधैः ।
मुख्यं पुरुषसूक्तेन सर्ववेदात्मकेन हि ॥९॥
चतुर्भिश्च चतुर्भिश्च मन्त्रैः प्रतिमुखं जपेत् ।
पश्चिमं वा षडावृत्त्या वक्त्रं चाद्यं प्रपूजयेत् ॥१०॥

---

1. B1 संवृतः for आवृतः
2. B1 कक्षी for °कुक्षिः
4. H2–3 सोमः for साम; H2–3 दक्षिणा° for दक्षिणं
5. B1 ये for °अस्य; B1 °भेदो for °भेदाः
10. B1 om. ऋग्वेदादि ... स्मृताः (L 11)
13. B1 वक्त्राब्जे for चक्राब्जे, B1 तामेवैवं for पार्श्वे चैवं
17. H2–3 वेदाद्य° for वेदादि°; B1 एव स्यादेवं for वेदः स्याद्वेद°
18. H2–3 मुखं for मुख्य; B1 °देवात्मकेन for °वेदात्मकेन
19. H2–3 यजेत् for जपेत्

स्वाङ्गे देवे च विन्यासः षोडशैरुपचारकैः ।
होमः पुष्पाञ्जलिर्जाप्यं षडावृत्तिरिमे क्रमात् ॥११॥
प्रत्यृचं मन्त्रराजेन संपुटीकृत्य षोडशैः ।
उपचारैश्च .... नरो मुक्तिमवाप्नुयात् ॥१२॥ इति ॥

* " अथातः शतरुद्रियं जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः । स एषोऽत्र रुद्रो देवता तस्मिन् देवा एतदमृतꣳ रूपमुत्तममदधुः । स एषोऽत्र दीप्यमानोऽतिष्ठदन्नमिच्छमानस्तस्माद्देवा अबिभयुर्यद्वै नोऽयं न हिꣳस्यादिति ॥१॥ तेऽब्रुवन्नन्नमस्मै संभराम तेनैनꣳ शमयामेति । तस्मा एतदन्नं समभरञ्छान्तदेवत्यं तेनैनमशमयꣳस्तद्यदेतं देवमेतेनाशमयंस्तस्माच्छान्तदेवत्यं शान्तदेवत्यं ह वै तच्छतरुद्रियमित्याचक्षते परोक्षं परोक्षकामा हि देवास्तथैवास्मिन्नयमेतदमृतꣳ रूपमुत्तमं दधाति । स एषोऽत्र दीप्यमानस्तिष्ठत्यन्नमिच्छमानस्तस्मा एतदन्नꣳ संभरति शान्तदेवत्यं तेनैनं शमयति ॥२॥ जर्तिलैर्जुहोति .... । यद्वेवैतच्छतरुद्रियं जुहोति प्रजापतेर्विस्रस्ताद्देवता उदक्रामंस्तमेक एव देवो नाजहान्मन्युरेव सोऽस्मिन्नन्तर्विततोऽतिष्ठत् । सोऽरोदीत् तस्य यान्यश्रूणि प्रास्कन्दꣳस्तान्यस्मिन् मन्यौ प्रत्यतिष्ठꣳस्स एव शतशीर्षा रुद्रः समभवत् सहस्राक्षः शतेषुधिरथ या अन्या विप्रुषोऽपतꣳस्ता असंख्याता सहस्राणीमांल्लोकाननुप्राविशꣳस्तद्यत् रुदितात् समभवंस्तस्माद्रुद्राः सोऽयं शतशीर्षा रुद्रः सहस्राक्षः शतेषुधिरधिज्यधन्वा प्रतिहितायो भीषयमाणोऽतिष्ठदन्नमिच्छमानस्तस्माद्देवा अबिभयुः ॥६॥ ते प्रजापतिमब्रुवन् अस्माद्वै बिभीमो यद्वै नोऽयं न हिꣳस्यादिति । सोऽब्रवीदन्नमस्मै संभरत । तेनैनꣳ शमयतेति । तस्मा एतदन्नं समभरञ्छतरुद्रियं .... तेनैनं शमयति ॥७॥ गवेधुकासक्तुभिर्जुहोति .... ॥१३॥ नमस्ते-रुद्रमन्यव इति य एवास्मिन्त्सोऽन्तर्मन्युर्विततोऽतिष्ठत् तस्मा एवैतन्नमस्करोत्युतो त इषवे नमो बाहुभ्यां .... भीषयमाणोऽतिष्ठत् । स एष क्षत्रदेवो यः शतशीर्षा रुद्रः समभवद् दिश इम इतरे ये विप्रुड्भ्यः समभवंस्तस्मा एतस्मै क्षत्रायैता विश एतं पुरस्तादुद्धारमुदहरन् । य एष प्रथमोऽनुवाकस्तेनैनमप्रीणंस्तथैवास्मा अयमेतं पुरस्तादुद्धारमुद्धरति तेनैनं प्रीणाति तस्मादेष एकदेवत्यो भवति रौद्र एतꣳ ह्येतेन प्रीणाति ॥१५॥ चतुर्दशैतानि यजूꣳषि भवन्ति । त्रयोदश मासाः संवत्सरः प्रजापतिश्चतुर्दशः .... ॥१६॥ .... अथ द्वन्द्विभ्यो जुहोति नमोऽमुष्मै चामुष्मै चेति तद्यथा वै ब्रूयादसौ त्वं चन एष च

---

1. B1 देवेक्ष° for देवे च
4. H2–3 ततो for नरो
5. * [लिखितपुस्तकेषु उद्धृतम् अत्रत्यं ब्राह्मणम् अशुद्धिबहुलम् । अतोऽस्माभिः शतपथब्राह्मणात् अत्रत्यो ग्रन्थः शुद्धीकृत्य प्रदत्तः ।]

मा हिꣳसिष्टमित्येवमेतदाह नतरां हि विदित आमन्त्रितो हिनास्ति ॥१७॥ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नम इत्येष एव हिरण्यबाहुः सेनानीरेष दिशां पतिस्तद् यत् किं चात्रैकदेवत्यमेतमेव प्रीणाति क्षत्रमेव तद्विश्यपिभागं करोति तस्माद्यद्विशस्तस्मिन् क्षात्रियोऽपिभागोऽथ या असंख्याताः सहस्राणीमाꣳल्लोकाननुप्राविशन्नेतास्ता देवता याभ्य एतज्जुहोति ॥१८॥ अथ जातेभ्यो जुहोत्येतानि .... रुद्राणां जातानि देवानां वै विधानमनु मनुष्यास्तस्मादु हेमानि मनुष्याणां जातानि यथाजातमेवैनानेतत् प्रीणाति तेषां वा उभयतोनमस्कारा अन्येऽन्यतरतोनमस्कारा अन्ये ते ह ते घोरतरा अशान्ततरा य उभयतोनमस्कारा उभयत एवैनानेतद्यज्ञेन नमस्कारेण शमयति ॥१९॥ स वा अशीत्यां च स्वाहा करोति प्रथमे चानुवाकेऽथाशीत्यामथाशीत्यां च यानि चोर्ध्वानि यजूँष्यवतानेभ्योऽन्नमशीतयोऽन्नेनैवैनानेनत् प्रीणाति ॥२०॥ अथैतानि यजूँषि जपति नमो वः किरिकेभ्य इत्येतद्वाऽस्य प्रतिज्ञाततमं धाम यथा प्रियो वा पुत्रो हृदयं वा तस्माद्यत्रैतस्मादेवाच्छङ्केत तदेताभिर्व्याहृतिभिर्जुहुयादुप हैवैतस्य देवस्य प्रियं धाम गच्छति ततो हैतमेष देवो न हिनस्ति ॥२१॥ नमो वः किरिकेभ्य इत्येते हीदꣳ सर्वं कुर्वन्ति देवानाꣳ हृदयेभ्य इत्यग्निर्वायुरादित्य एतानि ह जातानि देवानाꣳ हृदयानि नमो विचिन्वत्केभ्य इत्येते हीदं विचिन्वन्ति। नमो विक्षीणत्केभ्य इत्येते वै तं विक्षिणन्ति यं विचिक्षिषन्ति। नम आनिर्हतेभ्य इत्येते ह्येभ्यो लोकेभ्यो आनिर्हताः ॥२२॥ अथोत्तराणि जपति द्रापे अन्धसस्पत इत्येष वै द्रापिरेष वै तं द्रापयति यं दिद्रापयिष्यत्यन्धसस्पत इति सोमस्य पत इत्येतद् दरिद्र नीललोहितेति नामान्यस्यैतानि रूपाणि च नामग्राहमेवैनमैतत्प्रीणात्यासां प्रजानामेषां पशूनां मा भेर्मो रोङ्मो च नः किंचनाममदिति यथैव यजुस्तथा बन्धुः ॥२३॥ स एष क्षत्रं देवः .... एकदेवत्यो भवति रौद्र एवैतꣳ ह्येतेन प्रीणाति ॥२४॥ सप्तैतानि यजूꣳषि भवन्ति। सप्तचितिकोऽग्निः सप्तर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति। तान्युभयान्येकविꣳशतिः संपद्यन्ते द्वादशमासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳश एतामभिसंपदम् ॥२५॥ अथावतानाञ्जुहोत्येतद्वा एनान् देवा एतेनान्नेन प्रीत्वाथैषामेतैरवतानैर्धनूꣳष्यवातन्वꣳस्तथैवैनानयमेतदेतेनान्नेन प्रीत्वाऽथैषामेतैरवतानैर्धनूꣳष्यवतनोति न ह्यवततेन धनुषा कं चन हिनस्ति ॥२६॥ तद्वै सहस्रयोजन इत्येतद्ध परमं दूरं यत् सहस्रयोजनं तद्यदेव परमं दूरं तदेवैषामेतद्धनूꣳष्यवतनोति ॥२७॥ यद्वेवाह सहस्रयोजन इत्ययमग्निः सहस्रयोजनं न ह्येतस्मादिति नेत्यन्यत् परमस्ति तद्यदग्नौ जुहोति तदेवैषाꣳ सहस्रयोजने धनूꣳष्यवतनोत्यसंख्याता सहस्राण्यस्मिन्महत्यर्णव इति यत्र यत्रैते तदेवैषामेतद्धनूꣳष्यवतनोति ॥२८॥ दशैतानवतानाञ्जुहोति दशाक्षरा विराड्विराळग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैषामेतद्धनूꣳष्यवतनोति ॥२९॥ अथ प्रत्यवरोहाञ्जुहोत्येतद्वा एतदिमांल्लोकानित ऊर्ध्वो रोहति स स पराङिव रोह

इयमु वै प्रतिष्ठा ते देवा इमां प्रतिष्ठामभिप्रत्यायꣳस्तथैवैतद्यजमान इमां प्रतिष्ठामभिप्रत्यैति ।३०।। यद्वेव प्रत्यवरोहत्येतद्वा एनानेतत्प्रीणन्नन्ववैति तत एवैतदात्मानमपोद्धरते जीवात्वै ततो हानेनात्मना सर्वमायुरेति ॥३१।। यद्वेव प्रत्यवरोहत्येतद्वा एतदेता रुद्रानित उर्ध्वान् प्रीणाति तान् पुनरमुतोर्वाचः ॥३२।। नमोऽस्तु रुद्रेभ्यो ये दिवीति तद्येऽमुष्मिल्लोके रुद्रास्तेभ्य एतन्नमस्करोति येषां वर्षमिषव इति वर्षꣳ ह तेषामिषवो वर्षेण ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥३३॥ नमोस्तु रुद्रेभ्यो येऽन्तरिक्ष इति तद्येऽन्तरिक्षलोके रुद्रास्तेभ्य एतं नमस्करोति येषां वात इषव इति वातो ह तेषामिषवो वातेन ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥३४॥ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यमिति तद्येऽस्मिꣳल्लोके रुद्रास्तेभ्य एतन्नमस्करोति येषामन्नमिषव इत्यन्नꣳ ह तेषामिषवोऽन्नेन ह ते हिꣳसन्ति यं जिहिꣳसिषन्ति ॥३५॥ तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा इति दशदशेति दशाक्षरा विराड्विराळग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनानेतदन्नेन प्रीणाति ॥३६।। यद्वेवाह दशदशेति दश वा अञ्जलेरङ्गुलयो दिशिदिश्येवैभ्य एतदञ्जलिं करोति तस्मादु हैतद्भीतोऽञ्जलिं करोति तेभ्यो नमोस्त्विति तेभ्य एव नमस्करोति ते नो मृळयन्त्विति त एवास्मै मृळयन्ति ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्म इति यमेव द्वेष्टि यश्चैनं द्वेष्टि तमेषां जम्भे दधात्यमुमेषां जम्भे दधातीति ह ब्रूयाद्यं द्विष्यात् ततो ह तास्मिन्नपुनरस्त्यपि तन्नाद्रियेत स्वयं निर्दिष्टो ह्येव स यमेवं विद्वेष्टि ॥३७॥ त्रिष्कृत्वः प्रत्यवरोहति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनानेतदन्नेन प्रीणाति स्वाहाकारेणान्नं वै स्वाहाकारोऽन्नेनैवैनानेतत्प्रीणाति त्रिरित उर्ध्वो रोहति तत्षट् तस्योक्तो बन्धुर्यद्वेव त्रिष्कृत्वः प्रत्यवरोहति त्रिर्हिꣳकृत्व ऊर्ध्वो रोहति तद्यावत्कृत्व ऊर्ध्वो रोहति तद्यावत्कृत्व ऊर्ध्वो रोहति तद्यावत्कृत्व ऊर्ध्वो रोहति तावत्कृत्वः प्रत्यवरोहति ॥३८।। अथ तदर्कपर्णं चात्वाले प्रास्यत्येतद्वा एतेनैतद्रौद्रं कर्म करोति तदेतदशान्तं तदेतात्तिरः करोति नेदिदमशान्तं कश्चिदभितिष्ठात् नेद् हिनसदिति तस्माच्चात्वाले यद्वेव चात्वालेग्निरेष यच्चात्वालस्तथो हैनदेषोग्निः संदहत्यथातः संपदेव ॥३९।। तदाहुः कथमस्यैतच्छतरुद्रियꣳ संवत्सरमग्निमाप्नोति कथꣳ संवत्सरेणाग्निना संपद्यत इति षष्टिश्च ह वै त्रीणि शतान्येतच्छतरुद्रियमथ त्रिꣳशदथ पञ्चत्रिꣳशत् ततो यानि षष्टिश्च त्रीणि च शतानि तावन्ति संवसरस्याहानि तत्संवत्सरस्याहान्याप्नोत्यथ यानि त्रिꣳशात्त्रिꣳशन्मासस्य रात्रयस्तन्मासस्य रात्रीराप्नोति तदुभयानि संवत्सरस्याहोरात्राण्याप्नोत्यथ यानि पञ्चत्रिꣳशत् स त्रयोदशो मासः स आत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव पञ्चत्रिꣳशमेतावान्वै संवत्सर एवमु हास्यैतच्छतरुद्रियꣳ संवत्सरमग्निमाप्नोत्येवꣳ संवत्सरेणाग्निना संपद्यत एतावत्य उ वै शाण्डिलेऽग्नौ मध्यतो यजुष्मत्य इष्टका उपधीयन्तेऽग्नयो है ते पृथग्यदेता इष्टका एवमु हास्येतेऽग्नयः पृथक् शतरुद्रियेणाभिहुता भवन्ति ॥४०॥ तदाहुः कथमस्यैतच्छतरुद्रियं महदुक्थमाप्नोति कथं महतोक्थेन संपद्यत इति

यान्यमूनि पञ्चविꣳशतिर्यजूꣳष्यभितोऽशीतीः स पञ्चविꣳश आत्मा यत्र वा आत्मा तदेव शिरस्तत्पक्षपुच्छान्यथ या अशीतयः सैवाशीतीनामाप्तिरशीतिभिर्हि महदुक्थमाख्यायतेऽथ यदूर्ध्वमशीतिभ्यो यदेवादो महत उक्थस्योर्ध्वमशीतिभ्य एतदस्य तदेवमु हास्यैतच्छतरुद्रियं महदुक्थमाप्नोत्येवं महतोक्थेन संपद्यते ॥४१॥ अथैनमतः परिषिञ्चत्येतद्वा एनं देवाः शतरुद्रियेण शमयित्वाथैनमेतद्भूय एवाशमयꣳस्तथैवैनमेवमेतच्छतरुद्रियेण शमयित्वाथैनमेतद्भूय एव शमयति ॥१॥ अद्भिः परिषिञ्चति शान्तिर्वा आपः शमयत्यैवैनमेतत् सर्वतः परिषिञ्चति सर्वत एवैनमेतच्छमयति त्रिष्कृत्वः परिषिञ्चति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतच्छमयति ॥२॥ यद्वेवैनं परिषिञ्चति इमे वै लोका एषोऽग्निरिमाꣳस्तल्लोकानाद्भिः परितनोति समुद्रेण हैताꣳस्तत्परितनोति सर्वतस्तस्मादिमांल्लोकान्त्सर्वतः समुद्रः पर्येति दक्षिणावृत् तस्मादिमांल्लोकान् दक्षिणावृत् समुद्रः पर्येति ॥३॥ अग्नीत्परिषिञ्चत्यग्निरेष यदाग्नीध्रो नो वा आत्मात्मानꣳ हिनस्त्यहिꣳसाया अश्मनोऽध्यश्मनो ह्यापः प्रभवन्ति निकक्षान्निकक्षाद्ध्यापः प्रभवन्ति दक्षिणान्निकक्षाद्दक्षिणाद्धि निकक्षादापः प्रभवन्ति ॥४॥ अश्मन्नूर्जं पर्वते शिश्रियाणामित्यश्मनि वा एषोर्क् पर्वतेषु श्रिता यदापोऽद्भ्य ओषधीभ्यो वनस्पतिभ्यो अधि संभृतं पय इत्येतस्माद्ध्येतत् सर्वस्मादधि संभृतं पयस्तां न इषमूर्जं धत्त मरुतः सꣳरराणा इति मरुतो वै वर्षस्येशतेऽश्मꣳस्ते क्षुदिति निदधाति । अथैनं विकर्षति । मण्डूकेनावकया वेतसशाखयैतद्वा एनं देवाः शतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमपहत्याथैनमेतद्भूय एवाशमयंस्तथैवैनमयमेतच्छतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमहन्त्यथैनमेतद्भूय एव शमयति ॥५॥ " (शब्रा ९.१–९.२.२.५)

अथातो रुद्रस्नानार्चनविधिं व्याख्यास्यामः । अतिदेवतीर्थे स्नात्वोदेत्य शुचिः प्रयतो ब्रह्मचारी शुक्लवासास्तस्य दक्षिणा प्रत्यग् देशे तन्मुखः स्थित्वाऽऽत्मनि देवताः स्थापयेत् । प्रजनने ब्रह्मा तिष्ठतु । पादयोर्विष्णुस्तिष्ठतु । हस्तयोर्हरस्तिष्ठतु । पुरतः शूली तिष्ठतु । पार्श्वयोः शिवशंकरौ तिष्ठताम् । सर्वतो वायुस्तिष्ठतु । तनोर्बहिः सर्वतोऽग्निज्वालामालापरिवृतस्तिष्ठतु । सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु । मां संरक्षतु । अग्निर्मे वाचि श्रित इति यथालिङ्गमङ्गानि संमृश्य अथैनं गन्धाक्षतपुष्पधूपदीपैरात्मानं प्रति आराधयेत् ।

आराधितो मानुषैस्त्वं सिद्धैर्देवासुरादिभिः ।
आराधयामि शक्त्या त्वामनुगृहाण महेश्वर ॥

" त्र्यम्बकं यजामहे " इत्यथैनमावाहयेत् । " आ त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिः । वाताजितैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम् " इति च । " सद्योजातं प्रपद्यामि सद्योजाताय वै नमः " इत्यासनं दद्यात् । " भवे भवे नातिभवे भजस्व

माम् " इति पाद्यं दद्यात् । " भवोद्भवाय नमः " इत्यर्घ्यं ददाति । भवादिभिस्तर्पणम् । भूर्भुवस्स्वश्चण्डेश्वराय नम इत्युत्तरतो निर्माल्यं प्रक्षिप्य " वामदेवाय नमः " इत्यब्लिङ्गादिभिश्च स्नानं ददाति । " ज्येष्ठाय नमः " इति वस्त्रं ददाति । " श्रेष्ठाय नमः " इत्याचमनं ददाति । " रुद्राय नमः " इत्युपवीतम्; " कालाय नमः " इत्यलंकरणम्; " कलविकरणाय नमः " इति गन्धम्; " बलविकरणाय नमः " इत्यक्षतम्; " बलाय नमः " इति पाद्यम्; " बलप्रमथनाय नमः " इति धूपम्; " सर्वभूतदमनाय नमः " इति दीपम्; " मनोन्मनाय नमः " इति नैवेद्यं ददाति । अथास्मा अष्टभिर्मन्त्रैरष्टपुष्पाणि ददाति । भवाय देवाय नमः । शर्वाय देवाय नमः । ईशानाय देवाय नमः । पशुपतये देवाय नमः । रुद्राय देवाय नमः । उग्राय देवाय नमः । भीमाय देवाय नमः । महतो देवाय नमः । अथास्य अघोररुद्रतनुमुपतिष्ठते । " अघोरेभ्योऽथ घोरेभ्यः " इत्यादि । " तत्पुरुषाय विद्महे " इत्येषा रुद्रगायत्री । एतां सहस्रकृत्वो जपेत् । शतकृत्वोऽपरिमितकृत्वो वा दशानुवाकान् जपेत् ॥

" सर्वो वै रुद्रः । " रुद्राय नमो हिरण्यबाहवे " इति त्रिरनुवाकान् " सद्योजातम् " इति पञ्चानुवाकान् अन्यांश्च रौद्रमन्त्रान् यथाशक्तीत्येवमेकादशकृत्वो जपेत् । जपान्ते जपान्ते " अग्नाविष्णू सजोषसः " इत्येकादशानामनुवाकानामेकं जपेत् । सर्वेषामपाने पुनराराधयेत् । उत्तमाराधनं तदेतद्रुद्रविधानम् । पापक्षयार्थी व्याधिमोचनार्थी जीवनार्थी श्रीकामः शान्तिकामः पुष्टिकामस्तुष्टिकामो वृद्धिकामो मोक्षार्थी कुर्यात् । एवं कुर्वन् सिद्धिमाप्नोति । आचार्याय दक्षिणां दद्यात् । दश गावः सवत्साः सुवर्णभूषिताः ऋषभैकादशाः, तदलाभे एकां गां दद्यादित्याह भगवान् बौधायनः ।

अथात्मानं ध्यायेत्—

शुद्धस्फटिकसंकाशं त्रिनेत्रं च चतुर्भुजम् ।
पञ्चवक्त्रं दशभुजं सर्वाभरणभूषितम् ॥१॥
नागयज्ञोपवीतिनं व्याघ्रचर्मोत्तरीयकम् ।
कमण्डलु-अक्षसूत्रधरमभयहस्तं शूलहस्तम् ॥२॥
ज्वलन्तं कपिलजटं शिखामुद्योगकारिणम् ।
अमृतेनाप्लुतं हृष्टं दिव्यभोगसमाकुलम् ॥३॥

22. H2 °चर्मान्तरीयकम् for °चर्मोत्तरीयकम्

दिग्देवता समायुक्तं सुरासुरनमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥४॥
सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ।
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥५॥ इति शेषः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपुरीपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्ति- ५
साम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदश्रीमदानन्दबोधभट्टोपाध्यायेन
विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे सप्तदशोऽध्यायः ॥१७॥

5 H3 °परि° for °पुरी°

6. H3 त्यागराजोपाध्यायस्य for जातवेदभट्टोपाध्यायस्य and om. चतुर्वेदश्रीमदानन्दबोधभट्टोपाध्यायेन

ॐ

अष्टादशोऽध्यायः

[अथ प्रथमोऽनुवाकः ।]

हरिः ॐ ॥

अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्य ओषधीभ्यो
वनस्पतिभ्यो अधि संभृतं पयः ।
तां न इषमूर्जं धत्त मरुतः सꣳरराणा
अश्मꣳस्ते क्षुन्मयि त ऊर्ग् यं द्विष्मस्तं ते शुगृच्छतु ॥१॥

अश्मन् । ऊर्जम् । पर्वते । शिश्रियाणाम् । अद्भ्य इत्यत्ऽभ्यः । ओषधीभ्यः ।
वनस्पतिभ्य इति वनस्पतिऽभ्यः । अधि । संभृतमिति सम्ऽभृतम् । पयः ।
ताम् । नः । इषम् । ऊर्जम् । धत्त । मरुतः । सꣳरराणा इति सम्ऽरराणाः ।
अश्मन् । ते । क्षुत् । मयि । ते । ऊर्क् ।
यम् । द्विष्मः । तम् । ते । शुक् । ऋच्छतु ॥ द्रलौः ॥१॥

सा- यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

सप्तदशेऽध्याये चित्याग्नौ शतरुद्रियहोम उक्तः । अथाष्टादशे परिषेचनादिसंस्कारा उच्यन्ते । तत्र प्रथमेऽनुवाके परिषेचनविकर्षणादयोऽभिधीयन्ते ॥ कात्यायनः- "चित्यं परिषिञ्चत्यग्नीद्दक्षिणे कक्षे निकक्षेऽद्रिं कृत्वा अश्मन्नूर्जमिति" (काश्रौ १८·२·१) इति । दक्षिणबाहुमूले पाषाणमवस्थाप्य आग्नीध्रः चित्यग्निम्

14. S2 यस्य .. महेश्वरम् ॥ सप्तदशेऽध्याये शतरुद्रियहोम उक्तः । अष्टादशेऽध्याये चित्परिषेकादिमन्त्रा उच्यन्ते ॥
कात्यायनः - चित्यं परिषिञ्चत्यग्नीद्दक्षिणे निकक्षेऽद्रिं कृत्वाऽश्मन्नूर्जमित्यद्रेरधि" (काश्रौ १८.२.१) इति पक्षस्यापरसधिः कक्षस्तस्य समीपं निकक्षं दक्षिणपक्षान्तर-संधिसमीप आत्मभागेऽश्मानं निधायोदकुम्भमादाय अद्रेरारभ्य स्वपक्षपुच्छमग्निं प्रदक्षिणं जलधारया समन्तादग्नीत् सिञ्चतीत्यर्थः । पाठस्तु- 'अश्मन्नूर्ज ... सꣳरराणा' इति । हे मरुतः तां प्रसिद्धमिषमन्नम् ऊर्जं रसं च नोऽस्मभ्यं धत्त दत्त यूयम् । किं भूता यूयम् । संरराणाः सम्यक् रान्ति ददति ते संरराणाः । सम्यक् दातारः । रा दाने । बहुलं

परिषेचनादिसंस्कारमन्त्राः]

'अश्मन्नूर्जम्' इति मन्त्रेण परिषेचनं कुर्यात् । पाठस्तु– 'अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्य ओषधीभ्यो वनस्पतिभ्यो अधि सम्भृतं पयः । तां न इषमूर्जं धत्त मरुतः सꣳरराणाः' इति । हे ᵛमरुतः, ᵛसꣳरराणाः सम्यग्दानशीलाः यूयं ᵛताम् अग्न्यादिगताम् ᵛऊर्जं बलहेतुं ᵛइषम् अन्नं ᵛनः अस्मभ्यं ᵛधत्त संपादयत । कीदृशीमिषम् । अश्मनि पाषाणे पर्वते मेरुविन्ध्यहिमवदादौ । यद्वा–ᵛअश्मन् अश्मवति उदकवति ᵛपर्वते मेघे ᵛशिश्रियाणाम् आश्रिताम् ᵛऊर्जं सारभूताम् । तथा ᵛअद्भ्यः जलेभ्यः ᵛओषधीभ्यः व्रीहियवादिभ्यः वनस्पतिभ्य उदुम्बरादिभ्यः सकाशात् ᵛअधि ᵛसंभृतम् आधिकत्वेन सम्यक् संपादितं यत् पयोलक्षणमन्नं तथाविधं प्रयच्छत ॥

कात्यायनः – "अश्मंस्ते क्षुदित्यद्रौ कुम्भं कृत्वा" (काश्रौ १८·२·२) इति । पाषाणे कुम्भं स्थापयेत् । हे ᵛअश्मन्, इष्टकाभिर्दृढं निष्पीडितत्वात् पाषाणसदृशाग्ने, ᵛते त्वदीया या ᵛक्षुत् सा मम वैरिणं प्राप्नोतु ॥

(Continued from last Page)

छन्दसीति जुहोत्यादिभ्य श्लुर्द्वित्वं च शानचि परि । कीदृशम् । इषम् ऊर्जम् अश्मन् अश्मनि पाषाणे पर्वते विन्ध्यहिमवदादौ शिश्रियाणाम् । श्रयतीति शिश्रियाणा । श्रयतेः शानचि जुहोत्यादि द्वित्वम् । तथा ऊर्जं सारभूतं बलहेतुम् । यद्वा– पर्वाणि विद्यन्ते यस्मिन् स पर्वतः । पर्वमरुद्भ्यां तप्प्रत्ययः । अश्नातीत्यश्मा । 'अन्येभ्योऽपि दृश्यते' इति अश्नातेर्मनिन् । अशनवति पर्वते मेघे ऊर्जं जलं शिश्रियाणाम् । आश्रितां वृष्टिसंपाद्यामित्यर्थः । तथा अद्भ्यः जलेभ्यः ओषधीभ्यो यवादिभ्योऽश्वत्थादिभ्यः सकाशात् अधि संभृतम् अधिकं संपादितम् । गोद्वारेण पयो दुग्धं च । शिश्रियाणाम् । गौरपः पीत्वौषधिवनस्पतीन् भक्षयित्वा पयो दोग्धि । तां द्विरूपां मेघोत्थां जलरूपां गोसमुत्थां पयोरूपां चेषमूर्जं ददातीत्यर्थः । 'मरुतो हि वर्षस्येशते' इति श्रुतेः ॥ कात्यायनः "अश्मंस्ते क्षुदित्यद्रौ कुम्भं कृत्वा मयि त ऊर्गित्यादायैवं द्विरपरम्" (काश्रौ १८.२.२) इति । सेकान्ते अश्मनि कुम्भम् ... अश्मंस्ते क्षुत् इति निधाय मयि ते इति पुनरादाय पुनर्द्विवारं परिषिञ्चेदित्यर्थः । पाठस्तु– 'अश्मंस्ते क्षुन्मयि ते ऊर्क् इति । अश्नातीत्यश्मा । हे अश्मन् सर्वभक्षक अग्ने ते तव क्षुत् क्षुधा अस्तु । बहुहविषां भोज्यत्वात् । कुम्भमादत्ते मयि ते । हे अश्मन् ते तव ऊर्क् सारभागो मयि अस्त्विति शेषः ।। कात्यायनः – "कुम्भेऽद्रिं कृत्वा दक्षिणस्यां वेदिश्रोणौ प्राङ् तिष्ठन् दक्षिणास्यति यं द्विष्म इति" (काश्रौ १८.२.४) इति । तं पाषाणं कुम्भे कृत्वा दक्षिणवेदिश्रोणौ पूर्वमुखास्तिष्ठन् दक्षिणस्यां दिशि साश्मानं घटं निरस्यतीत्यर्थः । पाठस्तु– यं द्विष्मस्तं ते शुगृच्छत्विति । तं कम् । वयं यं नरं द्विष्मः । अस्मद्द्वेषविषयं तव शोको गच्छतु ॥१॥ for यस्य निःश्वसितम् ... ऋच्छतु गच्छतु [P 490 L 6]

1. P1 after पाठस्तु adds अतिशक्वरी मरुद्देवत्या । सर्वस्याध्यायस्य परमेष्ठी ऋषिः सामान्यतः

3. P1 अस्मादिमतीम् for अग्न्यादिगताम्

8. P1 with markings above अश्मंस्ते ins. in the margin मरुद्दैवत्यं यजुः

9. P1 with markings above ते ins. in the margin पूर्ववत्

कात्यायनः – " मयि त उर्गित्यादाय " (काश्रौ १८·२·२) इति । पाषाणेऽवस्थापितमुदकुम्भं गृह्णीयात् । हे पाषाण, vते त्वदीया या vऊर्क् सारभूता सा तु vमयि एव तिष्ठतु ॥

कात्यायनः – " दक्षिणस्यां वेदिश्रोणौ प्राङ्तिष्ठन् दक्षिणाऽस्यति यं द्विष्मः " इति (काश्रौ १८·२·४) इति । नैर्ऋतिदिग्भ्य आमित्या महावेदेः श्रोणौ प्राङ्मुखो भूत्वा दक्षिणस्यां दिशि कुम्भं प्रक्षिपेत् । 'तं ते शुगृच्छतु ' इति मन्त्रशेषः । हे पाषाणसदृशाग्ने, वयं vयं पुरुषं प्रति vद्विष्मः द्वेषं कुर्मः vतं पुरुषं प्रति vते त्वदीया vशुक् शोकः vऋच्छतु गच्छतु ॥१॥

आ– अथाध्वर्युरुदकुम्भमादायाग्निं परिषिञ्चति । ' अश्मन्नूर्जम् ' इति । अतिशक्वरी मरुद्देवत्या । परमेष्ठी पञ्चमीं चितिमपश्यत् । परमेष्ठिन एव तस्यार्षमित्यभिहितत्वात् । पञ्चमचिति-विषयसर्वमन्त्राणां स एव ऋषिरित्यभिहितम् । ऋषिविशेषोक्तौ तु विशेषो द्रष्टव्यः । अन्यथाऽपि स एवानुवर्तते । उदकुम्भमुत्कृष्याह vअश्मन् इति । अश्मेति मेघनाम । अश्मन् । व्यत्ययः । अश्मनि अशनवति । अशनमुदकम् । उदकवति vपर्वते । पर्ववति उदकवति मेघे ।

---

7. H2–3 before अथ add—

हरिः ओम् । वाजिवारणसंपूर्णं दिव्यनारीसमावृतम् ।
सदान्नपूर्णममलं ध्यायेच्छंकरशंकरम् ॥१॥
षण्मुखं प्रणवोद्धूतं ज्ञानमात्रं परं प्रभुम् ।
मयूरवाहनं सूनुं शंभोर्वागर्थसिद्धये ॥२॥
गजाननाय शान्ताय शंकराय महोदये (?) ।
कात्यायनाय कन्दाय जगतां विष्णवे नमः ॥३॥
श्रीमद्वक्षःस्थलं विष्णोः श्रीमणिद्युतिभासुरम् ।
गङ्गाप्रसूतिपादाब्जं वारिजाक्षं नमाम्यहम् ॥४॥
सुरभिसमाजुष्टं चिन्तामणिविभूषितम् ।
कल्पद्रुमतरोर्मूले विक्रमारूढमाश्रये ॥५॥
सर्ववागर्थसिद्ध्यर्थं सर्वाभरणभूषितम्
प्रसन्नवक्त्रमखिलं ज्योतिषां पतिलोचनम् ॥६॥
चन्द्रमण्डलमध्यस्थं चक्रवारिजवाहनम् ।
जगदानन्दमूर्तिं च विष्णुब्रह्मेन्द्रपूजितम् ॥७॥
जाह्नवीवारिवाहार्हाममलामखिलां शुभाम् ।
शुद्धवर्णार्थसंसारां वन्दे वागीश्वरीं शिवाम् ॥८॥ हरिः ओम् ।;

H2–3 उदक° for उद०

8. H2–3 परमेष्ठिनमेवमस्या ऋषेयम्; B1 परमेष्ठिन एव तस्यार्षेयम् for परमेष्ठिन एव तस्यार्षम्

9. H2–3 om. °सर्व°

10. B1 कुम्भे मेघीकृत्य for °कुम्भमुत्कृष्य; B1 om. अश्मेति

परिषेचनादिसंस्कारमन्त्राः]

vशिश्रियाणाम् भृशं वर्तमानां मेघमाश्रितां मेघमनुसेवमानां वा देववृष्टिं, गोष्ववस्थिताम् vऊर्जं पयोलक्षणां vतां हे vमरुतः। मरुतो नाम देवाः। vनः अस्मभ्यं vधत्त दत्तेति संबन्धः। कथंभूतामिषमूर्जं च कथंभूता यूयं धत्तेति। 'अद्भ्य ओषधीभ्यो वनस्पतिभ्यो अधि संभृतं पयः' इति। अप् इति भूमेः रसः, vअद्भ्यः भूम्युपरि वर्तमानाभ्यश्च vअधि सकाशात् सूर्यरश्म्यनुगृहीतैर्मरुद्भिश्च vपयः आहृत्य मेघे vसंभृतम्, vओषधीभ्यः फलपाकान्ताभ्यश्च अधि सकाशात् यदाहृत्य संभृतम्। vवनस्पतिभ्यः इत्युपलक्षणम्। सर्वरसस्य सर्वेभ्यः पदार्थेभ्यः रसमावृत्य मेघे यत् संभृतम्। एवं पर्वते मेघे कुम्भलक्षणे वा मेघे यत् पयः रसरूपं संभृतं, तस्य पयसः vइषं वृष्टिम्। यदभीष्टवर्षणं vतां वृष्टिं vसंरराणाः। 'रा दाने'। सम्यक् प्रयच्छन्तः हे मरुतः। दत्तेति संबन्धः। किमर्थमिति। अद्भ्यः जलार्थम्। ओषधीभ्यः ओषध्यर्थम्। वनस्पतिभ्यः वनस्पत्यर्थम्। vनः अस्मभ्यं तामिषमूर्जं च दत्त। "मरुतो वै वर्षस्येशते" (शब्रा ९.१.२.५) इति श्रुतेः॥

कुम्भमश्मनि निदधाति। 'अश्मंस्ते' इति। हे vअश्मन्, vते तव संबन्धिनी जलव्ययनिमित्ता या vक्षुत् प्रयुक्ता, या च vशुक् ते तव संबन्धिनी शुक् शोकश्च वयं vयं पुरुषं vद्विष्मः यं प्रति द्वेषं कुर्मः vतं पुरुषं शुक् vऋच्छतु। vते vऊर्क् सामर्थ्यं च तिष्ठत्विति ॥१॥

इमा मे अग्न इष्टका धेनवः सन्त्वेका च दश च दश च शतं च शतं च।
सहस्रं च सहस्रं चायुतं चायुतं च नियुतं च नियुतं च ॥२॥

इमाः। मे। अग्ने। इष्टकाः। धेनवः। सन्तु। एका। च। दश। शतम्।
सहस्रम्। अयुतम्। नियुतमिति निऽयुतम्। गीं॥२॥

अर्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च।
एता मे अग्न इष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके ॥३॥

---

1. B1 om. मेघमाश्रितां॰; H2–3 इषं for देव॰; H2–3 स्थितां॰ for अवस्थितां
4. H2–3 रसस्य for रसः, B1 H2–3 भूताभ्यः for अद्भ्यः
5. H2–3 मरुद्भ्यः for मरुद्भिः

अर्बुदम् । न्यर्बुदमिति निऽअर्बुदम् । समुद्रः ।
मध्यम् । अन्तः । परार्ध इति परऽअर्धः ॥
एताः । मे । अग्ने । इष्टकाः । धेनवः । सन्तु । अमुत्र । अमुष्मिन् । लोके ॥ त्र्युं ॥३॥

ऋतव स्थ ऋतावृध ऋतुष्ठा स्थ ऋतावृधः ।
घृतश्च्युतो मधुश्च्युतो विराजो नाम कामदुघा अक्षीयमाणाः ॥४॥

ऋतवः । स्थ । ऋतावृधः । ऋतवृध इत्यृतऽवृधः ।
ऋतुष्ठाः । ऋतुस्था इत्यृतुऽस्थाः । स्थ । ऋतावृधः । ऋतवृध इत्यृतऽवृधः ।
घृतश्च्युत इति घृतऽश्च्युतः । मधुश्च्युत इति मधुऽश्च्युतः ।
विराज इति विऽराजः । नाम । कामदुघा इति कामऽदुघाः । अक्षीयमाणाः ॥ छिंर ॥४॥

सा– कात्यायनः – "अनपेक्षमेत्योदङ् प्राङ्तिष्ठन् जपतीमा म इति" (द्र. काश्रौ १८·२·१०) इति । पूर्वोत्तरयोर्मध्ये स्थित्वा जपेत् । पाठस्तु– 'इमा मे अग्न इष्टका धेनवः सन्त्वेका च दश च दश च शतं

10. S2 कात्यायनः – अनपेक्षमेत्योदङ् तिष्ठन्नात्मन उपरि प्रापणान्ते जपतीमा म इति (काश्रौ १८.२.१०) इति । कुम्भनिरसनानन्तरमपश्यन्नेत्य दक्षिणवेदिश्रोणिसमीपे ईशानाभिमुखस्तिष्ठन्नात्मन उपरि हस्तौ प्रसार्य यावत् स्प्रष्टुं शक्नोति तावत् स्पृष्ट्वेमा म इति कण्डिकाद्वयं स्वरेण जपतीत्यर्थः । पाठस्तु इमा मे अग्न . नियुतं च ॥ अर्बुदं च ... लोके इति । हे अग्ने या इष्टकाः पञ्चसु चितिषूपहिता इमा इष्टका मे मह्यं मदर्थं धेनवोऽभिमतफलदोग्ध्र्यः सन्तु । त्वत्प्रसादादस्मिंल्लोक इति शेषः। तासां संख्यामाह एकेत्यादि । अत्रैकादिपरार्धपर्यन्तैः शब्दैरुत्तरोत्तरं दशदशगुणिता संख्योच्यते । एका एकत्वसंख्याविशिष्टा सा दशगुणिता दशसंख्यामापद्यते । सा दशगुणिता शतं भवति । पूर्वसंख्यासहितोत्तरसंख्याग्रहणम् आधिक्याय । शतं दशगुणितं सहस्रं भवति । सहस्रं दशगुणितमयुतं भवति । अयुतं दशगुणितं नियुतं भवति । अर्बुदं दशगुणितं न्यर्बुदं भवति । न्यर्बुदशब्देनाब्जसंख्या ज्ञेया । एतेषां ग्रहणम् अब्जसमुद्रान्तर्वर्तिनीनां खर्वमहापद्मशङ्कुसंज्ञानां संख्यानामुपलक्षकम् । तेनाब्जं दशगुणं खर्वम् । खर्वं दशगुणं निखर्वम् । निखर्वं दशगुणं महापद्मम् । महापद्मं दशगुणं शङ्कुः । शङ्कुर्दशगुणः समुद्रः । समुद्रो दशगुणो मध्यम् । मध्यं दशगुणमन्तः । अन्तो दशगुणः परार्धः । चकारा इतरेतरसमुच्चयार्थाः । एवमेकाद्यष्टादशसंख्यासंमिता इष्टका एता हे अग्ने मे धेनवः सन्त्विति पूर्वोक्तस्य निगमनम् । एतद्धेनुभवनं कुत्रार्थ्यते तदाह अमुत्र अन्यजन्मनि । तथा अमुष्मिन् लोके स्वर्गे सर्वत्र इष्टदाः सन्त्वित्यर्थः । यद्यपि नियतसंख्येयेष्टकाश्चीयन्ते तथापि मन्त्रसामर्थ्याद्वर्धमाना एकादिपरार्धान्तसंख्या भवतीति भावः ॥ द्वितीयमन्त्रपाठस्तु– ऋतव स्थः ... अक्षीयमाणा इति । अपि च हे इष्टका ... for कात्यायनः ... अपि च हे इष्टकाः [P 493 L 13]

11. P1 after पाठस्तु adds आग्नेयं यजुः।

परिषेचनादिसंस्कारमन्त्राः]

च शतं च । सहस्रं च सहस्रं चायुतं चायुतं च नियुतं च नियुतं च ॥ अर्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च । एता मे अग्न इष्टका धेनवः सन्त्वमुत्रामुष्मिंल्लोके ॥ ऋतव स्थ ऋतावृध ऋतुष्ठा स्थ ऋतावृधः । घृतश्चुतो मधुश्चुतो विराजो नाम कामदुघा अक्षीयमाणाः ' इति । हे अग्ने, या इष्टकाः पञ्चचितीपूपहिताः [ता] इमाः इष्टकाः मह्यं मदर्थं त्वत्प्रसादात् धेनवः अभिमतफलस्य दोग्ध्र्यः सन्तु । लोकान्तरे गोरूपा भूत्वा कामदुघा भवन्त्वित्यर्थः । कियत्यस्ता इष्टका इति तत्संख्यामाह ' एका ' इत्यादिना । अत्रैकादिपरार्द्धपर्यन्तैः शब्दैरुत्तरोत्तरं दशगुणिता संख्योच्यते । एका एकत्वसंख्याविशिष्टा या इष्टका सा दशगुणिता सती दशसंख्यामापद्यते । सा च दशगुणिता सती शतसंख्यामापद्यते । तच्च शतं दशगुणितं सत् सहस्रसंख्यं भवति । अयुतं च दशगुणितं सत् नियुतं भवति । नियुतं च दशगुणितम् अर्बुदं भवति । अनयैव दृष्ट्या परार्ध्यपर्यन्तं दशगुणितोत्तरोत्तरा संख्योदाहर्तव्या । यद्यपि सहस्रादिनियतसंख्या एवेष्टका उपधीयन्ते तथापि मन्त्रसामर्थ्यात् वर्धमाना एकादिपरार्द्धपर्यन्तसंख्येया भवन्ति । ' एका च ' इत्यादिषु चशब्द इतरेतरसमुच्चयार्थः । एवमेकादिसंख्याक्रमेणाभिवृद्ध्या या इष्टकाः [सन्ति] एता [स्ता] इष्टकाः हे अग्ने, त्वत् प्रसादात् मे मह्यं धेनवः सन्तु इति पूर्वोक्तस्य निगमनम् । एतद्धेतुभवनं कुत्रेति तदाह ' अमुत्र ' इति । अमुत्र परलोके तत्रापि अमुष्मिन् उपरितने नाकपृष्ठाख्ये लोके । अपि च हे इष्टकाः, यूयम् ऋतवः स्थ भवथ वसन्ताद्यात्मिका भवथ । ऋतं सत्यं यज्ञं वर्धयतीति ऋतावृधः । ऋतुष्ठाः ऋतुषु वसन्तादिषु तिष्ठन्त्यः स्थ भवथ । ' ऋतावृधः ' इति पुनर्वचनमादरार्थम् । घृतं श्च्योतन्तीति घृतश्चुतः घृतस्राविण्यः । मधुश्चुतः मधु माक्षिकं स्रवन्त्यः । एवंगुणविशिष्टा भवथ । ता यूयं विराजः नाम । विशेषेण राजत इति विराजः । विराज इति प्रसिद्धा धेनवो भूत्वा लोकान्तरे कामदुघाः यद्यत्कामयते तस्य सर्वस्य दोग्ध्र्यो भवथ । तथा अक्षीयमाणाः क्षयरहिताश्च भवथ ॥२-४॥

आ— एवं शान्तदेवत्येन शतरुद्रियेण होमाभिषेचनाभ्यां शान्तिमुपगतमग्निमभिमृश्य ' इमा मे ', ' अर्बुदं च ' इति द्वाभ्यां खण्डिकाभ्यां इष्टका धेनूः कुरुते । ' इमा मे ' इति । आग्नेयं यजुः । द्वितीया बृहती पङ्क्तिर्वा । हे श्रीभगवन्नग्ने, या इमाः प्रतीयमानाः प्रकृताः मदीयाः इष्टकाः धेनवः, धिन्वन्तीति धेनवः, अमृतदोग्ध्र्यः सन्तु भवन्तुः, धेनव इवोपजीवनीया भवन्तु, अभिलषितार्थप्रदा भवन्तु । कुत्रेति । अमुत्र जन्मान्तरे स्वर्गादौ वा । अमुष्मिन् । लक्षणया अस्मिन् लोके इष्टका धेनवः सन्त्विति संबन्धः । किंसंख्याकास्ता इष्टका इति तत्संख्यामाह— ' एका च ' इत्यादिना । एकत्वविशिष्टा संख्या । प्रथमस्थानमारभ्य तां च संख्यां दशगुणीकृत्य अत्र लब्धसंख्यामपि दशगुणीकृत्यैवं परार्धपर्यन्तं पूर्वपूर्वसंख्या प्रवर्धमाना

---

21. B1 om. याः
22. B1 om. धिन्वन्तीति धेनवः; B1 om. धेनव इवोपजीवनीया भवन्तु । अभि° ... भवन्तु।
23. B1 oms. अमुत्र
24. B1 अस्य for ताः
25. B1 एकत्वेन for एकत्व°; B1 H2-3 °विशिष्टां संख्यां for °विशिष्टा संख्या; B1 oms. प्रथम ... संख्यां [L 26]
26. B1 पूर्वसंख्या for पूर्वपूर्वसंख्या

अष्टादशस्थाने संख्योपविष्टा पर्यवस्यति । तत्रापि पूर्वार्धपरार्धेति प्रसिद्धिः । तदाह– ' एका च दश च दश च शतं च शतं च सहस्रं च सहस्रं च अयुतं च दशसहस्रं च अयुतं च नियुतं च च दशलक्षं च कोटिश्च अर्बुदं च न्यर्बुदं च समुद्रश्च संख्यास्थानं मध्यं च अन्तश्च परार्धश्च ' इति । खर्वं महाखर्वं पद्मं महापद्मं चेति स्थानानां स्थानान्तरं प्रक्षेप्तव्यम् । अत्रायं भावः । एकं दश शतं सहस्रम् अयुतं नियुतं दशनियुतं कोटिः दशकोटिरर्बुदं न्यर्बुदं समुद्रः मध्यम् अन्तश्च खर्वं महाखर्वं पद्मं महापद्मं इत्येतान्यष्टादशस्थानानि क्षेरण्याख्याभिरभिवर्णयन्ति केचित् । एवमेवास्त्यपरार्धः । एषां गुणीभावः परार्ध इति । एवंविधसंख्याविशिष्टा इष्टका मम धेनवः सन्त्विति संबन्धः ॥२–३॥

' ऋतव स्थ ' इति । बृहती पङ्क्तिर्वा । इष्टकादेवत्या । या इष्टकास्ता यूयम् [V]ऋतवः [V]स्थ भवथ । ऋतं सत्यं वर्धयन्तीति ऋतवृधः । छान्दसो दीर्घः । [V]ऋतावृधः । स्वयम् ऋतुषु वसन्तादिषु तिष्ठन्तीति [V]ऋतुष्ठाः [V]स्थ भवथ । ऋतावृधः इति पुनर्वचनमादरार्थम् । घृतं श्च्योतन्तीति वा [V]घृतश्चुतः घृतस्राविण्यः । [V]मधुश्चुतः । तथा मधुस्राविण्यः इष्टकाः । विशेषेण राजन्त इति [V]विराजः । [V]नाम प्रसिद्धौ । [V]कामदुघाः । लोकंपृणेष्टकाभिप्रायोऽयम् । कामदोग्ध्यो भवथ । [V]अक्षीयमाणाः क्षयमप्राप्यमाणाश्च भवथ ॥४॥

समुद्रस्य त्वाऽवंकयाऽग्ने परिं व्ययामसि ।
पावको अस्मभ्यं शिवो भव ॥५॥

समुद्रस्यं । त्वा । अवंकया । अग्ने । परिं । व्ययामसि ।
पावकः । अस्मभ्यम् । शिवः । भव ॥ षं ॥५॥

सा– कात्यायनः – " मण्डूकावकावेतसशाखावेणौ बद्ध्वा कर्षति समुद्रस्येति प्रत्यृचम् " (काश्रौ १८·२·१०) इति । मण्डूकादीन् दीर्घवंशाग्रे बद्ध्वा तेन ' समुद्रस्य त्वा ' इत्यादिभिः सप्तभिः ऋग्भिः प्रतिमन्त्रं चित्यमग्निं विकृषेत् । यथाग्नेरुपरि सर्वत्र मण्डूकादिभिः स्पर्शो भवति तथा दीर्घवंशाग्रेण

---

1. B1 °स्थानं° for °स्थाने
4. H2–3 om. स्थानानां
5. B1 om. दशकोटिः
6. B1 संख्याण्याभिरपि for क्षेरण्याख्याभिरभि°
7. H2-3 द्विगुणं for गुणी°
11. B1 trans. पुनर्वचनम् after आदरार्थ°
20. P1 चित्यमग्निं° समुद्रस्येत्यादिसप्तभिर्ऋग्भिर्विकृषेत् for मण्डूकादीन्... विकृषेत् [L 21]

परिषेचनादिसंस्करामन्त्राः]

कर्षेदित्यर्थः । तत्र प्रथमा- 'समुद्रस्य त्वाऽवकयाग्ने परि व्ययामसि । पावको अस्मभ्यꣳ शिवो भव ' इति । अवका शैवालम् । हे V अग्ने, त्वां Vसमुद्रस्य Vअवकया समुन्दनशीलस्य उदकस्य संबन्धिना शैवालेन Vपरि Vव्ययामसि परितः संवरणं कुर्म उपरिभागे सर्वत्र विकर्षाम इत्यर्थः । त्वं च Vअस्मभ्यम् अस्मदर्थं Vपावकः शोधकः Vशिवः शान्तश्च Vभव ॥५॥

आ– अग्निक्षेत्रं सप्तभिराग्नेयीभिर्ऋग्भिर्विकर्षति– 'समुद्रस्य त्वा ' इति । आग्नेयी गायत्री । हे श्रीभगवन् Vअग्ने, त्वामग्निं Vसमुद्रस्य समुन्दनस्य उदकस्य संबन्धिन्या Vअवकया वेतसशाखया । 'अप्सुयोनिर्वै वेतसः ' इति श्रुतेः । Vपरिव्ययामसि परिव्ययामः । संवरणं कुर्मः । इकारच्छान्दसः । एवं परिवीतस्त्वं Vपावकः पावयिता Vअस्मभ्यं Vशिवः शान्तो भव ॥५॥

हिमस्य त्वा जरायुणाग्ने परि व्ययामसि ।
पावको अस्मभ्यꣳ शिवो भव ॥६॥

हिमस्य । त्वा । जरायुणा । अग्ने । परि । व्ययामसि ।
पावकः । अस्मभ्यम् । शिवः । भव ॥ षां ॥६॥

सा– अथ द्वितीया-' हिमस्य त्वा जरायुणाग्ने परि व्ययामसि । पावको अस्मभ्यꣳ शिवो भव ' इति । हे Vअग्ने, त्वां Vहिमस्य शैत्यस्य Vजरायुणा जरायुवदुत्पत्तिस्थानीयेन शैवालेन । शेषं पूर्ववत् ॥६॥

आ– अथैनं विकर्षति । मण्डूकेन वेतसशाखयैनद्वयेन (?) । " एनं देवाः शतरुद्रियेण चाद्भिश्च शमयित्वाथैनमेतत् भूय एव शमयति " इति श्रुतेः । ' हिमस्य त्वा जरायुणा ' इति । आग्नेयी गायत्री । हे श्रीभगवन् Vअग्ने, Vहिमस्य शीतस्य Vजरायुणा यमग्निं त्वां हिमवेष्टनेन Vपरि Vव्ययामसि परिव्ययामः । एवं परिवेष्टितस्त्वं Vपावकः Vअस्मभ्यं Vशिवः Vभव ॥६॥

---

1. P1 after प्रथमा adds आग्नेयी गायत्री
2. S2 शेवालम् for शैवालम्; S2 शेवालेन for शैवालेन
6. B1 after अग्निं add त्वां
8. H2-3 °धीतस्त्वं for °वीतस्त्वं
13. B1 after द्वितीया adds पूर्ववत्
14. S2 शेवालेन for शैवालेन
15. P1 एनां for एनं

उप ज्मन्नुप वेतसेऽव तर नदीष्वा ।
अग्ने पित्तमपामसि मण्डूकि ताभिरा गहि
सेमं नो यज्ञं पावकवर्णꣳ शिवं कृधि ॥७॥

उप । ज्मन् । उप । वेतसे । अव । तर । नदीषु । आ ।
अग्ने । पित्तम् । अपाम् । असि । मण्डूकि । ताभिः । आ । गहि ।
सा । इमम् । नः । यज्ञम् । पावकवर्णमिति पावकऽवर्णम् । शिवम् । कृधि ॥ खीं ॥७॥

सा– अथ तृतीया– ' उप ज्मन्नुप वेतसेऽव तर नदीऽष्वा । अग्ने पित्तमपामसि मण्डूकि ताभिरा गहि सेमं नो यज्ञं पावकवर्णꣳ शिवं कृधि ' इति । हे vअग्ने, त्वं vज्मन् । ज्मा पृथिवी, vतस्याम् vउपतर । तथा vवेतसे वञ्जुलशाखायाम् उपावतर । तथा vनदीषु vआ नदीज्वलेष्वपि अवतर । त्वं च vअपां vपित्तम् vअसि तेजो भवसि । एवमग्निं संबोध्य अथेदानीं मण्डूकीमाह– हे मण्डूकि, मण्डूका भेकास्तेषां स्त्री मण्डूकी, तत्संबोधनं हे vमण्डूकि, त्वं vताभिः पूर्वोक्ताभिरद्भिः सह vआ vगहि आगच्छ । vसा त्वम् vइमम् अनुष्ठीयमानं vनः अस्मदीयं vयज्ञं vपावकवर्णम् अग्निसमानतेजस्कं vशिवं फलप्रदत्वेन शान्तं vकृधि कुरु ॥७॥

आ– ' उप ज्मन् ' इति । आग्नेयी गायत्री त्रिष्टुब्वा । श्रीभगवन् अग्ने, vज्मन् ज्मेति पृथिवीनाम । ग्मन् व्यत्ययः, पृथिव्याम् । vउप vवेतसे । वेतसे वेतसशाखायाम् । उपतर वेतसशाखायाम् vअवतर । उपावतर । हे श्रीभगवन् अग्ने, vनदीषु अपि vआ अन्ववतर । श्रीभगवन्नग्ने, vअपां vपित्तम् । लिङ्गमविवक्षितम् । अपां पाननिमित्तभूतस्त्वमसि । एवमग्निं संबोध्याथेदानीं मण्डूकीमाह । हे vमण्डूकि, vताभिः अद्भिश्च सह vआ vगहि गच्छासि हि । यत्र मण्डूकाः वेतसशाखाश्च तत्रापः सन्ति । तेषामुदकयोनित्वात् । आपश्चाग्नेर्लिङ्गमित्यर्थः । याभिर्वा सह त्वमुत्पन्ना । या च त्वमग्नेः शान्त्यर्थे इतश्चेतश्चानीयसे । vसा त्वं vनः अस्माकम् vइमं vयज्ञं यजनस्थानं vपावकवर्णं पावकवर्णतामापन्नं vशिवं शान्तं vकृधि कुरु विकर्षणेन शुद्धं कुरु ॥७॥

अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् ।
अन्यास्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥८॥

---

7. B1 after तृतीया add आग्नेयी त्रिष्टुप् ।
9. S2 om. त्वं च
15. H2–3 om. वेतसशाखायां ... यत्र मण्डूकाः [L 19]
20. H2–3 om. शान्त्यर्थे

अपाम् । इदम् । न्ययनमिति निऽअयनम् । समुद्रस्य । निवेशनमिति निऽवेशनम् ।
अन्यान् । ते । अस्मत् । तपन्तु । हेतयः ।
पावकः । अस्मभ्यम् । शिवः । भव ॥ ज्युं ॥८॥

स्ना- अथ चतुर्थी- 'अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् । अन्याꣳस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव' इति । इदं चित्यग्निस्थानम् अपां न्ययनं नियमेन प्राप्तिस्थानम् । यागद्वारा ह्यापः प्राप्यन्ते । अत एवापां बहुलत्वात् समुद्रस्य निवेशनं गृहस्थानीयम् । तद्रूप हे अग्ने, ते त्वदीया हेतयः अस्मत्तः अन्यान् विरोधिनः पुरुषान् तपन्तु क्लेशयन्तु । अस्मभ्यम् अस्मदर्थं पावकः शोधकः शिवः शान्तश्च भव ॥८॥

आ- अपामिदम् [इति ।] बृहत्याग्नेयी । अपाम् इदं न्ययनं नितरामयनं स्थानं यदेतन्मण्डूकावकवेतसशाखालक्षणम् । इदं समुद्रस्य उदकनिधेः । समुद्रवन्त्याप अस्मादिति समभिद्रवन्त्येनमाप इति वा समुद्रः । तस्य- निवेशनम् । निविशन्त्यस्मिन्निति निवेशनम् । यत एवमतो ब्रवीमीति । अन्यान् अस्मत् अस्मत्तः अन्यान् पुरुषान् ते तव हेतयः ज्वाला आयुधोपमाः तपन्तु दहन्तु । पावकः अस्मभ्यं शिवः भव शुद्धिकरो भव शान्तो भव ॥९॥

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
आ देवान् वक्षि यक्षि च ॥९॥

अग्ने । पावक । रोचिषा । मन्द्रया । देव । जिह्वया ।
आ । देवान् । वक्षि । यक्षि । च । ज्यूं ॥९॥

स्ना- अथ पञ्चमी- 'अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च । इति । हे अग्ने पावक शोधक देव द्योतनात्मक, रोचिषा दीप्तिमत्त्या मन्द्रया जिह्वया वाचा देवान् वक्षि यक्षि च आह्वय आयज च ॥९॥

---

4. P1 after चतुर्थी adds बृहत्याग्नेयी
6. P1 सागरा for यागद्वारा
10. B1 °निधिं; H2–3 °संनिधेः for निधेः ।
19. P1 after पञ्चमी adds [व] सूयवस ऋषिराग्नेयी गायत्री
20. P1 after मन्द्रया adds मदनीयया सुन्दर्या

आ– 'अग्ने पावक' इति। ऋषिर्त्रिसुयवः। अग्निदेवत्या गायत्री। हे श्रीभगवन् अग्ने हे पावक हे शोधक, रोचिषा शोचिषा हे देव, देवनादिगुणयुक्त मन्द्रया अतिनिविडज्वालारूपेण स्थितया जिह्वया देवान् आभिमुख्येन स्थित्वा देवतात्मना यजेति। वक्षि आह्वनीयात्मना स्वं स्वं भागं आददस्वेति। देवान् यक्षि यजासि च ॥९॥

स नः॑ पावक दीदि॒वोऽग्ने॑ दे॒वाँ३ इ॒हा व॑ह ।
उप॑ य॒ज्ञꣳ ह॒विश्च॑ नः ॥१०॥

सः। न॒ः। पा॒व॒क॒। दी॒दि॒व॒ इति॑ दीदिऽवः। अग्ने॑। दे॒वान्। इ॒ह। आ। व॒ह॒।
उप॑। य॒ज्ञम्। ह॒विः। च॒। न॒ः॥ ङुं ॥१०॥

सा- अथ षष्ठी- 'स नः पावक दीदिवोऽग्ने देवाँ३ इहा वह। उप यज्ञं हविश्चः न' इति। हे पावक शोधक दीदिवः दीप्यमान अग्ने, नः अस्मदर्थं देवान् इह कर्मणि आवह। नः अस्माकम् इमं यज्ञं हविः च उप देवसमीपे प्रापय ॥१०॥

आ– 'स नः' इति। मेधातिथिराग्नेयी। हे पावक पावयितः। पूर्वत्राभिहितो यस्त्वं दीदिवः हे दीदिवन् अतिशयेन दीप्तिमन् हे श्रीभगवन् अग्ने, देवान् इह यज्ञे हविःसंपादनभूतान् देवान् आवह। उप यज्ञं यजमानसमीपं हविरादानस्थानं प्रापय। हविः च नः अस्मत्संबन्धि हविश्च देवान् प्रति वह। प्रापयेति संबन्धः ॥१०॥

पा॒व॒कया॒ यश्चि॒तय॑न्त्या कृ॒पा क्षाम॑न् रुरु॒च उ॒षसो॒ न भा॒नुना॑ ।
तूर्व॒न्न याम॒न्नेत॑शस्य॒ नू रण॒ आ यो घृ॒णे न त॑तृषा॒णो अ॒जर॑ः ॥११॥

---

1. B1 oms. शोचिषा; H2-3 अग्नि° for अति°
3. H2-3 देवा° for देवता°
4. H2-3 भावम् for भागम्
9. P1 after षष्ठी adds मेधातिथिराग्नेयी त्रिष्टुप्; P1 after हे adds अग्ने
10. P1 त्वं for अग्ने
11. P1 after प्रापय ins. इति शेषः
14. B1 om. आ वह ... देवान् (L 15)

परिषेचनादिसंस्कारमन्त्राः]

पा॒व॒कया॑ । यः । चि॒तय॑न्त्या । कृ॒पा । क्षाम॑न् । रु॒रु॒चे । उ॒षसः॑ । न । भा॒नुना॑ ।
तूर्व॑न् । न । याम॑न् । एत॑शस्य । नु । रणे॑ ।
आ । यः । घृ॒णे । न । त॒तृ॒षा॒णः । अ॒जरः॑ ॥ त्रवाः ॥११॥

स्वा– अथ सप्तमी– ' पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना । तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ' इति । vयः अग्निः vपावकया पावयित्र्या vचितयन्त्या चेतयित्र्या चितिं कुर्वाणया vकृपा कल्पनया सामर्थ्येन युक्तः सन् vक्षामन् क्षाम्नि भूमौ vरुरुचे दीप्तवान् । तत्र दृष्टान्तः – vउषसः vन vभानुना । यथा उषसः संबन्धिना भानुना सूर्यप्रकाशेन दीप्यन्ते तद्वत् । किं च यः अग्निः vएतशस्य गमनकुशलस्याश्वस्य vयामन् नियामके vरणे युद्धे vतूर्वन् vन परबलानि हिंसन्निव vआ vघृणे vनु सर्वतो दीप्यते खलु । सोऽग्निः vअजरः जरारहितः vततृषाणः vन सतृष्णो न भवति । यथा लोके शीघ्रगमनस्वभावमश्वं वामहस्तगतेन खलीनेन दृढं नियम्य रणे प्रवर्तमानः पुरुषः परबलानि हिंसन्नत्यन्तं त्वरते तथायमग्निः प्रज्वलति । न कदाचिज्जीर्यति । नाप्यसौ तृष्णायुक्तः । किं [तु] तृप्त इत्यर्थः ॥११॥

आ– ' पावकया यः ' इति । भरद्वाजो जगत्याग्नेयी । vपावकया पावयित्र्या vचितयन्त्या चितिं कुर्वाणया परिदृढकारिण्या vकृपा । अत्र व्यत्ययः । कृपया । कृपू सामर्थ्ये । समर्थया । एवंरूपिण्या कृपया सह vयः अग्निः vक्षामन् । क्षामेति पृथिवीनाम । क्षामन् क्षामनि क्षमायां पृथिव्यां vरुरुचे सर्वतो दिदीपे दीप्यते । कथमिव ? vउषसः vन vभानुना । उषसो न उषस इव । स्वदीप्त्या उषसो यथा भासन्ते तथा योऽग्निः रुरुचे इति संबन्धः । अन्वयक्रमेण व्याख्या । vतूर्वन् vन vयामन् । यामशब्दः कर्मवचनः । यामन् यामनि कर्मणि आधानकर्मणि । कथंभूतः ? vरणे रमणीये प्रदेशे विहिते यामनि कर्मणि निमित्ते तूर्वन्न त्वरमाण इव स्थितः ।

4. P1 affer सप्तमी adds पूर्ववत्

6. P1 oms. चितयन्त्या

7. S2 oms. भानुना

8. S2 नियमकरणे for नियामके; P1 after नियामके ins. यामेति कर्मनाम; P1 after तूर्वन् न ins. तुर्वी हिंसायाम् ।

11. P1 om. पुरुषः; S2 एवमयम् for तथायम्; P1 om. अयम्

13. B1 before चित॰ adds आ विजयं

14. B1 °दिष्टकारिण्या; H2-3 °दृष्टकारुण्या for °दृढकारिण्या

15. H2-3 om. क्षामन् क्षामेति ... क्षामनि; B1 क्षमाया for क्षमायां

18. H2-3 व्याख्यातो मन्त्रः for व्याख्या; B1 om. आधानकर्मणि ... कर्मणि (L 29)

19. B1 om. तूर्वन्न

क इव ? vएतशस्य यामन् । यथा रणे युद्धे । एतश इत्यश्वनाम । तस्याश्वस्य यामनि गमने युद्धा- [य] vनु त्वरितो भवति तथा vततृषाणः च हविषः प्रतिग्रहार्थमिति । तृषां कुर्वाणोऽग्निरध्वर्युणा आधीयते आहितश्च vयः vघृणे । घृणिरिति दीप्तिनाम । अत्र व्यत्ययः । आ घृणे । घृणिरिति आ समन्तात् प्राप्तदीप्तिः [न] इव स्थितो नु सः vअजरः जरावर्जितश्च योऽभूत् स पावकोऽस्मभ्यं शिवो भवेति संबन्धः ॥११॥

नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्यांस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ।
नृषदे वेळप्सुषदे वेड्बर्हिषदे वेड्वनसदे वेट् स्वर्विदे वेट् ॥१२॥

नमः । ते । हरसे । शोचिषे । नमः । ते । अस्तु । अर्चिषे ।
अन्यान् । ते । अस्मत् । तपन्तु । हेतयः । पावकः । अस्मभ्यम् । शिवः । भव ।
नृषदे । नृसद् इति नृऽसदे । वेट् । अप्सुषदे । अप्सुसद् इत्यप्सुऽसदे ।
बर्हिषदे । बर्हिसद् इति बर्हिऽसदे । वनसद् इति वनऽसदे ।
स्वर्विद् इति स्वःऽविदे । वेट् ॥ प्पु ॥१२॥

सा- कात्यायनः – " चित्यारोहणं नमस्ते " इति (काश्रौ १८·३·५) इति। चित्यमग्निमारोहेत् । पाठस्तु – ' नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे। अन्यांस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ' इति । हे अग्ने, vते तव vहरसे रसानां हर्त्रे। vशोचिषे शोषणहेतवे तेजसे vनमः अस्तु । किं च vते तव vअर्चिषे पदार्थप्रकाशकाय तेजसे vनमः vअस्तु । अन्यानित्यादि पूर्ववत् ॥

कात्यायनः – " स्वयमातृण्णायां पञ्चगृहीतं जुहोति नृषदे वेळिति प्रतिमन्त्रम् " (काश्रौ १८·३·६) इति। स्वयमातृण्णायामिष्टकायां पञ्चवारं गृहीतमाज्यं ' नृषदे वेट् ' इत्यादिभिः पञ्चभिर्मन्त्रैः क्रमेण जुहुयात् । तत्पाठस्तु- ' नृषदे वेळप्सुषदे वेड्बर्हिषदे वेड्वनसदे वेट् स्वर्विदे वेट् ' इति । नृषु मनुष्येषु जठराग्निरूपेण सीदतीति नृषत् । तस्मै vवेट् इदं हविर्दत्तम् । और्वरूपेणाप्सु सीदतीत्यप्सुषत् । आहवनीयादिरूपेण बर्हिषि यज्ञे सीदतीति बर्हिषत् । दावाग्निरूपेण वने सीदतीति वनसत् । आदित्यरूपेण स्वर्गं विन्दते लभत इति स्वर्वित् ॥१२॥

---

1. H2–3 om. क इव; B1 om. रणे
2. B1 भवत्विति for भवति; H2–3 °गुणार्थम् for °ग्रहार्थम; B1 after कुर्वाणो adds यो
15. P1 after पाठस्तु adds आग्नेयी बृहती लोपामुद्रासुत ऋषिः
20. S2 om. तत्°; P1 after °पाठस्तु adds आग्नेयी पञ्च यजूंषि
21. P1 जाठर° for जठर°; P1 after दत्तम् । ins. वषट्कारेण वा वै स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते यद्वेट्कार इति शतपथश्रुतेः ; S2 बडवानल° for और्व°

आ– ' नमस्ते ' इति । आग्नेयी बृहती चित्यारोहिणी । ऋषिस्तु लोपामुद्रासुता । हे श्रीभगवन्नग्ने, [v]ते तव संबन्धिने [v]हरसे । हृञ् हरणे । रससंहरणस्वभावाय [v]नमः । [v]शोचिषे ज्योतिषे नमः । [v]ते [v]अर्चिषे त्वदीयायै दीप्त्यै [v]नमः [v]अस्तु नमस्कारः अस्तु । अत्रार्थपुनरुक्तिर्न दोषः । ' अन्यांस्ते अस्मत् ' इति व्याख्यातम् ॥

स्वयमातृण्णां जुहोति पञ्चभिर्यजुभिराग्नेयैः– ' नृषदे वेट् ' इति । नृषु मनुष्येषु सीदतीति नृषत् । तस्मै [v]नृषदे वैश्वानरायाग्नये । ' वेट् ' इति संप्रदानार्थो निपातः । लुप्तषकारो वाऽयं वषट्कारः । [v]वेट् व्याघारयामीत्यर्थः । अप्सु सीदतीत्यप्सुषत् वैद्युतो वाडवो वा अग्निः । तस्मै [v]अप्सुषदे [v]वेट् वषट्कारः । बर्हिषु यज्ञेषु ओषधीषु वा सीदतीति बर्हिषत् । तस्मै [v]बर्हिषदे [v]वेट् वषट्कारः । वनेषु वृक्षसमूहेषु सीदतीति वनसत् । तस्मै [v]वनसदे [v]वेट् वषट्कारः । [v]स्वर्विदे । स्वःशब्दोऽव्ययः । इहादित्यवचनः । तं विन्दते वेत्तीति स्वर्वित् । तस्मै स्वर्विदे । नृषदित्यादीनि पञ्च अग्निनामानि अग्नितुष्टिकरणानि ॥१२॥

ये देवा देवानां यज्ञिया यज्ञियानाꣳ सꣳवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ।। १३।।

ये । देवाः । देवानाम् । यज्ञियाः । यज्ञियानाम् । सꣳवत्सरीणम् । उप । भागम् । आसते ।
अहुताद इत्यहुतऽअदः । हविषः । यज्ञे । अस्मिन् ।
स्वयम् । पिबन्तु । मधुनः । घृतस्य । द्रयें ॥१३॥

सा– कात्यायनः– " समासिक्तान् कुशैः प्रोक्षति ये देवा इति द्वाभ्याम् " काश्रौ (१८·३·७) इति । दधिमधुघृतवत्यां पात्र्यां ये कुशाः समासिक्तास्तैः ' ये देवाः ' इति द्वाभ्यां मन्त्राभ्यां चित्याग्निप्रोक्षणं कुर्यात् । तत्र प्रथममन्त्रपाठस्तु– ' ये देवा देवानां यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भागमासते । अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ' इति । द्विविधा देवा हविर्भुज इन्द्रवरुणादयः, शरीरनिर्वाहकाः प्राणापानादयश्च । दीव्यन्तीति व्युत्पत्तिरुभयत्रापि सिद्ध्यति । उभयेऽप्येते यज्ञियाः । तत्रेन्द्रादयो यज्ञेन पूज्यत्वाद्यज्ञियाः । प्राणादयस्तु यज्ञेन

---

3. B1 affer ज्योतिषे adds च
6. H2–3 विनियोगः for निपातः; B1 after निपातः adds तस्मै
7. H2–3 वैस्तते कुतोऽग्निः वास (ल) वो वा अग्निः; B1 वैद्युताग्नि नलवाग्निः for वैद्युतो वाडवो वा अग्निः [L 8]
9. B1 वषट् for वषट्कारः
10. B1 वषट् for वषट्कारः
19. B1 after °पाठस्तु add द्वे जगत्यौ प्राणदेवत्ये ।

पूजकत्वाद्यज्ञियाः । एवं सति ^{v}यज्ञियानाम् इन्द्रादीनां ^{v}देवानां संबन्धिनः प्राणरूपाः ^{v}ये ^{v}यज्ञियाः ^{v}देवाः ^{v}संवत्सरीणं संवत्सरेण साध्यं चित्याग्निं ^{v}भागं भजनीयम् ^{v}उप ^{v}आसते । ये प्राणाद्याः ^{v}अहुतादः । हुतं स्वाहाकारेण समर्पितमदन्तीति हुतादः इन्द्रादयस्तद्विपरीतत्वात् प्राणाद्या अहुतादः । तथाविधाः प्राणाद्या देवाः ^{v}अस्मिन् ^{v}यज्ञे ^{v}हविषः हवीरूपस्य ^{v}मधुनः ^{v}घृतस्य च । सामर्थ्याद् दध्नश्च । तत्तद्भागं ^{v}स्वयं ^{v}पिबन्तु । मदीयस्वाहाकारसमर्पणेन विना स्वयमेव दधिमधुघृतांशं स्वीकुर्वन्त्वित्यर्थः ॥१३॥

आ– दधिमधुघृतेनाग्निं प्रोक्षति द्वाभ्यां देवीभ्याम् । ' ये देवाः ' इति । द्वे जगत्यौ प्राणदेवत्ये । ^{v}देवानां देवनादिगुणयुक्तानां मध्ये अतिशयेन यज्ञसंपादिनः ^{v}यज्ञियाः । संवत्सरेण प्राप्यत इति संवत्सरीणो भागः । तं ^{v}संवत्सरीणं ^{v}भागम् ^{v}उप ^{v}आसते ^{v}ये संभजन्ते ते ^{v}देवाः ^{v}अहुतादः । हुतमदन्तीति हुतादः, न हुतादः अहुतादः प्राणादयः । इन्द्रियाणीति केचित् । इष्टका इत्यन्ये । अन्ये देवाः अग्नौ प्रास्तामाहुतिमदन्तीति । प्राणास्तु ^{v}स्वयम् ^{v}अस्मिन् ^{v}यज्ञे ^{v}मधुनः ^{v}घृतस्य सर्पिषः दध्नश्च ^{v}हविषः स्वं भागं ^{v}पिबन्तु । दधिमधुघृतमिश्ररूपस्य हविषो वा यथाभागं पिबन्त्विति वा ॥१३॥

ये देवा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुरएतारो अस्य ।
येभ्यो न ऋते पवते धाम किंचन न ते दिवो न पृथिव्या अधि स्नुषु ॥१४॥

ये । देवाः । देवेषु । अधि । देवत्वमिति देवऽत्वम् । आयन् ।
ये । ब्रह्मणः । पुरएतार इति पुरःऽएतारः । अस्य ।
येभ्यः । न । ऋते । पवते । धाम । किम् । चन ।
न । ते । दिवः । न । पृथिव्याः । अधि । स्नुषु ॥ स्नुः ॥१४॥

सा– अथ द्वितीयः – ' ये देवा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुरएतारो अस्य । येभ्यो न ऋते पवते धाम किं चन न ते दिवो न पृथिव्या अधि स्नुषु ' इति । ^{v}ये ^{v}देवाः प्राणाः ^{v}देवेषु इन्द्रादिष्वपि अधिष्ठातृत्वेन ^{v}देवत्वम् ^{v}आयन् प्राप्ताः । प्राणैरधिष्ठाता एवेन्द्रादिविग्रहा

---

1. S2 देवतासंबन्धिनः for संबन्धिनः
3. S2 before तथा° adds ये
7. B1 om. प्राणदेवत्ये
9. H2–3 हुतादः for अहुतादः
10. B1 om. इति
11. B1 after मधुनः adds हविषः and om. दध्नश्च; H2–3 om. घृतस्य
20. S2 om. देवाः

व्यवहरन्तीत्यर्थः। किं च [v]ये प्राणाः [v]अस्य [v]ब्रह्मणः ब्रा(? बृ)ह्मणस्याग्नेः परिवृढस्य [v]पुरएतारः पुरतो गन्तारो निर्वाहका इत्यर्थः। न खलु प्राणैर्विना चीयमानोऽग्निर्वोढुं शक्यते। किं च [v]येभ्यः [v]ऋते यान् प्राणान् विना [v]किं [v]चन [v]धाम किमपि शरीरं [v]न [v]पवते न शुद्धं भवति, न प्रवर्तते च, [v]ते प्राणरूपा देवाः [v]दिवः [v]न दिव्यपि न तिष्ठन्ति, [v]पृथिव्याः [[v]अधि] [v]न भूमावपि न तिष्ठन्ति। किं तर्हि ? [v]स्नुषु पर्वतसानुसदृशेषु शरीरगतचक्षुरादिगोलकेषु [v]अधि आश्रित्य वर्तन्ते ॥१४॥

आ– 'ये देवा देवेषु' इति। [v]देवेषु [v]अधि उपरि अधिष्ठातृत्वेन अधि [v]देवत्वं देवभागं [v]ये [v]देवाः [v]आयन् उपगताः। [v]ये [v]ब्रह्मणः। 'अयमग्निर्ब्रह्म तस्मै ते पुरएतारः' इति श्रुतेः। ये देवाः [v]अस्य अग्नेः [v]पुरएतारः गन्तारः एव। 'येभ्यः न ऋते पवते'। [v]येभ्यः प्राणेभ्यः [v]ऋते विना कश्चिदपि देवः [v]न [v]पवते न गच्छति न चेष्टते न जीवति च। [v]धाम स्थानं जन्म वा [v]किं [v]चन किंचिदपि च न पवत इत्यभिप्रायः। ये इत्थंभूताः प्राणा देवाः क्व पुनस्ते आसत इति। 'न ते दिवो न पृथिव्या अधि'। [v]दिवः द्युलोकस्य संबन्धित्वेन आश्रयणीयेषु प्रदेशेषु [v]ते देवाः [v]न उपलभ्यन्ते। [v]पृथिव्याः च [v]अधि पृथिवीसंबन्धित्वेन आश्रयणीयेष्वपि स्थानेषु नोपलभ्यन्ते। तर्हि कुत्रेति। अधि [v]स्नुषु। "स्नु प्रक्षरणे"। विषयाभिमुखत्वेन प्रक्षरणयोग्यानि चक्षुरादीनि प्राणायतनानि। यानि तेषु प्राणायतनेषु स्नुशब्दवाच्येषु प्राणा देवता उपलभ्यन्ते। नान्यत्रेत्यर्थः ॥१४॥

प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः।
अन्याꣳस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥१५॥

प्राणदा इति प्राणऽदाः। अपानदा इत्यपानऽदाः। व्यानदा इति व्यानऽदाः।
वर्चोदा इति वर्चःऽदाः। वरिवोदा इति वरिवःऽदाः।
अन्यान्। ते। अस्मत्। तपन्तु। हेतयः।
पावकः। अस्मभ्यम्। शिवः। भव ॥ युं ॥१५॥

1. S2 om. ये प्राणाः S2 ब्राह्ममाणस्य for बृह्मणस्य; P1 °वृद्धस्य for °वृढस्य
2. P1 after इत्यर्थः ins. अयमग्निर्ब्रह्म तस्यैते पुरएतार इति श्रुतेः।
3. S2 om. न प्रवर्तते च।
4. S2 om. पृथिव्या ... तिष्ठन्ति [L 13]
5. S2 °सदृशशरीरेषु अन्तश्चक्षुरादिः for सदृशेषु शरीरगतचक्षुरादि°
7. H2–3 om. ये
10. H2–3 न for च
11. H2–3 om. अधि। दिवः
13. H2–3 om. तर्हि
14. B1 चक्षुरायतनानि for चक्षुरादीनि

सा- कात्यायनः - " प्राणदा इत्यवरोहति " (काश्रौ १८.३.८) इति । चित्याग्नेः सकाशादवरोहेत् । पाठस्तु- ' प्राणदाः अपानदा व्यानदा वर्चोदा वरिवोदाः । अन्यांस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यं शिवो भव ' इति । यजमानाय प्राणं ददातीति vप्राणदाः इत्यग्निरभिधीयते । प्राणं सुस्थिरं करोतीत्यर्थः । एवमुत्तरत्रापि योज्यम् । वर्चो बलम् । वरिवो धनम् । ' अन्यान् ' इत्यादि पूर्ववत् ॥१५॥

आ- अथ प्रत्यवरोहति । ' प्राणदा अपानदाः ' इति । बृहती पङ्क्तिर्वा । आग्नेयी । अत्र प्राणादीनां दाता अग्निरभिधीयते । प्राणान् ददातीति vप्राणदाः । vअपानदाः । वर्च इत्यन्ननाम । अन्नदाः । वरिवो धनम् । तद्दाता vवरिवोदाः त्वमसि । अतस्त्वां ब्रवीमि । vअन्यान् vअस्मत् । अस्मत्तः अन्यान् शत्रून् vते vहेतयः तव ज्वालारूपाः हेतयः आयुधानि vतपन्तु दहन्तु भस्मीकुर्वन्तु । vअस्मभ्यं vपावकः पावयिता श्रीभगवन्नग्निस्त्वं vशिवः शान्तः vभव इति संबन्धः ॥१५॥

[इति प्रथमोनुवाकः]

[अथ द्वितीयोऽनुवाकः ।]

अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा॒ यास॒द्विश्वं॒ न्य॒त्रिण॑म् ।
अ॒ग्निर्नो॑ वनुते र॒यिम् ॥१॥

अ॒ग्निः । ति॒ग्मेन॑ । शो॒चिषा॑ । यास॑त् । विश्व॑म् । नि । अ॒त्रिण॑म् ।
अ॒ग्निः । न॒ः । व॒नु॒ते । र॒यिम् ॥। सां ॥१॥

सा- प्रथमेऽनुवाके परिषेचनादिमन्त्रा उक्ताः । अथ द्वितीयेऽनुवाके वैश्वकर्मणहोमात् पूर्वं कर्तव्या या एकाहुतिरस्ति सा वैश्वकर्मणहोमस्य प्रथमाहुतिश्चेत्युभयमभिधीयते ॥

कात्यायनः - " पञ्चगृहीतं जुहोत्यग्निस्तिग्मेनेत्यृचा " (काश्रौ १८.३.१२) इति । पाठस्तु- ' अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम् । अग्निर्नो वनुते रयिम् ' इति । अयं चीयमानः vअग्निः vतिग्मेन vशोचिषा तीक्ष्णेन तेजसा । अत्र अदनं भक्षणं तदस्यास्तीति अत्त्री । तादृशं [vविश्वं] सर्वं राक्षसादिकं vनि vयासत् । यस उपक्षये । नितराम् उपक्षीणं करोतु । किं च अयम् vअग्निः vनः अस्मदर्थं vरयिं धनं vवनुते ददातु ॥१॥

2. P1 after पाठस्तु adds पङ्क्तिराग्नेयी
3. P1 चित्याग्नि° for इत्यग्नि°
8. H2-3 after प्राणदाः add अग्निः; B1 व्यानदाः for अपानदाः
11. B1 अग्ने for अग्निः; B1 after शिवः adds भव
18. S2 °षेचनादिकमुक्तम् for °षेचनादिमन्त्रा उक्ताः
20. P1 after पाठस्तु- adds आग्नेयी गायत्री भरद्वाजः ।
21. P1 om. धनं; P1 after वनुते ins. वनोतिर्दानार्थः

आ– पञ्चगृहीतं जुहोति । 'अग्निस्तिग्मेन' इति । ऋषिर्भरद्वाजः अग्निर्देवत्या गायत्री । तेजतेरुत्साहकर्मणो रूपं 'तिग्मेन' इति । तीक्ष्णेन निशितेन ˇशोचिषा रोचिषा तेजसा । ˇअग्निः यासत् । 'नि' इत्यस्यानेन संबन्धः । नितराम् । यास उपक्षये । ˇनि ˇयासत् दहति । किं दहति ? ˇविश्वं जगत् । ˇअत्रिणम् तृणमपि शून्यं यथा नियासत् । ˇअग्निः स्वभावतः एवंविधोऽपि ˇनः अस्मभ्यं ˇरयिम् अभीष्टं धनं ˇवनुते । वनोतिर्दानार्थः । ददाति । यद्वा– अत्रिणम् । "अद भक्षणे" । अत्त्रम् अदनं तदस्यास्तीति अत्त्री केवलादी । नि नितराम् अत्यर्थं स्वोदरपोषकस्तमत्त्रिणम् । विश्वं सर्वमत्त्रिणमतिपापिनं राक्षसादिकं यः अग्निः दहति सोऽस्मभ्यं रयिं वनुत इति ॥१॥

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ३ आ विवेश ॥२॥

यः । इमा । विश्वा । भुवनानि । जुह्वत् । ऋषिः । होता । नि । असीदत् । पिता । नः ।
सः । आशिषेत्याऽशिषा । द्रविणम् । इच्छमानः ।
प्रथमच्छदिति प्रथमऽछत् । अवरान् । आ । विवेश ॥ ज्यौं ॥२॥

सा– कात्यायनः – "षोडशगृहीतार्धमनुवाकशेषेण" (काश्रौ १८.३.१२) इति । षोडशगृहीताज्यस्याज्ये (? र्धे) न वैश्वकर्मणहोमस्य प्रथमाहुतिः 'य इमाः' इत्यादिभिरष्टभिर्ऋग्भिर्जुहुयात् । तत्र प्रथमा– 'य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः । स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ३ आ विवेश' इति । ˇयः परमेश्वरः ˇइमाः ˇविश्वा ˇभुवनानि ˇजुह्वत् प्रलयकाले पृथिव्यादीनिमान् सर्वान् लोकान् स्वात्मन्याहुतिप्रक्षेपवत् संहरन् । ˇऋषिः अतीन्द्रियद्रष्टा सर्वज्ञः । ˇहोता संहाररूपस्य होमस्य कर्ता ˇनः अस्माकं ˇपिता जनकः ˇन्यसीदत् निषसाद स्वयं स्थितवान् । प्रलयकाले प्राप्ते सति सर्वान् लोकान् संहृत्यास्माकमपि संहर्ता पुनः स्रष्टा च सन् सर्वज्ञो यः परमेश्वरः स्वयम् (एक) एवासीत् । अत एव सर्वा अप्युपनिषद एवमाहुः – "आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किंचन मिषत् । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्याद्याः । ˇसः तादृशः परमेश्वरः ˇआशिषा 'बहु स्यां प्रजायेय' इत्येवंरूपया सृष्टीच्छया ˇद्रविणम् ˇइच्छमानः

4. B1 om. किं दहति
5. H2–3 om. अभीष्टं
16. P1 after प्रथमा adds विश्वकर्मदेवत्यानि पञ्चदश यजूंषि त्रैष्टुभानि ऋषिर्विश्वकर्मा भौवनः ।
19. S2 om. पिता ... अस्माकम् [L 20]
20. P1 आसीदतु for आसीत्

कासं ... ६४

धनोपलक्षितं जगद्भोगमपेक्षमाणः । vप्रथमच्छत् स्वकीयमेकमेवाद्वितीयमुत्कृष्टं रूपमावृण्वन् vअवरान् अभिव्यक्तोपाधीन् vआ vविवेश जीवरूपेण प्रविष्टः । एतच्च सर्वमुपनिषद्याम्नातम्– " सोऽकामयत बहु स्यां प्रजायेय इति । स तपोऽतप्यत । स तपस्तप्त्वा इदꣳ सर्वमसृजत । यदिदं च किंच । तत् सृष्ट्वा तदेवानुप्राविशत् " इति । एवमन्या अपि उपनिषद उदाहार्याः ॥२॥

आ– षोडशगृहीतं जुहोति । ' य इमाः ' इत्यादिभिः पञ्चदशभिर्विश्वकर्मदेवत्याभिस्त्रिष्टुब्भिः । विश्वकर्मा भौवनो माध्यमिको हिरण्यगर्भः परश्च मन्त्रेषु प्रतिपाद्यन्ते । अत्रान्यकल्पान्तरीणं यजमानम् उपनिषद्दृशा सगुणब्रह्मोपासकं, तत्रापि विश्वकर्मभावमात्मत्वेनोपगतं तदुपासकत्वेनैवापगतकल्मषं कल्पादौ श्रीभगवदनुग्रहादभिव्यज्यमानं कर्मज्ञानवैराग्ययुक्तम् ऐश्वर्ययुक्तं सुप्तप्रतिबुद्धन्यायेनापरोक्षज्ञानमात्मत्वेन संप्राप्तं प्रजाः सृजन्तमृषिः पश्यन्नाचष्टे । ' य इमा विश्वा भुवनानि ' इति । विश्वकर्मा भौवनः सर्वमेधे सर्वाणि भूतानि जुहवांचकार । आत्मानमप्यन्ततो जुहवांचकार । तदभिवादिन्येषा ऋक् । vयः भौवनो विश्वकर्मा vइमा इमानि vविश्वा विश्वानि vभुवनानि भूतजातानि आत्मनि vजुह्वत् । सर्वेषां कार्याणां कारणानन्यत्वदर्शनमेवात्र भुवनं नाम । एवं भूतजातान्यात्मत्वेन पश्यन् vऋषिः सूक्तद्वयस्य द्रष्टा साक्षात्कृतधर्मा च vहोता आह्वाता । एवंविधः कल्पादौ vन्यसीदत् निषसाद । निषण्णः vपिता v अस्माकं स एष पिता उत्पादयिता पात्र(ल ?)कश्च, शास्त्रार्थस्य दर्शयिता च । vसः एवं मनुष्यादिभावमुपागतः सन् यज्ञसंबन्धिन्या vआशिषा अभीष्टस्यार्थस्याशंसनमाशीः । तया vआशिषा सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं गच्छेयमित्येवंरूपया च युक्तः सन् vद्रविणं ज्ञानकर्मफलम् vइच्छमानः अपेक्षमाणः, द्रविणीयं स्थानं वा इच्छमानः कामयमानः vप्रथमच्छत् प्रकृष्टमाच्छादयिता मूर्तामूर्तशरीराभ्याम् अवच्छिन्नः सन् vअवरान् द्विपदचतुष्पदस्थावरादीन् vआ vविवेश आविष्टः । यद्वा – यः इमा इमानि विश्वानि हिरण्यगर्भाख्यः सर्गादावादिशरीरी विश्वकर्मा सर्वकर्ता सर्वाणीमानि भुवनानि भूतजातानि युगपत् प्रलयाधिकारब्रह्माग्नौ जुह्वत् प्रक्षिपन् उपसंहरन् । ऋषिर्द्रष्टा यथावदुपसंहारक्रमस्य स्थितेः सर्गस्य वा क्रमस्य यथावद् द्रष्टा

1. P1 S2 परानभिव्यक्तोधिः for अवरान् अभिव्यक्तोपाधीन् [L 54]
6. H2–3 after भौवनः add अत्र भौवनो नाम
7. H2–3 °भवात्मत्वेन for भावमात्मत्वेन
9. B1 om. ऐश्वर्ययुक्तं; B1 प्राप्तं for संप्राप्तं
12. H2–3 कारणानाम् for कारण°
13. B1 हुतं, H3 भवं for भुवनं
16. H2–3 om. सन्; B1 शंसन° for आशंसन°
17. H2–3 अर्थं for एवं; B1 om. द्रविणं ... अवाच्छिन्नः सन् [L 19]
21. H2–3 °कारे for °कार°
22. B1 यावद् for यथावद्

होता ब्रह्माग्नौ भूतग्रामलक्षणहविषो हवनकर्ता न्यसीदत् । स्वयमपि परस्मिन् ब्रह्मणि नारायणाख्ये निषण्णः प्रविष्टः जलबिन्दुरिवार्णवे । एवंविधो यः सः नः अस्माकं पिता सर्वभूतानां जनयिता अयमित्थं कृतवान् । सर्गान्ते स एव हिरण्यगर्भाख्यो विश्वकर्मा सिसृक्षाधिकारे प्राप्ते श्रीनारायणशक्त्युपबृंहितः तस्यैवाशिषा युक्तः पुनः स्वेच्छया जगत् स्रक्ष्यामीति विषयोपभोगसाधनानां प्राक् सृष्टेरविभागानामवस्थितानां विभागकरणेच्छामाशिषमाहुः केचित् तया द्रविणं धनं व्यक्तीकरणलक्षणं विषयोपभोगसुखलक्षणं वा नारायणादिच्छमानः इत्थं प्रथमच्छत् प्रकृष्टं छादयिता जीवानामविद्यया निरोधनकर्ता अवरान् अभिव्यक्तकार्योपाधीन् आ विवेश । " तत् सृष्ट्वा तदेवानुप्राविशत् " इति श्रुतेः ॥१७॥

किंस्विदासीदधिष्ठानमारम्भणं कतमत् स्वित् कथाऽऽसीत् ।
यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥३॥

किम् । स्वित् । आसीत् । अधिष्ठानम् । अधिस्थानमित्यधिऽस्थानम् ।
आरम्भणमित्याऽरम्भणम् । कतमत् । स्वित् । कथा । आसीत् ।
यतः । भूमिम् । जनयन् । विश्वकर्मेति विश्वऽकर्मा ।
वि । द्याम् । और्णोत् । महिना । विश्वचक्षा इति विश्वऽचक्षाः ॥ थ्यौं ॥३॥

सा– अथ द्वितीयः – ' किंस्विदासीदधिष्ठानमारम्भणं कतमत्स्वित् कथासीत् । यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ' इति । लोके हि चिकीर्षुः कुलालो गृहादिकं किंचित्स्थानमधिष्ठाय मृद्रूपेणारम्भकद्रव्येण चक्रादिरूपैरुपकरणैर्घटं निष्पादयति । ईश्वरस्य निरपेक्षत्वात् सर्वमत्राक्षिप्यते । द्यावापृथिव्योरुत्पादनवेलायामीश्वरस्य ᵛअधिष्ठानं निवासस्थानं ᵛकिंस्वित् ᵛआसीत् किं नामाभूत् । न किंचिदित्यर्थः । तथा ᵛआरम्भणं ᵛकतमत् ᵛस्वित् ᵛआसीत् । आरभ्यतेऽनेनेति आरम्भणमुपादानकारणम् । तदपि कतमत् भवेत् । न हि द्यावापृथिव्यौ जनयितुं किंचिदुपादानं संभवति । तथा दण्डचक्रादिकं निमित्तमपि ᵛकथा कथंभूतं किंप्रकारम् ᵛआसीत् । न किंचित् संभवतीत्यर्थः । ᵛविश्वचक्षाः सर्वद्रष्टा ᵛविश्वकर्मा ᵛयतः यस्मिन् काले ᵛभूमिं भूलोकं ᵛद्यां द्युलोकं च ᵛजनयन् वर्तते तस्मिन् काले

3. B1 om. अयम्
4. B1 om. युक्तः पुनः ... छादयिता (L 8)
7. B1 निरोधेन for निरोधन°; H2–3 °कारिजीवोपाधिना;° B1 °कार्योपाध्याना° for कार्योपाधीन् आ [L 8]
8. B1 after श्रुतेः adds इति
16. S2 om. कुलालो
22. P1 om. द्यां द्युलोकं

vमहिना स्वमहिम्ना साधनान्तरं विनैव विशेषेण vऔर्णोत् सृष्टौ द्यावापृथिव्यावाच्छादितवान् । अनन्यशक्तिरयं परमेश्वर इत्यर्थः ॥३॥

आ– 'किंस्विदासीत्' इति । "स्विदिति वितर्के" । अधितिष्ठति अस्मिन्निति अधिष्ठानम् अधिकरणम् । विश्वकर्मणो द्यावापृथिव्यादिकार्यं सृजतः vअधिष्ठानं vकिं vस्वित् इति अधिष्ठानविषयः प्रश्नः प्रथमः । इह इदानींतनाः कर्तारोऽधिष्ठानरहिताः न किंचिदपि कुर्वाणा दृश्यन्ते । vआरम्भणम् आरभ्यतेऽस्मादित्यारम्भणम् उपादानं कार्यानुयायि करणं (? कारणं) vकतमत् बहुविधेषु करणेषु (? कारणेषु) प्रतीयमानेषु उपादानकारणं कतमत् vस्वित् [इति] उपादानकारणविषयः प्रश्नो द्वितीयः । सृष्ट्यादिक्रिया च vकथा कथंभूता किंप्रकारा vआसीत् । घटाद्युत्पत्तौ चक्रजीवनदण्डसूत्रादिक्रियेव साधनभूता क्रिया कथा आसीत् इति साधनविषयः प्रश्नः । vयतः येन vभूमिं vद्यां च vजनयन् । विश्वानि कर्माणि यस्य सः vविश्वकर्मा सर्वस्य कर्ता द्यां भूमिं च । vविश्वचक्षाः, विश्वं चष्टे पश्यतीति विश्वचक्षाः अतीतानागतवर्तमानकालविषयसर्वपदार्थज्ञः । विश्वकर्मा सर्वज्ञः । ऊर्णुञ् आच्छादने । vमहिना माहात्म्येन महाभाग्येन ऐश्वर्येण vऔर्णोत् आच्छादितवान् । द्यावापृथिव्यादिसृष्टौ सर्वकार्यसृष्टौ च परमेश्वरस्य अधिष्ठानोपादानसाधनविशेषविषयास्त्रयः प्रश्नाः कृताः । अथवा प्रतीयमानस्य सर्वस्य विकारात्मकस्य मिथ्यात्वपक्षे अधिष्ठानविषयः प्रश्नः । यद्वा– प्रतीत्यनुसारेण सत्त्वाभ्युपगमपक्षे उपादानविषयः प्रश्नः कृत इति विभागो द्रष्टव्यः । सर्वत्र सद्वितीयाः सोपादानाः साधिष्ठानाः ससाधनाः एव कुलालादयः कार्यस्य कर्तारो दृश्यन्त इति प्रसिद्धिमाश्रित्य प्रश्नाः कृता इति प्रश्नाभिप्रायो आक्षेपाभिप्रायो वा । अत्रायं तु शास्त्रार्थो नानुमानगम्यः । किंतु ब्रह्मात्मैकत्वावगतिपरशास्त्रसमन्वयानुपपत्तिगम्य इति ॥१८॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥४॥

---

1. P1 after आच्छादितवान् adds चकार
3. B1 किंस्विदिति for स्विदिति; B1 om. अस्मिन्
6. B1 कार्यकार्यादि for कार्यानुयायि
7. B1 om. बहु° ... स्वित् (L 8)
8. B1 °अतिशयः for °विषयः; B1 om. च
14. B1 before पृथिव्यादि° adds सः तस्य; H2–3 यः अस्य; B1 °साध्य° for °साधन°

परिषेचनादिसंस्कारमन्त्राः]

विश्वतश्चक्षुरिति विश्वतःऽचक्षुः । उत । विश्वतोमुख इति विश्वतःऽमुखः ।
विश्वतोबाहुरिति विश्वतःऽबाहुः । उत । विश्वतस्पात् । विश्वतःपादिति विश्वतःऽपात् ।
सम् । बाहुभ्यामिति बाहुऽभ्याम् । धमति । सम् । पतत्रैः ।
द्यावाभूमी इति द्यावाभूमी । जनयन् । देवः । एकः ॥ ३४ ॥४॥

सा- अथ तृतीया – 'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् । सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः' इति । चक्षुरादिप्राणानां द्यावापृथिव्योरुत्पत्तेरूर्ध्वं विश्वरूपः परमेश्वर एवं भासते । कथमिति तदुच्यते– विश्वतश्चक्षुः सर्वतश्चक्षूंषि यस्यासौ विश्वतश्चक्षुः । परमेश्वरस्य सर्वप्राण्यात्मकत्वाद्यस्य यस्य प्राणिनो ये चक्षुषी ते तदुपाधिकस्य परमेश्वरस्यैवेति सर्वत्रास्य चक्षूंषि संपद्यन्ते । एवं मुखहस्तपादेष्वपि योजनीयम् । सः तादृशः एकः देवः द्यावाभूमी जनयन् बाहुभ्यां बाहुस्थानीयाभ्यां धर्माऽधर्माभ्यां निमित्तकारणाभ्यां संधमति । धमतिर्गत्यर्थः । जगत्सर्वं सम्यग्गतं प्राप्तं स्वाधीनं करोति । तथा पतत्रैः पतनशीलैरनित्यैः पञ्चभूतैरुपादानकारणैः जगत् संधमति स्वाधीनं करोति ॥४॥

एतत्प्रदर्शनायोत्तरमारभ्यते । 'विश्वतश्चक्षुः' इति विश्वकर्मस्वरूपावगमे प्रकारमवतारयति । सर्वेषां सर्वेन्द्रियप्रवर्तकत्वेन सर्वेन्द्रियसाध्यफलात्मकेन सर्वेन्द्रियसाक्षित्वेन च सर्वेन्द्रियादिमत्त्वमनुवदति – 'विश्वतश्चक्षुः' इति। उत अपि विश्वतः सर्वतः चक्षूंषि विद्यन्ते यस्य सः विश्वतश्चक्षुः । चक्षुःसाध्यकार्यस्य पूर्वमेव स्वस्मिन्नेव विद्यमानत्वात् । अलुक्समासान्तं पदम् । उत अपि च विश्वतो मुखानि यस्य सः विश्वतोमुखः । विश्वतो बाहवो यस्य सः विश्वतोबाहुः । उत विश्वतः पादाः यस्य सः विश्वतस्पात् विश्वतःपादः । सं धमति । धमतिर्गत्यर्थः । बाहुभ्यां संधमति संगमयति संगच्छते । 'सं पतत्रैः' । पतनं पादविन्यासः । तच्छीलैः पतत्रैः । पद्भिर्गच्छति । एवंविधः परमेश्वरो यः स द्यावाभूमी द्यावापृथिव्यौ तदन्तर्वर्तिप्राणिजातं च स्वयम् एकः अद्वितीयः सन् जनयन् उत्पादयन् आस्ते इति शेषः ॥१९॥

किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥५॥

8. S2 °प्राणा° for °प्राण्या°
11. S2 °करणैः for° कारणैः
13. B1 विश्वार्क° for विश्वकर्म°
14. B1 °प्रकारत्वेन for प्रवर्तकत्वेन B1 om. सर्वेन्द्रियसाध्य ... साक्षित्वेन च
16. B1 तास्मिन् for स्वस्मिन्
20. B1 om. द्यावाभूमी
21. H2-3 om. जनयत् ; B1 जनयतु उत्पादयतु for जनयन् उत्पादयन्

किम् । स्वि॒त् । वन॑म् । कः । ऊँ इत्यूँ । सः । वृ॒क्षः । आ॒स॒ ।
यत॑ः । द्यावा॑पृथि॒वी इति॒ द्यावा॑पृथि॒वी । नि॒ष्टत॒क्षुः । नि॒स्तत॒क्षुरिति॑ नि॒ःऽतत॒क्षुः ।
मनी॑षिणः । मन॑सा । पृ॒च्छत॑ । इत् । ऊँ इत्यूँ ।
तत् । यत् । अ॒ध्यति॑ष्ठ॒दित्य॑धि॒ऽअति॑ष्ठत् । भुव॑नानि । धा॒रय॑न् ॥ त्रि॒यः ॥५॥

सा– अथ चतुर्थी – ‘ किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ’ इति । लोके हि प्रौढं प्रासादं निर्मिमाणः कस्मिंश्चित् प्रौढे वने कंचिन्महान्तं वृक्षं छित्त्वा तक्षणादिना स्तम्भादिकं संपादयति । इह तु परमेश्वरप्रेरिता जगत्स्रष्टारः ^{v}यतः यस्माद्वनाद्यं वृक्षमादाय ^{v}द्यावापृथिवी ^{v}निष्टतक्षुः तत्क्षणेन द्यावापृथिव्यौ निष्पादितवन्तः तत् वनम् ^{v}किं ^{v}स्वित् किं नाम ^{v}आस । न किंचित् तादृशं संभवति । तथा ^{v}कः ^{v}उ ^{v}सः ^{v}वृक्षः प्रौढो वृक्षोऽपि कः आस । न किंचित्संभवति । हे ^{v}मनीषिणः विद्वांसः, ^{v}मनसा स्वकीयेन विचार्य ^{v}पृच्छत ^{v}इत् ^{v}उ तत् इदं सर्वं पृच्छतैव । किं च । ईश्वरः ^{v}भुवनानि ^{v}धारयन ^{v}यत् ^{v}अध्यतिष्ठत् यत् स्थानमधिष्ठितवान् ^{v}तत् अपि स्थानं सर्वथा पृच्छत । एतस्य प्रश्नस्य सर्वस्याप्युत्तरं श्रुत्यन्तरेषु “ ब्रह्म वनं ब्रह्म स वृक्ष आसीद् ” (तैब्रा २·८·९) इत्येतस्यामृच्याम्नातम् । स्वरूप-व्यतिरिक्तवनादिनिरपेक्षत्वमेवास्योत्तरस्याभिप्रायः । अतोऽत्रापि किंस्विद्वनमित्याक्षेपपरत्वेनैव योजितम् । पृच्छतेत्यस्याप्ययमभिप्रायः । भवद्भिः पृष्टेऽपि अभिज्ञाः निरपेक्षत्वमेव वदिष्यन्तीति ॥५॥

आ– एवमप्यनवसितविश्वकर्मतत्त्वः पुनः पृच्छति– ‘ किंस्विद् ’ इति । यथा रथादिकं कर्तुं कश्चित् तक्षा क्वचिद्वने कंचन वृक्षम् उपादाय तक्षति । तेन रथादिकं करोतीति च । तत्र तद् रथादिकं पुनः आस भवति । ^{v}किं ^{v}स्वित् ^{v}कः ^{v}उ ^{v}सः पुनः ^{v}वृक्षः ^{v}आस । तर्हि को वृक्षो भवति ^{v}यतः ब्रह्मणोऽन्यस्मात् द्यावापृथिव्यात्मकं जगत् विश्वकर्मा ^{v}निष्टतक्षुः बृहत्कारणरूपं तथा तन्वीकृत्य जगत्कार्यं कृतवान् । ततक्षुरिति बहुवचनं पूजार्थम् । विश्वकर्मा निष्टतक्ष । तक्षतिस्तनूकरणार्थः । उपसर्गवशात् निर्मितवान् । विश्वकर्माणं कारणत्वेन स्वीकृतवान् । तत् पुनस्तद् (?) ब्रह्म भवति । अन्यद्वेति । अस्मिन्नर्थे जगन्निर्माणशिल्पिनो विश्वसृजः ^{v}मनीषिणः मनस ईशितारो विश्वकर्मवादिनो यूयमेव स्वात्मानं ^{v}पृच्छत । एवं स्वात्मानं

8. P1 after निष्टतक्षुः ins. [त] क्षतिः करोति कर्मा
9. S2 स्यात् for आस
11. S2 पृच्छत इदं सर्वं पृच्छत इत् एव for पृच्छत इत् उ तत् इदं सर्वं पृच्छतैव
15. P1 पृष्टोऽपि for पृष्टेऽपि
16. H2-3 आवसित° for अनवसित°
18. H2-3 after पुनः adds वचनम्; H2-3 उत for कः उ
20. H2-3 °करण° for °कारण°
21. H3 नीतवान् for निर्मितवान्

परिषेचनादिसंस्कारमन्त्राः]

विचार्य तत्र यत् प्रतीतं तद् एवोत्तरं भवतु । नास्माभिस्तत्र वक्तव्यमस्तीत्येवं सम्यक् । तत्त्वमार्गे सम्यग्विचारशून्यैः साक्षेपं पृष्टे सति श्रुतिः स्वयमेवोत्तरमाह । 'इदु तद्यदध्यतिष्ठद्-भुवनानि धारयन्' । उ उत । इत् एवार्थः । सः विश्वकर्मा भुवनानि समस्तभूतजातानि जनयित्वा तानि च द्यावापृथिवीभ्यां सह धारयन् स्वयं यत् स्वतः सिद्धवस्तु अध्यतिष्ठत् अधिष्ठितवान् । स्वयं तदुपरिष्टादास्त इति । तत् एवाविकारिकूटस्थनित्यभोगसद्रूपं वस्त्विति वेदान्तमर्यादाः । तस्मान्न कश्चित् दोषोऽस्तीत्यभिप्रायः ॥२०॥

या ते धामा॑नि पर॒मा॒णि याऽव॒मा या मध्य॒मा वि॑श्वकर्मन्नु॒तेमा ।
शिक्षा॒ सखि॑भ्यो ह॒विषि॑ स्वधावः स्व॒यं य॑जस्व त॒न्वं॑ वृधानः ॥६॥

या । ते॒ । धामा॑नि । प॒र॒माणि॑ । या । अ॒व॒मा ।
या । म॒ध्य॒मा । वि॒श्व॒क॒र्म॒न्निति॑ विश्वऽकर्मन् । उ॒त । इ॒मा ।
शिक्ष॑ । सखि॑भ्य॒ इति॒ सखि॑ऽभ्यः । ह॒विषि॑ । स्व॒धा॒व॒ इति॑ स्वधाऽवः ।
स्व॒यम् । य॒ज॒स्व॒ । त॒न्व॑म् । वृ॒धा॒नः ॥ ड्यौं ॥६॥

सा– अथ पञ्चमी – 'या ते धामानि याऽवमा या मध्यमा विश्वकर्मन्नुतेमा । शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः' इति । हे विश्वकर्मन्, ते त्वदीयानि या यानि परमाणि धामानि यानि च अवमा अवमानि कनीयांसि धामानि, उत अपि च या मध्यमा यानि च मध्यमस्थानीयानि इमा तानीमानि सर्वाणि स्थानानि सखिभ्यः सखिवन्ति च, येभ्यो यजमानेभ्यः हविषि हविःप्रदाननिमित्तं शिक्ष उपदिश । हे स्वधावः स्वधोपलक्षितहविर्लक्षणान्नवन् विश्वकर्मन् तन्वं वृधानः यजमानशरीरं वर्धमानः स्वयं यजस्व त्वदनुग्रहमन्तरेण को वाऽन्यो यष्टुं शक्त इत्यर्थः ॥६॥

आ– हे श्रीभगवन् विश्वकर्मन्, ते तव या यानि परमाणि उत्कृष्टानि धामानि स्थानानि, यानि अवमा अवमानि पार्थिवानि रूपाणि, या मध्यमानि अन्तरिक्षाणि । उत अपि तानि इमा इमानि एतानि सर्वाणि शिक्ष । शिक्षतिर्दानकर्मा च । शिक्ष देहि । सखिभ्यः समानख्यानेभ्यः अस्मभ्यं बुभुत्सुभ्यः यजमानेभ्यो देहि । यद्वा– तेभ्यः अर्थमादाय अस्मभ्यं

---

1. H2-3 om. first तत्र
2. H2–3 इत्यविचार° for सम्यग्विचार°
6. B1 वादान्त°, H2–3 देवतान्त° for वेदान्त°
21. B1 om. च

देहीति संबन्धः । किं च Vहविषि अस्यामाहुतौ हुतायां हे Vस्वधावः अन्नवन्, Vस्वयं Vतन्वं शरीरं Vवृधानः वर्धमानः Vयजस्व देवतामिष्टां पूजयस्व ॥२१॥

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशंभूरवसे साधुकर्मा ॥७॥
विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु ॥८॥
विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरयुध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥९॥

वाचस्पतिम् ॥ वा ॥७॥
विश्वकर्मन् हविषा ॥ व ॥८॥
विश्वकर्मन् हविषा वर्धनेन ॥ च ॥९॥

सा– अथ 'वाचस्पतिम्' इत्याद्यास्तिस्र ऋचोऽष्टमेऽध्याये व्याख्याताः ॥

[इत्यष्टादशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

आ– 'वाचस्पतिम्' इत्यादयोस्त्रयो मन्त्राः प्रथमदशकस्य अष्टमाध्याये व्याख्याताः ॥२२-२४॥

[इति द्वितीयोऽनुवाकः]

[अथ तृतीयोऽनुवाकः ।]

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृहन्त पूर्व आदिद् द्यावापृथिवी अप्रथेताम् ॥१॥

चक्षुषः । पिता । मनसा । हि । धीरः ।
घृतम् । एने इत्येने । अजनत् । नम्नमाने इति नम्नमाने ।
यदा । इत् । अन्ताः । अददृहन्त । पूर्वे ।
आत् । इत् । द्यावापृथिवी इति द्यावापृथिवी । अप्रथेताम् ॥ डों ॥१॥

---

2. H2-3 देवता दृष्ट्वा for देवतामिष्टां

14. B1 °शतकस्य for °दशकस्य

स्था- द्वितीयेऽनुवाके वैश्वकर्मणहोमस्य प्रथमाहुतिरुक्ता । अथ तृतीये द्वितीयाहुतिरुच्यते ॥

कात्यायनः – " चक्षुषः पितेत्यपरमनुवाकेन " (काश्रौ १८.३.१३) इति । षोडशगृहीताज्यस्य शेषेण वैश्वकर्मणहोमस्य द्वितीयामाहुतिं ' चक्षुषः पिता ' इत्यष्टभिर्ऋग्भिर्जुहुयादिति शेषः । तत्र प्रथमा- ' चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने । यदेदन्ता अददृहन्त पूर्व आदिद् द्यावापृथिवी अप्रथेताम् ' इति । vचक्षुषः चक्षुरादेः प्राणसमुदायस्य vपिता उत्पादकः vधीरः धैर्यवान् विश्वकर्मा vमनसा स्वेच्छया vघृतं घृतवत् प्राणिनामुपभोगसाधनभूते vएने इमे द्यावापृथिव्यौ vनम्नमाने परस्परानुकूल्येन नमनोपेते vअजनत् उत्पादितवान् । vयदा vइत् यदैव vपूर्वे प्रथमोत्पन्नाः vअन्ताः अननयुक्ताश्चेष्टावन्तश्चक्षुरादिप्राणाः vअददृहन्त दृढा अभवन्, vआत् vइत् अनन्तरमेव vद्यावापृथिवी vअप्रथेतां द्यावापृथिव्यौ विस्तृते अभूताम् ॥१॥

आ– पुनर्विश्वकर्माणं स्तौति । ' चक्षुषः पिता ' इति । विश्वकर्मदेवत्यास्त्रिष्टुभः । vचक्षुषः इत्युपलक्षणम् । सर्वेन्द्रियाणां तेषां सर्वेषां vपिता उत्पादकः पालकश्च यः विश्वकर्मा, यः vधीरः सृष्ट्यर्थमीक्षालक्षणबुद्धिसंपन्नः । vमनसा vहि मनोमात्रेणैव संकल्पमात्रेणैव साधनान्तरनिरपेक्षतया । घृतमित्युदकनाम । vघृतम् उदकम् । उदकोपलक्षितं सूक्ष्मभूतपञ्चकम् vअजनत् अजनयत् । ततोऽनन्तरम् vएने इमे vनम्नमाने पुनःपुनर्निमज्यमाने vद्यावापृथिवी vयदा vआत् । अत्तीत्यात् । सर्वभक्षकः पूर्वमुपसंहारकर्ता । एवं विश्वकर्मा अजनयत् । तदा vइत् एव vअददृहन्त vपूर्वे भृग्वादयो नव ब्रह्मणः श्रीभगवदाज्ञप्ताः सन्तः vअन्ताः । अदि बन्धने । सृष्टिकर्मणि बद्धाः निबद्धाः श्रीभगवता नियुक्ताः । अन्ताः प्रजा वा । अन्तानि द्यावापृथिव्योरन्तःस्थितानि सुरनरतिर्यगादिभूतजातानि अददृहन्त । दृह दृहि वृद्धौ । अभिवृद्धान्यकुर्वत । अन्तानि दृढान्यकुर्वतेति वा । ततः श्रीभगवत्प्रसादात् vद्यावापृथिवी द्यावापृथिव्यौ vअप्रथेताम् । पृथुलतामापद्येताम् ॥२५॥

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन् पर एकमाहुः ॥२॥

2. P1 after कात्यायनः adds विश्वकर्मदेवत्यास्त्रिष्टुभः
6. P1 om. एने; H2–3 om, इमे
7. S2 om. यदा इत्
10. B1 °देवत्यास्त्रिष्टुप् for °देवत्यास्त्रिष्टुभः
12. B1 मृष्ट्यर्थमीजा° for सृष्ट्यर्थमीक्षा°; H2–3 नमो° for मनो°
14. B1 om. अजनयत्, H2–3 पृथिव्यौ for °पृथिवी
17. H2–3 om. निबद्धाः; B1 om. अन्ताः प्रजा वा ... जातानि (L 18)

विश्वकर्मेति विश्वऽकर्मा । विमना इति विऽमनाः । आत् । विहाया इति विऽहायाः ।
धाता । विधातेति विऽधाता । परमा । उत । संदृगिति सम्ऽदृक् ।
तेषाम् । इष्टानि । सम् । इषा । मदन्ति ।
यत्र । सप्तऋषीनिति सप्तऽऋषीन् । परः । एकम् । आहुः ॥ ध्यैँ ॥२॥

सा– अथ द्वितीया– 'विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् । तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन् पर एकमाहुः' इति । विश्वविषयाणि कर्माणि सृष्टिस्थितिसंहाररूपाणि कर्माणि यस्यासौ विश्वकर्मा । स च विमनाः विभूतमनाः । तस्य तेषु कर्मसु मन एव साधनमित्यर्थः । आत् अपि च यस्मादेवं तस्मात् स एव विधाता धाता विहायाः इति चोच्यते । विधातोत्पादकः । धाता पोषकः । विशेषेण जहाति परित्यजतीति विहायाः संहर्तेत्यर्थः । उत अपि च अत एव परमा परमः सर्वेभ्य उत्कृष्टः । सम्यक् पश्यतीति संदृक् सर्वज्ञः इत्यर्थः । यत्र यस्मिन् परः परस्मिन्नीश्वरे सप्तऋर्षीन् एकम् आहुः । य एते मरीच्यत्रिप्रमुखाः सप्तऋषयो विविधा दृश्यन्ते सर्वे सृष्टेः प्राक् परस्मिन्नेकीभूता इति वेदान्तपारगा आहुः । स च परमेश्वरस्तेषां सप्तऋषिप्रभृतीनाम् इष्टानि अपेक्षितानि स्थानादीनि इषा स्वेच्छामात्रेण संपादयति । तेन च ते महर्षयः मदन्ति हृष्यन्ति ॥२॥

आ– 'विश्वकर्मा विमनाः' इति । विश्वकर्मा सर्वस्य कर्ता विमनाः विभूतमनाः आत् अपि च विहायाः । हय गतौ । महान् व्यापकः । धाता जगद्धारयिता । विधाता जगत्कर्ता । परमा लिङ्गव्यत्ययः, परमः । "इन्द्रियेभ्यः परा ह्यर्थाः" (कउ ३.१०, भगी ३.४२) इत्यादिपरः । प्रत्राहे यतः परो नास्ति स परमः । सर्वकार्यकारणतत्संबधेभ्यश्च परः परमः निरतिशयानन्दरूपत्वेन च परमः । उत अपि च येषां संदृक् सम्यक् द्रष्टा तेषां भूतानाम् इष्टानि कान्तानि च । कान्तानि वा गतानि वा मतानि वा संदृष्टानि अभिमतानि [दम] दानदयादिभिर्युक्तानि । इषा अन्नेन आहुतिरसभूतेन मदन्ति । एवं द्वन्द्वादिदोषविमुक्तानि भूतानि संमोदन्ते हृष्टा भवन्ति । यत्र यस्मिन् सप्तऋषीन् विश्वकर्मणः प्राणभूतान् वसिष्ठप्रभृतीन् परः परेण परमार्थरूपेण एकम् आहुः वेदाः । ऋषिशब्दवाच्यानि इन्द्रियाणि यत्रैकस्मिन् एकीभवन्ति । तेभ्यः परमः । परमात्मेत्यात्मगतिमाचष्ट इति नैरुक्ताः । एवं प्रकारेण श्रीनारायण एव परमात्मेहाभिहित इति भावः ॥२६॥

---

11. P1 after ईश्वरे ins. सुपां स्विति सप्तम्याः प्रथमा

20. B1 H2–3 इष्टकानि for इष्टानि

24. H2–3 om. परमः ।

यो नः॑ पि॒ता ज॑नि॒ता यो वि॑धा॒ता धामा॑नि वेद॒ भुव॑नानि॒ विश्वा॑ ।
यो दे॒वानां॑ नाम॒धा एक॑ ए॒व तꣳ स॑म्प्र॒श्नं भुव॑ना यन्त्य॒न्या ॥३॥

यः । नः॒ । पि॒ता । ज॒नि॒ता । यः । वि॒धा॒तेति॑ वि॒ऽधा॒ता ।
धामा॑नि । वेद॑ । भुव॑नानि । विश्वा॑ ।
यः । दे॒वाना॑म् । ना॒म॒धा इति॑ ना॒म॒ऽधाः । एकः॑ । ए॒व ।
तम् । सं॒प्र॒श्नमिति॑ सं॒ऽप्र॒श्नम् । भुव॑ना । य॒न्ति॒ । अ॒न्या ॥ द्रः ॥३॥

सा– अथ तृतीया– ' यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा । यो देवानां नामधा एक एव तꣳ संप्रश्नं भुवना यन्त्यन्या ' इति । यः विश्वकर्मा नः अस्माकं पिता पालयिता । न केवलं पालकः किं तु जनिता उत्पादकोऽपि । किमनेनास्माकमुत्पादयितेति संकोचेन, यः विधाता सर्वस्य जगतः उत्पादकः । यः च विश्वकर्मा विश्वा विश्वानि भुवनानि चतुर्दशरूपाणि धामानि वेद जानाति । किं च । यः देवानां नामधाः नामानि दधाति करोतीति नामधाः । नाम च पितैव करोति । यद्वा– स्वयमेव सर्वदेवरूपेण अग्नीन्द्रमित्रादीनि देवतानामानि धारयति । अत एवान्यत्राम्नातम्– " इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः " (ऋसं १.१६४.४६) इति । अत एव बहूनां देवानां नामानि धारयन्नपि स्वयम् एकः एव । तं विश्वकर्माणं परमेश्वरम् अन्या भुवना तस्मादन्यानि सृष्टानि सर्वाणि भुवनानि । संप्रश्नं [सम्यक् प्रश्नो] यथा भवति तथा यन्ति प्रलयकाल एकत्वं प्राप्नुवन्ति । एकीभावयुक्ते प्रलये ' क ईश्वरः, कानि भुवनानि ' इत्येवं संप्रश्नः संप्रधारणं प्रवर्तते । विभागाभावेन श्रुत्यनभिज्ञैर्ज्ञातुमशक्यत्वात् ॥३॥

आ– तमेव श्रीभगवन्नारायणं भगवन्तं विशिनष्टि– ' यो नः पिता ' इति । नः अस्माकं यः पिता पाता पालकः यः नः जनिता अस्माकं जनयिता च, यश्च विधाता विशेषेणास्माकं धारयिता पोषयिता, यश्च धामानि स्थानानि वेद अवगच्छति । भुवनानि विश्वा विश्वानि भूतजातानि यो वेद, साधनान्तरनिरपेक्षतया साक्षात् यो वेद । यः च, ' देवानां नामधा ' । देवानां जीवानामिन्द्रियाणां वा भूम्यन्तरिक्षद्युस्थानानां वा नामानि धत्ते विधत्ते धारयति करोतीति वा नामधाः । अथवा स्वात्मनो नामधेयानि देवानां नामधेयत्वेन यो धत्ते सः नामधाः । अयमिन्द्रोऽयमग्निरयं वरुण इति स्वनामान्येव लोकपालेषु विदधाति । पदशक्तिपर्यालोचनायां सत्यां सर्वाणि नामानि श्रीभगवन्नामान्येव । यश्च एकः एव स्वजातीयविजातीयभेदशून्यः

14. P1 after अशक्यत्वात् ins. ईश्वरसृष्टानि भुवनानि तमीश्वरं संप्रश्नं स्वाधिकारं संप्रश्नयितुं यन्ति तानीश्वर एव स्वस्वाधिकारेषु नियुक्त इति भाष्यान्तरम् ॥

24. H2-3 after धत्ते add यो विधत्ते

स्वव्यतिरिक्तश्चेतनो नास्ति, स्वस्माद् भिन्नो जडपदार्थोऽपि नास्ति, अपि तु अनिर्वाच्यविद्यापरिकल्पितं सर्वव्यवहारास्पदमन्यत् स्वात्मन्यारोपितमस्तीति प्रतीयते । 'तं संप्रश्नं भुवना यन्त्यन्या' इति । सम्यञ्चः प्रश्नाः प्रश्नलक्षणसंपन्नाः तत्त्वजिज्ञासुभिः क्रियमाणाः यस्य सः संप्रश्नः । ^{v}तं ^{v}संप्रश्नम् ^{v}अन्या अन्यानि भुवनानि भूतजातानि । बहुभिः यच्छब्दैः 'यो नः' इत्यादिभिः यो निर्दिष्टस्तं भगवन्तं विश्वकर्माख्यं श्रीनारायणमेकमेव भूतजातानि स्वनिष्टपुरुषार्थसिद्ध्यर्थं ^{v}यन्ति आयन्ति आगच्छन्ति अवगच्छन्ति ॥२७॥

त आ यजन्त द्रविणꣳ समस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥४॥

ते । आ । अयजन्त । द्रविणम् । सम् । अस्मै । ऋषयः । पूर्वे । जरितारः । न । भूना ।
असूर्ते । सूर्ते । रजसि । निषत्ते । निसत्त इति निऽसत्ते ।
ये । भूतानि । समकृण्वन्निति समऽअकृण्वन् । इमानि ॥ छ्यैं ॥४॥

सा- अथ चतुर्थी- 'त आयजन्त द्रविणꣳ समस्मा ऋषयः पूर्वे जरितारो न भूना । असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि' इति । पूर्वोदाहृतेन विश्वकर्मणा प्रथमोत्पादिताः ^{v}ये विश्वस्रष्टारः ^{v}असूर्ते असुभिः प्राणैः प्रेरिते जङ्गमात्मके, ^{v}सूर्ते प्राणादिव्यतिरिक्तेन प्रेरिते स्थावरात्मिके ^{v}निषत्ते निषण्णे स्थिते ^{v}रजसि लोके ^{v}इमानि ^{v}भूतानि सर्वानेतान् प्राणिनः ^{v}समकृण्वन् सम्यगुदपादयन्, ^{v}ते पूर्वे स्रष्टारः ^{v}अस्मै सृष्टाय जगते ^{v}द्रविणं धनरूपं भोग्यजातं ^{v}समायजन्त सम्यक् संपादितवन्तः दत्तवन्तः । कीदृशास्ते ऋषयः ? अतीन्द्रियद्रष्टारः सर्वज्ञा इत्यर्थः । ^{v}भूना ^{v}जरितारः ^{v}न भूम्ना स्वकीयेन महत्त्वेन कदाचिदपि जीर्णा नश्वरा न भवन्ति ॥४॥

आ- 'आयजन्त' इति उत्तरार्धः पूर्वं व्याख्येयः । 'असूर्ते सूर्ते रजसि निषत्ते' । असुः प्राणः सप्तदशकलिङ्गो वा यश्चात्मा, तस्य असोः ऊर्ते उच्छ्वासे ^{v}असूर्ते विश्वकर्मण उच्छ्वासे । ^{v}सूर्ते सुसमीरिते ^{v}रजसि अन्तरिक्षलोके ^{v}निषत्ते निर्गतसत्ताके निरालम्बने । 'निषत्ता उत्ता प्रतूर्ते असूर्ते सूर्ते' इत्यादयो निपाताः । एवमुपलक्षिते देशे काले च ^{v}ये ^{v}पूर्वे वसिष्ठप्रभृतयः ^{v}ऋषयः ^{v}इमानि ^{v}भूतानि ^{v}समकृण्वन् कृतवन्तः, ^{v}ते वसिष्ठप्रभृतयः ।

1. B1 om. स्वव्यतिरिक्त ... संपन्नाः (L 3)
5. H2–3 एवं for एव
6. P1 om. °निष्ट°; B1 om. आगच्छन्ति, B1 परा° for अव°
16. P1 धनमुप° for धनरूप°
20. B1 अपि for वा यश्च

वैश्वकर्मणहोमः]

आयजातिर्दानार्थः । अस्मै भूतग्रामाय द्रविणम् उदकलक्षणं द्रविणम् आयजन्त प्रादुः दत्तवन्तः । कथमिव ? जनितारः न जनितार इव । जनितृशब्दः स्तोतृनामसु पठितः । अत्र स्तूयमाना इव । स्तोतृभ्यः भूना भूम्ना बहुत्र युक्तं धनं ददुः । यत्कटाक्षवीक्षणलेशोपजीविनामपि इत्थमचिन्त्यं सामर्थ्यम् । किं नु वर्ण्यते श्रीभगवतः सामर्थ्यमिति ॥२८॥

परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त पूर्वे ॥५॥

परः । दिवा । परः । एना । पृथिव्या । परः । देवेभिः । असुरैः । यत् । अस्ति ।
कम् । स्वित् । गर्भम् । प्रथमम् । दध्रे । आपः ।
यत्र । देवाः । समपश्यन्तेति सम्ऽअपश्यन्त । पूर्वे ॥ स्वरः ॥५॥

सा– अथ पञ्चमी– ' परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति । कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त पूर्वे ' इति । हृदयपुण्डरीके यत् ईश्वरतत्त्वम् अस्ति तत् तत्त्वं दिवा परः द्युलोकादपि दूरे तिष्ठति । एना पृथिव्या परः अस्याः पृथिव्याः अपि दूरे तिष्ठति । देवेभिः असुरैः परः । देवेभ्योऽसुरेभ्यश्च दूरे तिष्ठति । सकारान्तः परःशब्दो दूरवाची । दूरत्वं नाम विलक्षणत्वम् । सर्वजगद्विलक्षणत्वम् । सर्वजगद्विलक्षणत्वाद्गुरुशास्त्रविमुखैर्न ज्ञायत इत्यर्थः । किं च यत्र यस्मिन् गर्भे पूर्वे प्रथमोत्पादिताः सर्वे देवाः समपश्यन्त सम्यग्दृष्टवन्तः । कंस्विद् गर्भं कं नाम गर्भम् आपः प्रथमं दध्रे दध्रिरे । अद्भिः पूर्वं धृते गर्भे देवमनुष्यादयः सर्वे प्राणिनो वर्तन्ते इत्येवं शास्त्रप्रसिद्धिः । सोऽपि गर्भः क इति न ज्ञायते । यदा स्थूलोऽप्ययं जगदाधारो न ज्ञातस्तदानीमत्यन्तसूक्ष्मं तत्त्वं न ज्ञायत इति किमु वक्तव्यमित्यभिप्रायः ॥५॥

परब्रह्मविषयप्रश्नस्योत्तरमाह– ' परो दिवा ' इति । अत्र त्रयाणां पञ्चमीत्वेन परिणामः । दिवा दिवः द्युलोकात् परः, एना पृथिव्या एना अस्याः पृथिव्याश्च परः । परः देवेभिः देवेभ्यश्च परः । असुरैः असुरेभ्यश्च परः सूक्ष्मः प्रकृष्टो व्यतिरिक्तो वा । यत् यः परः अस्ति । यच्च परं सदाकालमस्ति सदिति व्यपदिश्यते तद् ब्रह्मेति शेषः । कंस्वित् ।

1. B1 तस्मै for अस्मै, H2–3 om. प्रादुः । दत्तवन्तः [L 2]
3. H3 बहुयुक्तयुद्धं°, H2 बहु for बहुत्र
4. H2–3 किं तु for किं नु, B1 सामर्थ्येन for सामर्थ्यम्
15. P1 om. कं नाम गर्भं
17. S2 ज्ञायते for ज्ञातः
22. B1 सः for तद्

स्विच्छब्दोऽवधारणे । कं प्रथमं सर्गादौ वर्तमानाः आपः सूक्ष्मभूतानि कमेव तत् ब्रह्मसुखरूपमेव विश्वकर्माणं गर्भं हिरण्यगर्भाख्यं दध्रे धारितवत्यः । गर्भं विशिनष्टि– ‘ यत्र देवाः ’ इति । यत्र हिरण्यगर्भाख्ये गर्भे पूर्वे प्रथमजाताः देवाः देवगणाः समपश्यन्त इदं जगत् समपश्यन्त । स्वस्वानान्यपि दृष्टवन्तः ॥२९॥

तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभा अध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः ॥६॥

तम् । इत् । गर्भम् । प्रथमम् । दध्रे । आपः ।
यत्र । देवाः । समगच्छन्तेति सम्ऽअगच्छन्त । विश्वे ।
अजस्य । नाभौ । अधि । एकम् । अर्पितम् ।
यस्मिन् । विश्वानि । भुवनानि । तस्थुः ॥ ग्मौ ॥६॥

सा– अथ षष्ठी– ‘ तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे । अजस्य नाभा अध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः ’ इति । इदानीं गुरुशास्त्रोपासनोपेतेषु विद्यमानस्तत्त्वनिर्णयोऽभिधीयते । यत्र यस्मिन् ब्रह्माण्डगर्भे विश्वे सर्वेऽपि देवाः समगच्छन्त संगताः संभूय वर्तन्ते । तम् इत् तमेव गर्भम् आपः प्रथमं दध्रे धृतवत्यः । तद्द्वारेण प्रकार एव स्पष्टीक्रियते । अजस्य जन्मरहितस्य परमेश्वरस्य नाभौ नाभिस्थानीयस्वरूपमध्ये एकं किंचिद्बीजम् अध्यर्पितम् अधिकत्वेन स्थापितम् । यस्मिन् बीजे विश्वानि सर्वाण्यपि भुवनानि भूतजातानि तस्थुः, तद्बीजमर्पितम् । तथा च स्मर्यते–

“ अप एव ससर्जादौ तासु वीर्यमवासृजत् ॥
तदण्डमभवद्धैमं सूर्यकोटिसमप्रभम् । ” (मस्मृ १.८-९) इति ॥६॥

आ– ‘ कंस्विद्गर्भम् ’ इति प्रश्नविवक्षायामुत्तरमाह– ‘ तमिद्गर्भम् ’ इति । तम् एनं विश्वकर्माणमेव प्रथमं सर्गादौ आपः गर्भं दध्रे । यत्र गर्भे विश्वे सर्वे देवाः महाभूतप्राणाहंकाराद्यधिष्ठानभूता देवाः समगच्छन्त स्वाधिकारस्थानैः सर्वैः सर्वे संगताः । अयं गर्भः क्व तिष्ठतीति तदाह– ‘ अजस्य नाभौ ’ इति । न जायत इत्यजः परमात्मा ब्रह्म । तस्य नाभौ,

---

1. B1 क एव । ब्रह्मरूपम् for कमेव । तत् ... रूपम् [L 2]
4. B1 om. इदं जगत् समपश्यन्त
11. P1 after षष्ठी adds पूर्वोक्तप्रश्नस्योत्तरमिदम्
15. P1 °स्थानीयस्य रूप° for °स्थानीयस्वरूप°
21. B1 एतत् for एव
23. B1 ब्रह्मा for ब्रह्म

उपचारतः मध्ये [v]अधि उपरि [v]एकम् अनन्यभूतं "तदन्यत्वमारम्भणशब्दादिभ्यः" (ब्रसू २.१.१४) इति न्यायसूत्रात् [v]अर्पितम् । यत उत्पन्नं तत्रैव वर्तत इत्यर्थः। 'यस्मिन् विश्वानि भुवनानि तस्थुः' । [v]यस्मिन् अजे ब्रह्मणि [v]विश्वानि [v]भुवनानि ब्रह्माण्डोत्पत्तिकारणभूतानि सर्वाणि भूतजातानि यस्मिन् [v]तस्थुः । यत्र स्थितिं लब्धवन्ति एवंविधानि सर्वाणि [स]–विकाराण्यपि यत्र स्थितानि । सर्वस्य स्वयमाधारभूतं सर्वाधिष्ठानं च । स्वयमधिष्ठानादिनिरपेक्षं सच्चिदानन्दाद्वय–परमात्मलक्षणं ब्रह्मैव लीलया श्रीभगवन्नारायणाख्यविश्वकर्मादिरूपेण जीवानुग्रहार्थं स्वेच्छया विहरतीति वेदान्तोक्तमार्गः ॥३०॥

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥७॥

न । तम् । विदाथ । यः । इमा । जजान । अन्यत् । युष्माकम् । अन्तरम् । बभूव ।
नीहारेण । प्रावृताः । जल्प्या । च ।
असुतृप इत्यसुऽतृपः । उक्थशासः । उक्थशास इत्युक्थऽशसः । चरन्ति ॥ झों ॥७॥

सा– अथ सप्तमी– 'न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति' इति । [v]यः विश्वकर्मा [v]इमा इमानि भूतानि [v]जजान उत्पादितवान् [v]तं विश्वकर्माणं [v]न [v]विदाथ तेन सृष्टा ये जीवा यूयं तं न जानीथ। देवदत्तोऽहं यज्ञदत्तोऽहमित्येवं सर्वेऽपि वयमात्मानं विश्वकर्माणं जानीम इति यदुच्येत तदसत् । न ह्यहंप्रत्ययगम्यं जैवं रूपं विश्वकर्मणः परमेश्वरस्य तत्त्वम् । किंतु [v]युष्माकम् अहंप्रत्ययगम्यानां जीवानामज्ञानाम् [v]अन्तरम् अभ्यन्तरम् [v]अन्यत् अहंप्रत्ययगम्यादतिरिक्तं, सर्ववेदान्तवेद्यमीश्वरतत्त्वं [v]बभूव भवति विद्यते। जैवरूपवत्तदपि कुतो न विद्म इति चेत् । [v]नीहारेण [v]प्रावृता भवन्तो नीहारसदृशेनाज्ञानेनावृतत्वात् तन्न जानन्ति । यथा नीहारो नात्यन्तमसन् दृष्टेरावरकत्वात् । नात्यन्तं सन् काष्ठपाषाणादिवदितरेण संबद्धुमयोग्यत्वात् । एवमज्ञानमपि नात्यन्तमसत् ईश्वरतत्त्वावरकत्वात् । नापि सत् । बोधमात्रनिवर्त्यत्वात् । ईदृशेनानिर्वचनीयेनाज्ञानेन भवन्तः सर्वेऽपि जीवाः प्रावृताः । न केवलं प्रावृताः । किंतु [v]जल्प्या [v]च । देवोऽहं ममेदं गृहक्षेत्रमित्याद्यनृतजल्पनपराश्च । किं च [v]असुतृपः असुषु तृप्यन्तीत्यसुतृपः । केनापि

---

2. B1 यत् for यतः
3. B1 भूतानि for भूतजातानि
4. B1 om. यस्मिन्
5. H–23 सर्वत्र for सर्वस्य, H3 °अन्वय for °अद्वय°
6. B1 om. °लक्षणं
7. B1 वसन्तोक्त° for वेदान्तोक्त°
20. S2 om. तत्, S2 नात्यन्तसमन्तात् for नात्यन्तमसन्

प्रकारेण प्राणतर्पणपराः तावतैव तृप्यन्ति । भवन्तो न परमेश्वरतत्त्वं प्रविचारयितुं प्रवर्तन्ते । न केवलमिह लोके भोगमात्रतृप्तिः किंतु ^{v} उक्थशासः परलोकेऽपि भोगं संपादयितुं नानाविधयज्ञेषूक्थानि शस्त्राणि शंसन्तीति उक्थशासः । तादृशा भूत्वा भवन्तः ^{v}चरन्ति । ऐहिकामुष्मिकभोगयोः सर्वदा प्रवर्तन्ते । तस्मादज्ञानमिथ्याज्ञानपराधीनानां भवतां नास्ति तत्त्वज्ञानमित्यर्थः ॥७॥

आ– विश्वकर्मा मनुष्याणामुपदेशं दर्शयति । ' न तं विदाथ ' इति । ^{v}इमा इमानि भूतजातानि ^{v}यः ^{v}जजान जनयति उपसंहरति च । ^{v}तं पुरुषं ^{v}न ^{v}विदाथ न जानीथ । अतः कारणात् ^{v}युष्माकं चास्य पुरुषस्य च ^{v}अन्यत् भेदापादकम् ^{v}अन्तरं व्यवधायकं ^{v}बभूव । तद् व्यवधायकं किमिति । नीहारं व्यवधायकम् । नीहारं तमः, आवरणलक्षणमज्ञानं, तेन ^{v}नीहारेण ^{v}प्रावृताः आवृताः । अत एव पुरुषो जनको यूयं जन्याः । पुरुषो भ्रामको यूयं भ्राम्याः । असावीश्वरो यूयमीशितव्याः । इत्येवमादिबृहत्तरः संसारो वर्तते । अत्राज्ञोऽहमिति प्रतीयमानस्याज्ञानस्य आच्छादनलक्षणविक्षेपलक्षणे द्वे शक्ती विद्येते । आच्छादनप्रधाना अविद्या । विक्षेपप्रधाना मायेत्यज्ञानमेव द्विधा व्यवह्रियते । अत्रैकमेव ब्रह्म अविद्योपाधौ प्रतिबिम्बितजीवस्वरूपतो ब्रह्मेति द्विविधं व्यवहारालम्बनं भवति । पुनस्तद् ब्रह्मैव वशीकृतमायं सत् ईश्वर इति व्यपदिश्यते । यथैकं मुखमादर्शोपाधिना बिम्बप्रतिबिम्बादिव्यवहारा-

---

1. S2 प्राणान् वा for प्राणतर्पणपराः

4. P1 after इत्यर्थः । ins. तं परमेश्वरं विश्वकर्माणं न विदाथ न जानीथ । स कः ? य इमा इमानि सर्वाणि जगन्ति जजान जनयामास । अज्ञाने कारणं प्राह । अतः कारणात् पुरुषो जनकः वयं जन्याः । पुरुषो भ्रामकः वयं भ्राम्याः इत्येवं सर्वस्येश्वरनियम्यत्वं यूयं न विधाथेति पूर्वेण संबन्धः । यदैव ज्ञात्वा स आत्मत्वेनोपास्यते तदा न भवतां संसृतिरित्यभिप्रायः । एवं प्रत्यक्षमुक्त्वा अथेदानीं परोक्षमभिनयेन निदर्शयन्नाह नीहारेण प्रावृता इति । अविद्यागुण्ठिताः अत एव जल्प्याः पक्षसाध्यहेतुं दृष्टान्तादिः कुतार्किका भूत्वा यत्किञ्चिज्जल्पिनः असून् प्राणानेव तर्पयन्तीत्यसुतृपः नास्तिकाः । यद्यास्तिकास्तर्हि ऐहिकामुष्मिकभोगेच्छयोक्थानां शंसितारो यज्वानो भवन्ति । तस्मादज्ञानमिथ्याज्ञानाभिभूतानां भवतां नास्ति तत्त्वज्ञानमिति श्रुतिर्बहिर्मुखानधिक्षिपतीति भाष्यान्तरम् ॥

7. H2–3 om. अन्तरं; B1 अनन्तरं for अन्तरं

9. H2–3 om. आवृताः

10. H2–3 अयम् for अहम्

11. H2–3 आच्छन्द° for first आच्छादन°; B1 आच्छादनविक्षेप for आच्छादनलक्षणविक्षेपलक्षणे, H2–3 आच्छाद्यप्रधाना for आच्छादनप्रधाना

13. H2–3 इदं; B1 द्विविधे for द्विविधं

14. H2–3 om. °आदि°

लम्बनं भवति, तद्वत् । एवमेव वस्तुसाक्षात्कारपर्यन्तम् अविद्या [–] परा जीवाः संसार-दुःखमविरतमतितरामनुभवान्ति । एवमविद्यान्धकारावृतात्मतत्त्वाः कुतर्कमार्गमाश्रित्य ये [V]जल्प्याः जल्पार्हा एव केवलं, न तत्त्वज्ञाः । अत एव ते देहादावात्माभिमानिनः [V]असुतृपः । असून् प्राणान् तर्पयन्तीत्यसुतृपः । प्राणपोषकाः केवलमुदरंभराः । अत एव स्वरूपसुखस्य आवृतत्वात् स्वयं दुःखिनः, सुखं चास्माभिः संपाद्यमित्येवं मन्वानाः सुखकामिनो ये ते उक्थशासः उक्थानां शंसितारः क्रियापराः । तत्रापि काम्यकर्मरताः [V]चरन्ति ॥३॥

विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद्द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात् पुरुत्रा ॥८॥

विश्वकर्मेति विश्वऽकर्मा । हि । अजनिष्ट । देवः ।
आत् । इत् । गन्धर्वः । अभवत् । द्वितीयः ।
तृतीयः । पिता । जनिता । ओषधीनाम् ।
अपाम् । गर्भम् । वि । अदधात् । पुरुत्रेति पुरुऽत्रा ॥ ञों ॥८॥३॥

सा– अथाष्टमी– 'विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद्द्वितीयः । तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात् पुरुत्रा' इति । ब्रह्माण्डगतानामुत्पत्तिरुच्यते । अण्डमध्ये प्रथमं [V]विश्वकर्मा देवतिर्यगादिविश्वभेदस्य कर्ता सत्यलोकनिवासी चतुर्मुखः [V]देवः [V]अजनिष्ट उत्पन्नः। [V]आत् [V]इत् अनन्तरमेव तदपेक्षया [V]गन्धर्वः गोर्वाचस्त्रयीरूपायाः धारयिता । यद्वा– गोः पृथिव्याः धारकः। पूर्वरूपापेक्षया [V]द्वितीयः [V]अभवत् । ततः [V]ओषधीनां [V]जनिता उत्पादकः [V]पिता पोषकश्च तदपेक्षया [V]तृतीयः अभवत् । तदेवम् [V]अपां [V]गर्भं ब्रह्माण्डं परमेश्वरः [V]पुरुत्रा [V]व्यदधात् बहुधा विभक्तं कृतवान् ॥८॥

[इत्यष्टादशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

1. B1 om. तद्वत् ... अनुभवन्ति [L 2]; H3 एतद् for एव,
   H2–3 अविद्याकमविद्याकमादिपराः जीवाः for अविद्या [–]
2. H2–3 B1 जल्पा जल्पा for जल्प्याः
5. B1 एते for ये ते
6. H2–3 कार्य° for काम्य; H2–3 भवान्ति for चरन्ति
16. S2 om. त्रयीरूपायाः; S2 पृथिव्या वा । गन्धर्वोऽग्निः । अग्निर्वै गन्धर्व इति श्रुतेः । स द्वितीयः ससहायः अभवत् उत्पन्नः । तृतीयः पिता पालयिता for यद्वा ... ततः (L 17)
17. S2 om. पिता पोषकश्च

आ– ‘ विश्वकर्मा हि ’ इति । Vआत् अप्यर्थे । Vइत् एवार्थे । Vविश्वकर्मा Vदेवः अपि Vहि Vअजनिष्ट जातो हि । स एव प्रथमः शरीरी । आदित्यमण्डलान्तस्थः स एव प्रथमः । अपि च सः Vगन्धर्वः Vअभवत् Vद्वितीयः । अथानन्तरं गन्धर्वः । गोर्वाचः धारयिता, गोः पृथिव्याश्च धारयिता गन्धर्वोऽग्निः । “ अग्निर्ह गन्धर्वः ” (शब्रा ९.४.१.७) इत्यादि श्रुतेः । सः द्वितीयः ससहायः अभवत् उत्पन्नः । Vतृतीयः Vपिता पालयिता । Vओषधीनां Vजनिता उत्पादकोऽभवत् उत्पन्नः । स चोत्पन्नः सन् Vअपाम् आहुतिपरिणामभूतानामपां Vगर्भं फलरूपं Vव्यदधात् धारयति । Vपुरुत्रा बहूनां त्रातारं गर्भम् । यद्वा– अपां पुरुत्रा बहुप्रकारं गर्भं व्यदधाति । एवं जगदुपकारभूताः त्रयो देवाः अभवन्निति ॥३२॥

[इत्यष्टादशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

[अथ चतुर्थोऽनुवाकः ।]

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत् साकमिन्द्रः ॥१॥

आशुः । शिशानः । वृषभः । न । भीमः । घनाघनः । क्षोभणः । चर्षणीनाम् ।
संक्रन्दन इति सम्ऽक्रन्दनः । अनिमिष इत्यनिऽमिषः । एकवीर इत्येकऽवीरः ।
शतम् । सेनाः । अजयत् । साकम् । इन्द्रः ॥ टें ॥१॥

सा– तृतीयेऽनुवाके वैश्वकर्मणहोमस्य द्वितीयाहुतिरुक्ता । एतावता वैश्वकर्मणहोमः समापितः । अथ चतुर्थेऽनुवाके ब्रह्मणो जप्यं सप्तदशर्चमप्रतिरथाख्यं सूक्तमाम्नायते । सोमयागे द्वादशानामेव जपसाधनत्वादिति । तत्र आहवनीयेऽग्नौ प्रणीयमानेऽध्वर्युणा संप्रेषितो ब्रह्मा दक्षिणोत्तरतोऽनुव्रजन् ‘ आशुः शिशानः ’ इत्येतत् सूक्तम् अप्रतिरथाख्यं जपेत् ॥

---

1. H2–3 om. इत् एवार्थे
2. H2–3 om. first सः
3. H2–3 om. सः
5. H2–3 om. ससहायः
7. H2–3 पुरुत्र°, B1 सुपुत्र° for पुरुत्रा
17. S2 °रथ्याख्य° for °रथाख्य°; P1 after आम्नायते ins. द्वादशैव ऋचो ब्रह्मणा जप्याः उर्वरिताः पञ्चर्चोऽन्यत्रे विनियुक्ता इति भाष्यान्तर

अप्रतिरथं सूक्तम्]

तथा च कात्यायनः – " ब्रह्मन्नप्रतिरथं जप " (काश्रौ १८·३·२२) इति । संप्रेष्यतीति शेषः । संप्रैषसामर्थ्यादेव ब्रह्मा एतत्सूक्तं जपेदित्युक्तं भवति । तत्र प्रथमा– ' आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः ' इति । अयम् इन्द्रः परमैश्वर्योपेतोऽग्निः शतं सेनाः शतसंख्याकाः परकीयसेनाः साकम् एकप्रयत्नेनैव अजयत् । कीदृश इन्द्रः ? आशुः शीघ्रगामी । शिशानः तीक्ष्णः । अत्युग्र इत्यर्थः । तत्र दृष्टान्तः– वृषभः न भीमः । यथा वृषभो भयंकरस्तद्वदयमपि । घनाघनः शत्रूणामतिशयेन घातकः । चर्षणीनां परसेनागतानां मनुष्याणां क्षोभणः क्षोभहेतुः । संक्रन्दनः, समीचीनं क्रन्दनं परभयहेतुर्ध्वनिविशेषो यस्यासौ संक्रन्दनः । अनिमिषः कदाचिदपि निमेषं न करोति । अत्यन्तसावधान इत्यर्थः । एकवीरः परैनैरपेक्ष्येण स्वयमेक एव जेतुं शक्तः शूरः ॥१॥

आ– प्रणीयमानस्याग्नेर्दक्षिणतो ब्रह्मा जपति । ' आशुः शिशानः ' इति । इन्द्रदेवत्या द्वादश त्रिष्टुभः । इन्द्रपुत्रोऽप्रतिरथोऽपश्यत् । ताभिः स्वपितरं तुष्टाव । अशू व्याप्तौ । व्याप्तः क्षिप्रकारी वा । आशुः शीघ्रः । शिशानः । शो तनूकरणे । वज्रं तीक्ष्णीकुर्वाणः । वृषभः न वृषभ इव श्रेष्ठः सेचनदक्षो वा । बिभेत्यस्मादिति भीमः । हनहनेत्येवं वक्ता घनाघनः । यद्वा– घन इव घनो, घन इव गर्जन् [वा] घनाघनः । ' क्षोभणश्चर्षणीनाम् ' । चर्षणयो मनुष्यास्तेषां चर्षणीनां क्षोभणः क्षोभकारी व्याकुलयिता । तथेन्द्रो वर्षणकर्मणा कर्षणसेतुबन्धन-कुल्याप्रवर्तनादिव्यापारैर्मनुष्याणां क्षोभकारी भवतीति क्षोभणः । क्रदि गतिशोषणयोः । संक्रन्दयति समाह्वयति संग्रामार्थं शत्रुमिति संक्रन्दनः समाह्वाता । मिष चलने । स्वपदादचलितः अनिमिषः । अमर्त्यधर्मा वा । एकः असहायः वीरो विक्रान्तः । स्वकीयानामुत्साहवर्धनो वा वीरः शत्रून् विरामयतीति वा वीरः । एकश्चासौ वीरश्चेति एकवीरः । शतं बह्वीः सेनाः आसुरीः सेनाः साकं सहैव अजयत् । बह्वीषु सेनासु समागतासु एकदैव ताभिः सह युद्धं कुर्वन् अजयत् । न पर्यायेण । शत्रूणां दारयिता द्रावयिता वा इन्द्रः स्वयमप्रतिरथः । " इन्द्रः इरां दृणातीति वा । इरां ददातीति वेरां दधातीति वेरां दारयते इति वा । इरां धारयत इति वा । इन्दवे द्रवतीति वा । इन्दौ रमत इति वा । इन्द्धे भूतानीति वा । तद् यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायते । इदं करणादित्याग्रायणः । इदं दर्शना-दित्यौपमन्यवः । इन्दतेर्वा ऐश्वर्यकर्मणः । इन् । शत्रूणां दारयिता वा द्रावयिता वा । आदरयिता च यज्वनाम् " (नि १०·८·४) ॥ अत्रेन्द्रशब्दार्थो योग्यतया योजनीयः ॥३३॥

1. S2 जपति for जप
2. P1 after प्रथमा adds इन्द्रदेवत्या द्वादश त्रिष्टुभः
6. S2 om. तद्वदयमपि
8. P1 after इत्यर्थः adds यद्वा देवत्वान्निमेषरहितः
13. H2–3 हहेन्येत्येवं, B1 घनाघनेत्येवं for हनहनेत्येवं
14. B1 after second घनाघनः add यद्वा दृढकठिनकायो घनाघनः
20. B1 बहं for बह्वीः

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत् सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥

संक्रन्दनेनेति सम्ऽक्रन्दनेन । अनिमिषेणेत्यनिऽमिषेण । जिष्णुना ।
युत्कारेणेति युत्ऽकारेण । दुश्च्यवनेनेति दुःऽच्यवनेन । धृष्णुना ।
तत् । इन्द्रेण । जयत । तत् । सहध्वम् ।
युधः । नरः । इषुहस्तेनेतीषुऽहस्तेन । वृष्णा ॥ व्रूं ॥२॥

सा– अथ द्वितीया– ' संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत् सहध्वं युधो नर इषुहस्तेन वृष्णा ' इति । ˅युधः युद्धार्थिनो हे ˅नरः मनुष्याः, ˅इन्द्रेण अनुगृहीताः सन्तः ˅तत् परबलं ˅जयत वशीकुरुत । वशीकृत्य च ˅तत् ˅सहध्वम् ˅अभिभवत विनाशयतेत्यर्थः । कीदृशेनेन्द्रेण ? ˅संक्रन्दनेन ˅अनिमिषेण । पूर्ववद् व्याख्येयम् । ˅जिष्णुना जयशीलेन । ˅युत्कारेण युद्धकारिणा । ˅दुश्च्यवनेन च्यावयितुं दुःशक्येन ˅धृष्णुना भीतिरहितेन । ˅इषुहस्तेन बाणाद्यायुधोपेतेन ˅वृष्णा चाभिमतवर्षकेण ॥२॥

आ– ' संक्रन्दनेन ' इति । ˅संक्रन्दनेन प्रतिभटाह्वाननेन । ˅अनिमिषेण एकचित्तेन अप्रमाद्यता । ˅जिष्णुना जयशीलेन । युधि संप्रहारे । युदिति संग्रामनाम । युत् करोतीति युत्कारः । तेन ˅युत्कारेण । अन्यैश्चावयितुं न शक्यत इति दुश्च्यवनः । तेन ˅दुश्च्यवनेन । ˅धृष्णुना धर्षणशीलेन । एवंगुणविशिष्टेन ˅इन्द्रेण कारणभूतेन । युध संप्रहारे इत्यस्य क्विबन्तस्य बहुवचनान्तं रूपं हे ˅युधः, हे योद्धारः हे ˅नरः हे मनुष्याः, युष्माभिः दुर्जेयं यदरिसैन्यं ˅तत् इन्द्रेण ˅जयत । ˅इषुहस्तेन बाणहस्तेन । ˅वृष्णा प्रधानेन शरवृष्टिकारिणा इन्द्रेण यत् ˅तत् ˅सहध्वं सहनं कुरुध्वम् ॥३४॥

स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन ।
सꣳसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥

सः । इषुहस्तैरितीषुऽहस्तैः । सः । निषङ्गिभिरिति निषङ्गिऽभिः । वशी ।
सꣳस्रष्टेति समऽस्रष्टा । सः । युधः । इन्द्रः । गणेन ।
सꣳसृष्टजिदिति सꣳसृष्टऽजित् । सोमपा इति सोमऽपाः । बाहुशर्धीति बाहुऽशर्धी ।
उग्रधन्वेत्युग्रऽधन्वा । प्रतिहिताभिरिति प्रतिऽहिताभिः । अस्ता ॥ द्वूं ॥३॥

12. P1 वा for च; S2 प्रधानेन for चाभिमत°

सा– अथ तृतीया– ‘ स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन। सꣳसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ’ इति। इषवो हस्तेषु येषां भटानां ते इषुहस्तास्तैः साकं vसः vइन्द्रः vवशी परबलं स्ववशं करोति। निषङ्गिणः खड्गहस्तास्तैः साकं vसः इन्द्रो वशी स्वकीयैर्धानुष्कैः खड्गहस्तैश्चोपेतत्वात् परसैन्यं वशीकरोतीत्यर्थः । यद्वा– परसैन्यगतैर्धानुष्कैः खड्गहस्तैः सहितान् परकीयान् सर्वान् वशीकरोति । सः vइन्द्रः vयुधः योद्धॄन् vगणेन परकीयभटसमूहेन vसंस्रष्टा सम्यङ् मिश्रितो भवति । मिश्रीभूय च [ये] स्वेन संसृष्टास्तान् सर्वान् जयतीति vसंसृष्टजित् । vसोमपाः । यजमानानां यागेषु सोमं पिबति । अत एव vबाहुशर्धी बाहुबलोपेतः । vउग्रधन्वा उद्यतधनुऽष्कः vप्रतिहिताभिः तेन धनुषा प्रेरिताभिरिषुभिः vअस्ता क्षेप्ता विनाशयितेत्यर्थः ॥३॥

आ– ‘ स इषुहस्तैः ’ इति। vसः vइन्द्रः vइषुहस्तैः शरपाणिभिः शरयुक्तपाणिभिः योद्धृभिः । vसः vनिषङ्गिभिः खड्गिभिः । इत्येवंविधैः स्वसैनिकैर्युक्तः vवशी कान्तः सर्वजनप्रियः स्वामी स्वतन्त्रो वा ईश्वरः vइन्द्रः vयुधः योद्धॄन् प्रति स्तनयन् । vसंस्रष्टा तैः संसृज्य युद्धकारी। यद्वा– vयुधः युद्धनिमित्तं vसः इन्द्रः स्वयमेकोऽपि स्वगणेन vसंस्रष्टा संसर्गं कुर्वाणः । vसंसृष्टजित्, संग्रामे संसृष्टं संसर्गं प्राप्तान् जयतीति संसृष्टजित् । संसृष्टान् जयति । स्वयं vसोमपाः च । शर्ध इति बलनाम । बाह्वोः शर्धः अस्यास्तीति vबाहुशर्धी । न केवलमायुधबलं सेनाबलं च, अपि तु बाहुबलं चास्ति । vउग्रधन्वा उद्यतधनुः सन् vप्रतिहिताभिः प्रत्युद्गताभिः सेनाभिः सह vअस्ता शराणां क्षेप्ता । न पराङ्मुखः ॥३५॥

बृह॑स्पते॒ परि॑ दीया॒ रथे॑न रक्षो॒हामित्राꣳ॑२ अप॒बाध॑मानः ।
प्र॒भ॒ञ्जन्त्सेनाः॑ प्रमृ॒णो यु॒धा जय॑न्न॒स्माक॑मेध्यवि॒ता रथा॑नाम् ॥४॥

बृह॑स्पते । परि॑ । दी॒य॒ । रथे॑न ।
र॒क्षो॒हेति॑ र॒क्षः॒ऽहा । अ॒मित्रा॑न् । अ॒प॒बाध॑मा॒न॒ इत्य॑प॒ऽबाध॑मानः ।
प्र॒भ॒ञ्जन्निति॑ प्र॒ऽभ॒ञ्जन् । सेनाः॑ । प्र॒मृ॒ण इति॑ प्र॒ऽमृ॒णः । यु॒धा । जय॑न् ।
अ॒स्माक॑म् । ए॒धि॒ । अ॒वि॒ता । रथा॑नाम् ॥ ध्वें ॥४॥

सा– अथ चतुर्थी– ‘ बृहस्पते परि दीया रथेन रक्षोहामित्राꣳ२ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ’ इति । बृहती वाक् । तस्याः पालको बृहस्पतिरिन्द्रः । अत एवान्यत्राम्नातम्– “ वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः ” (शब्रा १४.४.१.२२)

---

6. P1 मिश्रयिता for मिश्रितो; P1 मिश्रयित्वा for मिश्रीभूय
8. P1 after °शर्धी ins. शर्धी इति बलनाम
15. B1 om. सेनाबलं च
16. B1 सेनादिभिः for सेनाभिः

इति । व्याकरणकर्तृत्वादिन्द्रस्य वाक्पतित्वम् । तच्चान्यत्र समाम्नातम्– "देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति " इति । तथाविध हे इन्द्र, त्वं रथेन परि दीय सर्वतो गच्छ । कीदृश इन्द्रः ? रक्षोहा रक्षसां हन्ता । अमित्रान् शत्रून् अपबाधमानः, यथा अपनयन्ति तथा बाधमानः । सेनाः परकीयाः प्रभञ्जन् प्रकर्षेण भग्नाः कुर्वन् । प्रमृणः प्रकर्षेण हिंसकः, युधा युद्धेन जयन् सर्वत्र विजयमानः । अस्माकम् अस्मदीयानां रथानाम् अविता एधि रक्षको भव ॥४॥

आ– [' बृहस्पते परि ' इति ।] बृहस्पते बृहतो देवराज्यस्य स्वराज्यस्य पते पालक । रथेन स्यन्दनेन । दीयतिर्गतिकर्मा । परि दीय परि याहि । स्वभावतस्त्वं रक्षोहा । रक्षांसि हन्तीति रक्षोहा । अत एवावशिष्टान् अमित्रान् शत्रून् अपबाधमानः परिबाधमानः । तदीयाः सेनाः प्रभञ्जन् प्रकर्षेण मर्दयन् । मृण हिंसायाम् । प्रमृणः द्वितीयाबहुवचनम् । हिंसकान् । युधा युद्धेन तान् जयन् रथानां स्वकीयानाम् अविता गोप्ता एधि भव ॥३६॥

बलविज्ञाय स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्त्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥५॥

बलविज्ञाय इति बलऽविज्ञायः । स्थविरः । प्रवीर इति प्रऽवीरः ।
सहस्वान् । वाजी । सहमानः । उग्रः ।
अभिवीर इत्यभिऽवीरः । अभिसत्त्वेत्यभिऽसत्त्वा । सहोजा इति सहःऽजाः ।
जैत्रम् । इन्द्र । रथम् । आ । तिष्ठ । गोविदिति गोऽवित् ॥ ग्र्यैं ॥५॥

सा– अथ पञ्चमी– ' बलविज्ञाय स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः । अभिवीरो अभिसत्त्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ' इति । हे इन्द्र, त्वं जैत्रं जयशीलं रथम् आ तिष्ठ आरोह । कीदृशस्त्वम् ? बलं परकीयं सामर्थ्यं विजानातीति बलविज्ञायः । स्थविरः पुरातनः । प्रवीरः शूरेषु अप्यतिशूरः । सहस्वान् बलवान् । वाजी अन्नवान् । सहमानः परेषामभिभविता । उग्रः युद्धेषु क्रूरः । अभितो वीराः शूराः भटा यस्यासौ अभिवीरः । अभितः सत्त्वानः परिचारकाः प्राणिनो यस्यासौ अभिसत्त्वा । सहसो बलादिव जातः सहोजाः । बलाधिक इत्यर्थः । गां भूमिं विन्दते लभत इति गोवित् ॥५॥

---

2. P1 after दीय ins. दीयतिर्गतिकर्मा
4. P1 after प्रमृणः ins. मृणतिर्हिंसार्थः
9. B1 om. प्रकर्षेण ... जयन् (L 10)
20. P1 स्वकीयं° for परकीयं°
24. P1 after गोवित् adds यद्वा स्तुवित्

आ– [' बलविज्ञायः ' इति] । बलेन विज्ञायते इति vबलविज्ञायः । बलस्य हीन्द्रो देवतेति । vस्थविरः च सर्वानुशासकः विद्यादिभिः स्थूलः । vप्रवीरः च प्रकृष्टो वीरश्च । vसहस्वान् बलवान् । vवाजी वाजमन्नं तद्वान् । vसहमानः शत्रुबलस्य वेगं सहमानः । vउग्रः उद्गूर्णवज्रः । वीरं वीरमभि वीरानभिभूय स्थितः vअभिवीरः । सत्त्वं सत्त्वमभि सर्वाणि सत्त्वानि प्राणिनश्च वशमानीय स्थितः vअभिसत्त्वा । सहः प्राणबलम् । सहसा जायत इति सहोजः, छान्दसः vसहोजाः । गाः स्वरूपप्रतिपादका उपनिषद्वाचः वेत्ति विन्दत इति vगोवित् । हे गोवित् हे vइन्द्र, इमं vजैत्रं जयशीलं vरथम् vआतिष्ठ आरुह ॥३७॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायो अनु सꣳ रभध्वम् ॥६॥

गोत्रभिदमिति गोत्रऽभिदम् । गोविदमिति गोऽविदम् । वज्रबाहुमिति वज्रऽबाहुम् ।
जयन्तम् । अज्म । प्रमृणन्तमिति प्रऽमृणन्तम् । ओजसा ।
इमम् । सजाता इति सऽजाताः । अनु । वीरयध्वम् ।
इन्द्रम् । सखायः । अनु । सम् । रभध्वम् ॥ फं ॥६॥

सा– अथ षष्ठी– ' गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा । इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायो अनु सꣳरभध्वम् ' इति । हे vसजाताः समानजन्मानोऽस्मदीया ज्ञातयः, यूयम् vइन्द्रम् vअनु vवीरयध्वम् इन्द्रस्यानन्तरं वीरा भवन्तु, अयमिन्द्रः पुरतो वीरः शूरो भवतु, पश्चाद्यूयं शूरा भवत । हे vसखायः, इन्द्रम् vअनु vसंरभध्वम्, इन्द्रः पुरतो युद्धं सम्यगारभताम्, पश्चात भवन्त आरभन्ताम् । कीदृशमिन्द्रम् ? vगोत्रभिदं, गोत्रान् पर्वतान् भिनत्ति तदीयपक्षान् छिनत्तीति गोत्रभित् [तम्] । गां भूमिं विन्दते लभत इति गोवित् तं vगोविदम् । वज्रो बाहौ यस्य स वज्रबाहुस्तम् । ज्मा भूमिः । अज्म भूमिराहित्यं शत्रूणां यथा भवति तथा । [vजयन्तं] विजयमानम् । vओजसा बलेन vप्रमृणन्तं प्रकर्षेण हिंसन्तम् ॥६॥

आ–(' गोत्रभिदम् ' इति) । गोत्राणि पर्वताः । तान् भिनत्तीति गोत्रभित् तं vगोत्रभिदम् । यद्वा– गोत्रमिति वृष्ट्यर्थं मेघानतिताडयतीति गोत्रभित् तं गोत्रभिदम् । vगोविदं वाग्विदम् । vवज्रबाहुं वज्रपाणिम् । vजयन्तम् vअज्म अज्मनि संग्रामे शत्रून् जयन्तम् । vओजसा

5. B1 प्राणो for प्राण°; B1 सहोजा: for सहोजः छान्दसः सहोजाः (L 6)

19. P1 after गोत्रभित् adds शत्रुकुलस्य भेत्तेति वा

24. B1 om. अज्म ... जयन्तम्

बलेन प्रमृणन्तं शत्रून् प्राणिनो विहिंसन्तं शत्रून् रणे जयन्तम् । सजाताः समानजन्मानो देवाः यूयम् इमम् इन्द्रम् अनु वीरयध्वम् अनुत्साहं [मा] कुरुध्वम् । हे सखायः हे देवाः, इन्द्रमनुगम्य वीरकर्मणैव प्रोत्साहयत [इत्यर्थः] । इन्द्रम् अनु संरभध्वम् । अनुगम्य सरभसं कुरुध्वम् ॥३८॥

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाळयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु ॥७॥

अभि । गोत्राणि । सहसा । गाहमानः ।
अदयः । वीरः । शतमन्युरिति शतऽमन्युः । इन्द्रः ।
दुश्च्यवन इति दुःऽच्यवनः । पृतनाषाट् । अयुध्यः ।
अस्माकम् । सेनाः । अवतु । प्र । युत्स्विति युत्ऽसु ॥ ट्रै ॥७॥

सा– अथ सप्तमी– ‘ अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाळयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु ’ इति । अयम् इन्द्रः प्र युत्सु प्रकृष्टेषु युद्धेषु अस्माकं सेनाः अवतु रक्षतु । कीदृश इन्द्रः ? अभि सर्वतोऽवस्थितानि गोत्राणि युद्धक्षेत्राणि सहसा शीघ्रं गाहमानः प्रविशन् । अदयः दयारहितः वीरः शूरः शतमन्युः बहुक्रोधयुक्तः । दुश्च्यवनः च्यावयितु दुःशक्यः पृतनाषाट् परकीयसेनानामभिभविता । अयुध्यः केनापि योद्धुमशक्यः ॥३९॥

आ– अभि गोत्राणि । [गोत्राणि] असुरकुलानि मेघवृन्दानि वा । ‘ गोत्राणि सहसा गाहमानः ’ । बलेन अभि गाहमानः अभिप्रविशन् । अदयः दयाशून्यः । वीरः स्वपक्षस्योत्साहवर्धनः विक्रान्तः । शतमन्युः बहुक्रोधः शतक्रतुरिति वा । इन्द्रः शत्रूणां दारयिता । दुश्च्यवनः अप्रच्याव्यः । पृतनां संग्रामं सहते अभिभवतीति पृतनाषाट् । अयुध्यः अविद्यमान-प्रतियोधः । एवंगुणविशिष्ट इन्द्रः युत्सु युद्धेषु अस्माकं सेनाः प्रावतु रक्षतु ॥३९॥

इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥८॥

---

12. P1 om. प्रकृष्टेषु

14. P1 om. शूरः; S2 बहुधा for बहु°

इन्द्रः । आसाम् । नेता । बृहस्पतिः । दक्षिणा । यज्ञः । पुरः । एतु । सोमः ।
देवसेनानामिति देवऽसेनानाम् । अभिभञ्जतीनामित्यभिऽभञ्जतीनाम् ।
जयन्तीनाम् । मरुतः । यन्तु । अग्रम् ॥ त्रू ॥८॥

सा– अथाष्टमी– ' इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ' इति । याः सेनाः अस्मदनुग्रहार्थं वैरिषु गच्छन्ति, ᵛआसां सेनानाम् ᵛइन्द्रः ᵛनेता भवतु। यः ᵛबृहस्पतिः या च ᵛदक्षिणा देवी यश्च ᵛयज्ञः यश्च ᵛसोमः एतेषामेकैकः ᵛपुरः ᵛएतु पुरतो गच्छतु। याश्चैतत्संबधिन्यो देवसेनाः परबलम् अभितो भञ्जयन्त्यो जयन्ति, तासाम् ᵛअग्रं पुरतः ᵛमरुतः ᵛयन्तु गच्छन्तु ॥८॥

आ– ' इन्द्र आसाम् ' इति । ᵛआसाम् ᵛअभिभञ्जतीनाम् अभितः सर्वतः भञ्जतीनाम् । भञ्जो आमर्दने । परबलमर्दनं कुर्वन्तीनाम् । परबलं ᵛजयन्तीनां ᵛदेवसेनानाम् ᵛइन्द्रः शत्रुसेनानां दारयिता । ᵛनेता प्रापयिता भवतु । ᵛबृहस्पतिः देवमन्त्री । ᵛदक्षिणा । दक्ष वृद्धौ । दक्षयति वर्धयतीति दाक्षिणा । दाक्षिणतः मन्त्रिदृष्टं हि राजा करोति । तदेव सफलं भवतीति प्रसिद्धम् । अतो बृहस्पतिः सर्वनिरीक्षको भवति । ᵛयज्ञः विष्णुः ᵛपुरः पुरतः ᵛएतु गच्छतु । अथवा बृहस्पतिः दक्षिणतः पुरतो विष्णुरुत्तरतः ᵛसोमः एतु । ᵛमरुतः एकोनपञ्चाशत् मरुतः ᵛअग्रं नियमेनाग्रतः ᵛयन्तु गच्छन्तु ॥४१॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां᳘ शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥९॥

इन्द्रस्य । वृष्णः । वरुणस्य । राज्ञः । आदित्यानाम् । मरुताम् । शर्धः । उग्रम् ।
महामनसामिति महाऽमनसाम् । भुवनच्यवानामिति भुवनऽच्यवानाम् ।
घोषः । देवानाम् । जयताम् । उत् । अस्थात् ॥ ज्ञू ॥ ॥९॥

सा– अथ नवमी– ' इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां᳘ शर्ध उग्रम् । महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ' इति । ᵛवृष्णः कामस्य वर्षिणः ᵛइन्द्रस्य ᵛराज्ञः राज्यं कुर्वतः ᵛवरुणस्य ᵛआदित्यानाम् अदितिपुत्राणां ᵛमरुतां ᵛशर्धः बलं युद्धेषु ᵛउग्रं शत्रूणां भीतिप्रदं भवत्विति शेषः । तथा ᵛमहामनसां युद्धे स्थिरचित्तानां शत्रून् भुवनेभ्यश्च्यावयितुं समर्थानां ᵛजयतां विजयमानानां ᵛदेवानाम् इन्द्रादीनां ᵛघोषः शब्दो ध्वनिः ᵛउदस्थात् सर्वतः उत्थितोऽभूत् ॥

13. H2–3 एतत् for एव
23. S2 अभितः for उग्रं°; S2 om. शत्रूणां° भीतिप्रदं°

आ– (' इन्द्रस्य वृष्णः ' इति)। इन्द्रस्य वृष्णः वर्षितुः ।? वरु(? र) णाद् वरुणः राजा स्वतन्त्रः । तस्य वरुणस्य राज्ञः आदित्यानाम् अदितिपुत्राणां मरुतां च शर्धः बलं हस्त्यश्वपदातिलक्षणम् उग्रम् उद्गूर्णं, तच्च बलं महामनसां महासंकल्पयुक्तमनसां विजिगीषूणां भुवनच्यवानां भुवनान्यपि च्यावयितुं समर्थानां जयतां शत्रून् विजयतां देवानां घोषः सिंहनादश्च उदस्थात् उत्तिष्ठतु ॥९॥

उद्धर्षय मघवन्नायुधान्युत्सत्त्वनां मामकानां मनांꣳसि ।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥१०॥

उत् । हर्षय । मघवन्निति मघऽवन् । आयुधानि ।
उत् । सत्त्वनाम् । मामकानाम् । मनांꣳसि ।
उत् । वृत्रहन्निति वृत्रऽहन् । वाजिनाम् । वाजिनानि ।
उत् । रथानाम् । जयताम् । यन्तु । घोषाः ॥ ञ्जैं ॥१०॥

सा– अथ दशमी– ' उद्धर्षय मघवन्नायुधान्युत्सत्त्वनां मामकानां मनांꣳसि । उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ' इति । हे मघवन् इन्द्र, आयुधानि अस्मदीयानि उद्धर्षय परकीयेभ्य उत्कृष्टानि कृत्वा अस्मान् हर्षय । मामकानां मदीयानां सत्त्वनां प्राणिनः मनांसि उत्कृष्टानि कृत्वा हर्षय । हे वृत्रहन् वैरिघातिन्, वाजिनाम् अश्वानाम् अस्मदीयानां वाजिनानि शीघ्रगमनानि उत्कृष्टानि कृत्वा हर्षय । जयतां विजयं प्राप्नुवतां रथानाम् अस्मदीयानां घोषाः उद्यन्तु महान्तो ध्वनय उद्गच्छन्तु ॥१०॥

आ– (' उद्धर्षय मघवन् ' इति)। हे मघवन् समग्रधनसंपन्न, आयुधानि वज्रादीनि गृहीत्वा उत्सत्त्वनां उत्कृष्टसत्त्ववतां मामकानां मदीयानां मनांसि उद्धर्षय । मनसां महोत्साहो यथा भवति तथा आयुधसंनहनं कुरु । उत् हे वृत्रहन्, वाजिनाम् अश्वानां वाजिनानि प्रयच्छेति शेषः । अथवा सुगत्यर्थं निर्मितबन्धनसाधनानि वाजिनानि चञ्चलत्वादीनि वा उद्धर्षय । रथानां जयतां युद्धकारिणां च घोषाः सिंहनादाः उद्यन्तु उद्गच्छन्तु ॥९॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं꣡ वीरा उत्तरे भवन्त्वस्माँ२ उ देवा अवता हवेषु ॥११॥

3. B1 उद्गीर्णं for उद्गूर्णं

20. B1 om. अश्वानां॰; B1 after वाजनानि adds ॰वशिष्ट जनान्; H2-3 बिशिन्द्रसान्

अप्रतिरथं सूक्तम्]

अस्माकम् । इन्द्रः । समृतेष्विति सम्ऽऋतेषु । ध्वजेषु ।
अस्माकम् । याः । इषवः । ताः । जयन्तु ।
अस्माकम् । वीराः । उत्तर इत्युत्ऽतरे । भवन्तु ।
अस्मान् । ऊँ इत्यूँ । देवाः । अवत । हवेषु ॥ इयों ॥११॥

सा- अथैकादशी- 'अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु । अस्माकं वीरा उत्तरे भवन्त्वस्माँ२ उ देवा अवता हवेषु ' इति । युद्धार्थं परसैन्यगतेषु ध्वजेषु समृतेषु सम्यक् प्राप्तेषु सत्सु अस्माकम् इन्द्रः रक्षितेति शेषः । तदानीम् अस्माकं याः इषवः अस्मदीयैर्मुक्तास्ताः जयन्तु परसैन्यानि वध्यन्तु । अस्माकं वीराः ये शूरा भटास्ते उत्तरे भवन्तु परकीयभटेभ्य उत्कृष्टा भवन्तु । उ अपि च हे देवाः, हवेषु युद्धेषु अस्मान् यूयम् अवत रक्षत ॥११॥

आ- ['अस्माकमिन्द्रः' इति ।] अस्माकम् इन्द्रः परमैश्वर्ययुक्तः एव भूयात् । समृतेषु ध्वजेषु तन्नादादिभिः सह लोलीभूतेषु इन्द्रो रक्षिता भवतु । अस्माकं याः इषवः अस्मदीयाः शत्रुसंहारार्थं विमुक्ताः या इषवः शराः ताः जयन्तु अमोघा भवन्तु । अस्माकं वीराः उत्तरे भवन्तु अस्मदुत्साहकारिणः सैनिकाः विजयिनो भवन्तु । उ अपि हवेषु आहवेषु संग्रामेषु क्रियमाणेषु अस्मान् दिदृक्षून् हे देवाः, यूयम् अवत रक्षत ॥४३॥

अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥

अमीषाम् । चित्तम् । प्रतिलोभयन्तीति प्रतिऽलोभयन्ती ।
गृहाण । अङ्गानि । अप्वे । परा । इहि ।
अभि । प्र । इहि । निः । दह । हृत्स्विति हृत्ऽसु । शोकैः ।
अन्धेन । अमित्राः । तमसा । सचन्ताम् ॥ जौं ॥१२॥

सा- अथ द्वादशी- 'अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि । अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ' इति । हे अप्वे सर्वव्यापनशीले इन्द्रसेने, अमीषाम् एषां शत्रूणां चित्तं चित्तानि चेतांसि प्रतिलोभयन्ती विमोहयमाना त्वं तच्छत्रुसंबन्धीनि अङ्गानि गृहाण । ततः परा इहि परा गच्छ, अभितः परतरान् शत्रून् गृहीत्वा प्रगच्छ । ततः हृत्सु तेषां शत्रुसंबन्धीनि हृदयान्यपि शोकैः निर्दह भस्मीकुरु । ततस्ते अमित्राः तेऽपि शत्रवः अन्धेन तमसा तीव्रान्धकारेण सचन्ताम् समवेताः संगता भवन्तु ॥१२॥

10. B1 एवं for एव
14. H3 दिदृक्षुः for दिदृक्षून्
26. S2 सेवन्तां for सचन्तां

आ– 'अमीषां चित्तम्' इति । अशू व्याप्तौ । यस्मिन्ननायासेन या व्याप्तौ पत्रीयते (? पाय्यते) इति अप्वा इन्द्रसेना । हे अप्वे, एषां शत्रुबलसंबन्धिनां मनुष्याणां चित्तम् । चित्तानीति परिणामः । प्रतिलोभयन्ती । लुम्भ विमोहने । विमोहयमाना त्वं गृहाण अङ्गानि शत्रूणाम् अङ्गानि गृहाण । ततः परा इहि परा गच्छ । अभि अभितः परतरान् शत्रून् गृहीत्वा प्रेहि प्रगच्छ निर्दह च । हृत्सु शोकैः । हृत्स्विव्यत्र सप्तमी । द्वितीयया व्यत्ययः । हृदः हृदयानि शोकैः अपजयप्रयुक्तशोकैः निर्दह हृदयानि भस्मीकुरु । ततः अमित्राः शत्रवः अन्धेन पराभवनिमित्तेन कार्याकार्यदर्शनशून्यतया समागतेन तमसा अन्धकारेण सचन्ताम् । तमसा समवेताः संगता भवन्तु ॥४४॥

अव॑सृष्टा॒ परा॑ पत॒ शर॑व्ये॒ ब्रह्म॑सꣳशिते ।
गच्छा॒मित्रा॒न् प्र प॑द्यस्व॒ माऽमीषां॒ कं च॒नोच्छि॑षः ॥१३॥

अव॑सृष्टेत्यव॑ऽसृष्टा । परा॑ । प॒त । शर॑व्ये । ब्रह्म॑सꣳशित॒ इति॒ ब्रह्म॑ऽसꣳशिते ।
गच्छ॑ । अ॒मित्रा॑न् । प्र । प॒द्य॒स्व॒ ।
मा । अ॒मीषा॑म् । कम् । च॒न । उत् । शि॒षः॒ ॥ च्यूं ॥१३॥

स्का– अथ त्रयोदशी– 'अवसृष्टा परा पत शरव्ये ब्रह्मसꣳशिते । गच्छामित्रान् प्र पद्यस्व माऽमीषां कं चनोच्छिषः' इति । हिंसिका हेतिः शरव्या । ब्रह्मणा मन्त्रेण सꣳशिता सज्जीकृता ब्रह्मसꣳशिता । तादृशी हे शरव्ये, त्वम् अवसृष्टा अस्माभिर्मुक्ता सती परा पत सहसा परसैन्ये पतिता भव । पतित्वा च अमित्रान् शत्रून् गच्छ प्राप्नुहि । प्राप्य च प्रपद्यस्व । शत्रूणां मध्ये कं चन पुरुषं मा उच्छिषः अवशिष्टं मा कुरु, सर्वानपि जहीत्यर्थः ॥१३॥

आ– 'अवसृष्टा परा' इति । द्वादशेन्द्राः संपूर्णाः । इषुदेवत्या अनुष्टुप् । हे शरव्ये, शरश्रेष्ठे ब्रह्मसꣳशिते ब्रह्मणा मन्त्रेण अभिमन्त्रिते अतितरां तीक्ष्णीकृते हे इषो । अवसृष्टा निक्षिप्ता इषुः परापत परागच्छ अस्मत्पराङ्मुखतया गच्छ । तत्रापि अमित्रान् शत्रूनेव गच्छ ।

---

1. H2-3 अपन्न for अशू; B1 अस्मदानन्धासेनया for यस्मिन्ननायासेन
2. B1 अथ for अप्वा; H2-3 इह for इन्द्र°
5. H2-3 om. हृत्स्विव्यत्र ... शोकैः [I, 6]
6. B1 अपक्षय° for अपजय°; B1 om. निर्दह
7. B1 अतः for ततः
14. P1 after त्रयोदशी adds इषुदेवत्यानुष्टुप्
16. P1 युक्ता for मुक्ता

vप्रपद्यस्व तत्रापि मर्मस्थानमेव प्रतिपद्यस्व प्रविश । ते प्रतिघातो नास्ति हि । यतस्त्वं मन्त्राभिपूता । प्रपद्य च– 'माऽमीषां कं चनोच्छिषः' । vअमीषाम् अमित्राणां मध्ये vकं vचन अमित्रं vमा vउच्छिषः उच्छेषणं मा कार्षीः । प्राकृतमपि पुरुषम् अवशिष्टं मा कार्षीः ॥४५॥

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथाऽसथ ॥१४॥

प्र । इत । जयत । नरः । इन्द्रः । वः । शर्म । यच्छतु ।
उग्राः । वः । सन्तु । बाहवः । अनाधृष्याः । यथा । असथ ॥ ३ ॥१४॥

सा– अथ चतुर्दशी– 'प्रेता जयता नर इन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ' इति । हे vनरः अस्मदीयाः पुरुषाः, vप्रेत परसैन्यं प्रकर्षेण गच्छत । ततः vजयत विजयं प्राप्नुत । अयम् vइन्द्रः vवः युष्मभ्यं vशर्म जयप्रयुक्तं सुखं vयच्छतु । किं च । vयथा यूयम् vअनाधृष्याः vअसथ केनापि अतिरस्कार्या भवथ तथा vवः युष्माकं vबाहवः भुजदण्डाः vउग्राः उद्गूर्णायुधाः vसन्तु ॥१४॥

आ– योद्धॄन् स्तौति– 'प्रेत' इति । योद्धृस्तुतिरनुष्टुप् छन्दः । हे vनरः मनुष्याः, vप्रेत प्रगच्छत । vजयत जयं प्राप्नुवत । vवः युष्मभ्यं vइन्द्रः vशर्म शरणं जयप्रयुक्तं सुखं च vयच्छतु ददातु । vवः युष्माकं vबाहवः भुजदण्डाः vउग्राः उद्गूर्णायुधाः vसन्तु । vअनाधृष्याः परेषां धर्षयितुमशक्याः अप्रतियुध्याः vयथा येन प्रकारेण यूयमनाधृष्याः vअसथ भवथ तथा वः बाहवः उग्राः सन्तु ॥४६॥

असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना ।
तां गूहत तमसाऽपव्रतेन यथाऽमी अन्यो अन्यं न जानन् ॥१५॥

---

2. B1 अथ for प्रपद्य
3. H3 उच्छोषणं for उच्छेषणं
9. P1 after चतुर्दशी ins. योद्धृस्तुतिरनुष्टुप्
15. H2–3 om. जय°
17. B1 °युधाः for °युध्याः

असौ । या । सेना॑ । म॒रुत॑: । परे॑षाम् ।
अ॒भि । आ । एति॑ । न॒: । ओज॑सा । स्पर्ध॑माना ।
ताम् । गू॒ह॒त॒ । तम॑सा । अप॑व्रतेनेत्यप॑ऽव्रतेन ।
यथा॑ । अ॒मी इत्य॒मी । अ॒न्यः । अ॒न्यम् । न । जा॒नन् । ॥ ञ्या ॥१५॥

सा– अथ पञ्चदशी– ' असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना । तां गूहत तमसाऽपव्रतेन यथाऽमी अन्यो अन्यं न जानन् ' इति । हे मरुतः, यूयं परेषां शत्रूणां या प्रसिद्धा असौ सेना नः अस्मान् अभ्यैति अभिलक्ष्य आगच्छति । कीदृशी सेना ? ओजसा बलेन स्पर्धमाना स्पर्धां कुर्वाणा । तां सेनाम् अपव्रतेन अपगतकर्मणा तमसा अन्धकारेण गूहत संवृतामाच्छादितामपलपितां कुरुत, यथा अमी सैनिकाः अन्यः अन्यं परस्परं न जानन् न जानीयुः तथा गूहतेत्यन्वयः ॥१५॥

आ– ' असौ या ' इति । मारुती त्रिष्टुप् । हे मरुतः, मरुतो नाम देवाः । परेषां शत्रूणां या प्रसिद्धा असौ सेना अभ्यैति अभ्यागच्छति । अभ्यागत्य च ओजसा बलेन स्पर्धमाना प्रतिस्पर्धां कुर्वाणा, तां सेनां । हे मरुतः, यूयं सेनां गूहत संव्याप्नुत । केनेति ? अपव्रतेन । व्रतमिति कर्मनाम । अपगतकर्मणा तमसा अन्धकारेण । येन तमसा व्याप्तानां स्वकर्माणि नश्यन्ति तदपव्रतं तमः, तेन अपव्रतेन तमसा तां गूहत । ' यथाऽमी अन्यो अन्यं न जानन् ' । यथा येन प्रकारेण अमी सैनिकाः अन्यः अन्यं परस्परं न जानन् ' न जानीयुः ॥४७॥

यत्र॑ बा॒णाः सं॒पत॑न्ति कु॒मा॒रा वि॑शि॒खाइ॑व ।
तन्न॒ इन्द्रो॒ बृह॒स्पति॒रदि॑ति॒: शर्म॑ यच्छतु वि॒श्वाहा॒ शर्म॑ यच्छतु ॥१६॥

यत्र॑ । बा॒णाः । सं॒पत॒न्तीति॑ स॒म्ऽपत॑न्ति । कु॒मा॒राः । वि॒शि॒खाइ॒वेति॑ वि॒शि॒खाःऽईव ।
तत् । न॒: । इन्द्र॑: । बृह॒स्पति॑: ।
अदि॑तिः । शर्म॑ । य॒च्छ॒तु । वि॒श्वाहा॑ । शर्म॑ । य॒च्छ॒तु ॥ छ्रूँ ॥१६॥

सा– अथ षोडशी– ' यत्र बाणाः संपतन्ति कुमारा विशिखा इव । तन्न इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ' इति । यत्र यस्मिन् युद्धे बाणाः परैर्मुक्ताः संपतन्ति इतश्चेतश्च संभूय पतन्ति । तत्र दृष्टान्तः – कुमाराः विशिखाः इव । यथा शिखारहिता मुण्डितमस्तकाः, विकीर्णकेशा

8. P1 प्रतिस्पर्धां for स्पर्धां; P1 after कर्मणा ins. व्रतमिति कर्मनाम
15. B1 after सैनिकाः adds अन्यादन्यं
22. P1 after षोडशी adds लिङ्गोक्तदेवत्या पङ्क्तिः ।

अप्रतिरथं सूक्तम्]

वा अत्यन्तं बालाश्चपलाः सन्तश्चेतश्चेतश्च गच्छन्ति तद्वत्। तत् तस्मिन् युद्धे अयम् इन्द्रः नः अस्मभ्यं शर्म जयप्रयुक्तं सुखं यच्छतु। कीदृश इन्द्रः ? बृहस्पतिः तत्तदुचितमन्त्रज्ञः अदितिः अखण्डितशक्तिः विश्वाहा परकीयसर्वप्राणिघाती अयमिन्द्रः नः अस्मभ्यं शर्म यच्छतु ॥१६॥

आ— 'यत्र बाणाः' इति। लिङ्गोक्तदेवत्या पङ्क्तिः। यत्र रणे बाणाः इषवः संपतन्ति निपतन्ति। कथमिव ? 'कुमारा विशिखा इव'। यथा अदृष्टपरिकराः वि-[गत]-शिखाः सर्वमुण्डाः पुङ्खादिरहिताः लीलया प्रयुक्ताः संघशो यथा निपतन्ति तद्वत्। यथा कुमाराः बालाः संघशः इतरेतरमाक्रीडनार्थं विशिखाः सर्वतोमुण्डाः प्रयुञ्जते ता विशिखा यत्र निपतन्ति, तथा तत् तत्रेत्थंभूते आयोधने नः अस्मभ्यम् इन्द्रः समर्थः नः शर्म सुखं जयप्रयुक्तं सुखं यच्छतु ददातु। बृहस्पतिः तथोचितमन्त्रज्ञ इन्द्रः शर्म यच्छतु। अदितिः अनवखण्डितशक्तिः इन्द्रः शर्म यच्छतु। विश्वाहा सर्वदा शर्म यच्छतु ॥४७॥

मर्मा॑णि ते॒ वर्म॑णा छादयामि॒ सोम॑स्त्वा॒ राजा॒ऽमृते॒नानु॑ वस्ताम्।
उ॒रोर्वरी॑यो॒ वरु॑णस्ते॑ कृणोतु॒ जय॑न्तं॒ त्वाऽनु॑ दे॒वा मं॑दन्तु ॥१७॥४॥

मर्मा॑णि। ते॒। वर्म॑णा। छा॒द॒या॒मि॒। सोम॑ः। त्वा॒। राजा॑। अ॒मृते॑न। अनु॑। व॒स्ता॒म्।
उ॒रोः। वरी॑यः। वरु॑णः। ते॒। कृ॒णो॒तु॒।
जय॑न्तम्। त्वा॒। अनु॑। दे॒वाः। म॒द॒न्तु॒ ॥ ळ्लः ॥१७॥४॥

सा— अथ सप्तदशी— 'मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजाऽमृतेनानु वस्ताम्। उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वाऽनु देवा मदन्तु' इति। हे यजमान, ते तव मर्माणि जीवस्थानानि वर्मणा कवचेन छादयामि आच्छादयामि। सोमः राजा अमृतेन मरणनिवारकेणापि कवचविशेषेण त्वा अनु वस्ताम् त्वामाच्छादयतु। तथा वरुणः ते तुभ्यम् उरोः वरीयः अन्यदीयादधिकादप्यत्यन्तमधिकं कृणोतु। जयन्तं विजयं प्राप्नुवन्तं त्वा देवाः अनु मदन्तु अनुकूला भूत्वा हृष्यन्तु ॥१७॥

[इत्यष्टादशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

3. P1 after °घाती add सर्वकालमपीति भाष्यान्तरम्
5. H2–3 विशिष्टाः for वि [गत] शिखाः [L 6]
8. B1 एवं for इत्थं
9. B1 om. अदितिः ... यच्छतु [L 10]
16. P1 after सप्तदशी adds लिङ्गोक्तदेवत्या त्रिष्टुप्
18. S2 om. आच्छादयामि
19. P1 after आच्छादयतु adds वस आच्छादने
20. P1 after अन्यदीयाद् adds अपि; P1 अत्यन्तवर्मा (अत्यन्तमधिकं)

आ– 'मर्माणि ते' इति। लिङ्गोक्तदेवत्या त्रिष्टुप्। कवचं प्रयच्छति। ^{v}वर्मणा कवचेन ^{v}ते तव ^{v}मर्माणि जीवस्थानानि। देहे शतं मर्माणि भवन्ति, तानि ^{v}छादयामि आच्छादयामि। ओषधीनां ^{v}राजा ^{v}सोमः ^{v}अमृतेन [मरण]विरोधिना औषधेन रसायनेन वा त्वाम् ^{v}अनु ^{v}वस्ताम् त्वामन्वाच्छादयतु। ^{v}उरोः पृथोः ^{v}वरीयः पृथुवर्म कवचं ^{v}ते तव ^{v}वरुणः ^{v}कृणोतु। एवं ^{v}जयन्तम् इन्द्रं ^{v}त्वा ^{v}देवाः ^{v}अनु ^{v}मदन्तु उत्साहयन्तु, हृष्टा भवन्तु ॥४९॥

[इति चतुर्थोऽनुवाकः]

[अथ पञ्चमोऽनुवाकः।]

उदे॑नमुत्त॒रां न॑याग्ने घृ॒तेना॑हुत।
रा॒यस्पोषे॑ण॒ सꣳसृ॑ज प्र॒जया॑ च ब॒हुं कृ॑धि ॥१॥

उत्। ए॒न॒म्। उ॒त्त॒रामित्युत्ऽत॒राम्। न॒य॒। अग्ने॑। घृ॒ते॒न॒। आहु॒तेत्याऽहु॑त।
रा॒यः। पोषे॑ण। सम्। सृ॒ज॒। प्र॒जयेति॑ प्र॒ऽजया॑। च॒। ब॒हुम्। कृ॒धि॒ ॥ इं ॥१॥

सा– चतुर्थेऽनुवाके ब्रह्मणा जप्यमप्रतिरथाख्यं सूक्तमुक्तम्। अथ पञ्चमे अग्निप्रणयनमुच्यते॥ कात्यायनः – 'आर्द्रौदुम्बरीर्घृताक्तास्तिस्र उदेनमित्या दधाति प्रत्यृचम्' (काश्रौ १८.३.१४) इति। घृताक्तार्द्रास्तिस्र औदुम्बरीः समिध 'उदेनम्' इति तिसृभिर्ऋग्भिरादध्यात्। तत्र प्रथमा– 'उदेनमुत्तरां नयाग्ने घृतेनाहुत। रायस्पोषेण सꣳसृज प्रजया च बहुं कृधि' इति। ^{v}घृतेन द्रव्येण ^{v}आहुत सर्वतो हूयमान ^{v}अग्ने, ^{v}एनं यजमानम् ^{v}उत्तराम् अत्युत्कृष्टमैश्वर्यं प्रति ^{v}उन्नय उत्कर्षेण प्रापय शीघ्रं प्रापयेत्यर्थः। उत्कृष्टमैश्वर्यमेव प्रपञ्च्यते। ^{v}रायस्पोषेण धनसमृद्ध्या ^{v}संसृज संयोजय। किं च– ^{v}प्रजया ^{v}च संतत्या ^{v}बहुं पुत्रादिभिरतिबहुभावमापन्नं ^{v}कृधि कुरु ॥१॥

आ– समिधमादधाति– 'उदेनम्' इति। तिस्रोऽनुष्टुभः। आद्याऽग्नेयी, द्वितीयैन्द्री, तृतीया लिङ्गोक्तदेवत्या। हे श्रीभगवन्नग्ने, ^{v}एनं यजमानम् ^{v}उत्तरां ^{v}नय उद्गततरामूर्ध्व-

---

2. H2–3 जीवन° for जीव°; B1 सन्ति for भवन्ति
3. B1 om. आच्छादयामि; H2–3 अमृततरोषधिना for [मरण]विरोधिना
4. H2–3 अन्वागच्छतु छादयतु for अन्वाच्छादयतु; H2–3 प्रथम for पृथु; B1 चर्म for वर्म
15. S2 om. ऋग्भिः
16. P1 after प्रथमा adds: अनुष्टुवाग्नेयी
20. B1 अथा for आद्या

तरामुत्कृष्टां गतिं प्रापय । घृतेन आहुत घृताक्तया समिधा आहुत । आहूयत इत्याहुतः, तत्संबोधनम् आहुत । रायस्पोषेण धनस्य पुष्ट्या यजमानं संसृज । किं च । प्रजया च संतत्या बहुं पुत्रपौत्रादिभिरतिबहुभावमापन्नं कृधि कुरु ॥५०॥

इन्द्रे॒मं प्र॑त॒रां न॑य सजा॒ताना॑मसद्व॒शी ।
समे॑न॒ꣳ वर्च॑सा सृज दे॒वाना॑ं भाग॒दा अ॑सत् ॥२॥

इन्द्र॑ । इ॒मम् । प्र॒त॒रामिति॑ प्र॒ऽत॒राम् । न॒य ।
स॒जा॒ताना॒मिति॑ स॒ऽजा॒ताना॑म् । अ॒स॒त् । व॒शी ।
सम् । ए॒न॒म् । वर्च॑सा । सृ॒ज ।
दे॒वाना॑म् । भा॒ग॒दा इति॑ भा॒ग॒ऽदाः । अ॒स॒त् । ॥ टुं ॥२॥

सा– अथ द्वितीया– ' इन्द्रेमं प्रतरां नय सजातानामसद्वशी । समेनं वर्चसा सृज देवानां भागदा असत् ' इति । हे इन्द्र, परमैश्वर्ययुक्त इमं यजमानं प्रतरां नय अतिशयेन प्रकृष्टमैश्वर्यं प्रापय । तदेव प्रकृष्टत्वं विशदीक्रियते । सजातानां सहोत्पन्नानां ज्ञातीनां वशी असत् नियमनसमर्थो भवेत् । किं च एनं वर्चसा बलेन संसृज । अयं च यजमानः देवानां भागदाः असत् यज्ञेषु भागप्रदो भवतु ॥२॥

आ– ' इन्द्रेमम् ' इति । हे इन्द्र परमैश्वर्ययुक्त, त्वम् इमम् यजमानं प्रतराम् अत्यतिशययुक्तं नय । सजातानां समानजातानां वशी कान्तः ईश्वरो वा असत् भवतु । ' समेनं वर्चसा सृज ' । एनं यजमानं वर्चसा धनेन [सं] सृज संगमय । यद्वा– विद्याप्रयुक्तोत्कर्षो वर्चः । तेन वर्चसा विशिष्टतेजसा संसृज संसर्गं कुरु । देवानां सूर्याग्न्यादीनां प्रतिदिनं विहित [ ] भागदाः असत् भवतु ॥५१॥

---

1. B1 आह्वयते for आहूयते
3. H2–3 इति for अति°
15. B1 om. त्वम्
17. B1 om. संसृज
18. H2–3 कर्मादि° for विद्या°
19. B1 विहिन्नावित भागधाः, H2–3 विहितहाहत भागधाः for विहित [ ] भागदाः

यस्यं कुर्मो गृहे हुविस्तम॑ग्ने वर्धया त्वम् ।
तस्मै देवा अधि ब्रुवन्नयं च ब्रह्मणस्पतिः ॥३॥

यस्यं । कुर्मः । गृहे । हुविः । तम् । अग्ने । वर्धय । त्वम् ।
तस्मैं । देवाः । अधि । ब्रुवन् । अयम् । च । ब्रह्मणः । पतिः ॥ ळ्यू ॥३॥

सा– अथ तृतीया– ' यस्य कुर्मो गृहे हविस्तमग्ने वर्धया त्वम् । तस्मै देवा अधि ब्रुवन्नयं च ब्रह्मणस्पतिः ' इति । वयमृत्विजः [v]यस्य यजमानस्य [v]गृहे [v]हविः [v]कुर्मः, हे [v]अग्ने, [v]त्वं [v]तं यजमानं [v]वर्धय । [v]देवाः [v]तस्मै यजमानार्थम् [v]अधि [v]ब्रुवन् अयं यजमानः सर्वेभ्योऽधिक इति ब्रुवन्तु । [v]अयं [v]च यजमानः [v]ब्रह्मणस्पतिः वैदिककर्मणः पालको भवतु ॥३॥

आ– ' यस्य कुर्मः ' इति । हे श्रीभगवन् [v]अग्ने, [v]यस्य यजमानस्य [v]गृहे ऋत्विजो वयं [v]हविः [v]कुर्मः, अग्न्यादयोऽपि यूयं हविर्भाजो भवथ । अतः तव यजमानं [v]त्वं [v]वर्धय पुत्रपौत्रधनधान्यादिभिर्वर्धमानं कुरु । [v]तस्मै यजमानाय अत्र हविर्भाजः [v]देवाः च [v]अधि [v]ब्रुवन् उपरिभावेन यत् प्रशस्तं योगक्षेमादियुक्तं कल्याणवचनं ब्रुवन्तु । [v]अयं [v]च [v]ब्रह्मणः ब्राह्मणजातेश्च [v]पतिः पालकोऽग्निस्त्वमधि ब्रूहि । यद्वा – अयं यजमानः ब्रह्मणः ब्राह्मणानां प्रजापतिः पालकोऽस्तु । ब्रह्मणो देवस्य पालकोऽस्त्विति वा अधिब्रुवन्तु ॥५२॥

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः ।
स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ॥४॥

उदुं त्वा । ………… ॥ य ॥४॥

सा– कात्यायनः – " उद्यम्यो दु त्वेति " (काश्रौ १८.३.१८) इति । अग्निरुद्यच्छेत् । पाठस्तु– ' उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ' इति । अयं मन्त्रस्त्रयोदशेऽध्याये व्याख्यातः ॥४॥

आ– अग्निमुद्यच्छति– ' उदु त्वा ' इति । द्वितीयदशकस्य तृतीयाध्याये व्याख्याता ॥५३॥

---

5. P1 after तृतीया adds लिङ्गोक्तदेवत्याऽनुष्टुप्; S2 om. तस्मै … देवाः (L 7)
7. S2 भवतु for ब्रुवन्तु
12. H3 om. अयं च … ब्रुवन्तु (L 14)
21. H2–3 °शतकस्य for दशकस्य

अग्निप्रणयनमन्त्राः]

पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः ।
रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषे अधि यज्ञो अस्थात् ॥५॥

पञ्च । दिशः । दैवीः । यज्ञम् । अवन्तु । देवीः ।
अप । अमतिम् । दुर्मतिमिति दुःऽमतिम् । बाधमानाः ।
रायः । पोषे । यज्ञपतिमिति यज्ञऽपतिम् । आभजन्तीरित्याऽभजन्तीः ।
रायः । पोषे । अधि । यज्ञः । अस्थात् ॥ द्रौं ॥५॥

सा– कात्यायन– "चित्यं [प्रति] गच्छन्ति पञ्च दिशः" (काश्रौ १८·३·१८) इति । ऋत्विजः 'पञ्च दिशो दैवीः' इति पञ्च ऋचो जपन्तश्चित्यमग्निं प्रतिगच्छेयुः । तत्र प्रथमा– 'पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः । रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषे अधि यज्ञो अस्थात्' इति । या इमाः प्राच्यादयः पञ्च दिशः, ताः सर्वा इमं यज्ञम् अवन्तु । कीदृश्यो दिशः ? दैवीः इन्द्रयमादीनां देवानां संबन्धिन्यः । देवीः स्वयमपि देवतारूपाः अमतिम् अस्मदीयप्रज्ञाभावं दुर्मतिं दुष्टानां पापविषयां बुद्धिं च अपबाधमानाः विनाशयन्त्यः रायः पोषे धनसमृद्धौ यज्ञपतिं यजमानम् आभजन्तीः प्रापयन्त्यः । किं च– रायः पोषे धनसमृद्धौ यज्ञः अध्यस्थात् अधिकमवतिष्ठतु ॥५॥

आ– यज्ञाङ्गसाधनवादिनीभिः पञ्चभिः ऋग्भिश्चित्यं प्रति गच्छति 'पञ्च दिशः' इति । अत्र द्वे त्रिष्टुभौ । पञ्च दिशः देवानां संबन्धिन्यः दैवीः । अत्र परिणामः । हे देव्यः, यज्ञम् अवन्तु रक्षन्तु । देवीः स्वयं देव्यः देवीशब्दवाच्याः । किं कुर्वाणाः यज्ञमवन्तु ? 'अपामतिं दुर्मतिं [बाधमानाः]' । शास्त्रीय–मतिविरुद्धां मतिम् अमतिं स्वविषये विवक्षित-युक्तिशून्यां मतिं दुर्मतिं च अपबाधमानाः देव्यः यज्ञम् अवन्तु । रायः पोषे धनस्य पुष्टौ विषये यज्ञपतिं यजमानम् आभजन्तीः आभजन्त्यः तद्भागिनं कुर्वन्त्यः यज्ञमवन्त्वित्यनुषङ्गः । किं च रायः पोषे च अधि उपरि यज्ञः अस्थात् तिष्ठतु । दिग्भिरेवैवं यज्ञः स्थापितः ॥५४॥

समिद्धे अग्ना अधि मामहान उक्थपत्र ईड्यो गृभीतः ।
तप्तं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमयजन्त देवाः ॥६॥

---

8. P1 after प्रथमा adds द्वे त्रिष्टुभौ
17. H2-3 B1 देवीः for देव्यः
18. H2-3 om. अप

समिद्ध इति सम्ऽइद्धे । अग्नौ । अधि । मामहानः । ममहान इति ममहानः ।

उक्थपत्र इत्युक्थऽपत्रः । ईड्यः । गृभीतः ।

तप्तम् । घर्मम् । परिगृह्येति परिऽगृह्य । अयजन्त ।

ऊर्जा । यत् । यज्ञम् । अयजन्त । देवाः ॥ त्रैं ॥६॥

सा- अथ द्वितीया – ' समिद्धे अग्ना अधि मामहान उक्थपत्र ईड्यो गृभीतः । तप्तं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमयजन्त देवाः ' इति । समिद्धे सम्यक् प्रज्वलिते अग्नौ प्रणीयमाने सति अधि मामहानः अधिकं पुनः पुनः पूज्यमानः । उक्थपत्रः उक्थानि शस्त्राणि पत्रं वाहनं यस्यासावुक्थपत्रः । ईड्यः स्तुत्यः यज्ञ एव गृभीतः ऋत्विग्यजमानैः परिगृहीतो भवतीति शेषः । यदा देवाः दीव्यन्तो व्यवहरन्त ऋत्विजः उर्जा हविःस्वरूपान्नेन यज्ञम् अयजन्त यजन्ति तदा तप्तं प्रज्वलितं घर्मम् अग्निमेव परिगृह्य यजन्ति ॥६॥

आ– ' समिद्धे अग्नौ ' इति । समिद्धे सम्यग्दीप्ते अग्नौ प्रणीयमाने अधि मामहानः । मह पूजायाम् । " यजमानो वै मामहानः " (शब्रा ९.२.३.९) इति श्रुतेः । अधि उपरिभावेनात्यर्थं पूजकः यः आत्मानं वा कृतकृत्यं मन्यमानोऽग्निमनुगच्छति । यस्य उक्थानि पत्राणि । पतनात् त्रायन्त इति पत्राणि । सोऽग्निः प्रणीयमानः । अग्निष्टोमे उक्थ्यानि भवन्ति । तदङ्गभूतश्चायम् ईड्यः स्तुत्यः याज्ञियः गृभीतः गृहीतः अध्वर्युणा धारितः । यस्य च मामहानस्य तप्तं रुचितं घर्मं रसं परिगृह्य गृहीत्वा आभ्यां पाणिभ्यामृत्विजः अयजन्त । यस्य च ऊर्जा अन्नेन हविर्लक्षणेन तं यज्ञं देवाः ऋत्विजः अयजन्त यजनं कृतवन्तः ॥५५॥

दैव्याय धर्त्रे जोष्ट्रे देवश्रीः श्रीमणाः शतपयाः ।

परिगृह्य देवा यज्ञमायन् देवा देवेभ्यो अध्वर्यन्तो अस्थुः ॥७॥

दैव्याय । धर्त्रे । जोष्ट्रे ।

देवश्रीरिति देवऽश्रीः । श्रीमणाः । श्रीमना इति श्रीऽमनाः । शतपया इति शतऽपयाः ।

परिगृह्येति परिऽगृह्य । देवाः । यज्ञम् । आयन् ।

देवाः । देवेभ्यः । अध्वर्यन्तः । अस्थुः । ध्युं ॥७॥

---

9. S2 om. व्यवहरन्त परिगृह्य [L 10]

14. B1 H2–3 पात्राणि for first पत्राणि

15. B1 om. यस्य च ... अयजन्त [L 52]

अग्निप्रणयनमन्त्राः]

सा- अथ तृतीया- 'दैव्याय धर्त्रे जोष्ट्रे देवश्रीः श्रीमणाः शतपयाः । परिगृह्य देवा यज्ञमायन् देवाः देवेभ्यो अध्वर्यन्तो अस्थुः ' इति । ᵛदैव्याय देवानां हिताय ᵛधर्त्रे यागद्वारा जगतो धारयित्रे ᵛजोष्ट्रे अस्माभिर्दीयमानस्य हविषः सेवित्रे अग्नये । ऋत्विजो यज्ञं यजन्तीति शेषः । तदाऽयमग्निरीदृशो भवति । कीदृश इति तदुच्यते- ᵛदेवश्रीः । देवान् श्रयति हविर्यजनेन दानेन सेवत इति देवश्रीः । श्रयते सेवत इति श्रीर्यजमानस्तस्मिन्ननुग्रहरूपं मनो यस्यासौ ᵛश्रीमणाः । ᵛशतपयाः शतसंख्याकानि पयःप्रभृतीनि हवींषि यस्यासौ शतपयाः । तादृशमग्निं ᵛपरिगृह्य ᵛदेवाः ऋत्विग्यजमानाः ᵛयज्ञम् ᵛआयन् प्राप्नुवन्ति अनुतिष्ठन्तीत्यर्थः । किं च ᵛदेवाः ऋत्विग्यजमानाः ᵛदेवेभ्यः हविःस्वीकर्तृभ्यः ᵛअध्वर्यन्तः यागं कर्तुमिच्छन्तः ᵛअस्थुः तिष्ठन्ति ॥७॥

आ- 'देव्याय धर्त्रे ' इति । बृहती पङ्क्तिर्वा । यस्मै ᵛदैव्याय देवानां संबन्धिने ᵛधर्त्रे धारयित्रे ᵛजोष्ट्रे जोषयितृतमाय अग्नये । हविर्दानार्थं 'नीयत इति वाक्यशेषः । यश्च ᵛदेवश्रीः । देवाः श्रियौ यस्य स देवश्रीः । भक्तेभ्यः श्रियं दातुं मनो यस्य सः ᵛश्रीमणाः । श्रीर्वा यस्य मनसि वसति सः श्रीमणाः । शतानि पयांसि यस्य सः ᵛशतपयाः । य एवंविधस्तं भगवन्तमग्निं ᵛपरिगृह्य गृहीत्वा ᵛदेवाः ऋत्विग्यजमानाः ᵛयज्ञं कर्तुम् ᵛआयन् यज्ञशालामागताः । ते च ᵛअध्वर्यन्तः अध्वरं कर्तुकामाः सन्तः ᵛदेवेभ्यः हविर्भाग्भ्यः अर्थाय ᵛअस्थुः परिवार्य उपविष्टाः स्थिताः ॥५६॥

वीतꣳ हविः शमितꣳ शमिता यजध्यै तुरीयो यज्ञो यत्र हव्यमेति । ततो वाका आशिषो नो जुषन्ताम् ॥८॥

वीतम् । हविः । शमितम् । शमिता । यजध्यै । तुरीयः । यज्ञः । यत्र । हव्यम् । एति । ततः । वाकाः । आशिष इत्याऽशिषः । नः । जुषन्ताम् ॥ खं ॥८॥

सा- अथ चतुर्थी- 'वीतꣳ हविः शमितꣳ शमिता यजध्यै तुरीयो यज्ञो यत्र हव्यमेति । ततो वाका आशिषो नो जुषन्ताम् ' इति । प्रथममध्वर्युणा आश्रावणं, तत आग्नीध्रेण प्रत्याश्रावणम् । ततो यजेत्यध्वर्युसंप्रैषः । ततो होतुर्वषट्कार इति यजनम्, [इति] यज्ञश्चतुर्धा कल्प्यते । तत्र ᵛतुरीयः

1. P1 after तृतीया adds बृहत्याग्नेयी
3. P1 अग्ने for अग्नये, P1 जयन्ति for यजन्ति
10. H3 देवनार्थं दीयते for दानार्थं नीयते
12. B1 om. श्रीर्वा ... स श्रीमणाः ।
14. B1 वीर्यैः; H3 ˚वर्यः for ˚वार्य
20. P1 after चतुर्थी adds बृहत्याग्नेयी
22. S2 om. यजनम्; P1 कल्पते for कल्प्यते

चतुर्थः ^{v}यज्ञः ^{v}यत्र यस्मिन् काले ^{v}हव्यम् ^{v}एति हविः प्राप्नोति तस्मिन् काले ^{v}यजध्यै यागार्थं ^{v}शमिता शमित्रा ^{v}शमितं मन्त्रैः संस्कृतं ^{v}हविः ^{v}वीतं प्रापितम्। ^{v}ततः अनन्तरं ^{v}वाकाः वाक्यानि वचनानि ऋग्यजुःसामलक्षणाः ^{v}आशिषः च अभीष्टस्यार्थस्य आशंसनानि ^{v}नः अस्मान् ^{v}जुषन्ताम्। सेवन्ताम् ॥८॥

आ– ‘ वीतꣳ हविः ’ इति। बृहती। ^{v}वीतं गमितमिष्टमभिप्रेतं ^{v}हविः ^{v}शमितं मन्त्रैः संस्कृतम्। ^{v}शमिता। अत्र व्यत्ययः। शमित्रा। ^{v}यजध्यै। यागाय हविर्वीतमिति संबन्धः। अत्र यज्ञः ^{v}तुरीयः चतुर्थो भवति। ^{v}यत्र ^{v}हव्यम् ^{v}एति हवनार्हं हव्यम् एति आगच्छति। तत्राध्वर्युः पुरस्तात् यजूंषि जपति। होता पश्चादृचोऽन्वाह। ब्रह्मा दक्षिणतः अप्रतिरथं जपति। एष एव तुरीयश्चतुर्थो यज्ञः। ^{v}ततः तस्मात् उत्थिताः ^{v}वाकाः वाक्यानि वचनानि ऋग्यजुःसामलक्षणानि। ^{v}आशिषः च अभीष्टस्यार्थस्याशंसनानि ^{v}नः अस्मान् ^{v}जुषन्तां सेवन्ताम् ॥५७॥

सूर्यरश्मिर्हरिकेशः पुरस्तात् सविता ज्योतिरुदयाꣳ३ अजस्रम्।
तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन् विश्वा भुवनानि गोपाः ॥९॥

सूर्यरश्मिरिति सूर्यऽरश्मिः। हरिकेश इति हरिऽकेशः। पुरस्तात्।
सविता। ज्योतिः। उत्। अयान्। अजस्रम्।
तस्य। पूषा। प्रसव इति प्रऽसवे। याति। विद्वान्। संपश्यन्निति सम्ऽपश्यन्।
विश्वा। भुवनानि। गोपाः॥ ध्वैं ॥९॥

सा– अथ पञ्चमी– ‘ सूर्यरश्मिर्हरिकेशः पुरस्तात् सविता ज्योतिरुदयाꣳ३ अजस्रम्। तस्य पूषा प्रसवे याति विद्वान् संपश्यन् विश्वा भुवनानि गोपाः ’ इति। दारिद्र्यं हरतीति हरि [हिरण्यम्]। हरयो हिरण्यवर्णाः केशस्थानीया ज्वाला यस्यासौ ^{v}हरिकेशः अग्निः। स च ^{v}सूर्यरश्मिः सूर्यसदृशरश्मिः सूर्यरूपश्च भूत्वा ^{v}सविता प्राणिनां तत्तद्व्यापारेषु प्रेरकः ^{v}ज्योतिः मण्डलरूपः सन् ^{v}पुरस्तात् पूर्वस्यां

1. P1 यागाय for यागार्थं
2. P1 after शमिता ins. विभक्तिव्यत्ययः
5. H2-3 om. इष्टमभिप्रेतम्; B1 इष्ट° for इष्टम्
6. B1 शमिता for शमित्रा
7. B1 यत्र for अत्र
9. H2-3 एतत् for एव; B1 after तस्मात् adds ननु
10. H2-3 अस्माकं for अस्मान्
18. P1 after पञ्चमी adds सौरी त्रिष्टुप्

अग्निप्रणयनमन्त्राः]

दिशि अजस्रं प्रतिदिनम् उदयान् उदेति । तस्य अग्नेः प्रसवे प्रेरणे सति पूषा पोषको देवः याति गच्छति । कीदृशः पूषा ? विद्वान् सर्वज्ञाता । गोपाः गवां रक्षकः । किं कुर्वन् ? विश्वा भुवनानि संपश्यन् सर्वान् लोकान् सम्यगवलोकयन् ॥९॥

आ– ‘ सूर्यरश्मिर्हरिकेशः ’ इति । त्रिष्टुप् । “ असौ वा आदित्य एषोऽग्निः ” (शब्रा ९.२.३.१२) इति श्रुतेः । यः सूर्यरश्मिः हरिकेशः हरितवर्णकेशः सः पुरस्तात् सविता सवितृरूपेण ज्योतिः उदयान् उद्गच्छति अजस्रम् अनवच्छिन्नमनुपक्षीणम् । तस्य अग्नेः प्रसवे आज्ञायां विद्वान् स्वाधिकारं विद्वान् जानानः पूषा याति । यद्वा– अत्र परिणामः । “ पशवो वै पूषा ” (शब्रा ९.२.३.१२) इति श्रुतिलक्षणया वाचाऽग्निर्याति प्रणीयमानः विद्वान् । विश्वा विश्वानि भुवनानि भूतजातानि संपश्यन् अव्यवधानेन पश्यन् गोपाः समस्तस्य जगतो गोपयिता ॥५८॥

विमान एष दिवो मध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षम् ।
स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥१०॥

विमान इति विऽमानः । एषः । दिवः । मध्ये । आस्ते । आपप्रिवानित्याऽपप्रिऽवान् ।
रोदसी इति रोदसी । अन्तरिक्षम् ।
सः । विश्वाचीः । अभि । चष्टे । घृताचीः । अन्तरा ।
पूर्वम् । अपरम् । च । केतुम् ॥ ढ्रों ॥१०॥

सा– कात्यायनः – “ पृश्न्यश्मानमुपदधाति विमान इति ” (काश्रौ १८.३.१९) इति । द्वाभ्यामृग्भ्यां श्वेतपाषाणमुपदध्यात् । तत्र प्रथमा– ‘ विमान एष दिवो मध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षम् । स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ’ इति । एषः अश्मा विमानः विविधं जगन्निर्मिममाणः सन् दिवः मध्ये आस्ते । आग्नीध्रस्थानीयस्याकाशस्य मध्ये तिष्ठति । कीदृशोऽश्मा ? रोदसी द्यावापृथिव्यौ अन्तरिक्षं च आपप्रिवान् सर्वतः पूरितवान् । यद्यप्ययमश्मा न किंचिज्जगन्निर्मिमीते नापि लोकत्रयमापूर्य तिष्ठति, तथापि परमेश्वरगुणैरस्य स्तूयमानत्वान्न कोऽपि विरोधः । सः तथा स्तूयमानोऽश्मा विश्वाचीः व्यापिनीः दिशः अभि चष्टे सर्वतः प्रकाशयति । तथा घृताचीः घृतप्राप्तिहेतुभूता धेनूश्चाभिचष्टे । तथा अन्तरा ब्रह्माण्डस्य मध्ये पूर्वम् अपरं च केतुम् उदयास्तमयाभ्यां पूर्वापरदिशोश्चिह्नभूतं सूर्यमभिचष्टे ॥१०॥

7. B1 H2–3 पश्यन् for विद्वान्
18. P1 after प्रथमा adds त्रिष्टुप् सौरी
19. P1 before एषः° ins. आदित्यरूपेणाश्मस्तुतिः
22. P1 निर्मिमाति for निर्मिमीते; S2 लोकं न यज्ञम् for लोकत्रयम्
24. P1 om. घृताचीः

आ– आग्नीध्रेऽश्मानपृश्निमुपदधाति । ' विमानः ' इति, ' उक्षा समुद्रः ' इति च द्वे आदित्यदेवते त्रिष्टुभौ । यः एषः आदित्यः विमानः भूतग्रामस्य निर्माता दिवः द्युलोकस्य मध्ये आस्ते । कथंभूत इति – ' आपप्रिवान् रोदसी अन्तरिक्षम् ' । रोदसी अन्तरिक्षं द्यावापृथिव्यौ अन्तरिक्षं लोकं च । प्रा पूरणे । आपप्रिवान् स्वकीयेन प्रकाशेन आपूरयन् । सः विश्वाचीः, विश्वानि हवींषि अञ्चितान्यासु वेदिष्विति ताः विश्वाच्यः वेदयः, ताश्च घृताचीः यज्ञकर्तॄननुगृह्णन् स्रुचः अभिचष्टे इत्यर्थः । ' अन्तरा पूर्वमपरं च केतुम् ' । अन्तरा अन्तरेण पूर्वम् इमं लोकम् अपरं च अमुं लोकम् । अन्तरा उभयोर्मध्ये च यं कंचित् केतुं चिह्नम् । एवं लोकद्वयमध्यवर्ती भगवानादित्यः सर्वमभिचष्टे पश्यति ॥५९॥

उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ॥११॥

उक्षा । समुद्रः । अरुणः । सुपर्ण इति सुऽपर्णः । पूर्वस्य । योनिम् । पितुः । आ । विवेश ।
मध्ये । दिवः । निहित इति निऽहितः । पृश्निः । अश्मा ।
वि । चक्रमे । रजसः । पाति । अन्तौ ॥ ज्ञौं ॥११॥

सा– अथ द्वितीया– ' उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश । मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ' इति । अयम् अश्मा उक्षा सेक्ता यागद्वारेण फलाभिवर्षक इत्यर्थः । समुद्रः बहुफलप्रदत्वात् समुद्रसदृशः । अरुणः पूर्वमन्त्रे सर्वप्रकाशकत्वेनो-पचरित्वात् सूर्यसदृश इत्यर्थः । सुपर्णः स्वर्गं प्रत्युद्गमनहेतुत्वात् पक्षिसदृशः । तथाविधोऽश्मा पितुः कर्मपालकस्य पूर्वस्य पूर्वदिग्वर्तिन आहवनीयस्य योनिं कारणभूतमाग्नीध्रम् आविवेश प्रविष्टवान् । "यदाहवनीय उद्वपेत् आग्नीध्रादुद्धरेत् " (तैब्रा १.४.७.२) इत्याहवनीययोनित्वमाग्नीध्रस्य अन्यत्राम्नातम् । अयं पृश्निः श्वेतवर्णः अश्मा दिवः मध्ये आग्नीध्रस्थानीयस्याकाशस्य मध्ये निहितः स्थापितः सन् रजसः जगतः अन्तौ उत्पत्तिप्रलयरूपकोटिद्वयं पाति परमेश्वररूपेण पालयति ॥११॥

आ– ' उक्षा समुद्रः ' इति । उदयकाले उक्षा सेचकः आदित्यः समुद्रः समुन्दनो भवति । एतस्मादादित्यात् सर्वे देवाः समुद्रवन्तीत्यादित्यः समुद्रः । अस्मिन् काले अवश्यायाः

5. H2–3 om. वेदयः
7. H2–3 om. अपरं च अमुं लोकम् H2–3 अयं किञ्चित् for यं कंचित्
8. H3 अपि for अभि°
21. P1 affer °रूपेण adds सूर्यरूपेण
23. B1 om. °वन्तीत्यादित्यः ... अरुण इति (P 545 L 1)

अग्निप्रणयनमन्त्राः]

अतितरां पतन्ति तदभिप्राय एषः । ' अरुणः ' इति । आदित्यस्य पिता । वर्णतो निर्देशः । [V]सुपर्णः सु शोभनं पर्णं पतनं यस्य स पूर्वस्य द्युलोकस्य । [V]पितुः पितृभूतस्य द्युलोकस्य योनिं स्थानम् । ततो ह्यादित्यो जायमान इव दृश्यत इति द्युलोक आदित्यस्य पिता । असावेष आदित्यः पितुर्योनिमावेशस्थानमाविशति उदितमात्रः । यश्च [V]मध्ये [V]दिवः द्युलोकस्य मध्ये निहितः अवस्थितः । [V]पृश्निः समस्तरश्मिसंकुलः । [V]अश्मा अश्मवत् स्वाधिकारे अचलः । " असौ वा आदित्योऽश्मा पृश्निः " (शब्रा ९.२.३.१४) इति श्रुतेः । आदित्यः [V]विचक्रमे पादविक्षेपं करोति गच्छति । ' रजसस्पात्यन्तौ । एकवचनमविवक्षितम् । [V]रजसः रजसाम् एषां लोकानाम् [V]अन्तौ । व्यत्ययः । अन्तान् [V]पाति लोकानामन्तपर्यन्तं तमो निवर्तयन् पदार्थांश्च प्रकाशयन् पाति रक्षति विचक्रमाण एषः । " लोकानामन्तान् पाति " इति श्रुतेः ॥६०॥

इन्द्र॑ṃ॒ विश्वा॑ अवीवृधन्त्समु॒द्रव्य॑चसं॒ गिरः॑ ।
र॒थीत॑मꣳ र॒थीना॒ꣳ वाजा॑ना॒ꣳ सत्प॑तिं॒ पति॑म् ॥१२॥

इ॒न्द्रं॑ विश्वाः॑ । .... ॥ ठ् ॥१२॥

सा– " एनमतिक्रामन्तीन्द्रं विश्वा इति " (काश्रौ १८.३.२१) इति । ' इन्द्रं विश्वाः ' इत्यादिभिश्चतसृभिर्ऋग्भिरेनमश्मानमतिक्रमणं कृत्वा गच्छेयुः । तत्र प्रथमा– ' इन्द्रं विश्वा अवीवृधन्त्स-मुद्रव्यचसं गिरः । रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ' इति । अयं त्रयोदशेऽध्याये व्याख्यातः ॥१२॥

आ– ' **इन्द्रं विश्वा अवीवृधन्** ' **इ**ति । द्वितीयदशकस्य तृतीयाध्याये व्याख्यातो मन्त्रः ॥६१॥

**दे॒व॒हूर्य॒ज्ञ आ च॑ वक्षत् सु॒म्न॒हूर्य॒ज्ञ आ च॑ वक्षत् ।
यक्ष॑द॒ग्निर्दे॒वो दे॒वाꣳ२ आ च॑ वक्षत् ॥१३॥**

दे॒व॒हूरिति॑ दे॒व॒ऽहूः । य॒ज्ञः । आ । च॒ । व॒क्ष॒त् ।
सु॒म्न॒हूरिति॑ सु॒म्न॒ऽहूः । य॒ज्ञः । आ । च॒ । व॒क्ष॒त् ।
यक्ष॑त् । अ॒ग्निः । दे॒वः । दे॒वान् । आ । च॒ । व॒क्ष॒त् ॥ त्र्यै ॥१३॥

---

1. H2–3 वर्ण्यते for वर्णतो; H2–3 om. निर्देशः ... ततो (L 3)

सा– अथ द्वितीया–[1] ' देवहूर्यज्ञ आ च वक्षत् सुम्नहूर्यज्ञ आ च वक्षत् । यक्षदग्निर्देवो देवाꣳ आ च वक्षत् ' इति । देवानाह्वयतीति vदेवहूः vयज्ञः vआ vच vवक्षत् । सुम्नस्य प्रजापशुरूपस्य सुखस्य आह्वाता vयज्ञः vच vआवक्षत । देवानाह्वयन् vअग्निः vदेवः देवनादिगुणयुक्तः vदेवान् vयक्षत् यजतु । vआ vच vवक्षत् आवहतु च ॥१३॥

आ– ' देवहूर्यज्ञः ' इति । यज्ञदेवत्याऽनुष्टुप् । देवानाह्वयतीति vदेवहूः । vयज्ञः vदेवान् vआ vच vवक्षत् । vआवक्षत् आ वहतु यजतु च । चकारः समुच्चयार्थीयः । vसुम्नहूः । सुम्नम् इति सुखनाम । सुम्नमाह्वयतीति सुम्नहूः । vयज्ञः देवान् आह्वयतु यजतु च । vयक्षत् अग्निर्देवो vदेवान् vआ vच vवक्षत् । vअग्निः vदेवः देवनादिगुणयुक्तः vदेवान् vयक्षत् यजतु । vआ vच vवक्षत् आ वहतु ॥६२॥

वाजस्य मा प्रसव उद्ग्राभेणोदग्रभीत् ।
अधा सपत्नानिन्द्रो मे निग्राभेणाधराꣳ अकः ॥१४॥

वाजस्य । मा । प्रसव इति प्रऽसवः । उद्ग्राभेणेत्युत्ऽग्राभेण । उत् । अग्रभीत् ।
अध । सपत्नानिति सऽपत्नान् । इन्द्रः । मे ।
निग्राभेणेति निऽग्राभेण । अधरान् । अकरित्यकः ॥ ब्ली ॥१४॥

सा– अथ तृतीया– ' वाजस्य मा प्रसव उद्ग्राभेणोदग्रभीत् । अधा सपत्नानिन्द्रो मे निग्राभेणाधराꣳ अकः ' इति । vवाजस्य अन्नस्य vप्रसवः प्रसूतिरुत्पत्तिरभ्यनुज्ञा वा । vउद्ग्राभेण उद्ग्रहणसामर्थ्येन vमा मां यजमानम् vउदग्रभीत् उत्कर्षं प्रापितवान् । vअध अपि च vइन्द्रः परमैश्वर्ययुक्तः अग्निः vनिग्राभेण निग्रहसामर्थ्येन vसपत्नान् मदीयान् वैरिणः vअधरान् vअकः निगृहीतान् करोतु ॥१४॥

आ– ' वाजस्य मा ' इति इन्द्रदेवत्याऽनुष्टुप् । vवाजस्य अन्नस्य vप्रसवः प्रसूतिः उत्पत्तिः । अभ्यनुज्ञा वा । vउद्ग्राभेण उद्ग्रहणेन । ऊर्ध्वं विगृह्य दीयत इति उद्ग्रहणं दानम् । दानेनेत्यर्थः । vमा माम् vइन्द्रः vउदग्रभीत् उद्गृह्णीयात् यजमानं मामुद्धरतु । vअध अथ समनन्तरमेव vमे मम vसपत्नान् शत्रून् vनिग्राभेण नीचैर्ग्रहणेन नीचभावेन ग्रस्तान् कृत्वा vअधरान् अधोगमनान् हे इन्द्र, vअकः अकरोत्, कृतवानसि ॥६३॥

---

1. P1 after द्वितीया adds यज्ञदेवत्यानुष्टुप्
9. B1 om. आ वहतु
23. P1 संपन्नान् for सपत्नान्

उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।
अधा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ॥१५॥५॥

उद्ग्राभमित्युत्ऽग्राभम् । च । निग्राभमिति निऽग्राभम् । च ।
ब्रह्म । देवाः । अवीवृधन् ।
अध । सपत्नानिति सऽपत्नान् । इन्द्राग्नी इतीन्द्राग्नी । मे ।
विषूचीनान् । वि । अस्यताम् ॥ त्कुं ॥१५॥५॥

सा– अथ चतुर्थी– ' उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् । अधा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ' इति । देवाः सर्वे ब्रह्म त्रयीलक्षणं यज्ञविषयम् अवीवृधन् वर्धयन्तु । उद्ग्राभम् अस्मदीयमुत्कर्षं निग्राभं वैरिणां निकर्षं च अवीवृधन् वर्धितवन्तः । अध अनन्तरम् इन्द्राग्नी विषूचीनान् सर्वतः पलायमानान् मे सपत्नान् मदीयान् वैरिणः व्यस्यतां विनश्येताम् ॥१५॥

[इत्यष्टादशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

आ– ' उद्ग्राभं च ' इति । इन्द्राग्नीदेवत्याऽनुष्टुप् । उद्ग्राभं च अस्मद्विषयम् । निग्राभं च अस्मत्सपत्नविषयम् । ब्रह्म च त्रयीलक्षणम् यज्ञविषयं च देवाः अवीवृधन् वर्धयन्ताम् । अध अनन्तरं मे मम सपत्नान् इमे इन्द्राग्नी विषूचीनान् विष्वगञ्चनान् नानाविधगतीन् कृत्वा व्यस्यतां विक्षिपताम् अपुनरागमनाय ॥६४॥

[इत्यष्टादशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

[अथ षष्ठोऽनुवाकः ।]

क्रमध्वमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः ।
दिवस्पृष्ठꣳ स्वर्गत्वा मिश्रा देवेभिराध्वम् ॥१॥

क्रमध्वम् । अग्निना । नाकम् । उख्यम् । हस्तेषु । बिभ्रतः ।
दिवः । पृष्ठम् । स्वः । गत्वा । मिश्राः । देवेभिः । आध्वम् ॥ ळीं ॥१॥

7. P1 after चतुर्थी adds इन्द्राग्नीदेवत्याऽनुष्टुप्
13. B1 यज्ञे for यज्ञ°
15. B1 °गतिमानः, H2–3 गतिमयः for °गतीन्

सा– पञ्चमेऽनुवाके अग्निप्रणयनमुक्तम् । अथ षष्ठे अग्निस्थापनमुच्यते ॥

कात्यायनः – " क्रमध्वमग्निनेति चित्यमारोहन्ति " (काश्रौ १८·४·१) इति । 'क्रमध्वमग्निना' इत्यादिभिः पञ्चभिर्ऋग्भिश्चित्याग्नेरारोहणं कुर्युः । तत्र प्रथमा– 'क्रमध्वमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः । दिवस्पृष्ठꣳ स्वर्गत्वा मिश्रा देवेभिराध्वम्' इति । हे ऋत्विग्यजमानाः, vनाकं स्वर्गसाधनम् vउख्यम् उखायां पूर्वसंपादितमग्निं vहस्तेषु vबिभ्रतः धारयन्तस्तेन vअग्निना सह vक्रमध्वं चितेरुपरि पादान् विक्षिपत । ततः vदिवः पृष्ठम् आकाशस्योपरिभागे वर्तमानं vस्वः स्वर्गलोकं गत्वा प्राप्य vदेवेभिः vमिश्राः देवैरेकीभूताः सन्तः vआध्वम् उपविशतम् ॥१॥

आ– पञ्चभिश्चित्यमारोहति । 'क्रमध्वम्' इति । पञ्चाग्नेय्यः । आद्याऽनुष्टुप् । ततस्त्रिष्टुप् । ततः पिपीलिकामध्या बृहती । ततोऽनुष्टुप् । अन्त्या त्रिष्टुप् । vअग्निना चित्येन लोककालाग्न्यादिवपुषा vनाकं दिवं vक्रमध्वम् । कथंभूताः यूयं क्रमध्वमिति– 'उख्यं हस्तेषु बिभ्रतः' । उखायां भृतमग्निम् vउख्यं vहस्तेषु धारयमाणाः । ततः vदिवः vपृष्ठम् आरुह्य vस्वः स्वर्गं लोकं vगत्वा vमिश्राः vदेवेभिः देवैः सहभावं गताः मिश्राः समानलोकस्थानायुषः सन्तः vआध्वम् । आसश्छान्दसः सकारलोपः । स्वयं देवा सन्तः सहासनं कुरुध्वम् ॥६५॥

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरोअग्निर्भवेह ।
विश्वा आशा दीद्यानो वि भाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥२॥

प्राचीम् । अनु । प्रदिशमिति प्रऽदिशम् । प्र । इहि । विद्वान् ।
अग्नेः । अग्ने । पुरोअग्निरिति पुरःऽअग्निः । भव । इह ।
विश्वाः । आशाः । दीद्यानः । वि । भाहि ।
ऊर्जम् । नः । धेहि । द्विपद इति द्विऽपदे । चतुष्पदे । चतुःपद इति चतुःऽपदे ॥ ङयाः ॥२॥

सा– अथ द्वितीया– 'प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरोअग्निर्भवेह । विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे' इति । हे vअग्ने, इदानीमानीत हे वह्ने, vप्राचीं vप्रदिशं

---

3. P1 after प्रथमा adds पञ्चाग्नेय्यः । आद्यानुष्टुप्, ततस्त्रिष्टुप् । मध्या बृहती । चतुर्थ्यनुष्टुप् । अन्त्या त्रिष्टुप् । प्रजापतिः ऋषिः ।
10. H2–3 trans. लोककालाग्न्यादिवपुषा नाकं दिवं क्रमध्वम् after ततः (L 11), H1 पुष्प° for उख्य°
11. B1 उषायां for उखायां
12. B1 महतस्ते for सहभाव°
21. P1 after द्वितीया adds त्रिष्टुबाग्नेयी

प्रागाख्यां प्रकृष्टां दिशं विद्वान् त्वम् अनु प्रेहि अनुक्रमेण प्रकर्षो यथा भवति तथा गच्छ। गत्वा च अग्नेः इष्टकानिष्पादितस्य चितिरूपस्य वह्नेः इह अस्मिन् कर्मणि पुरोअग्निः भव पूर्वभागवर्ती वह्निर्भव। यद्वा– पुरोगन्ता मुख्यो वह्निर्भवेत्यर्थः। विश्वाः आशाः सर्वा अपि दिशः दीद्यानः प्रभासयन् वि भाहि। त्वमपि विशेषेण प्रकाशस्व। ततः नः अस्मदीयाय द्विपदे चतुष्पदे ऊर्जम् अन्नं धेहि संपादय ॥२॥

आ– 'प्राचीमनु' इति। त्रिष्टुबाग्नेयी। हे श्रीभगवन् अग्ने, प्राचीं दिशम् अनु प्रेहि प्रगच्छ। विद्वान् स्वाधिकारं जानन् अग्नेः इष्टकास्थलरूपस्याग्नेः उख्यारूपः प्रणीयमानः पुरोअग्निः इह यज्ञे पुरोगामी अग्निः भव। ततः विश्वाः आशाः सर्वा दिशः दीद्यानः देदीपयमानः विभाहि विविधं दीप्यस्व। 'ऊर्जं नो धेहि द्विपदे चतुष्पदे'। नः अस्मभ्यम् ऊर्जम् अन्नं धेहि देहि। द्विपदे द्विपद्भ्यां चतुष्पदे चतुष्पाद्भ्यश्च ऊर्जं देहि ॥६६॥

पृ॒थि॒व्या अ॒हमुद॒न्तरि॑क्ष॒मा॑ऽरुहम॒न्तरि॑क्षा॒द्दिव॒मा॑ऽरुहम्।
दि॒वो नाक॑स्य पृ॒ष्ठात् स्व॒र्ज्योति॑रगाम॒हम् ॥३॥

पृ॒थि॒व्याः। अ॒हम्। उत्। अ॒न्तरि॑क्षम्। आ। अ॒रु॒ह॒म्।
अ॒न्तरि॑क्षात्। दिव॑म्। आ। अ॒रु॒ह॒म्।
दि॒वः। नाक॑स्य। पृ॒ष्ठात्। स्वः॑। ज्योतिः॑। अ॒गा॒म्। अ॒हम्। हैं ॥३॥

सा– अथ तृतीया– 'पृथिव्या अहमुदन्तरिक्षमाऽरुहमन्तरिक्षाद्दिवमाऽरुहम्। दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम्' इति। अहं यजमानः पृथिव्याः उद्गत एतद् अन्तरिक्षम् आऽरुहम् आरूढोऽस्मि। तस्मादपि अन्तरिक्षाद् उद्गतः दिवम् आऽरुहम् द्युलोकमारूढोऽस्मि। दिवः द्युलोकसंबन्धी नाकः दुःखरहितो यः प्रदेशस्तस्य पृष्ठात् उपरिष्टात् स्वः ज्योतिः स्वर्गलोकवासि ज्योतिर्मण्डलमादित्यरूपम् अहम् अगां प्राप्तोऽस्मि, यद्वा– प्राप्स्यामि ॥३॥

आ– 'पृथिव्या अहम्' इति। अग्निदेवत्या पिपीलिकामध्या बृहती। यजमान आह– पृथिव्याः सकाशात् ऊर्ध्वम् अन्तरिक्षम् आ अहम अरुहम् आरूढोऽस्मि। ततः अन्तरिक्षात् स्थानात् दिवं द्युलोकम् आऽरुहम् आरूढोऽस्मि। ततः दिवः द्युलोकात् नाकस्य पृष्ठात् च स्वः ज्योतिः आदित्याख्यं ज्योतिः अगाम् अहम् अहमगाम् आदित्यज्योतिःस्वरूपं प्राप्तोऽस्मि। "गार्हपत्यादाग्नीध्रीयादाहवनीयम्" (शब्रा ९.२.३.२६) इति श्रुतिरग्नीनां लोकसंस्तवं दर्शयति ॥६७॥

8. H2–3 om. अग्निः भव

स्वर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति रोदसी ।
यज्ञꣳ ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरे ॥४॥

स्वः । यन्तः । न । अप । ईक्षन्ते । आ । द्याम् । रोहन्ति । रोदसी इति रोदसी ।
यज्ञम् । ये । विश्वतोधारमिति विश्वतःऽधारम् ।
सुविद्वाꣳस इति सुऽविद्वाꣳसः । वितेनिर इति विऽतेनिरे ॥ घु ॥४॥

सा– अथ चतुर्थी– 'स्वर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति रोदसी । यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरे' इति । ᵛये यजमानाः ᵛसुविद्वांसः सुष्ठु कर्मानुष्ठानप्रकारं जानन्तः ᵛविश्वतोधारं सर्वस्य जगतो धारणहेतुं ᵛयज्ञं ᵛवितेनिरे विस्तारेणानुतिष्ठन्ति ते यजमानाः ᵛद्याम् अन्तरिक्षम् ᵛआरोहन्ति । तथा ᵛरोदसी द्यावापृथिव्यावारोहन्ति । ततः स्वर्गनिवासमादित्यमण्डलं प्राप्नुवन्तोऽन्यत् किमपि स्थानं ᵛन ᵛअपेक्षन्ते ॥४॥

आ– 'स्वर्यन्तः' इति अनुष्टुबाग्नेयी। ᵛये ᵛसुविद्वाꣳसः अधिकारहेतुसंपन्नाः ये यजमानाः ᵛविश्वतोधारम् । आहुतिलक्षणान्नादयो हि यज्ञस्य धाराः । विश्वतः सर्वतः ताभिर्यज्ञो धार्यते वर्धत इति विश्वतोधारो यज्ञः। तं विश्वतोधारं ᵛयज्ञं ᵛवितेनिरे विस्तारयन्ति । ते ᵛस्वः ᵛयन्तः स्वर्गलोकं गच्छन्तः ᵛन ᵛअपेक्षन्ते पुत्रपश्वादिफलं नापेक्षन्ते । ये ते ᵛआ ᵛद्यां [ᵛरोहन्ति] । द्यां द्युलोकस्थानम् आरोहन्ति । ᵛरोदसी च । रोदसीशब्देनात्र पृथिव्यन्तरिक्षे उच्येते । दिवोऽभिहितत्वात् विशिष्टरूपां पृथिवीम् आरोहन्ति । अन्तरिक्षं चारोहन्ति । यद्वा– ये विश्वतोधारम् ईश्वराराधनार्थं क्रियमाणो विश्वतः सर्वप्रकारेण जगद्धारयति पोषयतीति विश्वतोधारो यज्ञः । तं विश्वतोधारं यज्ञं ये सुविद्वांसः सुष्ठुतरं सम्यगवगतात्मतत्त्वाः यज्ञाधिपतिमात्मत्वेनानुभवन्तः ये विश्वतोधारं यज्ञं वितेनिरे । तत्फलं नापेक्षन्ते । ते च द्यां नारोहन्ति रोदसी च नारोहन्ति । किं च स्वर्यन्तः स्वस्वरूपं शोधि(!)तत्त्वं पदार्थलक्षणं सच्चिदानन्दाद्वयपरमात्मलक्षणं स्वरूपं गच्छन्तः । उपाधिनिवृत्त्या उपचारतो गच्छन्त इत्युच्यन्ते स्वस्वरूपत्वादिति ॥६८॥

अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ॥५॥

6. P1 after चतुर्थी adds अनुष्टुबाग्नेयी
14. H3 om. न अपेक्षन्ते; H3 तत्फलं for पुत्रपश्वादिफल°
15. B1 om. रोदसी च ... पृथिवीमारोहन्ति (L 16)
17. H2-3 विश्वधर° for ईश्वर°
20. B1 किं तु for किं च; B1 before किं च adds रोदसी; B1 सोधि° for शोधि°

अग्निस्थापनमन्त्राः]

अग्ने॑ । प्र । इ॒हि॒ । प्र॒थ॒मः । दे॒व॒य॒तामिति॑ दे॒व॒ऽय॒ताम् ।
चक्षुः॑ । दे॒वाना॑म् । उ॒त । मर्त्या॑नाम् ।
इय॑क्षमाणाः । भृगु॑भि॒रिति॒ भृगु॑ऽभिः । स॒जोषा॒ इति॑ स॒ऽजोषाः॑ ।
स्वः॑ । य॒न्तु॒ । यज॑मानाः । स्व॒स्ति ॥ ठ्ठूँ ॥५॥

सा- अथ पञ्चमी–' अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् । इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ' इति । देवानात्मन इच्छन्तीति देवयन्तो यजमानास्तेषामुपकाराय हे [v]अग्ने, त्वं [v]प्रथमः [v]प्रेहि पुरतो गच्छ । यतस्त्वं [v]देवानां मनुष्याणां च चक्षुःस्थानीयः । लोकेऽपि हि गच्छतः पुरुषस्य दृष्टिः पुरतो याति । [v]इयक्षमाणाः यष्टुमिच्छन्तो यजमानाः । [v]भृगुभिः [v]सजोषाः अनुष्ठानपरैर्भृगुनामकैर्मुनिभिः समानप्रियाः सन्तः [v]स्वस्ति क्षेमो यथा भवति तथा [v]स्वः [v]यन्तु स्वर्गं प्राप्नुवन्तु ॥५॥

आ– ' अग्ने प्रेहि ' इति । आग्नेयी त्रिष्टुप् । हे श्रीभगवन् [v]अग्ने [v]देवयतां देवान् यष्टुमिच्छतां त्वं [v]प्रथमः । [v]देवानां [v]चक्षुः दृष्टिः । [v]उत [v]मर्त्यानाम् अपि त्वं चक्षुः । [v]इयक्षमाणाः [v]भृगुभिः अतिशयेन यागं कुर्वाणाः । भृगुग्रहणमेषामनूचानब्राह्मणत्वोपलक्षणार्थम् । [v]सजोषाः सजोषा इति व्यत्ययः । समानजोषणाश्च देवैः सन्तः [v]यजमानाः [v]स्वः स्वर्गं [v]यन्तु [v]स्वस्ति अविनाशेन गच्छन्तु ॥६९॥

न॒क्तो॒षासा॒ सम॑नसा॒ विरू॑पे धा॒पये॑ते॒ शिशु॒मेकं॑ स॒मी॒ची ।
द्यावा॒क्षामा॑ रु॒क्मो अ॒न्तर्विभा॑ति दे॒वा अ॒ग्निं धा॑रयन् द्रविणो॒दाः ॥६॥

न॒क्तो॒षासा॒ . . . . . . ॥ आ ॥६॥

सा- कात्यायनः- " शुक्लवत्सा पयसाऽभिजुहोति कृष्णाया दोहनेन स्वयमातृण्णामवसिञ्चन्नक्तोषासा " इति (कात्रौ १८·४·२) इति । शुक्लवत्सायाः कृष्णवर्णायाः गोः क्षीरेण स्वयमातृण्णेष्टकां क्लेदयन् ' नक्तोषासा ' इति द्वाभ्यां मन्त्राभ्यां जुहुयात् । तत्र प्रथममन्त्रपाठस्तु– ' नक्तोषासा समनसा विरूपे धापयेते शिशुमेकं समीची । द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन् द्रविणोदाः ' इति । नक्तं च उषा च [v]नक्तोषासा । रात्रिदिवसावित्यर्थः । समनसा परस्पर-

8. P1 after यजमानाः ins. इयक्षमाणाः यागं कुर्वाणा इति भाष्यान्तरम्
12. B1 after उत adds अपि
13. B1 इयक्ष्य° for इयक्ष°
14. H2–3 °जोषाणा°, B1 °जोषा° for (°जोषणाः)
21. P1 क्लेदयेत् for क्लेदयन्

मैकमत्ययुक्ते vविरूपे रात्रिः कृष्णा दिवसः शुक्लः इत्येवं विलक्षणरूपे vसमीची समीच्यावनुकूले सत्यौ vएकं vशिशुम् अग्निरूपं vधापयेते यजमानकर्तृकमग्निधारणं संपादयतः । द्यावा द्युलोको क्षामा क्षितौ vअन्तः तदुभयमध्यवर्तिन्यन्तरिक्षे vविभाति । vरुक्मः रोचमानोऽयमग्निर्विभाति विशेषेण प्रकाशते । दीव्यन्ति व्यवहरन्तीति vदेवाः प्राणाः । ते च vद्रविणोदाः यागद्वारेण धनरूपं फलं प्रयच्छन्ति । तादृशा यजमानस्य प्राणाः vअग्निम् एतं vधारयन् धृतवन्तः ॥६॥

आ-- ' नक्तोषासा समनसा ' इति । व्याख्यातोऽयं मन्त्रः ॥६०॥

अग्ने सहस्राक्ष शतमूर्धञ्छतं ते प्राणाः सहस्रं व्यानाः ।
त्वꣳ साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा ॥७॥

अग्ने । सहस्राक्षेति सहस्रऽअक्ष । शतमूर्धन्निति शतऽमूर्धन् ।
शतम् । ते । प्राणाः । सहस्रम् । व्याना इति विऽआनाः ।
त्वम् । साहस्रस्य । रायः । ईशिषे । तस्मै । ते । विधेम । वाजाय । स्वाहा ॥ ङचौं ॥७॥

सा- अथ द्वितीया- ' अग्ने सहस्राक्ष शतमूर्धञ्छतं ते प्राणाः सहस्रं व्यानाः । त्वꣳ साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा ' इति । शतसहस्रशब्दावपरिमिता[र्था]भिप्रायौ । ' विश्वतश्चक्षुः ' इत्यादिमन्त्रोक्तमूर्तिरूपत्वेन अयमग्निः स्तूयते । तस्मादक्षिमूर्धप्राणव्याना हे vअग्ने, vते तव बहवः । तथा त्वं vसाहस्रस्य बहुसहस्रसमूहपरिमितस्य vरायः धनस्य ईशिषे प्रभुरसि । तस्मै vते तादृशाय तुभ्यं vवाजाय अन्नसिद्ध्यर्थं vविधेम हविषा परिचरेम । इदं हविः vस्वाहा सुहुतमस्तु ॥७॥

आ- " हिरण्यशकलैर्वा एषोऽग्निः सहस्राक्षः " (शब्रा ९·२·३·३२) इत्याह । ' अग्ने सहस्राक्ष ' इति । आग्नेयी विराट् । हे श्रीभगवन् vअग्ने vसहस्राक्ष, हिरण्यशकलैर्वा एषोऽग्निः सहस्राक्षः । सहस्राणि अक्षीणि अक्षवत् कल्पितानि यस्य सः । तत्संबोधनात् ' अग्ने सहस्राक्ष शतमूर्धन् '। " यददः शतशीर्षः रुद्रोऽसृज्यत " (शब्रा ९·२·३·३२) इति श्रुतेः । श्रीरुद्रात्मक अग्ने, यस्य vते तव । vशतम् इत्यपरिमितनाम । अपरिमिताः vप्राणाः । vसहस्रं vव्यानाः । अपरिमिता व्यानाः । vसाहस्रस्य सहस्रस्यापरिमितस्य vरायः धनस्य हविर्लक्षणस्य vत्वम् vईशिषे ईश्वरोऽसि । vतस्मै vते तुभ्यं vवाजाय इत्यत्र व्यत्ययः । वाजमित्यन्नलक्षणं हविः vविधेम कुर्मः vस्वाहा । सुहुतमस्तु ॥७॥

---

3. P1 after विभाति ins. द्यावाक्षामा द्युलोकभूलोकयोरन्तरिति भाष्यान्तरम्

12. P1 after द्वितीया adds आग्नेयो विराट्

22. H3 om. रायः धनस्य

अग्निस्थापनमन्त्राः]

सुपर्णोऽसि गुरुत्मान् पृष्ठे पृथिव्याः सीद ।
भासाऽन्तरिक्षमा पृण ज्योतिषा दिवमुत्तभान् * तेजसा दिश उद्दृꣳह ।।८।।

सुपर्ण इति सुऽपर्णः । असि । गुरुत्मान् । पृष्ठे । पृथिव्याः । सीद ।
भासा । अन्तरिक्षम् । आ । पृण । ज्योतिषा । दिवम् । उत् । स्तभान * ।
तेजसा । दिशः । उत् । दृꣳह ॥ ग्यो ॥८॥

सा– कात्यायन– " अग्निं निदधाति सुपर्णोऽसि " (काश्रौ १८.४.४) इति । ' सुपर्णोऽसि ', ' आजुह्वानः सुप्रतीकः ' इति द्वाभ्यामृग्भ्यामग्निं निदध्यात् । तत्र प्रथमा– ' सुपर्णोऽसि गरुत्मान् पृष्ठे पृथिव्याः सीद । भासान्तरिक्षमा पृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृꣳह ' इति । हे अग्ने, त्वं vसुपर्णः पक्ष्याकारः vगरुत्मान् गरुडसमानः vअसि । अतः vपृथिव्याः vपृष्ठे उपरि vसीद उपविश । vभासा स्वकीयप्रकाशेन vअन्तरिक्षम् vआपृण सर्वतः पूरय । vज्योतिषा स्वकीयेन सामर्थ्येन vदिवं द्युलोकम् vउत्तभान ऊर्ध्वंस्तभितं कुरु । तथा vतेजसा स्वकीयेन सामर्थ्येन vदिशः प्राच्यादिना उद्दृꣳह उत्कर्षेण दृढीकुरु ॥८॥

आ– स्वयमातृण्णायामग्निं निदधाति– ' सुपर्णोऽसि ', ' आजुह्वानः सुप्रतीकः ' इति द्वाभ्याम् । पङ्क्तिराग्नेयी । यस्त्वमग्निः vसुपर्णः vअसि । सुपतनः सुपूरणो वा स्वयमात्मा वा । vगरुत्मान् गुर्वात्मा गरलवान् पक्षवान् वा असि । vपृष्ठे vपृथिव्याः पृष्ठे उपरि vसीद अवस्थानं कुरु । vभासा दीप्त्या vअन्तरिक्षम् vआपृण आपूरय । vज्योतिषा vदिवम् vउत्तभान, दिवं द्युलोकमुत्तभान यथा न पतेत् तथा उत्तम्भय उत्तम्भको भव । vतेजसा vदिशः vउद्दृꣳह । तेन आग्नेयेन तेजसा सर्वा दिशः उद्दृꣳह स्थिरीकुरु ॥७२॥

आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वं योनिमासीद साधुया ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ।।९।।

आजुह्वान इत्याऽजुह्वानः । सुप्रतीक इति सुऽप्रतीकः । पुरस्तात् ।
अग्ने । स्वम् । योनिम् । आ । सीद । साधुयेति साधुऽया ॥९॥ ठौ ॥

* 2, 4. [द्र. वाजसनेयि-प्रातिशाख्यं ४.९९ – ' उदः स्तभाने लोपम् ' ।]
7. S2 मन्त्राभ्यां for ऋग्भ्याम्; P1 after प्रथमा add आग्नेयी पङ्क्तिः ।
14. H2 after पङ्क्तिर् ins. अथ; B1 om. °असि । सुपतनः सुपूरणो
15. H2–3 after पक्षवान् om. वा

सा– अथ द्वितीया– 'आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वं योनिमा सीद साधुया । अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत' इति । हे अग्ने, त्वम् आजुह्वानः आभिमुख्येन हूयमानः सुप्रतीकः सुमुखः सन् पुरस्तात् पूर्वस्यां दिशि साधुया साध्व्या क्रियया ऋत्विग्यजमानैः साधयितुं योग्यया सीद अधितिष्ठ । हे विश्वे देवाः यूयं यजमानश्च अस्मिन् पुरोवर्तिनि सधस्थे अग्निना सह स्थातुं योग्ये अधि उत्तरस्मिन् अधिकमुत्कृष्टे स्थाने सीदत उपविशत ॥९॥

आ– 'आजुह्वानः' इति । त्रिष्टुबाग्नेयी । आजुह्वानः यथाशास्त्रमभिहूयमानः सुप्रतीकः शोभनावयवः सुमुखश्च । पुरस्तात् पूर्वस्यां दिशि । हे श्रीभगवन् अग्ने, स त्वं स्वं योनिम् उत्पत्तिस्थानं स्वशरणभूमिं साधुया साध्व्या क्रियया ऋत्विग्यजमानैः साधयितुं योग्यया आसीद अधितिष्ठ । अस्मिन् सधस्थे अस्मिन् कर्मणि सधस्थे सहस्थाने यज्ञगृहे अधि उत्तरस्मिन् द्युस्थानभूते त्वस्मिन् विश्वे देवाः यजमानः च अधि सीदत विश्वे देवाः संप्रदायत्वेन, यजमानः अधिकारित्वेन सीदत अवस्थानं कुरुत ॥७३॥

ताꣳ स॒वि॒तुर्वरे॑ण्यस्य चि॒त्रामाऽहं वृ॑णे सु॒म॒तिं वि॒श्वज॑न्याम् ।
याम॑स्य कण्वो॒ अदु॑ह॒त् प्रपी॑नाꣳ स॒हस्र॑धारां॒ पय॑सा म॒हीं गाम् ॥१०॥

ताम् । स॒वि॒तुः । वरे॑ण्यस्य । चि॒त्राम् ।
आ । अ॒हम् । वृ॒णे । सु॒म॒तिमिति॑ सु॒ऽम॒तिम् । वि॒श्वज॑न्या॒मिति॑ वि॒श्वऽज॑न्याम् ।
याम् । अ॒स्य । कण्वः॑ । अदु॑हत् । प्रपी॑ना॒मिति॒ प्रऽपी॑नाम् ।
स॒हस्र॑धारा॒मिति॑ स॒हस्र॑ऽधाराम् । पय॑सा । म॒हीम् । गाम् ॥ थों ॥१०॥

सा– कात्यायनः – "समिदाधानं शामीली वैकङ्कत्यौदुम्बर्यस्तां सवितुरिति (काश्रौ १८·४·६)" इति । शमीविकङ्कतोदुम्बराणां संबधिनीस्तिस्रः समिधः 'ताꣳ सवितुर्वरेण्यस्य' इति तिसृभिर्ऋग्भिरादध्यात् । तत्र प्रथमा– 'ताꣳ सवितुर्वरेण्यस्य चित्रामाऽहं वृणे सुमतिं विश्वजन्याम् । यामस्य कण्वो अदुहत् प्रपीनाꣳ सहस्रधारां पयसा महीं गाम्' इति । पुरा कदाचित् कण्वाख्यो महर्षिरस्याग्नेः यां सुमतिम् अनुग्रहकारिणीं बुद्धिं अदुहत् दुग्धवान् । तत्र दृष्टान्तः– प्रपीनां प्रभूतः पीनस्तनसंघो यस्याः सा प्रपीना ताम् । सहस्रसंख्याकाः क्षीरधारा यस्याः सा सहस्रधारा ताम् । पयसा महीं क्षीरेण संपूर्णां गां धेनुं यथा लौकिका दुहन्ति तद्वदयमग्नेः सुमतिं दुग्ध्वा स्वाभीष्टं फलं प्राप्तवान् ।

1. P1 after द्वितीया adds पङ्क्तिराग्नेयी
11. H3 द्युस्थाने for द्युस्थान॰; B1 om. तु; B1 om. अधि
12. H2–3 om. यजमानः॰; B1 यजमाने for यजमानः; H2–3 ॰कारत्वेन for ॰कारित्वेन
20. P1 after प्रथमा ins. सावित्री त्रिष्टुप्

अग्निस्थापनमन्त्राः]

vवरेण्यस्य सर्वैर्वरणीयस्य सर्वतः प्रेरकस्याग्नेः संबन्धिनीं कण्वेन दुग्धां तां सुमतिम् vअहम् vआ vवृणे सर्वतः प्रार्थये । कीदृशीं सुमतिम् ? vचित्रां स्वापेक्षितबहुविधफलप्रदानसमर्थामित्यर्थः । विश्वं जन्यमुत्पाद्यं यस्याः सा विश्वजन्या तां, जगदुत्पादनसमर्थामित्यर्थः ॥१०॥

आ– तिस्रः समिध आदधाति– ' तां सवितुः ' इति । सावित्री त्रिष्टुप् । पुरस्ताज्ज्योतिः । vकण्वः vयां vगाम् vअदुहत् vतां गाम् vअहम् vआवृणे । कथंभूतामिति ? vवरेण्यस्य वरणीयस्य सर्वेषामपरोक्षभूतस्य vसवितुः प्रसवितुः संबन्धिनीं, vचित्रां चयनीयां दर्शनीयां, vसुमतिं कल्याणीं मतिं, vविश्वजन्यां क्षीरं दध्यादिरूपेण जगतो जनित्रीं, vप्रपीनां प्रकर्षेण पीवरीं, vसहस्रधारां vपयसा क्षीरेण vमहीं महतीं गां धेनुम् अहम् आवृणे प्रवृणोमि ॥७४॥

विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥११॥

विधेम । ते । परमे । जन्मन् । अग्ने । विधेम । स्तोमैः । अवरे । सधस्थ इति सधऽस्थे
यस्मात् । योनेः । उदारिथेत्युत्ऽआरिथ । यजे । तम् ।
प्र । त्वे इति त्वे । हवींषि । जुहुरे । समिद्ध इति सम्ऽइद्धे ॥ ध्यौं ॥११॥

सा– अथ द्वितीया– ' विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे । यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ' इति । हे vअग्ने, vते तव vपरमे vजन्मन् स्वर्गलोकगते उत्कृष्टे जन्मनि त्वां vविधेम वयमेवंविधास्तेन परिचरेम । vसधस्थे अस्माभिः सह स्थातुं योग्ये vअवरे निकृष्टे भूलोकवर्तिजन्मनि vस्तोमैः स्तोत्रैः परिचरेम । vयस्मात् vयोनेः इष्टकाचितिरूपात् यस्मात् स्थानात् vउदारिथ त्वमुद्गत आविर्भूतोऽसि, vतं vयोनिं vयजे पूजयामि । vसमिद्धे सम्यक्प्रज्वलिते vत्वे त्वयि vहवींषि (vप्रजुहुरे) ऋत्विजः प्रकर्षेण जुह्वति ॥११॥

2. P1 after जन्यम् ins. सर्वेभ्यो जनेभ्यो हितमिति भाष्यान्तरं°

6. H2-3 परोक्ष° for अपरोक्ष°; H2-3 om. दर्शनीयां

14. P1 after द्वितीया adds त्रिष्टुबाग्नेयी

15. S2 after हे adds श्रीभगवन्; S2 त्वदीये परमे उत्कृष्टे जन्मन् जन्मानि उत्पात्तिस्थाने गार्हपत्ये सवितृमण्डले वा विधेम परिचरेम । समिधेति शेषः । for तव ...परिचरेम । and om. सधस्थे (L 16)

17. S2 स्तोमं° for स्तोत्रैः

18. P1 आहुतः for उद्गतः

आ– अथ वैकङ्कतीं समिधमादधाति– ' विधेम ते ' इति । त्रिष्टुबाग्नेयी । त्रिस्थानोऽग्निर्देवता । गृत्समदः । हे श्रीभगवन् vअग्ने, vते त्वदीये vपरमे उत्कृष्टतमे vजन्मन् जन्मनि उत्पत्तिस्थाने गार्हपत्ये सवितृमण्डले वा vविधेम, आदध्मः समिधमिति शेषः । अथ vअवरे अपरे मध्यमे vसधस्थे सहस्थाने शालामुखीये वैद्युते वा स्थिताय vस्तोमैः स्तुतिभिः समिधः vविधेम । vयस्मात् vयोनेः उत्पत्तिस्थानात् गार्हपत्यभूमेर्वा vउदारिथ । ऋ गतौ । उत्पन्नोऽसि । तस्मिन् समिधो विधेम । तस्मात् चिलं vतम् अग्निं vयजे vसमिद्धे । अग्ने, vत्वे त्वयि vहवीꣳषि vप्रजुहुरे जुहुवुः । व्यत्ययः ॥७५॥

प्रेद्धो॑ अग्ने दीदिहि पु॒रो नोऽज॑स्रया सू॒र्म्या॑ यविष्ठ ।
त्वाꣳ शश्व॑न्त॒ उप॑ यन्ति॒ वाजाः॑ ॥१२॥

प्रेद्ध॒ इति॒ प्रऽइ॑द्धः । अ॒ग्ने॒ । दी॒दि॒हि॒ । पु॒रः । न॒ः । अज॑स्रया । सू॒र्म्या॑ । य॒वि॒ष्ठ॒ ।
त्वाम् । शश्व॑न्तः । उप॑ । य॒न्ति॒ । वाजाः॑ । ॥ डीं ॥१२॥

सा– अथ तृतीया– ' प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । त्वाꣳ शश्वन्त उप यन्ति वाजाः ' इति । हे vअग्ने, vप्रेद्धः पूर्वमपि प्रकर्षेण दीप्तस्त्वं vपुरः vनः अस्माकं पुरोदेशे vअजस्रया निरन्तरया vसूर्म्या सूर्मीसमानज्वालया vदीदिहि पुनरपि दीप्यस्व । ज्वलन्ती लोहमयी स्थूणा सूर्म्या । हे vयविष्ठ युवतमाग्ने, vत्वां vशश्वन्तः निरन्तरभाविनः vवाजाः अन्नानि vउपयन्ति सामीप्येन प्राप्नुवन्ति ॥१२॥

आ– दधिद्रप्समुपहत्य दधाति– ' प्रेद्धो अग्ने ' इति । त्रिपदा विराट्, उष्णिग्वा । आग्नेयी । वसिष्ठः । vप्रेद्धः हविषा प्रकर्षेण इद्धः। हे vयविष्ठ युवतम हे श्रीभगवन् vअग्ने, दीप्तः भूयोऽपि vदीदिहि दीप्यस्व । vपुरः vनः अस्माकमग्रतः व्यवस्थितः vअजस्रया क्षयरहितया vसूर्म्या सु सुष्ठुतरया ऊर्म्या भ्रमणरूपया हविषः छादयित्र्या ज्वालया दीदिहि दीप्यस्व । (vत्वां) vशश्वन्तः शाश्वतिकाः vवाजाः अन्नानि हविर्लक्षणानि vउपयन्ति उपगच्छन्ति ॥७६॥

---

1. H2-3 om. समिधम्
3. B1 आदधः, H2-3 आदर्थं for आदध्मः
4. H2-3 मध्ये for मध्यमे
5. H2-3 गार्हपत्यात् for गार्हपत्य°
12. P1 after तृतीया adds विराळाग्नेयी वसिष्ठः
14. P1 पूर्ववत् for पुनरपि
20. B1 प्रमाण° for भ्रमण°
21. H2-3 यन्तु for यन्ति, B1 H2-3° गच्छन्तु for °गच्छन्ति

अग्निस्थापनमन्त्राः]

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् ।
ऋध्यामा त ओहैः ॥१३॥

अग्ने तम् .... ॥ ञ्च ॥१३॥

सा– कात्यायनः – 'स्रुवाहुती जुहोत्यग्ने तमद्येति प्रत्यृचम्' (काश्रौ १८.४.८) इति। 'अग्ने तमद्य' इति द्वाभ्यामृग्भ्यां द्वे स्रुवाहुती जुहुयात्। तत्र प्रथमा– 'अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम्। ऋध्यामा त ओहैः' इति। अयं मन्त्रः षोडशेऽध्याये व्याख्यातः ॥१३॥

आ– तिस्र आहुतीर्जुहोति– 'अग्ने तम्' इति। व्याख्यातः ॥७७॥

चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन् वीतिहोत्रा ऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहाऽदाभ्यꣳ हविः ॥१४॥

चित्तिम् । जुहोमि । मनसा । घृतेन ।
यथा । देवाः । इह । आगमन्नित्याऽगमन् ।
वीतिहोत्रा इति वीतिऽहोत्राः । ऋतावृधः । ऋतवृध इत्यृतऽवृधः ।
पत्ये । विश्वस्य । भूमनः । जुहोमि ।
विश्वकर्मण इति विश्वऽकर्मणे । विश्वाहा । अदाभ्यम् । हविः ॥ त्र्यौ ॥१४॥

सा– अथ द्वितीया– 'चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन् वीतिहोत्रा ऋतावृधः। पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहादाभ्यꣳ हविः' इति । ˇयथा ˇदेवाः ˇइह ˇआगमन् येन प्रकारेण हविर्भाजो देवा अस्मिन् कर्मण्यागच्छन्ति तथाहं ˇमनसा मनोगतया भक्त्या घृतेन च बाह्यद्रव्येण ˇचित्तिं जुहोमि, देवानां चित्तिमुपाददे, प्रसादयामीत्यर्थः। कीदृशा देवाः? ˇवीतिहोत्राः कमनीयहविषः ˇऋतावृधः यज्ञस्य वर्धयितारः। तत ऊर्ध्वं ˇभूमनः भूम्नः पृथोः ˇविश्वस्य सर्वस्य जगतः ˇपत्ये स्वामिने ˇविश्वकर्मणे प्रजापतये ˇविश्वाहा सर्वेष्वप्यहःसु ˇअदाभ्यम् अनुपहास्यं स्वादुभूतं ˇहविः ˇजुहोमि ॥१४॥

5. P1 om. द्वे
6. P1 om. मन्त्रः
15. P1 after द्वितीया adds विश्वकर्मदेवत्या जगती
16. P1 अहं मनसा एकाग्रेण मनसा देवानामिन्द्रादीनां चित्तिं प्रति जुहोमि घृतेन, यथा देवा इह कर्मणि आगमन्नागच्छेयुस्तथा for यथा देवाः ... चित्तिं जुहोमि (L 18)
19. P1 after °हविषः adds कमनीययज्ञा इति भाष्यान्तरम्

आ– ' चित्तिं जुहोमि ' [इति] वैश्वकर्मणी जगत्यतिजगती वा । चित्तिं जुहोमि मनसा घृतेन च सह । एषा चित्तिः अग्नितत्त्वपरिज्ञानाभिमुखा ।[तां] चित्तिं करोमीत्यर्थः । घृतेन च सह तथा जुहोमि यथा देवाः इह आगमन्, यथा देवा इहागच्छेयुः । कथंभूताः ? वीतिहोत्राः कामितयज्ञाः । होत्राः इति यज्ञनामसु पठितम् । ऋतावृधः ऋतेन सत्येन अभिवर्धन्त इति ऋतावृधः । सत्येन अभिवर्धमानाः देवाः आगच्छन्त्विति । किंच– पत्ये विश्वस्य सर्वस्य भूमनः जुहोमि । विश्वकर्मणे पत्ये, सर्वस्य भूतस्य पतिस्तस्मै जुहोमि । योऽस्य सर्वस्य भूतस्य पतिस्तस्मै जुहोमि । विश्वाहा सर्वदा अदाभ्यम् । दभ्नोतिर्हिंसार्थः । अनुपहिंस्यम् अक्षितं हविः विश्वकर्मणे जुहोमि ॥७८॥

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्व घृतेन स्वाहा ॥१५॥६॥

सप्त । ते । अग्ने । समिध इति सम्ऽइधः । सप्त । जिह्वाः । सप्त । ऋषयः । सप्त । धाम । प्रियाणि ।
सप्त । होत्राः । सप्तधा । त्वा । यजन्ति ।
सप्त । योनीः । आ । पृणस्व । घृतेन । स्वाहा ॥ डीः ॥१५॥६॥

सा– कात्यायनः – " पूर्णाहुतिं सप्त त इति तिष्ठन् " (काश्रौ १८·४·९) इति । पाठस्तु– ' सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्व घृतेन स्वाहा ' इति । हे अग्ने, ते तव समिधः समिन्धनाः सप्त सप्तसंख्याकाः शीर्षण्याः प्राणाः सन्ति । " प्राणा वै समिधः " (शब्रा ९·२·३·१४) इति श्रुतेः । ज्वालारूपाः जिह्वाः च सप्त । तथा चाथर्वणिका आमनन्ति– " काली कराली च मनोजवा च विलोहिता या च सधूमपूर्णा । स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः " (मुंउ १·२·४) इति । तथा च सप्तसंख्याका ऋषयः च सन्ति । प्रियाणि धाम स्थानानि आहवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्य-प्राजहिताग्नीध्रीयाणि सोमयागे वह्निधारकाणि तव सप्तसंख्याकानि सन्ति । होत्राः होतृप्रमुखाः प्रैषकर्तारः । होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाऽग्नीध्रोऽच्छावाकश्चेति सप्तसंख्याकाः सन्ति । यजमाना अपि सप्तधा त्वां यजन्ति । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडश्यतिरात्रोऽप्तोर्यामो वाजपेयश्चेति सप्तप्रकाराः । तादृशस्त्वं सप्त योनीः आहवस्थानीयानि सप्तचितीर्वा । घृतेन आपृणस्व सर्वतः पूरय । स्वाहा सुहुतमस्तु ॥१५॥

[इत्यष्टादशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

2. B1 एषां चित्तं for एषा चित्तिः; B1 °मुखम् चित्तं for °मुखा । [तां] चित्तिं
5. B1 वर्धयन्ते for °वर्धन्ते B1 आगमन्निति; H2-3 आगच्छन्तीति for आगच्छन्त्विति
15. P1 after पाठस्तु adds त्रिष्टुबाग्नेयी सप्तर्षीणामार्षम्

आ– पूर्णाहुतिं जुहोति – ' सप्त ते अग्ने ' इति । त्रिष्टुबाग्नेयी । सप्तर्षीणामार्षम् । हे श्रीभगवन् ^{v}अग्ने, ^{v}ते तव ^{v}समिधः समिन्धनाः ^{v}सप्त प्राणा सन्ति । " प्राणा वै समिधः " (मुंउ १.२) इति श्रुतेः । ^{v}सप्त ^{v}जिह्वाः कालीकराल्यादयः ।

हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा ।
अतिरिक्ता बहुरूपा च सप्तजिह्वा इति स्मृताः ॥१॥
हिरण्या वारुणी जिह्वा कनका मध्यमे स्थिता ।
रक्ता चैवोत्तरे जिह्वा कृष्णा चैव तु दक्षिणा ॥२॥
सुप्रभा पूर्वदिग्भागे अतिरिक्तोत्तरे तथा ।
बहुरूपा सदिग्भागे जिह्वास्थानं प्रकीर्तितम् ॥३॥

^{v}सप्त ^{v}ऋषयः तव द्रष्टारः । अनेकानपि सप्तधा कृत्वाऽहुः सप्तर्षय इति । सप्तर्षयो यतस्ते सान्ति । ^{v}प्रियाणि ^{v}सप्त धामानि प्रियाणि सप्त छन्दांसि । ते प्रियाणि धामानि यतस्तव सान्ति । ^{v}सप्त ^{v}होत्राः आग्नीध्रपर्यन्ताः ते यतः सन्ति । हे श्रीभगवन्नग्ने, ^{v}सप्तधा सप्तप्रकारेण अग्निष्टोमादिभेदेन ^{v}त्वा अग्निं त्वां ^{v}यजान्ति । अतस्त्वां ब्रवीमि । हे श्रीभगवन्नग्ने, ^{v}सप्त ^{v}योनीः सप्त चितीः ^{v}आपृणस्व ^{v}घृतेन आपूर्य तर्पय च । ^{v}स्वाहा सुहुतमस्तु ॥७९॥

[इति षष्ठोऽनुवाकः]

[अथ सप्तमोऽनुवाकः ।]

शुक्रज्यो॑तिश्च चि॒त्रज्यो॑तिश्च स॒त्यज्यो॑तिश्च॒ ज्योति॑ष्मांश्च ।
शु॒क्रश्च॑ ऋत॒पाश्चात्य॑꣡ꣳहाः ॥१॥

शु॒क्रज्यो॑ति॒रिति॑ शु॒क्रऽज्यो॑तिः । च॒ । चि॒त्रज्यो॑ति॒रिति॑ चि॒त्रऽज्यो॑तिः ।
स॒त्यज्यो॑ति॒रिति॑ स॒त्यऽज्यो॑तिः । ज्योति॑ष्मान् ।
शु॒क्रः । ऋ॒त॒पा इत्यृ॑त॒ऽपाः । अत्यं॑꣡ꣳहा॒ इत्यति॑ऽअꣳहाः ॥ प्र॑ ॥१॥

सा– षष्ठेऽनुवाके अग्निस्थापनमुक्तम् । सप्तमे तत्र होतव्या मारुताः पुरोडाशा उच्यन्ते ॥

कात्यायनः– " मारुतान् जुहोति शुक्रज्योतिरिति प्रतिमन्त्रम् " (काश्रौ १८·४·२३) इति । ' शुक्रज्योतिः ' इत्यादिभिर्मन्त्रैर्मारुतपुरोडाशान् जुहुयात् । तत्र प्रथमः – ' शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च । शुक्रश्च ऋतपाश्चात्यंहाः ' इति । अत्रैकस्मिन्

5. H2–3 °रूपी for °रूपा
24. P1 after प्रथमः adds षण्मरुत्यः । आद्या तृतीया षष्ठी चोष्णिक । द्वितीया च गायत्री पञ्चमी जगती ।

मन्त्रे सप्त सप्त मरुत उच्यन्ते । शुक्रं शुद्धं ज्योतिर्यस्य मरुतः स ᵛशुक्रज्योतिः । चित्रं कमनीयं ज्योतिर्यस्य स ᵛचित्रज्योतिः । सत्यं ब्रह्मलक्षणं ज्योतिर्यस्य स ᵛसत्यज्योतिः । ज्योतिस्तेजोऽस्यास्तीति ᵛज्योतिष्मान् । शोचत इति ᵛशुक्रः दीप्तिमान् । ऋतं सत्यं पातीति ᵛऋतपाः । अंहः पापमतीत्य वर्तत इति ᵛअत्यꣳहाः । चकाराः समुच्चयार्थाः ॥१॥

आ– अथ मारुतान् जुहोति, तिष्ठन् समिध आदधाति– ' शुक्रज्योतिः ' इति शुक्रज्योतिरित्यादयः षण्मारुत्यः । आद्या तृतीया, षष्ठी चोष्णिक् । द्वितीया चतुर्थी च गायत्री ॥ पञ्चमी जगती । अत्रैकैकस्यां खाण्डिकायां सप्त सप्त मरुतः । ' शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च । शुक्रश्च ऋतपाश्चात्यꣳहाः ' इति । अथैकपादाग्निरुक्तः । शुक्रं शुद्धं ज्योतिर्यस्य मरुतः सः ᵛशुक्रज्योतिः । शुक्रस्य स्फटिकादेर्ज्योतिरिव ज्योतिर्यस्य सः शुक्रज्योतिः । चित्रं विचित्रं चायनीयं दर्शनीयं ज्योतिर्यस्य सः ᵛचित्रज्योतिः । चशब्दः समुच्चयार्थः । सत्यं ब्रह्मलक्षणं ज्योतिर्यस्य सः ᵛसत्यज्योतिः । ज्योतिरस्यास्तीति ᵛज्योतिष्मान् । शुच दीप्तौ । शोचत इति ᵛशुक्रः रप्रत्ययान्तः । दीप्तरूपः । ऋतं सत्यं पातीति ᵛऋतपाः । ᵛअत्यꣳहाः अꣳहः पापम् अत्यवर्तत इत्यतꣳहाः ॥८०॥

ई॒दृङ् चा॒न्या॒दृङ् च॑ स॒दृङ् च॒ प्रति॑स॒दृङ् च ।
मि॒तश्च॒ संमि॑तश्च॒ सभ॑राः ॥२॥

ई॒दृङ् । अ॒न्या॒दृङ् । स॒दृङ्ङिति॑ स॒ऽदृङ् । प्रति॑सदृङ्ङि॒ति प्रति॑ऽसदृङ् ।
मि॒तः । संमि॑त॒ इ॒ति सम्ऽमि॑तः । सभ॑रा॒ इति॑ स॒ऽभ॑राः ॥ द्वे ॥२॥

सा– अथ द्वितीयः – ' ईदृङ् चान्यादृङ् च ᵛसदृङ् च प्रतिसदृङ् च । मितश्च संमितश्च सभराः ' इति । इमं पुरोडाशं स्वयं संगृह्य पश्यतीति ᵛईदृङ् । अनेनानेन समानदर्शनः । इमसिव पश्यतीति वा ईदृङ् । अन्येनान्येन च समानदर्शनः ᵛअन्यादृङ् । ᵛसदृङ् तेन तेन समानदर्शनः । ᵛप्रतिसदृङ् तं तं प्रति समानदर्शनः । ᵛमितः मानं प्राप्तः । सम्यक् परितो मानं प्राप्तः ᵛसंमितः । सह बिभर्तीति ᵛसभराः ॥२॥

---

6. B1 om. शुक्रज्योतिरिति

8. B1 पदां निरुक्तं for °पादाग्निरुक्तः

9. B1 om. यस्य मरुतः स शुक्रज्योतिः, B1 om. शुक्रज्योतिः । चित्रं... यस्य सः [L 10];

10. B1 विचित्र° for चित्र°; H2-3 after दर्शनीयं add यज्ज्योतिः इत्युत्रयः (?) भासते ज्योतत इति ज्योतिः ।

19. P1 om. अनेन ... ईदृङ् (L 20)

20. S2 om. तेन तेन

आ– ' ईदृङ् च ' इति। दृशि प्रेक्षणे । इमं पुरोडाशं स्वमंशं गृह्णन् पश्यतीति [v]ईदृङ्। अनेन समानदर्शनः, इममिव पश्यतीति वा ईदृङ्। [v]अन्यादृङ् अन्येन समानदर्शनः। अन्यमिव पश्यतीति वा अन्यादृङ् । [v]सदृङ् समानदर्शनः। [v]प्रतिसदृङ्, तं तं प्रति समानदर्शनः प्रतिसदृङ्, प्रतिसदृशः । माङ् माने । [v]मितः परिमितः । समित्येकीभावेन मितः [v]संमितः तुलितो वा। सह बिभर्तीति [v]सभराः ॥८१॥

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च ।
अन्तिमित्रश्च दूरेअमित्रश्च गणः ॥३॥

ऋतजिदित्यृतऽजित् । सत्यजिदिति सत्यऽजित् ।
सेनजिदिति सेनऽजित् । सुषेणः । सुसेन इति सुऽसेनः ।
अन्तिमित्र इत्यन्तिऽमित्रः । दूरेअमित्र इति दूरेऽअमित्रः । गणः ॥ घैं ॥३॥

सा– अथ तृतीयः – ' ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च। अन्तिमित्रश्च दूरेअमित्रश्च गणः ' इति। ऋतं जयतीति [v]ऋतजित्। सत्यं याथातथ्यं जयतीति [v]सत्यजित्। शत्रुसेनां जयतीति [v]सेनजित्। शोभना सेना यस्यासौ [v]सुषेणः। अन्तिके समीपे मित्राणि यस्य सः [v]अन्तिमित्रः। दूरे शत्रवो यस्यासौ [v]दूरेअमित्रः। गणयतीति [v]गणः ॥३॥

आ– ' ऋतजिच्च ' इति। ऋतं जयतीति [v]ऋतजित्। सत्यं याथातथ्यं जयतीति [v]सत्यजित्। सेनां जयतीति [v]सेनजित्। शोभना सेना यस्य सः [v]सुषेणः शोभनसेनः । अन्तिके समीपे मित्राणि यस्य सः [v]अन्तिमित्रः। [v]दूरेअमित्रः शत्रुः। गण परिसंख्याने। गणयतीति [v]गणः ॥८२॥

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च ।
धर्ता च विधर्ता च विधारयः ॥४॥

ऋतः । सत्यः । ध्रुवः । धरुणः ।
धर्ता । विधर्तेति विऽधर्ता । विधारय इति विऽधारयः ॥ जै ॥४॥

3. H2-3 om. समानदर्शनः; H2-3 अन्यं for तं तं

4. H2-3 मा भूत् समानोदितः for माङ् माने मितः परिमितः

सा– अथ चतुर्थः – ‘ ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च । धर्ता च विधर्ता च विधारयः ’ इति । ^{v}ऋतः हविषः स्वमंशं प्राप्तः । सति भवः ^{v}सत्यः । ^{v}ध्रुवः वर्धमानः । ध्रुव वृद्धौ । ^{v}धरुणः धारकः । धृ धारणे । धारयतीति ^{v}धर्ता । विशेषेण धर्ता ^{v}विधर्ता । विविधं धारतीति ^{v}विधारयः ॥४॥

आ– ऋ गतौ । ^{v}ऋतः हविषः स्वमंशं प्राप्त ऋतः । सति भवः ^{v}सत्यः । सति ब्रह्मणि भवः सत्यः । ध्रुव वृद्धौ । ^{v}ध्रुवः वर्धमानः । धृ धारणे । ^{v}धरुणः धारकः । ^{v}धर्ता धारयतीति धर्ता । विशेषेण धर्ता ^{v}विधर्ता । विविधं धारयतीति ^{v}विधारयः ॥३॥

ई॒दृक्षा॑स एता॒दृक्षा॑स ऊ षु णः॑ स॒दृक्षा॑स॒ः प्रति॑सदृक्षास॒ एत॑न ।
मि॒तास॑श्च॒ संमि॑तासो नो अ॒द्य सभ॑रसो मरुतो य॒ज्ञे अ॒स्मिन् ॥५॥

ई॒दृक्षा॑सः । ए॒ता॒दृक्षा॑स । ऊँ इत्यूँ । सु । न॒ः ।
स॒दृक्षा॑स॒ इति॑ स॒ऽदृक्षा॑सः । प्रति॑सदृक्षास॒ इति॒ प्रति॑ऽसदृक्षासः । आ । इ॒त॒न॒ ।
मि॒तास॑ः । संमि॑तास॒ इति॒ सम्ऽमि॑तासः । न॒ः । अ॒द्य ।
सभ॑रस॒ इति॒ सऽभ॑रसः । म॒रु॒त॒ः । य॒ज्ञे । अ॒स्मिन् ॥ म्यैं ॥५॥

सा– अथ पञ्चमः – ‘ ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन । मितासश्च संमितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ’ इति । ^{v}ईदृक्षासः ईदृक्प्रकाराः । ^{v}एतादृक्षासः एतादृशाः । ^{v}सदृक्षासः सदृशाः । ^{v}प्रतिसदृक्षासः प्रतिसदृशाः । एवंभूताः मरुतः, यूयं ^{v}नः अस्माकम् ^{v}अस्मिन् ^{v}यज्ञे ^{v}एतन सुष्ठु आगच्छत । ^{v}मितासः ये प्रमाणतः परिमिताः । ये च संगत्य मिताः ^{v}संमिताः । सह भरेणादरेण वर्तन्त इति ^{v}सभरसः । हे ^{v}मरुतः, एवंभूता अपि यूयम् ^{v}अद्य ^{v}नः अस्मदीये अस्मिन् यज्ञे आगच्छत ॥५॥

आ– ‘ ईदृक्षासः ’ इति । व्यवहितपदप्राप्तोऽयं मन्त्रः । ^{v}ईदृक्षासः ईदृशाः मरुतः । एतादृशा मरुतः ^{v}एतादृक्षासः । ‘ ऊ षु णः ’ । एषां समूहः ^{v}ऊ ^{v}षु ^{v}णः इति । कस्यचिन्मरुतो नामसंज्ञात् सदृशात् मरुतः ऊ षु णः ^{v}सदृक्षास इत्युच्यन्ते । ^{v}प्रतिसदृक्षासः

2. P1 स्ववशं for स्वमंशं

17. P1 om. first ये; S2 मानतः for प्रमाणतः

18. S2 सभरासः for सभरसः; S2 om. अस्मिन्

21. H2-3 om. एतादृशा मरुतः

मारुतपुरोडाशमन्त्राः]

एतन आयात प्रतिसदृशाः । मितासः ये मानतः परिमिताः । संमितासः संगत्य मिताः । सभरसः समानकालाः मरुतः । एवंविधा यूयम् । अतो युष्मानहं ब्रवीमि । अद्य अस्मिन्नहनि नः अस्माकम् अस्मिन् यज्ञे यूयम् एतन । नकारश्छान्दसः । एत । इण् गतौ । अस्मद्यज्ञमागच्छत ॥८४॥

स्वतवांश्च प्रघासी च सांतपनश्च गृहमेधी च ।
क्रीळी च शाकी चोज्जेषी ॥६॥

स्वतवानिति स्वऽतवान् । प्रघासीति प्रऽघासी ।
सांतपन इति साम्ऽतपनः । गृहमेधीति गृहऽमेधी ।
क्रीळी । शाकी । उज्जेषीत्युत्ऽजेषी ॥ प्यैं ॥६॥

सा– अथ षष्ठः – ' स्वतवांश्च प्रघासी च सांतपनश्च गृहमेधी च । क्रीळी च शाकी चोज्जेषी ' इति । स्वतवान् स्वाधीनबलयुक्तः । प्रघासी प्रकर्षेण पुरोडाशभक्षणशीलः । संतपनः सूर्यस्तत्संबन्धी सांतपनः । गृहमेधसंबन्धी गृहमेधी । क्रीळी सदा क्रीडनशीलः । शाकी अवश्यकार्ये अवश्यं शक्त इत्यर्थः । उज्जेषी उत्कृष्टजयशीलः ॥६॥

आ– ' स्वतवान् ' [इति] । वर्णलोपश्छान्दसः । तवो बलं तद्वान् । स्वतवोवानिति प्राप्ते स्वतवान् [इति] । यद्वा– स्वं तनोतीति स्वतं बलम् । स्वकीयं तद्बलं यस्यास्ति सः स्वतवान् । घस्लृ अदने । प्रघासः पुरोडाशभक्षोऽस्यास्तीति प्रघासी प्रकर्षेणादनशीलः । सांतपनः च । तपनः सूर्यः । सम्यक् तपनः संतपनः । तत्संबन्धी मरुत् सान्तपनः । गृहमेधी च । गृहमेधसंबन्धी गृहमेधी । क्रीळी सदा क्रीडनशीलः क्रीळी । शाकी । शक शक्तौ । शक्म शाकः । छान्दसो दीर्घः । सोऽस्यास्तीति शाकी । उज्जेषी, उत्कृष्टजयशीलः उज्जेषी ॥८५॥

इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्
यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ।
एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भूयासुः ॥७॥

1. H2–3 तन; B1 आयतन for आयात
4. H3 यजमानः गच्छतु for यज्ञमागच्छत
19. B1 शकलं; H2–3 शकनः for शक्म

इन्द्र॑म् । दैवीः॑ । विशः॑ । म॒रुतः॑ । अनु॑वर्त्मा॒न॒ इत्यनु॑ऽवर्त्मानः॑ । अ॒भ॒व॒न् ।
यथा॑ । इन्द्र॑म् । दैवीः॑ । विशः॑ । म॒रुतः॑ । अनु॑वर्त्मा॒न॒ इत्यनु॑ऽवर्त्मानः॑ । अभ॑वन् ।
ए॒वम् । इ॒मम् । यज॑मानम् । दैवीः॑ । च॒ । विशः॑ ।
मा॒नु॒षीः । च॒ । अनु॑वर्त्मा॒न॒ इत्यनु॑ऽवर्त्मानः॑ । भू॒या॒सु॒ः ॥ ङ्घि ॥७॥

अश्मन्नूर्जं पञ्चदश ॥१५॥ अग्निस्तिग्मेन नव ॥९॥ चक्षुषः पिताऽष्ट ॥८॥ आशुः शिशानः सप्तदश ॥१७॥ उदेनं पञ्चदश ॥१५॥ क्रमध्वमग्निना पञ्चदश ॥१५॥ शुक्रज्योतिश्च सप्त ॥७॥

सप्तानुवाकेषु षळशीति ॥८६॥

इति शुक्लयजुर्वेदकाण्वसंहितापाठेऽष्टादशोऽध्यायः ॥१८॥

सा- कात्यायनः – " इन्द्रं दैवीरिति " (काश्रौ १८·४·२५) इति जपति । पाठस्तु– ' इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् । एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भूयासुः ' इति । दैवीः विशः देवसंबन्धिनः प्रजारूपा एते मरुतः इन्द्रम् अनुवर्त्मानः अभवन् इन्द्रं स्वामिनमनुसृत्य तदनुसारेण वर्तमाना अभवन् । यथा मरुतः इन्द्रानुसारिणः एवं दैव्यो मानुष्यः च सर्वाः प्रजाः इमं यजमानम् अनुसृत्य तदनुसारेण वर्तमानाः भूयासुः भवन्तु ॥७॥

इत्यष्टादशेऽध्याये सप्तमोऽनुवाकः ॥७॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये अष्टादशोऽध्यायः ॥१८॥

आ– मारुतं यजुर्जपति– ' इन्द्रं दैवीः ' इति । मारुतं यजुः । मारुत्यतिजगती वा । इन्द्रं राजानं दैवीः विशः देवसंबन्धिनीर्दैव्यः मरुल्लक्षणाः प्रजाः अनुवर्त्मानः, अनु पश्चात् वर्त्म वर्तनं यासां ताः अनुवर्त्मानः स्वामिनमनुवर्तमानाः अभवन् । स्वरूपप्रख्यापनमेतत् । ' यथेन्द्रं

---

11. P1 °संबान्धि° for °संबन्धिनः
12. S2 तदनुसृत्य for तदनुसारेण
14. P1 अभवन् for भवन्तु
21. H3 om. अनु पश्चात् वर्त्म

मारुतपुरोडाशमन्त्राः]

दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ' इत्युपमानम् । [v]एवम् [v]इमं [v]यजमानं, [v]दैवीः [v]च [v]विशः दैव्यः प्रजाः [v]मानुषीः मानुष्यश्च प्रजाः [v]अनुवर्त्मानः [v]भूयासुः अनुगामिन्यो भवन्त्विति प्रार्थना ॥८६॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपुरीपूज्यपादपरमकारुण्यासादित–
श्रीकृष्णभक्तिसाम्राज्यश्रीमज्जातवेद–भट्टोपाध्यायस्य सूनुना
चतुर्वेदि-श्रीमदानन्दबोध-भट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे अष्टादशोऽध्यायः ॥१८॥

---

2. H3 before भूयासुः adds अनुपबन्धिनः

4. H2–3 इत्यष्टादशोऽध्यायः for इति ... भाष्यसंग्रहेऽष्टादशोऽध्यायः (L 6)

एकोनविंशोऽध्यायः ।

[अथ प्रथमोऽनुवाकः ।]

इमꣳ स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सं जुषस्व शतधारमर्वन्त्समुद्रियꣳ सदनमा विशस्व ॥१॥

इमम् । स्तनम् । ऊर्जस्वन्तम् । धय । अपाम् ।
प्रपीनमिति प्रऽपीनम् । अग्ने । सरिरस्य । मध्ये ।
उत्सम् । जुषस्व । शतधारमिति शतऽधारम् । अर्वन् ।
समुद्रियम् । सदनम् । आ । विशस्व ॥ त्यै ॥१॥

सा- यस्य निश्वःसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अष्टादशेऽध्याये परिषेचनसंस्कारादिमारुतपुरोडाशान्ता मन्त्रा उक्ताः । अथैकोनविंशे वसोर्धाराहोमार्थमन्त्रा उच्यन्ते। तत्र प्रथमेऽनुवाके वसोर्धाराहोमात् पूर्वं यजमानेन वाचयितव्या मन्त्रा उच्यन्ते ॥

कात्यायनः – " इमꣳ स्तनमिति वाचयति वा " (काश्रौ १८·४·२६) इति । अध्वर्युरेतान् द्वादश मन्त्रान् यजमानं वाचयेत् । स्वयं वा जपेत् । एतैर्मन्त्रैर्वसोर्धारार्थं घृतं स्तूयते । तत्र प्रथममन्त्रपाठस्तु– ' इमꣳ स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये। उत्सं जुषस्व शतधारमर्वन्त्समुद्रियꣳ सदनमा विशस्व ' इति । हे अग्ने, अपां प्रपीनम् । अप्शब्देनात्र घृतमुच्यते । अद्भिर्घृतैः प्रपीनम् अन्तः पूरितम् । ऊर्जस्वन्तं विशिष्टरसवन्तम् इमं स्तनम् । वसोर्धारा औदुम्बर्या स्रुचा हूयते । साऽत्र स्तनशब्देन निरूप्यते । इमं स्रुग्लक्षणं स्तनं तत्पतितां घृतधारां वा धय पिब । धेट् पाने । कीदृशः? सरिरस्य मध्ये लोकानां मध्ये वर्तमानः । " इमे वै लोकाः सरिरम् " (शब्रा २·५·३·१४) इति श्रुतेः । किंच– हे अर्वन् सर्वयज्ञं प्रति गन्तः हे अग्ने, शतधारं बहुविधघृतादिधारायुक्तम् उत्सं प्रस्रवणयुक्तं स्तनं जुषस्व सेवस्व । किंच समुद्रियं समुद्रसंबन्धि सदनं गृहम् आविशस्व । एवं तप्तः सन् स्वसदनं सेवस्वेत्यर्थः ॥१॥

15. S2 M2 om. द्वादश

16. P1 after पाठस्तु adds अस्याध्यायस्य परमेष्ठी प्रजापतिर्ऋषिः सामान्येन । तत्र त्रयोदशाग्नेय्यस्त्रिष्टुभः

19. M2 om. पिब धेट् पाने

21. M2 S2 om. °आदि°

आ– ‘ इमं स्तनमूर्जस्वन्तम् ’ इति । अग्निसंबन्धोऽयमध्यायः । अतः प्रजापतिः परमेष्ठी ऋषिः अस्याध्यायस्य सामान्येन । विशेषेणोक्तौ तु सोऽप्यृषिरस्तु । “ अथैनमेतैः क्रमैरभिषिञ्चति ” इत्युपक्रम्यानया वसोर्धारया आज्येन पञ्चगृहीतेनौदुम्बर्या स्रुचेत्याद्यभिधायाह– “ सैषा वसुमती धारा यथा वा क्षीरस्य वा सर्पिषो वैवमारभ्यते सैवेयमाज्याहुतिर्हूयते । तद्यदेषा वसुमती धारा तस्मादिमां वसोधारेत्याचक्षते । स आहेदं च म इदं च मे अनेन च त्वा प्रीणाम्यनेन च त्वाऽभिषिञ्चामि ” इत्यादिभिर्ब्राह्मणवाक्यैर्व्याख्यातार्था मन्त्राः इति । ‘ इमं स्तनमूर्जस्वन्तम् ’ इति । अत्र द्वादशाग्नेयी त्रिष्टुभः । यजमानं वाचयति । घृतस्तुतिश्च यज्ञस्तुतिश्च दृश्यते । वसोर्धाराऽनन्तरं भविष्यति । तदभिवादिभ्यो वा । वसोर्धारा स्रुचा हूयते । साऽत्र रूपकल्पनया एव उक्ता ‘ इमं स्तनम् ’ इति । ^{v}इमं स्रुग्लक्षणं ^{v}स्तनम् । कथंभूतमिति । ^{v}अपां ^{v}प्रपीनम् । अप्शब्देनात्र घृतमन्नं पूरितं घृतादि वा उच्यते । अद्भिः प्रपीनं पीनभावमापन्नम् । ^{v}ऊर्जस्वन्तं विशिष्टरसवन्तं स्तनं ^{v}धय । धेट् पाने । ^{v}सरिरस्य ^{v}मध्ये वर्तमानः । “ इमे वै लोकाः सरिरम् ” (शब्रा २.५.२.३४) इति श्रुतेः । हे श्रीभगवन् ^{v}अग्ने, सरिरस्य लोकानां मध्ये वर्तमानस्त्वम् अपां प्रपीनमूर्जस्वन्तमिमं स्रुग्लक्षणं स्तनं धय पिब । किं च– हे ^{v}अर्वन् । ऋगतौ । अस्य रूपम् अर्वा, गन्ता । तत्संबोधनम् हे अर्वन् । ^{v}शतधारं बहुविधघृतादिधारायुक्तं ^{v}उत्सं प्रस्रवणयुक्तं रसरूपं ^{v}जुषस्व सेवस्व । किंच– ^{v}समुद्रियं समुद्रसंबन्धि ^{v}सदनं गृहम् ^{v}आविशस्व । एवं संतृप्तः सन् स्वसदनं सेवस्वेत्यर्थः ॥१॥

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥२॥

---

1. B1 before इमं adds श्रीवेदव्यासाय नमः
2. H2-3 सो वृक्षिरस्तु, B1 सो वृष्टिरस्तु for सोऽप्यृषिरस्तु; H2-3 कामैः for क्रमैः
3. H2-3 गृहीतेनेद्दतं पर्यास्य चेद्याद्यभिधाया । सैषा वसुमती धाना यथा न क्षीरस्य वा सार्पिषो वैपमारम्य सैवेयमाज्यमाहुति हूयते यदेषां वसुमतीधारा तस्मादेषां वसोर्धारेत्याचक्षते । स आभेदं च म इदं च म अनेन च त्वा प्राणाम्यनेन च त्वाभि°; B1 °गृहीतिनोदुम्बर्योस्तुवेताध्यमोधयाह । सैषा वाचसुमपीधारमावा क्षीरस्य वो सर्पिहंसोषो चैवमारोरुत्पासेनेयमाज्याहुतिर्हूयते न ह्येषा वसुमयी धारा तस्मादिमां वसोर्द्धारेत्याचक्षते । समाहेदं च मो इदं च । मयि त्येन च त्वा पीध्याम्यनेन व तेन च त्वाभि° for गृहीतेनौदुम्वर्या ... प्रीणाम्यनेन च त्वाभि° (L 1)
7. B1 om. यज्ञस्तुतिश्च
9. H2-3 om. इमं स्तनमिति
16. H2-3 त्वं सदनं for स्वसदनं

घृतम् । मिमिक्षे । घृतम् । अस्य । योनिः ।
घृते । श्रितः । घृतम् । ऊँ इत्यूँ । अस्य । धाम ।
अनुष्वधम् । अनुस्वधमित्यनुऽस्वधम् । आ । वह । मादयस्व ।
स्वाहाकृतमिति स्वाहाऽकृतम् । वृषभ । वक्षि । हव्यम् ॥ ढों ॥२॥

सा– अथ द्वितीयः – ' घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम । अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ' इति । अस्य अग्नेर्मुखे vघृतं दीप्तमाज्यं vमिमिक्षे यज्ञार्थं सिञ्चामि । मिह सेचने । यतः vअस्य अग्नेः vघृतं vयोनिः उत्पत्तिस्थानम् । घृतेन हि प्रवर्धते । अतः vघृते vश्रितः सेवमानः । तथा vघृतम् vउ । उशब्दोऽवधारणे । घृतमेव vअस्य vधाम स्थानं तेजस्करं वा । अतः सिञ्चामीति संबन्धः । ततः हे अग्ने, vअनुष्वधम् । स्वधेत्यन्ननाम । चरोर्द्विरभिघारणात् अन्नस्योपर्यधश्च घृतं वर्तते । अनुगतान्नं घृतम् vआवह स्वात्मानं देवान् वा प्रापय । तेन vमादयस्व हृष्टो भव । हे vवृषभ, अभिमतफलानां वर्षक अग्ने, स्वाहाकारेण हुतं vहव्यं हविः vवक्षि वह ॥२॥

आ– ' घृतं मिमिक्षे ' इति । ऋषिर्गृत्समदः । मिह सेचने । योऽयमग्निस्तस्य श्रीभगवतोऽग्नेर्मुखे अहं vघृतं vमिमिक्षे घृतं सिञ्चामि । vअस्य अग्नेः vघृतं vयोनिः उत्पत्तिस्थानम् । vघृते vश्रितः च । अत्र व्यत्ययः । घृतं श्रितः । घृतमाश्रितस्त्वम् । यतस्त्वं घृतप्रियोऽसि । vघृतम् vउ एव vअस्य अग्नेर्घृतमेव vधाम अतिप्रियं स्थानम् । यद्वा– घृतमेव तेजः । vअनुष्वधम् vआवह । स्वधेत्यन्ननाम । अनुष्वधम् अन्वन्नम् । चरोर्द्विरभिघारणात् अन्नस्योपर्यधश्च घृतं वर्तते । अतो घृतपूतमन्नमावह स्वात्मानं देवान् वा प्रापय । vमादयस्व । मदी हर्षे । हृष्टो भव । ' स्वाहाकृतं वृषभ वक्षि हव्यम् ' । हे vवृषभ श्रेष्ठ, vस्वाहाकृतं स्वाहाकारेण कृतमभिहितं स्वाहाकारान्वितं vहव्यं हविः श्रेष्ठम् उत्तमं हविस्त्वं vवक्षि वहसि ॥२॥

समुद्रादूर्मिर्मधुमाँ२ उदारदुपाꣳशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥३॥

5. S2 after द्वितीयः adds गृत्समदऋषिः
7. M2 after सेचने adds धातुः
8. S2 M2 सर्वव्यत्ययः घृतं श्रितः, M2 घृतमिश्रितं सेवमानोऽसि for श्रितः सेवमानः
11. S2 M2 उत्कृष्टाभिमत° for अभिमत°
13. H2–3 om. भगवतो ... घृतमु [L 15]
15. B1 घृतं तु for घृतमु
16. H2–3 B1 अन्नम् for अन्वन्नम्; H2–3 °घारणम् for °घारणात्
17. B1 H2–3 अन्नम् for (अन्नस्य)

समुद्रात् । ऊर्मिः । मधुमानिति मधुऽमान् । उत् । आरत् ।
उप । अंशुना । सम् । अमृतत्वमित्यमृतऽत्वम् । आनट् ।
घृतस्य । नाम । गुह्यम् । यत् । अस्ति ।
जिह्वा । देवानाम् । अमृतस्य । नाभिः ॥ ढयैं ॥३॥

सा- अथ तृतीयः – ' समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ' इति । समुद्रात्, समुद्रतो भवतीति वा संमोदन्तेऽस्मिन् यजमाना इति वा समुद्रोऽग्निः पार्थिवः । अथवा समुद्रवन्त्यापोऽस्मादिति व्युत्पत्त्या वैद्युतोऽग्निः समुद्रः । तस्मात् ऊर्मिः उपर्युपर्युद्भूतः मधुमान् माधुर्योपेतफलसमूहः उदारत् उद्गच्छति । अथवा वैद्युतादूर्म्युत्पादको रस उद्भूतः । अथवा समुद्रात् समुद्रवणसाधनादादित्यात् ऊर्मी रस उदकलक्षण उदारत् । " आदित्याज्जायते वृष्टिः " इति श्रुतेः । यद्वा– समुद्रादुक्तव्युत्पत्त्या अन्तरिक्षादूर्मिरुदकमुदारत् । अथवा समुद्रादुक्तलक्षणात् गवामूधसः सकाशात् ऊर्मिरुज्ज्वलः क्षीररसः । एतत् घृतपक्षेऽपि समानम् । यद्यपि घृतं क्षीराज्जायते तथापि तस्योधस उत्पत्तेरेवमुपचर्यते । शिष्टं वाक्यमन्यादिपञ्चसु पक्षेष्वपि समानम् । अंशुना दीप्त्यंशेन वा अमृतत्वं मोक्षम् उपसमानट् । उपेति पूरणः । प्राप्नोति नरः । घृतस्य दीप्तस्य क्षीरद्रव्यरूपस्य वा गुह्यं नाम गोपनीयं नमनसाधनं यत् अस्ति तद् ब्रवीमि । तत् देवानां जिह्वा आस्वादकजिह्वास्थानीयं भवति । तदेव अमृतस्य नाभिः वर्धकं भवति । तदुभयं घृतस्य नामेत्यर्थः । एवं सर्वमन्त्रेषु तत्तत्पक्षानुसारेण योज्यम् ॥३॥

---

5. P1 after तृतीयः adds वामदेव ऋषिः

6. M2 अस्मात् for अस्मिन्

7. S2 M2 before वैद्युतो° add देवो

10. P1 om. उदकम्

11. P1 गव्यूधसः, S2 M2 द्रव्यमूधसः for गवामूधसः

13. M2 P1 क्षमाम् for मोक्षम् P1 उपैति पूर्णः for उपेति पूरणः;

14. P1 M2 क्षरद्रसस्य रूपस्य for क्षीरद्रव्यरूपस्य

15. P1 M2 स्तावकजिह्वास्थानीयो for आस्वादकजिह्वास्थानीयं

16. P1 after योज्यम् adds समुद्रसमाद्गोरूधसः सकाशादूर्मिरिव बहुलो यो गोराशिरुदारदुद्गच्छन्मधुररसोपेतः योंऽशुना जगत्प्राणभूतेनाग्निना आत्मैकदेशेन वा संगत्यामृतत्वममरधर्मित्वकमानट् प्राप्नोति । तस्य घृतस्य यद्गुह्यं नामास्ति तदहं वेद्मि । किं तदिति चेत्तदुच्यते । जिह्वा देवानामित्येकं नाम । अमृतस्य नाभिरित्यपरम् । घृतमत्यन्ताभिलाषविषयत्वात् देवानां जिह्वोत्थाननिमित्तम् । अग्नेर्जिह्वासीति यदा वा एतदग्नौ जुहृत्यथाग्नेर्जिह्वा इवोत्तिष्ठतीति श्रुतेः । अमृतस्यामरणधर्मित्वस्य नाभिः कारणं यो हि घृतमश्नाति स दीर्घायुर्भवतीति भाष्यान्तरम् ।

आ– ‘ समुद्रादूर्मिः ’ [इति] । वामदेव ऋषिः । अन्नाध्यासेन घृतमेव स्तूयते । प्राणाध्यासेन चाग्निः । [v]समुद्रात् घृतसमुद्रात् [v]ऊर्मिः महाघृतराशिः घृतकल्लोलः [v]मधुमान् मधुररसवान् [v]उदारत् । ऋ गतौ । उदागच्छत् । उद्गत्य च ‘ उपांशुना सममृतत्वमानट् ’ । [v]उप समुद्रसमीपे [v]अंशुना अंशुभिः घृतस्य सूक्ष्मावयवैः [v]अमृतत्वं [v]समानट् । णह बन्धने । उपसमानट् उपसंव्याप्नोतु । यद्वा– अंशुना प्राणेन जगत्प्राणभूतेनाग्निना च सम् एकीभूय अमृतत्वं मरणधर्मरहितत्वम् उपानट् । प्राणश्चान्नं चाग्निद्वारेणैकीभूय अमृतत्वं प्राप्नुत इत्यर्थः । ‘ घृतस्य नाम गुह्यं यदस्ति ’ । अस्य [v]घृतस्य यद् [v]गुह्यं गोप्यम् अविद्वद्भिरविज्ञातं [v]नाम [v]अस्ति श्रुतिमन्त्रपरिपठितं तदाह– ‘ जिह्वा देवानाम् ’ इति । [v]देवानाम् इन्द्रादीनां घृतं [v]जिह्वा । “ अग्नेः जिह्वासि ” इति श्रुतेः । यदा चैतदग्नौ घृतं जुह्वत्यथ जिह्वेव ज्वाला उत्तिष्ठतीति प्रसिद्धम् । किं च– ‘ अमृतस्य नाभिः ’ । [v]अमृतस्य अमरणधर्मित्वस्य [v]नाभिः नहनं बन्धनम् । अमृतत्वापादकमित्यर्थः ॥३॥

वयं नाम प्र ब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥४॥

वयम् । नाम । प्र । ब्रवाम । घृतस्य ।
अस्मिन् । यज्ञे । धारयाम । नमोभिरिति नमःऽभिः ।
उप । ब्रह्मा । शृणवत् । शस्यमानम् ।
चतुःशृङ्ग इति चतुःऽशृङ्गः । अवमीत् । गौरः । एतत् ॥ त्रैं ॥४॥

सा– अथ चतुर्थ – ‘ वयं नाम प्र ब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः । उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ’ इति । [v]वयं यजमानाः [v]घृतस्य [v]नाम [v]प्रब्रवाम स्तुमः । [v]अस्मिन् [v]यज्ञे [v]नमोभिः नमस्कारैर्हविर्भिः [v]धारयाम च । ‘ उप ब्रह्मा शृणवत् ’ । उपशृणोतु वैतत् स्तोत्रं [v]ब्रह्मा ऋत्विक् [v]शस्यमानं होत्रा । यथा [v]चतुःशृङ्गः यज्ञः । ऋत्विजोऽस्य शृङ्गाणि । [v]अवमीत् उद्गिरति । यज्ञपरिमाणाभिप्रायमेतत् । [v]गौरः गौरवर्णः । [v]एतत् घृतम् ॥४॥

---

6. B1 H2–3 अन्नं तु for अन्नं च

10. B1 यजति; H3 जिह्वति for जुह्वति; B1 तदा for अथ

20. P1 om. एतत्

याजमानमन्त्राः]

आ– ' वयं नाम प्र ब्रवाम ' इति। यतो घृतस्य नामोच्चारणमपि देवानां प्रियमतः [V]वयं [V]घृतस्य [V]नाम देवानां प्रियं नाम [V]प्रब्रवाम प्रकर्षेण उच्चारयाम। किं च– ' अस्मिन् यज्ञे धारयामा नमोभिः '। नम इत्यन्ननाम । [V]नमोभिः हविर्भिः सह वयम् ऋत्विग्यजमानाः धारयाम धृतवन्तः। किंच– ' उप ब्रह्मा शृणवच्छस्यमानम् '। [V]ब्रह्मा ऋत्विक् [V]शस्यमानं स्तूयमानं यत् घृतं तत् ब्रह्मा ऋत्विक् [V]उपशृणवत् उपशृणोतु। श्रुत्वा च [V]यज्ञे [V]अवमीत् उद्गिरति उच्चारयति। योऽयं यज्ञः [V]चतुःशृङ्गः, चत्वारि शृङ्गाणि यस्य सः चतुःशृङ्गो यज्ञः। [V]गौरः वैदिकत्वेन शुद्धः। तस्मिन् यज्ञे यस्य शस्यमानम् [V]एतत् घृतं शृणवदिति संबन्धः ॥४॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ३ आ विवेश ॥५॥

चत्वारि । शृङ्गा । त्रयः । अस्य । पादाः ।
द्वे इति द्वे । शीर्षे इति शीर्षे । सप्त । हस्तासः । अस्य ।
त्रिधा । बद्धः । वृषभः । रोरवीति ।
महः । देवः । मर्त्यान् । आ । विवेश ॥ ढयौं ॥५॥

सा– अथ पञ्चमः – ' चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ३ आ विवेश ' इति। ' चतुःशृङ्गोऽवमीत् ' इत्युक्त्वा अधुना चतुःशृङ्गं यज्ञं वृषभशब्दवाच्यं वृषं वा प्रतिपादयितुमाह– [V]अस्य यज्ञस्य [V]चत्वारि शृङ्गाणि ब्रह्मोद्गातृहोत्रध्वर्य्वाख्यानि । [V]त्रयः [V]पादाः ऋग्यजुःसामलक्षणाः । [V]द्वे [V]शीर्षे हविर्धानप्रवर्ग्याख्ये । [V]सप्त होतारो हस्ता इव व्याप्रियन्ते । यश्च [V]त्रिधा [V]बद्धः त्रिप्रकारं प्रातःसवनमाध्यंदिनसवनतृतीयसवनैः बद्धः। [V]वृषभः वर्षिता [V]रोरवीति । रु शब्दे। अत्यन्तं शब्दं करोति। सोऽयं [V]महः [V]देवः महान् देवः ब्रह्मादिस्तम्बपर्यन्तानां प्राणिनामुपजीव्यः। ज्ञानकर्मसमुच्चयकारिणां विदुषां शरीरभूतः सन् [V]मर्त्यान् मनुष्यान् [V]आ [V]विवेश आविशति। अयमेकोऽर्थः ।

---

1. H2–3 ततो for अतः
3. B1 सहत्सतां वयं, H2–3 सह घृताद्वयम् for सह वयम्
5. B1 om. ब्रह्मा ऋत्विक् ... उच्चारयति (L 6)
15. P1 after पञ्चमः adds पूर्ववत्
17. M2 यस्य for अस्य
20. P1 M2 वर्षयिता for वर्षिता

यद्वा– चत्वारो वेदाः शृङ्गाणि । सवनानि त्रीणि पादाः । प्रायणीयोदयनीये द्वे शीर्षे । सप्त छन्दांसि हस्ताः । त्रिधा मन्त्रब्राह्मणकल्पैर्बद्धः । वृषभः वर्षिता कर्मफलानां वर्षकर्ता रोरवीति अत्यन्तं शब्दं करोति । सवनक्रमेण सोऽयं महः महता प्रकाशेन युक्तः देवः । दीव्यतीति देवः । समस्तयज्ञाद्युपलक्ष्यो हिरण्यगर्भः मर्त्यान् मरणधर्मयुक्तान् सर्वप्राणिनः आविवेश । अपेक्षितपुरुषार्थतत्साधनस्वरूपप्रकाशनायाविशतीत्यर्थः । अथवा शब्दग्रामोऽभिधेयः । चत्वारि शृङ्गाणि नामाख्यातोपसर्गनिपाताः । त्रयः पादाः प्रथमपुरुषमध्यमपुरुषोत्तमपुरुषाः । द्वे शीर्षे सुबन्ततिङन्तलक्षणे । कार्यताव्यङ्ग्यते वा । सप्त विभक्तयो हस्ताः । त्रिधा बद्धः । एकवचनद्विवचनबहुवचनैर्बद्धः । वृषभ इवायं मदर्थादन्यानि शास्त्राणि अधःपदीकृत्य रोरवीति । य उक्तगुणः सोऽयं महान् देवः मर्त्यान् आविशति प्रतिपादयति ॥५॥

आ– चतुशृङ्ग इत्युपक्रान्तं विस्तरेणोपपादयति । ‘ चत्वारि शृङ्गाः ’ इति । यज्ञपुरुषः । [V]चत्वारि [V]शृङ्गा ब्रह्मोद्गातृहोत्रध्वर्य्वाख्यानि चत्वारि शृङ्गाणि यस्य शृङ्गत्वेन कल्पितानि । [V]त्रयः वेदाः ऋग्यजुःसामाख्याः [V]अस्य [V]पादाः । [V]द्वे [V]शीर्षे हविर्धानप्रवर्ग्ये यस्य । [V]अस्य [V]सप्त [V]हस्तासः । सप्त होत्रा यस्यास्य हस्ता इव व्याप्रियन्ते । यद्वा– सप्त छन्दांसि हस्ता इव यस्यास्य कल्पिता[नि] । [V]त्रिधा [V]बद्धः यः त्रिप्रकारेण बद्धः प्रातःसवनमाध्यंदिनतृतीयसवनैर्बद्धो यः [V]वृषभः [V]वर्षिता कर्मकलादिभिः वर्षणकर्ता [V]रोरवीति अत्यन्तं शब्दं करोति सवनक्रमेण । सोऽयं [V]महः [V]देवः महता प्रकाशेन युक्तः अतितेजोरूपो देवः । दीव्यत इति देवः समस्तयज्ञाद्युपलक्ष्यो हिरण्यगर्भ आब्रह्मस्तम्बपर्यन्तानां प्राणिनामुपजीव्यो देवः [V]मर्त्यान् मनुष्यान् । यद्वा– मर्त्यान् मरणधर्मयुक्तान् सर्वप्राणिनः [V]आविवेश आविशति । मनुष्याणां स्वापेक्षितपुरुषार्थतत्साधनस्वरूपप्रकाशनायाविशतीत्यर्थः । अथवा शब्दग्रामोऽभिधेयः । नामाख्यातोपसर्गनिपाताश्चत्वारि शृङ्गाणि । प्रथमपुरुषमध्यमपुरुषोत्तमपुरुषाः अस्य त्रयः पादाः । नामाख्याते अस्य द्वे शीर्षे । सप्त विभक्तयः सप्त हस्ताः यस्य । एकवचनद्विवचनत्रिवचनैः त्रिधा बद्धः । वृषभ इव गर्जन् अन्यानि शास्त्राणि अधःपदीकृत्य [V]रोरवीति इति य उक्तः सोऽयं महः देवः मर्त्यानाविवेश मनुष्याणां सम्यक् पदपदार्थशक्तिवाक्यतात्पर्याभिज्ञप्त्यै इति ॥५॥

2. P1 M2 om. वृषभो ... अथवा [L, 5]; M2 वर्षयिता for वर्षिता

6. P1 निपातलक्षणानि for निपाताः, P1 पुरुषलक्षणाः for °पुरुषाः; M2 trans. त्रयः पादाः after °पुरुषाः, S2 M2 नामाख्याते for सुबन्ततिङन्तलक्षणे

7. M2 S2 om. कार्यता व्यङ्ग्यते वा; P1 M2 वचनानि for वचनैर्बद्धः

12. H3 om. ऋग्यजुः ... कल्पितानि [L, 14]

15. B1 वर्षे° for वर्षण°

18. B1 om. मनुष्याणां

19. B1 उपेक्षित° for स्वापेक्षित°; H2-3 before अथवा add अस्ताशब्दः प्रकारोऽभिधेयः

22. B1 गर्जनं तानि for गर्जन् अन्यानि

त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः ॥६॥

त्रिधा । हितम् । पणिभिरिति पणिऽभिः । गुह्यमानम् ।
गवि । देवासः । घृतम् । अनु । अविन्दन् ।
इन्द्रः । एकम् । सूर्यः । एकम् । जजान ।
वेनात् । एकम् । स्वधया । निः । ततक्षुः ॥ क्न्यौं ॥६॥

सा– अथ षष्ठः – ' त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् । इन्द्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः ' इति । यज्ञपरिमाणभूतं यथा घृतं तथाऽऽह– त्रिधा हितं निहितं स्थापितमेषु लोकेषु । पणिभिः असुरैः गुह्यमानं गुप्यमानं गवि [देवासः] देवाः घृतम् अन्वविन्दन् आनुपूर्व्याल्लब्धवन्तः । यत् तस्य घृतस्य इन्द्रः एकं भागं जजान जनयति । " ते वा एते आहुती हुते उत्क्रामतस्ते अन्तरिक्षमाविशतः" (शब्रा ११.६.२.६) इत्यादिश्रुतिरिन्द्रस्य जनकत्वं दर्शयति । सूर्यः एकं भागं जनयति। " ते तत उत्क्रामतस्ते दिवमाविशतः " (शब्रा ११.६.२.६-७) इत्यादिश्रुतिः सूर्यस्य जनकत्वं दर्शयति । वेनात् अग्नेर्यज्ञसाधनभूतात् एकं भागं स्वधया अन्नेन आहुतिपरिणामभूतेन निष्टतक्षुः निःकर्षितवन्तो द्विजातयः । " यस्ततः पुत्रो जायते स लोकप्रत्युत्थायी " इत्येतदुक्तं भवति ॥६॥

आ– ' त्रिधा हितम् ' इति । यज्ञपरिमाणभूतं यथा भवति तथा त्रिधा त्रिप्रकारेण हितं निहितं स्थापितमेषु लोकेषु पणिभिः असुरैः गुह्यमानं । गुहू संवरणे । गोप्यमानम् । ' गवि देवासो घृतमन्वविन्दन् ' । देवासः देवाः गवि गोषु क्षीरादिरूपेण स्थितं यत् घृतम् अन्वविन्दन् पारंपर्यक्रमेण लब्धवन्तः । तस्य घृतस्य एकं भागम् इन्द्रः देवः जजान जनयति । " ते वा एते आहुती हुते उत्क्रामतस्ते अन्तरिक्षमाविशतः "

---

8. M2 तथा हि for तथाऽऽह
9. S2 after घृतम् ins. हि
11. M2 श्रुतेः for श्रुतिः
12. S2 ये ते, P1 ते तत्ते for ते ततः
14. P1 M2 यतः for यः, P1 लोकः for लोक°
17. H2 om. स्थापितम्
18. H2–3 भूतं for घृतं
19. H3 बन्धनं for लब्धवन्तः

(शब्रा ११.६.२.६) इत्यादिश्रुतिरिन्द्रस्य जनकत्वं दर्शयति। [v]सूर्य [v]एकं भागं [v]जजान। "ते तत उत्क्रामतस्ते दिवमाविशतः" (शब्रा ११.६.२.६-७) इत्यादिका श्रुतिः सूर्यस्य जनकत्वं दर्शयति। 'वेनादेकम्'। [v]वेनात् अग्नेः [v]एकं भागं देवो जजान। यज्ञसाधनभूतमेकं भागं [v]स्वधया अन्नेन आहुतिलक्षणेन [v]निष्टतक्षुः अभिनिष्कर्षितवन्तः द्विजातयः। एतद्दर्शयति "यस्ततः पुत्रो जायते स लोकप्रत्युत्थायी" इत्यादिका श्रुतिः। एवंरूपेण घृतं स्तूयते ॥६॥

एता अर्षन्ति हृद्यात् समुद्राच्छतव्रजा रिपुणा नावचक्षे।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥
सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः।
एते अर्षन्त्यूर्मयो घृतस्य मृगाइव क्षिपणोरीषमाणाः ॥७॥

एताः। अर्षन्ति। हृद्यात्। समुद्रात्।
शतव्रजा इति शतऽव्रजाः। रिपुणा। न। अवचक्ष इत्यवऽचक्षे।
घृतस्य। धाराः। अभि। चाकशीमि। हिरण्ययः। वेतसः। मध्ये। आसाम् ॥
एते। अर्षन्ति। ऊर्मयः। घृतस्य।
मृगाइवेति मृगाःऽइव। क्षिपणोः। ईषमाणाः ॥ द्वीः ॥७॥

सा- अथ सप्तमः - 'एता अर्षन्ति हृद्यात् समुद्राच्छतव्रजा रिपुणा नावचक्षे। घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम्। सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः। एते अर्षन्त्यूर्मयो घृतस्य मृगाइव क्षिपणोरीषमाणाः' इति। या [v]एताः ऊर्मयः वाचः [v]अर्षन्ति उद्गच्छन्ति [v]हृद्यात् हृदयरूपात् [v]समुद्रात् श्रद्धोदकप्लुतात् देवतायाथात्म्यचिन्तनसंतानगर्भात् निगमनिरुक्तनिघण्टुव्याकरणशिक्षाछन्दोभिः परिपावनस्थानीयैः परिपूतात् [v]शतव्रजाः बहुगतयो बह्वर्थाः। याश्चैता अर्षन्त्यः [v]रिपुणा कुतार्किकशत्रुसंघेन [v]न [v]अवचक्षे नापवदितुं शक्यन्ते। ताः [v]घृतस्य एव [v]धाराः देवानां तृप्तिकराः [v]अभिचाकशीमि अहमभिपश्यामि अवगच्छामि वा। [v]हिरण्ययः च हिरण्मयः [v]वेतसः अग्निः [v]मध्ये [v]आसाम् वाग्व्यक्तीनां विद्यमानः, तं चाभिचाकशीमीति संबन्धः। अग्निर्हि वाचामधिष्ठात्री देवता। यद्वा- घृतस्य धारा एवोच्यन्ते। या एता अर्षन्ति स्रवन्ति हृद्यात् समुद्रात्।

1. H2-3 श्रुतेः for श्रुतिः
5. B1 यतः for यः; B1 H2-3 लोकः for लोक°; H2-3 श्रुतेः for श्रुतिः
18. S2 श्रद्धायुक्त देव° for श्रद्धोदकप्लुतात्
19. S2 °वचनस्थानैः येः for °पावनस्थानीयैः

हृदयेन हि संकल्प्य पश्चाद्यजते, अत एवमुच्यते । शतव्रजाः बहुगतयः । याश्चैता रिपुणा यज्ञपरिपन्थिना नावचक्षे न द्रष्टुं शक्यन्ते ताः घृतस्य धाराः पश्यामि । यश्चायं हिरण्ययः वेतसः अग्निराहवनीयो मध्ये आसां स्थितस्तं च पश्यामि । याथात्म्येनाहं द्रव्यं देवतां च पश्यामीत्यर्थः । याः [v]धेनाः वाचः [v]सम्यक् [v]स्रवन्ति । धेना इति वाङ्नाम । [v]सरितः [v]न नद्य इवानवच्छिन्नन्द्योदकाः । कीदृशाः ? [v]अन्तः व्यवस्थितेन [v]हृदा परिपावनस्थानीयेन [v]मनसा च [v]पूयमानाः विविच्यमानाः शब्ददोषेभ्यः । ता अग्निमेवं स्तुवन्तीति शेषः । ये च [v]एते [v]अर्षन्ति द्रवन्ति [v]ऊर्मयः धारासंघाताः [v]घृतस्य स्रुक्परिभ्रष्टाः [v]मृगाइव [v]क्षिपणोः व्याधात् [v]ईषमाणाः पलायमानाः । तेऽप्यग्निं तर्पयन्तीति शेषः । स्तुतयो द्रव्यं च अन्यर्थमेवेत्युक्तं भवति ॥७॥

आ– ' एता अर्षन्ति ' इति । यथा समुद्रादूर्मय उद्गच्छन्ति तथा ' हृद्यात् समुद्रात् ' । हृदि भवो हृद्यस्तस्मात् [v]हृद्यात् [v]समुद्रात् सच्चिदानन्दलक्षणशुद्धोदकभूतात् समुद्राद् याः [v]एताः वाचस्ताः [v]अर्षन्ति उद्गच्छन्ति इति । तथा हि– आत्मदेवतायाथात्म्यचिन्तनसंतानगभीरान्निगमनिरुक्तनिघण्टुव्याकरणशिक्षाछन्दोभिः परिषद्वचनस्थानीयैः परिपूताः [v]शतव्रजाः बहुधागतयो बह्वर्थाश्चैताः वाचः अर्षन्ति । ता एताः वाचः [v]रिपुणा शत्रुणा यज्ञपरिपन्थिना [v]न [v]अवचक्षे द्रष्टुमपि न शक्यन्ते, अन्यैः किमुत । अपि तु [v]घृतस्य [v]धाराः [v]अभिचाकशीमि पश्यामि । किंच– ' हिरण्ययो वेतसो मध्य आसाम् ' । यथा [v]हिरण्ययः [v]वेतसः अग्निः [v]आसां वाचां [v]मध्ये अवतिष्ठते तमग्निमहम् अभिचाकशीमि । वाचामधिष्ठातृदेवतात्मत्वेनाग्नेः प्रसिद्धेः ।

किंच ' सम्यक् स्रवन्ति ' । [v]सम्यक् साधु । [v]धेना इति वाङ्नाम । धेनाः वाचः साधु समीचीनं [v]स्रवन्ति । [v]सरितः [v]न गङ्गादिसरित इव अनवच्छिन्नसंततप्रवाहरूपेण प्रधावन्ति । ' अन्तर्हृदा मनसा पूयमानाः । [v]अन्तः व्यवस्थितेन हृदयेन परिपचनस्थानीयेन तत्स्थेन [v]मनसा च (ता ?)नान्तःकरणेन [v]पूयमानाः शब्ददोषेभ्यो विविच्य शुद्धिं प्राप्यमाणाः ताः वाचः श्रीभगवन्तमेवाग्निं स्तुवन्तीति शेषः । किंच– ' एते अर्षन्त्यूर्मयो घृतस्य ' । [v]एते [v]घृतस्य [v]ऊर्मयः संघाताः घृतकल्लोलाः [v]अर्षन्ति उद्गच्छन्ति । [v]मृगाइव, यथा स्ववृन्दाद्भ्रष्टा

---

9. B1 om. तथा । हृद्यात् ... उद्गच्छन्ति (L 11)

11. H2–3 यथार्थवित्तनचित्त°, B1 याद्यात्मा चित्तमवित्तं for याथात्म्यचिन्तन°

14. B1 तत् for तु

15. H2–3 after second आसां add यासां

16. H2–3 after °चाकशीमि ins. इति; B1 ताम् for वाचाम्

19. B1 om. परिपचनस्थानीयेन

20. B1 चाक्षितान्तःकारण, H2–3 वक्षितान्तःकरणे for (ता ?) नान्तः करणेन; H3 इद्धिः, H2 शुद्धिः, B1 श्रुद्धि for शुद्धिं

मृगाः [v]क्षिपणोः क्षेपणनिमित्तात् । ईष गतिहिंसादर्शनेषु । [v]ईषमाणाः च, वृद्धान् मृगान् प्रति ईषमाणाः पलायमानाः दृश्यन्ते । एवमेते उद्गताः घृतस्य ऊर्मयोऽपि अग्निमेव प्रापयन्तीति शेषः ॥७॥

सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥८॥

सिन्धोरिवेति सिन्धोःऽइव । प्राध्वन इति प्रऽअध्वने । शूघनासः ।
वातप्रमिय इति वातऽप्रमियः । पतयन्ति । यह्वाः ।
घृतस्य । धाराः । अरुषः । न । वाजी । काष्ठाः । भिन्दन् ।
ऊर्मिभिरित्यूर्मिऽभिः । पिन्वमानः ॥ ध्रुं ॥८॥

सा– अथाष्टमः – ' सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः । घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ' इति । या एताः [v]सिन्धोः नद्याः [v]इव [v]प्राध्वने । प्रगतोऽध्वा प्राध्वा महोदकप्रपातस्तस्मिन् । [v]शूघनासः । शू इति क्षिप्रनाम । हन्तेर्गत्यर्थस्य घनः । क्षिप्रगमनाः । [v]वातप्रमियः । मीञ् हिंसायाम् । वातेन याः प्रमीयन्ते विनश्यन्ति ताः वातप्रमियः तरङ्गवीच्यः । [v]पतयन्ति । स्वार्थे णिच् । प्रपतन्ति । [v]यह्वाः महत्यः । स्रुचो मुखाद् भ्रष्टाः [v]घृतस्य [v]धाराः । ताश्च प्रपतन्तीरश्नात्यग्निः । क इवेत्यत आह– ' अरुषो न वाजी ' । नकार उपमार्थीयः । यथा [v]अरुषः अरोचनः [v]वाजी जात्यादिभिरुत्कृष्टो वेगवानश्वः । पुनरप्यश्वं विशिनष्टि । [v]काष्ठाः [v]भिन्दन् आज्यन्तान् विदारयन् । [v]ऊर्मिभिः काष्ठाभेदेनोत्थश्रमस्वेदोदकैः [v]पिन्वमानः भूमिं सिञ्चन् अन्नान्यश्नाति, एवमग्निरप्यश्नातीत्यर्थः ॥८॥

आ– ' सिन्धोरिव प्राध्वने ' इति । प्र प्रकृष्टः अध्वा मार्गः यस्य सिन्धोः स प्राध्वा । तस्मै [v]प्राध्वने । अत्र व्यत्ययः । प्राध्वनः महोदकप्रदातुः [v]सिन्धोः सकाशात् । नद्याः [v]इव [v]शूघनासः । शू इति क्षिप्रनाम । हन्तेर्गत्यर्थस्य घना इति भवति । क्षिप्रगमनाः शूघनासः । [v]वातप्रमियः । मीञ् हिंसायाम् । वातेन याः प्रमीयन्ते विनश्यन्ति ता वातप्रमियः । तरङ्गवीच्यः । [v]यह्वा इति महन्नाम । महत्यः सुमुखाः परिपुष्टा नद्य इव [v]घृतस्य [v]धाराः [v]पतयन्ति । स्वार्थे णिच् । प्रपतन्ति । ताश्च पतन्तीर्घृतस्य धाराः अग्निरश्नातीति शेषः ।

---

15. S2 M2 **उपमार्थः** for **उपमार्थीयः**

17. M2 **आज्ञान्तान्** for **आज्यन्तान्**; P1 after **आज्यन्तान्** ins. **संग्राममध्यानित्यर्थः**

क इवेत्यत आह– ' अरुषो न वाजी ' । न इत्युपमार्थीयः । जात्यादिभिरुत्कृष्ट जवः अश्वः वाजवान् वाजी अश्वः । काष्ठाः आद्यन्तप्रदेशान् विदारयन् ऊर्मिभिः श्रमयोगात् स्वेदोदकोर्मिभिः [—] पिन्वमानः । पिवि मिवि सेचने । भूमिं सिञ्चन् अश्नाति । एवमग्निरपि घृतस्य धाराः अश्नातीत्यर्थः॥८॥

अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥९॥

अभि । प्रवन्त । समनेवेति समनाऽइव । योषाः । कल्याण्यः । स्मयमानासः । अग्निम् ।
घृतस्य । धाराः । समिध इति सम्ऽइधः । नसन्त ।
ताः । जुषाणः । हर्यति । जातवेदा इति जातऽवेदाः ॥ ङ्रू ॥९॥

सा– अथ नवमः – अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम् । घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ' इति । घृतस्य धाराः अग्निम् अभि प्रवन्त अभिनमन्ति । का इव ? समनाः समानमनस्काः कल्याण्यः रूपयौवनसंपन्नाः स्मयमानाः । स्मिङ् ईषद्धसने । ईषद्धसमानाः योषाः यथा पतिमभि प्रह्वीभवन्ति । समिधः समिन्धनास्ता घृतधारा अग्निं नसन्त व्याप्नुवन्ति । नसतिराप्नोतिकर्मा । ताः च धाराः जुषाणः सेवमानः जातवेदाः हर्यति कामयते । हर्यतिः प्रेप्साकर्मा । नाऽस्य ग्रहणशक्तिपरिहाणमस्तीति भावः ॥९॥

आ– ' अभि प्रवन्त ' इति । घृतस्य धाराः अग्निम् अभि प्रवन्त आग्निमभिनमन्ति प्रह्वीभवन्ति । कथमिव ? ' समनेव योषाः ' । समानवयस्थाः योषाः स्त्रिय इव, एकं भर्तारं प्रति संमनसः कल्याण्यः रूपयौवनसंपन्नाः स्मयमानासः अहं(?)कुर्वाणा भर्तारमभिप्रवन्त (? न्ते) यथा, तथा घृतस्य धाराः समिधः समिन्धनाः इत्थंभूताः अग्निमभि प्रह्वीभवन्ति । अतस्तमेवाग्निं

1. B1 °ज्वरः for जवः; H2–3 अष्टजवः अर्षं° for अरुषः; B1 अर्षः चाक्षवान् । चाक्षवान् चक्षः for अरुषो वाजवान् वाजी [L 2]
2. B1 after ऊर्मिभिः ins. मितं; H2–3 मिदं
3. B1 H2–3 पिन्व मिन्व for पिवि मिवि
10. P1 प्लवन्त for प्रवन्त
13. M2 adds एव before घृत°
15. S2 M2 प्रसाद° for प्रेप्सा°
16. B1 प्लवान्ति, H2–3 प्लवन्ते for °प्रवन्त; [आ reads प्लवन्त in place of प्रवन्त]
19. H2–3 ताः for तथा

^{v}नसन्त । नसतिराप्नोतिकर्मा । अग्निमेवाप्नुवन्ति । ^{v}ताः ^{v}जुषाणः सेवमानः ^{v}जातवेदाः । जातं जातं वेत्तीति वेदयतीति वा जातवेदाः सर्वज्ञोऽग्निः । हर्यतिः प्रेप्साकर्मा । प्रेप्सति घृतस्य धाराः प्रकामयते ॥९॥

कन्याइव वहतुमेतवा उं अञ्ज्यञ्जाना अभि चाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत् पवन्ते ॥१०॥

कन्याइवेति कन्याःऽइव । वहतुम् । एतवै । ऊं इत्यूं ।
अञ्जि । अञ्जानाः । अभि । चाकशीमि ।
यत्र । सोमः । सूयते । यत्र । यज्ञः ।
घृतस्य । धाराः । अभि । तत् । पवन्ते ॥ ओं ॥१०॥

सा– अथ दशमः – ' कन्याइव वहतुमेतवा उ अञ्ज्यञ्जाना अभिचाकशीमि । यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत् पवन्ते ' इति । ^{v}कन्याइव या एताः कन्याः नवपरिणीतास्ता इव ^{v}वहतुं वोढारं भर्तारं प्रति ^{v}एतवै एतुं गमनाय । उकारोऽनर्थकः । ^{v}अञ्जि प्रजननम् ^{v}अञ्जानाः व्यक्तं कुर्वाणाः योग्यं कुर्वन्तीः ^{v}अभिचाकशीमि अभिपश्यामि । ताः ^{v}घृतस्य ^{v}धाराः ^{v}यत्र सोमयागे ^{v}सोमः ^{v}सूयते अभिषूयते, ^{v}यत्र सौत्रामण्याख्यः ^{v}यज्ञः तायते । ' अभि तत् पवन्ते ' । ^{v}तत् तत्र तत्रेत्यर्थः । ^{v}अभिपवन्ते अभिगच्छन्ति । यज्ञसहचरिताः घृतस्य धाराः इत्यभिप्रायः ॥१०॥

आ– ' कन्याइव वहतुम् ' इति । या घृतस्य धाराः ताः ^{v}कन्याइव ^{v}अभिचाकशीमि इति संबन्धः । कथंभूताः कन्या इति । ^{v}वहतुं वोढारं भर्तारं प्रति ^{v}एतवै एतुम् आगमनाय । ^{v}अञ्जि प्रजननं प्रति ^{v}अन्तरङ्गम् ^{v}अञ्जानाः व्यक्तीकुर्वाणाः कन्याः प्रपन्नाः । ताः कन्याः घृतस्य धाराः अभिचाकशीमि अभिपश्यामि । ' यत्र सोमः सूयते ' ^{v}यत्र सौत्रामण्याख्ये यज्ञे ^{v}सोमः ^{v}सूयते अभिषूयते । ^{v}यत्र ^{v}यज्ञः वितायते तत्र तत्र ^{v}घृतस्य ^{v}धाराः ^{v}अभिपवन्ते अभिगच्छन्ति । सर्वत्र यज्ञसहचरिताः घृतस्य धारा इत्यभिप्रायः ॥१०॥

---

11. P1 ता घृतस्य धारा अभिचाकशीमि पश्यामि का इव । कन्या इव नवोढा इवा कीदृशी: कन्याः । बहतं वोढारं भर्तारं प्रति एतवै एतुं गन्तुं अञ्जि अञ्जनादिमङ्गलद्रव्यम् अञ्जानाः व्यक्तीकुर्वाणाः । for कन्या इव ... धाराः
16. H3 धाराकन्याः for ताः कन्याइव
17. H2–3 om. इति संबन्धः ... पश्यामि
20. H2–3 तान् for तत्र तत्र ।
21. B1 °प्लवन्ति for °प्रवन्ते

अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत् पवन्ते ॥११॥

अभि । अर्षत । सुष्टुतिम् । सुस्तुतिमिति सुऽस्तुतिम् । गव्यम् । आजिम् ।
अस्मासु । भद्रा । द्रविणानि । धत्त ।
इमम् । यज्ञम् । नयत । देवता । नः ।
घृतस्य । धाराः । मधुमदिति मधुऽमत् । पवन्ते ॥ छौं ॥११॥

सा- अथैकादशः – 'अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त । इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत् पवन्ते' इति । हे देवाः, अभ्यर्षत अभ्यागच्छत । एतां सुष्टुतिं शोभनां स्तुतिम्, एतं च 'गव्यमाजिम्' गोविकारैर्घृतैर्जनितं, गव्यम्, आजिम् आजयनं यज्ञम् अभ्यागच्छत । अभ्यागत्य च अस्मासु भद्रा भद्राणि द्रविणानि धनानि धत्त स्थापयत अस्मभ्यं दत्तेत्यर्थः । किंच– इमं यज्ञं तत्र नयत यत्र देवता देवत्वं नः अस्माकम् । अस्माभिर्यो देवलोको जित इत्यर्थः। याश्चैताः घृतस्य धाराः मधुमत् पवन्ते मधुसंयुक्तं पवन्ते द्रवन्ति ताश्च अस्मज्जितं लोकं नयतेत्यनुवर्तते ॥११॥

आ– 'अभ्यर्षत सुष्टुतिम्' इति । हे देवताः हे देवाः, सुष्टुतिं शोभनस्तुतिं घृतस्तोत्रं प्रति अभ्यर्षत अभ्यागच्छत । 'गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त' । हे देवाः, अभ्यागत्य च आजिं गव्यं गोविकारैर्घृतैः जनितं गव्यं घृतसूक्ष्मरूपं पुण्यात्मकम् आजिम् अस्मासु यजमानेषु धत्त स्थापयत । किं च– भद्रा भद्राणि द्रविणानि धनानि च अस्मासु धत्त स्थापयत । इमं क्रियमाणं यज्ञं नयत फलपर्यन्तं प्रापयत । एवं घृतस्य धाराः मधुमत् मधुमत्यः स्वादुरसवत्यः पवन्ते अग्निं प्रति गच्छन्तु ॥११॥

धामन् ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥१२॥१॥

9. S2 M2 om. आजयनं
11. S2 M2 देहि for दत्त
14. आ wrongly takes देवता as a vocative and also converts it into plural caring little for accentography and padapāṭha.
15. B1 घृतस्य for घृत°
17. H2–3 om. यजमानेषु
19. H2–3 om. अग्निं

धामन् । ते । विश्वम् । भुवनम् । अधि । श्रितम् ।
अन्तरित्यन्तः । समुद्रे । हृदि । अन्तः । आयुषि ।
अपाम् । अनीके । समिथ इति सम्ऽइथे । यः । आभृत इत्याऽभृतः ।
तम् । अश्याम । मधुमन्तमिति मधुऽमन्तम् । ते । ऊर्मिम् ॥ ध्याः ॥१२॥१॥

सा– अथ द्वादशः – ' धामन् ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि । अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिः ' इति । आहुतिपरिणामभूतमिदं जगद् ब्रह्मादिस्तम्बपर्यन्तं मन्यमान आह– ^{v}धामन् धाम्नि विभूत्यां ^{v}ते तव ^{v}विश्वं सर्वं ^{v}भुवनं भूतजातम् ^{v}अधि ^{v}श्रितं स्थितम् । यच्च ^{v}अन्तः ^{v}समुद्रे समुद्रस्य मध्ये अस्ति किंचित्, यच्च ^{v}हृदि ^{v}अन्तः किंचित्, यच्च ^{v}आयुषि अन्तः किंचित्, तदपि धामनि तव अधिश्रितमित्यनुवर्तते । यत एवमतस्त्वां ब्रवीमि । ^{v}अपाम् ^{v}अनीके मुखे वर्तमानः ^{v}यः ऊर्मिः ^{v}आभृतः आहृतः ^{v}समिथे संग्रामे च पणिभिः सह वर्तमानः यः ऊर्मिः आहृतः । तदुक्तम्– " त्रिधा हितं पणिभिर्गुह्यमानम् " (ऋसं ४.५८.४) इति । ^{v}तम् ^{v}अश्याम भक्षयाम व्याप्नुयामेति वा । ^{v}मधुमन्तं रसवन्तं ^{v}ते तव संबन्धिनम् ^{v}ऊर्मिम् । [हे] घृत, हविःपरिणामिनो रसस्य भोक्तारो वयं भवेमेति वा । देवत्वं प्राप्नुयामेति वक्रोक्त्या प्रार्थ्यते ॥१२॥

[इत्येकोनविंशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

आ– ' धामन् ते ' इति । ^{v}धामन् ^{v}ते तव धामनि । आहुतिपरिणामभूतमिदं जगत् आब्रह्मस्तम्बपर्यन्तं मन्यमान आह– ' धामन् ते ' इति । तव धामनि विभूत्यां ^{v}विश्वं ^{v}भुवनं सर्वभूतजातम् ^{v}अधि ^{v}श्रितम् अध्याश्रितं स्थितम् । ^{v}अन्तः ^{v}समुद्रे समुद्रस्य मध्ये यच्च किंच ^{v}हृदि ^{v}अन्तः ^{v}आयुषि जीवनहेतुभूतकाले तत् सर्वम् । ' तव धामनि ' इत्यनुवर्तते । यत एवम् अतस्त्वां ब्रवीमि– ' अपामनीके समिथे य आभृतस्तमश्याम ' इति । ^{v}अपाम् ^{v}अनीके मुखे वर्तमाने ^{v}समिथे संग्रामे पणिभिः सह वर्तमानः ^{v}यः उर्मिः ^{v}आभृतः आहृतः । यदुक्तम्– " त्रिधा हितं पणिभिर्गुह्यमानम् " (ऋसं ४.५८.४) इति च । ^{v}ते ^{v}मधुमन्तं मधुरसवन्तम् ^{v}ऊर्मिं हविषः परिणामरूपं यजमानाः वयम् ^{v}अश्याम । अशू व्याप्तौ । अश भोजने वा । अश्याम व्याप्नुयाम । भक्षयाम चेति । एवं प्रार्थनामुखेनापि घृतमेव स्तूयत इति ॥१२॥

---

7. S2 om. स्थितम्
13. S2 M2 om. प्राप्नुयामेति
15. B1 H2–3 धामानि for धामनि
16. B1 om. धामनि; H3 धामानि for धामनि ।
20. B1 H2-3 वर्तमाने for वर्तमानः
23. H3 भक्षयामः for भक्षया म; B1 om. च

[अथ द्वितीयोऽनुवाकः ।]

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे ।
धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे ।
श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥१॥
प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे ।
चित्तं च म आधीतं च मे वाक् च मे मनश्च मे ।
चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च मे यज्ञेन कल्पन्ताम् ॥२॥
ओजश्च मे सहश्च म आत्मा च मे तनूश्च मे ।
शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे ।
परूꣳषि च मे शरीराणि च म आयुश्च मे
जरा च मे यज्ञेन कल्पन्ताम् ॥३॥
ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मे ।
अमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे
वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे ।
वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥४॥

वाजः । च । मे । प्रसव इति प्रऽसवः । प्रयतिरिति प्रऽयतिः । प्रसितिरिति प्रऽसितिः ।
धीतिः । क्रतुः । स्वरः । श्लोकः ।
श्रावः । श्रुतिः । ज्योतिः । स्वरिति स्वः । च । मे ।
यज्ञेन । कल्पन्ताम् ॥ थों ॥१॥
प्राणः । अपान इत्यपऽआनः । व्यान इति विऽआनः । असुः ।
चित्तम् । आधीतमित्याऽधीतम् । वाक् । मनः ।
चक्षुः । श्रोत्रम् । दक्षः । बलम् ॥ ट्रूं ॥२॥
ओजः । सहः । आत्मा । तनूः ।
शर्म । वर्म । अङ्गानि । अस्थीनि ।
परूꣳषि । शरीराणि । आयुः । जरा ॥ हिं ॥३॥

ज्यैष्ठ्यम् । आधिपत्यमित्याधिऽपत्यम् । मन्युः । भामः ।

अमः । अम्भः । जेमा । महिमा ।

वरिमा । प्रथिमा । वर्षिमा । द्राघिमा ।

वृद्धम् । वृद्धिः ॥ डुं ॥४॥

सा– प्रथमेऽनुवाके यजमानवाचितव्या मन्त्रा उक्ताः । 'वाजश्च' इत्यादिरनुवाकैः वसोर्धाराहोमार्था मन्त्रा उच्यन्ते ॥ कात्यायनः – "वसोर्धारां जुहोत्यौदुम्बर्या पञ्चगृहीतं संततं यजमानोऽरण्येऽनूच्येऽग्निप्रासे वाजश्च म इत्यष्टानुवाकेन हुत्वा" (काश्रौ १८.५.१) इति । 'वाजश्च मे' इत्यष्टभिरनुवाकैरौदुम्बर्या स्रुचा वसोर्धारां जुहुयात् । अत्र "अथैनमेतैः कामैरभ्यषिञ्चन्" इत्युपक्रम्य "एतया वसोर्धारयाऽऽज्येन पञ्चगृहीतेनौदुम्बर्या स्रुचा" इत्याद्युक्त्वा "तद्यदेषा वसुमयी धारा तस्मादेनां वसोर्धारा" इत्युक्त्वा "स आह इदं च म इदं च म इत्यनेन च त्वा प्रीणामि" (शब्रा ९.३.२.२-५) इत्यादिभिर्ब्राह्मणवाक्यैर्विनियोगपुरःसरं यथा व्याख्याता मन्त्राः तदनुसारेण व्याख्यायन्ते । तत्र द्वितीयानुवाकपाठः– 'वाजश्च मे प्रसवश्च ये प्रयतिश्च मे प्रसितिश्च मे । धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे । श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥१॥ प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसु च मे । चित्तं च म आधीतं च मे वाक् च मे मनश्च मे । चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च मे यज्ञेन कल्पन्ताम् ॥२॥ ओजश्च मे सहश्च म आत्मा च मे तनूश्च मे । शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे । परूंषि च मे शरीराणि च म आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥३॥ ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मे । अमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे । वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्' ॥४॥ [इति ।] ˇवाजः अन्नम् । चशब्दो वक्ष्यमाणद्रव्यापेक्षया समुच्चयार्थः । तदन्नं च ˇमे मह्यं देहि । ˇप्रसवः ˇच ˇमे । अन्नदानादि-

6. M2 om. वसोर्धारां ... इति

8. M2 अभिसंचरामि for अभ्यषिञ्चन्

11. P1 after °पाठः adds इत ऊर्ध्वं वसोर्धारकाणि यजूंषि सप्तविंशतिकण्डिकास्थानि बार्हदुक्थः प्रगाथो वा देवानामार्षम् ।

15. P1 before ओजश्च adds अनुष्टुप् प्रगाथः

18. P1 before वाजः° adds अस्यार्थः

19. P1 om. च शब्दः; P1 after °अपेक्षया adds चकारः; P1 after समुच्चयार्थः ins. वाजोऽन्नं मे देहि । तेनान्नेन हे अग्ने त्वां तर्पयामि अभिषिञ्चामि चैवं तदन्नं मे मम यज्ञेन संयुज्यन्तामित्येवं प्रसवश्च म इत्यादौ सर्वत्र द्रष्टव्यम् । तथा च श्रुतिः — स आहेदं च म इदं च म इत्यनेन च त्वा प्रीणाम्यनेन चानेन च त्वाभिषिञ्चामि अनेन चानेन चेत्येतदथो इदं च मे देहीदं च म इति सा यदैवैषा धाग्निं (!) प्राप्नुयादथैतद्यजुः प्रतिपद्यत एतद्वा एनं दैवा एतेनान्नेन प्रीत्वैतैः कामैरभिषिच्येतया वसोर्धारया अथैनमेतान् कामानयाचन्त । तेभ्य इष्टः प्रीतोऽभिषिक्त एतान् कामान् प्रायच्छत् तथैवैनमयमेतदेतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारया अथैनमेतान् कामान् याचते । तस्मा इष्टः प्रीतोऽभिषिक्त एतान् कामान् प्रयच्छति । द्वौ द्वौ कामौ संयुनक्त्यव्यवच्छेदाय । यथा व्योकसौ विविधगृहौ कुमारीकुमारौ संयोजयेद् । यथा संयुज्यात् । एवं यज्ञेन कल्पन्तामिति ।

विषयाभ्यनुज्ञानं दीयतां भुज्यतामित्येवंरूपं प्रसवं मे मह्यं देहि इति यजमानोऽग्नेः कामान् याचते। 'इदं च मे देहि' इति सर्वत्राध्याह्रियते। स च वाजः मे यज्ञेन कल्पतामनुष्ठीयमानेन यागेन। 'कल्पन्ताम्' इति कण्डिकान्तस्य पदस्य समुदायापेक्षया बहुवचनम्। स्ववाक्यस्थेन कल्पन्तामित्यनेनैवेति केचिद्वदन्तीति केचित्। प्रयतिः प्रकृष्टयतनम्। प्रयतिर्यत्नविशेषः। यती प्रयत्ने। षिञ् बन्धने। प्रकृष्टं बन्धनं प्रसितिः। धीतिः अन्नधारणम्। अथवा धीतिरात्मचिन्तनम्। ध्यै चिन्तायाम्। अस्य संप्रसारणादौ कृते धीतिरिति भवति। क्रतुः संकल्पः संस्कारो वा यज्ञो वा। स्वरः उदात्तादिलक्षणः। श्लोकः स्तुतिः। यद्वा- श्लोक्यत इति श्लोकः कीर्तिः। श्रावः श्रावयितृत्वसामर्थ्यम्। श्रुतिः वेदः। आदित्यात्मकं ज्योतिः। स्वः स्वर्गादिलोकः। एते यज्ञेन कल्पन्तां यज्ञेन अग्निं तर्पयन्तु अभिषिञ्चन्तु। "अनेन च त्वाऽभिषिञ्चाम्यनेन च" (शब्रा ९.३.२.५) इत्यस्याः श्रुतेरभिप्रायेण व्याख्या ॥१॥

प्राणः पञ्चवृत्तिकः प्राणः। प्राणापानौ मे देहि। मम देहस्थितौ कल्पेताम्। व्यानः अपानोदानयोः सं(ब)न्धिरूपो व्यानः सूपस्थितः कल्पताम्। असु नपुंसकान्तं पदम्। असु जीवः प्राणस्य जीवोपाधित्वात्। चित्तम् अन्तःकरणम् मनोजन्यं ज्ञानं वा। आधीतं स्वाध्यायः। वाक् वागिन्द्रियम्। मनः संकल्पात्मकं मनः। चक्षुः चक्षुरिन्द्रियम्। श्रोत्रं श्रवणसाधनमिन्द्रियम्। दक्षः दाक्ष्यं ज्ञानेन्द्रियगतं कौशल्यम् उत्साहो वा। बलं कर्मेन्द्रियगतं सामर्थ्यम्। एतानि यज्ञेन कल्पन्ताम्॥

ओजः बलहेतुरष्टमो धातुः। सहः वैरिविषयोऽभिलाषः। आत्मा शास्त्रसिद्धः परमात्मा। तनूः शोभनसंनिवेशं वपुः। यद्वा- तत्र विस्तृतान्यङ्गानि। शर्म सुखं शरणं गृहं वा। वर्म शरीररक्षकं कवचादि। अङ्गानि संपूर्णावयवाः। शरीरेषु चत्वारि त्रिंशतानि अस्थीनि प्रसिद्धानि। परूंषि अङ्गुल्यादिपर्वाणि। संध्यन्तरालान्यत्र शरीराणि। जीवशरीरयोरवस्थानकाल आयुः, जीवनं वा। जरा वपुषो वलितपलितत्वम्। एते पदार्था मदीयेन यज्ञेन कुशला भवन्तु। अनेन यज्ञेन आराधितः श्रीभगवान् यज्ञः अस्मभ्यमेवंविधानि फलानि ददात्वित्यर्थः ॥३॥

ज्यैष्ठ्यं प्रशस्ततमत्वम्। आधिपत्यं स्वामित्वम्। मन्युः कोपः। भामः पूज्यः प्रतापो वा। अमः च अस्मच्छत्रूणां भङ्गो रोगो वा। अम रोगे। अम्भः शैत्यमाधुर्योपेतं जलम्। जेमा जयसामर्थ्यम्। महिमा महत्त्वं, जयसंपादितधनादिसंपत्तिः। वरिमा वरणीयत्वं, गुरुतरत्वम्।

3. S2 S2 om. पदस्य

4. S2 M2 गमनं for °यतनं

5. S2 M2 om. धीतिरात्मचिन्तनम्

7. P1 गद्यपद्यबन्धः, S2 M2 श्रुतिः for स्तुतिः; S2 M2 यद्वा श्रावयति प्रख्यापयतीति श्रावः। देवतामन्त्रा वा श्रावः; M2 S2 प्रख्याप्यमानस्योदरेण श्रवणं श्रुतिः। ब्राह्मणं वा for श्रुतिः वेदः

8. M2 S2 ज्योतिः दीप्तिः for आदित्यात्मकं ज्योतिः; M2 S2 स्वर्गः for स्वर्गादिलोकः; M2 S2 after स्वर्गः add यद्वा आदित्यात्मकं ज्योतिः; P1 om. अभिषिञ्चन्तु

11. S2 M2 सुष्ठूप° for सूप°

19. P1 वलितत्त्वम् for वलितपलितत्वम्

23. P1 om. वरणीयत्वं

vप्रथिमा गृहक्षेत्रादिविस्तारः। vवर्षिमा पुत्रपौत्रादिशरीरवृद्धिः। vद्राघिमा पुत्रपौत्रादिसंपत्तिविषय-दीर्घत्वम्, अविच्छिन्ना संततिरित्यर्थः। दीर्घकालभोगैश्वर्यसंपत्तिर्वा। vवृद्धं धान्याद्यभिवृद्धिर्वा। vवृद्धिः देहस्याभिवृद्धिः। एते मे vयज्ञेन vकल्पन्ताम् ॥१॥

[इति एकोनविंशेऽध्याये द्वितीयोऽनुवाकः ॥२॥]

आ– " अथो इदं च मे देहीदं च म इति सा यदैवैषा धाराऽग्निं प्राप्नुयादथैतद्यजुः प्रतिपद्येत। एतद्वा एनं देवाः। एतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाऽथैनमेतान् कामानयाचन्त तेभ्य इष्टः प्रीतोऽभिषिक्त एतान् कामान् प्रायच्छत् तथैवैनमयमेतदेतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाऽथैनमेतान् कामान् याचते तस्मा इष्टः प्रीतोऽभिषिक्त एतान् कामान् प्रयच्छति। द्वौ द्वौ कामौ संयुनत्यक्त्यव्यवछेदाय " (शब्रा ९.३.२.६) एवमादिब्राह्मणवाक्यैर्व्याख्यातार्थानि यजूंषि श्रुत्यनुसारेण व्याख्यायन्ते ॥

' वाजश्च मे ' इति इत उत्तरं वसोर्धारकाणि यजूंषि। सप्तविंशतिः खण्डिकाः। बार्हतः प्रगाथो वाऽयमाद्यः। देवानामार्षम्। एतैर्यजुर्भिर्यजमानोऽग्नेः कामान् याचते। vवाजः अन्नं vच। तदन्नं vमे मह्यं देहि। vप्रसवः vच vमे अन्नदानादिविषयाभ्यनुज्ञानं तं प्रसवं मे देहि। ' अथो इदं च मे देहीदं च मे ' इति श्रुत्यभिहितत्वात्। सर्वत्र ' देहि ' इत्यध्याहियते। स्ववाक्यस्थेन ' कल्पन्ताम् ' इत्येनेनैवेति केचिद्वदन्तीति केचित्। सर्वथा अस्य वाक्यस्य निराकाङ्क्षता कार्या। चशब्दः समुच्चयार्थः। ' प्रयतिश्च मे '। प्रकृष्टं यतनं vप्रयतिः। षिञ् बन्धने। प्रकृष्टं बन्धनं vप्रसितिः। सदाचारे आज्ञाबन्धनम्। ध्यै चिन्तायाम्। आत्वसंप्रसारणादौ कृते अस्य vधीतिः इति भवति। [ ]। vक्रतुः संकल्पः संस्कारो वा। vस्वरः उदात्तादिलक्षणः। श्लोक्यते उपश्लोक्यत इति vश्लोकः कीर्तिः, पद्यलक्षणो वा। श्रावयति प्रख्यापयतीति vश्रावः। देवा(?व)तामन्त्रा वा श्रावः। प्रख्याप्यमानस्यादरेण श्रवणं vश्रुतिः, ब्राह्मणं वा। vज्योतिः दीप्तिः। vस्वः आदित्यादिकं ज्योतिः। अत्र वाजादिषु द्वन्द्वीभूतयोः कामौ भवतः, " द्वौ कामौ संयुनक्ति " इति श्रुतेः। vयज्ञेन vकल्पन्तां यज्ञेन अग्निं तर्पयन्तु

---

2. P1 धनाद्य° for धान्याद्य°

7. H2-3 om. प्रायच्छत्। ... कामान् (L 9); B1 अथ for तथा

10. B1 om. श्रुत्यनु ... °र्धारकाणि (L 11)

15. B1 सर्वदा for सर्वथा and om. अस्य; B1 वाजस्य for वाक्यस्य; B1 om. कार्या

17. H2-3 कृतेस्यसीरिति for कृते अस्य धीतिरिति; H2-3 B1 after भवति add धीतिश्चेति

20. B1 oms. देवता ... श्रावः

अभिषिञ्चन् वा । [v]कल्पन्तां मम समर्था भवन्तु । ‘ अनेन च त्वाऽभिषिञ्चाम्यनेन च ’ इत्यस्याः श्रुतेरभिप्रायेण व्याख्यातम् ॥१३॥

‘ प्राणश्च मेऽपानश्च मे ’ इति । पञ्चवृत्तिकः [v]प्राणः । प्राणापानौ मे देहि मम देहे स्थिरौ कल्पेताम् । [v]व्यानः, अपानोदानयोः संबन्धिरूपो व्यानः [v]च । सोऽपि स्थिरः कल्पताम् । [v]असु । नपुंसकान्तं पदम् । असु जीवः । असोर्जीवोपाधित्वात् । [v]चित्तम् अन्तःकरणम् । [v]आधीतं स्वाध्यायः । [v]वाक् वागिन्द्रियम् । [v]मनः, संकल्पविकल्पात्मकं मनः । [v]चक्षुः चक्षुरिन्द्रियम् । [v]श्रोत्रं श्रवणसाधनमिन्द्रियं श्रोत्रम् । दक्ष वृद्धौ शीघ्रार्थे च । [v]दक्षः उत्साहो वा । [v]बलं कायाश्रितं बलम् ॥१४॥

‘ ओजश्च ’ इति । आनुष्टुभः प्रगाथः । [v]ओजः इन्द्रियाश्रितं बलम् । [v]सहः [शारीरं बलम्] [v]आत्मा [v]च । शरीरं [v]तनूः । तत्र विस्तृतानि अङ्गानि । [v]शर्म सुखं शरणं गृहं वा । अङ्गरक्षाकरं [v]वर्म । अवयवाः [v]अङ्गानि । शरीरे षष्ठ्युत्तरत्रिशतानि [v]अस्थीनि प्रसिद्धानि । शरीरावयवानां संधयः [v]परूंषि । संध्यन्तरालान्यत्र [v]शरीराणि । जीवशरीरयोरवस्थानकालः [v]आयुः । जराविरोधिनी *अजरा [v]च [v]मे [v]यज्ञेन [v]कल्पन्ताम् आयुरादयः क्लृप्ता भवन्तु । यज्ञेनाराधितः भगवानस्मभ्यमेवंविधानि फलानि ददात्वित्यर्थः ॥१५॥

‘ ज्यैष्ठ्यं च ’ इति । [v]ज्यैष्ठ्यं प्राथम्यम् । [v]आधिपत्यम् ऐश्वर्यम् । [v]मन्युः क्रोधः । अधर्मविषयः [v]भामः, पूज्यः प्रतापो वा । [v]अमः [v]च अस्मच्छत्रूणां भङ्गो रोगो वा । [v]अम्भः जलम् । [v]जेमा जयत्वम् । [v]महिमा महत्त्वम् । [v]वरिमा वरिष्ठता । [v]प्रथिमा पृथुत्वं विस्तारः । [v]वर्षिमा वर्षितृत्वम् । [v]द्राघिमा । राघृ लाघृ द्राघृ सामर्थ्ये । दीर्घता, दीर्घकालभोगैश्वर्यसंपत्तिः । [v]वृद्धं धनाद्यभिवृद्धिः । [v]वृद्धिः देहस्याभिवृद्धिः ॥

[इति द्वितीयोऽनुवाकः ।]

---

3. H2–3 after इति add अनुष्टुभप्रभृतः
9. B1 om. आनुष्टुभः प्रगाथः
10. H2–3 शरीरं for शरणं
12. H2–3 सर्वं° for शरीर°
13. H2–3 om. कल्पन्ताम्; B1 before आयुरादयः adds मनी–(? दी)–येनानेन यज्ञेन
[* पदपाठे ‘ जरा ’ इति । ‘ अजरा ’ इति पाठस्तु पदपाठेन विरुद्ध आभाति ।]
16. H2–3 after रोगो वा add अरोगे
18. H2–3 द्राघृता; B1 द्राघता for दीर्घता
19. B1 om. वृद्धिः देहस्याभिवृद्धिः

[अथ तृतीयोऽनुवाकः ।]

सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे ।
विश्वं च मे महश्च मे क्रीळा च मे मोदश्च मे ॥
जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम् ॥१॥
वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे ।
सुगं च मे सुपथ्यं च म ऋद्धं च म ऋद्धिश्च मे ॥
क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥२॥
यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे ।
विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे ॥
सीरं च मे लयश्च मे सूश्च मे प्रसूश्च मे यज्ञेन कल्पन्ताम् ॥३॥
शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे ।
कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे ।
भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ॥४॥(३)॥

सत्यम् । श्रद्धा । जगत् । धनम् ।
विश्वम् । महः । क्रीळा । मोदः ।
जातम् । जनिष्यमाणम् । सूक्तमिति सुऽउक्तम् । सुकृतमिति सुऽकृतम् ॥ छिं ॥१॥
वित्तम् । वेद्यम् । भूतम् । भविष्यत् ।
सुगमिति सुऽगम् । सुपथ्यमिति सुऽपथ्यम् । ऋद्धम् । ऋद्धिः ।
क्लृप्तम् । क्लृप्तिः । मतिः । सुमतिरिति सुऽमतिः ॥ टिं ॥२॥
यन्ता । धर्ता । क्षेमः । धृतिः ।
विश्वम् । महः । संविदिति सम्ऽवित् । ज्ञात्रम् ।
सीरम् । लयः । सूः । प्रसूरिति प्रऽसूः ॥ त्रिं ॥३॥
शम् । मयः । प्रियम् । अनुकाम इत्यनुऽकामः ।
कामः । सौमनसः । भगः । द्रविणम् ।
भद्रम् । श्रेयः । वसीयः । यशः ॥ ग्निं ॥४॥

वसोर्धारामन्त्राः]

सा- अथ तृतीयाऽनुवाकमाह । पाठस्तु- ' सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे । विश्वं च मे महश्च मे क्रीळा च मे मोदश्च मे । जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम् ॥१॥ वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे । सुगं च मे सुपथ्यं च म ऋद्धं च म ऋद्धिश्च मे । क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥२॥ यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे । विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे । सीरं च मे लयश्च मे सूश्च मे प्रसूश्च मे यज्ञेन कल्पन्ताम् ॥३॥ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे । कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ' ॥४॥ [इति ।] ˇसत्यम् यथार्थभाषितम् । ˇश्रद्धा परलोकोऽस्तीति बुद्धिः । ˇजगत् जङ्गमम् । ˇधनं सुवर्णादिकम् । ˇविश्वं स्थावरादिकम् । ˇमहः दीप्तिः । ˇक्रीळा अक्षद्यूतादि । ˇमोदः तज्जनितहर्षः । ˇजातं पूर्वसिद्धमपत्यम् । ˇजनिष्यमाणं भविष्यदपत्यम् । ˇसूक्तं ऋक्समूहः शोभनवचनं वा । ˇसुकृतं शास्त्रतः सुष्ठु कृतम् । एते ˇयज्ञेन ˇकल्पन्ताम् ॥१॥

ˇवित्तं पूर्वलब्धं द्रव्यं ज्ञानं वा । ˇवेद्यम् इतःपरं लब्धव्यं ज्ञातव्यं वा । ˇभूतं निष्पन्नम् । ˇभविष्यत् निष्पाद्यम् । ˇसुगं सुष्ठु गन्तव्यं बन्धुजनयुक्तग्रामान्तरादिकम् । ˇसुपथ्यं चोरादिरहित-मार्गादिद्रव्यम् । ˇऋद्धम् अनुष्ठितक्रतुफलम् । ˇऋद्धिः अनुष्ठास्यमानसत्रफलम् । ˇक्लृप्तं समर्थं स्वकार्यक्षमं द्रव्यम् । ˇक्लृप्तिः स्वकीयसामर्थ्यम् । ˇमतिः पदार्थमात्रनिश्चयः । ˇसुमतिः [दुर्घटराजकार्यादिनिश्चयः ।] एते ˇयज्ञेन ˇकल्पन्ताम् ॥२॥

ˇयन्ता । यम उपरमे । नियन्ता । ˇधर्ता । धृ धारणे । विधर्ता । ˇक्षेमः स्थितस्य परिपालनम् । ˇधृतिः धारणाशक्तिः । ˇविश्वं सर्वानुकूल्यम् । ˇमहः उत्सवः । ˇसंविद् वेदनम् । ज्ञायत इति ˇज्ञात्रम् । ˇसीरं लाङ्गलम् । लीयत इति ˇलयः दोषादेर्नाशः । सूयत इति ˇसूः उत्पत्तिः । प्रसवः ˇप्रसूः । एते ˇयज्ञेन ˇकल्पन्ताम् ॥३॥

ˇशं शब्द ऐहिकसुखवाची । ˇमयः शब्द आमुष्मिकसुखवाची । ˇप्रियं प्रीतिकारणं वस्तु । ˇअनुकामः अनुकूलत्वनिमित्तेन काम्यमानः पदार्थः । ˇकामः शोभनेच्छा । ˇसौमनसः मनःस्वस्थान्तः-करणम् । ˇभगः ऐश्वर्यादिषट्संपत्तिः, सौभाग्यं वा । ˇद्रविणं धनम् । ˇभद्रं कल्याणम्, इहलोके रमणीयम् । ˇश्रेयः परलोके हितम् । ˇवसीयः निवासहेतुः, अतिशयेन वसुमान् वा गृहादिः । ˇयशः कीर्तिः । एते ˇयज्ञेन ˇकल्पन्ताम् ॥४॥

[इत्येकोनविंशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

---

1. P1 after पाठस्तु adds पूर्ववत्
8. P1 °भाषितवम् for °भाषितम्
9. M2 °जात° for °जनित°
13. P1 M2 °बन्धुषु for °बन्धु°
15. P1 after मतिः ins. सामान्यज्ञानं मतिः ।
17. M2 S2 om. धर्ता
18. S2 M2 om. विश्वं ... उत्सवः; P1 मदीयं सर्वं कुलम् for सर्वानुकूल्यम्
21. M2 °करणं for °कारणं
22. P1 °स्वच्छ° for °स्वस्थ

[वसोर्धारामन्त्राः

आ– ' सत्यं च मे ' इति । vसत्यं वाङ्मनःकायकर्मणामविसंवादः सत्यम् । vश्रद्धा तात्पर्यम् । vजगत् जङ्गमं गोमहिष्यादिकम् । vधनं स्वर्णादिकम् । vविश्वं स्थावरादिकम् । vमहः दीप्तिः । vक्रीळा केलिः । vमोदः हर्षः । उपकारकत्वेन vजातं निष्पन्नम् । vजनिष्यमाणं तदेव साध्यरूपम् vच vमे । vसूक्तं शोभनवचनम् । vसुकृतं शास्त्रतः सुष्ठु कृतम् । vयज्ञेन vकल्पन्ताम् ॥१७॥

' वित्तं च ' इति । vवित्तं ज्ञातम् । vवेद्यं ज्ञातव्यम् । vभूतं निष्पन्नम् । vभविष्यत् निष्पाद्यम् । vसुगं सुखेन गम्यम् । vसुपथ्यं शोभनमार्गेण प्राप्यम् । वृ(vऋ?)द्धं vच उन्नतं च । तस्यैव वृ(vऋ?)द्धिः उन्नतिरूपं वयः । क्लृपू सामर्थ्ये । vक्लृप्तं समर्थम् । अस्येदमिति नियमितरूपा vक्लृप्तिः । मन ज्ञाने । vमतिः तत्रापि शोभनात्मिका मतिः vसुमतिः vच vमे ॥१८॥

' यन्ता च मे ' इति । यम उपरमे । vयन्ता नियन्ता । vधृ धारणे । vधर्ता विधर्ता । vक्षेमः स्थितस्य परिकल्पनं क्षेमः । vधृतिः धारणा । vविश्वं सर्वम् । vमहः तेजः । vसंवित् संवेदनम् । vज्ञात्रं, ज्ञायत इति ज्ञात्रम् । vसीरं लाङ्गलम् । लीयत इति vलयः, दोषादेर्नाशः । सूयत इति vसूः उत्पत्तिः । vप्रसूः प्रसवः ॥१९॥

' शं च मे ' इति । vशं सुखम् । vमयः विशिष्टं विषयजं सुखम् । vप्रियं स्वर्गादिविषयसुखं प्रियम् । vअनुकामः शोभनेच्छाकामः, तदनु पुरुषार्थकामः । vकामः vच । सुशोभनमनसः संबन्धी vसौमनसः देवताविषयः कामः । vभगः —

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥

इत्यभिहितो भगः । vद्रविणं द्रवणीयं धनम् । vभद्रं कल्याणम् । भन्दनीयं भद्रम् । भदि कल्याणे । vश्रेयः पुरुषार्थः । vवसीयः वसनार्हं गृहम् । vयशः कीर्तिः ॥२०॥

[इति तृतीयोऽनुवाकः]

---

4. H2–3 सुकृतम् for सुष्ठु कृतम्
7. B1 °मार्ग° for मार्गेण
8. H2–3 उन्नतं रूपं for उन्नतिरूपं
9. H2–3 अत्र for तत्र
15. B1 om. शोभनेच्छाकामः; B1 पुनरुद्यतोऽन्नकामः, H2–3 पुरुषार्थोऽनुकामश्च for पुरुषार्थकामः कामश्च
19. B1 नन्दनीयं, H2–3 मन्दनीयं for भन्दनीयं
20. B1 वसनार्थं; H2–3 वसनाङ्गं for वसनार्हम्

[अथ चतुर्थोऽनुवाकः ।]

ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे ।
घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे ।
कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे यज्ञेन कल्पन्ताम् ।।१।।
ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे ।
जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे ।
सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे यज्ञेन कल्पन्ताम् ।।२।।
रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे ।
विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे ।
कुयवं च मेऽक्षितं च मेऽन्नं च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ।।३।।
व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे ।
मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे ।
श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे
यज्ञेन कल्पन्ताम् ।।४।। (४) ।।

ऊर्क् । सूनृता । पयः । रसः ।
घृतम् । मधु । सग्धिः । सपीतिरिति सऽपीतिः ।
कृषिः । वृष्टिः । जैत्रम् । औद्भिद्यमित्यौत्ऽभिद्यम् ।। त्रिं ।।१।।
ऋतम् । अमृतम् । अयक्ष्मम् । अनामयत् ।
जीवातुः । दीर्घायुत्वमिति दीर्घायुऽत्वम् । अनमित्रम् । अभयम् ।
सुगमिति सुऽगम् । शयनम् । सूषा इति सुऽउषाः । सुदिनमिति सुऽदिनम् ।। थिं ।।२।।
रयिः । रायः । पुष्टम् । पुष्टिः ।
विभ्विति विऽभु । प्रभ्विति प्रऽभु । पूर्णम् । पूर्णतरमिति पूर्णऽतरम् ।
कुयवम् । अक्षितम् । अन्नम् । अक्षुत् । डिं ।।३।।
व्रीहयः । यवाः । माषाः । तिलाः ।
मुद्गाः । खल्वाः । प्रियङ्गवः । अणवः ।
श्यामाकाः । नीवाराः । गोधूमाः । मसूराः ।। षिं ।।४।। (४) ।।

सा– अथ चतुर्थानुवाकमाह । पाठस्तु– ' ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे । घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे । कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्‌भिद्यं च मे यज्ञेन कल्पन्ताम् ॥१॥ ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे । जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे । सुगं च मे शयनं च मे सूषाश्च मे सुदिनं च मे यज्ञेन कल्पन्ताम् ॥२॥ रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे । विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे । कुयवं च मेऽक्षितं च मेऽन्नं च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥३॥ व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्‌गाश्च मे खल्वाश्च मे प्रियंगवश्च मेऽणवश्च मे । श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ' ॥४॥ [इति ।] ˇऊर्क् रसः । ˇसूनृता सत्यवाणी । ˇपयः क्षीरम् । ˇरसः मधुरादिषड्रसः । ˇघृतम् आज्यम् । ˇमधु सारघम् । स्वबन्धुभिः सह भोजनं ˇसग्धिः । तथा सहपानं ˇसपीतिः । ˇकृषिः व्यवसायः । ˇवृष्टिः वर्षणम् । जयसाधनं ˇजैत्रम् । तरुगुल्मादीनामुत्पत्तिः ˇऔद्‌भिद्यम् । एते ˇयज्ञेन ˇकल्पन्ताम् ॥१॥

ˇऋतं यज्ञादिकर्म । ˇअमृतं तत्फलभूतं स्वर्गादि । ˇअयक्ष्मं राजयक्ष्मादिव्याधिराहित्यम् । शिरोव्यथाद्यल्पव्याधिराहित्यम् ˇअनामयत् । जीवदानसमर्थमौषधं ˇजीवातुः । ˇदीर्घायुत्वं बहुकालीनायुष्यसंपत्तिः, अपमृत्युराहित्यमित्यर्थः । अमित्रः शत्रुः, तदभावः ˇअनमित्रम् । ˇअभयं भयराहित्यम् । ˇसुगं शोभनगमनम् । ˇशयनं स्वापः, शय्योपधानं वा । ˇसूषाः स्नानदानसंध्यावन्दनादियुक्तः प्रातःकालः । ˇसुदिनं यज्ञदानाध्ययनादियुक्तमुत्कृष्टं दिनम् । एते ˇयज्ञेन ˇकल्पन्ताम् ॥२॥

ˇरयिः सुवर्णम् । ˇरायः मुक्तादयः । ˇपुष्टं पोषणम् । ˇपुष्टिः शरीरपोषः । ˇविभु समर्थम् । ˇप्रभु प्रधानम् । ˇपूर्णं संपूर्णम् । उत्तरोत्तराकाङ्क्षया ˇपूर्णतरम् । ˇकुयवं क्षुद्रयुतम् (? °यवम्) । क्षितं क्षीणं, तादृशं यत्र भवति तत् ˇअक्षितं पुत्रपौत्रादि । ˇअन्नं षड्विधम् । ˇअक्षुत् क्षुन्निवृत्तिः । एते ˇयज्ञेन ˇकल्पन्ताम् ॥३॥

ˇव्रीहयः शाल्यादयः । ˇयवाः ˇमाषाः ˇतिलाः ˇमुद्‌गाः प्रसिद्धाः । ˇखल्वाः क्षुद्रमसूराः । ˇप्रियंगवः प्रसिद्धाः । ˇअणवः क्षुद्रधान्यानि । ˇश्यामाकाः ईषत् श्यामाः श्यामाकाः । ग्राम्याः ˇनीवाराः । ˇगोधूमाः प्रसिद्धाः । ˇमसूराः चणकाः । एते ˇयज्ञेन ˇकल्पन्ताम् ॥४॥

[इत्येकोनविंशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

---

1. P1 चतुर्थः for चतुर्थानुवाकमाह
9. M2 सुबन्धुभिः for स्वबन्धुभिः सह
10. P1 जयवान् for जयसाधनं
13. P1 °दिनम्; S2 M2 °कालीनम् for °कालीन°
17. P1 व्यापकं यशः । प्रभु समर्थं कर्माणि पुत्रादि । पूर्णं धनादि । पूर्णतरम् आस्तिक्याद्यतिशयेन पूर्णम् । कौ पृथिव्यां मदीयो यवसमुदायः कुयवम् for समर्थम् ... क्षुद्रयुतम् [L 18]
18. M2 S2 अक्षितं क्षुद्ररहितम् for क्षितं ... पुत्रपौत्रादि
19. M2 S2 om. अन्नं षड्विधम्
21. M2 S2 om. खल्वाः
23. M2 S2 after चणकाः add प्रसिद्धाः

आ– ' ऊर्क् च मे ' इति । ऊर्क् रसः । सूनृता सत्यवाणी । पयः क्षीरम् । रसः मधुरादयः षड्रसाः । घृतम् आज्यम् । मधु सारघम् । सग्धिः सुबन्धुभिः सह भोजनं सग्धिः । सहपानं सपीतिः । कृषिः व्यवसायः । वृष्टिः वर्षणम् । जैत्रं जयसाधनम् । औद्भिद्यम् उद्भिदां संबन्धि औद्भिद्यम् ॥२१॥

ऋतं सत्यम् । अमृतम् अमृताभयलक्षणं ब्रह्म । यद्वा– मृतिरहितममृतम् । अयक्ष्मं व्याधिरहितम् । अनामयत् आमयतीत्यामयत् । आमयो जलोदरादिर्व्याधिः । व्याधिरहिततयाऽऽचरणम् अनामयत् । जीवातुः जीवयतीति जीवातुः । जीवदानसमर्थमौषधं जीवातुः, दीर्घायुत्वम् । सलोपश्छान्दसः । बहुकालायुष्यसंपत्तिः । अनमित्रम् । अमित्रः शत्रुः, तदभावः । अभयं भयरहितम् । सुगं शोभनगमनम् । शयनं स्वापः । सूषाः शोभनोषसां संपत्तिः सूषाः । सुदिनं शोभनदिनं च ॥२२॥

रयिः धनम् । रायः धनानि । एकं भोगार्थम् । अन्यानि धर्मसाधनानि । पुष्टं पोषणं देहादेः । विभु समर्थम् । प्रभु प्रधानं, समुपकरणे निपुणम्, च मे । पूर्णम् उत्तरोत्तराकाङ्क्षया पूर्णतरम् पुष्कलसाधनम् । कुयवं क्षुद्रयवम् । अक्षितं क्षयरहितम् । अन्नं षड्विधम् । अक्षुत् क्षुन्निवृत्तिः ॥२३॥

' व्रीहयश्च ' इति । व्रीहयः शालयः । यवमाषतिलमुद्गाः प्रसिद्धाः । खल्वाः क्षुद्रमसूराः । प्रियंगवः प्रसिद्धाः । अणवः क्षुद्रधान्यानि । श्यामाकाः ईषत् श्यामाः श्यामाकाः । नीवाराः जलजा दीर्घशूकाः । गोधूमाः प्रसिद्धाः । मसूराः चणकाः ॥२४॥

(इति चतुर्थोऽनुवाकः ।)

---

2. B1 om, षड्रसाः
3. B1 after कृषिः adds वाणिज्यम्
6. H2–3 आमयः आमयत् for आमयतीत्यामयत्
7. B1 जीवेरातुः, H2–3 जीवो [ ] for जीवयतीति
10. H2–3 °दिवसं for °दिनं
11. H3 om. धर्म°
12. B1 °करणमनिपुणं, H2–3 °करणे प्रतिपुरुषं for °करणे निपुणं
17. H2–3 om. चणकाः

[अथ पञ्चमोऽनुवाकः ।]

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे ।
सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे ।
सीसं च मे त्रपु च मे श्यामं च मे लोहं च मे यज्ञेन कल्पन्ताम् ॥१॥
अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे ।
कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशव आरण्याश्च मे ।
वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥२॥
वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे ।
अर्थश्च मे यामश्च म इत्या च मे गतिश्च मे यज्ञेन कल्पन्ताम् ॥३॥ (५)

अश्मा । मृत्तिका । गिरयः । पर्वताः ।
सिकताः । वनस्पतयः । हिरण्यम् । अयः ।
सीसम् । त्रपु । श्यामम् । लोहम् ॥ ळिं ॥१॥
अग्निः । आपः । वीरुधः । ओषधयः ।
कृष्टपच्या इति कृष्टऽपच्याः । अकृष्टपच्या इत्यकृष्टऽपच्याः ।
ग्राम्याः । पशवः । आरण्याः ।
वित्तम् । वित्तिः । भूतम् । भूतिः ॥ चीं ॥२॥
वसु । वसतिः । कर्म । शक्तिः ।
अर्थः । यामः । इत्या । गतिः ॥ ळों ॥३॥ (५) ॥

सा- अथ पञ्चमानुवाकमाह । पाठस्तु- ' अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे । सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे । सीसं च मे त्रपु च मे श्यामं च मे लोहं च मे यज्ञेन कल्पन्ताम् ॥१॥ अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे । कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशव आरण्याश्च मे । वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥२॥ वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे। अर्थश्च मे यामश्च मे इत्या च मे गतिश्च मे यज्ञेन कल्पन्ताम् ' इति । अश्मा पाषाणः । मृत्तिका प्रसिद्धा । गिरयः क्षुद्रपर्वताः । पर्वताः मन्दारादयः । सिकताः

---

19. P1 पञ्चमः for पञ्चमानुवाकमाह

24. P1 पाषाणाः for पाषाणः

वसोर्धारामन्त्राः]

शर्कराः । ^{v}वनस्पतयः पुष्पराहित्येन फलिनः पनसादयः । ^{v}हिरण्यं सुवर्णम् । ^{v}अयः कार्ष्णायसम् । ^{v}सीसं ^{v}त्रपु ^{v}च इति प्रसिद्धानि । ^{v}श्यामं नीललोहितम् । ^{v}लोहं कांस्यताम्रादि । एते ^{v}यज्ञेन ^{v}कल्पन्ताम् ॥१॥

^{v}अग्निः पृथिवीस्थानोऽग्निः । ^{v}आपः वर्षोदकानि । ^{v}वीरुधः गुल्मानि । ^{v}ओषधयः फलपाकान्ताः । ^{v}कृष्टपच्याः भूमेः कर्षणबीजवापादिकर्मभिः फलपाकमापद्यमानाः ओषधयः कृष्टपच्याः । एतद्विपरीताः ^{v}अकृष्टपच्याः । ^{v}ग्राम्याः ग्रामे भवाः ग्राम्याः ^{v}पशवः । गौरश्वोऽजोऽविरुष्ट्रो गर्दभः सप्तमोऽश्वतर इत्येते ग्राम्याः । तथा ^{v}आरण्याः अरण्ये भवाः द्विखुराः श्वापदा हस्ती मर्कट इत्यादयः । ^{v}वित्तं पूर्वलब्धम् । ^{v}वित्तिः भाविलाभः । ^{v}भूतम् ऐश्वर्योपेतं पुत्रादिकम् । ^{v}भूतिः स्वकीयमैश्वर्यादि । एते ^{v}यज्ञेन ^{v}कल्पन्ताम् ॥२॥

^{v}वसु निवाससाधनं गवादिकम् । ^{v}वसतिः निवासाधारो गृहादिकम् । अग्निहोत्राद्यनुष्ठानं ^{v}कर्म । तदनुष्ठानसामर्थ्यं ^{v}शक्तिः । ^{v}अर्थः प्रयोजनविशेषः । ^{v}यामः अष्टघटिकात्मकः कालः । यामः पुण्यकालः । ^{v}इत्या प्राप्या गतिः । ^{v}गतिः परमा गतिः ॥३॥

[इत्येकोनविंशेऽध्याये पञ्चमोऽनुवाकः ॥५॥]

आ– ['अश्मा च' इति] ^{v}अश्मा पाषाणः । ^{v}मृत्तिका प्रसिद्धा । ^{v}गिरयः क्षुद्रपर्वताः । ^{v}पर्वताः मन्दारादयः । ^{v}सिकताः शर्कराः । ^{v}वनस्पतयः पनसादयः । ^{v}हिरण्यं सुवर्णम् । ^{v}अयः च । अयः कृष्णायसम् । ^{v}सीसं ^{v}त्रपु ^{v}च इति प्रसिद्धानि । ^{v}श्यामं नीलं लोहम् । इदं सामान्यं नाम [यत्] ^{v}लोहम् इति ॥२५॥

['अग्निश्च' इति ।] ^{v}अग्निः पृथिवीस्थानोऽग्निः । ^{v}आपः वर्षोदकानि । ^{v}वीरुधः गुल्मानि । ^{v}ओषधयः फलपाकान्ताः । ^{v}कृष्टपच्याः भूमेः कर्षणबीजावापादिकर्मभिः फलपाकमापद्यमानाः ओषधयः कृष्टपच्याः । एतद्विपरीताः ^{v}अकृष्टपच्याः । ^{v}ग्राम्याः ग्रामे भवाः पशवः ।

---

1. P1 कार्ष्ण्य° for कार्ष्ण°
4. P1 om. second कृष्टपच्याः
6. M2 S2 श्वापदानि for श्वापदाः
7. P1 after एते adds पदार्थाः
9. P1 S2 वसुः for वसु; P1 अग्निहोत्राद्यनुष्ठानतत्सामर्थ्यं कर्म शक्तिः । M2 H2 अग्निहोत्राद्यनुष्ठानसामर्थ्यं कर्म (om. शक्तिः) । for अग्निहोत्राद्यनुष्ठानं कर्म । तदनुष्ठानसामर्थ्यं शक्तिः । (L 10)
10. P1 om. यामः ... प्राप्या गतिः (L 11)
11. M2 after इत्या adds इण् गतावित्यस्य रूपम् इत्या
13. H3 अश्माः for अश्मा; B1 H2-3 पाषाणाः for पाषाणः; B2 H2-3 मृत्तिकाः प्रसिद्धाः for मृत्तिका प्रसिद्धा
18. B1 गुल्फानि for गुल्मानि

गौरश्वोऽजोऽविरुष्ट्रो गर्दभः सप्तमोऽश्वतर इत्येते ग्राम्याः पशवः। द्विखुराः श्वापदानि पक्षिणश्च सरीसृपाणि च हस्ती मर्कटो नादेया इति vआरण्याः पशवः इति। vवित्तम् विदेर्विचारकर्मणो रूपम्। वित्तं विचारितम्। vवित्तिः विचारात्मिका धीश्च। vभूतं सत्यम्। vभूतिः ऐश्वर्यम्। vयज्ञेन vकल्पन्ताम् इति ॥२६॥

['वसु च' इति]। भूतानि वासयतीति vवसु। भूतिविशेषः vवसतिः। तत्प्राप्तिलक्षणा वसतिः। vकर्म क्रियाजातम्। vशक्तिः सामर्थ्यम्। vअर्थः प्रयोजनम्। vयामः ह्यष्टघटिकात्मकः कालः। यामः पुण्यकालः। vइत्या vच। इण् गताविल्यस्य रूपम्। इत्या प्राप्या गतिः। vगतिः परमा गतिः ॥२७॥

[इति पञ्चमोऽनुवाकः]

[षष्ठोऽनुवाकः ।]

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे ।
सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे ।
पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१॥
मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे ।
धाता च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे ।
मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥२॥
पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे ।
द्यौश्च म इन्द्रश्च मे समाश्च म इन्द्रश्च मे ॥
नक्षत्राणि च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥३॥(६)

अग्निः। इन्द्रः। सोमः।
सविता। सरस्वती।
पूषा। बृहस्पतिः॥ है ॥१॥

2. B1 मर्कटसेनादयः for मर्कटो नादेयाः; B1 H2-3 after second इति add यज्ञेन कल्पन्ताम्
7. H2-3 om. हि

वसोर्धारामन्त्राः]

मि॒त्रः । वरु॑णः ।

धा॒ता । त्वष्टा॑ ।

म॒रुतः॑ । विश्वे॑ । दे॒वाः ॥ है ॥२॥

पृ॒थि॒वी । अ॒न्तरि॑क्षम् ।

द्यौः॑ । समाः॑ ।

नक्ष॑त्राणि । दिशः॑ । इन्द्रः॑ ॥ है ॥३॥ (६) ॥

स्त्रा– अथ षष्ठानुवाकमाह । तत्र [अर्धं] इन्द्रादि (? णि) जुहोति । अर्धमिन्द्र-[दैवत्यम्] अर्धमन्यदैवत्यम् । पाठस्तु– ' अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे । सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे । पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१॥ मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे धाता च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे । मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥२॥ पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे । द्यौश्च म इन्द्रश्च मे समाश्च म इन्द्रश्च मे । नक्षत्राणि च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे यज्ञेन कल्पन्ताम् ' ॥३॥ इति । ˇअग्निः अग्ने रूपम् । सर्वज्ञोऽग्निः । इदि परमैश्वर्ये । ˇइन्द्रः । ˇसोमः चन्द्रः । उमया सहितो वा सोमः । प्राणिनां प्रसवकर्ता ˇसविता । ˇसरस्वती वाणी । पुष्णातीति ˇपूषा । ˇबृहस्पतिः देवगुरुः । एते ˇयज्ञेन ˇकल्पन्ताम् ॥१॥

ˇमित्रः सूर्यः । ˇवरुणः प्रचेताः । ˇधाता जगद्धर्ता सविता । ˇत्वष्टा । तक्षू तनूकरणे इत्यस्य रूपम् । त्वष्टा नाम सूर्यः । शत्रुबलस्य कृशीकरणकर्ता । ˇमरुतः एकोनपञ्चाशद्देवताः । ˇविश्वे ˇच [ˇदेवाः] विश्वेदेवगणाः । एते ˇयज्ञेन ˇकल्पन्ताम् ॥२॥

प्रथनात् ˇपृथिवी । ˇअन्तरिक्षं भुवः स्थानम् । ˇद्यौः द्युलोकः । ˇसमाः संवत्सराः । ˇनक्षत्राणि अश्विन्यादिसप्तविंशतिः । ˇदिशः पूर्वादयः । एते ˇयज्ञेन ˇकल्पन्ताम् ॥

' अग्निश्च मे ' इत्यादिषु तिसृषु कण्डिकासु अष्टादशेन्द्रशब्दाः । " इन्द्र इरां दृणातीति वा । इरां ददातीति वा । इरां दधातीति वा । इरां दारयत इति वा । इरां धारयत इति वा । इन्दवे द्रवतीति वा । इन्दौ रमत इति वा । इन्धे भूतानीति वा । तद्यदेनं प्राणैः समैन्धत तदिन्द्रस्येन्द्रत्वम् इति विज्ञायते । इदंकरणादित्याग्रायणः । इदंदर्शनादित्यौपमन्यवः । इन्दतेः वा ऐश्वर्यकर्मणः" (नि १०.८) इत्येकादशधा इन्द्रशब्दार्थो व्युत्पादितः । अतोऽत्र [अष्टा]दशेन्द्रशब्देषु यथायोग्यतया [अर्थो] निर्वचनीयः ॥३॥

[इत्येकोनविंशेऽध्याये षष्ठोऽनुवाकः ॥६॥]

8. P1 after अन्यदैवत्यम् adds अग्निश्च म इन्द्रश्च म इत्यादि; P1 तत्र प्रथममन्त्रः for पाठस्तु

13. P1 रूपः for रूपम्.

15. P1 om. एते ... कल्पन्ताम्; P1 after °गुरुः adds अथ द्वितीयमन्त्रः — मित्रश्च म इन्द्रश्च म ... यज्ञेन कल्पन्तामिति

18. P1 om. एते ... कल्पन्ताम्; P1 after देवगणाः adds अथ तृतीयमन्त्रः — पृथिवी च म इन्द्रश्च मे ... कल्पन्तामिति

20. P1 इन्द्रश्च मे for एते

आ– अर्धेन्द्राणि जुहोति– ‘ अग्निश्च मे ’ इति । अर्धमिन्द्र–[दैवत्यम्] । अर्धमन्यदैवत्यम् । ‘ अग्निश्च म इन्द्रश्च ’ इत्यादि । [v]अग्निः । अग्नेश्च रूपम् । सर्वज्ञोऽग्निः । इदि परमैश्वर्ये । [v]इन्द्रः । [v]सोमः चन्द्रः । उमया सहितो वा सोमः । प्राणिनां प्रसवकर्ता [v]सविता । [v]सरस्वती वाणी । [v]पूषा । पुष्णातीति पूषा । [v]बृहस्पतिः देवगुरुः ॥२८॥

[v]मित्रः सूर्यः । [v]वरुणः प्रचेताः । जगद् धत्ते इति [v]धाता सविता । [v]त्वष्टा । तक्षू तनूकरण इत्यस्य रूपम् । त्वष्टा नाम सूर्यः । शत्रुबलस्य कृशीकरणकर्ता । [v]मरुतः [v]च एकोनपञ्चाशद्देवाः । [v]विश्वे [v]च [v]देवाः विश्वे देवगणाः ॥२९॥

‘ पृथिवी च ’ इति । प्रथनात् [v]पृथिवी । [v]अन्तरिक्षं भुवः स्थानम् । [v]द्यौः द्युलोकः । [v]समाः [v]संवत्सराः । [v]नक्षत्राणि अश्विन्यादीनि सप्तविंशतिः । [v]दिशः पूर्वादयः । [v]इन्द्रः [v]च [v]मे [v]यज्ञेन [v]कल्पन्ताम् इति ॥

‘ अग्निश्च ’ इत्यादिषु तिसृषु कण्डिकासु अष्टादशेन्द्रशब्दाः । “ इन्द्रः इरां दृणातीति वा । इरां ददातीति वा । इरां दधातीति वा । इरां दारयतीति वा । इरां धारयत इति वा । इन्दवे द्रवतीति वा । इन्दौ रमत इति वा । इन्धे भूतानीति वा । तद्यदेनं प्राणैः समैन्धत तदिन्द्रस्येन्द्रत्वमिति विज्ञायते । इदंकरणादित्याग्रायणः । इदंदर्शनादित्यौपमन्यवः । इन्दतेः वा ऐश्वर्यकर्मणः ” (नि १०.८) इत्येकादशधा इन्द्रशब्दार्थो व्युत्पादितः । अतोऽत्राष्टादशेन्द्रशब्देषु यथायोग्यतया इन्द्रशब्दा[र्थो] योजनीयः ॥३०॥

[इति षष्ठोऽनुवाकः]

[अथ सप्तमोऽनुवाकः ।]

अ॒ꣳशुश्च॑ मे र॒श्मिश्च॒ मेऽदा॑भ्यश्च॒ मेऽधि॑पतिश्च मे ।
उ॒पा॒ꣳशुश्च॑ मेऽन्तर्या॒मश्च॑ म ऐन्द्रवाय॒वश्च॑ मे मैत्रावरु॒णश्च॑ मे ।
आ॒श्विनश्च॑ मे प्रतिप्र॒स्थान॑श्च मे शु॒क्रश्च॑ मे म॒न्थी च॑ मे य॒ज्ञेन॑ कल्पन्ताम् ॥१॥

---

1. H2-3 अर्धेन्द्रियाणि for अर्धेन्द्राणि; B1 om. अग्निश्च म इति; B1 om. अर्धमिन्द्र-दैवत्यम्; B1 इन्द्रः for इन्द्र(दैवत्यम्)
2. H2-3 अन्यदेवत्यम् for अन्यदैवत्यम् ; H2-3 om. first अग्निः; B1 आगरूपम् for अग्नेश्च रूपम्
5. H2-3 om. जगद् धत्ते इति
6. H3 om. इत्यस्य; H2-3 om. नाम
8. H2-3 भुवनं for भुवः
11. H2-3 खण्डिकासु for काण्डिकासु
16. B1 ऊहनीयः for योजनीयः

अꣳशुः । रश्मिः । अदाभ्यः । अधिपतिरित्यधिऽपतिः ।
उपाꣳशुरित्युपऽअꣳशुः । अन्तर्याम इत्यन्तःऽयामः । ऐन्द्रवायवः । मैत्रावरुणः ।
आश्विनः । प्रतिप्रस्थान इति प्रतिऽप्रस्थानः । शुक्रः । मन्थी ॥ थीं ॥१॥

सा- अथ सप्तमानुवाकमाह । सप्तमे ग्रहाणां यज्ञक्रतूनां च होम उच्यते । " अथ ग्रहान् जुहोति " (शब्रा ९·३·२·१०) इति श्रुतिः । ग्रहाः सोमपात्राणि प्रतिकण्डिकं द्वादश द्वादश अभिहिताः । एवं तिसृषु कण्डिकासु षट्त्रिꣳशद्ग्रहा उक्ताः । तेषां नामान्युच्यन्ते । मन्त्रपाठस्तु- ' अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च मे । उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च मे । आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ' इति । एते ग्रहाः प्रसिद्धाः ॥१॥

आ-- अथ ग्रहान् जुहोति । ' अꣳशुश्च ' इति । ग्रहाः सोमधारकपात्राणि । प्रतिखण्डिकं द्वादश द्वादशाभिहिताः । एवं तिसृषु खण्डिकासु षट्त्रिंशद्ग्रहा उक्ताः । तेषामेषां नामानीमानि । अंशुः, रश्मिः, अदाभ्यः, अधिपतिः, उपांशुः, अन्तर्यामः, ऐन्द्रवायवः, मैत्रावरुणः, आश्विनः, प्रतिप्रस्थानः, शुक्रः, मन्थी च इति द्वादश ग्रहाः ॥२१॥

आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मे ।
ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्केवल्यश्च मे ।
सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे
यज्ञेन कल्पन्ताम् ॥२॥

आग्रयणः । वैश्वदेव इति वैश्वऽदेवः । ध्रुवः । वैश्वानरः ।
ऐन्द्राग्नः । महावैश्वदेव इति महाऽवैश्वदेवः । मरुत्वतीयाः ।
निष्केवल्यः । निःकेवल्य इति निःऽकेवल्यः ।
सावित्रः । सारस्वतः । पात्नीवत इति पात्नीऽवत. ।
हारियोजन इति हारिऽयोजनः ॥ मीम् ॥२॥

4. P1 सप्तमः for सप्तमानुवाकमाह
5. M2 S2 om. इति श्रुतिः
6. P1 oms. मन्त्र°
8. M2 S2 om. ग्रहाः
9. H2–3 सोमा for सोम°
10. B1 तेषां for एषां; B1 om. इमानि

सा– अथ द्वितीयमन्त्रः – ‘ आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मे । ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्केवल्यश्च मे । सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ’ इति । आग्रयणः, वैश्वदेवः, ध्रुवः, वैश्वानरः, ऐन्द्राग्नः, महावैश्वदेवः, मरुत्वतीयाः, निष्केवल्यः, सावित्रः, सारस्वतः, पात्नीवतः, हारियोजनश्चेति द्वादश ग्रहाः प्रसिद्धाः ॥२॥

आ– आग्रयणः, वैश्वदेवः, ध्रुवः, वैश्वानरः, ऐन्द्राग्नः, महावैश्वदेवः, मरुत्वतीयाः, निष्केवल्यः, सावित्रः, सारस्वतः, पात्नीवतः, हारियोजनश्चेति द्वादश ग्रहाः प्रसिद्धाः ॥३२॥

स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ।
ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च म आधवनीयश्च मे ।
वेदिश्च मे बर्हिश्च मे स्वगाकारश्च मेऽवभृथश्च मे यज्ञेन कल्पन्ताम् ॥३॥

स्रुचः । चमसाः । वायव्यानि । द्रोणकलश इति द्रोणऽकलशः ।
ग्रावाणः । अधिषवणे । अधिसवने इत्यधिऽसवने । पूतभृदिति पूतऽभृत् ।
आधवनीय इत्याऽधवनीयः ।
वेदिः । बर्हिः । स्वगाकार इति स्वगाऽकारः । अवभृथ इत्यवऽभृथः ॥ ध्रिं ॥३॥

सा– अथ तृतीयमन्त्रः – स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे । ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च म आधवनीयश्च मे । वेदिश्च मे बर्हिश्च मे स्वगाकारश्च मेऽवभृथश्च मे यज्ञेन कल्पन्ताम् ’ इति । स्रुचः, चमसाः, वायव्यानि, द्रोणकलशः, ग्रावाणः, अधिषवणे, पूतभृत्, आधवनीयः, वेदिः, बर्हिः, स्वगाकारः, अवभृथ इति द्वादश । अत्रापि सोमधारका ग्रहाः त्रिंशत् । षट् च यथाकथंचनोपकारका इति विभागः । गृह्यते सोमो येषु ते ग्रहाः, गृह्यते वा सोम एभिरिति ग्रहा इति । 'वेदिः उक्तलक्षणा । 'बर्हिः प्रसिद्धम् । 'स्वगाकारः स्वमात्मानमवगच्छन्तीति स्वगाः । ताः करोति कारयतीति वा स्वगाकारः समाप्तिः, सूक्तवाक इत्यन्ये । 'अवभृथः प्रसिद्धः ॥३॥

आ– स्रुचः, चमसाः, वायव्यानि, द्रोणकलशः, ग्रावाणः, अधिषवणे, पूतभृत्, आधवनीयः, वेदिः, बर्हिः, स्वगाकारः, अवभृथ इति द्वादश । अत्रापि सोमधारकाः ग्रहास्त्रिंशत् ।

6. H3 om. पात्नीवतः ... प्रसिद्धा।
14. P1 तृतीयः for तृतीयमन्त्रः
18. P1 षट्त्रिंशत् for त्रिंशत् ; M2 कथंचित् for °कथंचन
21. H3 om. स्रुचः ... अधिषवणे
22. H2–3 तत्र for अत्र; B1 सोमा° for सोम°; B1 षट्त्रिंशत् for त्रिंशत्

षट् च यथाकथंचनोपकारका इति विभागः। गृह्यते सोमो येषु ते ग्रहाः, गृह्यते वा सोम एभिरिति ग्रहा इति। [v]वेदिः उक्तलक्षणा। [v]बर्हिः प्रसिद्धम्। [v]अधिषवणे सोमाधिषवणफलके। [v]स्वगाकारः स्वमात्मानं गच्छन्तीति स्वगाः। ताः करोति कारयतीति च स्वगाकारः समाप्तिः। सूक्तवाक इत्यन्ये। [v]अवभृथः प्रसिद्धः ॥२३॥

अ॒ग्निश्च॑ मे घ॒र्मश्च॑ मेऽर्कश्च॑ मे॒ सूर्य॑श्च मे।
प्रा॒णश्च॑ मेऽश्वमे॒धश्च॑ मे पृ॒थि॒वी च॒ मेऽदि॑तिश्च मे।
दिति॑श्च मे॒ द्यौश्च॑ मेऽङ्गु॒लय॒: शक्व॑रयो॒ दिश॑श्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥४॥

अ॒ग्निः। घ॒र्मः। अ॒र्कः। सूर्यः।
प्रा॒णः। अ॒श्व॒मे॒ध इत्य॑श्व॒ऽमे॒धः। पृ॒थि॒वी। अदि॑तिः।
दितिः। द्यौः। अ॒ङ्गु॒लयः। शक्व॑रयः। दिशः॥ खीं ॥४॥

सा– अथैतान् यज्ञक्रतून् जुहोति–'अग्निश्च मे घर्मश्च मे' इति। पाठस्तु–'अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्चमे। प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च यज्ञेन कल्पन्ताम्' इति। [v]अग्निः चीयमानोऽग्निरग्निष्टोमो वा। [v]घर्मः प्रवर्ग्यः। [v]अर्कः महाव्रतम्। [v]सूर्यः, "सौर्यं चरुम्" इति। [v]प्राणः गवामयनम्। [v]अश्वमेधः प्रसिद्धः। [v]पृथिवी प्रसिद्धा। [v]अदितिः अन्तरिक्षम्। सैव [v]दितिः वृष्ट्यादिदात्री। [v]द्यौः द्युलोकः। [v]अङ्गुलयः प्रसिद्धाः। [v]शक्वरयः शक्तयः। [v]दिशः प्रसिद्धाः। एते [v]यज्ञेन [v]कल्पन्ताम् इति ॥४॥

आ– अथैतान् यज्ञक्रतून् जुहोति– 'अग्निश्च मे वर्मश्च मे' इति। [v]अग्निः अग्निष्टोमः। [v]घर्मः प्रवर्ग्यः। [v]अर्कः महाव्रतम्। [v]सूर्यः तस्यैव देवताभिधानम्। [v]प्राणः गवामयनम्। [v]अश्वमेधः प्रसिद्धः। [v]पृथिवी प्रसिद्धा। [v]अदितिः अन्तरिक्षम्। सैव [v]दितिः वृष्ट्यादिदात्री। [v]द्यौः द्युलोकः। [v]अङ्गुलयः। [v]शक्वरयः शक्ताः। [v]दिशः प्रसिद्धाः [v]च [v]यज्ञेन [v]कल्पन्ताम् ॥२४॥

1. H3 °चिन्नोप° for °चनोप°
2. B1 सोमाभि° for सोमाधि°
3. H2–3 तां for ताः
4. B1 एते; H2–3 °अर्थे for अन्ये
11. M2 तत्पाठः for पाठः
17. H3 इतरान् for एतान्
18. H2–3 °ध्यानम् for अभिधानम्
19. B1 om. प्रसिद्धा ... दिशः (20)

व्रतं च म ऋतवश्च मे संवत्सरश्च मे तपश्च मे ।
अहोरात्रे ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥५॥(७)॥

व्रतम् । ऋतवः । संवत्सरः । तपः ।
अहोरात्रे इत्यहोरात्रे । ऊर्वष्ठीवे इत्यूर्वष्ठीवे । बृहद्रथन्तरे इति बृहत्ऽरथन्तरे ।
॥ ॐ ॥५॥ (७) ॥

सा- अथ चतुर्थमन्त्रः – 'व्रतं च म ऋतवश्च मे संवत्सरश्च मे तपश्च मे । अहोरात्रे ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम्' इति । [v]व्रतं नियमः । [v]ऋतवः वसन्तादयः । [v]संवत्सरः प्रभवादिः । [v]तपः कृच्छ्रचान्द्रायणादि । [v]अहोरात्रे पुण्यहेतुत्वेन प्रसिद्धे । [v]ऊर्वष्ठीवे ऊरुत्वेन ष्ठीवनादिदोषरहिते । यद्वा- ऊरू [च अष्ठीवन्तौ च ऊर्वष्ठीवं] ते ऊर्वष्ठीवे । [v]बृहद्रथन्तरे सामनी । एते [v]यज्ञेन [v]कल्पन्ताम् ॥५॥

[इत्येकोनविंशेऽध्याये सप्तमोऽनुवाकः]

आ– 'व्रतं च मे' इति । [v]व्रतं नियमः । [v]ऋतवः वसन्तादयः । [v]संवत्सरः प्रभवादिः । [v]तपः कृच्छ्रचान्द्रायणादि । [v]अहोरात्रे पुण्यहेतुत्वेन प्रसिद्धे । [v]ऊर्वष्ठीवे ऊरुत्वेन ष्ठीवनादिदोषरहिते । यद्वा– ऊरू च अष्ठीवं शुद्धं ते उर्वष्ठीवे । [v]बृहद्रथन्तरे सामनी [v]यज्ञेन [v]कल्पन्ताम् इति ॥३५॥

[इति सप्तमोऽनुवाकः]

[अष्टमोऽनुवाकः]

एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे
सप्त च मे नव च मे नव च म एकादश च म
एकादश च मे त्रयोदश च मे त्रयोदश च मे ।
पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे
नवदश च मे नवदश च म एकविंशतिश्च म

9. M2 ऊरु अष्ठीवं शुन्धं ते ऊर्वष्ठीवे; S2 उरु अष्ठीवं शुन्धन्ध ते उर्वष्ठीवे; P1 उरु अष्ठीवं शुद्ध ते उर्वष्ठीवे for ऊरू ... उर्वष्ठीवे

13. H2–3 कृच्छ्रादि for कृच्छ्रचान्द्रायणादि; B1 °आदिः for °आदि

14. H2–3 ऊर्वत्वेन for ऊरुत्वेन

एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे ।
पञ्चविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे
नवविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च म एकत्रिꣳशच्च मे
त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥१॥

एका । तिस्रः । पञ्च । सप्त ।
नव । एकादश । त्रयोदशेति त्रयःऽदश ।
पञ्चदशेति पञ्चऽदश ।
सप्तदशेति सप्तऽदश ।
नवदशेति नवऽदश । एकविꣳशतिरित्येकऽविꣳशतिः ।
त्रयोविꣳशतिरिति त्रयःऽविꣳशतिः ।
पञ्चविꣳशतिरिति पञ्चऽविꣳशतिः ।
सप्तविꣳशतिरिति सप्तऽविꣳशतिः ।
नवविꣳशतिरिति नवऽविꣳशतिः ।
एकत्रिꣳशदित्येकऽत्रिꣳशत् ।
त्रयस्त्रिꣳशदिति त्रयःऽत्रिꣳशत् । ॥ ध्रैं ॥१॥

सा– अष्टमेऽनुवाकेऽयुजःस्तोमादयो होमा उच्यन्ते । तत्र प्रथममेकया कण्डिकयाऽयुजःस्तोमहोमार्था मन्त्रा उच्यन्ते ॥

"अथायुजः स्तोमान् जुहोत्येकया च म इति" (शब्रा ९·३·३·२)। पाठस्तु– 'एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च म एकादश च म एकादश च मे त्रयोदश च मे त्रयोदश च मे। पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म एकविंशतिश्च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोत्रिꣳशतिश्च मे पञ्चविꣳशतिश्च मे पञ्चꣳविंशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम्' इति। एकामादाय द्वितीयां विहाय तृतीयामादाय चतुर्थीं विहायेत्येवं क्रमेण त्रयस्त्रिंशत्पर्यन्तान् अयुग्मान् स्तोमान् जुहुयादित्यर्थः। "एतद्वै देवाः सर्वान्

25. P1 after इत्यर्थः ins. यज्ञेन कल्पन्तामित्यन्तिमवाक्यमादाय त्रयस्त्रिंशत्संख्या द्रष्टव्या। एतद्वै त्रयस्त्रिंशदित्यन्तो वै त्रयास्त्रिꣳशदिति श्रुतेः।

कामानाप्त्वाऽयुग्भिः स्तोमैः स्वर्गं लोकमायꣳस्तथैवैतद्यजमानः सर्वान् कामानाप्त्वा '' (शब्रा ९.३.३.२) इति श्रुतेः ॥१॥

आ– अथायुजःस्तोमान् जुहोति– ' एका च मे ' इति । '' एकामादाय द्वितीयां विहाय तृतीयामादाय चतुर्थीं विहायेत्येवं क्रमेण त्रयस्त्रिंशत्पर्यन्तान् अयुग्मान् स्तोमान् जुहोतीत्यर्थः । '' एतद्वै देवाः सर्वान् कामानाप्त्वा अयुग्भिः स्तोमैः स्वर्गं लोकमायन् । तथैवैतद्यमानः सर्वान् कामानाप्त्वा '' (शब्रा ९.३.३.२) इत्यादि श्रुतेः ॥२६॥

चत॑स्रश्च मे॒ऽष्टौ च॑ मे॒ऽष्टौ च॑ मे॒ द्वाद॑श च मे॒ द्वाद॑श च मे॒ षोळ॑श च मे
षोळ॑श च मे विꣳश॒तिश्च॑ मे विꣳश॒तिश्च॑ मे॒ चतु॑र्विꣳशतिश्च मे॒
चतु॑र्विꣳशतिश्च मे॒ऽष्टावि॑ꣳशतिश्च मे॒ऽष्टावि॑ꣳशतिश्च मे ।
द्वात्रिꣳशच्च मे॒ द्वात्रिꣳशच्च मे॒ षट्त्रिꣳशच्च मे॒ षट्त्रिꣳशच्च मे
चत्वा॒रिꣳशच्च॑ मे चत्वा॒रिꣳशच्च मे॒ चतु॑श्चत्वारिꣳशच्च मे॒ चतु॑श्चत्वारिꣳशच्च
मे॒ऽष्टाच॑त्वारिꣳशच्च मे य॒ज्ञेन॑ कल्पन्ताम् ॥२॥

चत॑स्रः । अ॒ष्टौ । द्वाद॑श ।
षोळ॑श । वि॒ꣳश॒तिः । चतु॑र्विꣳशति॒रि॒ति चतुः॑ऽविꣳशतिः ।
अ॒ष्टावि॑ꣳशति॒रि॒त्य॒ष्टाऽवि॑ꣳशतिः ।
द्वात्रिꣳशत् । षट्त्रिꣳश॒दि॒ति षट्ऽत्रिꣳशत् । च॒त्वा॒रिꣳशत् ।
चतु॑श्चत्वारिꣳश॒दि॒ति चतुः॑ऽचत्वारिꣳशत् ।
अ॒ष्टाच॑त्वारिꣳश॒दि॒त्य॒ष्टाऽच॑त्वारिꣳशत् । ॥ प्रिम् ॥२॥

सा– अथ ' चतस्रश्च मे ' इत्येकया कण्डिकया युग्मान् स्तोमान् जुहोति । तत्र श्रुतिः – '' अथ युग्मतो जुहोति चतस्रश्च म इति '' (शब्रा ९.३.३.४) इति । '' एतद्वै छन्दांस्यब्रुवन् यातयामा वा अयुजः स्तोमा युग्मभिर्वयꣳ स्तोमैः स्वर्गं लोकमयामेति '' (शब्रा ९.३.३.५) इति श्रुतेः । पाठस्तु– ' चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे षोळश च मे षोळश च मे विꣳशतिश्च

1. S2 M2 आप्नोति for first & second आप्त्वा
4. H2–3 after एवं ins. एव
19. P1 अत्र for तत्र
20. S2 M2 युग्मान् for युग्मतो
21. M2 after वा adds अयातयामा वा and om. अयुजः स्तोमाः; M2 S2 अयुग्मिः for युग्मैः; M2 S2 अवाप्नोति for अयाम; M2 तत्पाठः for पाठस्तु

अयुजःस्तोमहोमार्था मन्त्राः]

मे विंशतिश्च मे चतुर्विंशतिश्च मे चतुर्विंशतिश्च मेऽष्टाविंशतिश्च मेऽष्टाविंशतिश्च मे। द्वात्रिंशच्च मे द्वात्रिंशच्च मे षट्त्रिंशच्च मे षट्त्रिंशच्च मे चत्वारिंशच्च मे चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मेऽष्टाचत्वारिंशच्च मे यज्ञेन कल्पन्ताम्' इति । 'चतस्रः' इत्येतां संख्यामादाय चतुरोत्तरत्वेन स्थितान् युग्मान् स्तोमान् अष्टाचत्वारिंशत्पर्यन्तान् जुहोति । तथा च श्रुतिः "पूर्वंपूर्वमुत्तरेण संयुनक्ति । यथा वृक्षं रोहन्नुत्तरामुत्तरां शाखां समालम्भं रोहेत् तादृक्" (द्र. शब्रा ९.३.३.६) इति ॥२॥

आ– अथ युग्मान् जुहोति– 'चतस्रश्च मे' इति । "एतद्वै छन्दांस्यब्रुवन् यातयामा वा अयुजः स्तोमा युग्मभिर्वयं स्तोमैः स्वर्गं लोकमयामेति" (शब्रा ९.३.३.५) इति श्रुतेः । 'चतस्रः' इत्येतां संख्यामादाय चतुरुत्तरत्वेन चतुरुत्तरत्वेन स्थितान् युग्मान् स्तोमान् अष्टाचत्वारिंशत्पर्यन्तान् जुहोति । संख्यास्तत्र संख्येयनिष्ठाः । संख्येयास्तत्र स्तोमाः । स्तोमा अथान्नानि । "अन्नं वै स्तोमाः" (शब्रा ९.३.३.६) इति श्रुतेः । "पूर्वं पूर्वमुत्तरोत्तरेण संयुनक्ति । यथा वृक्षं रोहन्नुत्तरामुत्तरां शाखां समालभं रोहेत् तादृक्" (द्र. शब्रा ९.३.३.६) इत्यादि श्रुतेः ॥२७॥

त्र्यविश्च मे त्र्युवी च मे दित्युवाट् च मे दित्यौही च मे ।
पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे ।
तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम् ॥३॥

त्र्यविरिति त्रिऽअविः । त्र्युवीति त्रिऽअवी । दित्युवाळिति दित्युऽवाट् । दित्यौही । पञ्चाविरिति पञ्चऽअविः । पुञ्चावीति पुञ्चऽअवी । त्रिवत्स इति त्रिऽवत्सः । त्रिवत्सेति त्रिऽवत्सा । तुर्यवाळिति तुर्यऽवाट् । तुर्यौही ॥ ईं: ॥३॥

सा– अथ वयांसि जुहोति– 'त्र्यविश्च मे' इति । "पशवो वै वयांसि पशुभिरेवैनमेतदन्नेन प्रीणात्यथो पशुभिरेवैनमन्नेनाभिषिञ्चति" (शब्रा ९.३.३.७) इति श्रुतेः । पाठस्तु– त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे । पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे । तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम्' इति । त्र्यविरिति पशूनां वयोऽवस्थाभिधानम् । त्रिभिः [दोः]-श्रोणिगुदलक्षणैरङ्गैः स्विष्टकृतमग्निमवतीति 'त्र्यविः । त्र्यविरिति मेषः । 'त्र्यवी तत्स्त्री । 'दित्यवाट् द्विवर्षः पशुर्दित्यवाट् । दा दाने । दोऽवखण्डने । दानार्हं खण्डनार्हं वा दित्यं वहतीति दित्यवाट् । 'दित्यौही तत्स्त्री । पञ्चभिरवतीति 'पञ्चाविः । तत्स्त्री 'पञ्चावी । 'त्रिवत्सः, त्रयो वत्साः यस्येति

---

5. S2 M2 before पूर्वम् adds अथ युग्मतो जुहोति

23. P1 अविरिति for त्र्यविरिति

त्रिवत्सः । वयोऽवस्थाविशेषो वत्सः । तत्स्त्री ᵛत्रिवत्सा । ᵛतुर्यवाट् चतुर्थवाट् । तुर्यं चतुर्थं वत्सरं वहतीति तथा । तत्स्त्री ᵛतुर्यौही ॥३॥

आ– अथ वयांसि जुहोति– ' त्र्यविश्च मे ' इति । " पशवो वै वयांसि पशुभिरेवैनमेतदन्नेन प्रीणात्यथो पशुभिरेवैनमन्नेनाभिषिञ्चति " (शब्रा ९.३.३.७) इति श्रुतेः । त्र्यविः इति पशूनां वयोऽवस्थातोऽभिधानम् । त्रिभिर्दोःश्रोणिगुदलक्षणैरङ्गैः स्विष्टकृतमग्निमवतीति । ᵛत्र्यविः । त्र्यविरिति मेषः । ᵛत्र्यवी तत्स्त्री । ᵛदित्यवाट् द्विवर्षायुर्दित्यवाट् । दा दाने । दोऽवखण्डने । दानार्हं खण्डनार्हं वा दित्यं तं वहतीति दित्यवाट् । ᵛदित्यौही द्विहायनी । ᵛपञ्चाविः [—] पञ्चभिरवतीति पञ्चाविः । पञ्चवर्षीयः पशुर्वा पञ्चाविः । पूर्ववत् ' पञ्चावी च मे ' । ᵛत्रिवत्सः । त्रयो वत्साः यस्य सः त्रिवत्सः । वयोऽवस्थाभिः सहितो वत्सः । तत्स्त्री ᵛत्रिवत्सा । ᵛतुर्यवाट् चतुर्थवाट् चतुर्थं वत्सरं वहतीति । तथा [तत्-] स्त्री ᵛतुर्यौही ᵛच ᵛमे ᵛयज्ञेन ᵛकल्पन्ताम् ॥३८॥

पृष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च मे ।
ऋषभश्च मे वेहच्च मेऽनड्वांश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥४॥(८)॥

पष्ठवाळिति पष्ठऽवाट् । पष्ठौही । उक्षा । वशा ।
ऋषभः । वेहत् । अनड्वान् । धेनुः । च । मे । यज्ञेन । कल्पन्ताम् ॥ रिंम् ॥४॥(८)॥

सा– अथ द्वितीयमन्त्रः – ' पष्ठवाट् च मे पष्ठौही च मे उक्षा च मे वशा च मे ऋषभश्च मे वेहच्च मेऽनड्वाश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ' इति । ᵛपष्ठवाट् युगपार्श्वगामी । पष्ठं वहतीति पष्ठवाट् । ᵛपष्ठौही गर्भिणी गौः । ᵛउक्षा सेचनदक्षो बलीवर्दः । ᵛवशा वन्ध्या गौः । ᵛऋषभः प्रसिद्धः ।

---

1. M2 °विहितो for °विशेषो
3. H2-3 om. पशुभिरेव ... अथो (L 4)
6. H3 om. द्विवर्षायुर्दित्यवाट्, B1 द्विवर्षायस्तुर्दित्यवाट् for द्विवर्षायुर्दित्यवाट् H2 om. °युर्दित्यवाट्
7. B1 दित्यं ते द्वे बृहतीतिः, H2-3 दित्यं तद्वहनादिति for दित्यं तं वहतीति; H2-3 देयवाहिनी; B1 येयवाहिनी for द्विहायनी
8. B1 पञ्चाविःकारेकादश अङ्गैरित्येवं पञ्चभिरवतीति; H2-3 पञ्चाविः [...] पञ्चाभिरवतानि for पञ्चाविः ... °वतीति
10. H3 संवत्सरं for वत्सरं
16. M2 S2 om. पष्ठवाट्; P1 °गामि for गामी
17. P1 वृषभः for ऋषभ;

नामग्राहहोममन्त्राः]

[v]वेहद् गर्भाभिघातिनी गौः। [v]अनड्वान् बलीवर्दः। [v]धेनुः नवप्रसूतिका गौः। एते [v]यज्ञेन [v]कल्पन्ताम् इति। स्वस्वव्यापारसमर्था भवन्त्वित्यर्थः। एते उपभोगक्षमा भवन्तु ॥४॥

इत्यकोनविंशेऽध्यायेऽष्टमोनुवाकः।

आ– 'पष्ठवाट् च' इति। पष्ठवाट् युगपार्श्वगामी। पष्ठं वहतीति। [v]पष्ठौही बालगर्भिणी गौः। [v]उक्षा सेचनदक्षो बलीवर्दः। [v]वशा वन्ध्या गौः। वृ(? [v]ऋ) षभः प्रसिद्धः। [v]वेहद् गर्भोपघातिनी गौः। [v]अनड्वान् बलीवर्दः। [v]धेनुः नवप्रसूतिका गौः [v]यज्ञेन [v]कल्पन्ताम् ॥३९॥

[इत्यष्टमोऽनुवाकः]

[अथ नवमोऽनुवाकः।]

वाजाय स्वाहा प्रसवाय स्वाहाऽपिजाय स्वाहा क्रतवे स्वाहा।
वसवे स्वाहाऽहर्पतये स्वाहा।
अह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन
आन्त्यायनाय स्वाहाऽन्त्याय भौवनाय स्वाहा भुवनस्य पतये
स्वाहाऽधिपतये स्वाहा प्रजापतये स्वाहा ॥१॥

वाजाय। स्वाहा। प्रसवायेति प्रऽसवाय। अपिजायेत्यपिऽजाय। क्रतवे।
वसवे। अहर्पतये। अहःपतय इत्यहःऽपतये।
अह्ने। मुग्धाय। मुग्धाय। वैनꣳशिनाय। विनꣳशिन इति विऽनꣳशिने।
आन्त्यायनायेत्यान्त्यऽआयनाय। अन्त्याय। भौवनाय। भुवनस्य। पतये।
अधिपतय इत्यधिऽपतये। प्रजापतय इति प्रजाऽपतये॥ छं ॥१॥

सा– अथ नवमेऽनुवाके कल्पहोमार्था मन्त्रा उच्यन्ते। तत्र प्रथमकण्डिकायां नामग्राहहोम उच्यते। तत्र श्रुतिः – "अथ नामग्राहं जुहोति वाजाय स्वाहेत्येतद्वै देवाः सर्वान् कामानाप्त्वाऽथैनमेव

---

1. P1 om. गौः। एते
2. M2 भवन्तीत्यर्थः for भवन्त्वित्यर्थः; M2 भवन्तीत्यर्थः for भवन्तु।
20. M2 नवमानु° for नवमेऽनु°
21. P1 अत्र for तत्र; P1 om. वाजाय स्वाहा

[नामग्राहहोममन्त्राः

प्रत्यक्षमप्रीणꣳस्तथैवैतद्यजमानः सर्वान् कामानाप्त्वाऽथैतमेव प्रत्यक्षं प्रीणाति " (शब्रा ९·३·३·८) इति । तत्पाठस्तु – ' वाजाय स्वाहा प्रसवाय स्वाहाऽपिजाय स्वाहा । क्रतवे स्वाहा । वसवे स्वाहाऽहर्पतये स्वाहा । अह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन आन्त्यायनाय स्वाहाऽन्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाऽधिपतये स्वाहा प्रजापतये स्वाहा ' इति । वाजायेत्यादिनामान्येव गृहीत्वेति नामग्राहम् । ^{v}वाजाय अन्नाय ^{v}स्वाहा इति होममन्त्रः । ^{v}प्रसवाय अभ्यनुज्ञानाय । ^{v}अपिजाय । अप्सु जायत इत्यपिजः । सप्तम्या अलुक् । क्रतुः यागस्तस्मै । ^{v}वसवे निवासकर्त्रे । ^{v}अहर्पतये दिनपतये । ^{v}अह्ने दिवसाय । ^{v}मुग्धाय मोहमापन्नाय । *अमुग्धाय मोहरहिताय । ^{v}वैनꣳशिनाय विनाशशीलत्वादिधर्मसंबन्धिने, तथा तद्धर्मशीलाय । ^{v}विनꣳशिने विशेषेण नंष्टुं शीलमस्येति विनंशी तस्मै । अन्त्यस्य अवसानस्य निर्णयस्य संबन्धी आन्त्यः आन्त्ये अयनं यस्यासौ आन्त्यायनः । अन्ते भवाय निर्णीतस्वरूपाय ^{v}अन्त्याय । ^{v}भौवनाय भुवनसंबन्धिने । ^{v}भुवनस्य ^{v}पतये ^{v}अधिपतये । ^{v}प्रजापतये ^{v}स्वाहा इति होमार्थः ॥१॥

आ– अथ नामग्राहं जुहोति – ' वाजाय स्वाहा ' इति । " एतद्वै देवाः सर्वान् कामानाप्त्वाथैनमेव प्रत्यक्षमप्रीणꣳस्तथैवैतद्यजमानः सर्वान् कामानाप्त्वाथैनमेव प्रत्यक्षं प्रीणाति " (शब्रा ९.३.३.८) इति श्रुतेः । वाजायेत्यादिनामान्येव (गृहीत्वा) नामग्राहम् । ^{v}वाजाय अन्नाय । ^{v}स्वाहा इति होममन्त्रः । ^{v}प्रसवाय अभ्यनुज्ञा[ना]य । ^{v}अपिजः । अत्र व्यत्ययः । अपि अप्सु जायत इति अपिजः । अलुक् । [तस्मै ।] ^{v}क्रतुः यागस्तस्मै । ^{v}वसवे निवासकर्त्रे ^{v}स्वाहा । ^{v}अहर्पतये दिनपतये । ^{v}अह्ने दिवसाय । ^{v}मुग्धाय मोहमापन्नाय । *अमुग्धाय मोहरहिताय । ^{v}वैनꣳशिनाय विनाशशीलत्वादिधर्मसंबन्धिने । तथा तद्धर्मशीलाय । ^{v}विनꣳशिने विशेषेण नंष्टुं शीलमस्येति विनंशी, तस्मै । अन्त्यस्य अवसानस्य निर्णयस्य संबन्धी आन्त्यः । आन्त्ये अयनं यस्य स आन्त्यायनस्तस्मै ^{v}आन्त्यायनाय । अन्ते भवाय निर्णीतरूपाय ^{v}अन्त्याय । ^{v}भौवनाय भुवनसंबन्धिने । ^{v}भुवनस्य ^{v}पतये । ^{v}अधिपतये ^{v}प्रजापतये । ^{v}स्वाहा इति होमार्थः ॥४०॥

---

1. P1 after प्रीणाति adds वाजाय स्वाहा
5. M2 S2 om. गृहीत्वेति; M2 °ग्राहः for ग्राहम्
7; 17. [* संहितायां पदपाठे च ' मुग्धाय ' इत्येव दृश्यते ।]
7. P1 मोहनाय for मोहमापन्नाय
8. M2 S2 तमःशीलाय for तद्धर्मशीलाय; P1 M2 नष्टं for नंष्टुं
9. P1 अन्तस्य for अन्त्यस्य
10. M2 आन्त्याय for अन्त्याय
16. B1 om. अपि; B1 H2-3 जायन्ते for जायते
18. B1 विनाशिने for विनꣳशिने
19. H2-3 द्रष्टुं B1 नष्कं for नंष्टुं; B1 H2-3 अन्तस्य for अन्त्यस्य

नामग्राहहोममन्त्राः]

इयं ते राण्मित्राय यन्ताऽसि यमनः ।
ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाऽधिपत्याय ।।२।।

इयम् । ते । राट् । मित्राय । यन्ता । असि । यमनः ।
ऊर्जे । त्वा । वृष्ट्यै । त्वा । प्रजानामिति प्रऽजानाम् । त्वा । आधिपत्यायेत्याधिऽपत्याय ।
।। चुम् ।।२।।

सा– अथाऽभिषेचनम् । मन्त्रपाठस्तु– ' इयं ते राण्मित्राय यन्ताऽसि यमनः । ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाऽधिपत्याय ' इति । हे अग्ने, [v]ते तव [v]इयं [v]राट् इदं राज्यं, यत्र यत्र क्रियन्तेऽग्निष्टोमादयस्त (त्त) दिदं सर्वं त्वदीयं राज्यम् । तस्मिन् त्वमभिषिक्तोऽसि । कीदृशस्त्वम् । [v]मित्राय [v]यन्ता । मित्रस्य त्वं नियन्तासि । [v]यमनः । यमयतीति यमनः । सर्वेष्वग्निष्टोमादिकर्मसु नियमनकर्ता । अतः [v]ऊर्जे विशिष्टान्नरसाय त्वामभिषिञ्चामि । तथा [v]वृष्ट्यै वृष्ट्यर्थम् । तथा [v]प्रजानाम् [v]आधिपत्याय ' वसोर्धारयाऽभिषिञ्चामि ' इति शेषः । तथा च श्रुतिः – " प्रजानां त्वाऽधिपत्यायेत्यन्नं वा ऊर्गन्नं वृष्टिरन्नेनैवैनमेतत् प्रीणाति । यद्वेवाहेयं राण्मित्राय यन्ताऽसि यमन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाऽधिपत्यायेतीदं ते राज्यमभिषिक्तोऽसीत्येतन्मित्रस्य त्वं यन्ताऽसि " (शब्रा ९·३·३·१०-११) इति श्रुतेः ॥२॥

आ– [' इयं ते ' इति ।] [v]ते तव [v]इयम् इदं [v]राट् राज्यम् अभिषिक्तोऽसि । [v]यन्ता [v]मित्राय । व्यत्ययः । मित्रस्य त्वं नियन्ता [v]असि । स्वयं मनः यमयतीति [v]यमनः । [v]ऊर्जे विशिष्टान्नरसाय [v]वृष्ट्यै [v]त्वा [v]प्रजानाम् [v]आधिपत्याय च त्वाम् अग्निमभिषिञ्चामीति शेषः । " प्रजानामाऽऽधिपत्यायेत्यन्नं वा ऊर्गन्नं वृष्टिरन्नेनैवैनमेतत्प्रीणाति । यद्वेवाहेयं ते राण्मित्राय यन्ताऽसि यमन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाऽधिपत्यायेतीदं ते राज्यमभिषिक्तोऽसीत्येतन्मित्रस्य त्वं यन्ताऽसि " (शब्रा ९.३.३.१०-११) इत्यादि श्रुतेः ॥४१॥

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां
चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पताम् ।
वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा

---

7. P1 om. one यत्र
8. P1 तादृशः for कीदृशः; M2 after यन्ता ins. व्यत्ययः
11. S2 M2 om. एतत्; P1 यदेवा°; M2 S2 यद्देवा° for यद्वेवा°
13. P1 om. श्रुतेः ।
16. H3 after अग्निम् adds च त्वाम्

यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पताम् ।
ब्रह्म यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतां
ज्योतिर्यज्ञेन कल्पताᳪ स्वर्यज्ञेन कल्पताम् ।।३।।

आयुः । यज्ञेन । कल्पताम् । प्राणः । चक्षुः । श्रोत्रम् ।
वाक् । मनः । आत्मा । पृष्ठम् ।
ब्रह्म । यज्ञः । ज्योतिः । स्वः । यज्ञेन । कल्पताम् ।। थ्रें ।।३।।

सा– अथ कल्पान् जुहोति– 'आयुर्यज्ञेन कल्पताम्' इति । पाठस्तु– आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताᳪ श्रोत्रं यज्ञेन कल्पताम् । वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पताम् । ब्रह्म यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पताᳪ स्वर्यज्ञेन कल्पताम्' इति । [v]आयुः जीवनकालः । [v]यज्ञेन निमित्तभूतेन [v]कल्पताम् साध्यताम् । तथा प्राणादयः प्रसिद्धाः । तत्र प्राणादीनां स्थितिरुत्पत्तिश्च मनुष्याणां पुण्यपापाभ्यां भवति । तस्माद्यज्ञेन वेदविहितेन केवलपुण्येन राजसादिभावशून्येन प्राणादयः कल्पन्तामिति प्रार्थना । [v]आत्मा बुद्धिः । [v]पृष्ठं नाकपृष्ठम् । [v]ब्रह्म वेदः । [v]यज्ञः श्रीभगवत्पूजादिलक्षणः । [v]ज्योतिः ब्रह्मज्योतिः । [v]स्वः सुखम् । एते [v]यज्ञेन [v]कल्पन्तामिति संबन्धः ॥३॥

आ– अथ कल्पान् जुहोति– 'आयुर्यज्ञेन कल्पताम्' इति । [v]आयुः जीवनकालः । [v]यज्ञेन कारणभूतेन [v]कल्पतां क्रियतां, साध्यतामिति । तथा प्राणादयः प्रसिद्धाः । तत्र प्राणादीनां स्थितिरुत्पत्तिश्च मनुष्याणां पुण्यपापाभ्यां भवति । तस्माद् यज्ञेन वेदविहितेन केवल-पुण्येन राजसादिभावशून्येन प्राणादयः कल्पन्तामिति प्रार्थना । [v]आत्मा बुद्धिः । [v]पृष्ठं नाकपृष्ठम् । [v]ब्रह्म वेदः । [v]यज्ञः श्रीभगवत्पूजादिलक्षणः । [v]ज्योतिः ब्रह्मज्योतिः । [v]स्वः सुखम् । "एतावानेवाऽस्मिन् प्राणान् दधाति" (शब्रा ९.३.३.१२) इति श्रुतेः ॥४२॥

स्तोमश्च यजुश्च ऋक् च साम च बृहच्च रथन्तरं च ।
स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्रजा अभूम वेट् स्वाहा ।।४।।(९)।।

स्तोमः । यजुः । ऋक् । साम । बृहत् । रथन्तरमिति रथम्ऽतरम् । च ।।
स्वः । देवाः । अगन्म । अमृताः । अभूम । प्रजापतेरिति प्रजाऽपतेः ।
प्रजा इति प्रऽजाः । अभूम । वेट् । स्वाहा ।। ढूं ।।४।।९।।

15. B1 कल्पतां, H2–3 कल्पन्ताम् for कल्पान्

17. B1 केवलपुण्येन राजसादिना च शून्येन यज्ञेन; H2–3 केवलपुण्येन राजसादिभावः पशून् यज्ञेन for केवलपुण्येन राजसादिभावशून्येन

वसोर्धारामन्त्राः]

इमᳪ स्तनं द्वादश ॥१२॥ वाजश्चतस्रः ॥४॥ सत्यम् चतस्रः ॥४॥ ऊर्क् च चतस्रः ॥४॥ अश्मा च तिस्रः ॥३॥ द्वितीयोऽग्निश्च तिस्रः ॥३॥ अᳪशुः पञ्च ॥५॥ एका चतस्रः ॥४॥ वाजाय चतस्रः ॥४॥ नवानुवाकेषु त्रयश्चत्वारिᳪशत् ॥४३॥

[इति शुक्लयजुर्वेदकाण्वसंहितायाम् एकोनविंशोऽध्यायः ॥१९॥]

सा- वसोर्धारयाऽग्निमभिषिञ्चति, यजमान आत्मानमेव अभिषिञ्चतीति । मन्त्रपाठः – ' स्तोमश्च यजुश्च ऋक् च साम च बृहच्च रथन्तरं च । स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्रजा अभूम वेट् स्वाहा ' इति । ᵛस्तोमः स्तुतिः । ᵛयजुः प्रश्लिष्टपठितं यजुः । नियतपादबद्धा ᵛऋक् । गीतिप्रधानं ᵛसाम । ᵛबृहत् बृहत्साम । ᵛरथन्तरं रथन्तरसाम । मदीयमिदं सर्वं यज्ञेन कल्पतामिति अनुषक्तेन पूर्वेण अन्वयः । स्तोमादिसर्वं स्वस्वव्यापारसमर्थं भवत्वित्यर्थः । पुनः प्रार्थयते– हे ᵛदेवाः ᵛस्वः स्वर्गम् ᵛअगन्म वयं स्वर्गसुखं प्राप्तवन्तः । गत्वा च ᵛअमृताः अमर्त्याः ᵛअभूम । देवान् गत्वा पुनः ᵛप्रजापतेः हिरण्यगर्भस्य ᵛप्रजाः ᵛअभूम भवेमेति प्रार्थना । ᵛवेट् ᵛस्वाहा इति होमार्थः । " वेट् स्वाहेति वषट्कारो हैष परोक्षं यद्वेट्कारो वषट्कारेण वा वै स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते " (शब्रा ९.३.३.१४) इति श्रुतेः ॥४॥

इत्येकोनविंशेऽध्याये नवमोऽनुवाकः ॥९॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे काण्वसंहिताभाष्ये एकोनविंशोऽध्यायः ॥१९॥

4. after अध्यायः ॥ The Ānandavana edition adds वाजः प्राणस्यु-रोजश्च ज्यैष्ठ्यं सत्यं क्रमेण हि । वित्तं यन्ता शमूर्क् च ऋतं रयिस्तु त्रीद्वयः ॥१॥ अश्मा चाग्निर्वसू चाग्निर्मित्रो वै पृथिवी तथा । अᳪशुस्त्वाग्रयणो हि स्रुचश्चाग्निस्ततः परम् ॥२॥ व्रतं चैका चतस्रश्च त्र्यविस्तु पष्ठवाट् च मे । वाजायेयं त आयुर्हि स्तोमोऽध्याये नवाधिके ॥३॥ दशैवं पठमानाः स्युर्यथासंख्यं नरोऽपि ये । ते वै धन्यास्तु देवानामर्चने नात्र संशयः ॥४॥

8. S2 M2 om. मदीयमिदं ... प्रार्थयते (L 9)

9. S2 M2 om. स्वः,

10. M2 om. वयं, M2 S2 P1 प्राप्ताः for प्राप्तवन्तः

17. M2 after अध्यायः add समाप्तः ॥ चमकभाष्यं समाप्तम् । शुभमस्तु The Ms ends here

आ– अमृतेनैवैनमेतदभिषिञ्चति । अथाह– [' स्तोमश्च ' इति ।] [V]स्तोमः स्तुतिः । [V]यजुः प्रश्लिष्टपठितं यजुः । नियतपादबद्धा [V]ऋक् । गीतिप्रधानं [V]साम । [V]बृहत् बृहत्साम । [V]रथन्तरं रथन्तरसाम । [V]स्वः [V]देवाः वयं स्वर्गम् [V]अगन्म स्वर्गसुखं प्राप्त[वन्तः] । गत्वा च [V]अमृताः अमर्त्याः [V]अभूम देवाः जाताः । ततः [V]प्रजापतेः हिरण्यगर्भस्य [V]प्रजाः [V]अभूम भवेमेति प्रार्थना । [V]वेट् [V]स्वाहा इति होमार्थः । " वेट्स्वाहेति वषट्कारो हैष परोक्षं यद्वेट्कारो वषट्कारेण वा वै स्वाहाकारेण देवेभ्योऽन्नं प्रदीयते " (शब्रा ९.३.३.१४) इति श्रुतेः ॥४३॥

इति परमहंसपरिव्राजकाचार्यवासुदेवपुरीपूज्यपादपरमकारुण्यासादित-श्रीकृष्णभक्ति-साम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदि-श्रीमदानन्द-बोधभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे एकोनविंशोऽध्यायः ॥

2. H2-3 °पदपदबन्धन; B1 पादपदबद्धा for °पादबद्धा ।

4. B1 after अमर्त्याः ins. च

5. B1 om. वेट्स्वाहेति ... प्रदीयते (L 6)

6. B1 इत्यादि for इति

7. H2–3 °परि° for °पुरी°; B1 om. °परिव्राजकः ... विरचिते (L 9)

अथ विंशोऽध्यायः ।

[अथ प्रथमोऽनुवाकः ।]

सा- यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

एकोनविंशेऽध्याये वसोर्धारादिहोममन्त्रा उक्ताः । अथ विंशेऽध्याये वाजप्रसवीयादिमन्त्रा उच्यन्ते ॥

वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषक् ॥१॥

वाजस्य नु ॥१॥

कात्यायनः – "वाजप्रसवीयं जुहोति सप्तभिर्ऋग्भिः" (काश्रौ ?) इति । प्रथममन्त्रः – 'वाजस्य नु ——।' व्याख्यातोऽयं मन्त्रः ॥१॥

आ– अथ वाजप्रसवीयं जुहोति सप्तभिर्ऋग्भिः । 'वाजस्य नु प्रसवे' इति । सर्वस्याध्यायस्य विवस्वानृषिः । तत्र प्रतिकर्मानुसारेण ब्राह्मणानुसारेण च ऋषयो वेदितव्याः । अत्र विशेषतः सप्तर्षीणाम् आर्षं 'वाजस्य' इति । जगत्यतिजगती वा पृथिवीदेवत्या । चतुर्थपादः सावित्रः । ब्राह्मणवाक्यानुसारेण वाजप्रसवीयहोमे विनियुक्तोऽयं मन्त्रः । "अथातो वाजप्रसवीयं जुहोति" (शब्रा ९·३·४·१) इति । व्याख्यातः ॥१॥

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसाऽऽगमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥२॥

---

5. S2 om. °होम°; S2 प्रसवादि° for प्रसवीयादि°
9. P1 after इति । adds सर्वस्याध्यायस्य विवस्वानृषिः । तत्राद्याया [ऋचः] पृथिवी देवता अतिजगती छन्दः
10. S2 पाठस्तु for प्रथममन्त्रः
11. H2 हरिः ॐ ॥ अथ वाजसनेयं for अथ वाजप्रसवीयं ॥
14. H3 चतुर्थः for चतुर्थपादः

विश्वे । अद्य । मरुतः । विश्वे । ऊती ।
विश्वे । भवन्तु । अग्नयः । समिद्धा इति सम्ऽइद्धाः ।
विश्वे । नः । देवाः । अवसा । आ । गमन्तु ।
विश्वम् । अस्तु । द्रविणम् । वाजः । अस्मे इत्यस्मे ॥ त्रः ॥२॥

सा– अथ द्वितीयः – ' विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः । विश्वे नो देवा अवसाऽऽ गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ' इति । विश्वे सर्वे मरुतः अद्य अस्मिन् अहनि । ' आ गमन्तु ' इत्यनुषङ्गः । ' विश्व ऊती विश्वे ' इति सर्वनामसामान्यदेवगणप्रतिपत्तिजनकम् । अतः तन्निराकाङ्क्षीकरणाय विशिष्टो देवगण इहाध्याह्रियते । विश्वे च देवगणा वसवो रुद्रा आदित्याश्च अद्य ऊती ऊत्या अवनेन तर्पणेन निमित्तभूतेन आगमन्तु । तदागमनेन च विश्वे अग्नयः गार्हपत्य-प्रभृतयः समिद्धाः सम्यग् दीप्ताः भवन्तु । विश्वे देवाः च नः अस्माकम् अवसा अन्नेन हविर्लक्षणेन निमित्तभूतेन आगमन्तु आगच्छन्तु । तेषां च तुष्ट्या विश्वं सर्वम् अस्तु द्रविणं भूमिं हिरण्यादिधनं, वाजः च अन्नम् अस्मे अस्माकमस्तु ॥

अन्यथा वा संबन्धः । विश्वे मरुत अद्यागमन्तु । विश्वे च देवगणा ऊत्या निमित्तभूतया आगमन्तु । विश्वे च नो देवा अवसा निमित्तभूतेन आगमन्तु । तदागमनेन च विश्वे भवन्तु अग्नयः समिद्धाः । होमार्थमग्नयः प्रज्वाल्यन्ते । ततो यागोत्तरकालं विश्वमस्तु द्रविणं वाजो अस्मे तुल्यम् ॥२॥

आ– ' विश्वे अद्य ' इति वैश्वदेवी त्रिष्टुप् । ' विश्वे अद्य मरुतः ' । अस्मिन्नहनि विश्वे मरुतः देवाः । ' आगमन्तु ' इत्यनुषङ्गः । ' विश्वे ऊती विश्वे ' इति सर्वनाम्ना सामान्येन देवतागणप्रतिपत्तावपि निराकाङ्क्षीकरणाय विशिष्टा देवतागणा इहाध्याह्रियन्ते । विश्वे च देवगणाः वसवो रुद्राः आदित्याः अद्य ऊती । व्यत्ययः । विश्वया ऊत्या अवनेन तर्पणेन निमित्तभूतेन आगमन्तु । तदागमनेन च ' विश्वे भवन्त्वग्नयः समिद्धाः ' । विश्वे अग्नयः गार्हपत्यप्रभृतयः अग्नयः समिद्धाः सम्यग् दीप्ताः भवन्तु । ' विश्वे नो देवा अवसा-ऽऽगमन्तु ' । नः अस्माकम् अवसा अन्नेन हविर्लक्षणेन निमित्तभूतेन विश्वे देवाः आगमन्तु आगच्छन्तु । समागतानां देवानां च संतुष्ट्या विश्वं सर्वं द्रविणं हिरण्यादिकं धनम् अस्मे अस्माकम् अस्तु । वाजः अन्नं च अस्तु ॥ २॥

---

5. P1 after द्वितीयः adds वैश्वदेवी त्रिष्टुप्

18. B1 विशिष्टदेवतागणः for विशिष्टा देवतागणाः

20. B1 om. विश्वे अग्नयः

21. H3 गार्हपत्यः for गार्हपत्यप्रभृतयः ।

वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः ।
वाजो नो विश्वैर्देवैर्धनसाता इहावतु ॥३॥

वाजः । नः । सप्त । प्रदिश इति प्रऽदिशः । चतस्रः । वा । परावत इति पराऽवतः ।
वाजः । नः । विश्वैः । देवैः । धनसाता इति धनऽसातौ । इह । अवतु ॥ द्रं ॥३॥

सा– अथ तृतीयः – ' वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः । वाजो नो विश्वैर्देवैर्धनसाता इहावतु ' इति । ˅वाजः अन्नं ˅नः अस्माकं ˅सप्त ˅प्रदिशः प्रकृष्टा दिशः ˅चतस्रः अधश्चोर्ध्वं च मध्यं चेति तिस्रः । वाशब्दः समुच्चयार्थः । ˅परावतः परावच्छब्दो दूरवचनः । ' महर्जनस्तपः सत्यम् ' इत्येते लोका उच्यन्ते । ते हि त्रिलोकानतीत्य वर्तन्ते । ता एताः प्रदिशः परावतश्च अस्माकं वाजः अस्त्विति शेषः । अस्माकमन्नसाधका भवन्त्वित्यर्थः । दिशः वाजः वाजम् अन्नं पूरयन्त्विति वा । एवं पूरितः ˅विश्वैः ˅देवैः सहितः ˅वाजः अन्नं ˅धनसातौ धनसंभजनकाले प्राप्ते ˅इह यज्ञे लोके वा ˅नः अस्मान् ˅अवतु पालयतु ॥३॥

आ– ' वाजो नः ' इति । वाजदेवत्याऽनुष्टुप् । ˅वाजः ˅नः अस्माकं ˅सप्त ˅प्रदिशः प्रकृष्टा दिशः सप्त । दिशः ˅चतस्रः, अधश्चोर्ध्वं मध्यं चेति तिस्रः । वाशब्दः समुच्चयार्थः । ˅परावतः । परावच्छब्दो दूरवचनः । ' महर्जनस्तपः सत्यम् इत्येते लोका उच्यन्ते । ते हि त्रीन् लोकानतीत्य वर्तन्ते । ता एताः प्रदिशः अस्माकं वाजः अस्त्विति शेषः । अस्माकमन्नसाधका भवन्त्विति शेषः । दिशः वाजः वाजमन्नं पूरयन्त्विति वा । एवं पूरितः ˅विश्वैः ˅देवैः सहितः ˅वाजः ˅धनसातौ धनसंभजनकाले प्राप्ते ˅इह यज्ञे लोके वा ˅नः अस्मान् ˅अवतु पालयतु ॥३॥

वाजो नो अद्य प्र सुवाति दानं वाजो देवाँ३ ऋतुभिः कल्पयाति ।
वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजपतिर्भवेयम् ॥४॥

5. P1 after तृतीयः add विश्वदेवत्यानुष्टुप्
8. S2 om. परावतश्च
9. S2 शेषः for अर्थः
12. H2 Ms abruptly ends with : वाजो न इति ।
13. H3 मध्ये for मध्यं
14. H3 अपामार्जनः for महर्जनः, B1 तप्तः for तपः
15. B1 before ताः adds ते तव; H3 ते च for ताः

वाजः । नः । अद्य । प्र । सुवाति । दानम् ।
वाजः । देवान् । ऋतुभिरित्यृतुऽभिः । कल्पयाति ।
वाजः । हि । मा । सर्ववीरमिति सर्वऽवीरम् । चकार ।
सर्वाः । आशाः । वाजपतिरिति वाजऽपतिः । भवेयम् ॥ ङ्यौ३ ॥४॥

सा- अथ चतुर्थः - 'वाजो नो अद्य प्र सुवाति दानं वाजो देवा३ ऋतुभिः कल्पयाति । वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजपतिर्भवेयम् ' इति । वाजः नः अस्माकम् अद्य प्रसुवाति अन्नादिदानमभ्यनुजानातु । ऋतुभिः कालैश्च सह देवान् वाजः कल्पयाति यथास्थानं कल्पयतु । वाजः अन्नम् । हिशब्दः समुच्चयार्थः । वाजश्च मां सर्ववीरं सर्वैर्वरणीयं सर्वेभ्यः श्रेष्ठं वा चकार करोतु । ततः सर्वाः आशाः दिशो वाञ्छा वा वाजपतिः सन् भवेयम् अभिभवेम इत्याशीः ॥४॥

आ- 'वाजो नो अद्य प्रसुवाति दानम् ' इति, 'वाजः पुरस्तादुत ' इति च द्वे वाजदेवत्ये त्रिष्टुभौ । वाजः नः अस्माकम् अद्य । वाजः दानम् इति निरुपपदत्वात् योग्यतया सर्वैः संबन्धः । प्रसुवाति अन्नादिदानमभ्यनुजानातु । ऋतुभिः कालैश्च सह देवान् वाजः कल्पयाति यथास्थानं कल्पयतु । वाजः हि मा सर्ववीरं चकार सर्वेषां वीरम् उत्साहादि-गुणयुक्तं मां चकार । सर्वाः आशाः वाजपतिः भवेयम् । अत्र व्यत्ययः । सर्वासु आशासु दिक्षु वाजपतिः वाजानां पतिर्भवेयमिति प्रार्थना ॥४॥

वाजः पुरस्तादुत मध्यतो नो वाजो देवान् हविषा वर्धयाति ।
वाजो हि मा सर्ववीरं चकार विश्वा आशा वाजपतिर्जयेयम् ॥५॥

वाजः । पुरस्तात् । उत । मध्यतः । नः ।
वाजः । देवान् । हविषा । वर्धयाति ।
वाजः । हि । मा । सर्ववीरमिति सर्वऽवीरम् । चकार ।
विश्वाः । आशाः । वाजपतिरिति वाजऽपतिः । जयेयम् ॥ ज्यों ॥५॥

---

5. P1 after चतुर्थः adds द्वे वाजदेवत्ये त्रिष्टुभौ

7. S2 वाजं for वाजः

8. S2 हिमा for अन्नम्

12. B1 before वाजः adds वाजदेवत्यो

सा– अथ पञ्चमः – ' वाजः पुरस्तादुत मध्यतो नो वाजो देवान् हविषा वर्धयाति । वाजो हि मा सर्ववीरं चकार विश्वा आशा वाजपतिर्जयेयम् ' इति । ^{v}वाजः ^{v}पुरस्तात् । ' अस्तु ' इति वाक्यशेषः । ^{v}उत अपि च ^{v}मध्यतः ^{v}नः अस्माकमस्तु । ^{v}वाजः च ^{v}हविषा ^{v}देवान् ^{v}वर्धयाति वर्धयतु । ^{v}वाजः च मां सर्ववीरं ^{v}चकार करोतु । ततः ^{v}विश्वाः सर्वाः ^{v}आशाः दिशः ^{v}वाजपतिः सन्नहं ^{v}जयेयम् इति दिग्रूपतया व्यापकता प्रार्थ्यते ॥५॥

आ– ' वाजः पुरस्तात् ' इति । ^{v}पुरस्तात् पूर्वस्यां दिशि ^{v}वाजः नः अस्माकम् अस्तु । ^{v}उत अपि च ^{v}मध्यतः वाज ^{v}नः अस्माकमस्तु । ^{v}वाजः ^{v}देवान् ^{v}हविषा ^{v}वर्धयाति । ^{v}वाजः ^{v}हि ^{v}मा ^{v}सर्ववीरं ^{v}चकार करोतु । ^{v}विश्वाः ^{v}आशाः ^{v}वाजपतिः अहं ^{v}जयेयम् इत्याशीः ॥५॥

सं मा॑ सृजामि॒ पय॑सा पृथि॒व्याः सं मा॑ सृजाम्य॒द्भिरोष॑धीभिः ।
सो॒ऽहं वाजं॑ सनेयमग्ने ॥६॥

सम् । मा॒ । सृ॒जा॒मि॒ । पय॑सा । पृ॒थि॒व्याः ।
सम् । मा॒ । सृ॒जा॒मि॒ । अ॒द्भिरित्य॒त्ऽभिः । ओष॑धीभिः ।
सः । अ॒हम् । वाज॑म् । स॒ने॒य॒म् । अ॒ग्ने ॥ घुं ॥६॥

सा– अथ षष्ठः– ' सं मा सृजामि पयसा पृथिव्याः सं मा सृजाम्यद्भिरोषधीभिः । सोऽहं वाजं सनेयमग्ने ' इति । ' सोऽहं वाजम् ' इति तच्छब्दयोगाद्यदोऽत्र अध्याहारः । यः अहं ^{v}संसृजामि ^{v}मा माम् आत्मानं ^{v}पयसा रसेन ^{v}पृथिव्याः संबन्धिना । ^{v}संसृजामि च ^{v}मा माम् ^{v}अद्भिः ^{v}औषधीभिः च । ^{v}सः ^{v}अहं संसृष्टपयःप्रभृतिशरीरः ^{v}वाजं ^{v}सनेयं संभजेयं त्वत्प्रसादात् हे ^{v}अग्ने । यद्वा– अग्निरेवोच्यते । अस्मदादेशस्य माशब्दस्य त्वाशब्दं कृत्वा युक्ततरमेतत् तद्व्याख्यानम् । योऽहं हे अग्ने, संसृजामि त्वां पयसा । पृथिव्याः संसर्गश्च होमाभिप्रायः । शिष्टं समानम् ॥६॥

आ– ' सं मा सृजामि ', ' पयः पृथिव्याम् ' इति च द्वे विराजावाग्नेय्यौ । ' सं मा सृजामि पयसा पृथिव्याः ' । ^{v}पृथिव्याः संबन्धिना ^{v}पयसा रसेन योऽहं ^{v}मा माम् आत्मानं

6. H3 वाजं for वाजः and before अस्तु adds स्वच्छ
7. H3 om. उत; B1 इति for उत
8. H3 om. वाजपतिः अहं; B1 after अहं adds विश्वाः
15. P1 after षष्ठः adds आग्नेयी विराट्
20. P1 पयः for पयसा

[v]संसृजामि । ‘ सं मा सृजाम्यद्भिरोषधीभिः ’ । हे श्रीभगवन् [v]अग्ने, त्वत्प्रसादात् [v]अद्भिः सृष्टोऽहं यः ताभिरद्भिः [v]ओषधीभिः सृजामि । [v]सः [v]अहम् ओषधीभिः करणैः [v]वाजम् अन्नं [v]सनेयं संभजेयमिति । होमाभिप्रायोऽयम् ॥६॥

पर्यः पृथि॒व्यां पय॒ ओष॑धीषु॒ पयो॑ दि॒व्य॒न्तरि॑क्षे॒ पयो॑ धाः ।
पय॑स्वतीः प्र॒दिश॑ः सन्तु॒ मह्य॑म् ॥
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॑ऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो हस्ता॑भ्याम् ।
सर॑स्वत्यै वा॒चो य॒न्तुर्य॒न्त्रेणा॒ग्नेः साम्रा॑ज्येना॒भि षि॑ञ्चामि ॥७॥(१)

पर्यः । पृ॒थि॒व्याम् । पर्यः । ओष॑धीषु । पर्यः । दि॒वि । अ॒न्तरि॑क्षे । पर्यः । धाः ।
पय॑स्वतीः । प्र॒दिश॒ इति॑ प्र॒ऽदिश॑ः । स॒न्तु॒ । मह्य॑म् ॥
सर॑स्वत्यै । वा॒चः । य॒न्तुः । य॒न्त्रेण॑ ।
अ॒ग्नेः । साम्रा॑ज्ये॒नेति॒ साम्ऽरा॑ज्येन । अ॒भि । सि॒ञ्चा॒मि ॥ त्र॒राः ॥७॥(१)॥

सा– अथ सप्तमः – ‘ पयः पृथिव्यां पय ओषधीपु पयो दिव्यन्तरिक्षे पयो धाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ’ इति । अग्निरुच्यते हविर्वा । हे श्रीभगवन्नग्ने, [v]पृथिव्यां यत् [v]पयः क्षीरादिजातं तत् [v]धाः धेहि । [v]ओषधीषु यत् [v]पयः मधुरादिरसस्तद्धेहि । [v]दिवि द्युलोके यत् [v]पयः अमृतलक्षणं तद्धेहि । [v]अन्तरिक्षे यत् [v]पयः हविःपरिणामलक्षणं तद्धेहि । अतस्त्वाम् अग्निं प्रार्थये । [v]पयस्वतीः । अत्र व्यत्ययः । [v]मह्यं दिशः [v]प्रदिशः च पयस्वत्यः रसवत्यः [v]सन्तु भवन्तु ॥

कात्यायनः – “ अथैनं दक्षिणबाहुमनु पर्यावृत्य यजमानमभिषिञ्चति देवस्य त्वेति ” (काश्रौ ?) इति । [‘ देवस्य त्वा ’ इति] व्याख्यातो मन्त्रः ॥

[v]सरस्वत्यै । व्यत्ययः । सरस्वत्याः [v]वाचः [v]यन्तुः नियन्तुः [v]अग्नेः [v]यन्त्रेण यमनेन तदाज्ञया [v]साम्राज्येन निमित्तभूतेन सवित्रा प्रसूतोऽहं कृष्णाजिनोपविष्टं यजमानम् [v]अभिषिञ्चामि ॥७॥

[इति विंशेऽध्याये प्रथमोऽनुवाकः ॥१॥]

आ– ‘ पयः पृथिव्याम् ’ इति । अग्निरुच्यते । हविर्वा । हे श्रीभगवन्नग्ने, [v]पृथिव्यां यत् [v]पयः क्षीरादिजातं तत् [v]धाः धेहि । [v]औषधीषु यत् [v]पयः मधुरादिरसः तद्धेहि । [v]दिवि द्युलोके यत् [v]पयः अमृतलक्षणं तद्धेहि । [v]अन्तरिक्षे यत् [v]पयः हविःपरिणामलक्षणं तद्धेहि ।

2. H3 Ms ends with करणैः

12. P1 after सप्तमः adds पूर्ववत्

23. B1 सक्षीरादि for क्षीरादि°

24. B1 तद्धः for हविः°

अतस्त्वामग्निं प्रार्थये । ‘ पयस्वतीः प्रदिशः सन्तु मह्यम् ’ । ^{v}मह्यं दिशः ^{v}प्रदिशः च ^{v}पयस्वतीः । अत्र व्यत्ययः । पयस्वत्यः रसवत्यः ^{v}सन्तु भवन्तु ॥

अथैनं दक्षिणं बाहुमनु पर्यावृत्य यजमानमभिषिञ्चति– ‘ देवस्य त्वा ’ इति ॥

व्याख्यातो मन्त्रः ॥

‘ सरस्वत्यै वाचः ’ इति । लिङ्गोक्तदेवत्यं यजुः । ‘ वाग्वै सरस्वती ’ । तस्याः सरस्वत्याः ^{v}वाचः ^{v}यन्तुः नियन्तुः ^{v}अग्नेः ^{v}यन्त्रेण यमनेन तदाज्ञया ^{v}साम्राज्येन निमित्तभूतेन सवित्रा प्रसूतोऽहं कृष्णाजिनोपविष्टं यजमानम् ^{v}अभिषिञ्चामि ॥७॥

[अथ द्वितीयोऽनुवाकः ।]

ऋताषाळृतधामाऽग्निर्गन्धर्वः । तस्यौषधयोऽप्सरसो मुदो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥१॥

ऋताषाट् । ऋतधामेत्यृतऽधामा । अग्निः । गन्धर्वः ।
तस्य । ओषधयः । अप्सरसः । मुदः । नाम ।
सः । नः । इदम् । ब्रह्म । क्षत्रम् । पातु ।
तस्मै । स्वाहा । वाट् । ताभ्यः । स्वाहा ॥ प्रः ॥१॥

सा– प्रथमे वाजप्रसवीयहोममन्त्रा उक्ताः । द्वितीये राष्ट्रभृद्धोमादिमन्त्रा उच्यन्ते ॥

कात्यायनः – “ द्वादशगृहीतं विग्राहं जुहोत्यृताषाडिति । प्रतिस्वाहाकार[१] राष्ट्रभृतो वाट्कारान्तः पूर्वः पूर्वो मन्त्रः ” (काश्रौ १८.५-१६) इति । अथ राष्ट्रभृतो जुहोति द्वादशगृहीतेनाज्येन । ता द्वादश चाहुतयो भवन्ति द्वादश यजूंषि ‘ स नो भुवनस्य पते ’ इत्येतस्याः प्राक् ‘ ऋताषाट् ’ इत्यादीनि । तत्र प्रथममन्त्रपाठस्तु– ‘ ऋताषाळृतधामाऽग्निर्गन्धर्वः । तस्यौषधयोऽप्सरसो मुदो नाम । स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ’ इति । अग्निरुच्यते । ऋतं सत्यं ब्रह्मलक्षणं महत् तेजस्तत् सहते इति ^{v}ऋताषाट् । दीर्घश्छान्दसः । ^{v}ऋतधामा ऋतं सत्यं धाम स्थानं यस्य सः । तथोक्तः ^{v}अग्निः ^{v}गन्धर्वः, गन्धं कामयत इति । ^{v}तस्य चाग्नेर्गन्धर्वस्य ^{v}ओषधयः ^{v}अप्सरसः । तासां च ^{v}मुदः ^{v}नाम । “ ओषधिभिर्हीदं सर्वं मोदते ” (शब्रा ९.४.१.७) इति मुदः । ^{v}सः अग्निर्गन्धर्वः ^{v}नः अस्माकम् ^{v}इदं ^{v}ब्रह्म ब्राह्मणजातिं ब्राह्मणं (? ण्यं) च । क्षतात् त्रायत इति ^{v}क्षत्रम् । तदुभयं ^{v}पातु रक्षतु । ^{v}तस्मै ^{v}स्वाहा ^{v} वाट् । सुहुतं हविरस्तु । वषट्कारेण ^{v}ताभ्यः च औषधिभ्यः ^{v}स्वाहा ॥१॥

---

16. P1 om. द्वादश ... मन्त्र इति (L 10)

19. P1 after पाठस्तु adds द्वादश यजूंषि आग्नेयानि गन्धर्वाप्सरोदेवत्यानि । आस्तारपङ्क्तिः ।

[राष्ट्रभृद्होमादिमन्त्राः

आ– अथ राष्ट्रभृतो जुहोति– " राष्ट्रं बिभ्रति मिथुना उ एते देवाः तस्मादेता राष्ट्रभृतः आज्येन द्वादशगृहीतेन ता उ द्वादशैवाहुतयो भवन्ति । .... पुंसे पूर्वस्मै जुहोति। अथ स्त्रीभ्यः " इत्यभिधाय " वषट्कारेण च स्वाहाकारेण च पुꣳसे जुहोति स्वाहाकारेणैव स्त्रीभ्यः " (शब्रा ९.४.१.५-६) इत्युक्त्वा 'ऋताषाळृतधामाऽग्निः' इति द्वादश यजूंषि आग्नेयानि गन्धर्वाप्सरोदेवत्यानि। ^{v}ऋताषाट् ऋतं सत्यं ब्रह्मलक्षणं महत्तेजस्तत्सहत इति ऋताषाट् । छान्दसो दीर्घः । ऋतं सत्यं धाम स्थानं यस्य सः ^{v}ऋतधामा ^{v}अग्निः, स एव ^{v}गन्धर्वः । 'तस्यौषधयो अप्सरसः' ॥ ^{v}तस्य चाग्नेर्गन्धर्वस्य ^{v}ओषधयः ^{v}अप्सरसः स्त्रियः ^{v}मुदः ^{v}नाम । ओषधयो मुदः प्रीतय इत्युच्यन्ते । मोदहेतुत्वेन ^{v}सः अग्निः गन्धर्वः ^{v}नः अस्माकम् ^{v}इदं ^{v}ब्रह्म ब्राह्मणजातिं ब्राह्मण्यं च यजमानस्य । ^{v}क्षत्रम्, क्षतात् त्रायत इति क्षत्रं ^{v}पातु । ^{v}तस्मै अग्नये गन्धर्वाय ^{v}स्वाहा ^{v}वाट् । वषट्कारसहितः । स्वाहाकारो होमार्थ एव । ^{v}ताभ्यः ओषधीभ्यः ताभ्यः अप्सरोभ्यः । " ऋताषाळृतधामेति । सत्यसाट् सत्यधामेत्येतदग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसः इत्यग्निर्हि गन्धर्व ओषधिभिरप्सरोभिर्मिथुनेन सहोच्चक्राम मुदो नामेत्योषधयो वै मुद ओषधिभिर्हीदꣳ सर्वं मोदते । स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहेति तस्योक्तो बन्धुः " (शब्रा ९.४.१.७) इति श्रुतेः ॥९॥

सꣳहितो विश्वसामा सूर्यो गन्धर्वः ।
तस्य मरीचयोऽप्सरस आयुवो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥२॥

सꣳहित इति सम्ऽहितः । विश्वसामेति विश्वऽसामा । सूर्यः । गन्धर्वः ।
तस्य । मरीचयः । अप्सरसः । आयुवः । नाम ॥ त्रौ ॥२॥

सा– अथ द्वितीयमन्त्रः – 'सꣳहितो विश्वसामा सूर्यो गन्धर्वः । तस्य मरीचयोऽप्सरस आयुवो नाम । स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा' इति । यः ^{v}सूर्यः ^{v}संहितः, अहोरात्रे संदधातीति संहितः । " एष ह्यहोरात्रे संदधाति " (शब्रा ९.४.१.८) इति श्रुतेः । स एक

---

5. B1 अग्न्यादि for आग्नेयानि

6. B1 after दीर्घः add लकारस्य

8. B1 सोमः । for सः

9. B1 °जातिः for जातिं

vविश्वसामा, विश्वानि सामानि यस्य सः । साम सान्त्वप्रयोगे इति वा । “ एष ह्येव सर्वं साम ” (शब्रा ९·४·१·८) इति श्रुतेः । vतस्य vअप्सरसः vमरीचयः । मरीचयस्तेजस्त्रसरेणवः । तासाम् vआयुवः vनाम । “ आयुवो नामेत्यायुवाना इव हि मरीचयः प्लवन्ते ” (शब्रा ९·४·१·८) इति श्रुतेः । यु मिश्रणे । आमिश्रयन्त इत्यर्थः । तुल्यमन्यत् ॥२॥

आ– ‘ सꣳहितो विश्वसामा सूर्यो गन्धर्वः ’ इति । य एषः vसूर्यः । अहोरात्रे संदधातीति vसंहितः सूर्यः । स एष vविश्वसामा । विश्वानि सामानि यस्य सः विश्वसामा । साम सान्त्वप्रयोगे इति वा । vतस्य सूर्यस्य गन्धर्वस्य ‘ मरीचयोऽप्सरसः ’ । vमरीचयः रश्मयः । vअप्सरसः स्त्रियः । vआयुवः । यु मिश्रणे । “ आयुवो नामेत्यायुवाना इव हि मरीचयः प्लवन्ते ” (शब्रा ९·४·१·८) इति श्रुतेः । आमिश्रयन्त इत्यर्थः । ‘ स नः ’ इत्यादि व्याख्यातम् ॥९॥

सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः ।
तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥३॥

सुषुम्णः । सुसुम्न इति सुऽसुम्नः । सूर्यरश्मिरिति सूर्यऽरश्मिः । चन्द्रमाः । गन्धर्वः । तस्य । नक्षत्राणि । अप्सरसः । भेकुरयः । नाम ॥ इते ॥३॥

सा– अथ तृतीयः – ‘ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः । तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम । स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ’ इति । यः vसुषुम्णः सुयज्ञियः vसूर्यरश्मिः सूर्यस्येव चन्द्रमसो रश्मयः । सः vचन्द्रमाः vगन्धर्वः । “ सुषुम्ण इति । सुयज्ञिय इत्येतत् सूर्यरश्मिरिति सूर्यस्येव हि चन्द्रमसो रश्मयश्चन्द्रमा गन्धर्वः ” (शब्रा ९·४·१·९) इति श्रुतेः । vतस्य vनक्षत्राणि vअप्सरसः । तासां vनाम vभेकुरयः । “ भाꣳ हि नक्षत्राणि कुर्वन्ति ” (शब्रा ९·४·१·९) [इति श्रुतेः] । भेकुरयो नक्षत्राणि । तुल्यमन्यत् ॥३॥

आ– [‘ सुषुम्णः ’ इति । यः vसुषुम्णः सुयज्ञियः । सूर्यस्येव चन्द्रमसो रश्मयः । vचन्द्रमाः vगन्धर्वः, vतस्य vनक्षत्राणि vअप्सरसः vभेकुरयः vनाम । “ भाꣳ हि नक्षत्राणि कुर्वन्ति” (शब्रा ९·४·१-९) इति भेकुरयो नक्षत्राणि ।] ‘स नः’ इत्यादि व्याख्यातम् ॥१०॥

1. S2 च for वा
4. P1 om, तुल्यमन्यत्
9. B1 कामिद्रायन्त्यः for आमिश्रयन्तः

इषिरो विश्वव्यचा वातो गन्धर्वः ।
तस्यापो अप्सरस ऊर्जो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥४॥

इषिरः । विश्वव्यचा इति विश्वऽव्यचाः । वातः । गन्धर्वः ।
तस्य । आपः । अप्सरसः । ऊर्जः । नाम ॥ खौ ॥४॥

सा– अथ चतुर्थः – ' इषिरो विश्वव्यचा वातो गन्धर्वः । तस्यापो अप्सरस ऊर्जो नाम । स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ' इति । यः [v]इषिरः क्षिप्रः । इष गतौ । [v]विश्वव्यचाः सर्वतोगमनशीलः [v]वातः वायुः, स एव [v]गन्धर्वः । [v]तस्य वातस्य [v]आपः [v]अप्सरसः, [v]ऊर्जः अन्नरसः [v]नाम । स्पष्टमन्यत् ॥४॥

भा– ' इषिरो विश्वव्यचाः ' इति । यः [v]इषिरः । क्षिप्रनाम । इष गतौ । [v]विश्वव्यचाः सर्वतो गमनशीलः । [v]वातः वायुः, स एव [v]गन्धर्वः । [v]तस्य वातस्य [v]आपः [v]अप्सरसः स्त्रियः, [v]ऊर्जः अन्नरसः [v]नाम । ' स नः ' इत्यादिः समानार्थः ॥११॥

भुज्युः सुपर्णो यज्ञो गन्धर्वः ।
तस्य दक्षिणा अप्सरसः स्तावा नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥५॥

भुज्युः । सुपर्ण इति सुऽपर्णः । यज्ञः । गन्धर्वः ।
तस्य । दक्षिणाः । अप्सरसः । स्तावाः । नाम ॥ खौ ॥५॥

सा– अथ पञ्चमः – ' भुज्युः सुपर्णो यज्ञो गन्धर्वः । तस्य दक्षिणा अप्सरस स्तावा नाम । स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ' इति । यः [v]यज्ञः [v]भुज्युः । " यज्ञो हि सर्वाणि भूतानि भुनक्ति " (शब्रा ९·४·१·११) इति श्रुतेः । [v]सुपर्णः शोभनपतनः । स एव [v]गन्धर्वः । [v]तस्य [v]दक्षिणाः [v]अप्सरसः । दक्षयन्तीति दक्षिणास्तासां [v]स्तावाः [v]नाम । स्तावाः, स्तूयन्ते इति स्तावाः स्तुत्याः । " दक्षिणाभिर्हि यज्ञ स्तूयतेऽथो यो वै कश्च दक्षिणां ददाति स्तूयत एव सः " (शब्रा ९·४·१-११) इति श्रुतेः । तुल्यमन्यत् ॥५॥

8. P1 इषि गतौ उसा गतौ for इष गतौ
9. P1 स न इत्यादि for स्पष्टमन्यत्
21. P1 स्ताभ्यः स्तूयते, S2 स्ताभ्यः सूयन्ते for स्तावाः । स्तूयन्ते

राष्ट्रभृद्होमादिमन्त्राः]

आ– ‘ भुज्युः सुपर्णः ’ इति । [v]भुज्युः यज्ञः । “ यज्ञो वै भुज्युर्यज्ञो हि सर्वाणि भूतानि भुनक्ति ” (शब्रा ९.४.१.११) इति श्रुतेः । भुज्युः [v]सुपर्णः शोभनपतनः यज्ञः । स एव [v]गन्धर्वः । [v]तस्य यज्ञस्य [v]दक्षिणाः । दक्षयन्तीति दक्षिणाः । [v]अप्सरसः स्त्रियः । [v]स्तावाः, स्तूयन्त इति स्तावाः स्तुत्याः । [v]नाम प्रसिद्धम् । ‘ सः नः ’ इत्यादि व्याख्यातश्च ॥१२॥

प्रजापतिर्विश्वकर्मा मनो गन्धर्वः ।
तस्य ऋक्सामान्यप्सरस एष्टयो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥६॥

प्रजापतिरिति प्रजाऽपतिः । विश्वकर्मेति विश्वऽकर्मा । मनः । गन्धर्वः ॥ख॥

तस्य । ऋक्सामानीत्यृक्ऽसामानि । अप्सरसः । एष्टय इत्याऽइष्टयः । नाम ॥ नौ ॥६॥

सा– अथ षष्ठः – ‘ प्रजापतिर्विश्वकर्मा मनो गन्धर्वः । तस्य ऋक्सामान्यप्सरस एष्टयो नाम । स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ’ इति । यः [v]प्रजापतिः [v]विश्वकर्मा विश्वकर्ता । “ प्रजापतिर्वै विश्वकर्मा स हीदं सर्वमकरोत् ” (शब्रा ९.४.१.१२) इति श्रुतेः । सः [v]मनः [v]गन्धर्वः मनोलक्षणो गन्धर्वः । ‘ तस्य ऋक्सामान्यप्सरस एष्टयो नाम ’ । “ ऋक्सामानि वा एष्टय ऋक्सामैर्ह्याशासत इति नोऽस्त्वित्थं नोऽस्तु ” (शब्रा ९.४.१.१२) इति । ‘ स नः ’ इत्यादि व्याख्यातम् ॥६॥

आ– ‘ प्रजापतिर्विश्वकर्मा मनो गन्धर्वः ’ इति । [v]प्रजापतिः प्रजानां पतिः । [v]विश्वकर्मा विश्वकर्ता । [v]मनः [v]गन्धर्वः मनोलक्षणो गन्धर्वः । [v]तस्य मनोगन्धर्वस्य [v]ऋक्सामानि [v]अप्सरसः स्त्रियः । [v]एष्टयः आ इष्टयः [v]नाम । “ एष्टयो नामेत्यृक्सामानि वा एष्टय ऋक्सामैर्ह्याशासत इति नोऽस्त्वित्थं नोऽस्तु ” (शब्रा ९.४.१.१२) इति श्रुतेः । ‘ स नः ’ इत्यादि व्याख्यातम् ॥१३॥

स नो भुवनस्य पते प्रजापते यस्य त उपरि गृहा यस्य वेह ।
अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ॥७॥

---

4. S2 श्रूयन्ते for स्तूयन्ते; B1 भावाः for स्तावाः

15. S2 तुल्यमन्यत् for स न इत्यादि व्याख्यातम् ।

सः । नः । भुवनस्य । पते । प्रजापत इति प्रजाऽपते ।
यस्य । ते । उपरि । गृहाः । यस्य । वा । इह ।
अस्मै । ब्रह्मणे । क्षत्राय । महि । शर्म । यच्छ । स्वाहा ॥ गौम् ॥७॥

सा– कात्यायनः – " पञ्चगृहीतं च रथशिरस्यध्याहवनीयं ध्रियमाणे पञ्चकृत्वः स नो भुवनस्य पते इति " (काश्रौ १८.५.१७) इति । पञ्चगृहीतमाज्यं रथशिरसि जुहोति– ' स नो भुवनस्य पते ' इति । पाठस्तु– ' स नो भुवनस्य पते प्रजापते यस्य त उपरि गृहा यस्य वेह । अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ' इति । हे ᵛभुवनस्य ᵛपते, ᵛप्रजापते, ᵛयस्य ᵛते तव ᵛउपरि अमुष्मिन् लोके ᵛगृहाः सदनानि ᵛयस्य ᵛवा ᵛइह अस्मिन् लोके च सन्ति गृहाः, स त्वं प्रजापतिः ᵛअस्मै ᵛब्रह्मणे ᵛअस्मै ᵛक्षत्राय ᵛमहि महत् ᵛशर्म शरणं ᵛयच्छ प्रयच्छ देहि । ᵛस्वाहा इति होमार्थः ॥७॥

आ– रथशिरसि जुहोति– ' स नो भुवनस्य पते ' इति । प्रजापतिदेवत्या आस्तारपङ्क्तिः । आद्यौ पादौ द्वादशाक्षरौ तृतीयचतुर्थौ षष्ठाक्षरौ तत् (छन्दः) आस्तारपङ्क्तिः । हे ᵛभुवनस्य ᵛपते, हे ᵛप्रजापते, ᵛयस्य ᵛते तव ᵛउपरि अमुष्मिन् लोके ᵛगृहाः । ᵛयस्य ᵛवा ᵛइह अस्मिन् लोके गृहाः, स त्वं प्रजापतिः ᵛअस्मै ᵛब्रह्मणे ᵛअस्मै ᵛक्षत्राय च ᵛमहि महत् ᵛशर्म शरणं ᵛयच्छ प्रयच्छ देहि । ᵛस्वाहा इति होमार्थः ॥१४॥

समुद्रोऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा ।
मारुतोऽसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहा ।
अवस्यूरसि दुवस्वाञ्छम्भूर्मयोभूरभि मा वाहि स्वाहा ।।८।।

समुद्रः । असि । नभस्वान् । आर्द्रदानुरित्यार्द्रऽदानुः ।
शंभूरिति शम्ऽभूः । मयोभूरिति मयःऽभूः । अभि । मा । वाहि । स्वाहा ।
मारुतः । मरुताम् । गणः ।
अवस्यूः । दुवस्वान् । ॥ ङ्म् ॥८॥

4. S2 om. पञ्चगृहीतं च रथ° ... माज्यं [L 7] .

5. P1 after पाठस्तु adds प्रजापतिदेवत्यास्तारपाङ्क्तिः

8. S2 om. सन्ति च

सा: – कात्यायनः – " वातहोमान् जुहोति ... समुद्रोऽसीति " (काश्रौ १८.६.१) इति। पाठस्तु– ' समुद्रोऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा। मारुतोऽसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहा। अवस्यूरसि दुवस्वाञ्छंभूर्मयोभूरभि मा वाहि स्वाहा ' इति। लोकत्रयस्थं वायुं लोकद्वारेण स्तुवन्ति। हे वायो, यस्त्वं ^{v}समुद्रः समुन्दनः ^{v}असि। ^{v}नभस्वान् च। नभ इति नक्षत्राण्युच्यन्ते। तानि नितरां भान्ति। तैः संयुक्तो नभस्वान्। ^{v}आर्द्रदानुः च। वृष्ट्यादिना आर्द्रं ददातीत्यार्द्रदानुः। शं भावयतीति ^{v}शंभूः। मयः सुखं भावयतीति ^{v}मयोभूः। एवंभूतस्त्वं हे वायो ^{v}मा माम् ^{v}अभि ^{v}वाहि आभिमुख्येन यज्ञफलं प्रापय। ^{v}स्वाहा होमार्थः॥

^{v}मारुतः ^{v}असि। यस्त्वं मारुतः पुरोवातप्रभृतीनां वातानां प्रकृतिभूतः असि। अन्तरिक्षलोकोऽसीति वा। ^{v}मरुतां शुक्रज्योतिःप्रभृतीनां ^{v}गणः असि। तं त्वां ब्रवीमि। ^{v}शंभूः च ^{v}मयोभूः च भूत्वा ^{v}अभि ^{v}मा ^{v}वाहि। ^{v}स्वाहा इत्युक्तार्थम्॥

हे वायो, यस्त्वम् ^{v}अवस्यूः। अवनं तर्पणं रक्षणं सीव्यतीत्यवस्यूः। यद्वा– अवसः अन्नं तदिच्छतीति इचि कृते औणादिके उप्रत्यये च कृते अवस्यूरिति च भवति। अन्नं कामयमानः। ^{v}दुवस्वान्। दुव इति हविर्नाम। तद्वान् हविष्मान्। अन्यत् समानम्॥८॥

आ– वातहोमानाजुहोति। ' समुद्रः असि ' इति त्रीणि यजूंषि [त्रिलोकस्थानं वायुं लोकद्वारेण स्तुवन्ति] ^{v}समुद्रः ^{v}असि। सम्यक् द्रवति गच्छतीति समुद्रो वायुः। नभस (? भ) इति नक्षत्राण्युच्यन्ते। तानि निरन्तरं भान्तीति तैः संयुक्तो ^{v}नभस्वान्। ^{v}आर्द्रदानुः च। वृष्ट्यवश्यायादिना आर्द्रं ददातीति आर्द्रदानुः। ^{v}शंभूः। शं भावयतीति शंभूः। मयः सुखं भावयतीति ^{v}मयोभूः। सामान्यविशेषभावेन विभागः। ' अभि मा वाहि '। हे वायो ^{v}मा मां ^{v}अभि ^{v}वाहि गच्छ। वा गतिगन्धनयोः। ^{v}मारुतः ^{v}असि। अन्तर्धान-(? पुरोवात)-प्रभृतीनां मरुतां संबन्धी मारुतोऽसि प्रकृष्टः। शुक्रज्योतिरित्यादिमरुतां ^{v}गणः असि। अतस्त्वा ब्रवीमि। ' शंभूर्मयोभूः ' इति। ' मा वाहि ' इति। ^{v}स्वाहा होमार्थः। ^{v}अवस्यूः यस्त्वम् अवस्यूः ^{v}असि। अवनं तर्पणं रक्षणं वा सीव्यतीति अवस्युः। सेति सीव्यती इति अवस्युः। यद्वा—

2. P1 after पाठस्तु add वायव्यानि त्रीणि यजूंषि।

7. S2 after प्रापय adds मा मां

8. P1 om. second मारुतः

11. P1 after second अवस्यूः ins. अवपूर्वस्य षिवु तन्तुसंताने इत्यस्य धातोः क्विपि च्छ्वोः शूडनुनासिके चेति अठि संप्रसारणे च कृतेऽवस्यूरिति सिध्यति

13. S2 दुवस्त° for दुव

14. B1 before त्रीणि adds वा यथा

16. B1 नाभातीति ... नभस्थानात् for भान्तीति ... नभस्वान्

अवसः अन्नम् । तदिच्छतीति इचि कृते औणादिके उप्रत्यये च कृते अवस्युरिति भवति । अन्नं कामयमानः । ᵛदुवस्वान् । दुव इति हविर्नाम । तद्वान् दुवस्वान् हविष्मान् अन्यत् समानम् ॥१५॥

यास्ते॑ अग्ने॒ सूर्ये॒ रुचो॒ दिव॑मात॒न्वन्ति॑ र॒श्मिभिः॑ ।
ताभि॑र्नो अ॒द्य सर्वा॑भी रु॒चे जना॑य नस्कृधि ॥९॥
या वो॑ देवाः॒ सूर्ये॒ रुचो॒ गोष्वश्वे॑षु॒ या रुचः॑ ।
इन्द्रा॑ग्नी॒ ताभिः॒ सर्वा॑भि॒ रुचं॑ नो धत्त बृहस्पते ॥१०॥

यास्ते॑ ॥ .... ॥ य ॥९॥
या वः॑ ॥ .... ॥ य॥१०॥

सा- कात्यायनः - " नव जुहोति यास्त इति प्रतिमन्त्रम् " (काश्रौ १८.६.६) इति । रुक्मवतीर्जुहोति- ' यास्ते ' इति तिसृभिः । ' यास्ते ' इति, ' या वो देवाः ' इति द्वौ मन्त्रौ चतुर्दशाध्याये व्याख्यातौ ॥९॥१०॥

आ- रुक्मवतीर्जुहोति । ' यास्ते ' इति । ' यास्ते ' इति, ' या वो देवाः ' इति द्वौ द्वितीयदशकस्य चतुर्थाध्याये व्याख्यातौ ॥९॥१०॥

रुचं॑ नो धेहि ब्राह्म॒णेषु॒ रुच॒ꣳ राज॑सु नस्कृधि ।
रुचं॒ विश्ये॑षु शू॒द्रेषु॒ मयि॑ धेहि रु॒चा रुच॑म् ॥११॥

रुच॑म् । न॒ः । धे॒हि॒ । ब्रा॒ह्म॒णेषु॑ । रुच॑म् । राज॒स्विति॒ राज॑ऽसु । न॒ः । कृ॒धि॒ ।
रुच॑म् । विश्ये॑षु । शू॒द्रेषु॑ । मयि॑ । धे॒हि॒ । रु॒चा । रुच॑म् ॥ खुम् ॥११॥

सा- तृतीयमन्त्रपाठस्तु- ' रुचं नो धेहि ब्राह्मणेषु रुचꣳ राजसु नस्कृधि । रुचꣳ विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ' इति । हे भगवन्नग्ने, ᵛनः अस्माकं ये ब्राह्मणास्तेषु ᵛरुचं दीप्तिं ᵛधेहि स्थापय । ᵛराजसु क्षत्रियेषु ᵛनः अस्माकं संबन्धिषु ᵛरुचं ᵛकृधि कुरु । ᵛविश्येषु वैश्येषु अस्मत्परिगृहीतेषु

---

2. B1 दुवस्वा इति हविर्नाम । यद्वा for दुव इति हविर्नाम । तद्वान्
10. P1 om. नव ... मन्त्रमिति
19. P1 after °पाठस्तु adds आग्नेय्यनुष्टुप्

राष्ट्रभृद्होमादिमन्त्राः]

vशूद्रेषु च vरुचं कृधि। vमयि च vधेहि vरुचा दीप्त्या सह vरुचं दीप्तिम् अमृतत्वं वा। अनुत्सन्नधर्माणो यथा वयं दीप्त्या भवेम तथा कुर्वित्याशयः। यद्वा- ब्राह्मणप्रभृतिषु या रुक् तामस्मभ्यं धेहि देहि सर्वथा। किं बहूक्त्या। मय्येव धेहि रुचा ज्ञानेन रुचम् अमृतत्वमिति ॥११॥

आ– 'रुचं नः' इति। आग्नेय्यनुष्टुप्। 'रुचं नः धेहि ब्राह्मणेषु'। vनः अस्मत्संबन्धिनो ये ब्राह्मणास्तेषु vब्राह्मणेषु हे श्रीभगवन्नग्ने, vरुचं स्थितिं दीप्तिं vधेहि स्थापय। 'रुचꣳ राजसु नस्कृधि'। vनः अस्मदीयेषु vराजसु vरुचम् अप्रतिहतं तेजः vकृधि कुरुष्व। vरुचं vविश्येषु वैश्येषु नः अस्मद्गृहीतेषु vशूद्रेषु च रुचं धेहि। 'मयि धेहि रुचा vरुचम्'। दीप्त्या दीप्तिम्। vरुचम् अनवच्छिन्नं ब्राह्मं तेजः vमयि vधेहि स्थापय ॥१८॥

तत् त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः।
अहेळमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः ॥१२॥

तत्। त्वा। यामि। ब्रह्मणा। वन्दमानः।
तत्। आ। शास्ते। यजमानः। हविर्भिरिति हविःऽभिः।
अहेळमानः। वरुण। इह। बोधि।
उरुशꣳसेत्युरुऽशꣳस। मा। नः। आयुः। प्र। मोषीः ॥ ऋः ॥१२॥

सा- कात्यायनः – 'अथ वारुणं जुहोति तत् त्वा यामीति' (द्र. काश्रौ ?) इति। पाठस्तु– 'तत् त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः' इति। हे श्रीभगवन्नग्ने, यत् प्रयोजनमुद्दिश्य vत्वा त्वा vयामि। vब्रह्मणा वेदेन vवन्दमानः नमस्कारं कुर्वाणः। यद्वा- वन्दमानः स्तुतिं कुर्वाणोऽहं त्वां यामि शरणं व्रजामि। हेलनं देवापराधनं तद्विपरीतमहेलनं यज्ञादिकर्म। तत् कुर्वाणः vअहेळमानः। अयं vयजमानः vहविर्भिः अभ्युद्यतैर्हविर्भिः vतत् तदेव प्रयोजनम् vआशास्ते प्रार्थयते। हे vवरुण, vइह vबोधि तत्प्रयोजनं यज्ञसमाप्तिलक्षणं बुध्यस्व। हे vउरुशंस हे बहुस्तुत्य, vनः vआयुः vमा vप्रमोषीः अस्मदायुषोऽवखण्डनं मा कुरुष्व ॥ १२ ॥

---

8. B1 अनवस्थितं for अनवच्छिन्नं

16. P1 after पाठस्तु adds वरुणदेवत्या त्रिष्टुप् शुनःशेपः

19. S2 तदा हेलं देवापराधं नमः for हेलनं ... अहेळमानः।

आ– वारुण्या त्रिष्टुभा जुहोति । 'तत् त्वा यामि' इति । ततः शेषः । हे श्रीभगवन् वरुण, यत्प्रयोजनमुद्दिश्य त्वा त्वां यामि ब्रह्मणा वन्दमानः, ब्रह्मणा वेदेन वन्दमानः नमस्कारं कुर्वाणः । यद्वा– वन्दमानः स्तुतिं कुर्वाणोऽहं त्वां यामि त्वां शरणं यामि व्रजामि । 'तदा शास्ते यजमानः' । अभ्युद्यतैः हविर्भिः तत् एव प्रयोजनम् आ शास्ते प्रार्थयते । 'वरुणेह बोधि' । हे वरुण, इह बोधि तत्प्रयोजनं बोधि बुध्यस्व । हे उरुशंस बहुस्तुत्य । 'मा न आयुः प्र मोषीः' । नः अस्माकम् आयुः मा प्रमोषीः आयुषश्च खण्डनं मा कुरुष्व ॥ १९ ॥

स्व॒र्ण घ॒र्मः स्वाहा॑ स्व॒र्णार्कः स्वाहा॑ स्व॒र्ण शु॒क्रः स्वाहा॑ ।
स्व॒र्ण ज्योति॑ः स्वाहा॑ स्व॒र्ण सूर्यः॑ स्वाहा॑ ॥ १३ ॥ (२) ॥

स्वः । न । घ॒र्मः । अ॒र्कः । शु॒क्रः । ज्योतिः । सूर्यः । स्वाहा॑ ॥श्रौ॥ ॥ १३ ॥

सा– "अथार्काश्वमेधयोः संततीर्जुहोति स्वर्ण घर्म इति" (शब्रा ९.४.२.१८) इति । पाठस्तु – 'स्वर्ण घर्म स्वाहा स्वर्णार्कः स्वाहा स्वर्ण शुक्रः स्वाहा । स्वर्ण ज्योतिः स्वाहा स्वर्ण सूर्यः स्वाहा' इति । अत्र श्रुतिः– "अयं वा अग्निरर्कोऽसावादित्योऽश्वमेधस्तौ सृष्टौ नानैवास्तां तौ देवा एताभिराहुतिभिः समतन्वन्" (शब्रा ९.४.२.१८) इत्यादि । स्वः न घर्मः स्वरिव असावादित्यो घर्मः । अतस्तमादित्य-मग्नौ स्वाहा जुहोति(मि?) प्रतिष्ठापयति(यामि ?) । स्वः इव यः अर्कः अग्निस्तमग्निमादित्ये जुहोति(मि ?) स्थापयति(यामि?) । स्वः इव असावादित्यः शुक्रः तं पुनरमुत्र दधाति(मि?) । तं शुक्रं पुनरग्नौ स्वाहा दधामि स्थापयामि । स्वः इव योऽग्निः ज्योतिः तमग्नौ इडा(हा ?)दित्ये जुहोमि स्थापयामि । स्वः इव असौ आदित्यः सूर्यः तमग्नौ जुहोमि । एवं पञ्चचितिकोऽयमग्निः स्तूयते । "पञ्चैता आहुतीर्जुहोति पञ्चचितिकोऽग्निः" (शब्रा ९.४.२-२४) इति श्रुतेः । यद्वा– "स्वर्णार्कः स्वाहेत्येतान्यग्नेर्नामानि" (शब्रा ९.४.२.२५) इति श्रुतेः ॥ १३ ॥

इति विंशेऽध्याये द्वितीयोनुवाकः ॥ २ ॥

---

1. B1 त्रिष्टुभो for त्रिष्टुभा
11. P1 before अथ adds कात्यायनः, P1 after पाठस्तु adds पञ्चाग्नेयानि यजूंषि
13. S2 वा adds अर्कः
16. P1 om. first तं; S1 om. स्वाहा; S2 after असौ adds आदित्यः
17. S2 अग्निं for अग्नौ
19. P1 इत्यादि for इति

आ– अथार्काश्वमेधयोः संततीर्जुहोति । 'स्वर्ण घर्मः स्वाहा' इति पञ्चाग्नेयानि यजूंषि । "अयं वा अर्कोऽग्निरर्कोऽसावादित्योऽश्वमेधस्तौ सृष्टौ नानैवास्तां तौ देवा एताभिराहुतिभिः समतन्वन्" (शब्रा ९.४.२.१८) इत्यादि श्रुतेः । 'स्वर्ण घर्मः' । ^{v}स्वः ^{v}न स्वरिव ^{v}घर्मः । 'असौ वा आदित्यो घर्मः स्वाहा' । अतस्त्वामादित्यम् अग्नौ जुहोमि प्रतिष्ठापयामि । 'स्वर्ण अर्कः स्वाहा' । ^{v}स्वः इव यः ^{v}अर्कः अग्निस्तमग्निम् आदित्यं जुहोमि स्थापयामि । 'स्वर्ण शुक्रः स्वाहा' । ^{v}स्वः ^{v}न स्वरिव असौ वा आदित्यः ^{v}शुक्र तं पुनरमुत्र दधामि । तमादित्यं शुक्रं पुनरग्नावादधामि । एवं पञ्चचितिकोऽयमग्निः स्तूयते । "पञ्चैता आहुतीर्जुहोति पञ्चचितिकोऽग्निः" (शब्रा ९.४.२.२४) इत्यादि श्रुतेः । यद्वा– स्वर्ण घर्मः स्वाहेत्येतान्यग्नेरेव पञ्चनामानि । "अस्यैवैतान्यग्नेर्नामानि" (शब्रा ९.४.२.२५) इति श्रुतेः ॥२०॥

(इति द्वितीयोऽनुवाकः)

[अथ तृतीयोऽनुवाकः ।]

सा– द्वितीये राष्ट्रभृदादिहोममन्त्रा उक्ताः । तृतीये प्रातरनुवाकादिहोममन्त्रा उच्यन्ते ॥

अग्निं युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं वयसा बृहन्तम् ।
तेन गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा अधि नाकमुत्तमम् ॥ १ ॥

अग्निम् । युनज्मि । शवसा । घृतेन ।
दिव्यम् । सुपर्णमिति सुऽपर्णम् । वयसा । बृहन्तम् ।
तेन । गमेम । ब्रध्नस्य । विष्टपम् ।
स्वरिति स्वः । रुहाणाः । अधि । नाकम् । उत्तममित्युत्ऽतमम् ॥ थैं ॥ ॥ १ ॥

कात्यायनः– "प्रातरनुवाकमुपाकरिष्यन् परिधीनालभ्य यथापूर्वमग्निं युनज्मीति तिसृभिः" (काश्रौ १८.६.१७) इति । तत्र प्रथममन्त्रपाठस्तु– 'अग्निं युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं वयसा बृहन्तम् । तेन गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा अधि नाकमुत्तमम्' इति । दिवि भवं ^{v}दिव्यम् । ^{v}सुपर्णं शोभनपतनं ^{v}वयसा अन्नेन हविर्लक्षणेन धूमेन च ^{v}बृहन्तं महान्तं यम् ^{v}अग्निं ^{v}शवसा बलेन

---

7. B1 तस्यादित्यं for तमादित्यं
20. S2 om. परिधीनालभ्य यथापूर्वम्
21. P1 after °पाठस्तु adds त्रीण्याग्नेयानि द्वौ त्रिष्टुभौ अन्त्या पङ्क्तिः

[प्रातरनुवाकादिहोममन्त्राः

vघृतेन च vयुनज्मि युक्तं करोमि । vतेन युक्तेन अग्निना वयं vब्रध्नस्य सूर्यस्य vविष्टपं विगतसंतापं सर्वद्वन्द्वापलक्षणं सर्वतापरहितं सौरं पदं vगमेम गच्छेम । ततोऽप्यधिकं स्वर्लोकं vरुहाणाः आरोहन्तः vनाकम् vउत्तमम् सर्वेभ्यः । गमेमेत्यनुवर्तते । यत्र गता न कथंचन अकम् असुखं न प्राप्नुवन्ति स नाको लोकः ॥ १ ॥

आ– अथातः प्रातरनुवाकमुपाकरिष्यन् [परिधीनालभ्य यथापूर्वमग्निं युनज्मी]त्यग्निं युनक्ति । 'अग्निं युनज्मि', 'इमौ ते', 'इन्दुर्दक्षः' इति तिसृभिः आग्नेयीभिः द्वाभ्यां त्रिष्टुभा तृतीयया पङ्क्त्या । यं vदिव्यं दिवि भवं vसुपर्णं शोभनपतनम् । vवयसा अन्नेन हविर्लक्षणेन धूमेन च vबृहन्तं महान्तम्। यम् vअग्निं vशवसा बलेन vघृतेन च vयुनज्मि युक्तं करोमि vतेन युक्तेन अग्निना वयं vब्रध्नस्य सूर्यस्य vविष्टपं विगततापं सर्वद्वन्द्वापलक्षणं सर्वतापरहितं सौरं पदं vगमेम गच्छेम । 'स्वो रुहाणा अधि नाकमुत्तमम्' । ततोऽप्यधिकं स्वर्लोकं vनाकम् । अकम् असुखम् । तद्ररहितं नाकम् vउत्तमं पदं vरुहाणाः आरुहन्तो वयं ब्रध्नस्य विष्टपं गमेम इति संबन्धः ॥ २१ ॥

इमौ ते पक्षा अजरौ पतत्रिणो याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने ।
ताभ्यां पतेम सुकृतामु लोकं यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः ॥२॥

इमौ । ते । पक्षौ । अजरौ । पतत्रिणः ।
याभ्याम् । रक्षाꣳसि । अपहꣳसीत्यपऽहꣳसि । अग्ने ।
ताभ्याम् । पतेम । सुकृतामिति सुऽकृताम् । ऊँ इत्यूँ । लोकम् ।
यत्र । ऋषयः । जग्मुः । प्रथमजा इति प्रथमऽजाः । पुराणाः ॥ नौम् ॥ २ ॥

सा– अथ द्वितीयः – 'इमौ ते पक्षा अजरौ पतत्रिणो याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने । ताभ्यां पतेम सुकृतामु लोकं यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः' इति । हे श्रीभगवन् vअग्ने, vते vपतत्रिणः उत्पतनशीलस्य तव vइमौ मन्त्रप्रतीयमानौ प्रसिद्धौ vअजरौ जरारहितौ vपक्षौ विशिष्टगमनसाधनभूतौ । काविति ? vयाभ्यां पक्षाभ्यां त्वं vरक्षांसि राक्षसान् श्रेयसः परिपन्थिनः पाप्मनश्च vअपहꣳसि विनाशयसे ।

5. B1 अथ यातः for अथातः
8. B1 वयसा for शवसा
9. B1 वीर्यस्य for सूर्यस्य; B1 °पापं for °तापं
11. B1 स्नर्णार्कं for स्वर्लोकं; B1 भद्रहितं for तद्रहितं
20. S2 पत्रे for मन्त्र°

ताभ्यां पक्षाभ्यां सुकृताम् उ लोकं पतेम गच्छेम, अपि च अस्मदधिकपुण्यकारिणामपि लोकं गच्छेम। लोकं विशिनष्टि– यत्र ऋषयः मन्त्राणां द्रष्टारः प्रथमजाः पूर्वजाताः पुराणाः पुरातनाः विश्वसृजः यत्र स्थाने जग्मुः गतास्तत्र पतेमेति संबन्धः ॥ २ ॥

आ– ' इमौ ते पक्षौ ' इति । हे श्रीभगवन् अग्ने, ते पतत्रिणः उत्पतनशीलस्य तव इमौ मन्त्रेभ्यः प्रतीयमानौ प्रसिद्धौ । [अजरौ] जरारहितौ पक्षौ विशिष्टगमनसाधनभूतौ । तौ काविति । याभ्यां पक्षाभ्यां त्वं रक्षांꣳसि राक्षसान् श्रेयसः परिपन्थिनः पाप्मनश्च अपहंसि । ताभ्यां पक्षाभ्यां सुकृताम् उ लोकं पतेम उत्पतेम उद्गच्छेम सुकृतामपि अस्मभ्यः अधिकपुण्यकारिणां लोकमपि उद्गच्छेम । लोकं विशिनष्टि । ' यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः ' । पुरातनाः विश्वसृजः यत्र स्थितास्तत्र पतेमेति संबन्धः ॥ २२ ॥

इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युः ।
महान्त्सधस्थे ध्रुव आ निषत्तो नमस्ते अस्तु मा मा हिꣳसीः ॥ ३ ॥

इन्दुः । दक्षः । श्येनः । ऋतावा । ऋतवेत्यृतऽवा ।
हिरण्यपक्ष इति हिरण्यऽपक्षः । शकुनः । भुरण्युः ।
महान् । सधस्थ इति सधऽस्थे । ध्रुवः । आ । निषत्तः । निसत्त इति निऽसत्तः ।
नमः । ते । अस्तु । मा । मा । हिꣳसीः ॥ त्यें ॥ ३ ॥

सा– अथ तृतीयः – ' इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युः । महान्त्सधस्थे ध्रुव आ निषत्तो नमस्ते अस्तु मा मा हिꣳसीः ' इति । हे अग्ने, यस्त्वम् इन्दुः । इदि परमैश्वर्ये । परमेश्वरः । उन्दी क्लेदने । " उन्देरिच्चादेः " (उसू १२) इति उनत्तीति इन्दुः । इन्दनो वा । दक्षः उत्साहवान् । श्येनः शंसनीयगतिः । ऋतावा यज्ञवान् सत्यवान् वा उदकवान् वा । हिरण्यपक्षः शकुनः अमृतपक्षः पक्षी । भुरण्युः भरणशीलः । महान् प्रभावतः श्रेष्ठः । सधस्थे ब्रह्मणा सहाविभक्तस्थाने ध्रुवः स्थिरः । आ निषत्तः आनिषण्णः । एवंविधो योऽग्निः तस्मै ते तुभ्यं नमः अस्तु । मा मा हिंसीः मम हिंसां मा कुरु ॥ ३ ॥

---

4. B1 उत्पन्न° for उत्पतन°

18. P1 उन्दति for उनत्ति

19. S2 om. सत्यवान् वा

20. S2 om. पक्षी

22. S2 मां मा हिंसां कुरु; for मम ... कुरु

आ– 'इन्दुर्दक्षः' इति। उन्दी क्लेदने। "उन्देरिच्चादेः" (उसू १२) इति। उनत्तीति इन्दुः। क्लेदहेतुत्वादग्नेः सर्वपदार्थानां रसकारः परमेश्वरः। vदक्षः। दक्ष वृद्धौ शीघ्रार्थे च। शीघ्रकारी। vश्येनः शंसनीयगतिः। vऋतावा यज्ञवान्। vहिरण्यपक्षः vशकुनः पक्षी। vभुरण्युः भरणशीलः भर्ता। vमहान् प्रभावतो महान्। vसधस्थे ब्रह्मणा सहाविभक्तस्थाने। vध्रुवः स्थिरः vआनिषत्तः आनिषण्णः। एवंविधो योऽग्निः तस्मै [vते] तुभ्यं vनमः vअस्तु। 'मा मा हिंसीः'। तमेवम् आशीः कुर्वाणं vमा मां vमा vहिंसीः हिंसां मा कुरु ॥ २३ ॥

दि॒वो मू॒र्धाऽसि॑ पृथि॒व्या ना॒भि॒रू॒र्ग॒पामोष॑धीनाम्।
वि॒श्वायुः॒ शर्म॑ स॒प्रथा॒ नम॑स्प॒थे ॥ ४ ॥

दि॒वः। मू॒र्धा। अ॒सि॒। पृ॒थि॒व्याः। नाभिः॑। ऊर्क्। अ॒पाम्। ओष॑धीनाम्।
वि॒श्वायु॒रिति॑ वि॒श्वऽआ॑युः। शर्म॑। स॒प्रथा॒ इति॑ स॒ऽप्रथाः॑। नमः॑। प॒थे ॥ त्रीं ॥४॥

सा– कात्यायनः– "आग्निमारुतस्तोत्रस्य पुरस्ताद्विमोचनं परिधिषन्ध्योर्दिवो मूर्धेति प्रत्यृचम्" (काश्रौ १८·६·१८) इति। अश्वानामादिं प्रयुञ्जानं विमुञ्चति– 'दिवो मूर्धा' इति द्वाभ्याम्। तत्र प्रथममन्त्रपाठस्तु– 'दिवो मूर्धाऽसि पृथिव्या नाभिरूर्गपामोषधीनाम्। विश्वायुः शर्म सप्रथा नमस्पथे' इति। हे भगवन् अग्ने, यस्त्वं vदिवः द्युलोकस्य vमूर्धा vअसि उत्तमाङ्गमसि। vपृथिव्याः नानागुणविशिष्टायाः vनाभिः नहनमसि। vअपाम् vऊर्क् सर्वरसभूतानामपाम् [vओषधीनां च] रसः सारोऽसि। vविश्वायुः सर्वप्राणिनामायुः जीवनं च त्वमसि। vसप्रथाः सर्वतः पृथुरूपः विस्तीर्णोऽसि। अतः vपथे मार्गाय देवयानाख्यमार्गभूताय तुभ्यं vनमः ॥ ४ ॥

आ– विमुञ्चति द्वाभ्यामाग्नेयीभ्यां 'दिवो मूर्धा' इति। अग्निदेवत्या पुरउष्णिक्। यस्त्वमग्निः स त्वं vदिवः द्युलोकस्य vमूर्धा vअसि उत्तमाङ्गमसि। vपृथिव्याः नानागुणविशिष्टायाः vनाभिः नहनम्। पृथिवीं तेन दृढीकृत्य स्थितासि। 'ऊर्गपामोषधीनाम्'। सर्वरसभूतानाम् vअपाम् असि vऊर्क् रसः सारः। vओषधीनां च रसस्त्वमसि। vविश्वायुः सर्वप्राणिनामायुः

---

4. B1 तरण° for भरण°; B1 ब्राह्मणे for ब्रह्मणा
12. S2 om. आग्नि° ... प्रत्यृचमिति
13. P1 प्रपूजनं for प्रयुञ्जान°
14. P1 after °पाठस्तु adds अग्निदेवत्या पुरउष्णिक्

प्रातरनुवाकादिहोममन्त्राः]

जीवनं त्वमसि । ˅शर्म शरणं त्वमसि । ˅सप्रथाः सर्वतः पृथुरूपः विस्तीर्णोऽसि सर्वतोऽनवच्छिन्नाविभवोऽसि । अतः ˅पथे मार्गाय मार्गभूताय देवयानाख्यमार्गरूपाय तुभ्यं ˅नमः ॥२४॥

विश्वस्य मूर्धन्नधि तिष्ठसि श्रितः समुद्रे ते हृदयमप्स्वायुरपो दत्तोदधिं भिन्त ।
दिवस्पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्याऽव ॥ ५ ॥

विश्वस्य । मूर्धन् । अधि । तिष्ठसि । श्रितः ।
समुद्रे । ते । हृदयम् । अप्स्वित्यप्ऽसु । आयुः ।
अपः । दत्त । उदधिमित्युदऽधिम् । भिन्त ।
दिवः । पर्जन्यात् । अन्तरिक्षात् । पृथिव्याः । ततः । नः । वृष्ट्या । अव ॥ दिव्यः ॥५॥

सा– अथ द्वितीयः– ' विश्वस्य मूर्धन्नधि तिष्ठसि श्रितः समुद्रे ते हृदयमप्स्वायुरपो दत्तोदधिं भिन्त । दिवस्पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्याऽव ' इति । हे अग्ने, यस्त्वमस्य ˅विश्वस्य प्राणिजातस्य मूर्ध्नि ˅अधि उपरि ˅तिष्ठसि ˅श्रितः आश्रितः बुद्धीन्द्रियाणि सुषुम्णां वा नाडीम् । यस्य च तव ˅समुद्रे समुन्दने अन्तरिक्षे ˅हृदयम् । ˅अप्सु च ˅आयुः जीवनम् । तं त्वां याचे– ' अपो दत्त ' । ˅अपः देहीति । बहुवचनव्यत्ययः । एको ह्यग्निः । इह देवताबहुत्वं पूजार्थम् । ' उदधिं भिन्त ' । उदकस्य उदादेशः । उदानि धीयन्ते यस्मिन् मेघे स उदधिः । तम् ˅उदधिं वृष्ट्यर्थं भिन्धि विदारय । हे अग्ने, ततो मेघविदारणान्निमित्ताद् ˅दिवः संबन्धिनः ˅पर्जन्यात् वृष्ट्यभिमानिदेवात् ˅ततः ˅अन्तरिक्षात् मेघस्थानविशेषात् । ˅पृथिव्याः पृथिव्यै वृष्टिं देहि । तत् ˅वृष्ट्या ˅नः अस्मान् ˅अव पालय ॥ ५ ॥

आ– ' विश्वस्य मूर्धन् ' इति । अग्निदेवत्या जगत्याख्या महापदपङ्क्तिः, यस्याः आद्यो द्वादशाक्षरः द्वितीयो दशाक्षरस्तृतीयोऽष्टाक्षरः अन्त्यौ द्वौ नवाक्षरौ चेत् महापदपङ्क्तिः । श्रीभगवन् अग्ने, यतस्त्वं ˅विश्वस्य सर्वस्य प्राणिजातस्य ˅मूर्धन् मूर्धनि ˅अधि उपरि ˅तिष्ठासि ˅श्रितः । ' समुद्रे ते हृदयमप्स्वायुः ' । व्यत्ययः । श्रितम् । ˅ते ˅हृदयं ˅समुद्रे श्रितं समुद्रं श्रितमाश्रितम् । यस्य ते ˅आयुः जीवनम् ˅अप्सु आश्रितम् । व्यत्ययः । अपः श्रितम् । यत एवमतस्त्वम् ' अपः

---

1. B1 विशीर्णो° for विस्तीर्णो°
9. P1 after द्वितीयः adds अग्निदेवत्या महापङ्क्तिः
11. S2 बुद्धिं for बुद्धीन्द्रियाणि
14. P1 वृष्ट्यर्थे for वृष्ट्यर्थं
15. P1 देवतात् for देवात्
17. B1 आदौ for आद्यो
20. B1 before समुद्रे adds समुद्रश्रिते

दत्त '। अत्र व्यत्ययः। [v]अपः देहि। 'उदधिं भिन्त '। व्यत्ययः। उकस्य उदादेशः। उदानि धीयन्ते यस्मिन् मेघे स मेघः उदधिः। तमुदधिं वृष्ट्यर्थं भिन्त। व्यत्ययः। भिन्धि विदारय। हे अग्ने, ततो मेघविदारणात् निमित्तात् [v]दिवः संबन्धिनः [v]पर्जन्यात् वृष्ट्यभिमानिदैवतात् [v]ततः [v]अन्तरिक्षात् मेघस्थानविशेषात् [तत्-]-सकाशात् पृथिव्यै वृष्टिं देहि। तत् तत् [v]वृष्ट्या [v]नः अस्मान् [v]अव पालय ॥ २५ ॥

इ॒ष्टो य॒ज्ञो भृग॑ुभिराशी॒र्दा वसु॑भिः ।
तस्य॑ न इ॒ष्टस्य॑ प्री॒तस्य॒ द्रवि॑णे॒हा ग॑मेः ॥ ६ ॥

इ॒ष्टः। य॒ज्ञः। भृग॑ुभि॒रिति॒ भृगु॑ऽभिः। आ॒शी॒र्दा इत्या॑शीः॒ऽदाः। वसु॑भि॒रिति॒ वसु॑ऽभिः। तस्य॑। न॒ः। इ॒ष्टस्य॑। प्री॒तस्य॑। द्रवि॑ण। इ॒ह। आ। ग॒मे॒ः ॥ डॢ ॥ ॥६॥

सा– कात्यायनः – "अध्वरसमिष्टयजुरन्त इष्टो यज्ञ इति प्रत्यृचम् " (काश्रौ १८.६.२२) इति। अध्वर्युर्यजमानविषयमाशिषं करोति 'इष्टो यज्ञः' इति द्वाभ्याम्। पाठस्तु– 'इष्टो यज्ञो भृगुभिराशीर्दा वसुभिः। तस्य न इष्टस्य प्रीतस्य द्रविणेहा गमेः' इति। यस्यास्य सुवर्णदानस्य यजमानस्य [v]इष्टः संपादितः [v]यज्ञः [v]भृगुभिः भृगुप्रमुखैर्ब्राह्मणैः [v]आशीर्दाः [[v]वसुभिः] वसुप्रभृतिभिर्देवताविशेषैः आशिषां दाता च कृतः। [v]तस्य अस्य यजमानस्य [v]नः [v]इष्टस्य अस्माकमभिप्रेतस्य [v]प्रीतस्य वा, अस्मान् प्रति प्रीतः स्निग्धः उच्यते। याज्ययाजकयोः स्नेहव्यापनपरं वाक्यमिदमुक्त्वा अथेदानीं द्रविणमाह– त्वमपि हे [v]द्रविण [v]इह यजमाने [v]आगमेः आगमनं कुथाः। यजमानं प्रति शीघ्रमागच्छ। यद्वा– भृगुभिः आर्षेयैर्ब्राह्मणैः इष्टः यः यज्ञः वसुभिः देवैः आशीर्दाः कृतः। अत्र विभक्तिव्यत्ययः परोऽर्धर्चः। स यज्ञोऽस्माकमिष्टश्च प्रीतश्च द्रविणमिहानयत्विति ॥६॥

आ– 'इष्टो यज्ञः', 'इष्टो अग्निः' इति च द्वे समिष्टयजुषी। अग्निदेवत्ये उष्णिगगायत्र्यौ, गालवः। अस्यामध्वर्युर्यजमानविषयमाशिषं करोति। यस्यास्य यजमानस्य [v]यज्ञः [v]भृगुभिः भृगुगोत्रैर्ब्राह्मणैः [v]इष्टः सोऽयमेव यज्ञः तस्यास्य यजमानस्य [v]आशीर्दाः [v]वसुभिः वसुप्रभृतिभिर्देवताभिर्देवताविशेषैः [v]आशीर्दाः आशिषो दाता कृतः। [v]तस्य [v]नः अस्माभिर्याजकैः [v]इष्टस्य

---

1. B1 उदाः for उदानि
10. S2 om. अध्वर ... प्रत्यृचमिति (L 28)
11. P1 after पाठस्तु adds समिष्टयजुराग्निदेवत्योष्णिग्गालवः
15. P1 °यजमानयोः; S2 °याजनयोः for °याजकयोः
17. S2 आचार्यैः for आर्षेयैः
22. B1 आशीर्वादाः for आशीर्दाः

प्रातरनुवाकादिहोममन्त्राः]

यज्ञस्य अस्मान् प्रति प्रीतस्य फलभूतं हे द्रविण, इह यजमाने आगमेः आगमनं कुथाः यजमानं प्रति शीघ्रमागच्छ । यद्वा– भृगुभिरार्षेयैर्ब्राह्मणैरिष्टो यो यज्ञोऽस्माकमिष्टः प्रीतश्च द्रविणमिहागमयत्विति ॥ २६ ॥

इष्टो अग्निराहुतः पिपर्तु न इष्टꣳ हविः ।
स्वगेदं देवेभ्यो नमः ॥ ७ ॥ (३) ॥

इष्टः । अग्निः । आहुत इत्याऽहुतः । पिपर्तु । नः । इष्टम् । हविः ।
स्वगेति स्वऽगा । इदम् । देवेभ्यः । नमः ॥ छं ॥ ७ ॥ (३) ॥

सा– अथ द्वितीयः– ‘ इष्टो अग्निराहुतः पिपर्तु न इष्टꣳ हविः । स्वगेदं देवेभ्यो नमः ’ इति । कृतैर्यागैः अग्निः इष्टः आहुतः च पूर्वम् । अस्माभिराहुतश्च इष्टं हविः स्वस्येष्टं नः अस्माभिर्दत्तं समिष्टयजुर्लक्षणं हविः पिपर्तु हविषः परिपूरणं करोतु । किंच– ‘ स्वगेदम् ’ । अत्र व्यत्ययः । इदं हविः स्वगा स्वगं, स्वान् स्वकीयान् हविःसंबन्धिनो देवान् गच्छतीति स्वगा, स्वगं भवत्विति शेषः । सर्वसंतुष्टयर्थं नमस्करोति– ‘ देवेभ्यो नमः ’ इति । यद्वा– नमः इत्यन्ननाम । देवेभ्यः इदमन्नं स्वगं भवत्विति ॥ ७ ॥

[इति विंशेऽध्याये तृतीयोऽनुवाकः ॥३॥]

आ– ‘ इष्टो अग्निः ’ इति । कृतैर्यागैः अग्निः इष्टः आहुतः च । पूर्वमस्माभिराहुतश्च पिपर्तु । इष्टं हविः स्वस्येष्टं नः अस्माभिर्दत्तं समिष्टयजुर्लक्षणं हविः पिपर्तु हविषः परिपूरणं करोतु पालयतु । किंच– ‘ स्वगेदम् ’ । अत्र व्यत्ययः । इदं हविः स्वगा स्वगं, स्वान् स्वकीयान् हविसंबन्धिनो गच्छतीति स्वगा, स्वगम् भवत्विति शेषः । सर्वसंतुष्टयर्थं नमस्करोति– ‘ देवेभ्यो नमः ’ इति । यद्वा– ‘ नमः ’ इत्यन्ननाम । देवस्य इदमन्नं स्वगं भवत्विति ॥ २७ ॥

[इति तृतीयोऽनुवाकः]

[अथ चतुर्थोऽनुवाकः ।]

सा– तृतीये प्रातरनुवाकादिमन्त्रा उक्ताः । चतुर्थेऽनुवाके स्रुवाहुत्यादिमन्त्रा उच्यन्ते ॥

यदाकूतात् समसुस्रोद्धृदो वा मनसो वा संभृतं चक्षुषो वा ।
तदनुप्रेत सुकृतामु लोकं यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः ॥ १ ॥

2. B1 भावार्यैः for आर्षेयैः
8. P1 after द्वितीयः adds समिष्टयजुराग्निर्गायत्री गालवः ।
10. P1 °पूर्णं for °पूरणं

कासं ... ८०

यत् । आकूतादित्याऽकूतात् । समसुस्रोदिति समऽअसुस्रोत् । हृदः । वा ।
मनसः । वा । संभृतमिति सम्ऽभृतम् । चक्षुषः । वा ।
तत् । अनुप्रेतेत्यनुऽप्रेत । सुकृतामिति सुऽकृताम् । ऊँ इत्यूँ । लोकम् ।
यत्र । ऋषयः । जग्मुः । प्रथमजाः इति प्रथमऽजाः । पुराणाः । छेः ॥ १ ॥

कात्यायनः– ' स्रुवाहुतीर्जुहोति यदाकूतादिति प्रत्यृचमष्टौ ' (काश्रौ १८·६·२२) इति । ' यदाकूतात् ' इत्यष्टभिर्मन्त्रैः स्रुवाहुतीर्जुहुयात् । तत्र प्रथममन्त्रपाठस्तु– ' यदाकूतात् समसुस्रोद्धृदो वा मनसो वा संभृतं चक्षुषो वा । तदनुप्रेत सुकृतामु लोकं यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः ' इति । vयत् कर्म vआकूतात् । आकूतो नाम प्राङ्मनसः प्रवृत्तेरात्मनो धर्मो मनःप्रवृत्तिहेतुराकूतः । तस्मात् vसंभृतं सुकृतं सूक्ष्मरूपं संचितं यत् vसमसुस्रोत् समस्रवत् प्रजापतेः vहृदः vवा बुद्धेश्च vमनसः vवा हृदयावच्छिन्नान्मनसः सकाशात्, vचक्षुषः vवा सौराद्युपासनाबलाद्वा चक्षूरूपोपलक्षितस्थानाद् वा यत् संभृतं समसुस्रोत् निःसृतं भवति, स्वफलप्रारम्भार्थं यत्सूक्ष्मरूपं कर्मभिर्निःसृतं vतत् vअनु vसुकृतां सत्कर्मकारिणाम् अपि vलोकम् । लोक्यते दृश्यते भुज्यत इति लोकः । तं लोकं vप्रेत गच्छत । vयत्र यत्स्थाने vऋषयः स्वार्थकुशलाः vजग्मुः vप्रथमजाः विश्वसृजः vपुराणाः देवाश्चापि निवसन्ति, तं लोकं गच्छतेति संबन्धः ॥ १ ॥

आ– स्रुवेणाहुतिं जुहोति । ' यदाकूतात् ' इति नवर्चमाग्नेयम् । इयमाग्निदेवत्या जगती । देवश्रवा ऋषिः । vयत् vआकूतात् vसंभृतं सुकृतं सूक्ष्मरूपं संचितं, यत् आकूतात् आशयात् पुण्यपापनिवासयोग्यस्थानात् । कथं भूतात् ? ' हृदो वा मनसो वा ' । हृदयावच्छिन्नात् vमनसः सकाशात् vसमसुस्रोत् । vचक्षुषः vवा सौराद्युपासनाबलाद्वा चक्षूरूपोपलक्षितस्थानाद्वा संभृतं यत् समसुस्रोत् निःसृतं भवति, स्वफलप्रारम्भार्थं यत् कर्म सूक्ष्मरूपं निःसृतं, vतत् vअनु vसुकृतां सत्कर्मकारिणाम् vउ अपि vलोकम् । लोक्यते दृश्यते भुज्यत इति लोकः । तं लोकं vप्रेत प्रगच्छत । vयत्र यत्स्थानं vऋषयः स्वार्थकुशलाः vजग्मुः । यत्र [यत्] स्थाने vप्रथमजाः विश्वसृजः vपुराणाः देवाश्चापि निवसन्ति, तं लोकं गच्छतेति संबन्धः ॥ २८ ॥

---

5. S2 om. स्रुवा ... अष्टाविति
6. S2 नवभिः for अष्टभिः; P1 after पाठस्तु adds नवर्चमाग्नेयं ... देवश्रवा ऋषिः
7. P1 after इति adds यजमानान् प्रत्यध्वर्युवचनम् ।
8. S2 सुभृतं for संभृतं; P1 सिंचतं for संचितं
13. S2 om. तं; S2 om. इति संबन्धः [L, 14]
16. B1 before second आकूतात् adds हृदयः ।
19. B1 before स्वफल° adds तदनु
20. B1 स्वसुकृतं for सुकृतां
21. B1 अस्यार्थः for स्वार्थ°
22. B1 गच्छतीति for गच्छतेति

सुवाहुत्यादिमन्त्राः]

एतं॑ सधस्थ॒ परि॑ ते ददामि॒ यमा॒वहा॑च्छेव॒धिं जा॒तवे॑दाः ।
अ॒न्वा॒ग॒न्ता य॒ज्ञप॑ति॒र्वो॑ अत्र॒ तं॑ स्म॑ जानीत पर॒मे व्यो॑मन् ॥ २ ॥

एतम् । स॒ध॒स्थेति॑ सधऽस्थ । परि॑ । ते॒ । द॒दा॒मि॒ ।
यम् । आ॒वहा॒दित्या॒ऽवहा॑त् । शे॒व॒धिमिति॑ शे॒व॒ऽधिम् । जा॒तवे॑दा॒ इति॑ जा॒तऽवे॑दाः ।
अ॒न्वा॒ग॒न्तेत्य॑नु॒ऽआ॒ग॒न्ता । य॒ज्ञप॑ति॒रिति॑ य॒ज्ञऽप॑तिः । व॒ः । अत्र॑ ।
तम् । स्म॒ । जा॒नी॒त॒ । प॒र॒मे । व्यो॑म॒न्निति॑ विऽओ॑मन् । ज्यों॒ ॥ २ ॥

सा- अथ द्वितीयः - 'एतं॰ सधस्थ परि ते ददामि यमावहाच्छेवधिं जातवेदाः । अन्वागन्ता यज्ञपतिर्वो अत्र तं॰ स्म जानीत परमे व्योमन्' इति । हे सधस्थ समानस्थान देवानां समानस्वर्ग, एतं यजमानं, 'परि ते ददामि', ते तुभ्यं परि ददामि । परिदानं रक्षणार्थम् । जातवेदाः सर्वज्ञोऽग्निः यं च यजमानं शेवधिं देवानां निधिं कोशस्थानीयम् आवहात् आनयेत्, तं यजमानं तुभ्यं ददामि । यद्वा- आहुतिपरिणामभूतमग्न्यनुगृहीतं सुकृतमात्रं वा परिददामि । यत्र यज्ञपतिः विष्णुर्यज्ञफलप्रदातृत्वेन प्रकृतं यजमानम् अत्र वः युष्मान् अत्रस्थांश्च देवांश्च अन्वागन्ता, तं श्रीभगवन्तम् अन्वागन्तारं परमे उत्कृष्टे व्योमनि परिपूर्णे स्वस्वरूपे एव स्थितं देवाः यूयं जानीत सर्वान्तर्यामित्वाच्चेति ॥ २ ॥

आ- 'एतं॰ सधस्थ' इति । अग्निदेवत्या त्रिष्टुप् । देवश्रवाः ऋषिः । हे सधस्थ समानस्थान, देवानां समानस्थान स्वर्ग, एतं यजमानं परि ते ददामि । परिदानं च रक्षणार्थम् । 'यमावहाच्छेवधिं जातवेदाः' । श्रीभगवान् सर्वज्ञोऽग्निः । यं च यजमानं शेवधिं देवानां निधिं कोशस्थानीयम् आवहात् आनयेत्, तं यजमानं तुभ्यं ददामि । यद्वा- आहुतिपरिणामभूतमग्न्यनुगृहीतं सुकृतमात्रं वा परि ददामि । 'अन्वागन्ता यज्ञपतिर्वो अत्र' । मनुर्यज्ञपतिः साक्षात् । यज्ञपतिः भगवान् श्रीविष्णुर्यज्ञफलप्रदातृत्वेन प्रकृतं यजमानम् अत्र वः युष्मान् अत्रस्थांश्च देवांश्च अन्वागन्ता, तं श्रीभगवन्तं अन्वागन्तारं परमे उत्कृष्टतमे व्योमन् व्योमनि परिपूर्णे च स्वरूपेण एव स्थितं देवाः, यूयं जानी ज्ञातवन्तः । सर्वान्तर्यामित्वात् [सर्वा-]-त्मत्वाच्चेति ॥ २९ ॥

7. P1 after द्वितीयः adds अग्निदेवत्या त्रिष्टुप् । देवश्रवा ऋषिः
11. S2 सकृन्मात्रं for सुकृतमात्रं
12. S2 om. देवांश्च
13. S2 सस्वरूपे for स्वस्वरूपे
18. B1 °स्थानम् for °स्थानीयम्

एतं जानाथ परमे व्योमन् देवाः सधस्था विद रूपमस्य ।
यदागच्छात् पथिभिर्देवयानैरिष्टापूर्ते कृणवथाविरस्मै ॥ ३ ॥

एतम् । जानाथ । परमे । व्योमन्निति विऽओमन् ।
देवाः । सधस्था इति सधऽस्थाः । विद । रूपम् । अस्य ।
यत् । आगच्छादित्याऽगच्छात् । पथिभिरिति पथिऽभिः । देवयानैरिति देवऽयानैः ।
इष्टापूर्ते इतीष्टापूर्ते । कृणवथ । आविः । अस्मै ॥ ॐ ॥ ३ ॥

सा- अथ तृतीयः- 'एतं जानाथ परमे व्योमन् देवाः सधस्था विद रूपमस्य । यदागच्छात् पथिभिर्देवयानैरिष्टापूर्ते कृणवथाविरस्मै' इति । हे [v]सधस्थाः समानस्थानाः [v]देवाः, [v]परमे उत्कृष्टतमे व्योमनि स्थितम् [v]एतं यजमानं [v]जानाथ । किंच- यतः [v]अस्य यजमानस्य [v]रूपं [v]विद । अत्र व्यत्ययः । विदाथ जानीथ । अतो युष्माभिर्विदितरूपो यजमानः [v]देवयानैः [v]पथिभिः मार्गैः [v]यत् यदा [v]आगच्छात् आगच्छेत् । मार्गस्य देवताबहुत्वाभिप्रायेण बहुवचनम्, उपभोगस्थानभेदेन वा । तदा 'इष्टापूर्ते कृणवथ' । [v]अस्मै यजमानाय इष्टं यागादि, पूर्तं तडागादि, ते द्वे [v]आविः [v]कृणवथ आविर्भूतफले कृणुत । इष्टापूर्तफलाभिव्यक्तिं कुरुतेत्यर्थः ॥ ३ ॥

आ- 'एतं जानाथ' इति । विश्वकर्मदेवत्या देवदेवत्या वा त्रिष्टुप् । देववातः । 'देवाः सधस्थाः' । हे [v]सधस्थाः समानस्थानाः हे [v]देवाः, [v]परमे प्रकृष्टतमे [v]व्योमन् व्योमनि स्थितम् [v]एतं यजमानं [v]जानाथ । 'विद रूपमस्य' । किंच- यतः [v]अस्य यजमानस्य [v]रूपं देवाः [v]विद विदाथ । व्यत्ययः । जानीत । अतो युष्माभिर्विदितरूपो यजमानो [v]देवयानैः [v]पथिभिः मार्गैः [v]यत् [v]आगच्छात् । मार्गस्य देवताबहुत्वाभिप्रायेण बहुवचनम् । यदागच्छेत् तदा । 'इष्टापूर्ते कृणवथाविरस्मै' । [v]अस्मै यजमानाय [v]इष्टापूर्ते, इष्टं यागादि पूर्तं तडागादिकं, ते द्वे [v]आविः [v]कृणवथ आविर्भूतफलभूते कुरुत, इष्टापूर्तफलाभिव्यक्तिं कुरुतेत्यर्थः ॥ ३० ॥

उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥ ४ ॥
येन वहसि सहस्रं येनाग्ने सर्ववेदसम् ।
तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥ ५ ॥

7. P1 after तृतीयः adds विश्वकर्मदेवत्या त्रिष्टुप् देवश्रवाः
9. S2 जानीथ for जानाथ
11. S2 om. उपभोगस्थानभेदेन वा; S2 कृणवथ for कृणुत
12. P1 कृणुथ for कृणवथ
20. B1 °अभिषिक्तं for अभिव्यक्तिं

उद्बुध्यस्व । . . . ॥ व ॥ ४ ॥

येन॒ वह॑सि । . . . ॥ य ॥ ५ ॥

सा– चतुर्थपञ्चममन्त्रौ षोडशेऽध्याये व्याख्यातौ ॥ ४-५ ॥

आ– 'उद्बुध्यस्व' इति । त्रिष्टुबाग्नेयी । देववातः ॥

'येन वहसि' इति । आग्नेय्यनुष्टुप् । भारतो वृद्धऋषिः । एतौ षोडशे व्याख्यातौ ॥ ३१–३२ ॥

प्र॒स्त॒रेण॑ प॒रि॒धिना॑ स्रु॒चा वेद्या॑ च ब॒र्हिषा॑ ।
ऋ॒चेमं य॒ज्ञं नो॑ नय॒ स्व॑र्दे॒वेषु॒ गन्त॑वे ॥ ६ ॥

प्र॒स्त॒रेणेति॑ प्र॒ऽस्त॒रेण॑ । प॒रि॒धिनेति॑ प॒रि॒ऽधिना॑ । स्रु॒चा । वेद्या॑ । च॒ । ब॒र्हिषा॑ । ऋ॒चा । इ॒मम् । य॒ज्ञम् । न॒ः । न॒य॒ । स्व॑ः । दे॒वेषु॑ । गन्त॑वे ॥ दुम् ॥ ६ ॥

सा– अथ षष्ठः– 'प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा । ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवे' इति । हे श्रीभगवन्नग्ने, ^{v}प्रस्तरेण कुशप्रस्तरेण ^{v}परिधिना समित्परिधिना ^{v}स्रुचा ^{v}वेद्या ^{v}च ^{v}बर्हिषा [^{v}ऋचा] ऋगादिभिर्मन्त्रैः तत्तदभिमानिदेवतारूपैश्च सह ^{v}नः अस्मदीयमिमं ^{v}यज्ञं ^{v}स्वः स्वर्गं ^{v}नय । ^{v}देवेषु ^{v}गन्तवे देवान् प्रति गमनाय । यज्ञे हि गते यजमानो गत एव । स हि तस्य शरीरमित्यभिप्रायः ॥ ६ ॥

आ– 'प्रस्तरेण परिधिना' इति । आग्नेय्यनुष्टुप् । भारतो वृद्धः । हे श्रीभगवन्नग्ने, ^{v}प्रस्तरेण कुशप्रस्तरेण ^{v}परिधिना समित्परिधिना ^{v}स्रुचा ^{v}वेद्या ^{v}च बर्हिषा । ^{v}ऋचा ऋगादिमन्त्रैः तत्तदभिमानिदेवतारूपैः सह ^{v}नः अस्मदीयं ^{v}यज्ञं ^{v}स्वः स्वर्गं ^{v}नय । ^{v}देवेषु ^{v}गन्तवे देवान् प्रति गमनाय । यज्ञे प्रणीते यजमानः प्रणीत एवेत्यभिप्रायः ॥ ३३ ॥

यद्द॒त्तं यत् प॑रा॒दा॒नं॒ यत् पू॒र्तं याश्च॒ दक्षि॑णाः ।
तद॒ग्निर्वै॑श्वकर्म॒णः स्व॑र्दे॒वेषु॑ नो दधत् ॥ ७ ॥

यत् । द॒त्तम् । यत् । प॒रा॒दा॒नमिति॑ प॒रा॒ऽदा॒नम् । यत् । पू॒र्तम् । याः । च॒ । दक्षि॑णाः । तत् । अ॒ग्निः । वै॒श्व॒क॒र्म॒ण इति॑ वै॒श्व॒ऽक॒र्म॒णः । स्व॑ः । दे॒वेषु॑ । न॒ः । द॒ध॒त् ॥ त्रे ॥७॥

11. P1 after षष्ठः adds आग्नेय्यनुष्टुप् । भारतावभृथम् (!)
18. B1 °भूयैः for °रूपैः

सा– अथ सप्तमः– 'यद्दत्तं यत् परादानं यत् पूर्तं याश्च दक्षिणाः। तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत्' इति। ˇयत् ˇदत्तं भार्यापुत्रजामात्रादिभ्यः, ˇयत् ˇपरादानं दीनान्धकृपणादिभ्यः दयया यत् परेभ्यः अन्येभ्यः दानं कृतं तत् परादानम्। ˇयत् ˇपूर्तं स्मृतिविहितं ब्राह्मणभोजनादि। ˇयाः ˇच ˇदक्षिणाः यज्ञान्तर्गताः ˇतत् सर्वम् ˇअग्निः ˇवैश्वकर्मणः। विश्वकर्मैव वैश्वकर्मणः। स्वार्थे तद्धितः। ˇअग्निः ˇस्वः ˇदेवेषु स्वर्गलोकस्थदेवेषु च ˇनः अस्माकं भोगार्थं ˇदधत् दधातु स्थापयतु ॥ ७ ॥

आ– आग्नेय्यनुष्टुप्। भारतो वृद्धः। ˇयत् ˇदत्तं भार्यापुत्रजामात्रादिभ्यः, ˇयत् ˇपरादानं दीनान्धकृपणादिभ्यः दयया यत् परेभ्यः अन्येभ्यः दानं कृतम्। ˇयत् ˇपूर्तं स्मृतिविहितं ब्राह्मणभोजनादि। ˇयाः ˇच ˇदक्षिणाः यज्ञान्तर्गताः। ˇतत् सर्वम् ˇअग्निः ˇवैश्वकर्मणः। विश्वकर्मैव वैश्वकर्मणः। स्वार्थे तद्धितः। अग्निः ˇस्वः ˇदेवेषु स्वर्गलोके देवेषु मध्ये ˇनः अस्मद्भोगार्थं [ˇदधत्] दधातु स्थापयतु ॥ ३४ ॥

यत्र धारा अनपेता मधोर्घृतस्य च याः।
तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ॥ ८ ॥

यत्र। धाराः। अनपेता इत्यनपऽइताः। मधोः। घृतस्य। च। याः।
तत्। अग्निः। वैश्वकर्मण इति वैश्वऽकर्मणः। स्वः। देवेषु। नः। दधत् ॥ ऋग् ॥८॥

सा– अथाष्टमः– 'यत्र धारा अनपेता मधोर्घृतस्य च याः। तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत्' इति। ˇयत्र यस्मिन देशे ˇमधोः मधुनः ˇघृतस्य ˇच सोमादीनां च ˇयाः ˇअनपेताः अनुपक्षीणाः अनवच्छिन्नाश्च ˇधाराः सन्ति, ˇतत् तत्र ताभिः सर्वाभिः धाराभिः ˇवैश्वकर्मणः ˇअग्निः ˇस्वः ˇदेवेषु मध्ये ˇनः अस्माकं यजमानं ˇदधत् दधातु पोषयतु ॥ ८ ॥

आ– 'यत्र धारा' इति। आग्नेय्यनुष्टुप् ॥३५॥

ये अग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि।
तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव ॥ ९ ॥(४)॥

1. P1 after सप्तमः adds पूर्ववत्
3. S2 om. अन्येभ्यः
5. S2 भागार्थं for भोगार्थं
6. B1 भारता for भारतो, B1 before परा° adds दत्तं
9. B1 before विश्वकर्मैव adds विश्वे कर्मणाः
15. P1 after अष्टमः adds पूर्ववत्

सुवाहुत्यादिमन्त्राः]

ये । अ॒ग्नयः॑ । पाञ्च॑जन्या॒ इति॒ पाञ्च॑ऽजन्याः । अ॒स्याम् । पृ॒थि॒व्याम् । अधि॑ ।
तेषा॑म्। अ॒सि॒। त्वम् । उ॒त्त॒म इत्यु॑त्ऽत॒मः । प्र । न॒ः । जी॒वात॑वे । सु॒व॒ ॥ झुं ॥ ९॥(४)॥

सा- कात्यायनः – "चित्याग्निमुपतिष्ठते ये अग्नय इति " (काश्रौ १८.२.२३) इति। पाठस्तु — 'ये अग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि । तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव ' इति। हे यज्ञ, ^{v}ये ^{v}अग्नयः ^{v}पाञ्चजन्याः ^{v}अस्यां ^{v}पृथिव्याम् ^{v}अधि उपरि ये अवस्थिताः पञ्चचितिका अग्नयः । "ये के चाग्नयः पञ्चचितिकाः " (शब्रा ९.५.१.५३) इति श्रुतेः । ^{v}तेषाम् अग्नीनां ^{v}त्वम् ^{v}उत्तमः ^{v}असि । निर्मथ्योऽग्निस्त्वमुद्गततमोऽसि । अतस्त्वां प्रार्थयामः । ^{v}जीवातवे जीवयितुम् । जीवयतीति जीवातुस्तस्मै बहुकालजीवनाय ^{v}नः अस्मान् ^{v}सुव एवमस्त्वित्यनुजानीहि ॥ ९ ॥

[इति विंशेऽध्याये चतुर्थोऽनुवाकः ॥४॥]

आ– 'ये अग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि ' इति । ^{v}अस्यां ^{v}पृथिव्याम् (^{v}अधि) उपरि ^{v}ये अवस्थिताः ^{v}पाञ्चजन्याः पञ्चचितिकाः ^{v}अग्नयः । "ये चाग्नयः पञ्चचितिकाः" (शब्रा ९.५.१.५३) इति श्रुतेः । ^{v}तेषाम् अग्नीनां निर्मथ्योऽग्निस्त्वमुद्गततमः ^{v}असि । अतस्त्वां प्रार्थयामः – ^{v}प्र ^{v}नः ^{v}जीवातवे । " जीवेरातुः " (उसू १.७९) । जीवयतीति जीवातुः । तस्मै जीवातवे चिरकालजीवनाय ^{v}नः अस्मान् ^{v}प्रसुव एवमस्त्वित्यनु जानीहि ॥ ३४ ॥

[इति चतुर्थोऽनुवाकः]

[अथ पञ्चमोऽनुवाकः ।]

सा- चतुर्थे सुवादिहोममन्त्रा उक्ताः । पञ्चमे चित्यग्न्युपस्थानादिमन्त्रा उच्यन्ते ॥

वार्त्र॑हत्याय॒ शव॑से पृत॒ना॒षाह्या॑य च ।
इन्द्र॒ त्वाऽऽ व॑र्तयामसि ॥ १ ॥

वार्त्र॑ह॒त्या॒येति॒ वार्त्र॑ऽहत्याय । शव॑से ।
पृ॒त॒ना॒षाह्या॑य । पृ॒त॒ना॒सह्या॒येति॒ पृ॒त॒ना॒ऽसह्या॑य । च॒ ।
इन्द्र॑ । त्वा॒ । आ । व॒र्त॒या॒म॒सि ॥ रौ ॥ १ ॥

---

4. P1 after पाठस्तु adds आग्नेय्यनुष्टुप् यज्ञस्यार्षम्

8. P1 before नः adds वा

17. P1 om. °होम°

कात्यायनः- " चित्यमग्निमुपतिष्ठते वार्त्रहत्यायेति " (काश्रौ १७.७.१) इति। 'वार्त्रहत्याय' इत्यादिदशभिर्मन्त्रैरग्नेरुपस्थानं कुर्यात्। तत्र प्रथममन्त्रः- 'वार्त्रहत्याय शवसे पृतनाषाह्याय च। इन्द्र त्वा वर्तयामसि' इति। हे ᵛइन्द्र, ᵛत्वा त्वाम् ᵛआवर्तयामसि। "इदन्तो मसि" (पा ७.१.४६) इतीकारश्छान्दसः। आवर्तयामः। किमर्थम्? ᵛशवसे। शव इति बलनाम। कीदृशाय शवसे? ᵛवार्त्रहत्याय। तथा च श्रुतिः-" वार्त्रघ्नीभ्यां प्रथमाभ्यामुपतिष्ठत एतद्वै देवा वृत्रं पाप्मानꣳ हत्वाऽपहतपाप्मान एतत् कर्माकुर्वत। तथैवैतद्यजमानो वृत्रं पाप्मानꣳ हत्वाऽपहतपाप्मैतत् कर्म कुरुते " (शब्रा ९.५.२.४) इति। वार्त्रहत्याय। वृत्रो येन हन्यते तद् वार्त्रहत्यम्। ᵛपृतनाषाह्याय ᵛच। सहतिरभिभवार्थः। पृतनां सेनां सहते अभिभवतीति पृतनासहम्। तत्र साधु पृतनासाह्यम्। छान्दसं षत्वम्। आवर्तनं वृत्रजयार्थं परिभ्रमणं तत् कारयामः॥ १॥

आ- चित्यमग्निमुपतिष्ठते- 'वार्त्रहत्याय' इति। " इन्द्र एतत् सप्तर्चमपश्यत् " (शब्रा ९.५.२) इति श्रुतिः। तत्राद्ये वृत्रहेन्द्रदेवत्ये गायत्रीत्रिष्टुभौ। इन्द्रस्यार्षं विश्वामित्रस्य वा। वृत्रो येन शवसा बलेन हन्यते तद् वार्त्रहत्यं शवः। शव इति बलनाम। तस्मै ᵛवार्त्रहत्याय ᵛशवसे। " वार्त्रघ्नीभ्यां प्रथमाभ्यामुपतिष्ठत एतद्वै देवा वृत्रं पाप्मानं हत्वाऽपहतपाप्मान एतत् कुर्वते। तथैवैतद्यजमानो वृत्रं पाप्मानं हत्वाऽपहतपाप्मैतत् कर्म कुरुते " (शब्रा ९.५.२.४) इति श्रुतेः। ᵛपृतनाषाह्याय ᵛच। सहतिरभिभवार्थः। पृतनां सेनां सहते अभिभवतीति पृतनासहः। तत्र साधु पृतनासाह्यम्। छान्दसं षत्वम्। तस्मै। हे ᵛइन्द्र, पृतनाषाह्याय वार्त्रहत्याय च शवसे ᵛत्वा इन्द्रं त्वाम् ᵛआवर्तयामसि। इकारश्छान्दसः। आवर्तयामः। आवर्तनं वृत्रजयार्थं परिभ्रमणं, तत् कारयामः॥ ३५॥

सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र सं पिणक् कुणारुम्।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ॥ २॥

सहदानुमिति सहऽदानुम्। पुरुहूतेति पुरुऽहूत। क्षियन्तम्।
अहस्तम। इन्द्र। सम। पिणक्। कुणारुम्।
अभि। वृत्रम्। वर्धमानम्। पियारुम्। अपादम्। इन्द्र। तवसा। जघन्थ॥ रेम्॥२॥

सा- अथ द्वितीयः- 'सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र संपिणक् कुणारुम्। अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ' इति। हे ᵛपुरुहूत, पुरुभिर्बहुभिर्हूयते आहूयते इति पुरुहूतः। तत्संबोधनं पुरुहूत हे ᵛइन्द्र, ᵛसहदानुं सहसो बलस्य दातारम्। सह एकीभूय युद्धं ददाति सहदानुः। तं सहदानुम्। ᵛक्षियन्तं निवसन्तम्। शक्रम् ᵛअभि इन्द्रं त्वामभिमुखीकृत्य युद्धार्थं स्थितं ᵛवृत्रम् ᵛअहस्तं

2. P1 after °मन्त्रः adds गायत्री त्रिष्टुबैन्द्री
4. S2 om, second शवसे
15. B1 पृतनाश्च देहः। तत्र साधुः घृतेन साह्यम् for पृतनासहः। तत्र साधु पृतनासाह्यम्

कृत्वा, वज्रेण हस्तं छित्वा, अहस्तं वृत्रं निर्जित्य, Vकुणारुं दुर्वचोऽभिधायिनं कुणारुं Vसंपिणक् संपिण्ढि सम्यक् निष्पीडय। एवमपि Vवर्धमानं प्रतिक्षणमभिवर्धमानं Vपियारुम् पियतिर्हिंसाकर्मा। देवानां हिंसितारम्। हे Vइन्द्र, एवंविधं वृत्रम् Vअपादं कृत्वा गमनासमर्थं कृत्वा Vतवसा बलेन Vजघन्य जहि हन ॥ २ ॥

आ— 'सहदानुम्' इति। हे Vपुरुहूत, पुरुभिर्बहुभिर्हूयत इति पुरुहूतः। हे Vइन्द्र, Vसहदानुं सहसो बलस्य दातारम्। सह एकीभूय युद्धं ददाति सहदानुस्तम्। Vक्षियन्तं निवसन्तम्। शत्रुम् Vअभि इन्द्रं त्वामभिमुखीकृत्य युद्धार्थं स्थितं वृत्रम् Vअहस्तं कृत्वा वज्रेण हस्तं छित्वा निर्जित्य। 'संपिणक् कुणारुम्'। कुणन्तं दुर्वचोभिधायिनं Vकुणारुं Vसंपिणक् संपिण्ढि सम्यक् निष्पीडय। एवमपि Vवर्धमानं प्रतिक्षणमभिवर्धमानं Vपियारुम्। पियतिर्हिंसा-कर्मा। देवानां हिंसितारम्। हे Vइन्द्र, एवंविधं Vवृत्रम् Vअपादं कृत्वा गमनासमर्थं कृत्वा Vतवसा बलेन Vजघन्य जहि हन ॥ ३६ ॥

वि न॑ इन्द्र॒ मृधो॑ जहि नी॒चा य॑च्छ पृतन्य॒तः।
यो अ॒स्माँ३ अ॑भि॒दास॒त्यध॑रं गमया॒ तम॑ः ॥ ३ ॥

वि नः ... ॥ ष ॥ ३ ॥

स्ता— अथ तृतीयः— 'वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। यो अस्माँ३ अभिदासत्यधरं गमया तमः' इति। अयं मन्त्रो व्याख्यातः ॥ ३ ॥

मृगो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः प॑रा॒वत॒ आ ज॑गन्था॒ पर॑स्याः।
सृकं॒ सं॒शाय॑ प॒विमि॑न्द्र ति॒ग्मं वि शत्रू॑न् ताळ्हि॒ वि मृधो॑ नुदस्व ॥४॥

मृगः। न। भी॒मः। कु॒च॒रः। गि॒रि॒ष्ठाः। गि॒रि॒स्था इति॑ गि॒रि॒ऽस्थाः।
प॒रा॒वत॒ इति॑ प॒रा॒ऽवतः। आ। ज॒ग॒न्थ॒। पर॑स्याः।
सृकम्। सं॒शायेति॑ स॒म्ऽशाय॑। प॒विम्। इ॒न्द्र॒। ति॒ग्मम्।
वि। शत्रू॑न्। ता॒ळ्हि॒। वि। मृधः॑। नु॒द॒स्व॒ ॥ घा ॥ ४ ॥

---

2. S2 पीडय for निष्पीडय; S2 om. प्रतिक्षणमभिवर्धमानम्

8. B1 वृत्रं छन्नं for छित्वा

15. P1 after तृतीयः adds द्वे इन्द्रदेवत्ये अनुष्टुप्त्रिष्टुभौ व्यासः भारद्वाजः ऋषी क्रमेण

16. P1 after मन्त्रो add अष्टमे

सा– अथ चतुर्थः – ‘मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः । सृकꣳ सꣳशाय पविमिन्द्र तिग्मꣳ वि शत्रून् ताळ्हि वि मृधो नुदस्व’ इति । मृगः न मृग इव भीमः भयहेतुः व्याघ्रो वा सिंहो वा । भीमो भीषणः । कुचरः कुत्सिताचारी हिंस्रः प्राणिवधजीवनः । गिरिष्ठाः पर्वताश्रयः । स यथा कांश्चित् प्राणिविशेषान् हन्ति तैश्चानभिभूयमानः, एवं त्वं परस्याः पृथिव्याः परावतः । परावत इति दूरनाम । दूरदूरतरप्रदेशादाहूयमान इव आ जगन्थ आगच्छ । आगत्य च शृणु यत् प्रार्थ्यसेऽस्माभिः । सृकं वज्रम् । सृकति हिनस्तीति सृकं हिंसासाधनम् । संशाय । शो तनूकरणे । निशितधारं कृत्वा । पविं शतधारम् । तदपि तिग्मम् अतितीक्ष्णं वज्रं गृहीत्वा हे इन्द्र, शत्रून् वि ताळ्हि । वधार्थोऽयं धातुः । विनाशय । हन लभ प्रतिष्ठायाम् इति वा । अप्रतिष्ठान् वा गच्छतु । प्रधानभूतान् शत्रून् हत्वा अवशिष्टान् क्षीणान् मृधः रणमण्डलात् वि नुदस्व प्रेरय अपुनरागमनाय ॥४॥

आ– ‘वि न इन्द्र’, ‘मृगो न’– इति द्वे वि(? वै) मृधेन्द्रदेवत्ये । अनुष्टुप्त्रिष्टुभौ । व्यासो भारद्वाजश्च क्रमेणानयोः ऋषी । आद्यो व्याख्यातः ॥

मृगः न मृगः इव भीमः भयहेतुः । व्याघ्रो वा सिंहो वा । भीमो भीषणः । कुचरः कुत्सिताचारी हिंस्रः प्राणिवधजीवनः । गिरिष्ठाः पर्वताश्रयः । स यथा कांश्चित् प्राणिविशेषान् हन्ति तैश्चानभिभूयमानः, एवं त्वं परस्याः पृथिव्याः परावतः । [परावत] इति दूरनाम । दूरदूरतरात् देशात् आहूयमानः आजगन्थ । आगत्य च शृणु यत् प्रार्थ्यसेऽस्माभिः । सृकं वज्रम् । सृकति हिनस्तीति सृकं हिंसासाधनम् । संशाय । शो तनूकरणे । निशितधारं कृत्वा । तच्च पविं शतधारम् । तदपि तिग्मम् अतितीक्ष्णं वज्रं गृहीत्वा हे इन्द्र, शत्रून् वि ताळ्हि । वधार्थोऽयं धातुः । शत्रून् विनाशय । हन प्रतिष्ठायाम् । अप्रतिष्ठान् वा कुरु । प्रधानभूतान् शत्रून् हत्वा अवशिष्टान् क्षीणान् मृधः रणमण्डलात् नुदस्व पुनरनागमनाय ॥ ३७–३८ ॥

वैश्वानरो नं ऊतय आ प्र यांतु परावतः ।
अग्निर्नः सुष्टुतीरुपं ॥ ५ ॥

---

3. P1 तत्र for भय°; P1 यथा for भीमः; P1 after °चारी ins. चर गतिभक्षणयोः

5. S2 om. आगच्छ

8. P1 after विनाशय ins. ताडयतेर्हिंसाकर्मण एतद्रूपम् ताढीत्यर्थः

13. B1 हिंसो for सिंहो

वैश्वानरः । नः । ऊतये । आ । प्र । यातु । परावत इति पराऽवतः ।
अग्निः । नः । सुष्टुतीः । सुस्तुतीरिति सुऽस्तुतीः । उप ॥। त्रिम् ॥ ५ ॥

सा– अथ पञ्चमः –'वैश्वानरो न ऊतय आ प्र यातु परावतः । अग्निर्नः सुष्टुतीरुप' इति । वैश्वानरः अग्निः नः अस्माकम् ऊतये अवनाय तर्पणाय आ प्र यातु आगच्छतु । परावतः दूरदूरतः प्रदेशात् । किंच । नः अस्माकं सुष्टुतीः उप शोभनाः स्तुतीरुपश्रोतुम् । आ प्रयात्विति संबन्धः ॥ ५ ॥

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषस्पातु नक्तम् ॥ ६ ॥

पृष्टः । दिवि । पृष्टः । अग्निः । पृथिव्याम् । पृष्टः । विश्वाः । ओषधीः । आ । विवेश ।
वैश्वानरः । सहसा । पृष्टः । अग्निः ।
सः । नः । दिवा । सः । रिषः । पातु । नक्तम् ॥ साः ॥६॥

सा– अथ षष्ठः – ' पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश । वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषस्पातु नक्तम् ' इति । यः अग्निः वैश्वानरः दिवि द्युमण्डले मुमुक्षुभिः कोऽयमिति पृष्टः । तत्र ह्येवं श्रूयते– '' यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिस्तद्ब्रह्म '' (शांब्रा ८.३) इति । यश्च वैश्वानरः अग्निः विद्युदात्मना प्रावृषि स्थितः पृथिव्याम् अन्तरिक्षलोके । पृथिवीत्यन्तरिक्षनामसु पठितम् । उदकार्थिभिः कोऽयं किंनामायमिति पृष्टः । यश्च वैश्वानरः अस्मिन् लोके व्यवस्थितः पृष्टः अग्निः होतृप्रभृतिभिर्म्लेच्छपर्यन्तैर्जनैः कोऽयं तापप्रकाशादिभिः विश्वा ओषधीः आविवेश । मथ्यमानः कोऽयमिति दिदृक्षुभिः पृष्टः सः नः सोऽस्मान् दिवा अहनि नक्तं रात्रौ अस्मान् पातु रक्षतु । रिषः । रिषतिर्हिंसार्थः । हिंसाव्यापारात् नः दिवा नक्तं सततम् अनवच्छिन्नं चिरं पात्वित्याशीरिति ॥६॥

आ– 'वैश्वानरो नः', 'पृष्टो दिवि' इति द्वे वैश्वानर्यौ गायत्रीत्रिष्टुभौ । कुत्स ऋषिः । वैश्वानरः अग्निः अस्माकम् ऊतये अवनाय तर्पणाय वा परावतः अतिदूरप्रदेशात् आप्रयातु आगच्छतु । आगत्य च नः सुष्टुतीः अस्माकं शोभनस्तुतीः उप, शृणोत्विति शेषः ॥

3. P1 after पञ्चमः adds द्वे वैश्वानरदेवत्ये गायत्रीत्रिष्टुभौ

5. P1 om. दूर°; S2 प्रदेशतः for प्रदेशात्

18. S2 om. अहनि

20. S2 निरन्तरं for चिरं; B1 after इति adds द्वाभ्यां पाप्मानं दग्ध्वा (?) अपहतपाप्मैतरकर्म करोति । वैश्वानरो नः पृष्टो दिवीति

'पृष्टो दिवि'। यः ^{v}अग्नि ^{v}वैश्वानरः ^{v}दिवि द्युमण्डले सुमुक्षुभिः कोऽयमिति ^{v}पृष्टः। तत्र ह्येवं श्रूयते– "यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिस्तद्ब्रह्म" (शांब्रा ८·३) इति। यश्च वैश्वानरः ^{v}अग्निः विद्युदात्मना प्रावृषि स्थितः ^{v}पृथिव्याम् अन्तरिक्षलोके। पृथिवीत्यन्तरिक्षनामसु पठितम्। कोऽयं नामायमित्युदकार्थिभिः ^{v}पृष्टः। यश्च वैश्वानरः ^{v}अग्निः अस्मिन् लोके व्यवस्थितः, ^{v}पृष्टः अग्निः होतृप्रभृतिभिर्म्लेच्छयन्तैः कोऽयम् यः तापप्रकाशादिभिः ^{v}विश्वा ^{v}ओषधीः ^{v}आ-विवेश आविष्टः। यश्च वैश्वानरोऽग्निः ^{v}सहसा बलेन अध्वर्युणा मथ्यमानः कोऽयमिति। यश्च दिदृक्षुभिः पृष्टः ^{v}सः ^{v}नः सोऽस्मान् ^{v}दिवा अहनि ^{v}नक्तं रात्रौ अस्मान् ^{v}पातु रक्षतु। [^{v}रिषः]। रिषतिर्हिंसार्थः। हिंसाव्यापारान्नः दिवानक्तं सततम् अनवच्छिन्नं निरन्तरं पात्वित्याशीरिति ॥ ४० ॥

अ॒श्याम॒ तं काम॑मग्ने॒ तवो॒ती अ॒श्याम॑ र॒यिं र॑यिवः सु॒वीर॑म् ।
अ॒श्याम॒ वाज॑म॒भि वा॒जय॑न्तो॒ऽश्याम॑ द्यु॒म्नम॑जरा॒जरं॑ ते ॥७॥

अ॒श्याम॑ । तम् । काम॑म् । अ॒ग्ने॒ । तव॑ । ऊ॒ती ।
अ॒श्याम॑ । र॒यिम् । र॒यि॒व॒ इति॑ रयिऽवः । सु॒वीर॒मिति॑ सुऽवीर॑म् ।
अ॒श्याम॑ । वाज॑म् । अ॒भि । वा॒जय॑न्तः ।
अ॒श्याम॑ । द्यु॒म्नम् । अ॒ज॒र॒ । अ॒जर॑म् । ते॒ ॥ छौम् ॥७॥

सा– अथ सप्तमः– 'अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवीरम्। अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते' इति। हे श्रीभगवन् ^{v}अग्ने, वयं यं कामं याचामहे ^{v}तं ^{v}कामम् ^{v}अश्याम त्वत्प्रसादात् प्राप्नुयाम। तवोती। व्यत्ययः। त्वत्त इत्यर्थः। ^{v}ऊती ऊत्या। ^{v}तव ऊत्या अवनेन पालनेन ^{v}रयिं धनम् ^{v}अश्याम। हे ^{v}रयिवः धनवन्, ^{v}सुवीरं सुपुत्रम् अश्याम। ^{v}ते त्वत्प्रसादात् ^{v}वाजम् अन्नम्। वाजतिरर्चतिकर्मा। ^{v}अभि ^{v}वाजयन्तः वाजमभ्यर्चयन्तो वयं वाजम् ^{v}अश्याम। हे श्रीभगवन्नग्ने हे ^{v}अजर जरारहित, ^{v}अजरं जराशून्यं ^{v}द्युम्नं यशः त्वत्प्रसादात् जरारहितां कीर्तिम् ^{v}अश्याम ॥७॥

---

9. B1 पाहि for पातु

16. P1 after सप्तमः adds द्वे कामवत्यौ त्रिष्टुभौ। आग्नेय्यौ भरद्वाजस्यार्षम्

18. P1 तवेति for तवोती

चित्यग्न्युपस्थानादिमन्त्राः]

आ– [श्रीभगवन् vअग्ने], वयं यं यं कामं कामयामहे तं तं vकामम् vअश्याम त्वत्प्रसादात् vव्याप्नुयामः । 'तवोती' । व्यत्ययः । vतव ऊत्या अवनेन पालनेन vरयिं धनम् vअश्याम । हे vरयिवः धनवन् हे धनसंपन्न, vसुवीरं सुपुत्रम् अश्याम । vते त्वत्प्रसादात् vवाजम् अन्नम् । वाजतिरर्चतिकर्मा । vअभि vवाजयन्तः वाजमभ्यर्चयन्तो वयं वाजम् vअश्याम । हे श्रीभगवन्नग्ने vअजर जरारहित, vअजरं जराशून्यं vद्युम्नम् अजरं यशः त्वत्प्रसादात् जरारहितां कीर्तिम् vअश्याम ॥४१॥

वयं ते॑ अ॒द्य र॑रि॒मा हि काम॑मुत्ता॒नह॑स्ता॒ नम॑सोप॒सद्य॑ ।
यजि॑ष्ठेन॒ मन॑सा यक्षि दे॒वानस्रे॑धता॒ मन्म॑ना॒ विप्रो॑ अग्ने ॥८॥

व॒यम् । ते॒ । अ॒द्य । र॒रि॒म । हि । काम॑म् ।
उ॒त्ता॒नह॑स्ता॒ इत्यु॑त्ता॒नऽह॑स्ताः । नम॑सा । उ॒प॒सद्येत्यु॑प॒ऽसद्य॑ ।
यजि॑ष्ठेन । मन॑सा । य॒क्षि॒ । दे॒वान् । अस्रे॑धता । मन्म॑ना । विप्रः॑ । अ॒ग्ने॒ ॥ छ्यैम् ॥८॥

सा– अथाष्टमः– 'वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य । यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने' इति । हे श्रीभगवन् vअग्ने, vअद्य अस्मिन्नहनि vहि यस्मात् vते तुभ्यं vकामं यथेष्टं त्वदपेक्षितं हविः vररिम दत्तवन्तः । कथमिति । vउत्तानहस्ताः हविषः पूरणेन विस्तृतपाण्यङ्गुलयः अबद्धमुष्टिकाः सन्तः, कृताञ्जलयो वा त्यक्तकृपणभावा वा । vनमसा प्रणिपातेन vउपसद्य उपसंगम्य vयजिष्ठेन यष्टृतमेन यजननिष्ठेन श्रद्धायुक्तेन vमनसा तुभ्यं कामं हविः ररिमेति संबन्धः । हे श्रीभगवन्, त्वमपि vदेवान् vयक्षि यज देवानां स्वं स्वं भागं प्रयच्छेत्यर्थः । हे अग्ने, vविप्रः । प्रा पूरणे । इष्टापूर्तिकरस्त्वं vमन्मना मन्मनांसि अस्माकं मनांसि vअस्रेधता मनोनियन्ता भव ॥८॥

आ– 'वयं ते' इति । हे श्रीभगवन् vअग्ने, vअद्य अस्मिन्नहनि vहि यस्मात् vते तुभ्यं vकामं त्वदपेक्षितं हविः vररिम । 'रा दाने' । दत्तवन्तः । कथं कथमिति । vउत्तानहस्ताः पुरतो विस्तृतपाण्यङ्गुलयः अबद्धमुष्टिकाः सन्तः कृताञ्जलयो वा vनमसा प्रणिपातेन vउपसद्य उपसंगम्य vयजिष्ठेन यजननिष्ठेन vमनसा श्रद्धाभक्तियुक्तेन मनसा तुभ्यं

14. P1 after ररिम ins. रा दाने

15. S2 om. त्यक्तकृपणभावा वा; P1 after °कृपणभावा वा adds असदो विशेषणम्

16. S2 om. यष्टृतमेन

18. P1 after भव adds किंभूतस्त्वम् अस्रेधता असवतानल्पवेगेन देवतायाथात्म्यचिन्तनसंतानैकरसेन मन्मना मननेन विप्रो मेधावी सन्निति भाष्यान्तरम् ।

कामं हविः ररिमेति संबन्धः। हे श्रीभगवन् अग्ने, त्वमपि [v]देवान् [v]याक्षि यजासि देवानां स्वं स्वं भागं प्रयच्छेत्यर्थः। 'अस्रेधता मन्मना विप्रः'। हे श्रीभगवन् अग्ने, [v]विप्रः। इष्टापूर्तिकरस्त्वां [v]मन्मना मन्मनांसि अस्माकं मनांसि [v]अस्रेधता मनोनियन्ता भव ॥४२॥

धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।
सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे ॥९॥

धामच्छादिति धामऽछत् । अग्निः । इन्द्रः । ब्रह्मा । देवः । बृहस्पतिः ।
सचेतस इति सऽचेतसः । विश्वे । देवाः ।
यज्ञम् । प्र । अवन्तु । नः । शुभे ॥ छुम् ॥९॥

सा- अथ नवमः- 'धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः । सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे' इति । धामानि स्थानानि ऊनानि छादयति पूरयति अतिरिक्तानि च यः समीकरोति सः [v]धामच्छत् [v]अग्निः सर्वज्ञः । [v]इन्द्रः परमैश्वर्ययुक्तः । [v]ब्रह्मा चतुर्मुखः । [v]देवः देवनादिगुणयुक्तः । [v]बृहस्पतिः देवगुरुः । [v]सचेतसः समनस्काः ज्ञानसंपन्नाः । [v]विश्वे सर्वे [v]देवाः [v]नः अस्माकं [v]यज्ञं [v]शुभे शोभनात्मके श्रीभगवद्विश्वे स्थितं यज्ञं प्रकर्षेण [v]अवन्तु सफलं कुर्वन्तु । यद्वा- अन्यूनातिरिक्तं कुर्वन्तु । नः अस्माकं शुभे स्विष्टे च स्थाने स्थापयन्तु ॥९॥

त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः ।
रक्षा तोकमुत त्मना ॥१०॥ (५) ॥

त्वं यविष्ठ ॥ त्व ॥ १० ॥

[वाजस्य नु सप्त ॥७॥ ऋताषाट् त्रयोदश । अग्निं युनज्मि सप्त ॥७॥ यदाकूतान्नव ॥९॥ वार्त्रहत्याय दश ॥१०॥ पञ्चानुवाकेषु षट्चत्वारिंशत् ॥४६॥] [प्राणा वाजा होता यज्जा षळ्चत्वरिंशत् ॥]

[इति शुक्लयजुर्वेदकाण्वसंहितायां विंशतितमोऽध्यायः ॥२०॥]

---

9. P1 after नवमः adds द्वे वैश्वदेव्यौ अनुष्टुप्गायत्र्यौ उद्गीथस्यार्षम् ।

19. D2 om. प्राणा वाजा होता यज्जा षट्चत्वारिंशत् ; D1 after षट्चत्वारिंशत् adds ऋताषाड्वै चौषधयः संहितश्च मरीचयः सुषुम्णः सूर्यरश्मिश्च नक्षत्राणीषिरो ह्यपः ।१। भुज्युः सुपर्णो यज्ञश्च दक्षिणा चाप्सरसस्तथा । प्रजापतिश्च ऋक्सामनि स नो ज्ञेयः क्रमादिति ।२।

चित्यग्न्युपस्थानादिमन्त्राः]

सा– अथ दशमः– ' त्वं यविष्ठ दाशुषे नॄ॑ः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ' इति अयं मन्त्रश्चतुर्दशेऽध्याये व्याख्यातः ॥१०॥

इति विंशेध्याये पञ्चमोऽनुवाकः ॥५॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो दद्याद्विद्यातीर्थमहेश्वरः ॥१॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे शुक्लयजुःकाण्वसंहिताभाष्ये विंशोऽध्यायः समाप्तः ॥२०॥

पूर्वार्धः समाप्तः ॥

आ– ' धामच्छदग्निः ' इति, ' त्वं यविष्ठ ' इति च द्वे वैश्वदेव्यौ अनुष्टुब्-गायत्र्यौ । उत्कीलस्यार्षम् ॥

' धामच्छत् ' । धाम स्थानं सुवर्णादिरूपेण छादयतीति [v]धामच्छत् [v]अग्निः । [v]इन्द्रः परमैश्वर्ययुक्तः । [v]ब्रह्मा चतुर्मुखः । [v]देवः देवनादिगुण-[युक्तः] । [v]बृहस्पतिः देवगुरुः । [v]सचेतसः सम्यङ्ज्ञानसंपन्नाः । [v]विश्वे सर्वे [v]देवाः । ' यज्ञं प्रावन्तु नः शुभे ' । [v]नः अस्माकं [v]यज्ञं [v]शुभे शोभनात्मके श्रीभगवद्विषये स्थितं यज्ञं प्रकर्षेण [v]अवन्तु सफलं कुर्वन्तु ॥४३॥

' त्वं यविष्ठ ' इति । व्याख्यातम् ॥४४॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवपुरीपूज्यपादपरमकारुण्यासादित-श्रीकृष्णभक्ति-साम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदि-श्रीमदानन्दबोध-भट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसंग्रहे विंशतितमोऽध्यायः ॥

इत्यग्निप्रकरणं समाप्तम् ॥

---

2. S2 om. व्याख्यातः

3. S2 om. इति विंशेऽध्याये

4. S2 om. वेदार्थस्य ... महेश्वरः [L 5]

7. P1 after वेदार्थप्रकाशे adds काण्वसंहितायां and for शुक्लयजुःकाण्वसंहिताभाष्ये; S2 समाप्तिमगमत् for समाप्तः

8. P1 om. पूर्वार्धः समाप्तः

18. B1 om. °बोध°; B1 °भाष्ये for °भाष्यसंग्रहे

19. B1 after समाप्तम् adds अथ सौत्रामणी